SGDF

SGDF
Sri Gargeshwari Digital Foundation

SGDF
Sri Gargeshwari Digital Foundation

ಕಟ್ಟುವಿಕೆ ಸಂಖ್ಯೆ........................ E-776

SGDF
Sri Gargeshwari Digital Foundation

॥ श्रीः ॥

1109
1131

श्रीगणेशाय नमः ।

रघुनाथपदद्वन्द्वं सीतया चर्चितं सदा ॥
स्मराम्यहं परानन्ददायिनं लोकपावनम् ॥ १ ॥
यो विभुर्विश्वमखिलं स्वीकृत्य समदृष्टिताम् ॥
सदा रक्षतु रामस्स ममास्तु शरणं हरिः॥ २ ॥
प्रणम्य मारुतिंवीरं गुरूनथ सरस्वतीम् ॥
धातुजप्रत्ययानांवै व्याख्या सन्तन्यते मया ॥ ३ ॥

ग्रन्थमध्येऽपि मङ्गलाचरणस्यावश्यकर्त्तव्यतान्दर्शयति । मङ्गलादीनीति । जयत इत्यस्य विपदसापेक्षत्वेनासामर्थ्यशङ्कांवारयति । उपसर्गाणां द्योतकतयेति । नियमेन स्वार्थसाकाङ्क्षेतरार्थवाचकशब्दभिन्नार्थवाचकशब्दसापेक्षा हि सामर्थ्याभावप्रयोजिका सात्र नास्ति, उपसर्गाणां द्योतकत्वादिति भावः । तरबन्तार्थं प्रति तिङन्तार्थस्य प्राधान्येन प्रधानस्य सापेक्षत्वेऽपि वृत्तिर्भवत्येवेत्यपि बोध्यम् । ननु पूर्वार्द्धेऽपि तृतीयाध्यायस्यस्य क्विनः स्पृशोऽनुदके इत्यनेन व्युत्पादनात्तुर्य्यपञ्चमाध्यायवर्त्तिन इत्येतावन्मात्रप्रतिपादनरुद्धमिव प्रतिभातीत्यत आह । प्राधान्येनेति । तत्रैतेषां प्रसङ्गात्कथनेऽपि नासङ्गतिरिति भावः । ननूणादिप्रत्ययानां तृतीयाध्यायगोचरत्वाभावात्प्रतिज्ञाविरोध इत्यत आह । उणादीनामिति । तत्त्वम् । तृतीयाध्यायगोचरत्वम् । उणादिपाठस्तु बहुलग्रहणसाध्यानां कार्य्याणां प्रदर्शनार्थमेव । अत एवात्र गोचरपदमुपात्तम् । नतु पठितमित्युक्तम् । ननु वर्त्तमानक्रियावृत्तेरित्यसङ्गतम् । वर्त्तमानत्वस्य शब्दप्रयोगाधिकरणक्षणवृत्तित्वरूपत्वात् । क्रियाया-

SGDF
Sri Gangeshwari Digital Foundation

स्य पूर्वापरीभूतावयवकसमुदायरूपतयाऽवयवानां चाशुविनाशितया सा-दृशसमुदायस्य निरुक्तवर्त्तमानत्वं स्थिरसम्बन्धि नोपपद्यत इत्यत आह । वर्त्तमानकालेति । वर्त्तमानः कालो यस्याः सा चासौ क्रियेत्यर्थः । न च कालगतमपि वर्त्तमानत्वं यदि प्रारब्धापरिसमाप्तत्वघटितमेव तर्हि पूर्वोक्तानुपपत्तिस्तदवस्थैवेति वाच्यम् । बौद्धतादृशसमुदायाधिकरणस्य जन्यकालस्य सम्भवात् । न च वर्त्तमानत्वं प्रत्ययवाच्यमेवास्त्विति वा-च्यम् । लडादीनामश्रूयमाणतया तदादेशानामेव वाचकत्वस्य वाच्यत्वा-त् । एवं सति तेषां बहूनां काले शक्तिकल्पनापेक्षया लाघवाद्धातोरेव काले शक्तिः प्रत्ययो द्योतक इत्येव युक्तम् । ननु लडादीनां धातोर्विधा-नेन धातोरित्यधिकारसूत्रमिहैव वक्तुमुचितमिति चेन्न । तस्याकरणेपि यङ्विधिस्थधातुग्रहणस्योत्तरत्र सम्बन्धेनेष्टसिद्धिर्भविष्यतीत्यभिप्रायात् । अकारस्येति । लटश्शतृशानचावित्यत्र विशेषणार्थतया चरितार्थस्येत्या-दिः । कालस्य द्योत्यताया दर्शितत्वाद्वाच्यार्थतामाह । लः कर्म्मणी-त्यादि । एतेषामपि द्योत्यत्वमन्यत्र स्फुटम् । सम्प्रति तु वाच्यत्वाभिप्रा-येणोक्तिरियम् । रुत्वं नेति । मिबित्यत्र जश्त्वन्नेत्यपि बोध्यम् । नागमल्ल-मिट् इति । टकारदर्शनेन तु आगमत्वशङ्का जन्यते । सा साहचर्य्यान्निरनीया टकारोच्चारणन्तु इटोऽदित्यत्रास्यैव ग्रहणं स्यादित्येवमर्थम् । तत्र हि लि-ङस्सीयुडितिसूत्रादनुवृत्तस्य लिङ इति विशेष्यस्य सत्त्वेन टकाराभावे वर्णग्रहणे तदन्तविधेस्सत्त्वेनेवर्णान्तस्य लिङ इत्यर्थः स्यात् । तथा चैधेम-हीत्यत्रापि स्यात् । मह्ङिङो ङकारस्तिङ् प्रत्याहारसिद्ध्यर्थोऽत एवायं समुदायानुबन्धो नावयवस्यानुबन्धस्तेन संपप्रच्छिमह इत्यत्र सम्प्रसारणं न । क्वचित्तु समुदायानुबन्धोऽप्यवयवानुबन्धो भवति तस्थस्थमिपामितिभेदे-नोपादानेन ज्ञापितस्य समुदायानुबन्धस्यावयवानुबन्धत्वं नास्तीतिवच-नस्य ज्ञापकसिद्धत्वेनानीत्यत्वात् । तेनायमश्चित्कार्य्यसिद्धिः ॥ अत एव । प्रत्यय इत्यादिसूत्रत्रयस्याप्युपस्थितेरेव । मच लडादिलकारस्येत्सञ्ज्ञा

SGDF
Sri Gurugobhuwan Digital Foundation

कुतो नेति वाच्यम् । फलाभावात् । लितीति स्वरस्तु न फलम् । णलो लित्वाद् ज्ञापकात् । तेषामश्रवणन्तु तिबाद्यादेशेनैव सिद्ध्यति । आदेशापेक्षयेति । एवं चादेशबोधकपदस्य नियताकाङ्क्षासत्त्वेनादेशसामान्यबोधकस्यादेशा इति शब्दस्याध्याहारेण वाक्यार्थबोधः लादेशा इत्यस्य लकारमात्रोद्देशेनविहिता इत्यर्थस्तत्फलमाह । सिजादय इति । अस्येति । सूत्रस्येति शेषः । परस्मैपदिष्वित्यादिलिङ्गादित्यत्रादिना आत्मनेपदसञ्ज्ञां पुरुषसञ्ज्ञा न बाधते इत्यत्र लिङ्सिचावात्मनेपदेष्विति सूत्रस्य ज्ञापकत्वं सूचितम् । परस्मैपदात्मने पदसञ्ज्ञयोस्तु बाध्यबाधकभाव आकडारीयत्वाद्भवत्येव तदाह । एकसञ्ज्ञाधिकारेति । तङानावात्मनेपदम् ॥ अत्र लस्येत्यनुवृत्त्या लादेशस्यानो ग्रहणम् । तेन चानश् परस्मैपदिभ्योपि भवति । ननु येभ्यो धातुभ्य आत्मनेपदं भवति तन्निरूपणावसरे एवात्मनेपदविधायकसूत्रोपन्यास उचित इत्यत आह । शेषपदार्थज्ञानायेति । तेन । तिङन्तादितिव्याख्यानेन । तङ्निरूपिताङ्गत्वानापत्तिरिति ॥ यस्मात्प्रत्ययविधिस्तदादेरेवाङ्गत्वात् । उपदेशेऽजनुनासिक इतिसूत्रादुपदेशपदमनुवर्त्तते । तच्चानुदात्तङित इति द्वन्द्वार्थविशेषणम् । अन्वयवविशेषणत्वे द्वन्द्वो न स्यात् । एवं चानुदात्तांशे तत्स्वरूपानुवादकं न तु व्यावर्त्तकं ङिदंशे तु चिनुतश्च कुटिषतीत्यस्य सिद्ध्ये तद्विशेषणमातिदेशिकङित्वस्योभयत्र सत्त्वादेवं च यदंशे व्यावर्तकंविशेषणम् भवति तद्विशेषणत्वमेवोचितमित्याशयेन मूले । उपदेशे यो ङिदिति व्याख्यातम् । केचिदिति । अत्रारुचिबीजन्तु वक्ष्यमाणरीत्या धातोरितिव्याख्यानस्यावश्यकत्त्वेन केवलयङ आत्मनेपदस्याप्रसक्तिरेवेति यङन्तस्याङ्गत्वम्भवत्येव । तदन्तविधौ मानन्तूपदेशपदसम्बन्धे न व्याख्यानमेवेति । न च हलन्त्यमिति सूत्रव्याख्यानावसरे उपदेशपदे स्वरितत्वाभावकथनविरोध इति वाच्यम् । इत्सञ्ज्ञाविधौ सम्बन्धप्रयोजकं तन्नास्तीत्यर्थात् । मूले धातोरिति । भूवाद इति सूत्राद्धातव इत्यस्य प्रथमा-

SGDF
Sri Gargeshwari Digital Foundation

न्तस्यानुवृत्तावपि तदनुदात्तङित इतिपञ्चम्यन्तेन सामानाधिकरण्यानुरोधा-त्पञ्चम्या विपरिणम्यत इत्याशयेन इति केचित्। वस्तुतस्त्वेतत्प्रकरणमनुदात्तङितस्तिप्तस्झि लस्य द्वेयकयोरितिसूत्राणामेकवाक्यतयाऽनुदात्तङितो धातोर्लस्य स्थाने एकत्वे गम्ये आत्मनेपदसंज्ञकस्त इति भवतीत्येवमेव विधायकम्। वृद्भ्यस्स्यसनोरितिसूत्रारम्भसामर्थ्यादन्यथा लावस्थायामेव स्यप्रत्ययेन व्यवधानादनुदात्तङितः परत्वाभावादस्याप्राप्तया पदद्वयसिद्धौ वृद्भ्य इत्यस्य वैयर्थ्यापत्तेः। एकवाक्यतायान्तु धातोरितिविहितविशेषणं तस्मिन्सूत्रे स्य इति तु विषयसप्तमी बोध्या। एवं च चिनुतइत्यादावनुदात्तङितो विधानाभावान्नात्मनेपदप्राप्तिः। चुकुटिषतीत्यादिष्वपि गाङ्कुटादिभ्य इत्यनेन सनो ङित्वविधानेपि धातुत्वस्य सन्नन्तसमुदायवृत्तितया तस्य च समुदायस्यातिदेशिकङित्त्वाभावेन न लकारस्य ङितो विधानमिति नात्मनेपदप्राप्तिरित्युपदेश इत्यस्यैतत्सूत्रे न सम्बन्धः॥ न चैवं यङन्तादात्मनेपदानापत्तिः यङन्तसमुदायस्य ङित्वविरहादिति वाच्यम्। अङ्गुल्यादिवदवयवावयवस्य समुदायावयवत्वेन यङन्तस्यापि ङित्त्वात्। यदि च नैवं कल्पना तदापि नानुपपत्तिः गाङ्कुटादिभ्य इति सूत्रे ङिदितिपदं ङिद्वदित्यस्यार्थे सतया सत्यभामेतिवद्वर्त्तते। ङिद्वदित्यत्र च सप्तम्यन्तात्षष्ठ्यन्ताच्च वतिरित्याश्रीयते न तु पञ्चम्यन्तादिति सर्वेष्टसिद्धिरत एव भाष्ये चुकुटिषतीत्यत्रात्मनेपदमाशङ्क्य सिद्धन्तु पूर्वस्य कार्य्यातिदेशादिति समाहितम्। तदुपपादनग्रन्थे च सप्तम्यर्थेपि वतिर्दृश्यते इत्युक्तम्। एवं च ङिदन्तादात्मनेपदमित्युक्तावपि न क्षतिः। अपिशब्दात्सप्तम्यन्तात्। तेन भवतामित्यादावतो ङित इत्यस्य प्रवृत्तिः अस्मिन्पक्षे आत्मनेपदशब्दादौ भाविसञ्ज्ञा ज्ञेया। एतेन हलन्त्यमितिसूत्रे उपदेशपदे स्वरितत्वाभावप्रतिपादकेन ग्रन्थेन प्रकृतसूत्रे उपदेशपदसम्बन्धाभिप्रायेण व्याख्यानपरग्रन्थेन विरोध इत्यपास्तम्। प्रकृतग्रन्थस्य मूलकाराभिप्रायवर्णनपरत्वात्। अत एवाह केचिद-

SGDF
Sri Gargeshwari Digital Foundation

ति। तदेवेति। एवकारेण धात्वर्थफलव्यवच्छेदः॥ तदुक्तम्। यस्यार्थस्य प्रसिद्ध्यर्थमारभ्यन्ते पचादयः॥ तत्प्रधानं फलं तेषां न लाभादि प्रयोजनमिति॥ तदर्थस्वद्योतकत्वम्। कर्तृगामितादृशफलकत्वद्योतकत्वम्। यजमानो यजते इत्यादाविति। अत्रादिना पचत इत्यादि संग्रहः। हेलाराजोक्तेरिति। एवं च पचत इत्यादौ नात्मनेपदविषये णिजापत्तिः॥ ननु प्रेरणायाश्चेतनधर्मत्वाद्भिक्षादीनामचेतनत्वाद्भिक्षा वासयतीत्यसंगतमत आह। भिक्षा वासयतीति। तत्समर्थाचरणम्। धात्वर्थफलोत्पत्तिसमर्थाचरणम्। भिक्षादिनिष्ठं तत्सुलभत्वादिरूपम्। प्रेरणाया एव णिजर्थत्वे स्वसान्तरीयहेलाराजीयसम्मतिमप्याह। केषाञ्चिदिति॥ अत एव। णिचः प्रेरणावाचकत्वादेव। अत्र केषां चिदित्यनेन सूचितामरुचिम्प्रकटयन्नाह। एवं चेति। कर्तुः। नापि तस्य। सन्निधानम्। तद्गुरोऽत्रस्यानादिरूपम्। ननु यद्यात्मनेपदेन सह णिचो विकल्प उच्यते तदा प्रेरणायास्सत्त्वेपि णिजभावस्य क्रीणीष्वेत्यत्रोपपत्तिर्भवति भवन्मते तु कथमत आह। क्रीणीष्वेत्यादि। न तु स तदर्थ इति॥ पुत्रस्य सन्निधानं प्रवर्तनं न धात्वर्थः किन्तु परायत्तत्वनिवृत्त्यादिमूलको व्यापार एव धात्वर्थः॥ ननु स्वामिदासौ पचेते इत्यत्र भृत्यस्य वेतनलाभोद्देश्यकप्रवृत्तिसत्त्वान्निरुक्तफलस्य कर्तृगामित्वाभावात्कथमात्मनेपदमत आह। स्वामिदासाविति। एवमन्यत्राप्युपपत्तिमाह। कमलवन इत्यादि। तिङस्त्रीणित्रीणि। मूले यथासंख्योपपत्तये षष्ठ्या विपरिणतयोः परस्मैपदात्मनेपदशब्दयोरनुवृत्त्योभयोः पदयोरितिव्याख्यातमेवं चानुवृत्तिबलादेव पुरुषसञ्ज्ञायास्समावेशे सिद्धे सिचि वृद्धिरित्यस्य ज्ञापकस्ववर्णनासंगतिरिति तु न। प्रथमादिशब्दानां कृतद्वन्द्वानामेकशेषेणैव सामञ्जस्ये तयोः पदयोः स्वरितत्वस्य विभक्तिविपरिणामस्य च कल्पने गौरवमित्यभिप्रायेण तथाभिधानात्। अत्र। तिङ्वाच्येति वाक्ये। अनुपयोगादिति। तस्यास्समाससञ्ज्ञादिप्रयोजकतया तत्सम्भवस्येहाभावा-

SGDF
Sri Gargeshwari Digital Foundation

दिति भावः। गौणत्वादिति। प्रकृतौ सादृश्यमूलकाभेदारोपेण वर्त्तमानत्वात्। त्वत्कल्प इत्यत्र त्वस्तिसामानाधिकरण्यमित्याह। त्वत्कल्प इत्यादि। नन्वेवं त्वत्कल्पेतिसमुदायस्य तिङ्वाच्यकारकवाचित्वं न तु युष्मच्छब्दस्येति कथमेतदिति शङ्कते। नन्विति। युष्मदिसाधन इति। शब्दार्थयोस्तादात्म्यादेवमुक्तम्॥ ननु निरुक्तं सामानाधिकरण्यं तान्तस्य युष्मच्छब्दस्य च सम्भवति न तु युष्मदर्थेन सहेति युष्मदर्थेन यत्रेत्यसंगतमत आह। लबोध्यार्थेति। तदर्थप्रवृत्तिनिमित्तयोस्सामानाधिकरण्यन्त्वेकाधिकरणवृत्तिरूपम्॥ ननु भवच्छब्दस्यापि युष्मच्छब्दसमानार्थकत्वाल्लबोध्यार्थसमानाधिकरणयुष्मदर्थबोधकशब्दे उपपदे इत्यर्थे भवच्छब्दप्रयोगेऽपि मध्यमापत्तिरत आह। सलिङ्गस्येति। चेतनाचेतनसाधारणस्येति। भस्मोद्धुलनभद्रमस्तु भवते रुद्राक्षमाले शिव इत्यादावचेतनस्य भवति भिक्षान्देहीत्यादौ चेतनस्य प्रतीतिरिति भावः। चेतनैकविषयत्वादिति। अभिमुखीकरणस्य तत्रैव सम्भवादिति भावः। नन्वेवं युष्मच्छब्दान्नियमेन सम्बोधन एव प्रथमा स्यादत आह। युष्मदश्चेति। त्वं पचसीत्यत्र क्रियाविनियोगाभावेन विशेषणाभावाद्विशिष्टाभावः। युष्मच्छब्दस्य चेतनैकविषयत्वे हरिसम्मतिमप्याह। तदुक्तमिति। प्रत्यक्त्वमहङ्कारानास्पदचेतनत्वम्। अयम्भावः। अपरत्वमहङ्कारास्पदचेतनत्वम्। ननु चैतन्ययुक्तस्य चेन्मध्यमपुरुषेणाभिधानन्तदाऽचेतनविषये शृणोत ग्रावाण इत्यादौ कथमत आह। शृणोतेति। परत्वादुत्तम एव। युष्मदस्मदोस्सहविवक्षायामेकशेषस्तत्रास्मदः शेषसत्वात्तदीयप्रवृत्तिनिमित्तेन युष्मदर्थस्याप्यभिधानादुत्तमो न्याय्य एव। यत्र त्वेकशेषेण न प्रयोगस्तत्रोभयोरपि सूत्रयोः प्राप्तौ परत्वादुत्तम एवेत्यर्थः। शेषे प्रथमः॥ मूले मध्यमोत्तमयोरविषय इति। एवमभिधानेन युष्मद्भिन्नसामानाधिकरण्ये प्रथम इति लभ्यते। ननु यत्र युष्मद्यदत्तादिशब्दयोः सह विवक्षायामेकशेषस्तत्र शेषसामानाधिकरण्य-

SGDF
Sri Gangeshwari Digital Foundation

सत्त्वात्मध्यमापत्तिरत आह । देवदत्तश्चेति । शेषे इत्यस्य न पूर्वोक्तार्थः किन्तु युष्मदादिसामानाधिकरण्याभावे इत्यर्थः एवं च नोक्तदोषः । तथाहि । यत्र देवदत्तश्च त्वं चेतिक्रमेण सह विवक्षा तत्र त्यदादीनि सर्वैर्नित्यमिति युष्मच्छब्दस्यैकशेषेण प्रयोगाद्देवदत्तपदार्थस्यापि युष्मच्छब्दप्रवृत्तिनिमित्तप्रकारिकैवोपस्थितिरिति न प्रथमः किन्तु मध्यम एवेति । उपयुक्तासमभिव्याहृतेति । उपयुक्तो नामासमभिव्याहृतो य उपयुक्तादन्यस्य शेष इत्यर्थः । उपयुक्तः प्रकृते पुरुषनियामकत्वेन प्रक्रान्तो युष्मच्छब्दोऽस्मच्छब्दश्च तेनासमभिव्याहृतस्तत्प्रतिपाद्यतावच्छेदकप्रकारकप्रतीतिजनको यः शब्दस्तस्मिन्प्रयुज्यमानेऽप्रयुज्यमाने वा प्रथमो भवति प्रकृते तु न तथेति भावः । ननु सहविवक्षायामेकशेषे यद्यपि पूर्वोक्तरीत्या निर्वाहस्तथापि यत्र न सहविवक्षा त्वं च देवदत्तश्चेति तत्र प्रथमः प्राप्नोतीत्यत आह । एवं चेति । निरुक्तसूत्रार्थस्याभिप्रेतत्वे चेत्यर्थः ॥ वाक्येपीति । एकशेषाभाव इत्यर्थः । युष्मच्छब्दप्रवृत्तिनिमित्तप्रतीतेस्तत्रापि सत्त्वादिति । भवथ इत्येवेति । तत्राप्युपयुक्तस्य युष्मच्छब्दस्य समभिव्याहारसत्त्वात् । न च द्वाभ्यां युष्मद्देवदत्तशब्दाभ्यां समूहालम्बनात्मिकैका यत्र प्रतीतिस्तत्र देवदत्तशब्दस्य युष्मच्छब्दप्रतिपाद्यतावच्छेदकधर्मप्रकारकोपस्थितिजनकतया न निरुक्तं शेषत्वमिति । प्रथमाप्रसङ्गेपि यत्र क्रमेण तत्तद्धर्म्मप्रकारिकोपस्थितिस्तत्र देवदत्तशब्दस्य युष्मच्छब्दार्थतावच्छेदकधर्म्मप्रकारकोपस्थितिजनकत्वमस्त्येवेति शेषत्वात्प्रथमः प्राप्नोतीति वाच्यम् । तत्रापि शाब्दबोधस्योपस्थितिद्वयजन्यस्यैकस्य वक्तृतात्पर्यविषयत्वेन उपयुक्तपदप्रयोज्यशाब्दबोधस्य देवदत्तशब्दप्रयोज्यस्य चैकत्वाच्छाब्दबोधीयक्रियानिष्ठविषयतामादायोपयुक्तसमभिव्याहृतत्वस्य वक्तुं शक्यत्वात् । पूर्वोक्तसमभिव्याहारपदनिरुक्तावुपस्थितित्वेन निवेशमकृत्वोपयुक्तपदार्थतावच्छेदकनिष्ठविषयतानिरूपितविषयतानिरूपिता या विषयता तदवच्छिन्नविषयतानि

SGDF
Sri Gangeshwari Digital Foundation

रूपितविषयताशालिबोधाजनकस्य शेषपदेन ग्रहणात् । प्रथमा विषयता प्रवृत्तिनिमित्तनिष्ठप्रकारतारूपा द्वितीया आश्रयनिष्ठा तृतीया क्रियानिष्ठा बोध्या । न चोपयुक्तासमभिव्याहार उपयुक्तपदाव्यवधानेनाप्रयुज्यमानत्वरूप एवास्तु किमुक्तविषयताघटितनिर्वचनेनेति वाच्यम् । त्वञ्च धनिको महान्देवदत्तश्च ब्राह्मणगणान् भोजयथ इत्यत्र प्रथमापत्तेः । न चोपयुक्ताघटितवाक्यघटकत्वमुपयुक्तासमभिव्याहृतत्वमस्त्विति वाच्यम् । घटितत्वस्य वाक्यत्वस्य घटकत्वस्य च प्रवेशेन तदर्थस्यातिगुरुत्वात् । यदा तु देवदत्तः पचति त्वं चेतिरीत्या समुच्चयविवक्षा तत्र देवदत्तस्य शेषत्वात्प्रथमो भवति । द्वितीयस्य त्वावृत्या पुरुषविपरिणामेनान्वयस्तत्र वाक्यभेद एव । यत्र तु युष्मदस्मद्भ्यां भवच्छब्देन च सहविवक्षा तत्र मध्यमोत्तमावेवेत्याह । भवच्छब्देनेति । केचित्तु शेषे प्रथम इति सूत्रस्य युष्मदस्मदी यत्र समानाधिकरणे न स्तस्तत्र प्रथम इतिविवरणमित्याहुः तन्न । युष्मदस्मदन्येषु प्रतिषेधः शेषत्वादिति पूर्वपक्षासंगतेः । उपयुक्तादन्य इत्यस्यैव शेषपदार्थत्वेन प्रसिद्धत्वाच्च । भूसत्तायामित्यत्र सत्तायामित्यस्य शास्त्रान्तरप्रसिद्धसत्ताजातिपरत्वे तस्यानित्यत्वेन तदनुकूलत्वं क्रियायां न सम्भवतीति धातुसञ्ज्ञानिष्पत्तिर्न स्यादतो व्याचष्टे । सत्तेहेति । आत्मधारणम् । स्वस्वरूपधृत्यनुकूलो व्यापारः अनुकूलत्वं च रोपितानारोपितसाधारणं विवक्षानिबन्धनमिति नित्यानित्यसाधारण्योपपत्तिरिति घटो भवति आत्मास्ति पर्वतास्तत्र देशे सन्तीति भवत्यर्थस्यास्तेः प्रयोगः संगच्छते। स्वस्वरूपधृतिश्च स्वरूपनिष्ठकालसम्बन्धरूपा इति फलव्यापारयोरेकनिष्ठत्वादकर्मकत्वोपपत्तिरिति। अस्तीत्युपपन्नस्यात्मधारणमाचष्टे इति निरुक्तं चेह प्रमाणम् । एवम् । मङ्गलार्थम् । अधिकारसामर्थ्यादिति । तत्प्रत्याख्यानपक्षे तु शमि धातोरित्यतो धातुग्रहणसम्बन्धो बोध्यस्तत्फलन्तु हरीनित्यादौ घेङितीति गुणस्य यकश्चाप्रवृत्तिः । ननु कर्त्रर्थे शब्भवतीत्येव कुतो नोक्तम-

SGDF
Sri Gargeshwari Digital Foundation

ति । द्योतकत्वं चैषां कर्त्राद्यर्थमात्रतात्पर्य्यग्राहकत्वम् । पञ्चकं धात्व-
र्थं इतिसिद्धान्ताभिप्रायेणाह । वस्तुतस्त्विति । कारकार्थश्चेति ॥ कारक-
रूप आख्यातार्थश्चेत्यर्थः । अत एव । क्रियायामभेदेनान्वयादेव ।
लान्तेनेति ॥ लान्तशब्दजन्यस्य शाब्दबोधस्य क्रियामुख्यविशेष्यकतया
विशेष्यक्रियायां चाभेदेन युष्मदर्थस्यान्वयादस्तिसामानाधिकरण्यमिति
भावः । भावकर्म्मणोरिति वर्त्तत इति । अन्यथा शपि परतो यक्
स्यात् । अन्यथा । कर्तरीत्यस्यानुपादाने । अपवादविप्रतिषेधेनेति । प्र-
कृतसूत्रे कर्तरीत्यस्यानुपादाने शबुत्सर्गः तस्य द्वावपवादौ यक्श्यनौ
तयोर्मध्ये श्यनपेक्षया यकः पूर्वस्मात्परत्वाद्दिवादिभ्यो भावे कर्मणि
वा श्यन् स्यादित्यर्थः । ननु यग्विधायकशास्त्रस्यापवादतया शब्बाधक-
त्ववच्छ्यन्बाधकत्वं भविष्यतीत्यत आह । यक् त्विति । सार्वधातु-
कार्द्धधातुकयोः । नन्वत्र लाघवात्पिदार्द्धधातुकयोरिति सूत्रमस्तु स-
प्तमीबहुवचने हरिषु भानुष्वित्यत्र नातिप्रसङ्गः आर्द्धधातुकसाहचर्येण
धातोर्विहिते प्रत्यये एवैतत्प्रवृत्तेः । धातोर्विहित इत्यस्य धातुसंश-
ब्देनेन विहित इत्यर्थः एतत्फलं णू स्तुतौ धू विधूनन इत्यादिभ्यः क्वि-
बन्तेभ्यः सप्तमीबहुचने गुणव्यावृत्तिः । न च पिदार्धधातुकयोरिति न्यासे
तसादावपि गुणो न प्राप्नोतीति सार्वधातुकमपिदिति व्यर्थमिति वाच्यम् उ
ष्ट इत्यादौ सम्प्रसारणार्थन्तस्यावश्यकत्वादिति चेन्न । साहचर्य्यपरिभाषा-
या अनित्यत्वस्य ज्ञापनार्थतया सार्वधातुकग्रहणस्यावश्यकत्वात् । एतद-
भिप्रायेणैव द्विस्त्रिश्चतुरितिसूत्रे सुच इति सूत्रयितुमुचितमित्युक्तम् ।
अन्यथा सार्वधातुकग्रहणाभावे तत्परिभाषाया अनित्यत्वज्ञापकतया द्वि-
स्त्रिश्चतुरिति न्यासस्यावश्यकत्वेन सुच इत्येव सूत्रयितुमुचितमित्यभि-
धानमसंगतं स्यात् । अत्र केचित् । सङि धातोरित्येव सूत्रमस्तु । स-
ङीति सनः सकारमारभ्य महिङो ङकारेण प्रत्याहारः । धातोरिति तुश-
ब्दव्यापारार्थं तेन काम्यचि न दोष इत्याहुः ॥ वस्तुतस्तु सञ्ज्ञाद्वयो-

SGDF
Sri Gargeshwari Digital Foundation

पादानमुभयत्र समानम्। सङ्घपदस्यानुपयुक्तस्योपादाने तच्छक्तिग्रहणस्यै-
ववाक्यार्थबोधमात्रफलकत्वकल्पने ज्ञानगौरवमिति यथाश्रुतसूत्रस्यैव ज्या-
यस्त्वमिति । झोन्तः । आयनेयीतिसूत्रात्प्रत्ययग्रहणमात्रमनुवर्तते न-
त्वादिग्रहणम् । तेन शयान्तै इत्यत्र शीङो झस्य लेटोडाटावित्याट्यपि
झस्यान्तादेशसिद्धिः तत्र प्रत्ययपदं षष्ठ्यन्तमनुवर्तते षष्ठ्यर्थश्चाव-
यवत्वन्तेन वर्णमात्रस्य स्थानित्वेपि शयान्तै इत्यत्राटि कृते पिझका-
रमात्रस्यान्तादेशसिद्धिः । प्रत्ययपदानुवृत्तेः फलमाह । तेनेति । झवि-
शिष्टस्य । प्रत्ययत्वपर्य्योप्त्यधिकरणस्येति शेषः । अयं चादेशो यादृश-
स्वरान्तः स्थानी तादृशस्वरान्त एव । तेन भवन्तीत्यत्रेकारान्तत्वमेवेति
नियमसिद्धिः । अतश्चैतस्यान्यादेशभावकल्पनायाः पुरःस्फूर्त्तिक-
त्वात् तस्मिन्पक्षे झोऽन्त इत्यत्र स्थान्यादेशयोरकारस्योच्चारणार्थकतया
तान्तादेशेन झकारमात्रस्य निवृत्तावपि पूर्वकालस्थितस्य स्वरस्यैव
श्रवणम्भवति । सम्प्रत्यपि तथैवेति रूपभेदो न । आनुमानिकादेशक-
ल्पनायां भाष्यमप्युपपद्यत इत्याह । अत एवेति ॥ उपदेशिवद्वचनेने-
ति । आयन्नादिषूपदेशिवद्वचनं स्वरसिद्ध्यर्थमित्युक्तेः । खप्रत्ययादौ न
प्रत्ययसञ्ज्ञासंनियोगशिष्टमाद्युदात्तत्वम् । किन्त्वीनादेशे कृते एवे-
ति स्वरस्याद्युदात्तत्वेनेकारस्य तप्सिद्धिरित्यर्थः ॥ प्रक्रियालाघवायेति ।
अन्यथा तत्रापि झकारमात्रस्य जुसादेशे कृतेपीकारस्य निवृत्त्यर्थमि-
तश्चेतिसूत्रस्यापि प्रवृत्तिः कल्प्येति गौरवम् । अत एव झेरितिसमुदा-
यबोधनमपि साधु सङ्गच्छते । भवन्तीत्यत्र क्ङितीति निषेधाभावाया-
ह । अत्र शवकारस्येति । ननु वार्णादाङ्गमिति न्यायादेकादेशात्पूर्व-
मेव गुणोऽस्त्वित्यत आह । वार्णादाङ्गमिति । अतो दीर्घो । सार्व-
धातुक इति किम् । अङ्गना केशव इति । अङ्गशब्दात्पामादित्वान्नः के-
शशब्दात्केशाद्व इति वप्रत्ययः । न च शृङ्गवृन्दाभ्यामारकन् हृदायचालु-
रन्यतरस्यामित्यनयोरकारोच्चारणन्तद्धिते दीर्घाप्रवृत्तौ ज्ञापकं भविष्यतीति

SGDF
Sri Gurgeshwari Digital Foundation

वाच्यम् । आकारोच्चारणेन तद्धिते परे दीर्घाप्रवृत्तिकल्पनापेक्षया क्लृप्तस्य सार्वधातुकपदस्य सम्बन्धकल्पन एव ज्ञापकं भविष्यतीत्याशयात् । ननु सुपि चेति सूत्रमस्मिन्सूत्रे सार्वधातुकपदानुवृत्त्यभावे नियमार्थम्भविष्यति । अधातुप्रत्यये यदि दीर्घस्तर्हि सुप्येवेति । तेनोक्तस्थले दीर्घाभावे सिद्धे तुरुस्तुशम्यमिति सूत्रात्सार्वधातुकपदानुवृत्तिर्व्यर्थेति चेन्न । सुपि चेतिसूत्राभावे यज्वभ्यां युवभ्यामित्यादावतो दीर्घो यञीति दीर्घापत्तेः । यञादित्वमात्रस्य निमित्ततावच्छेदकतया तस्य सुप्त्वव्याप्यत्वाभावेन सुप्त्वतद्व्याप्यधर्मावच्छिन्ननिमित्तकार्य्याप्राप्त्या नलोपस्सुबिति सूत्राप्रवृत्तेः । अत आदिति सिद्धे दीर्घपदं दीर्घ एव यथा स्यादित्येवमर्थन्तेन पचामीत्यादावन्त्यस्येति प्लुतो न । यत्तु आदिति कृतेपि तपरकरणसामर्थ्यात्प्लुताभावस्सिद्ध एवेति तन्न । करिष्यामीत्यत्रोदात्तस्य स्वशब्दस्यान्तरतम्यात्प्राप्तस्याप्युदात्तत्वस्य बाधापत्तेः । न च तपरकरणेनातत्कालव्यावृत्तिरेव क्रियत इति वाच्यम् । तपरस्तत्कालस्येति सूत्रस्य नियामकत्वन्तत्राणग्रहणानुवृत्त्या वाच्यम् । एवं चाकारस्यानण्त्वाच्छास्त्रेण तत्कालव्यावृत्तेः कर्तुमशक्यतया तपरत्वसामर्थ्यादेव सा वाच्या । एवं सति विजातीयस्यादेशस्य व्यावृत्तौ सति शिष्टस्वरबलीयस्त्वमन्यत्र विकरणेभ्य इति परिभाषाबलाद्धातुस्वरस्य शेषे तदेकवाक्यतापन्नशेषनिघातो न स्यादिति । यत्तु प्रकृतसूत्रे आआइत्याकारान्तरप्रश्लेषेण प्लुतस्य वारणं स्वरस्य च सिद्धिरित्याहुस्तन्न । आकारान्तरस्य प्रश्लेषे पदे गौरवापत्तेस्तदपेक्षया दीर्घग्रहणमेव युक्तमिति । एहि मन्य इति वाक्यद्वयघटकक्रियायामभिन्नकालत्वस्य प्रतीत्यर्थमेहीत्याकारणम् । तत्फलमाह । परिहासेति । आकारणं कृत्वा एवमुक्तौ परिहासः स्फुटो भवतीति । इत्येतादृशविषयताशालीति । यद्विषयताशालिज्ञानानन्तरं साक्षात्कृतमित्याकारिका ज्ञाननिष्ठविषयताशालिनी विलक्षणा प्रतीतिर्भवति तादृशविषयतानिरूपकं यद् ज्ञानं तदविषयत्वमित्यर्थः । तच्च ज्ञानमिन्द्रिय-

SGDF
Sri Gangeshwari Digital Foundation

त्वावच्छिन्नकरणताकं ज्ञानम् । तच्च सन्निकृष्टविषयकमेवेति सन्निकर्षाप्रयोज्यत्वं लब्धमिति परोक्षत्वं स्फुटमेव । वर्त्तमानध्वंसेति । शब्दप्रयोगाधिकरणकाले वर्त्तमानध्वंसेत्यर्थः । परस्मैपदानाम् । प्राचीनसम्मतं पक्षं दूषयति । णल इति । ध्वनितञ्चेदमिति । तत्र हि डा आ इत्याकारप्रश्लेषेण सर्वादेशत्वसम्पादनेन परिभाषास्यमनुबन्धपदमनुबन्धत्वयोग्यपरमित्येतद्ध्वनितमित्यर्थः । अत एव काणोर्विषये नानुबन्धकृतमसारूप्यमिति प्रवर्तते । अन्यथा ककारस्य प्रत्ययत्वज्ञानोत्तरमित्संज्ञाप्रवृत्तेर्विधानकालेऽनुबन्धत्वज्ञानाभावेन विकल्पस्स्यात् । ननु ण अलिति प्रश्लेषेपि पूर्वमतो गुण इति पररूपेऽनुपपत्तिस्तदवस्थैवेत्यत आह । प्रश्लेषसामर्थ्यादिति । स्वरार्थम् । लितीत्यनेन प्रत्ययपूर्वस्योदात्तत्वार्थम् । अन्यथा । णलो लित्त्वाभावे । उभयोः । द्विरुक्तधात्ववयवयोः । उदात्तत्वं स्यादिति । णलो लित्त्वाभावे तिप्सिपोः पित्त्वेनानुदात्ततया तयोः स्थाने जायमानयोर्णलोरान्तरतम्येनानुदात्ततया धातोरितिसूत्रेणोभयोरनुदात्तत्वं स्यादित्यर्थः । स चैकदैव लक्ष्यभेदाद्धारद्वयन्धातोरित्यस्य प्रवृत्तौ समावेश एवोदात्तद्वयस्य स्यादिति बोध्यम् । न चेष्टापत्तिः अनुदात्तं पदमेकवर्ज्जमितिपरिभाषैकवाक्यतया युगपदुदात्तद्वयस्य प्रयत्नं विना निष्टेरत एवाह । पर्य्यायेणेति । न च धातुत्वस्य परभागे विश्रान्तेः सिद्धान्ते स्वीकारात्कथं द्वित्वोत्तरमुभयत्र धातोरित्यस्य प्रवृत्तिरिति वाच्यम् । पर्य्यायेणेतिग्रन्थस्य द्वित्वोत्तरं पर्य्यायेणोभयोः स्यादिति न किन्तु द्वित्त्वात्पूर्वं परत्वाद्धातोरित्यन्तोदात्तत्वे तस्य द्विर्वचने सत्युदात्तद्वयस्य श्रवणापत्तेरित्यर्थात् । लित्त्वे तु सति शिष्टत्वात्परस्यैवोदात्तत्वमित्याशयः पर्य्यायेणेति तु द्वित्वेऽप्युभयोर्धातुत्वमिति वादिरीत्येति । भुवो वुक् । अचीत्यनुवर्त्तत इति । तेनाभूत् अभूरित्यत्र नातिप्रसङ्ग इति शेषः । न चात्र जातेपि वुगागमे वलि लोपेन निर्वाह इति वाच्यम् । अभूतामित्यादौ वुगागमस्य समुदायापेक्षत्वं वकारलोपस्य तु

SGDF
Sri Gurgeshwari Digital Foundation

तकारमात्रापेक्षत्वेनान्तरङ्गत्वमिति वलि लोपे कर्त्तव्ये वुकोऽसिद्धत्वेन वलि लोपाप्राप्तेः। किं च प्राचीनोक्तरीत्याऽभूदित्यादावपि बह्वपेक्षत्वेन बहिरङ्गत्वं वुको वक्तुं शक्यमिति तत्र हल्ङ्यादिलोपाप्राप्तिः। वलि लोपे वग्रहणप्रत्याख्यानपक्षे वलि लोपाप्राप्तेश्च। ननु शब्दान्तरस्य प्राप्त्या वुगागमोऽप्यनित्य इत्यत आह। कृताकृतेति। नन्वोः सुपीत्यत ओरित्यस्य सम्बन्धेन कृताकृतप्रसङ्गित्वमत आह। ओः सुपीति। फलाभावादिति। भाष्यकारादिसंप्रतिपन्नस्य लक्ष्यस्याभावादित्यर्थः। एतेन वुकोऽनित्यत्वसम्पादनेन गुणवृद्धिघटितलक्ष्यसिद्धिरेव फलमित्यपास्तम्। अस्वरितत्वाच्चेति। नन्विदं हुश्नुवोरितिसूत्रव्याख्यानावसरे एरनेकाच इत्यतोऽसंयोगपूर्वस्येत्यनुवृत्तमोस्सुपीत्यतो नुवृत्तस्यौरित्यस्य विशेषणं न तु प्रत्ययस्य तेनाप्नुवन्तीत्यत्र यण् नेति वक्ष्यमाणग्रन्थेन विरुद्धम्। तथा हुश्नुवोरितिसूत्रभाष्येऽपि हुश्नुग्रहणखण्डनावसरे धियन्ति पियन्तीत्यत्र प्राप्नोतीत्याशङ्क्य ओरिति वर्त्तत इत्युक्तम्। तेनैतद्विरुध्यत इति चेन्न। आप्नुवन्तीत्यस्यौरित्येतद्व्यावर्त्यत्वप्रदर्शनपरवक्ष्यमाणग्रन्थस्य यथाश्रुताभिप्रायकत्वात्। यदि तु हुश्नुवोरितिसूत्रे षष्ठीनिर्दिष्टेनोपस्थितस्यान्त्यस्येत्यस्यासंयोगपूर्वस्येति विशेषणन्तदा तत्राप्योरित्यस्य न प्रयोजनम्। भाष्यग्रन्थविरोधोऽपि न। भाष्यकृता हि एवमपि सुवन्ति रुवन्तीत्यत्र प्राप्नोति। अनेकाजिति वर्त्तते। एवमप्ययुवन्नरुवन्नित्यत्रापि प्राप्नोति। एतदप्यटोऽसिद्धत्वादेकाज् भवति। एवमप्यूर्णुवन्तीत्यत्रापि प्राप्नोति। असंयोगपूर्वस्येत्यनुवर्त्तते। यङ्लुगर्थन्तर्हि हुश्नुग्रहणं कर्त्तव्यम्। यङ्लुगन्तमनेकाजसंयोगपूर्वमुवर्णान्तमस्ति तदर्थमित्युक्तम्। ततोऽग्रे छन्दस्युभयथेत्यनेनार्द्धधातुकत्वमुक्त्वा एवं तर्हि सिद्धे सति यद्धुश्नुग्रहणं करोति तज्ज्ञापयत्याचार्यो भाषायामपि यङ्लुक् भवतीति। किमेतस्य ज्ञापने प्रयोजनम्। वेभिदीति चेच्छिदीतीत्येतत्सिद्धम्भवत्येवमुक्तम्। एतेन प्रघट्टकेन यङ्लुङ्निवृत्त्यर्थं हुश्नुग्रहणस्यावश्यकत्वमुक्त-

SGDF Sri Gangeshwari Digital Foundation

न्तेनोक्तरीत्याऽङ्गस्येति षष्ठीनिर्देशेनोपस्थितस्यान्त्यस्याऽसंयोगपूर्वग्रहणस्य सम्बन्धो ध्वनितः ओरित्यस्यानुवृत्तिश्च ध्वनिता । किं च । वुको नित्यत्वमिन्धिभवतिभ्यां चेतिसूत्रे भवतिग्रहणप्रत्याख्यानावसरे इन्धेश्छन्दोविषयत्वाद्भुवो वुको नित्यत्वात्ताभ्यां लिटः किद्वचनानर्थक्यम् । न ह्यन्तरेण छन्द इन्धेरनन्तरो लिड् लभ्यः आमा भाषायां भवितव्यम् । भुवो वुको नित्यत्वाद्भवतेरपि नित्यो वुक् कृतेपि प्राप्नोत्यकृतेपि ताभ्यां लिटः किद्वचनानर्थक्यमित्युक्तम् । एतेन भाष्यप्रघट्टकेन ओरित्यस्यास्वरितत्वं स्पष्टमेव लभ्यत इति । व्याख्यानादिति । एकाजित्यस्य विधायकत्वासम्भवमूलकाद्व्याख्यानादित्यर्थः । तथाहि नायं विधिः लिटीत्यादिसूत्रेषु विधेयानिर्देशेनानन्वयप्रसङ्गात् । नापि शेषे इतिसूत्रवदुभयरूपता लिटीत्यादेर्नियामकत्वकल्पनापेक्षयाऽस्याधिकारत्वकल्पनया विधित्वस्योचितत्वादिति । अत एव । प्रथमविशेषणत्वादेव । यदि धातोर्विशेषणमेतद्भवेत्तदा जागर्तेरनेकाच्त्वाद्द्वित्वं न स्यात् । व्यपदेशिवद्भावेनेति । एकस्मिन्नारोपितानेकावस्थारूपत्वस्य च कल्पनेन सूत्रस्य प्रवृत्तिः । कर्मधारय इति । विशेषणस्याप्याद्शब्दस्य राजदन्तादित्वादनित्यत्वात्पूर्वनिपातप्रकरणस्य वा परनिपातः । स च कर्मधारयः परिनिष्ठितविभक्त्या समास इतिपक्षे पञ्चम्यन्तयोर्बोध्यः । अत एव न न्द्राः इतिसूत्रेऽचः परादित्यर्थस्योपपत्तिः । तेनेन्द्रीयियिषतीत्यत्र दकारस्य द्विर्वचनसिद्धिः । द्वे इत्यत्र द्विशब्दस्य संख्येयबोधकतयोच्चारणरूपं तत्कल्प्यम् । तत्र साधकमाह । अत्रेति । कारकषष्ठीत्वात् उच्चारणक्रियापेक्षया कर्म्मषष्ठीत्वस्योचितत्वादिति भावः । अत एव । द्विःप्रयोगस्वीकारादेव । यदि स्थानेद्विर्वचनं स्यात्तदा टि इत्यस्य स्थाने टिटि इत्यादेशे वस्नसादेशस्थल इव प्रकृतिप्रत्ययविभागसंमोहेन णिलोपो न स्यादिति भावः । अस्य । षाष्ठद्वित्वस्य । उत्तरखण्डस्यैवेत्येवकारेण पूर्वखण्डस्य समुदायस्य च व्यवच्छेदः तदाह । ध्वनितमिति । तत्र ह्यार्द्धधातुक इत्यस्य परस-

SGDF
Sri Gargeshwari Digital Foundation

सप्तमीत्वेऽस्तेर्लिटि परत्वाद् भूभावात्पूर्वं द्वित्वे कृते परस्य खण्डस्य भूभावे पूर्वस्य श्रवणं प्राप्नोतीत्युक्त्वाऽर्द्धधातुक इत्यस्य विषयसप्तमीत्वमाश्रित्य दोषः परिहृतः। यदि पूर्वखण्डस्य समुदायस्य वाऽर्थवत्त्वं स्यात्तदा उत्तरखण्डस्यानर्थक्यात्परखण्डस्य भूभावे कृत इत्यसम्बद्धं स्यात्तेनोत्तरखण्डस्यार्थवत्त्वन्ध्वनितमित्यर्थः। नापि प्रत्येकमर्थवत्त्वम्। बोधावृत्त्यापत्तेः। अत्र पक्षे। द्विःप्रयोगपक्षे। द्वितीयभागावधिकसमुदायस्य तिङन्तत्वमुपपादयति। तत्रेति। तावेवेति दृष्टान्तार्थम्। सुब्ग्रहणं च पदसंज्ञासूत्रेऽस्तीति प्रसङ्गादुच्चरितत्वस्य प्रकृते उपयोगः। यथा तावेव सुप्तिङौ तथा यस्मात्तिङ्विहितः सा प्रकृतिराद्यैवेत्यर्थः। ननु यद्याद्योच्चारणविषयभूता प्रकृतिस्सैव तर्हि तस्यानर्थकत्वाभावान्नानर्थकेऽलोऽन्त्यविधिरनभ्यासविकारे इत्यस्यासङ्गतिरत आह। कृते त्विति। अभ्यासस्य नैरर्थक्यव्यवहारे द्वितीयस्योच्चार्य्यमाणस्य ज्ञानप्रतिबन्धकमित्येवङ्कल्पनयोपपत्तिः कार्य्या। न चात्र सर्वथा वाचकतासम्बन्धावच्छिन्नप्रतियोगिताकोऽर्थाभावस्सम्भवति। शब्दार्थयोस्सम्बन्धस्यानित्यत्वापत्तेः। ननु यदि प्रथमं द्वित्वं तदा समुदायात् कथं लिड्धातुत्वादत आह। समुदायोपीति। अत एव। समुदायस्य क्रियावाचकत्वाभावादेव। ननूर्णुनविषतीत्यत्र द्वितीयस्यैकाचो द्वित्वे कृते प्रथमैकाचोऽपि द्वित्वं कुतो नेत्यत आह। इदम्प्रथमद्विर्वचनापवाद इति। तक्रकौण्डिन्यन्यायादिति शेषः। यत्र प्रथमस्य द्वितीयस्यैकाचस्सम्भवस्तत्रेदं शास्त्रं प्रवर्त्तते। यत्र तु नैवम्। यथा इयायेत्यादौ तत्र पूर्वेणैव द्वित्वमित्याह। अजादेर्धातोरिति। ननु लिटि परे द्विर्वचनविधानाल्लिट्परत्वस्य च धातावेव सम्भवात्प्रकृतसूत्रे धातुग्रहणं किमर्थमित्यभिप्रायेण प्रश्नो धातोरिति किम्। जजागारेति। प्रथमस्यैकाचो जागित्यस्य लिट्परत्वाभावाद्द्विर्वचनं न स्यादिति भावः। अनभ्यासग्रहणस्य प्रयोजनमादौ उक्तमनभ्यासस्येति किमर्थम्। कृणोनोनाव वृषभो यदीदम्। नोनूयतेर्णोनावेति। अत्र यङन्तस्य प्रत्यया-

SGDF
Sri Gargeshwari Digital Foundation

त्तत्त्वेप्यमन्त्र इति प्रतिषेधादामोऽभावेन लिट्। यङो लुक् यङन्ताद्द्वित्वे कृतेऽपि लिण्निमित्तकं द्वित्वं स्यात्। तदुत्तरमुक्तम्। अभ्यासप्रतिषेधानर्थक्यं छन्दसि वावचनात्। अवश्यं छन्दसि वा द्वे स्त इति वक्तव्यम्। किम्प्रयोजनम्। प्रयोजनमादित्यान्याचिषामहे। देवता नो दाति प्रियाणि। मधा दात्विति। छन्दसि द्विर्वचनस्य वैकल्पिकत्वेन यङन्तस्यात् कृते द्विर्वचने लिटि धातोरिति प्राप्तमपि द्विर्वचनं न भविष्यतीत्यभ्यासप्रतिषेधोऽनर्थक इति भावः। ननूत्तरार्थन्तदावश्यकम्। लौकिकेऽपि प्रयोगे तत्प्रयोजनसम्भवादित्याशंयेनाह। यङन्तात्कृनीति। तदाशयः। भाष्याशयः। ननु सुषुविषत इतिप्रयोगे स्तौतिण्योरिति सूत्रे दृश्यत एवेत्यत आह। स्तौतिण्योरिति। यत्त्वत्र कैयटेनोक्तम्। चङीत्येतदर्थन्तु कर्त्तव्यो यदा सन् यङन्तात्सिचि कृते चङ् भवति। अजुगुप्सत्। अलोलुपदिति। तदा द्विर्वचनं माभूदिति। तस्यायमाशयः। यस्मिन् सूत्रेऽनभ्यासस्येत्युक्तन्तस्मिन् प्रयोजनाभावपरभाष्यमिति। तत्रेदं वक्तव्यम्। अभ्यासप्रतिषेधानर्थक्यं छन्दसि वा वचनादिति भाष्यवार्त्तिकस्वारस्येन येषु प्रयोगेषु सार्थक्यसम्भावना तेषामनभिधानमेव। भाष्यवार्त्तिकयोरसंकोचेन व्याख्याने प्रमाणाभावात्। अत एव भाष्यकृता विशिष्य सूत्रान्तरेपि प्रयोजनं नोक्तमिति। तादृशस्यैव। आदिहल्त्ववत एव। लक्ष्यानुसारात्। आट आटतुरित्यादिलक्ष्यानुसारात्। व्याप्तीति। व्यापनं व्याप्तिः। तच्च लक्षणस्यानेकलक्ष्येषु प्रवृत्तिरूपम्। अचोऽनिवृत्तये आह। शेषोक्तेरिति। अत एव। वैयधिकरण्येनान्वयादेव। एतेन। तुकोऽन्तरङ्गत्वोपपादनेन। इत्यनयोरपीति। वैयधिकरण्येन सम्बन्धाभिप्रायेणैवाभ्यासस्यवर्णस्य व्याख्यानं मूलकालीयं संगच्छते। ननु वार्णादाङ्गमितिन्यायेन पूर्वं ह्रस्व एव भविष्यतीत्यत आह। वार्णादाङ्गमिति। आदेशत्वे एवेति। ज्ञापकसाजात्यादेवमेवेति बोध्यम्। भवतेरः। भुवामिति। भूशब्दानामित्यर्थः॥ अत एव। प्रयोगस्थभूशब्दानुकरणादे-

SGDF
Sri Gurgeshwari Digital Foundation

च । अनुकरणस्यानुकार्य्यैापस्यापकत्वमनुकार्यत्वं चोभयोरपि भूशब्द-योरिति भावः । नन्वस्तेर्लुग्विकरणत्वात्तदादेशस्य लुग्विकरणपरिभाषया ग्रहणं न भविष्यतीत्यत आह । तस्यार्द्धधातुकेति । लुग्विकरणत्वं च लुक्प्रतियोगिविकरणप्रकृतित्वं तच्चास्य न सम्भवतीत्यत आह । लुग्वि-करणत्वाभावादिति । स्थानिवत्त्वेनैतदलभ्यमशास्त्रीयत्वात् । किं च य-स्मिन्नार्द्धधातुके भूभावस्तत्प्रयोगघटकस्यास्तेर्भिन्नत्वात्तत्र विकरणेनैव प्राप्नोतीति न लुग्विकरणपरिभाषाया अवसर इति । नन्वनुकरणादपि परस्य शपः प्रकृतिवदित्यतिदेशाल्लुक् कुतो नेत्यत आह । नित्यस्य ह्या-वश्यकप्रवृत्तिकत्वमनित्यस्य तु लक्ष्यानुसारिप्रवृत्त्यप्रवृत्तिकत्वमिति भा-वः । अत्रेदम्बोध्यम् । उपसर्गात्सुनोतीत्यादिनिर्द्देशाल्लोपः पिबतेरिति-निर्द्देशाच्च श्तिप्प्रत्ययस्य कर्त्तृवाचकत्वाभावेऽपि विकरणस्य प्रवृत्तिः कर्त्तृवाचकत्वाभावादेव भावकर्मणोरपि प्रवृत्तिः । यत्त्वत्र मनोरमाया-मुक्तम् । श्तिपः शित्त्वसामर्थ्यादकर्त्रर्थकत्वेऽपि विकरण इति । तदपरे न क्षमन्ते शित्त्वस्यार्द्धधातुकत्वव्यावर्त्तकतया चारितार्थ्यसम्भवात् । ते-न सुनोतीत्यादाविड्भावः सिध्यति । यदि तु त्रतथेतिनिषेधस्तर्हि ब्र-वीतीत्यत्र सार्वधातुकस्य हलादेः पितो ब्रुव ईडितिसूत्रेण विधीयमा-नो न स्यात् । किं च ध्यायतेस्सम्प्रसारणं चेत्यत्र श्नकारस्त्वेऽशिति जा-यमानमात्त्वं न भवति । सम्प्रति तु स्यादिति । तस्मात्तत्र शकारोच्चा-रणसामर्थ्यादकर्त्तृवाचिन्यपि श्तिपि शबादय इति । असिद्धवदत्रा-भात् । व्याख्यातमेतत् । भाष्योक्तरीत्येति । तत्र हि सातः सातवानि-त्यत्रात्वानुनासिकलोपयोः प्राप्तौ विप्रतिषेधादात्वमित्युक्ताभीयत्वेनासि-द्धत्वाद्विप्रतिषेधानुपपत्तिमाशङ्क्य घुमास्थेतिसूत्रस्थं हल्ग्रहणञ्ज्ञापक-म्भविष्यतीह विप्रतिषेध इतीत्युक्तम् । विप्रतिषेधेन व्यवस्थायामसिद्धत्वं न भवतीत्यर्थः । हल्ग्रहणं हि गोदः कम्बलदोऽल्लोपात्परत्वादीत्त्ववारणाय कृतम् । यदि परत्वेन व्यवस्थायामप्यसिद्धत्वं स्यात्तदा जातेऽपि परत्वादी-

SGDF
Sri Gargeshwari Digital Foundation

त्वे तस्यासिद्धत्वादात्त्वबुद्ध्या तल्लोपेनेष्टसिद्धौ हल्ग्रहणं व्यर्थमेव स्यादिति-दीत्येत्यर्थः ॥ तस्य । अल्लोपस्य । लक्ष्यभेदात् । पूर्वमस्तेरकारस्य जातः सम्प्रत्यात्त्वाकारस्य प्राप्तिरतो लक्ष्यभेदात् । तद्धि । तपरत्वं हि । देभतुरिति सिद्धमिति । अत्र हि श्रन्थिग्रन्थिदम्भिस्वञ्जीनामिति लिटः कित्वे नानुनासिकलोपेऽपि यद्यसिद्धत्वं स्यात्तदा संयुक्तहलमध्यस्थत्वादेत्वाभ्यासलोपौ न स्यातामसिद्धत्वाऽप्रवृत्तौ तु भवत इति भावः ॥ तदप्राप्तौ । वृद्धेरप्राप्तौ न च येन नाप्राप्तिन्यायेन वुक उवङादेशापवादत्वेन कथन्तद्विषये उवङः प्राप्तिरिति वाच्यम् । परस्परप्रवृत्तौ परस्परस्यासिद्धत्वादुवङ्निरूपितापवादत्वस्य बुकि वक्तुमशक्यत्वात् ॥ नन्वत्वमपवादत्वाद्धलादिःशेषम्बाधित्वा पूर्वञ्जातमिति पुनर्हलादिः शेषो न स्यादत आह । अभ्यासविकारेष्विति । आर्द्धधातुकस्येड्वलादेः । प्रत्याख्यातमिति । न च दीधीवेवीटामिति सूत्रस्येड्ग्रहणप्रत्याख्यानावसरे नेड्वशीतिसूत्रादिड्ग्रहणानुवृत्त्यैव सिद्धे पुनरार्द्धधातुकेति सूत्रे इड्ग्रहणमिडिडेवेति नियमार्थन्तेन भवितेत्यादाविटो गुणाभावस्य सिद्धौ दीधीतिसूत्रे इड्ग्रहणन्न कार्यमित्युक्तमिह तु एतत्सूत्रस्यमिड्ग्रहणन्न कार्यमित्युच्यत इति विरोध इति वाच्यम् । दीधीवेवीटामितिसूत्रस्येड्ग्रहणप्रत्याख्यानपरभाष्यस्य गौरवग्रस्तत्वेनैकदेश्युक्तित्वस्यान्यत्र विस्तृतत्वात् । आर्द्धधातुकस्येति किमर्थमिति । प्रकृतसूत्रस्याङ्गाधिकारीयत्वेनाङ्गस्येति सम्बध्यते । तत्राङ्गस्येति षष्ठ्या निमित्तार्थकत्वस्य क्लृप्तत्वादङ्गसंज्ञानिमित्तस्य वलादेरित्यर्थो भविष्यति । न च वृक्षत्वम् वृक्षता । गोभ्यामित्यादावपि प्राप्नोतीति वाच्यम् । ऋत इद्धातोरिति सूत्राद्धातुग्रहणमनुवर्त्य तच्च पञ्चम्या विपरिणमय्य धातोर्विहितस्य वलादेरङ्गसंज्ञानिमित्तस्येत्यर्थकरणेनादोषात् । एवञ्चार्द्धधातुकग्रहणाभावेपि वलादेरित्यस्याङ्गविशेषणत्वापत्तिरित्येषा शङ्का न भविष्यतीति भ्रमः । प्रजुगुप्सत इति । अत्र सनो धातोर्विहितत्वात्प्राप्नोति । न च

SGDF
Sri Gargeshwari Digital Foundation

तद्धातुग्रहणं शब्दाधिकारमाश्रित्य स्वरूपपरं विज्ञास्यते धातोरित्येवं यो विहित इति। अत एव लूभ्यांरूपूभ्यामित्यादावपि न भविष्यतीति वाच्यम्। एवमपि जुगुप्सति मीमांसत इत्यादौ सार्वधातुकस्य लिङ इट्प्राप्तेर्दुर्वारत्वात्। अत्रेदमवधेयम्। रुदादिभ्यः सार्वधातुक इति सूत्रस्य प्रकृतसूत्रे आर्द्धधातुकपदाभावे नियमार्थत्वम्भविष्यति सार्वधातुकस्य यदि भवति तर्हि रुदादिभ्य एवेति। न च रुदादिभ्यः परस्य सार्वधातुकस्यैवेति नियमः किन्न स्यादिति वाच्यम्। रुदविदेतिक्त्वासनोः कित्त्वविधानरूपज्ञापकेन विपरीतनियमस्य वारयितुं शक्यत्वात्। यदि रुदधातोः परस्यार्द्धधातुकस्येट् स्यात्तदा क्त्व इडागमे न क्त्वासेडितिप्रतिषेधे प्राप्ते क्त्वः कित्त्वविधानं कार्यम्। विपरीतनियमे तु तत्रेट् न भविष्यतीति स्वतस्तस्य कित्त्वं सिद्धमेव। तथा सनोऽपि हलन्ताच्चेति कित्वं सिद्धमेव। एवञ्च प्रकृतसूत्रे आर्द्धधातुकग्रहणस्य न फलम्। किन्तु योगविभागार्थम्। आर्द्धधातुकस्येट्। यात्रानिट् स आर्द्धधातुकस्यैवेति। तेन सिस्यच्सीयुडितिसूत्रेण विधीयमान इट् अङाङ्वदङ्गाधिकारादङ्गस्य न भवति। तस्मिन्सूत्रे भाष्यकृताप्येवमेवोक्तम्। प्रकृतग्रन्थे जुगुप्सते इत्यत्रेड्व्यावृत्तिप्रदर्शन्तु यथाश्रुताभिप्रायेणेति दिक्। बभूविव। बभूविमेत्यत्र श्र्युकः कितीतीण्निषेधस्य प्राप्तावपि क्रादिनियमादिट्। स्यतासी लृलुटोः। अत्र यथासङ्ख्यमुपपादयति। यद्यपीत्यादिना। शबाद्यपवाद इति सूत्रस्य यद्यपि स्याद्यपेक्षया लादेशानाम्परत्वात्पूर्वम्प्रवृत्तौ स्यविषये शबादिप्राप्तेः सुगमत एवोपपत्तिर्भवति। न चादेशानामनित्यत्वङ् कृते स्यादौ व्यवधानादप्राप्तेः। स्यादेस्तु नित्यत्वमिति कथं विप्रतिषेध इति वाच्यम्। धातोर्विहितस्य लस्येत्यर्थेनादेशानामपि नित्यत्वात्। पूर्वमादेशप्रवृत्तौ पश्चात्स्यप्रत्ययस्योत्पत्तौ सति शिष्टत्वात्स्यस्योदात्तत्वेनादेशानान्निघाते प्राप्ते तासेः परस्य लसार्वधातुकस्यानुदात्तत्वविधानेन ज्ञापितमन्यत्र विकरणेभ्य इति तेनादेशस्वरस्यैव बलवत्त्वमित्यन्यत्रोक्तम्।

SGDF
Sri Gangeshwari Digital Foundation

तथापि प्रकृतसूत्रे आर्द्धधातुकपदानुवृत्त्या लावस्थायामेवास्य प्रवृत्तिः आदेशानान्तु द्वेकयोर्लस्य तिप्तस्झि अनुदात्तङित इत्यादीनामेकवाक्यतया धातोर्विहितस्य लस्य स्थान इत्यर्थेनोत्तरकाले प्रवृत्तिरिति स्वीक्रियते लाघवान्न तु जातानान्नियमो गौरवादित्यन्यत्र प्रपञ्चितन्तस्मिन्नपि पक्षेऽपवादत्वस्योपपत्तिमाह । अत्रेत्यादिना । तासेरिकार उच्चारणार्थः । न चैवं मन्तेत्यत्र लुटि तस्य कर्मबोधकस्य तादेशे तस्य लुटः प्रथमस्येति डादेशे टिलोपेऽनिदितामिति नलोपापत्तिरिति वाच्यम् । टिलोपस्याभीयत्वेनासिद्धत्वात् । लुटः प्रथमस्य । अत्र शब्दतः साम्याभावाद्यथासङ्ख्याप्राप्तेराह । एकार्थेति । ननु डकारोच्चारणेन डादेशस्य सर्वादेशत्वं लभ्यत इति कथंङित्त्वसामर्थ्यादित्युक्तमत आह । सर्वादेशत्वमिति । वस्तुतस्तु डा आ इत्याकारस्य प्रश्लेषेण सर्वादेशत्वे सिद्धे डकारोच्चारणं टिलोपार्थमेव । अत एव । सार्वधातुकादेरिग्विशेषणत्वादेव । ननु संयोगे गुर्वित्यस्य प्रवृत्त्या भेत्तेत्यत्र न लघूपधत्वमत आह । अत्र क्नोः कित्त्वसामर्थ्यादिति । दीधीवेवीटाम् । व्याख्यानादिति । इदं सूत्रम्भाष्ये प्रत्याख्यातम् । दीधीवेव्योश्छन्दोविषयत्वात् । छन्दसि च गुणदर्शनात् । अदीधेदिति । इटश्चापि ग्रहणं शक्यमकर्त्तुम् कथम् ॥ नेड्वशीति सूत्रादिड्ग्रहणानुवृत्त्यैव सिद्धे आर्धधातुकेति सूत्रे इड्ग्रहणमिट इडेवेति नियमार्थम् । अङ्गाधिकारे नियमादाङ्गस्यैव विकारस्य निवृत्तिरित्याद्युक्तन्तन्मूलकादित्यर्थः । तासस्त्योर्लोपः । सस्यार्द्धधातुक इत्यतः सीति वर्त्तते । भाष्यस्वरस इति । तत्र स्यादौ शेषग्रहणस्य प्रयोजनमुक्तं लृटि शेषवचनङ्क्रियायाम्प्रतिपदविध्यर्थमिति । अविशेषेण विधाने लृटोऽभावः स्यात् । हरिष्यामीति व्रजति । करिष्यामीति व्रजति । अयम्भावः अविशेषेण विधाने यत्र न क्रियार्था क्रिया उपपदङ्करिष्यति हरिष्यतीत्यादौ तत्रैव स्याद्यत्र तु कियार्था क्रिया उपपदन्तत्र न स्यात् । ण्वुलाबाधात् । शेषे चेति क्रियमाणे यत्र क्रियार्था क्रि-

SGDF
Sri Gargeshwari Digital Foundation

या नास्तितत्र भवति । यत्रान्द्राद्यत्र साऽस्ति तत्रापि भवति । न च वा-
ऽसरूपविधिना ण्वुल्विषये लृङपि भविष्यतीति वाच्यम् । तुमुन्ण्वुलाविति सूत्रे ण्वुल्ग्रहणं ज्ञापकङ्क्रियार्थायाङ्क्रियायामुपपदे तृजादयो नेति । अन्यथा वासरूपसूत्रबलात्क्रियार्थायाङ्क्रियायां ण्वुल्तृचाविति-
सामान्यसूत्रेण ण्वुल्वत्तृजपि स्यादित्युक्तत्वेन ज्ञाप्यवचनेन लृडभाव-
प्रसङ्गात् ॥ एवमुक्ता स तर्हि चकारः कर्त्तव्यो न कर्त्तव्यः लृङ् भवती-
तीयता सिद्धे यच्छेषग्रहणङ्करोति तस्यैतत्प्रयोजनं योगाङ्गं यथा विज्ञा-
येत सति च योगाङ्गे योगविभागः करिष्यते । लृट् । अस्मिन्सूत्रे क्रि-
यार्थायामित्याद्यनुवर्त्तते । तेन करिष्यामीति व्रजतीत्यादि सिद्धम् । त-
सः शेषे इति । शेषे लृट् भवति । करिष्यति हरिष्यतीत्यादावित्युक्तम् ।
एतेन चकाररहितः पाठ इति स्पष्टमेव लभ्यते । भाष्ये स्पष्टमिति । उ-
पपादितमेतत् । इष्टप्रासीच्छेति । इष्टञ्चेच्छाकर्तृसम्बन्ध्यन्यसम्बन्धि वेत्य-
न्यदेतत् । तातङनेकाल्त्वात्सर्वस्य स्थाने भवतीत्युक्ता ङिच्चेत्यस्यानेका-
ल्सूत्रापवादत्वे नान्त्यादेशत्वमाशङ्क्यानन्यार्थङित्त्वेष्वनङादिषु चरिता-
र्थं इत्युक्तमपवादत्वाभावबीजन्तु नाभिहितमित्याशङ्कानिवारणायाह ।
तद्बलेत्यादि । अनङादिषु ङकारोच्चारणबलेत्यर्थः । अनङः सर्वादेशत्व-
ङ्ङकाराभावेऽपि सिद्धम् । अर्थान्तरेति । नायं सर्वादेशः किन्तु यस्य वि-
धीयते तदवयवस्य यस्य कस्य चिदित्येवं कल्पनेत्यर्थः । एतेन पाक्षिकी प्रा-
प्तिरुद्भावितप्राया परिभाषात्वञ्च ङिच्चेत्यस्य लब्धम् । स्वविषयाभावसंभाव-
नयेति । ङिच्चेत्यस्यानन्यार्थङकारोच्चारणसामर्थ्यलब्धानुवादतया यत्र ङ-
कारस्यानन्यार्थत्वं स स्वविषय इति भावः । एतेन । पूर्वोक्तव्याख्यानेन ।
परास्तम् । उत्क्रमेण मूलन्दूषयतामतम्परास्तम् । तद्वत् । ङिच्चेतिसूत्रव-
त् । अस्य । अनुदात्तौ सुप्पितावित्यस्य । अनुदात्तत्वस्यापूर्वस्य विधाना-
दस्य नानुवादत्वमिति भावः । अत्राप्राप्तिरेवेति । तथा च परेण बाधा-
दप्राप्तिरिति न किन्त्वप्राप्तिरेवेत्यर्थः । अन्योन्याश्रयान्न सर्वादेशत्वङ्कि-

SGDF
Sri Gargeshwari Digital Foundation

न्तु अभ्यादेशत्वमेवेति वादिमतमाशङ्क्य खण्डयति । न चेत्यादिना । न च तिह्योस्तादितिन्यासेऽन्यलकारसम्बन्धिनोऽपि तिशब्दस्य ग्रहणापत्तिरिति वाच्यम् । हिशब्दसाहचर्येण लोट्स्थानिकस्यैव ग्रहणात् । उदास एवेति । ह्यादेशस्यापि त्त्वविधानात् । लोटो लङ्वत् । अत्रोपमेये षष्ठीदर्शनाल्लङ्शब्दात्षष्ठ्यन्ताद्वतिः । तेन लङि परतोऽङ्गस्य विधीयमानावडाटौ न । न च यद्यल्लङः कार्यं तस्य सर्वस्य विनिगमनाविरहादतिदेशः स्यात्तथा सति यान्तु वान्त्वित्यत्र लङः शाकटायनस्येति जुस् जुहृतु विदन्त्वित्यत्र सिजभ्यस्तेति जुस्च स्यादिति वाच्यम् । ङ्लो ङ्विधानेन सिद्धे लोटो लङ्वदित्यतिदेशेन बोधनं लङ्संबन्धिकार्यविधानस्यातिदेशिकत्वेनानित्यत्वज्ञापनार्थमित्यदोषादिति केचित् । यत्तु विदो लटो वेत्यतो वेत्यस्याकर्षणेनास्य व्यवस्थितविभाषत्वमिति । तन्न । व्यवस्थितविभाषापरिगणनविरोधात् । वस्तुतस्तु लङः शाकटायनेतिसूत्रे याद्सुडित्यतो ङिदित्यनुवर्त्य षष्ठ्या विपरिणमय्य ङिदेव यो लङ् तस्य ग्रहणन्न त्वतिदेशेन यो लङ् तस्य । तच्च लङ्ग्रहणम्पृथक्कृत्य ङिदेव यो लङ् तस्यैव झेर्जुसितिव्याख्येयन्तेन सिजभ्यस्तेत्यनेनाप्युक्तस्थले नेति बोध्यम् । नित्यं ङितः । ङित् उत्तमो यस्मादितिरीत्याऽतद्गुणसंविज्ञानबहुव्रीहौ सकारान्तधात्ववयवसकारलोपापत्तिरत आह । षष्ठीतत्पुरुष इति । ङित उत्तम इत्येवं विग्रहे जायमानः । उचित इति । तत्रैवोपयोगात् । परन्तु लोटो लङ्वदित्यतिदेशेन यथा तस्थस्थेत्यस्य प्रवृत्तिस्तथा नित्यंङित इत्यस्यापीत्यतिदेशप्रयोज्यप्राप्तिकत्वरूपधर्मकृतसादृश्यात्तस्थस्थेतिसूत्रानन्तरमस्य लेख इति शेषः । सेर्ह्यपिच्च । अपित्त्वातिदेशो ङित्त्वार्थ एवेति क्रमेण प्रक्रियालाघवाय कृतां सेर्हिर्ङिच्चेत्येवोचितमितिशङ्कान्निरस्यति । अपिद्ग्रहणादिति । एतेन । फलान्तरस्यापि सत्त्वेन । परत्वात्तातङिति । एवञ्च स्थानिवद्भावेन तातङो हित्वेऽपि न लुक् सकृद्गतिन्यायात् । न्यायविरोधम्परिहरति । अन्तरङ्गानपी-

SGDF
Sri Gargeshwari Digital Foundation

ति। यत्त्वत्र दधिचिन्ताऽन्तरङ्गानपीतिन्यायस्य प्राप्तिमाशङ्क्यान्तरङ्गानेव लुग्बाधते न तु परमपीत्युक्तम्। तन्न। अपिशब्दस्वारस्यविरोधात्। अत एवैतत्फलितार्थकथनपरः सर्वविधिभ्योलुग्विधिर्बलवानिति प्राचाम्पाठः सङ्गच्छते। आडुत्तमस्य। यस्याडागम इति। आट एव पित्त्वे तु समुदायस्य पिद्व्यपदेशलाभो न स्यात्। एवञ्च भवाव भवामेत्यत्र वकारमकाराकारयोरनुदात्तत्वन्न स्यात्। न चात्र यदागमा इतिन्यायेन सर्वत्र पित्त्वप्राप्तिराटः। वसमसोरपि स्वात्। न चाट एव पित्त्वातिदेशवैयर्थ्यम्। जुहवाव। जुहवामेत्यत्राटः पित्त्वविधानसामर्थ्याद्गुणप्रवृत्तेः फलत्वस्य वक्तुं शक्यत्वात्। हेरपीति। तत्रापि सो ह इत्येव वदेत्। न च मो न इतिन्यासे मसो मकारस्यापि स्यादिति वाच्यम्। एरुरित्य त एरित्यस्यानुवृत्त्या तस्य लोड्विशेषणत्वेनेवर्णान्तस्य लोटो मस्य न इत्यर्थेनादोषात्। न चेतश्चेत्यस्य प्राप्तिशङ्कावसरे एरुरित्यस्य वैयर्थ्यं शङ्क्यम्। तस्य विषये सर्वत्र लोपप्राप्तावपि हुनुइत्यकरणेनैतयोरुत्वविषयत्वाभावे निश्चिते सत्युत्त्वमपवादत्वात्प्रथमपुरुषे चरितार्थम्। एवं सति लोपस्यान्यत्र प्राप्तिरिति भावात्। अनद्यतने लङ्। कालोऽपि धात्वर्थ इत्याशयेन मूलेऽनद्यतनभूतार्थवृतेरिति। बहुव्रीहिरिति। तत्पुरुषत्वे त्वति प्रसङ्गः स्यात्। तमाह। तेनेति। अन्तरङ्गत्वादिति॥ अपरनिमित्तकत्वेन तु तत्त्वम्। लकारप्रश्लेषेणेति। मयतेरिदन्यतरस्याम् लुङ् लङितिसंहितापाठेनेति शेषः। इत्यप्यर्थादिति। अत्रापिना प्रसिद्धार्थपरिग्रहः। उदात्तपदे स्वरितत्त्वप्रतिज्ञायास्प्रमाणमाह। अत एवेति। न फलभेद इति। स्वरितत्वाभावे तु विकरणान्तस्याडागमपक्षे अकरोदित्यत्राट उदात्तस्य श्रवणम्भवति लावस्थायामडागमे तून्तरकालप्रवृत्तिकस्योकारस्वरस्य बलवत्त्वेनाटोऽनुदात्तत्वं स्यादिति फलभेदः स्पष्ट एव। न च लावस्थायामेव चेदट् तदाऽपिबदित्यत्राट्सहितस्य पिबादेशापत्तिरिति वाच्यम्। निर्द्दिश्यमानपरिभाषया समाधानात्। प-

SGDF
Sri Gargeshwari Digital Foundation

रशब्देनेति । न्न आदित्युत्तरस्येतिसूत्रादुत्तरस्येत्यनुवृत्त्यैव सिद्धे तत्र परशब्दोपादानं यत्र परशब्देन कार्यविधानन्तत्रादेः कार्यमित्यर्थबोधनाय। परशब्देनेत्यस्य परत्वविशिष्टबोधकशब्देनेत्यर्थः । तेन तस्मादित्युत्तरस्येति सूत्रस्य यत्र प्रवृत्तिस्तत्रादेः परस्येत्यस्य प्रवृत्तिरिति सिद्धम् । विधिनिमन्त्रणा । मूले द्योत्येषु वाच्येषु वेति । अत्राद्यपक्षस्येत्थमुपपत्तिं वर्णयन्ति । यदि विध्यादयो लिङ्वाच्यास्स्युस्तदा विशेषविहितत्वेन कर्त्राद्यर्थानाम्बाधापत्तिरिति कर्तुरनभिधानाच्चैत्रः पठेदित्यत्र चैत्रपदात्तृतीयापत्तिः । शप् च न स्यात्सार्वधातुकस्य कर्त्रर्थकत्वाभावात् । पुरुषव्यवस्था च न स्यात्। द्योत्यत्वे त्वेषां विषयभावेनाश्रयणात्प्रत्ययस्य कर्त्राद्यर्थकत्वमिति तानि कार्याणि सिद्ध्यन्ति । लः कर्मणीत्यत्र ल इतिजातौ बहुवचनमिति लिङोऽप्युपग्रहात् । वाच्यत्वपक्षेऽप्येवं वदन्ति । विध्यादिभिः कर्त्राद्यर्थानान्न बाधो विरोधाभावात् । किञ्च तक्र कौण्डिन्यन्यायस्य न विषयताऽत्र तस्य विधेयविषयत्वात् पूर्ववज्जातौ बहुवचनस्य स्वीकाराच्च। किञ्च यदि विध्यादीनां विशेषविहितत्वेन कर्त्राद्यर्थबाधकता स्यात्तदा तुल्यन्यायाल्लडादिस्थलेऽपि वर्त्तमानादिष्वर्थेषु विधानेन तैरपि कर्त्राद्यर्थबाधः स्यादिति पचति चैत्रेणेत्याद्यपि स्यात् । पुरुषाव्यवस्थापि स्यात् । न च लः कर्मणीतिसूत्रारम्भसामर्थ्यान्न बाध इति वाच्यम् । पर्यायापत्तेर्दुर्वारत्वात् । प्रत्ययार्थत्वेनास्मिन्पक्षे विध्यादीनाम्प्राधन्यापत्तिस्तु न । प्रत्ययार्थप्राधान्यनियमस्यौत्सर्गिकत्वात् । परन्त्वाद्यपक्षो युक्तः । यत्र प्रत्ययस्य निवृत्तिः पच कुर्वित्यादौ तत्रापि प्रवर्तनाप्रतीतेः पञ्चभिर्हलैः कृषतीत्यादौ प्रवर्तनाया धात्वर्थत्वदर्शनाच्च तस्या धात्वर्थत्वस्योचितत्वात् । न चास्मिन्पक्षे निमन्त्रयेय भवन्तमित्यादौ निमन्त्रणस्य धातुनाऽभिधानाल्लिङ स्यादिति वाच्यम् । प्रयोजकनिष्ठनिमन्त्रणादन्यस्यावश्यकर्त्तव्यत्वस्वरूपस्य निमन्त्रणस्य प्रत्ययार्थत्वेनादोषात् । ईदृशे विषयेऽर्हे कृत्यतृचश्चेति लिङ् । अ-

SGDF
Sri Gargeshwari Digital Foundation

ईत्त्वज्ञावश्यकर्त्तव्यत्वमेवमेवामन्त्रणविषयेपि बोध्यम् । मूले निकृष्ट-प्रवर्त्तनम् । इयमेवाज्ञा । तच्च प्रवर्तनं स्वाभिलषितेर्थे पराभिलषिते-र्थे वेत्यन्यदेतत् । अप्रवृत्तस्य प्रयोज्यस्य तदज्ञातोपायप्रदर्शनेन प्रवर्त्त-नमपि यथा स्वर्गकामो यजेत राहूपरागे स्नायादित्यादिः । एवमज्ञा-तमार्गकथनमपि । अनेन यथा आयाहीत्यादिः । नियोगकरणम् । आत्र इयके प्रेरणारूपम् । कामचारानुज्ञेति । कामचारश्च प्रवर्त्यस्य पुरुषस्य प्रवर्त्तनं स्वाभिलषितेऽर्थे । एवमनुज्ञाप्यामन्त्रणमेव । यथा प्रवृत्तस्यैव पुरुषस्य श्रमेण निवृत्तावुन्मुखस्य तदभिलषितेऽर्थे निवृत्तिप्रतिबन्धेनप्रव-र्त्तनम् यदारब्धन्तदवश्यङ्कर्त्तव्यमेवेत्याद्युक्तिः । एवमादिः सर्वोप्युपदे-शो बोध्यः । अधीष्टं सत्कारपूर्वको व्यापारः । यथा माणवकमध्या-पयेति । शिष्यस्य वा मामध्यापयेति । एषा अभ्यर्थनापदेनाप्युच्यते । प्रार्थना तु स्वार्थिते वस्तुनि क्रियायां वा स्वापेक्षया महतः प्रवर्त्तनम-ञ्जलिकरणादिना प्रवर्त्तनमेव । सम्प्रश्नस्यैभ्यो विलक्षणत्वात्पृथगुक्तिः । उक्तचतुष्टयस्थले प्रवर्त्तनायाः सत्त्वेन प्रवर्त्तनायां लिङित्युक्तम् । प्रव र्त्तनात्वं सर्वसाधारणम्बोध्यतावच्छेदकं लिङ्लोट्लेट्कृत्यानाम् । प्रव र्त्तनातिरिक्तोंशः प्रमाणान्तरलभ्यः । न च प्रैषोपि विधिरेवेति प्रैषातिस-र्गप्राप्तक.लेतिसूत्रे तदुपादानं व्यर्थमिति वाच्यम् । निमन्त्रणादौ कृत्याभावार्थन्तस्यावश्यकत्वात् । लोड्विधानम्प्राप्तकालार्थम् । प्रवर्त्तना च प्रवृत्त्यनुकूलो व्यापारः ण्यन्ताद्युच् करणेऽर्थे । स च व्यापारो लिङा-दिघटितवाक्योच्चारणरूपो लौकिकानाम् । वेदो माम्प्रवर्त्तयतीत्यादौ तु लिङाद्यन्तशब्दघटितत्वमेव वेदनिष्ठम्प्रवर्त्तकत्वमिदमेव वेदे व्यापारः स एव शाब्दी भावनेत्युच्यते । लिङ्गसंख्यान्वयित्वात्तत्र व्यापारव्यप देशः । यत्तु प्राञ्चः प्रवृत्तिजनकज्ञानीयप्रकारतावच्छेदकत्वमिष्टसाधन-त्वादिनिष्ठम्प्रवर्त्तनापदार्थतावच्छेदकमितीष्टसाधनत्वादिकमेव विध्य-र्थः । तन्न । इष्टसाधनत्वादेः साध्यक्रियानिष्ठस्य प्रवर्त्तकनिष्ठत्वाभा-

SGDF Sri Gargeshwari Digital Foundation

चेन गुर्वादिर्मां प्रवर्त्तयतीत्यादिव्यवहारानापत्तेः । अत एव हेतुमति चेतिसूत्रभाष्ये पृच्छतु माम्भवानित्यत्र णिच् कस्मान्न भवतीत्याशङ्काया शब्दमात्रविषयकप्रेरणायां लोट् सक्रियस्य प्रवर्त्तनायांणिजितिसमाधानस्य च सङ्गतिर्भवति । न हि णिचेष्टसाधनत्वम्बोध्यते इति कस्याप्यभ्युपगमः । अत एव वक्तृधर्मः प्रेरणेति व्यवहारो लोकानाम् । अत एव च निमन्त्रणादीनामुपादानम्प्रपञ्चार्थमिति प्राचामुक्तिरपि सङ्गता भवति । प्रवर्त्तनापदस्येष्टसाधनत्वादिबोधकत्त्वे निमन्त्रणादिकन्ततो भिन्नमेवेति तथाभिधानमसङ्गतमेव स्यात् । तदुक्तं हरिणा । अस्ति प्रवर्त्तनारूपमनुस्यूतञ्चतुर्ष्वपि । तत्रैव लिङ्विधातव्यः किम्भेदस्य विवक्षया । न्यायव्युत्पादनार्थंवा प्रपञ्चार्थमथापि वा । विध्यादीनामुपादानञ्चतुर्णामादितः कृतमिति । न्यायेति । व्यापकधर्मस्य व्याप्यधर्मव्यापकत्वमेवेति न्यायेत्यर्थः । कथन्तर्हि भवान्पचेदित्यादिवाक्यश्रवणानन्तरम्प्रयोज्यः पाके प्रवर्त्तते इष्टसाधनताज्ञानस्य प्रवृत्तिकारणतया तस्य शब्देनाजननादिति चेत् पाको मदिष्टसाधनम् । मत्कर्त्तव्यत्वेनाप्तोक्तत्वादित्याद्यनुमानादिति गृहाण । विध्यादीनान्द्योत्यतापक्षे तु प्रयोजकव्यापारोऽपि धात्वर्थस्तस्यापि परम्परया फलानुकूलत्वात् । तत्र तेषु व्यापारेषु प्रयोजकव्यापारो विषयितयाविशेषणमेवेतरेषां विशेष्यत्वमेवमन्वये लिङादिसमभिव्याहारस्तात्पर्यग्राहकः । एवञ्च पचेदित्यादिशब्दादेकाश्रयिका प्रेरणाविषयभूता पाकानुकूला भावनेत्यादिक्रमेण बोधः । अधिकमन्यत्र स्पष्टम् । प्रवर्त्तना च वस्तुतो वर्त्तमानकाला धात्वर्थस्तु भविष्यत्कालिक एव भासते शब्दशक्तिस्वभावात् । यत्र तु णिच् तत्र प्रयोज्यप्रयोजकव्यापारयोः समानकालिकयोर्भानम् । यत्र तु विधौ लिङ् तत्रोत्तमपुरुषो न प्रवर्त्तते किन्तु प्रथममध्यमावेव । स्वप्रवृत्तौ स्वोच्चारणस्याप्रयोजकत्वात् । इदमेवाभिप्रेत्योत्तमपुरुषो विधिशक्तिप्रतिबन्धक इतिमीमांसकानामुक्तिः सङ्गच्छते । याशुट् पर । अपवाद इति ।

SGDF
Sri Gurgeshwari Digital Foundation

सीयुटि कृतेऽपि तस्यागमभिन्नतया परस्मैपदपरत्वाविघातादिति भावः। भाष्योक्तरीत्येति। तत्र हि प्रसङ्गविशेषेणोक्ते आगमा अविद्यमानवद्भवन्तीतिवचने यदयं यासुट्परस्मैपदेषूदात्तो ङिच्चेत्याहेत्युक्तम्। तत्र कैयटः। यदि प्रत्ययाद्युदात्तत्वे कर्त्तव्ये आदित्वमागमा विहन्युस्तदा चिनुयातामित्यादौ यासुटः प्रत्ययादित्वात्सिद्धमुदात्तत्वमिति तन्न कुर्यात्। न च परस्मैपदनिमित्तकत्वादस्यादेशोत्तरप्रवृत्तया पूर्वमेवान्तरङ्गत्वादाद्युदात्तत्वे प्रत्ययस्य कृते ततो यासुडस्वरकः स्याच्छेषनिघातेनानुदात्तो वेति चरितार्थमुदात्तवचनमिति कथं ज्ञापकमिति वाच्यम्। परस्मैपदेष्वित्यस्य विषयसप्तमीत्वेन लावस्थायामेव यासुटि ततो निर्दिश्यमानस्य लस्यादेशे तन्निमित्तकाद्युदात्तत्वे यासुटः सिद्धे उदात्तग्रहणं ज्ञापकमित्याशयात्। युक्तिसिद्धेनाप्यागमा अनुदात्ता इतिवचनेन यथा इटोऽनुदात्तत्वन्न भवति तथाह। अलावीदित्यादावीति। ननु यासुटो ङित्वेपि समुदायस्य ङित्वाभावात्कथञ्चिनुयादित्यादौ गुणनिषेधादीत्यत आह। अनेनेति। यत्तु श्यास परस्मैपदेष्वित्येव सूत्रमस्तु। परस्मैपदं यतो विहितन्तदादेः परस्मैपदे परे श्यासप्रत्ययो भवति। श्यासेत्यत्र सकाराकार उच्चारणार्थः। तेन सकारस्य नेत्त्वम्। अयञ्च येन नाप्राप्तिन्यायेन शपोपवादो यद्यपि भवति तथाप्यस्मिन्कृते शकारेत्संज्ञकत्वेन सार्वधातुकत्वाच्छबादिः प्रवर्त्तते। न च सार्वधातुकत्वेप्यस्य कर्त्रर्थत्वाभावेन कथं शबिति वाच्यम्। भवतेर इतिनिर्द्देशेन क्वचित्कर्त्रर्थकत्वाभावेऽपि शब्भवतीतिकल्पनेनादोषात्। न चापवादविषये कथमुत्सर्गप्रवृत्तिरिति वाच्यम्। सोऽचि लोपे चेत्पादपूरणमिति निर्द्देशेनापवादविषयेऽप्युत्सर्गस्य क्वचित्प्रवृत्तिस्वीकारात् अन्यथा त्यदाद्यत्वाप्राप्तियोग्ये विषयेऽचारितार्थ्यरूपस्यापवादत्वबीजस्य तदोरितिसत्त्वे सत्त्वेन सत्वे कृते त्यदाद्यत्वानापत्तिरिति मतम्। तन्न। भूधातोराशीर्लिङि श्यास प्रत्यये श्यासः सार्वधातुकत्वाच्छप्प्रवृत्तावियादेशापत्तेः। शपोऽ

SGDF
Sri Gargeshwari Digital Foundation

प्रवृत्तिस्वीकारेऽपि ह्रूयादित्यादौ दीर्घो न स्यात् । सार्वधातुकपरत्वात्। किञ्च ष्ठिबुप्रभृतिभ्य आशीर्लिङि श्यासप्रत्यये ष्ठिबुक्लमुचमां शितीति-क्लमुचम्वोर्दीर्घापत्तेः । यदपि ङ्यासुड्विधानेन सिद्धे ङिच्चेतिकिमर्थमिति । तदपि न । जागर्यादित्यस्यासिद्ध्यापत्तेः। किदाशिषीतिकित्वातिदेशेन सिद्धान्ते विशेषविहितेन ङित्वातिदेशो बाध्यत इतिजाग्रोऽविचीति गुणो भवति सम्प्रति तु ङित्वस्यौपदेशिकतयाऽस्यातिदेशिकेनकित्वेन बाधाभावेन ङित्वपर्युदासाद्गुणानापत्तेः । यदपि क्यासुडितिन्यासं कृत्वा किदाशिषीतिसूत्रन्त्याज्यमिति । तन्तुच्छम् । वचधातोर्जागृधातोश्च विधिलिङि वच्यात् जागृयादित्यत्र सम्प्रसारणगुणयोरापत्तेः। तस्माद्यथान्यासमेवरमणीयमिति । आत्मनेपदइति । सुट्इत्यादिः । एतेन । विषयभेदप्रदर्शनेन । अत्र प्रकरण इति । एतेन सुट्यासुटोरपि समावेशः साधितः । अत एव । बाध्यबाधकभावाभावादेव । पुनः प्रवृत्त्या चेति । अवयवावयवस्यापि समुदायावयवत्वम् । अङ्गुल्यादिवत्। अत एव । परिच्छेदकन्यायाप्रवृत्तेरेव । सर्वस्योसो निवृत्त्यभावायाह । अवर्णादित्यादि । ननु कृते पररूपे चेदियादेशस्य प्राप्तिस्तदास्य नित्यत्वम् सैव तु कथमत आह । एकादेशस्येति । एवञ्च प्राप्तिमात्रेण नित्यत्वन्न तु रूपसिद्धिपर्यन्तमीक्षा कार्या । मूलेऽन्तरङ्गत्वादिति । प्रत्ययमात्रापेक्षत्वेनान्तरङ्गत्वात् । इयादेशस्य त्वाङ्गत्वेन प्रकृतिप्रत्ययोभयापेक्षत्वेन बहिरङ्गत्वमिति भावः । वार्णपरिभाषयैव सिद्धे यासित्येतत्पर्यन्तम्प्रयासो न युक्त इत्यत आह । वार्णादाङ्गमिति । एवमपि । यासितिपदच्छेदेपि । मूले आर्द्धधातुकसंज्ञ एवेति । लङः शाकटायनेतिसूत्रादेयकारानुकर्षः कार्यः । अन्यथाऽस्या आर्द्धधातुकसंज्ञाया अनाकडारीयत्वात्सार्वधातुकसंज्ञया समावेशे शबादिः स्यादिति भावः । किदाशिषि । इदङ्कित्त्वविधानमिज्यादित्यादौ सम्प्रसारणार्थम् । जागर्यादित्यत्र गुणसिद्धिरपि प्रयोजनम् । अन्यथा यासुटो ङित्वातिदेशेन गुणो न स्यात् । सम्प्रति तु वि

SGDF
Sri Gangeshwari Digital Foundation

शेषविहितेन किल्वातिदेशेन ङित्वातिदेशो बाध्यत इति तस्य सिद्धिः। सलोप इति। भूयादित्यत्र सुट इव यासुटोऽपि सस्य संयोगादिलोपः। भूयास्तामित्यादौ तु यासुटः सस्यैवेति विशेषः। गकारोपि निर्द्दिश्यत इति। ककारात्पूर्वमिति शेषः। सिद्धसाध्यसमभिव्याहारन्यायेनेति। सिद्धसाध्यसमभिव्याहारे सिद्धं साध्यायोपयुज्यत इतिन्यायेनेत्यर्थः। दृष्टश्चायन्न्यायः। मलिनन्ते वपुः स्नाया इत्यत्र। के चिदितिकथनेन सिद्धसाध्यसमभिव्याहारन्यायेन निमित्तत्वलाभ इत्यत्र स्वस्यापरितोषं सूचयन् भाष्योक्तरीत्याह। वार्त्तिकरूता त्विति। क्नोः कित्वेन ज्ञापकेनेति। सिद्धि गृध्नुरित्यादौ गुणनिषेधार्थम्। यदि प्रकृतसूत्रे तन्निमित्तेत्यर्थो न स्यात् तदा यत्र क्ङित्प्रत्ययाव्यवधानन्तत्रैव निषेधः स्यादिति क्नोः कित्वं व्यर्थमेव स्यात्। ननु विधौ परिभाषोपतिष्ठते नानुवाद इति परिभाषया तस्मिन्नितिपरिभाषाया इहानुपस्थानम्भविष्यतीत्यत आह। अनुवाद इति। परिभाषया। तस्मिन्नितिपरिभाषया। किञ्च भाष्ये उपधालक्षणस्य गुणस्य प्रतिषेधे सनः कित्वविधायकं हलन्ताच्चेतिसूत्रमपि ज्ञापकमित्युक्तन्तत्र यद्यप्येवं शङ्का भवति। हलन्ताच्चेति न ज्ञापकम् धिप्सतीत्यत्र दम्भधात्ववयवस्य लोपसम्पादनेन दिदृक्षति सिसृक्षतीत्यत्र सृजदृशोरित्यमागमप्रतिबन्धेन च तस्य चारितार्थ्यसम्भवादिति। तथापि क्ङितीतिसूत्रस्य तावदेव चेत्प्रयोजनन्तर्हि सृजदृशोर्झल्यमकितसनि। इको झल् दम्भेश्चेत्येव वदेदिति हलन्ताच्चेति सामान्यसूत्रं ज्ञापकमेवेति सा निवर्त्तनीया। आगमविशिष्टस्य तामादेशवारणायाह। धातोर्विहितेति॥ भाष्यरीत्येति। परस्मैपदेष्वित्यस्य विषयसप्तमीत्वेनेत्यादिरीत्येत्यर्थः। दण्डिसम्मतं समाधानम्भाष्याननुगुणमित्याह। मास्त्वित्यादाविति। प्रतिषेधार्थकसम्प्रत्ययार्थमित्यनेन प्रतिषेधार्थको ङिदेवाङित्तु न प्रतिषेधार्थक इति ध्वनितम्। अत एव प्रतिषेधार्थकसम्प्रत्ययार्थमित्यस्य प्रत्युदाहरणम्प्रमा छन्द इति दर्शितम्। व्याख्यातञ्च कैयटेन प्रोपसृष्टान्माङ आ-

SGDF Sri Gargeshwari Digital Foundation

तश्चोपसर्ग इत्यङ् । यद्यप्ययम्माङ् तथापि टाबन्तन्न माङिति । एवञ्च यत्
क्वचित्पुराणादौ मास्त्विति दृश्यते तत्त्वार्षत्वात्साधु लौकिकन्त्वसाधु-
रेव । व्याख्यानादिति । प्रकृतसूत्रीयभाष्यसम्मतव्याख्यानादित्यर्थः । त-
देव दर्शयति । अत एवेति । तद्ग्रहणस्यैवेष्टत्वादेव । अत्र । भूसुवोरिति
सूत्रे । फलदोषयोरभावेनेति । पितीत्यस्य फलम्पित्येव प्रवृत्तिरिति त-
च्च गुणविधायकशास्त्रस्य क्ङिद्भिन्नसार्वधातुक एव प्रवृत्त्याऽन्यथासिद्ध-
मिति तदभावः पितीत्यस्यानुवृत्तौ दोषश्च पिद्भिन्ने प्रवृत्त्यभावापत्तिरू
पो वाच्यस्स चात्र नास्त्येवेति भावः । सर्वादेशेनानपहृतत्वमिति । श्रौ-
तो यः सर्वादेशस्तेनानपहृतत्वमित्यर्थः । अत एव । उक्तस्य विद्यमान-
त्वस्य विवक्षणादेव । अभूदित्यत्र श्रौतो यः सर्वादेशो लुक् तेनापहृ-
तत्वमेवास्तीति विशिष्टाभावः । आसीदित्यत्र त्वाटश्चेतिवृद्धिरूपादे-
शसत्त्वेपि स न श्रौतः सर्वादेश इति निरुक्तं विद्यमानत्वमस्त्येव । आनु-
मानिकस्य सर्वादेशत्वस्य सत्त्वेऽपि तस्य न श्रौतत्वमिति भावः । भाष्या
दिति । द्विसकारको निर्द्देश इतिभाष्यादित्यर्थः । अत एव । द्विसकार-
कनिर्द्देशस्याभिमतत्वादेव । प्रतिषेध उक्त इति । आहिभुवोरीट्प्रतिषेध
इत्यनेन वार्त्तिककृतेति शेषः । आतः । पूर्वेण सिद्धे नियमोऽयमित्याश
येनाहादन्तादेवेतीति । विपरीतनियम इति । आदन्ताच्चेत् सिज्लुक्येवे-
तिविपरीतनियम इत्यर्थः । व्याख्यानादिति । प्रकृतसूत्रभाष्ये किमिदञ्-
झुस्याकारग्रहणनियमार्थम् । आहोस्वित्प्रापकम् । कथञ्च नियमार्थं स्यात् ।
कथञ्च प्रापकम् । यदि सिज्ग्रहणमनुवर्त्तते ततो नियमार्थमथ निवृत्तन्ततः
प्रापकम् । नियमपक्षस्य सिज्ग्रहणानुवृत्तौ सत्यामातः सिचश्च परस्य
झेरित्यर्थे सिचः परत्वात्पूर्वेण सिद्धेऽयं योगो नियमार्थ इत्येवमुपपत्तिः
कार्या । ततः नियमार्थमिति चेत्सिज्लुग्ग्रहणं कर्त्तव्यमातः सिज्लुगन्ता
दिति वक्तव्यम् इह माभूत अकार्षुः अहार्षुः। अस्तु तर्हि प्रापकम् प्रापकमि-
ति चेत्प्रत्ययलक्षणप्रतिषेधो वक्तव्यः । अभूवन्निति प्रत्ययलक्षणेन झुस्भा-

SGDF
Sri Gargeshwari Digital Foundation

वः प्राप्नोति इत्याद्यभिधाय अस्तु तर्हि नियमार्थम् । ननु चोक्तं सिज्लुग्ग्रहणमनर्थकमिति । नैष दोषः । तुल्यजातीयस्य नियमः । कश्च तुल्यजातीयः । यो द्वाभ्यामनन्तरः । आतः सिचश्च । द्वाभ्यामानन्तर्यञ्च सिज्लुक्येव सम्भवतीतिसिज्लुकीति लब्धम् । यदीदं सिज्लुकि सति प्रवर्त्तते तदा प्रत्ययलक्षणेन पूर्वसूत्रेण सिद्धे नियमोयम्भवति स च यथा अभूवन्नित्यादिलक्ष्यसिद्धिर्भवति तथैव कल्पनीय इत्यभिप्रायकव्याख्यानादित्यर्थः । उभयोर्निषेधलाभस्य प्रकारमाह । लुङादिष्विति ॥ लिङ्निमित्ते लृङ् क्रिया ॥ भविष्यति मर्यादावचन इति सूत्राद्भविष्यतीति सम्बध्यते । लिङ्निमित्तशब्देन किमिह ग्राह्यमित्याकाङ्क्षायामेतत्प्रकरणोपात्तमेव ग्राह्यन्तच्च शीघ्रोपस्थितिकत्वाद्धेतुहेतुमतोर्लिङिति तदेवादायुपात्तमादिना चोत्तरसूत्रोपात्तस्यैव पूर्वसूत्रोपात्तस्यापि ग्रहणमित्याशयेनाह । आशंसावचन इति । अनभिनिर्वृत्तिर्यस्मिन्देशे काले वा क्रिययोरुत्पत्तियोग्यता तदन्यस्मिन्देशे काले वा तयोरुत्पत्तिसम्भावनमिति यावत् । सम्भावनञ्चोत्कटकोटिकः संशयः । तत्राभावनिष्ठोत्कटत्वाख्यो विषयताविशेषो ग्राह्यः । प्रमाणान्तरात् । येन हेतुना हेतुभूतक्रिया भवति ज्ञायते च तदतिरिक्तेन हेतुना सम्भावितेन तस्याः क्रियाया अभावो यदा ज्योतिःशास्त्रादिकथितलक्षणज्ञानेनोपस्थितो भवति तदा तदभावानुमापकलिङ्गज्ञानमिह प्रमाणान्तरं विवक्षितम् तयोः क्रिययोर्हेतुहेतुमद्भावश्च लोकतो ज्ञातो ग्राह्यः । यथा मंगलादिग्रहकृतवृष्टिप्रतिबन्धे सम्भाविते वक्ता सुवृष्टिश्चेदभविष्यत्तदा सुभिक्षमभविष्यदिति प्रयुङ्क्ते । वर्त्तमानप्रागभावप्रतियोगिसम्भावितहेतुभूतसुवृष्टिभवनजन्यं वर्त्तमानप्रागभावप्रतियोगिसम्भावितं सुभिक्षकर्तृकम्भवनमिति बोधः । अत्र क्रिययोर्हेतुहेतुमद्भावे तत्कर्त्रोर्हेतुहेतुमद्भावोऽर्थात्फलति । आनि लोट् । अत्र लोडिति लुप्तषष्ठीकम्पदम् । उपसर्गादसमासेऽपीत्यत उपसर्गादिति सम्बध्यते । उपसर्गपदञ्चोपसर्गावयवपरन्तच्चाभेदेन रषाभ्यामित्य-

SGDF
Sri Gargeshwari Digital Foundation

स्य विशेषणमिति उपसर्गावयवरषाभ्यामुत्तरस्यानिशब्दावयवस्य नस्याड्व्यवाये अपि णत्वमिति सूत्रेणाट्कुप्वाङ्नुम्व्यवाये अपि वा दिर्व्यवहितस्य णत्वमित्यर्थः फलितस्तत्पर्यवसितार्थमाह । उपसर्गादिति । प्रहिमानीत्यादाविति । आदिना प्रवपानीत्यादिसङ्ग्रहः । एवञ्चेति । उपसर्गात्परस्यार्थवत एवानिशब्दस्य ग्रहणसिद्धौ च । अन्तःशब्दस्येतीति । अन्तरपरिग्रह इति सूत्रे वार्त्तिकमिदम् । नन्वनेन णत्वे कर्त्तव्ये चेदुपसर्गत्वन्तदाऽन्तर्हण्यादित्यत्र हन्तेरत्पूर्वस्येत्येव सिद्धेऽन्तरदेश इत्यस्य वैयर्थ्यापत्तिरत आह । हन्तेरदिति । अत्र । संहितैकपद इतिवचने । अखण्डम्पदमिति । विवक्षितमिति शेषः । अखण्डपदत्वञ्च पदसंज्ञायोग्यद्वितीयभागानवयवकत्वविशिष्टपदत्वम् । पदसंज्ञायोग्यद्वितीयभागनिवेशेन राजीयतीत्यत्र नाखण्डपदत्वक्षतिः । उत्तरभागे पदसंज्ञायोग्यत्वनिवेशात्परमाश्वेनेत्यत्र उत्तरपदत्वे चापदादिविधावित्यस्य प्रत्याख्यानरीत्याश्वशब्दस्य भत्वेपि नाखण्डपदत्वव्यवहारः वाक्यमिह यथाकथञ्चिदपि यः पदसमुदायः स विवक्षितो न तु परस्परान्वितार्थकत्वपर्यन्तमपि निविष्टन्तेनानर्थकस्यापि समुदायस्य सङ्ग्रहः । अकखादावषान्तेत्यत्र नञ्समासः । अयमुत्तरपदार्थप्रधान इति कखादिषान्तपदार्थस्य प्राधान्यं तस्य चोपदेशपदसापेक्षत्वेप्यसामर्थ्यन्न शङ्कनीयम् । न चैवमपि कखपदस्योपदेशपदसापेक्षत्वेनासामर्थ्यादादिपदेन षपदस्यान्तपदेन च समासो न स्यादिति वाच्यम् । उपदेशवदस्य कर्मघञन्ततयोपदिश्यमानो यः कखादिरारोपितस्तस्येह विवक्षितत्वात् । उपदेशावस्थायां यः ककारखकारादिस्तद्भिन्न इति तु फलति । अत एव । निरुक्तस्यैकपदत्वस्य विवक्षितत्वादेव । पदत्वाभाववदुत्तरखण्डकत्वमिति । पदत्वाभाववानुत्तरखण्डो यस्य तत्त्वमित्यर्थः । न चैवं राजाश्व इत्यादावुत्तरपदत्वे चापदादिविधाविति निषेधस्य प्रवृत्तौ पदत्वाभाववदुत्तरखण्डकत्वसत्त्वादेकपदत्वलक्षणस्य समाससामान्यावृत्तिपदार्थकत्वानुपपत्तिरिति वाच्यम् । पदसंज्ञायोग्यस्वाभावस्य विवक्षितत्वात् । न चात्र नोत्तरपदस्य कार्यि-

SGDF
Sri Gargeshwari Digital Foundation

त्वमिति वाच्यम् । राज्ञो अः राजाः पूज्य इत्यादौ दोषापत्तेः । अत्र द्वितीयाबहुवचनान्तराजन्शब्दस्याद्धातुप्रकृतिकडप्रत्ययान्तेन अशब्देन समासः कृदुत्तरपदप्रकृतिस्वरोऽत्र भवति पदादिविधित्वसम्भावनया न तस्य निषेधस्य प्रवृत्तिरिति यद्यपि शङ्का भवति तथापि योग्यतानिवेशे न कोऽपि क्लेशः । एवमुत्तरखण्डे पदत्वाभावनिवेशे समासस्य राजाश्व इत्यादेर्य उत्तरखण्डः श्व इति तस्य पदत्वाभावघत्वनाखण्डपदत्वमेवायाति । अर्थवत्त्वन्तूत्तरखण्डे निवेशयितुमशक्यं राजीयतीत्यस्यासङ्ग्रहापत्तेरिति यथाश्रुतमेतद्वक्तुमशक्यमतः पूर्वोक्तार्थ एव कल्पनीय इति दिक् । प्रकृतसूत्रे उपदेशपदस्य प्रयोजनन्तु प्रनिचकार प्रनिषखाद प्रनिरोत्स्यतीत्यादिव्यावृत्तिः । अभियुक्तकृत इति । एतेन मूलोक्तार्थनिर्देशस्य सप्रमाणत्वं लब्धम् । एवमुपादानस्य फलमाह । पाणिनिस्त्विति । अत एव । अर्थनिर्देशरहितस्य भूशब्दस्य पाठादेव । क्वचिदर्थनिर्देशसहितः पाणिनेः पाठ इत्यत्रापि भाष्यमेव प्रमाणन्तत्सूचयति । चुटू इति सूत्र इति । एवञ्च । अर्थनिर्देशस्यासार्वत्रिकत्वे च । द्योतका इतीति । समभिव्याहृतधातुगता या तत्तदर्थनिरूपिता शक्तिस्तदुद्बोधका इत्यर्थः । अत एव । उपसर्गाणान्द्योतकत्वादेव । अनुसमभिव्याहारेण भूधातुनिष्ठा याऽनुभवानुकूलव्यापारनिरूपिता शक्तिः सा उद्बुद्धा ततो उद्बुद्धसंस्कारविषयतावती भवति ततस्तस्मात्स्मरणम् ततोऽनुभवानुकूलव्यापारोपस्थितिस्ततः शाब्दबोधः एवं सर्वत्र द्योतकविषये बोध्यम् । अत्र फलव्यापारयोः पृथग्वाच्यत्वम् । विषयता फलतावच्छेदकसम्बन्धः फलतावच्छेदकसम्बन्धेन फलाश्रयस्यैव कर्मत्वम् । अनुभवनिष्ठव्यापारजन्यतावच्छेदकसम्बन्धश्च समवायसम्बन्धावच्छिन्नाश्रयत्वम् । व्यापारश्चात्ममनःसंयोगः व्यापारतावच्छेदकसम्बन्धोऽपि प्रकृते समवायः । एवञ्च फलतावच्छेदकसम्बन्धव्यापारतावच्छेदकसम्बन्धाभ्यां फलव्यापारयोर्वैयधिकरण्यात्सकर्मकत्वम् । यत्र तु ताभ्यां सम्बन्धाभ्यान्तयोः सामानाधिकर-

SGDF
Sri Gargeshwari Digital Foundation

थन्तत्राकर्मकत्वम्। न चैषा व्यवस्था बचनबलात्कल्प्यत इति च्वामितव्यम्। यत्र फलतावच्छेदकसम्बन्धेन फलाधिकरणवृत्तित्वरूपफलसामानाधिकरण्यं व्यापारे तत्र परया कर्तृसंज्ञया कर्मसंज्ञाया बाधादेवाकर्मकत्वस्य सिद्धिः। इत्युक्त्या। विशेषोक्त्या। द्योतकत्वं वाचकत्वञ्चेति। प्रयोगभेदेनेत्यादिः। इदम्मञ्जूषादौ स्फुटमित्यत्र न तन्यते। अकर्मक इति। वृद्धिस्तदनुकूलो व्यापारश्च धात्वर्थः। व्यापारजन्यतावच्छेदकः फलतावच्छेदकसम्बन्धश्च स्वरूपसम्बन्धावच्छिन्नाश्रयतालक्षण एक एवेति तेन सम्बन्धेनफलस्य व्यापारसमानाधिकरणत्त्वादकर्मकत्वमिति। वृद्ध्यर्थकस्याकर्मकत्वे प्राचामपि सम्मतिमाह। वृद्धीति। तङ एवेति। तिबादीनामुक्तानामनुवृत्त्या षष्ठ्या विपरिणामेनात्मनेपदानामित्यस्य विशेषणादिति भावः। आनस्य। पचमानो यजमान इत्येतद्घटकानस्य। गुणानापत्तेरिति। क्ङिति चेति निषेधादिति शेषः। सार्वधातुकमपिदितिसूत्रस्यापिति गुणव्यावृत्तिरेव फलन्तच्च गुणविधायकसूत्रे पिद्ग्रहणेनैव सिद्धमितिभ्रममूलिकामाशङ्कान्निराकरोति। यत्त्विति। एकारोच्चारणमिति। एवञ्चेदमेवैकारोच्चारणन्तत्र ज्ञापकमस्तु वक्ष्यमाणन्त्वेतत्फलमिति बोध्यम्। तस्य। इषधातोः। इजादेश्च गुरुमतः। इचो गुरोरिति। अत्र यस्मिन्विधिरितिपरिभाषया तदादिविधिरिति। केचित्तन्न। विशेषणविशेष्ययोः सम्भव्यन्तत्वे एव तत्प्रवृत्तेस्तस्माद्वक्ष्यमाणानृच्छ इतिप्रतिषेधादेव तदादिविधिः। एवञ्गुर्वंशे तदन्तविधिना गुर्वन्तादित्यर्थोपि नेत्याह। अनृच्छइतिपर्युदासादिति। औपदेशिकगुरुमत इति। तेनेयेषेत्यादौ न दोष इत्याशयः। वैयर्थ्यापत्तेश्च। अस्य हि नौपदेशिकगुरुमता किन्तु तुङ्निमित्ता। अन्योक्तप्रकृतसूत्रस्यादिग्रहणप्रयोजनङ्खण्डयति। आदिग्रहणादित्यादिना। व्यवधानेपि आमोऽनुप्रयुज्यमानकृञादेश्च व्यवधानेऽपि। गुणप्रवृत्त्या। ऋच्छत्यॄतामितिगुणप्रवृत्त्या। तत्सामर्थ्याभावेन गुणविधानसामर्थ्याभावेन। तत्सार्थक्यादिति। प्रकृतसूत्रस्यस्यानृच्छइतिपर्युदासस्य सार्थक्यादि-

SGDF
Sri Gargeshwari Digital Foundation

त्यर्थः । अनृच्छ इति किम् । आनर्च्छ । ननु ऋच्छत्यृतामिति लिटि गुणविधानाल्लिङ्गादृच्छेर्लिट्याम्न भविष्यति । न च व्यवधानार्थन्तत्स्यादिति वाच्यम् । प्रकृतसूत्रेऽनृच्छइतिपदाभावे ऋच्छेर्लिटि परे आमो गुणस्य च प्राप्तौ प्रतिपदोक्तत्वादपवादत्वाच्च गुणे इजादित्वाभावादेवाम्न भविष्यतीति व्यवधानार्थताया वक्तुमशक्यत्वादिति चेन्न । अन्तरङ्गानपीतिन्यायेन लुक्प्रयोजकसमासादीनाम्प्राबल्यबोधनवदामोऽपि तेन न्यायेन बलवत्त्वं स्यात् । एवञ्च ऋच्छेर्लिटि प्रतिपदोक्तादपि गुणात्पूर्वमामि लुकि लिट्परकृञोऽनुप्रयोगे व्यवधानेऽपि गुणसम्पादकतया ऋच्छेर्गुणविधानस्य चरितार्थतयाऽनृच्छइतिपर्युदासस्यावश्यकत्वमित्याशयात् । अत एवोक्तमिति सूत्रतात्पर्यमिति । अत एव सर्वविधिभ्यो लुग्विधिर्बलवानिति प्राचामुक्तिरपि सङ्गच्छते । अचः परत्वसामर्थ्यादिति । आस्कास्धातोरन्त्याचः परत्वसाधकतद्विषयकवाक्यकल्प्याम्प्रत्यये मकारोच्चारणसामर्थ्यादित्यर्थः । असञ्जातविरोधित्वन्यायेनेति । न सञ्जातो विरोधी यस्य सोऽसञ्जातविरोधी तस्य भावस्तत्त्वम् । प्रकृते च विरोधी वैयर्थ्यशङ्कोद्भव एव । यद्यत्र सवर्णदीर्घस्य बाधः कल्प्यते तदा कस्यापि व्यर्थत्वशङ्का न भवतीति तद्बाध एवोचित इति भावः । औचित्यादिति । गुणे त्वन्याय्यकल्पनेतिन्यायेन गुणबाधकल्पनस्योचितत्वात् । आमः । आम । आमतुरित्यत्र तु न लुक् । उपजीव्यविरोधाल्लाक्षणिकत्वाच्च । अयञ्च लुक् लावस्थायामेवादेशापवादत्वात् लकारस्य च कृत्त्वात्तदन्तादौत्सर्गिके सुपि कृतेऽपि च प्रवर्त्तते । अत एवैधाञ्चक्र इत्यादौ तिङ्ङतिङ इतिनिघातसिद्धिः । अत्र लेरिति नानुवर्त्तते । तेन विदांकुर्वन्त्वित्यत्र लोटोऽपि लुक्सिद्धिः । आमन्तादितिपञ्चम्या इति । सूत्रव्याख्यानवाक्यस्यपञ्चम्या इत्यर्थः । इति च बोध्यमिति । एतदर्थमेवेदं सूत्रम् । अनुप्रयोगस्य तु कालसाधनसङ्ख्यापुरुषविशेषस्याभिव्यक्त्यर्थं सूत्राभावेऽपि सिद्धेः । आमन्तस्य तु न तत्प्रतिपादनसामर्थ्यम् । अनभिव्यक्तार्थकत्वात् । न च धा-

SGDF
Sri Gargeshwari Digital Foundation

त्वन्तरानुप्रयोगनिवृत्त्यर्थं सूत्रमस्त्विति वाच्यम् । क्रियासामान्यार्थकत-यैषामनुप्रयोगस्यैव सम्भवादिति भावः । कृञ्चास्तियोग इतिसूत्रे च भ्व-स्तिसाहचर्यात् क्रियासामान्यार्थकस्यैव कृञो ग्रहणं कृञ् हिंसायामिति स्वा-दिस्तु तथा नेति बोध्यम् । अनुप्रयोगे सति वाक्यार्थनिष्पत्तिमाह । ए-धेत्यादि । अकर्मकाणामपि धातूनामंशद्वयाभिधायकत्वस्य सुप्रसिद्धत्वा-द्वृद्ध्यनुकूलव्यापारभाने न किञ्चिद्बाधकम् । एवञ्च यत्राकर्मकधातुप्रकृ-तिकामन्तात्कृञोऽनुप्रयोगस्तत्रानुप्रयुज्यमानस्य फलसमानाधिकरणव्यापा-रवाचकतयाऽकर्मकत्वेन भावकर्त्रोरेव लिट् । यत्र तु ईक्षादिभ्यः सकर्मके-भ्य आम् तत्रानुप्रयुज्यमानस्यापि सकर्मकत्वेन कर्मण्यपि लिड् भवति । न च यत्र कर्मणि लिट् तत्र फलव्यापारयोरर्थत्यासस्यानुभवसिद्धतयोभयत्र फलांशस्य प्राधान्यमिति कथमभेदान्वय इति वाच्यम् । आम्समभिव्या-हारे एतत्प्रकृतिधात्वर्थफलव्यापारयोर्व्यत्यासाकल्पनादिति साम्राज्यमी-क्षाञ्चक्रे ईक्षाम्बभूवे इति वाक्यादेककर्तृकसाम्राज्यकर्मकदर्शनानुकूल-व्यापाराभिन्नपरोक्षानद्यतनभूत उत्पत्तिसम्बन्ध्यन्यतरानुकूलो व्यापार इति क्रमेण बोधः । योग्यरूपान्तरापत्तिमुपपादयति । द्रव्यमित्यादि । एतेन । अनन्वितार्थत्वादितिकथनेन । प्रत्याहारेऽन्तर्भूतः पदधातुरेव तस्यैवानु-प्रयोगाभावेऽस्य ग्रन्थस्य तात्पर्यम् । तस्य केवलस्य सूत्रे समः प्रयोगात्स-म्पूर्वस्य वा नाऽनुप्रयोग इति भावः । आम्प्रत्ययवत् । परगामिनि क्रि-याफलेऽप्राप्तात्मनेपदार्थमिदं सूत्रम् । आम्प्रकृत्या तुल्यमिति यन्मूले व्या-ख्यातन्तल्लाभप्रकारमाह । अतद्गुणेतीत्यादि । अत्र । आम्प्रत्ययवदिति-सूत्रे । पूर्ववाक्य इति । अत्राम्प्रत्ययवदित्युपादानसामर्थ्याद्वाक्यभेद इति पूर्वशब्दोपादानेन बोधितम् । अन्यथाऽनुप्रयुज्यमानात्कृञः पूर्ववदात्म-नेपदमित्यर्थे एधाञ्चक्र इत्यत्र परगामिक्रियाफलेऽप्राप्तात्मनेपदविधानस्य सिद्धेरेकवाक्यतयैव विधानं स्यात् । वाक्यभेदे सति यत्प्रयोजनं सिध्यति तदाह । इन्दाञ्चकार इत्यादि । न्यूनतापरिहारायाह । इदमुपेति । का-

SGDF
Sri Gargeshwari Digital Foundation

नचोऽपीति । अत्रेदम्बोध्यम् । पूर्ववदित्यस्यानुवृत्तिङ् कृत्वा वाक्यभेदप्रदर्शनम्प्रकृतयोगस्य विभागाभावाभिप्रायेण नियमसिद्धस्यार्थिकस्य प्रतिषेधस्यानन्तरस्येतिन्यायेनैतद्बाधकत्वमेव स्यादित्यभिप्रायेण च । अन्यथा कृञोऽनुप्रयोगस्येत्यादौ योगः कार्यः । इदमेधाञ्चक्रे इत्यादावकर्तृगामिक्रियाफलविवक्षायामप्राप्तात्मनेपदार्थम् । तत आम्प्रत्ययवदितिद्वितीयो योगः कार्यः । नियमार्थमिदम् । कृञोऽनुप्रयोगस्येत्यनुवर्त्तते । अनुप्रयुज्यमानात्कृञोयदात्मनेपदं विहितन्तदाम्प्रकृत्या तुल्यमेव तेन इन्दाञ्चकारेत्यादौ न । योगविभागसामर्थ्याच्च स्वरितञित इत्यस्याप्ययन्नियम इत्येवं सिद्धे पूर्ववद्ग्रहणानुवृत्तिर्व्यर्था स्यादिति । स्पष्टमिदमिति । एकारोच्चारणस्य ज्ञापकत्वप्रदर्शनम् । द्विर्वचनेऽचीतियोगस्य स्थानिवद्भावविधायकत्वाभिप्रायेण व्याचष्टे । स्थान्यच इति । द्विर्वचनशब्दघटकवचनशब्दे भावल्युडभिप्रायेणाह । द्विर्वचन इति । यदि त्वधिकरणे ल्युट् क्रियते तदा लक्षणां विनापि सामानाधिकरण्योपपत्तिः । द्विर्वचननिमित्ते परे तदव्यवहितपूर्वघटकाजादेशः स्थानिवदित्यर्थे दिदवनीयिषतीत्यादावपि स्थानिवद्भावः स्यादत आह । प्रत्यासत्त्येति । तत् । द्विर्वचननिमित्तम् । ननूर्णुनविषतीत्यत्र द्विर्वचननिमित्तत्वमिसेतिसमुदायस्य न त्वच इति कथं स्थानिवत्त्वमत आह । ऊर्णुनविषेति । तद्भावभावितेति । तस्य भावस्तद्भावः । तदीयसत्ता । तद्भावे सति भवति तच्छीलस्तद्भावभावी तस्य भावस्ताद्भवभावितेत्यर्थः । नन्वेवमपि सन्यङोरित्यस्य षष्ठीत्वात्कथमूर्णुनविषतीत्यस्य सिद्धिरत आह । सन्यङोरिति । अरिरिषतीत्यादौ सूत्रातिप्रसङ्गं वारयति । तत्रेत्यादि । एतेन । पूर्वोक्तलोकप्रसिद्धन्यायेन । न हि तस्य न्यायस्य लौकिकत्वमेवेत्यत आह । व्याकरणेऽपीति । नन्वचीत्यस्याभावेऽपि कथमधिजग इत्यत्र स्थानिवत्त्वप्रसक्तिर्गाङादेशस्यार्द्धधातुक इत्यस्य विषयसप्तमीत्वेन लिडुत्पत्तेः प्रागेव प्रवृत्तेरत आह । लिटीत्यादि । ननु तर्हि लिडादेशस्याचोऽपि निमित्तत्वादतिप्रसङ्गस्तदव-

SGDF
Sri Gargeshwari Digital Foundation

स्थ एवेत्यत आह । अत्र सूत्र इति । कृते द्विर्वचने एधाञ्चक्रे इत्यादौ यणः स्थानिवद्भावे श्रवणन्न स्यादत आह । आवृत्त्येति । ईजाथ इति । यजधातोर्लिट् । धातोः स्वरितेत्त्वादात्मनेपदम् । वचिस्वपीति सम्प्रसारणम् । अत्र तन्निषेध इति । सम्प्रसारणनिषेध इत्यर्थः । एवं व्याख्यानेन मूलोक्तं द्विर्वचननिमित्तेऽचि योऽजादेशः प्राप्तः स नेतिव्याख्यानमेव युक्तमिति ध्वनितम् । अत एव न पदान्तसूत्रानन्तरमस्य सूत्रस्य पाठः साधु सङ्गच्छते । स्थानिवद्भावपरत्वेन व्याख्याने द्विर्वचनात्प्राक् तत्तदादेशस्य प्रवृत्तिः स्वीकार्या । पश्चात्स्थानिवद्भावेन रूपातिदेशपर्यवसायिना तन्निवृत्तिः कार्या । रूपातिदेशेऽचीत्यस्य ज्ञापकता स्वीकार्या । कृत्स्नस्य शास्त्रातिदेशस्य कार्यातिदेशस्य वा त्यागः स्वीकार्यः । प्रक्षालनाद्धीत्यस्य लोकप्रसिद्धस्य न्यायस्य विरोधश्च स्वीकार्य इति महागौरवमिति भावः । ननु लावस्यायामप्यसंयोगादिति किंत्त्वेन सम्प्रसारणं स्यादत आह । लावस्यायान्त्विति । अत एव । आदेशोत्तरमेवासंयोगादित्यस्य प्रवृत्तिस्वीकारादेव । अभ्यासस्यर्वर्णस्येतिवैयधिकरण्येन यद्व्याख्यातन्तत्फलमाह । चच्छृदतुरिति । इदम् । अभ्यासविकारे बाध्यबाधकभावो नास्तीति वचनम् । तत्रत्यमकिद्ग्रहणमत्र ज्ञापकम् । न चैवमपि नन्नृते इत्यादौ यथा हलादिःशेषेण तकारनिवृत्तावपि पुनरुरदत्त्वे कृते लक्ष्यभेदेन हलादिःशेषेण रेफनिवृत्तिर्भवति तथा चच्छृदतुश्चेच्छिद्यत इत्यादौ तुकोऽपि निवृत्तिः स्यादिति वाच्यम् । नुगत इत्यादिसूत्रारम्भसामर्थ्येनाभ्याससंज्ञाप्रवृत्तिकाले साक्षात्स्थानिद्वारा वा सन्निहितहलामेव तेन निवृत्तिस्वीकारेणादोषात् । अत एव । उरदत्त्वस्य परनिमित्तत्वसिद्ध्यर्थमेव । प्रत्ययाक्षेपो भविष्यतीति । अभ्याससंज्ञाया द्वित्वोत्तरम्प्रवृत्त्या द्वित्वस्य च प्रत्ययसद्भाव एव प्रवृत्तेरिति भावः । अनुपपादनादिति । आसप्तमसमाप्तेरङ्गाधिकारे तु भाष्यप्रामाण्येनाङ्गसंज्ञायाः प्रत्ययनिमित्तकत्वादङ्गसंज्ञाद्वारोरदत्वस्य परनिमित्तत्वमिति भावः । नन्वङ्गसंज्ञाद्वारा निमित्तत्व-

SGDF
Sri Gargeshwari Digital Foundation

मित्यस्याङ्गसंज्ञाम्प्रति प्रत्ययस्य निमित्तत्वादुरदत्त्वम्प्रतिनिमित्तत्वमित्यर्थो वाच्यः स च न युक्तः । प्रत्ययस्य साक्षान्निमित्तत्वानुपपादनादत आह । प्रत्यय इत्यस्यावृत्त्येति । ननु न लुमतेतिनिषेधात्कथमजर्घा इत्यादीत्यत आह । अजर्घा इत्यादि । पूर्वोक्तं व्याख्यानमाक्षेपपरतया व्याख्यानाभिप्रायेण वस्तुत आक्षेपाभावेपि न क्षतिरित्याह । वस्तुत इति । दिगिति । प्रत्ययपदस्यावृत्त्यभावेपि न क्षतिः । प्रत्ययबुद्धिनिमित्तकत्वेन प्रत्ययनिमित्तकत्वमासप्तमसमाप्तेरङ्गाधिकारव्यवस्थापनपरभाष्यप्रामाण्यादित्यादि द्रष्टव्यम् । एकाच उपदेशेऽनुदात्तात् । मूले उभयान्वयीति । पूर्वान्वयफलम्बिभित्सति चिकीर्षतीत्यादि । उत्तरान्वयफलङ्कर्तुङ्गन्तुमित्यादि । अत्र नित्स्वरेणाद्युदात्तत्वेपि निषेधसिद्धिः । न च विहितविशेषणेन निर्वाहः । प्रत्ययोत्पत्तेः प्राग्धातुस्वरस्य दुर्वारत्वेनासम्भवापत्तेः । उपदेशपदस्योत्तरत्रान्वयस्यावश्यकत्वे एकाज्ग्रहणस्य किम्प्रयोजनमित्यस्य प्रश्नग्रन्थस्याभिप्रायम्प्रकटयितुमाह । नन्विति । तत् । एकाज्ग्रहणम् । तत्सामर्थ्येन । एकाज्ग्रहणसामर्थ्येन । उपदेशमात्र इति । अत्र मात्रपदं कार्त्स्न्ये । आद्युदात्तनिपातनेन । वधादेशे आद्युदात्तनिपातनेन । यङ्लुग्व्यावृत्तिरिति । यङ्लुको निषेधनिमित्तत्वव्यावृत्तिरित्यर्थः । इदमेव कथमत आह । स्मरन्तीति । ननु यदि एकाच्पदघटितत्वेन निषेधसूत्रस्य यङ्लुक्यप्रवृत्तिः फलन्तर्हि अच इत्येवेत्युत्तरग्रन्थासङ्गतिः एकग्रहणाभावेऽस्य सूत्रस्यैकाच्पदघटितत्वाभावादत आह । तद्वदर्थकेनेति । एवञ्च श्तिपाशपेतिवचने यत्रैकाज्ग्रहणमित्यस्यैकाजर्थकपदग्रहणमित्यर्थः । अन्यथा । यङ्लुकि निषेधाप्रवृत्तिरूपफलास्वीकारे । तद्वैयर्थ्यमिति । एकाजर्थकस्याचइतिपदस्य वैयर्थ्यमित्यर्थः । ननु वधाद्युदात्तेति । अत्र वधावित्युपादानेनाद्युदात्तत्वनिपातनवादिमते वधादेशो हलन्त इत्यभिमानम्प्रकटीकृतम् । तत्सामर्थ्यम् । आद्युदात्तनिपातनसामर्थ्यम् । गौरवादिति । निपातनसामर्थ्येन निषेधाप्रवृत्तिक-

SGDF
Sri Gargeshwari Digital Foundation

रूपने गौरवादित्यर्थः । ननु मत्वर्थे लक्षणास्वीकारे शक्यतावच्छेदकारोपो लक्षणेति सिद्धान्तविरोध इत्यत आह । समुदाय इति । एकपदाभावेपि प्रकृतसूत्रे परिभाषाप्रवृत्तिमुपपादयति । शब्दविशेषमिति । ननु वधादेशस्य हलन्ततापूर्वोक्तेति कथमेकग्रहणे कृतेपि सूत्राप्रवृत्तिरत आह । हनो वधेतीति । अत एव । वधादेशस्यादन्तत्वादेव । वृद्धिर्नेति । आर्द्धधातुकीयाः सामान्येन भवन्तीत्युक्तत्वेनार्द्धधातुकस्य सिचो विवक्षायां वधादेशे ततः सिचि अतो लोप इत्यल्लोपेऽचः परस्मिन्नित्यल्लोपस्य स्थानिवत्त्वेन वृद्धिर्नेत्यर्थः । निष्फलमिति । अत एव पूर्वमभिमानादित्युक्तम् । मौलग्रन्थयोजनां कृत्वा भाष्यसम्मतरीत्यैकपदस्य प्रयोजनमाह । वस्तुत इति । आरोपितार्थबोधकत्वे । लाक्षणिकार्थबोधकत्वे । तात्पर्यग्राहकाभावेनेति । न च पचादीनामनुदात्तानाम्पाठसामर्थ्यमेव तात्पर्यग्राहकम् । पक्तुमित्यादावनुदात्तश्रवणस्य फलस्य वक्तुं शक्यत्वात् । धातोरन्तोदात्तत्वविधानन्तु गोपायतमित्यादौ चरितार्थमिति भावः । आवश्यकत्वेपीति । एवञ्चैकग्रहणसामर्थ्यादिति योक्तिः सा विहितेतिभावः । कथन्तर्ह्यवधीदित्यत्रेट्सिद्धिरित्यत आह । अवच्छेदकावच्छेदेनेति । उपदेशत्वावच्छेदेनैकाचो ग्रहणादित्यर्थः । इयं रीतिः । अवच्छेदकावच्छेदेनान्वयरूपा रीतिः । न च घसिरप्युपदेश इति । एतेनोपदेशत्वावच्छेदेन हलादित्वं विशेषणं विवक्षितमिति सूचितम् । न तु स्यान्युपदेश इति । एवञ्च वधादेशस्य साक्षादुपदेशासम्भवात्तस्मिन्ननेकाच्त्वान्न निषेध इति भावः । भाष्य इति । आद्ये जघसिथेत्यत्रेट्प्रतिषेधमाशङ्क्य सिद्धन्तु हलादिग्रहणादित्युक्तम् । ततस्तच्चावश्यं वक्तव्यम् । अद्यशी प्रयोजयतः । अद्यशी न प्रयोजयतः । किङ्कारणम् । तासावनिट इत्युच्यते सेटौ चेमौ तासौ । अदिस्तर्हि प्रयोजयति । आदिथ । क्रियमाणेपि वै हलादिग्रहणेऽत्र प्राप्नोति । जघसिथ । एषोपि हलादिः । तस्य चाभावात्तासौ । एवं समाधाय ननु च यस्तासौ नास्ति अनिडप्य-

SGDF
Sri Gangeshwari Digital Foundation

सौ तासौ भवतीति शङ्कितम् । स्थान्युपदेशमादायायन्तासावनिडिति भावः । तत उक्तमेवं विज्ञायते यस्तासावनिडिति कथन्तर्हि यस्तासावस्ति अनिट् चेतीत्युक्तम् । एतेन घसेः साक्षादुपदेशसम्भवात्तस्य च तासावभावान्न निषेध इति ध्वनितम् । अन्त्ये । ऋतो भारद्वाजस्येत्यस्य नियमार्थत्वमुपवर्ण्य जहर्थेत्यत्र गुणे रपरत्वे च कृतेऽनजन्तत्वान्निषेधस्याचस्तास्वदित्यस्याप्राप्तौ ऋत इति सूत्रमुपदेशपदसम्बन्धेन विधायकम्भविष्यतीत्याशङ्क्योपदेशपदस्याचस्तास्वदिति सूत्रे सम्बन्धेन ऋत इत्यस्य नियमार्थत्वमुपपादितं योगविभागेन । अचस्तास्वत्थल्यनिटो नित्यमुपदेशे । ततः अत्वतः । अत्वतश्चोपदेश इति । अत्र कैयटः । आदेशोपदेशोऽप्याश्रीयते न तु स्थान्युपदेश एवेति । अत एकाजत्यादेशस्य वीशब्दस्य चक्षिङादेशस्य ख्योञिकरूपस्य निषेधो भवति । विवेथ । विवयिथ आचख्यिथ । आचख्याथेति । एतेनादेशोपदेशमादाय कार्यसिद्धिः स्पष्टमेव प्रतिपादिता । प्राचीनोक्तन्दूषयन्स्वसिद्धान्तमाह । परे त्विति । वधिरेवेति । एवञ्चैकाज्ग्रहणस्य चारितार्थ्यादेतच्चैकाज्ग्रहणेन ज्ञाप्यत इत्यसङ्गतम् । उत्तरसूत्रेऽपि तच्चरितार्थमित्याह । किञ्चेति । अत एव । एकाज्ग्रहणानुवर्त्तनादेव । स्तीर्णमित्यादाविति । आदिना स्तीर्त्वेत्यस्य सङ्ग्रहः । यदपि तद्वचनव्याख्यात्रा ज्ञाप्यत इत्यस्यैकदेशानुसृत्या सत्त्वम्बोध्यते इत्युक्तन्तदपि न तस्य वचनस्यैवाभावादित्याह । श्तिपा शपेतीति । यद्यपीदं वचनम्भाष्ये न पठितम् तथापि भाष्यकृता तत्सत्त्वन्ध्वनितमित्यभिप्रायेणाशङ्कते । न चेति । तत्र । यङ्लुकि । इडिट इति । यदि यङ्लुकि प्रतिषेध इष्टः स्यात्तदा यङ्लुकीट्प्रतिषेधो वक्तव्य इत्यपि भाष्यकृतोक्तं स्यादिति भावः । ननु यङ्लोपे बेभिदितेति भाष्येणैव यङ्लुकि इट्प्रवृत्तिप्रकार उक्त इत्यत आह । यङ्लोप इत्यादि भाष्यमिति । न यङ्लुग्विषयमिति । किन्तु यङ्लोपविषयमेवेति शेषः । एकाच उपदेश इति सूत्रे भाष्ये एकाज्ग्रहणस्य वधिवीडित्यत्रेट्प्रतिषेधाभावरूपप्रयो-

SGDF
Sri Gargeshwari Digital Foundation

जनमभिधायाभिहितमेतदपि नास्ति प्रयोजनम् । किङ्कारणम् । वध इट्प्रतिषेधः सन्निपात एकाच्त्वात् प्रकृतेश्चानुदात्तत्वादिति । सन्निपात इत्यस्य प्रतिषेधप्रवृत्तिकाल इत्यर्थः । तत उभयविशेषणमुपदेशग्रहणमस्त्वित्यभिप्रायेण किम्पुनः कारणमेवं विज्ञायते उपदेशेऽनुदात्तादेकाचः श्रूयमाणादिति यङ्लोपार्थम् । यङ्लोपे मा भूदिति बेभिदिता बेभिदितुम् । इत्युपक्रमे उक्तम् । उपसंहारग्रन्थे च स्थाने द्विर्वचनं सन्यङोरित्यस्य स्थानषष्ठीत्वं स्वीकृत्य भिद्यशब्दस्य द्वितीयाजवधिकस्य स्थाने भिद्य्भिद्य् इत्यादेशे सम्प्रमुग्धत्वात्प्रकृतिप्रत्ययस्य नष्टः स भवति यः न एकाजुपदेशेऽनुदात्त इत्युक्तम् । एवमुपक्रमोपसंहारबलेनास्य यङ्लोपविषयत्वं स्पष्टमेव लभ्यते । ततोऽग्रे द्विष्प्रयोगो द्विर्वचनमिति पक्षे दोषोस्त्येवेत्यभिधायाल्लोपस्य स्थानिवद्भावाद्व्यवधानमेवेति समाधानान्तरं कृतमिति । भाष्यस्थलोपपदस्य लुक्परत्वमप्यस्त्वित्यभिप्रेत्याप्याह । किञ्च तस्येति । न्यूनतापत्तिरिति । अत एकाज्ग्रहणघटितत्वान्निषेधसूत्रस्य यङ्लुक्यप्रवृत्तिर्ध्वनिता सा च श्तिपा शपेतिपरिभाषासत्त्व एवेति परिभाषाभाष्यकारसम्मतेति शेषः । भाष्यन्यूनताम्परिहरति । इड्विषय इति । अन्यथा । एकाज्ग्रहणस्य परिभाषासत्त्वबोधनद्वारा यङ्लुकि निषेधाप्रवृत्तिबोधकत्वे । निरालम्बनतापत्तेरिति । एकाज्ग्रहणस्य कृतार्थत्वात्प्रश्नस्य निरालम्बनत्वम्परिभाषाबोधनार्थमित्यनभिधाय जागर्त्यर्थमिति विशेषाभिधानस्य च निरालम्बनत्वमित्यर्थः । परिभाषाभावेपि परिभाषासाध्यप्रयोजनान्यथासिद्धिमाह । अजर्घा इत्यादि । छान्दसत्वादेव । यङ्लुकश्छान्दसत्वादेव । भाषायान्त्विति । तुना भाषायाम् सर्वत्र यङ्लुक्सत्त्वमिति ध्वनितम् । अभाव एवेति । भाष्ये तत्र शङ्कासमाधानयोरकरणात् । इत्याहुरिति । भाष्यानुसारिण इति शेषः । इणः षीध्वम् । इण्कोरिति वर्त्तमाने इण्ग्रहणम्प्रकृतसूत्रे तदसम्बन्धबोधनाय । तेन कवर्गात्परत्वं यत्र तत्र पक्षीध्वं शक्षीध्वमित्यादौ न । ननु सीध्वमित्येवा-

SGDF Sri Gargeshwari Digital Foundation

स्तु मूर्द्धन्योच्चारणङ्किमर्थमित्यत आह । षकारोच्चारणमिति ॥ वेविषीध्व-मिति । विष्धातोरिदंरूपम् । इदम् । अङ्गग्रहणम् । अनित्यत्वस्य फल-माह । तेनेति । नन्विण इतिविहितार्थोन्वय्यस्त्विति वाच्यम् । लिक्षी-ध्वन्धुक्षीध्वमित्यत्र ढत्वघत्वयोरपि सतोर्मूर्द्धन्यापत्तेः ॥ केचिदिति ॥ अ-निनस्मन्निति परिभाषा वाचनिकी । विभाषेट इत्युत्तरसूत्रेऽनर्थकस्यैव षीध्वमः सम्भवात्प्रकृतसूत्रेप्यनर्थकस्य ग्रहणसम्भवः स्यादित्यङ्गादित्युक्त-मिति सिद्धान्तोऽनेन सूचितः । यत्तु कार्मस्ताच्छील्य इति ब्राह्मोऽजाता-विति च टिलोपनिपातनमस्या ज्ञापकमन्यथा कर्मन्ब्रह्मन्शब्दयोर्मन्निनन्त-तया तदवयवयोरन्नोरनर्थकतयान्निति प्रकृतिभावाप्राप्त्या नस्तद्धित इत्ये-व टिलोपे सिद्धे किन्निपातनेनेति ॥ तन्न । अनंशे तयोर्ज्ञापकत्वस्य सम्भ-वेपीनाद्यंशे तत्त्वासम्भवात् ॥ एकदेशानुमत्या ज्ञापकत्वमित्यस्य च वा-चनिक्याः परिभाषाया एकदेशानुमत्या इहाश्रयणमित्यत्रैव पर्यवसानम् ॥ न च तयोः सूत्रयोरनिनस्मन्निति परिभाषाज्ञापकत्वमिति न ब्रूमः कि-न्त्वर्थवत्परिभाषाऽनित्यत्वबोधकतां वदामः । एवञ्चानिनस्मन्नित्यर्थसि-द्धमित्यस्या वाचनिकत्वन्निराकुर्म इति वाच्यम् ॥ अन्तर्बहिर्भ्याञ्च लोम्नः स्यात्मोऽकार इति निर्देनानंशेविशिष्टरूपोपादानेप्युपस्थितार्थस्य विशेष-णत्वास्वीकारेणानूग्रहणेऽनर्थकस्यापि ग्रहणे सिद्धे तयोः सूत्रयोश्चारिता-र्थ्यसम्भवेन मूलशैथिल्यात् ॥ गौरवाज्ज्ञापकत्वन्न सम्भवतीत्याशयेन श-ङ्कते । यद्यपीति ॥ एकस्यैव । भुवः ॥ कर्त्तुर्वचनादिति । कर्त्तुः पाणि-नेर्वचनात्कृञ् इति वचनादित्यर्थः ॥ नन्वेकादेशापवादत्वकथनमसङ्गत-मत आदेरित्यस्य हलादिः शेषात्पूर्वमप्राप्तेस्तदानीमेकादेशाप्राप्तेरिति चे-न्न । अभ्यासविकारे बाध्यबाधकभावाभावेपि पूर्वम्प्रवृत्तौ पूर्वोपस्थित-त्वस्य नियामकत्वमन्यत्र दृष्टमिति हलादिः शेषे कृते एकादेशस्य प्रा-प्तैरकादेशप्राप्तियोग्यविषयेऽस्याचारितार्थ्यन्नापवादत्वाक्षतेः । प्रकृते-सूत्रप्रवृत्तिक्रममाह । अभ्यासविकार इति ॥ न चात आदेरित्यस्यैकादे-

SGDF
Sri Gurgeshwari Digital Foundation

ज्ञापवादत्वकथनादपवादविषये उत्सर्गाप्रवृत्तेः कथमेकादेश इति वाच्यम् ॥ अपवादपदस्य निरवकाशत्वेन बाधकपरत्वात् । येन नाप्राप्तिन्यायेन बाधकत्वं वक्तुमशक्यः । उत्सर्गे कृतेऽपि यत्रापवादलक्षेनाभिमतस्य प्राप्तिस्तद्बाधकतायास्तस्य न्यायस्य स्वीकारात् । एवञ्चात आदेरिति कृतेऽप्येकादेशो भवत्येव ॥ अपवादत्वव्यवहारस्तु यदीदन्न स्यात्तदा हलादिः शेषे कृते पररूपं स्यात् । कृते त्वस्मिंस्तत्प्राप्तिर्नेत्येतावता । यच्चात्र दक्षिणाऽभिहितमयम्पररूपापवाद इति ग्रन्थो नामधातुस्थेन औब्जुरिति रूपञ्चुत्पादनपरग्रन्थेन विरुध्यते तत्र हि कास्प्रत्ययादितिसूत्रे प्रत्ययग्रहणमपनीयानेकाज्ग्रहणङ्कर्तव्यमित्युक्त्वा नाम् । किन्तु द्वित्वम् । अतो गुणे । अत आदेः । औ । वृद्धिरित्युक्तमिति ॥ तन्नेदं वक्तव्यन्तस्य ग्रन्थस्य भाष्योक्तप्रक्रियाभिप्रायकत्वात् । अपवादो यद्यन्यत्र चरितार्थस्तर्ह्यन्तरङ्गेण बाध्यते । तच्चारितार्थञ्चानर्हत्यत्र । अत्र ह्यादेरचः परस्य द्वितीयस्यैकाचोऽभावेनाजादेरित्यस्याप्रवृत्तेर्नन्द्रा इत्यस्याप्यप्रवृत्त्यानर्हत्यस्य द्विर्वचने हलादिः शेषेण सह युगपत् पूर्वस्येव वात आदेरिति दीर्घः । अभ्यासविकारे बाध्यबाधकभावो नास्तीत्यस्य युगपत्प्रवृत्तौ न्याय्यक्रमेण वा समावेश इत्यत्र तेषां तात्पर्यम् । पररूपापवाद इति ग्रन्थस्तु तदभावे पररूपस्य तत्तत्स्थले प्राप्तिमात्रेण ज्ञेय इति ॥ अधिकमग्रे व्युत्पादयिष्यते । के चिदिति । यङ्लुको भाषायामपि प्रवृत्तिवादिनः । चिच ॥ एतद्व्याख्यानावसरे मूलकृता धातोः प्रत्यय इति यद्व्याख्यातन्तन्नाभिप्रायमाह ॥ अत एवेति । धातोः प्रत्यय एव लोपस्येष्टत्वादेव । अत्र भाष्यकृता सङीति वक्तव्यमित्युक्तम् । सङ्च प्रत्यय एवेति प्रत्यय इत्यस्य लाभः । यत्तु वार्त्तिकैकदेशिना सिचो ग्रहणङ्कर्त्तव्यन्तेन सिचः सकारस्यैव लोपो भविष्यति पयो धावतीत्यत्र तु न सिच् । सिच्च प्रत्ययस्य एवेति सङीत्यस्यार्थतो लाभ इति ॥ सा न कैयटोक्तिः चकाधीत्येवेष्यत इति भाष्यविरोधादित्याह ॥ चकाधीति ॥ कैयटो-

SGDF
Sri Gurgeshwari Digital Foundation

क्त्यप्रत्यय इत्यस्य लाभप्रकारङ्खण्डयति यद्यपीति ॥ धादौ परे पदाव-यवसस्येत्यर्थे पयो धावतीत्यादौ दोषस्तदवस्थ एवेति प्रत्यासत्ति-न्यायानुसरणेनैवमपि पयोधावनमित्यादावपि प्राप्नोतीत्याशयेनोक्तं व्याख्यानेन चेति । चकाधीत्याद्यखण्डपदरूपलक्ष्यदर्शनमूलकव्याख्या-नेनेत्यर्थः ॥ तस्यक्लिष्टमिति । अखण्डत्वात्मकविशेषणविशिष्टस्य लाभकांशेनेत्यर्थकसत्रोक्तमतिक्लिष्टमिति ॥ ततः । तदपेक्षया । वचनमेव ॥ सङ्गीर्णवचनमेवेत्यर्थः ॥ आमेतः । लोट एकारासम्भवादाह ॥ लोडादेशे-ति ॥ अजादीनाम् ॥ अत्र भाष्यकृता अजादीनामटा सिद्धमित्युक्तम् तस्यायमाशयः । आटश्चेत्यस्य स्थानेऽटश्चेति कार्यम् । आडागम-विधानन्तु न कार्यम् । सामान्यसूत्रेणैवाटः सिद्धेः । उपसर्गादृतीत्य-तो धाताविवित्यस्यापकर्षकत्वाऽटो धात्ववयवेऽचीति व्याख्यानेनास्वपोह-सनित्यत्राङ् गार्ग्यगालवयोरित्यत्यपि न वृद्धिः ॥ वहुश्रेयस्यै इत्यत्रास्मि-न्पक्षे वृद्धिरेचीत्येव वृद्धिः । तत्राट् तु वक्तुमशक्यः । अतो गुण इति पररूपापत्तेः ॥ न चाटो विधानसामर्थ्यम् ॥ वहुश्रेयस्यामित्यादौ नुड्बाधनेन चारितार्थ्यात् । न चैवमप्यस्वपोऽस्तीत्यत्र वृद्धिः प्राप्नोति । अटः सिप्स्थानिकोकारेणैकादेशे पूर्वान्तवद्भावेनाट्त्वाद्धात्ववयवाच्पर-त्वाच्चेति वाच्यम् । आदित्यनुवर्त्याकाररूपाटोऽचि परे वृद्धिरित्यर्थेना-दोषात् ॥ न चाटश्चेत्यस्य ऐ दिददित्यत्र चरितार्थतया आतीदित्यादाव-तो गुण इति पररूपापत्तिरिति वाच्यम् । पुनर्वृद्धिविधानार्थेनाटश्चेतिच-कारेण तस्य बाधनात् । आस्तामासन्नित्यत्र त्वस्मिन्पक्षे न दोषः । लाव-स्थायामेवाडागमेऽन्तरङ्गत्वाद्वृद्धौ श्नसोरित्यस्याप्रवृत्तेः । वेदे आनडित्य-त्र दीर्घश्रवणन्तु व्यत्ययो बहुलमित्यनेन सिद्ध्यति ॥ अत्र केचित् ॥ एवं सति वक्ष्यमाणेनेण्धातुनिरूपणप्रस्तावेऽतो गुण इत्युत्तरन्नाट इति कर्त्त-व्यन्तेनाटीदित्यादौ न पररूपमिति शेखरग्रन्थेनास्य ग्रन्थस्य विरोधः तत्र नाट इत्युक्तौ बहुश्रेयस्यै अत्रापयडागमोऽस्तु पररूपन्तु न भविष्यति । ना-

SGDF Gurgaonwala Digital Foundation

ट इति निषेधात् । एवञ्च वक्तुमशक्य इत्युक्त्यसङ्गतिरिति ॥ अत्रेदमूहनीयम् । अत्राट् वक्तुमशक्य इति ग्रन्थो लाघवानुसारी । नुड्बाधनार्थमडागमस्यावश्यकत्वे तत्र आकारोच्चारणेनैव पररूपाभावे सिद्धे तदर्थन्नाट इतिवचनान्तरन्न कार्यमिति । आटीदित्यत्र पररूपाभावस्तु उस्योमाङ्क्ष्वाटः प्रतिषेध इत्येतद्वार्तिकान्यथासिद्धिकरणार्थञ्चकारस्य पुनर्वृद्धिकरणार्थत्वकथनस्यावश्यकत्वे तेनैवातो गुण इति पररूपाभावस्य सिद्धौ तदर्थं योगारम्भ एव गौरवदोषमासादयतीति ॥ आदादिको नाट इति ग्रन्थस्तु विशिष्याट्शब्दोच्चारणेन या वृद्धिस्तस्याः प्रतिबन्धकं यत्पररूपन्तन्निराकरणं यथा भवति तथा यत्नः कार्यः स च पुनर्वृद्धिविधानरूपो वा स्पष्टप्रतिपत्त्यर्थन्नाट इति वाचनारम्भरूपो वा कार्य इत्येतावन्मात्रतात्पर्यको बोध्यः ॥ एवञ्चोस्योमाङ्क्ष्वाटः प्रतिषेध इतिवार्त्तिकान्यथासिद्धिकारकम्पुनर्वृद्धिविधानन्तु तद्विषयकमेवेति तात्पर्यम् । अयञ्च ग्रन्थो लाघवानादरेण बोध्य इति । ननु नविभक्ताविति निषेधाददादेशावयवतकारस्य कथमित्संज्ञेत्यत आह । तकार इति ॥ युगपदेवेति । पूर्वोक्ता युक्तिस्तु लक्ष्यभेदाल्लक्षणभेदाभिप्रायेणेयञ्चादेशविधायकलक्षणभेदाभावमाश्रित्य ॥ मूले एधिषीध्वमिति । अत्रेटो ध्वंशब्दभक्ततयाऽङ्गस्येसन्तत्वाभावेन मूर्द्धन्याभावः ॥ इति मते त्विति ॥ विभाषेट इत्युत्तरसूत्रे इणः परस्येटो ग्रहणेन तत्रानुवर्त्तमानमिणिति पदमवश्यमिडतिरिक्तपरमिति स्वीकार्यमिति पूर्वसूत्रेऽपि तथैव युक्तमिति तेषाम्भावः । अस्वरसस्येति ॥ भाष्यानुपलभ्यमानत्वमात्रमत्रास्वरसबीजम् । ननु भाष्य ऋतोवर्णान्ता अनुदात्ता इत्युक्तमतोऽत्रोदन्तपर्युदासः कथमत आह । दीर्घ इति । इडभावनिपातनमिति । एवञ्च दीर्घोकारान्तपर्युदासे तदेव मानमित्यर्थादुक्तम्भवति । ऋदन्तपर्युदासे मानन्तु वृतो वेत्यनेन ऋदन्तात्परस्येटो दीर्घविधानन्तरिता तरीतेत्यभियुक्तोदाहरणञ्च । तथा भाष्ये के पुनरनुदात्ता इतिप्रश्नङ्कृत्वा

तेषान्निरूपणावसरे ऋदन्ताश्च जागृवृङ्वृञ् इत्युक्तन्तत्र जागृप्रभृतीनां ह्रस्वऋवर्णान्तत्वात्पर्युदासेन तादृशानामेव ग्रहणम् । यौतिः । यु मिश्रणे । रौतिः रुशब्दे । रुङ् गतीति च । निरनुबन्धकपरिभाषालुग्विकरणपरिभाषाभ्याम् । तेन । एकाच इति कथनेन । न चैकाच एव चेदनुदात्तत्वन्तदोर्णुञ्धातोरनेकाच्त्वादनुदात्तत्वन्न स्यादित्यूर्णुत इति न सिध्यतीति वाच्यम् । ऊर्णोतेर्नुवद्भावो वाच्य इति वार्त्तिकबलेन तस्य सिद्धेः । न च नुवद्भावविधानादेकाच्त्वमेवातिदेशात्कल्प्यतामिति वाच्यम् । यथा तस्यैकाच्कल्पना तथा नुपर्युदासस्यापि प्राप्तिसत्त्वात् । ऊर्णुत ऊर्णुतवानिति तु श्र्युकः कितीत्यनेन सिध्यति । ऊर्णुनावेत्यत्राम्भाववत् । अत एवोर्णोनूयत इत्यत्र यङ् । भाष्ये त्वनुबन्धरहित इति । एवञ्च शक विभाषित इत्यस्याप्यनुदात्तत्वम्प्राप्नोति । डुपचेवेति । अत्रैवकारेण पच व्यक्तीकरण इत्येतद्व्यावृत्तिः । न च तदनुबन्धकपरिभाषया तस्यैव ग्रहणं स्यादिति शङ्क्यम् । तस्याऽन्यतरानुबन्धोच्चारण एव प्रवृत्तेरत एवात्र पच् इत्यनुबन्धरहित एवोच्चारित इति । सृजिरिति । सृज विसर्ग इति । खिदित्यनेन खिद दैन्ये खिद्यतेः खिनत्तेः खिन्दतेश्च ग्रहणम् । विद्यतिः विद सत्तायामिति विनत्ति विद विचारणे । यद्यपि भाष्य इति । तत्र हि युधिबुधीत्येव पाठात् । माधवादिप्रामाण्यादिति । तेन बोधतेर्न ग्रहणमिति सिद्धम् । अत एव । तृप्यतिदृप्यतीतिपाठादेव । यद्यप्यनिटां स्वरूपदर्शनपरभाष्ये तृपिदृपीत्येव पठितम् । तथापि शे मुचादीनामिति सूत्रस्थभाष्यीयप्रयोगदर्शनादिह श्यना निर्देशः कृत इत्याह । शे मुचादीनामितीति । एतेन तुदादिगणपठितयोर्व्यावृत्तिः । तप् इत्यनेन तप् सन्तापे । तप ऐश्वर्ये । तप्र दाहे इत्यपि णिजभावपक्षे गृह्यते । भाष्ये तपीतिसामान्यत एव निर्देशात् । तिप् तिपृ प्रेरणे । तिप क्षरणे।तृप प्रीणने। पट्ट हर्षविमोचनयोः । यद्यप्यनयोरिड्विकल्पो भवति रधादित्वात्तथाप्यनुदात्तत्वमनयोरनुदात्तस्य चर्दुपधस्यान्य-

SGDF
Sri Gargeshwari Digital Foundation

तरस्यामित्यमागमार्थम् । लुप् तौदादिक एव । लुम्प् छेदन इति । तेन देशादिकस्य व्यावृत्तिः । व्याख्यानादिति । भाष्ये लुपिलिपोति लिपिसाहचर्येण पाठमूलकव्याख्यानादित्यर्थः । श्वादेर्दिवादेश्चेति । शप उपालम्भे । शप आक्रोशे । भाष्ये शपीत्येव पाठात् । श्यना निर्द्देशः । श्लिष्यतय इति निर्द्देशः । विभक्तविहितस्येति । विभक्तेन सूत्रेण विहितस्येत्यर्थः । अङ्बाधकत्वमुक्तमिति । स चाङ् यत्र प्राप्नोति तस्येह ग्रहणम् । अङ् च पुषादेरेव । तत्र हेतुमाह । अनिट इत्यनुवर्त्तनादिति । श्लिष आलिङ्गन इत्यस्य ग्रहणम् । कैयटोक्तिरपि साधिकेत्याह । दाहार्थस्येति ॥ यद्यप्येकाच इतिसूत्रभाष्ये श्लिषिविषिति सामान्यत एवोक्तम् । तथापि श्लिष आलिङ्गन इतिसूत्रस्थभाष्यप्रामाण्येन दैवादिकस्यैवानिट्त्वङ्कल्प्यत इति भावः । भौवादिकः श्रिषु श्लिषु प्रुषु प्लुषु दाहे इत्ययन्तु न गृह्यते तस्य सानुबन्धकत्वेन सेट्कत्वात् ॥ ननु श्लिष आलिङ्गन इतिसूत्रेऽनिट इत्यनुवृत्तावेव किम्प्रमाणमिति चेदालिङ्गन इति विभक्तसूत्रस्य नियमार्थत्वोपपादनपरम्भाष्यमेव । तथाहि तत्र हि श्लिष आलिङ्गन इतिसूत्रस्य पुषाद्यङ्बाधकत्वमुत नियमार्थत्वमितिविचारे कैंमर्थक्यान्नियमो भवतीत्यनेन पुषाद्यङ्बाधकतया चारितार्थ्यमुद्भाव्योपाश्लिषज्जतु काष्ठमित्यादावपि क्सः प्राप्नोति शल इगुपधेति सूत्रेण । एवमात्मनेपदे आलिङ्गनेऽनालिङ्गने च क्सः प्रसज्येतेत्यतिप्रसङ्गमभिधाय योगविभागात्सिद्धम् । योगविभागः करिष्यते । श्लिषः । श्लिषः क्सो भवति । पुषाद्यङ्बाधनार्थम् । तत आलिङ्गने । आलिङ्गन एव क्स इति नियमार्थमिदन्तेनोपाश्लिषज्जतु काष्ठमित्युक्तम् । अत्र भाष्ये श्लिष इत्यत्यस्याङ्बाधकत्वकथनादङश्चानिट्कादेव प्राप्तेः श्लिषसूत्रेऽप्यनिट इत्यनुवृत्तिः सूचितेति ॥ न च विभक्तसूत्रन्दाहार्थकधातोश्चिण् प्राप्तः उपाश्लेषि कन्या देवदत्तेनेत्यत्र तत्र तद्बाधनार्थमेवास्त्विति वाच्यम् । च्लिण्भावकर्मणोरिति सूत्रे चिण् ते पद इति सूत्राच्चिण्ग्रहणानुवृत्त्यैव सिद्धे पुनश्चिण्ग्रहणञ्चि-

SGDF
Sri Gangeshwari Digital Foundation

णेव यथा स्याद्यदन्यत्प्राप्नोति तन्मा भूदित्युक्तम्भाष्ये तेनास्य चिण् बाधकत्वाभावात् । अनार्ष इति । क्वचिद्दृश्यते सोऽपपाठ इत्यर्थः । तत्र हेतुमाह । मृष इति । माधवादिप्रामाण्यादिति । मृषीत्येव भाष्ये पाठादिति भावः । कृष्धातुस्तु कृष् विलेखन इति भौवादिकस्तौदादिकश्च गृह्यते कृषिकर्षतीतिव्याघ्रभूतिनोक्तत्वात् । विषिशिषी जौहोत्यादिकरौधादिकौ च गृह्येते । पुष्धातुर्यद्यपि भाष्ये न पठितस्तथापि माधवादिप्रामाण्यान्निर्दिष्टः परन्तु दैवादिक एव न तु भौवादिक इत्याह । एवं विष् विप्रयोग इति । क्र्यादिषु पठितोऽपि । माधवस्तु जिष विषेति दण्डकपठितस्यापि भौवादिकस्य ग्रहणमित्याह विनिगमनाविरहात् । वसतिर्भ्वादिरिति । वस निवास इति । तत्र प्रमाणमाह । प्रसारणीति । सम्प्रसारणीत्यर्थः । विनापि प्रत्ययमिति संशब्दलोपादेवन्निर्देशः । दुहधातुर्दुह प्रपूरण इति निर्दिष्टोऽदादौ स एव ग्राह्यो न तु तुहिर् दुहिर् उहिरर्दन इति भ्वादिः । शक्ल इतीति । यद्यपि शकधातुस्वरूपनिरूपणं पूर्वत्र कृतमेव तथापि गणान्तरनिर्दिष्टानां केषांचिद्धातूनामिह यादृशानुपूर्व्या यदर्थन्निर्देशो यन्निवृत्त्यर्थङ्कृतस्तन्निरूपणं करिष्यमाणं ज्ञात्वा शकधातोः पुनः स्मरणेन सिंहावलोकनन्यायेन पुनस्तत्र विशेष उक्तः ॥ भाष्य इति । तत्र हि शकिः कवर्गान्तानामित्येवोक्तम् । एवञ्च कान्त एक इति नव्योक्तमसङ्गतमिति भावः । विद्यतिरिति । अत्र विद्यतिर्विनदितिनिर्देशेन द्वावेव गृह्येते इति भ्रान्तिः स्यादिति विद्लृलाभ इति तुदादौ निर्दिष्टो न व्यावर्त्यः किन्तु विद ज्ञान इत्यदादिरिति दर्शयति ॥ इति पाठ इति । इति भाष्ये पाठ इत्यर्थः । उभयोः । तौदादिकरौधादिकयोः । अत एव । पूर्वोक्तानान्त्रयाणामेव ग्रहणस्य सर्वसम्मतत्वादेव । एतेनाश्रूयमाणविकरणः सेट्क इति दर्शितम्भवति ॥ तौदादिकस्यापीति । अपिनाऽदादिपठितसङ्ग्रहः । तद्ग्रहणमेव । तौदादिकग्रहणमेव । विभाषा ममहन्नेतिसूत्रे विशिना

SGDF
Sri Gangeshwari Digital Foundation

रितिखण्डनैकवाक्यतया तस्यैव ग्रहणसम्भवादिति भावः । तदर्थम् । तौ-
दादिकार्थम् । तद्रीत्या तस्येट्सहित एव प्रयोगो यथा स्यादिति नि-
षेधाभावाय वार्तिकमावश्यकमिति तस्यानिट्त्वेनेड्रहितप्रयोग एव
साध्योऽतस्तत्र प्रतिषेधेऽपीष्टापत्तिरित्यविदेरिति वार्तिके वेत्तेरेव ग्र-
हणम् ॥ अत एव । विन्दतेरनिट्त्वादेव ॥ एतेन । पूर्वोक्तव्याख्यानेन ॥
नवानामिहोक्तौ व्याघ्रभूतिसम्मतेर्हेतुत्वम्मूलकृता दर्शितन्तत्र न तत्स-
म्मतिरेव हेतुः किन्तु साधकान्तरमप्यस्तीत्याह । तेन रक्तमित्यादिना ॥
तुद्धातुर्भाष्यानुक्त इतिपक्षेप्याह । तुन्नवद्वेति । स्पर्द्धापूर्वकशब्दन इति ।
स्पर्द्धापूर्वकशब्दोत्पत्त्यनुकूलव्यापार इत्यर्थः । फलतावच्छेदकसम्बध-
स्यात्र स्वप्रयोज्यज्ञानाश्रयत्वमित्यस्य सकर्मकत्वसिद्धिरिति भावः ॥
अभ्यासावयवस्य शर्पूर्वस्य खय्मात्रस्य शेषविधाने वृश्चधातावतिप्र-
सङ्गः स्यादिति तद्व्यावृत्त्यर्थमाह । अत्रादिरिति । तदनुवृत्तावादिः
खय् इत्यर्थः सम्पन्नस्तथा सत्यसम्भवो न हि शर्पूर्व आदिश्च भवती-
त्यत आह । तत्र शरिति ॥ द्विवचनान्तेति । संख्यावाचकस्यैवेकशब्दस्य
नित्यैकवचनान्तत्वनियम इति भावः ॥ नन्वेकदेशान्वये गमकत्वाभा-
वात्कथं वृत्तिरत आह । एकदेशेति ॥ उपस्थितो लिडेवेति । लि-
टीत्यस्यावृत्त्योभयविशेषणत्वमित्यन्ये ॥ समासे उद्देश्यविधेयभावाप्र-
तीतिविवादिमताभिप्रायेणाह । विशिष्टेत्यादि ॥ अत्रलिटीतिप्रकृतसू-
त्रस्थमावर्त्यादेशस्य विशेषणमेत्वाभ्यासलोपे निमित्तञ्चेति स्वीकार्य-
मित्यभिप्रायेण मूले किति लिटीत्युक्तम् । तत्रादेशविशेषणस्य फलन्नेमिथ
सेहे इति मूल एवोपान्तन्निमित्तत्वेन तदुपादानस्य फलन्तु नोक्तमत
उपक्रमे भाष्योक्तन्तत्फलमाह । लिटीति किम् पापच्यत इति ॥ प्रकृ
तसूत्रस्य लिण्निमित्तकत्वे लिटो ङित्वासम्भवेन कितीत्यस्यैव सम्बन्धो-
वर्णितः । लिटीत्यस्यातथात्वे तु ङितीत्यपि वक्तुं शक्यमिति भावः ।
न च पापच्यत इत्यत्र दीर्घत्वमेत्वम्बाधिष्यत इति वाच्यम् । अभ्यासवि-

E 776

ಪುಸ್ತಕದ ಸಂಖ್ಯೆ.................

कारे बाध्यबाधकभावो नास्तीत्येत्वस्य कृतेऽपि दीर्घत्वे प्राप्तेः । एत-
देवोपपादयति । अभ्यास इत्यादिना । प्राप्नुत इति । अत्र प्राप्नुत इ-
त्युपादानेन सम्भवमात्रेणैतत्प्रयोजनन्न तु तद्युक्तमिति ध्वनितम् । कथ-
मिति चेदुच्यते । एत्वाभ्यासलोपयोः कृते दीर्घत्वे यद्यपि प्राप्तिस्तथापि
यङीतिविशेषोपादानाद्विशेषविहितेन सामान्यविहितम्बाध्यत इति प्रसि-
द्धन्यायेन दीर्घत्वम्बाधकम्भविष्यति । ननु स न्यायः प्रकृते नास्ति लि-
टीत्यस्यात्राप्युपादानात् । किञ्चैत्वाभ्यासलोपविषये ह्रस्वहलादिः शेष-
योरवश्यम्प्राप्तयोरेतौ यथा बाध्यसामान्यचिन्तया ह्रस्वहलादिः शेषयोर्बा-
धकौ तथा दीर्घत्वस्यापि बाधकौ भविष्यत इति चेन्न । अपवादत्वस्यैव
तस्मिन्नत्यभावात् । तदुक्तम्भाष्ये । अभ्यासविकारेष्वपि ज्येष्ठमध्यमकनीयांसः
प्रकारा भवन्ति । तत्र ह्रस्वहलादिः शेषावुत्सर्गौ तयोर्दीर्घत्वमपवाद
एत्वञ्च । अपवादविप्रतिषेधाद्दीर्घत्वम्भविष्यतीति । अत्र भाष्येऽपवाद-
विप्रतिषेधादित्यनेन दीर्घत्वम्प्रत्यपवादत्वन्नास्ति तदप्राप्तियोग्यविषयेऽ-
चारिताार्थ्याभावादिति ध्वनितम् । यः सर्वबाध्यः स कनीयान् । यस्तु
कस्य चिद्बाधकः कस्य चिद्बाध्यः स मध्यमः यस्तु सर्वबाधकस्स ज्येष्ठ इ-
त्युच्यते प्रकृते तु सम्भव एतस्य प्रकारस्य पर्जन्यन्यायेन नेमतुरित्यादौ
ह्रस्वप्राप्त्योपपादनीयः । तथा च दीर्घत्वे कृते पुनरेत्वाभ्यासलोपौ न
भविष्यतः यथा तु दीर्घत्वे कृते तयोरप्राप्तिस्तम्प्रकारमाह । किञ्चेत्या-
दिना । न च परत्वादित्यसङ्गतमेत्वाभ्यासलोपयोर्नित्यत्वादिति वाच्यम् ।
शब्दान्तरप्राप्त्याऽनित्यत्वात् । तदाशयः । भाष्याशयः । एतेन । यत्प्र-
माणदूषणेन । भाष्यविरोधापत्तेरिति । तत्र हि कृते दीर्घे सन्यत इती-
त्वन्न स्यादनया परिभाषया तु भवतीति प्रतिपादितम् । सेटीत्येतत्सा-
मर्थ्यादिति । एतत्सूत्रारम्भसामर्थ्यादित्यर्थः । नन्वादिग्रहणम्प्रकृतसूत्रे
व्यर्थम् । हलादिः शेषस्य सर्वत्र प्राप्त्या सूत्रस्यैव वैयर्थ्यापत्तिरिति तद-
तिरिक्तस्यैवादेशस्य ग्रहणसम्भवादिति चेन्न । देभतुरित्यत्रानुनासिकलो-

SGDF

रितिखण्डनैकवाक्यतया तस्यैव ग्रहणसम्भवादिति भावः । तदर्थम् । तौदादिकार्थम् । तद्रीत्या तस्येट्सहित एव प्रयोगो यथा स्यादिति निषेधाभावाय वार्तिकमावश्यकमिति तस्यानिट्त्वेनेड्रहितप्रयोग एव साध्योऽतस्तत्र प्रतिषेधेऽप्यीष्टापत्तिरित्यविदेरिति वार्तिके वेत्तेरेव ग्रहणम् ॥ अत एव । विन्दतेरनिट्त्वादेव ॥ एतेन । पूर्वोक्तव्याख्यानेन ॥ नवानामिहोक्तौ व्याघ्रभूतिसम्मतेर्हेतुत्वम्मूलकृता दर्शितन्तत्र न तत्सम्मतिरेव हेतुः किन्तु साधकान्तरमप्यस्तीत्याह । तेन रक्तमित्यादिना ॥ तुद्धातुर्भाष्यानुक्त इतिपक्षेऽप्याह । तुन्नवद्धेति । स्पर्द्धापूर्वकशब्दन इति । स्पर्द्धापूर्वकशब्दोत्पत्त्यनुकूलव्यापार इत्यर्थः । फलतावच्छेदकसम्बधश्चात्र स्वप्रयोज्यज्ञानाश्रयत्वमित्यस्य सकर्मकत्वसिद्धिरिति भावः ॥ अभ्यासावयवस्य शर्पूर्वस्य खय्मात्रस्य शेषविधाने वृश्चधातावतिप्रसङ्गः स्यादिति तद्भावृत्यर्थमाह । अत्रादिरिति । तदनुवृत्तावादिः खय् इत्यर्थः सम्पन्नस्तथा सत्यसम्भवो न हि शर्पूर्व आदिश्च भवतीत्यत आह । तत्र शरिति ॥ द्विवचनान्तेति । संख्यावाचकस्यैवेकशब्दस्य नित्यैकवचनान्तत्वनियम इति भावः ॥ नन्वेकदेशान्वये गमकत्वाभावात्कथं वृत्तिरत आह । एकदेशेति ॥ उपस्थितो लिङ्गेवेति । लिटीत्यस्यावृत्त्योभयविशेषणत्वमित्यन्ये ॥ समासे उद्देश्यविधेयभावाप्रतीतिवादिमताभिप्रायेणाह । विशिष्टेत्यादि ॥ अत्रलिटीतिप्रकृतसूत्रस्थमावर्त्यादेशस्य विशेषणमेत्वाभ्यासलोपे निमित्तञ्चेति स्वीकार्यमित्यभिप्रायेण मूले किति लिटीत्युक्तम् । तत्रादेशविशेषणस्य फलन्नेमिथ सेहे इति मूल एवोपान्तन्निमित्तत्वेन तदुपादानस्य फलन्तु नोक्तमत उपक्रमे भाष्योक्तन्तत्फलमाह । लिटीति किम् पापच्यत इति ॥ प्रकृतसूत्रस्य लिण्निमित्तकत्वे लिटो ङित्त्वासम्भवेन कितीत्यस्यैव सम्बन्धो वर्णितः । लिटीत्यस्यातथात्वे तु ङितीत्यपि वक्तुं शक्यमिति भावः । न च पापच्यत इत्यत्र दीर्घत्वमेत्वम्बाधिष्यत इति वाच्यम् । अभ्यासवि-

SGDF
Sri Gargeshwari Digital Foundation

E 776

कारे बाध्यबाधकभावो नास्तीत्येत्वस्य कृतेऽपि दीर्घत्वं प्राप्तेः । एतदेवोपपादयति । अभ्यास इत्यादिना । प्राप्नुत इति । अत्र प्राप्नुत इत्युपादानेन सम्भवमात्रेणैतत्प्रयोजनन्न तु तद्युक्तमिति ध्वनितम् । कथमिति चेदुच्यते । एत्वाभ्यासलोपयोः कृते दीर्घत्वे यद्यपि प्राप्तिस्तथापि यङीतिविशेषोपादानाद्विशेषविहितेन सामान्यविहितम्बाध्यत इति प्रसिद्धन्यायेन दीर्घत्वम्बाधकम्भविष्यति । ननु स न्यायः प्रकृते नास्ति लिटीत्यस्यात्राप्युपादानात् । किञ्चैत्वाभ्यासलोपविषये ह्रस्वहलादिः शेषयोरवश्यम्प्राप्तयोरेतौ यथा बाध्यसामान्यचिन्तया ह्रस्वहलादिः शेषयोर्बाधकौ तथा दीर्घत्वस्यापि बाधकौ भविष्यत इति चेन्न । अपवादत्वस्यैव तस्यात्यभावात् । तदुक्तम्भाष्ये । अभ्यासविकारेष्वपि ज्येष्ठमध्यसकनीयांसः प्रकारा भवन्ति । तत्र ह्रस्वहलादिः शेषावुत्सर्गौ तयोर्दीर्घत्वमपवाद एत्वञ्च । अपवादविप्रतिषेधाद्दीर्घत्वम्भविष्यतीति । अत्र भाष्येऽपवादविप्रतिषेधादित्यनेन दीर्घत्वस्यात्यपवादत्वन्नास्ति तदप्राप्तियोग्यविषयेऽचारितार्थ्याभावादिति ध्वनितम् । यः सर्वबाध्यः स कनीयान् । यस्तु कस्य चिद्बाधकः कस्य चिद्बाध्यः स मध्यमः यस्तु सर्वबाधकस्स ज्येष्ठ इत्युच्यते प्रकृते तु सम्भव एतस्य प्रकारस्य पर्जन्यन्यायेन नेमतुरित्यादौ ह्रस्वप्राप्तयोपपादनीयः । तथा च दीर्घत्वे कृते पुनरेत्वाभ्यासलोपौ न भविष्यतः यथा तु दीर्घत्वे कृते तयोरप्राप्तिस्तत्प्रकारमाह । किञ्चेत्यादिना । न च परत्वादित्यसङ्गतमेत्वाभ्यासलोपयोर्नित्यत्वादिति वाच्यम् । शब्दान्तरप्राप्तयाऽनित्यत्वात् । तदाशयः । भाष्याशयः । एतेन । वक्ष्यमाणदूषणेन । भाष्यविरोधापत्तेरिति । तत्र हि कृते दीर्घे सन्यत इतीत्वन्न स्यादनया परिभाषया तु भवतीति प्रतिपादितम् । सेटीत्येतत्सामर्थ्यादिति । एतत्सूत्रारम्भसामर्थ्यादित्यर्थः । नन्वादिग्रहणम्प्रकृतसूत्रे व्यर्थम् । हलादिः शेषस्य सर्वत्र प्राप्तया सूत्रस्यैव वैयर्थ्यापत्तिरिति तदतिरिक्तस्यैवादेशस्य ग्रहणसम्भवादिति चेन्न । देभतुरित्यत्रानुनासिकलो-

SGDF
Sri Gargeshwari Digital Foundation

पेऽस्य सूत्रस्याप्रवृत्त्यापत्तेः । किन्त्वनु तत्र श्रन्थिग्रन्थीति व्याकरणान्तरीयवचनेन भवति । दकारादिष्विति । दकारस्य स्थान इत्यादिः । इति प्रश्न इति । न च देभतुरित्यत्रानुनासिकलोपस्याभीयत्वेनासिद्धत्वादेत्वं न स्यादिति दम्भेश्चेति वार्त्तिकमारब्धन्तदपि घेदादिग्रहणाभावे न स्यात्तदा सर्द्धं यर्ध्यमिति वाच्यम् । तस्यादिग्रहणसिद्धार्थानुवादकत्वात् । एवञ्चैकेत्यादि किमित्यस्यैकग्रहणविशिष्टङ्किमर्थमित्यर्थः । तत्सरतुरित्यत्र दोषवारणाय हल्विशेषणार्थमेकग्रहणमावश्यकमित्युत्तरस्य भावः । स्पष्टार्थमिति । देभतुरित्यत्र दोषाभावस्य स्पष्टप्रतिपत्त्यर्थमित्यर्थः । चक्षिङावाविति । अत्रादिना ये धातव इरितस्तेषाम्प्रत्येकमिकाररेफयोरित्संज्ञाभवनपक्षे दोषाभावसङ्ग्रहः । ननु प्रकृतसूत्रे धातुग्रहणमनर्थकम् । न चाभैत्सीदित्यादौ सिजन्ते दोषः । सिचः स्थाने सजिति पाठेनादोषात् । तासिरप्यकारान्त एवोच्चारणार्थाकारान्तः पठनीयः । न च सजिति करणेऽसंस्तेत्यत्रानुनासिकलोपापत्तिरिति वाच्यम् । हनः सिजिति किर्त्त्वविधानन्नलोपार्थङ् क्रियमाणमत्रैव नलोप इत्यर्थम्भविष्यतीत्यदोषात् । न च तत्सज्निमित्तक एव नलोपो यथा स्यात्सार्वधातुकनिमित्तको मा भूदिति नियमार्थम्भविष्यत्यन्यथा सार्वधातुकनिमित्तकस्य व्याश्रयत्वादसिद्धत्वाभावादतो लोपापत्तिरिति वाच्यम् । अन्तरङ्गेऽतो लोपे बहिरङ्गस्य नलोपस्यासिद्धत्वादेव तदप्राप्तेरार्द्धधातुकोपदेशेऽदन्तत्वाभावाच्च । न च तासेरिकाराभावे आहन्ता इत्यादौ टिलोपे कृतेऽनिदितामिति नलोपापत्तिरिति वाच्यम् । असिद्धवदत्राभादित्यनेन टिलोपस्यासिद्धत्वादत आह । धातोरितीति । धातुग्रहणन्धातुसंज्ञाप्रवृत्त्यवस्थाविशिष्टे लाक्षणिकमिति भावः । न चाङ्गाधिकारबाधः । लक्ष्यानुरोधेनाङ्गपदस्याङ्गसंज्ञाप्रवृत्तियोग्यलाक्षणिकत्वात् । स्पष्टम्भाष्य इति । धातुग्रहणसामर्थ्यात्तदुपदेशे नुम्विधानमिति हि तत्रोक्तम् । श्विदि श्वैत्य इत्यत्र श्वैत्यपदेन फलमात्रस्य निर्द्देशो न तु व्यापारस्य न च तावता क्रि-

SGDF
Sri Gargeshwari Digital Foundation

यावाचकत्वलाभ इति श्वेत्यपदन्तत्समानाधिकरणभवनक्रियोपलक्षणमि-त्याशयेनाह । श्वेतो भवतीति । नतिर्नमस्करणम् । मदि स्तुति । मोदो-ऽहर्षः । मदो गर्वः । स्वप्नपदार्थमाह । स्वप्न इति । अलास्यम् कर्त्तव्यार्था-नवधानम् । न शसददवादि । अत्र गुणशब्दस्यादेङ्मात्रपरत्वे गुणो योऽ-कार इत्यर्थापत्तावाह । शसिददीति । नन्वत्र गुणशब्दो गुणावयवपरोऽव-श्यं वाच्योऽन्यथा तेरतुस्तेरुरित्यस्यासङ्ग्रह इति कथं शसिददिग्रहणवैय-र्थ्यमत आह । व्यपदेशिवद्भावेनेति । ननु शसिददिग्रहणसामर्थ्याद्व्यप-देशिवद्भावानाश्रयणमत आह । व्याख्यानादिति । तेरतुरित्यादिलक्ष्यद-र्शनमूलकव्याख्यानादित्यर्थः । न च शसिददिग्रहणसामर्थ्यादित्यनुपपन्न-ङ्गुणशब्दस्य गुणमात्रपरत्वे विधिनिषेधयोर्विषयव्यवस्थाया एवासंभवः स्यादिति वाच्यम् । तावतापि विधिनिषेधयोर्विषयविभागार्थङ्गुणशब्द-स्य धातूपदेशेऽश्रूयमाणगुणे लक्षणाया आवश्यकत्वे गुणशब्देन भाविते लक्षणायां उचितत्वात् । न चैवङ्गुणशब्दस्य स्थाने ऋग्रहणमेव कार्यम् । ऋकारस्य स्थाने यो गुणस्तदवयवस्य निषेध इत्यर्थोऽस्त्विति वाच्यम् । ससरिथेत्यस्य सिद्धावपि लुलविथेत्यादेरसिद्ध्यापत्तेः । न च गुणस्य यो-ऽवार इत्येवास्तु गुणशब्दश्च शब्दपर एवास्तु स्वबोध्यावयवत्वं षष्ठ्यर्थो भविष्यति गुणशब्दोपादानसामर्थ्यादशब्दसंज्ञेत्यस्य च बाधोऽस्त्वेवं स-नैव सर्वेष्टसिद्धौ भावितपदोपादानवैयर्थ्यमिति वाच्यम् । गुणशब्दस्य गुणशब्दभाविते लक्षणायां शसेर्द्देरित्यत्र यथाऽवयवावयविभावः षष्ठ्य-र्थोऽस्ति तथैव गुणस्य नेतिवाक्येऽपि भवतीति शसिददिवादिभ्यस्तुल्य-रूपत्वोपपत्तये मूलकृतैवमभिधानात् । गुणशब्दभावितत्वञ्च साक्षात्प-रम्परासाधारणमिति लुलविथेत्यादेः सङ्ग्रहः । नन्वास्वादन इतयेव मूले प्रथमत उपात्तमित्ययमित्यनेनार्थभेदेन सकर्मकत्वाकर्मत्वविभाग-कथनासङ्गतिरत आह । आस्वादनमिति । सुब्धातुव्यावृत्तय इति । ष-कारीयतीत्यादिव्यावृत्तय इत्यर्थः । उपदेश इत्यनुवृत्तेरिति । उपदेशे

SGDF
Sri Gargeshwari Digital Foundation

षादिश्च धातुरेव न प्रातिपदिकमुद्देशश्च प्रातिपदिकानान्नोपदेश इत्यादेच उपदेशेऽशितीति सूत्रे भाष्ये उक्तेः। लषतीति। न चास्य सत्त्वे षकारोच्चारणवैयर्थ्यमिति वाच्यम्। लेषतुः। लेषुरित्यत्र षत्वसम्पत्त्या चरितार्थत्वात्। ष्वदधातोः षोपदेशत्वफलमाह। षोपदेशेति। मानं सुखमिति। इह तथार्थो धातूनामनेकार्थत्वात्। उपधायाश्च। स्फूर्जधातोर्दीर्घोच्चारणादयन्दीर्घोऽनित्यः। तेन स्फुर्ज्जतीत्याद्यपि भवतीति केचित्। वस्तुतस्तत्रापि ह्रस्वपाठ एवेति बोध्यम्। ष्ठिवुधातावतिप्रसङ्गमाशङ्क्याह। ष्ठिवेरिति। दन्त्याजन्तेत्यनेन लक्षणेन षोपदेशत्वनिर्णयकरणे यत्र साम्प्रतं षकारः श्रूयते षिधू शास्त्र इत्यादौ तत्र लक्षणेनापि तथात्वनिश्चयः। यत्र तु साम्प्रतं सकार एव श्रूयते साधादौ यथा तत्र पूर्वकालस्थितपाठस्त्वंशानुमानम्बोध्यम्। अषोपदेशत्वेऽपीति। सृपिसृजी तु पर्युदस्तौ। स्पृशिस्पृहीत्यनयोस्तु दन्त्याजन्तसादित्वन्नास्ति। ननु छन्दसि दृष्टानुविधानादेव षत्वाभावे सिद्धे न रपरेति सूत्र एषामुपादानवैयर्थ्यमत आह। यद्यपीत्यादि। अष्टात्रिंशदिति। द्वत्रष्टन इत्यात्वम्। अनयोः। वदव्रजेत्यनयोः। अज्ग्रहणसामर्थ्यादिति। तद्धि नाजन्तस्येत्यर्थकम्। अकारान्तानामसम्भवात्। इगन्तानां तु सिचि वृद्धिरिति प्राप्तेः। एजन्तास्तु वृद्धियोग्याः सिच्परा न सम्भवन्त्यात्त्वस्य प्रवृत्तेरिति सामानाधिकरण्येनान्वयेऽज्ग्रहणवैयर्थ्यमिति भावः। नेटीति निषेधादिति। इडादौ सिच्येतादृशानामेव सम्भव इति भावः। वृद्धिभाजः। वृद्धिस्थानिनः। येन नाव्यवधानन्यायश्चाश्रयणीयस्तथा सत्येकवर्णव्यवधान एव स्यान्न त्वराङ्क्षीदित्यादावधिकव्यवधाने। हल्ग्रहणे तु निर्दिष्टपरिभाषयोपस्थितमव्यवहितपदं हल्त्वजात्याश्रयातिरिक्तकृतव्यवधानाभावपरमिति भावः। अत एव। वृद्धिभाजो विशेष्यत्वादेव अमाद्धातोः सातत्यगमनार्थकत्वेऽपि क्वचित्प्रत्यासत्तावपि वृत्तिरत एवास्माद्धातोरौणादिके कनि कृतेऽन्तकशब्दः प्रत्यासन्नवाची श्रूयते।

SGDF
Sri Gargeshwari Digital Foundation

अर्के चेन्मधुविन्देत किमर्थम्पर्वतं व्रजेदिति यथा ॥ मूले श्चुतिर् क्षरणे ॥ यकाररहितोप्ययमित्यत्रायमित्यस्य श्चुतिरित्यर्थः । तेन मधुश्चुतमिति प्रयोगसिद्धिः । मूले सात्पदाद्योरिति । निषिषेधेत्यत्रेत्यादिः । निषेध-बाधनार्थमेवोपसर्गात्सुनोतीत्यादिसूत्राणीति भ्रमवारणायाह । इदमुपेति॥ ननु ण्यन्तेनाभेर्योगात्कथं षत्वमत आह । अभिषावयातीत्यादि ॥ प्रकृत्यर्थविशेषणता । प्रकृत्यर्थगतविशेषणद्योतकता ॥ समफलत्वायेति ॥ यदि ण्यन्तसमभिव्याहारे शब्दशक्तिस्वाभाव्यादुपसर्गाणाम्प्रकृत्यर्थविशे-षणत्वमेवेति नियमो न स्यात्तदा वचनारम्भपक्षे ण्यन्तसमभिव्याहारेऽ-भीत्याद्युपसर्गस्य प्रकृत्यर्थविशेषकत्वम्भवतु ण्यन्तविशेषणत्वम्वोभयथापि षत्वम्भविष्यति । प्रत्याख्यानपक्षे तु यदा सुनु अभीतिप्रेषणन्तदा षत्वन्न स्यादभिषुणिवति प्रेषणे तु स्यादिति फलभेदः स्पष्ट एवेति भावः ॥ अत्र सेधेतिनिर्देशः शपा दैवादिकव्यावृत्त्यर्थः । तथा च षिध गत्याम् षिधू शास्त्रे माङ्गल्ये चेत्यनयोरेव ग्रहणसिद्धिः । निरनुबन्धकपरिभाषा तु विप्रतिषिद्धन्त्वानधिकरणवाचीतिनिर्देशान्न प्रवर्त्तते ॥ विप्रतिषिद्धमित्य-त्रेड्भाव ऊदित्त्वाद्बोध्यः । इण्कोरित्युभयोर्निमित्तत्वेनोपादानेपि कवर्गस्योपसर्गावयवस्यासम्भवादिण एव ग्रहणम् ॥ न चोपसर्गाणां विशेष्यत्वमिण इति विशेषणमितीसन्तादुपसर्गादित्येव कुतो न व्या-ख्यायत इति वाच्यम् । निःषेधति दुःषेधतीत्यस्यासिद्धिप्रसङ्गात् । उपस-र्गस्यान्निमित्तादिति व्याख्यानेन त्विण एव विशेष्यत्वमुपपसर्गादिति तस्याभेदेन विशेषणन्तादस्थ्यात्ताच्छब्द्यमिति न्यायात् । विसर्गसकारयो-र्व्यवधानेऽपि षत्वम्भवत्येव ॥ नुम्विसर्जनीयेत्यधिकारात् । निर्गतः सावक इत्यर्थविवक्षायान्निःसावक इत्येव । यत्क्रियायुक्ता इतिवचनेन सुनोत्यादीनां य उपसर्गस्तस्यैव ग्रहणात् ॥ उपसर्गादितिसूत्रस्थमुपस-र्गादितिपदमुत्तरसूत्रेषु सम्बध्यतेऽतः सौकर्यायेहैव तानि व्याचष्टे ॥ सदिरप्र ॥ योगभिगस्य निमित्तान्तरमाह ॥ नन्वित्यादिना । अवाच ।

SGDF
Sri Gargeshwari Digital Foundation

अत्र चकारोऽलङ्कारा्य । आलम्बनमाश्रयणम् ॥ सामीप्यमिति । अत्र निरूपकस्प्रकरणादिना कल्पनीयम् । न नञ्पूर्वैतिनिषेधे प्यत एव निपातनादाविदूर्येत्यत्र भावार्थकः प्रत्ययः । वेश्व स्वनो भोजने । भोजन इत्यस्य भोजने धात्वर्थ इत्यर्थः । विष्वणति चर्व्यम् । सशब्दम्भुङ्क्त इत्यर्थः । भोजने किम् । विस्वनति मृदङ्गो वीणा चेति॥ परिनिविभ्यः॥ सेवेत्यत्राकार उच्चारणार्थस्तेन षेवृ सेचन इत्यस्य सङ्ग्रहः । सुट् । आगमः । तेन परिष्करोतीत्यादौ षत्वसिद्धिः । सितशब्दः षिञ् बन्धन इत्यतः क्ते सिद्धः । एवं सयशब्दोऽपि तदाह । सितसयाविति । षिञ्प्रकृतिकाविति कथनेन षोऽन्तकर्मणीत्यस्य व्यावृत्तिः । व्याख्यानादिति। अच्प्रत्ययान्तसयशब्दसाहचर्यमूलकव्याख्यानादित्यर्थः । प्रत्ययविशिष्टयोः सितसयशब्दयोरुपादानं विसिनोतीत्यत्र षत्वाभावार्थम् ॥ नैरर्थक्यादिति । परभागसमभिव्याहारप्रतिबद्धार्थबोधजननशक्तिमत्त्वादित्यर्थः ॥ अवयवावयविभावमात्रस्य षष्ठ्यर्थत्वस्वीकारेप्याह ॥ यद्वेति । व्याख्यानादिति । सुविनिर्दुर्भ्य इतिसूत्रीयभाष्यसम्मतव्याख्यानादित्यर्थः ॥ भाष्यग्रन्थश्चानुपदमुदाहरिष्यते॥ अत एव । तदानुपूर्वीकस्य च ग्रहणमितिव्याख्यानादेव ॥ ननु स्थादिष्वीतिनियमात्कथमनुषस्यन्द इत्यत्राभ्यासस्य षत्वमत आह । स्थादिष्वितीति । सुपिभूतस्य द्विर्वचनादिति । एतेन भाष्यग्रन्थेन तदानुपूर्वीकस्य ग्रहणमिति स्पष्टमेव लभ्यते । दिगीतिसूत्रस्यभाष्यविरोधादिति । तत्र ह्यार्द्धधातुक इत्यस्य सप्तमीत्वात्तस्मिन्परतो भूभावेऽस्तेर्लिटि परत्वाद्द्विर्वचने द्विःप्रयोगपक्ष एवास्तेर्भूरित्यनेन परस्य भूभावे कृते पूर्वस्य श्रवणम्प्राप्नोतीत्याशङ्क्यार्द्धधातुकीयाः सामान्येन भवन्ति अनवस्थितेषु प्रत्ययेषु तत्रार्द्धधातुकसामान्ये भूभावे कृते यो यतः प्राप्नोति स ततो भविष्यतीत्युक्तम् । यदि कैयटोक्तरीत्या समुदायस्य कार्यन्तदा परस्य भूभावे पूर्वस्य श्रवणाम्प्राप्नोतीत्यभिधानमसङ्गतमेव स्यादिति तन्मते भाष्यविरोधः स्पष्ट एव ॥ ननु षिध गत्यामिति गति-

SGDF
Sri Gargeshwari Digital Foundation

रूपस्यार्थस्याभियुक्तोक्तत्वेन षिध्धातोर्गत्यर्थकत्वनिर्णयात्सेधतेर्गतावित्यत्र गताविति व्यर्थमित्याशङ्कानिवारणायाह । विप्रतिषेधेति ॥ तथा च प्रकृतसूत्रस्थगताविव्येव धातूनामनेकार्थत्वे लिङ्गम् ॥ के चिदिति। अनन्तरस्येतिन्यायमात्रानुसारिणः ॥ सिचो यङीत्येतत्साहचर्यादिति। न च सूत्रान्तरसाहचर्यन्न नियामकमितिसाहचर्यादित्यनुपपन्नमिति वाच्यम्। साहचर्यादित्यनेन तस्मिन्सूत्रे न रपरेतिसूत्रान्नञः सम्बन्धेन सिचो यङि यद्यत्सूत्रविहितं षत्वम्प्राप्नोति तन्न भवतत्यवश्यमेवव्याख्येयम् अभिसिसेच्यत इति तत्सूत्रभाष्योदाहरणात्। अन्यथा उपसर्गादित्यनेनाभ्यासस्य या प्राप्तिस्तस्या निषेधे ष्यादेशप्रत्यययोरितिसूत्रेणोत्तरखण्डस्य षत्वन्दुर्वारमेव स्यात्। तस्यैव च नञः सेधतेरित्यत्र सम्बन्धात्पूर्वसूत्रवदस्यापि तथैव व्याख्यायाः सूचनात्। अन्य इति । भाष्यस्वरसविदः ॥ सौत्र इति। एवन्निर्देशे ह्रस्वान्तत्वन्नमो न भवतीति फलं सिध्यति ॥ इत्यस्य निवृत्त्यर्थमिति। तत्सूत्रस्थवाग्रहणानुवृत्तौ मध्यपतितत्वादस्याप्यनुवृत्तिः स्यात्। अधिकमत्र यद्वक्तव्यन्तत्परिभाषेन्दुशेखरे उक्तम् ॥ ह्रस्वनिषेध इति ॥ अचखाददित्यत्र। विशेषणादिति ॥ अत्र येन नाव्यवधानन्यायस्य चाश्रयणेनान्यत्र दोषाभावादिति शेषः । इत्यादाविति । आदिना न्यपुटीदित्यस्य सङ्ग्रहः ॥ नेर्गदनद ॥ इति वर्तत इति ॥ अट्कुप्वाङितिसूत्रस्यमङ्ग्रहणं व्यवायेपीतिपदञ्चानुवर्त्तत इत्यर्थः । कुप्वादिग्रहणन्तु नानुवर्त्तते। तथा च प्रण्यगदत्। प्रण्यागददित्यादौ णत्वसिद्धिः। प्रनि क्वागददित्यत्र च न भवति ॥ गदादेर्निमित्तत्वमिति। रषाभ्यामितिपञ्चम्यन्तपदोपात्तस्य यथा निमित्तत्वन्तथा गदादिशब्दघटितप्रकृतिकसप्तम्यन्तशब्दोपात्तस्यापि निमित्तत्वमिति भावः। स्पष्टम्भाष्यकैयटयोरिति। तत्र हि नेर्गदादिष्वड्व्यवाय उपसङ्ख्यानङ्कर्त्तव्यम् । प्रण्यगदत्। आङ्चेति वक्तव्यम्। प्रण्यागदत्। ननु चायमड्गदादिभक्तो गदादिग्रहणेन ग्राहिष्यते। न सिध्यति। अङ्गस्याडित्युच्यते विकरणान्त-

SGDF
Sri Gangeshwari Digital Foundation

ष्ठाङ्गम् । एवन्तर्ह्यड्व्यवाय इति वर्त्तते । क्व प्रकृतम् । अट्कुप्वाङ्नुम्व्यवायेपीति । तद्धि कार्यिविशेषणन्निमित्तविशेषणेन चेहार्थः । तत्रापि निमित्तविशेषणमेवेत्युक्तम् । अत्र कैयटः । यत्र यन्निमित्तन्तत्र तस्याडादिभिर्व्यवधाने णत्वमित्याश्रीयत इति गदादीनामपि निमित्तत्वसद्भावादड्व्यवधाने णत्वं सिध्यतीत्यर्थः । एतद्भाष्यकैयटैकवाक्यतयाऽट्कुप्वाङितिसूत्रस्यापि व्याख्याऽडादिव्यवहितरषाभ्यामुत्तरस्य नस्य णत्वमित्येवोचिता । आडादिभिर्व्यवहितस्य नस्येति तु फलितार्थः । णादिनामधात्विति । णकारीयतीत्यादेः । व्याख्यानादिति । नाटीतिदीर्घनिर्द्देशमूलकव्याख्यानादित्यर्थः । भाष्यविरोध इति । णो न इतिसूत्रभाष्येऽथ किमर्थं णकारमुपदिश्य न कार आदेशः क्रियते न नकार एवोपदिश्येत । लघ्वर्थमित्याह । अविशेषेणायं णकारमुपदिश्य तस्य नकारमादेशमुक्त्वा तस्य लघुनोपायेन णत्वन्निर्वर्त्तयति । उपसर्गादसमासेपि णोपदेशस्येति । इतरथा हि येषान्तत्र णत्वमिष्यते तेषान्तत्र ग्रहणं कर्त्तव्यं स्यात् । के पुनर्णोपदेशा धातवः । सर्वे नादयो णोपदेशाः । नृतिनन्दिनर्द्दिनक्किनाटिनाथृनाधृनॄवर्जमिति प्रतिपादितम् । ये नाधादीनां णोपदेशत्वं वदन्ति तेषां पर्युदासपरवाक्यविरोधः स्पष्ट एव ॥ इत्यनुवृत्ताविति ॥ कुमति चेतिसूत्रपर्यन्तन्तदनुवृत्तेः क्षुभ्नादिष्वपि तदनुवर्त्तेतेति भावः । व्याख्यानत एवेति ॥ उत्तरसूत्रेषूपसर्गादित्यनुवृत्त्यैव सामञ्जस्ये पूर्वपदादित्यस्य निष्प्रयोजनत्वेनासम्बन्धात्प्रकृतसूत्रेप्यसम्बन्ध इत्येतत्समीक्षामूलकव्याख्यानत इत्यर्थः ॥ विशिष्य विधानार्थमिति । योगविभागेनासमासेऽपीति विशिष्य विधानार्थमन्यथोपसर्गाण्णोपदेशस्येत्यस्य पूर्वपदादिति नियमेन व्यावृत्तिः स्यात् ॥ एतत् । असमासेपीति विभक्तसूत्रम् ॥ पूर्वपदादित्यस्य नियमार्थत्वे भवदुक्तं सम्भवदुक्तिकम्भवेत् तदेव तु नेत्याह । रषाभ्यामित्यादिना ॥ उपस्थितत्वात् । अव्यवहितपूर्वसूत्रोपस्थितत्वात् ॥ दन्दशूकक्रियायामितीति ॥ दन्दशूककर्तृक-

SGDF
Sri Gargeshwari Digital Foundation

क्रियायामित्यर्थः । पूर्ववदनुपपत्त्याह । तत्क्रियायामिति ॥ अनभिधानादिति ॥ जिकारीयतीत्यादिव्यावृत्त्यर्थं विशिष्य यत्नाकरणमत्र बीजम् ॥ अस्वरितत्वादिति ॥ एतच्चोपदेशेऽजितिसूत्रघटकोपदेशपदे स्वरितत्वाभावप्रतिपादनावसरे प्रतिपादितम् ॥ परत्वात् । कित्त्वात्परत्वात् ॥ एतल्लक्षणोपप्लवेति । असम्भवादिति । लक्षणोपप्लवेत्यर्थः । गुणापेक्षया पूर्वविप्रतिषेधेन कित्त्वस्य बलवत्त्वं यदुक्तन्तन्न युक्तमित्याशयेनाह । परे त्विति । अनवकाशत्वमेवेति । एवञ्चातुल्यबलत्वात्पूर्वविप्रतिषेधो न युक्त इति भावः । एतद्विषयलक्षण इति । एतद्विषयककित्त्वविधायकलक्षणेत्यर्थः ॥ परत्वाद्गुणस्येति । असंयोगादितिसूत्रापेक्षया परत्वादित्यर्थः । इति न्यायादिति । अस्य बलवत्त्वेनेति शेषः । अतिदेशप्राप्तेति । सार्वधातुकमपिदित्यतिदेशप्राप्तेत्यर्थः । त्वदुक्तरीत्या । दुर्बलेनातिदेशेनेत्युक्तरीत्या । बाधापत्तेरिति । एवञ्च न चेत्यादिकैयटोक्ता रीतिरसङ्गतेति भावः । मूले सुब्धाताविति । एतदुदाहरणं षण्ढीयतीत्यादि । भाष्ये तु धात्वादेरिति सूत्रे उपदेशपदसम्बन्धेन तत्रत्यन्धातुग्रहणमेतद्वार्तिकस्यं सुब्धातुग्रहणञ्च प्रत्याख्यातम् । ष्ठिवुप्रभृतीनामपि यादित्वादेव सिद्धौ तेषामप्यत्र वार्तिके ग्रहणमनावश्यकमिति बोध्यम् । एतेन । वार्णपरिभाषाप्रवर्त्तनेन । एतस्याः परिभाषाया अन्तरङ्गपरिभाषाबाधकत्वादिति भावः। अन्तरङ्गत्वात् । उवङादेशापेक्षयाऽन्तरङ्गत्वात् । प्रकारान्तरेण तदुक्तङ्खण्डयति । पूर्वस्यैवेति । असवर्णग्रहणसामर्थ्यादिति । एतद्धि यत्रासवर्णपरत्वन्तत्रैव यथा स्यादित्येवमर्थम् । यद्येतत्प्रवृत्तिकालेऽचः परस्मिन्निति स्थानिवद्भावः स्यात्तदाऽसवर्णपरत्वन्दुर्लभं स्यादिति भावः । निघातः स्यादिति । णलूनिमित्तिका ह्यस्य गुरुमत्ता यदि णलो निवृत्तिः स्यात्तदोपजीव्यविरोधः स्पष्ट एवेति भावः । अत्र । वार्णपरिभाषायाम् । इतिसूत्रमिति । एतदानुपूर्वीकन्धातुविशेषोपादानरहितं सूत्रमित्यर्थः । तद्वैयर्थ्यम् । तादृशसूत्रवैयर्थ्यम् । यत्त्वेतत्परिभाषाज्ञापनावसरे भाष्ये

SGDF
Sri Gangeshwari Digital Foundation

अभ्यासस्यासवर्ण इत्यसवर्णग्रहणङ्करोतीत्युक्तन्तस्यायमर्थः । गृह्यते यस्मिन्तद्ग्रहणमसवर्णस्यासवर्णपदस्य ग्रहणमसवर्णग्रहणमसवर्णपदघटितं सूत्रमित्यर्थः । अत एव भाष्यकृताऽर्त्यर्थमेतत्स्यादित्यनेन सूत्रस्य सार्थक्यमाशङ्कितम् । अन्यत्र विस्तर इति । इयर्त्तीत्यादौ चारितार्थ्येऽपि सामान्यतो लक्ष्यसंस्कारकसूत्रवैयर्थ्यमेव । ऋधात्वर्थमुरित्येव ब्रूयात् । आरेत्यत्रापत्तिरिति तु न । य्वोरित्यनुवर्त्यार्त्तेरिवर्णस्याभ्यासावयवस्येयङित्यर्थात् । न चार्त्तेरेवात्र ग्रहणमत्र किम्मानमृवर्णान्तधातोरिति किन्न स्यादिति वाच्यम् । इणो यणित्येतत्साहचर्येण वर्णात्मकस्य धातुपाठपठितस्य ग्रहणात् । तेन ऋशब्दे च्व्यन्ते नातिप्रसङ्गः । नन्वेवङ्किटकटीत्यत्र प्रश्लिष्टाद्धीगतीत्यत्र प्रश्लिष्टाद्वा इकारात्मकाद्धातोर्लिटि थलि भारद्वाजनियमादिड्विकल्पे इययिथ इयेथेत्यत्रेड्भावपक्षे पूर्वप्राप्तगुणस्य द्विर्वचनेऽचीत्यनेनाच्परत्वाभावान्निषेधाप्राप्त्या जाते गुणे द्वित्वेऽभ्यासह्रस्वत्वेऽसवर्णपरत्वेन प्रकृतसूत्रस्य चारितार्थ्यमिति वाच्यम् । सम्पूर्णसूत्रस्य ज्ञापकतापरभाष्यप्रामाण्येनैतादृशे विषयेऽचस्तास्वत्थल्यनिटो नित्यमित्यस्य सूत्रस्याप्रवृत्तिकल्पनेन क्रयादिनियमादिडागमस्यैव प्रवृत्तिस्वीकाराद् द्विर्वचनेऽचीत्यस्य निषेधशास्त्रस्य प्रवृत्तेः । न चेयायेत्यादौ जातेऽपि सवर्णदीर्घे पूर्वान्तवद्भावेनाभ्यासत्वादिवर्णत्वाच्च णल्यसवर्णे परे इयङ्विधायकत्वेन सूत्रसार्थक्यम् । अचि ञ्णित्यनेन तु न सिद्धिर्वृद्ध्या बाधादिति वाच्यम् । प्रत्यासत्त्याऽसवर्णपदेनाभ्यासोत्तरखण्डसम्बन्ध्यसवर्णाच एव ग्रहणादित्यादिकमन्यत्र विस्तृतमित्यर्थः । नन्वनेन सूत्रेणान्तरङ्गपरिभाषाया अनित्यत्वमेव ज्ञाप्यतान्तावतैव सकलेष्टसिद्धिर्भविष्यतीतीयम्परिभाषा नारब्धव्येतिमतेनाह । मूले परत्वाच्चेति । परत्वादित्येतद्व्याचष्टे । परकालेति । न वाच्यमिति । तथा च ह्रस्वस्य पूर्वम्प्रवृत्तत्वाद्विकारकृतलक्ष्यभेदाभावेन पुनर्ह्रस्वो न भविष्यतीति भावः । परेश्च घेतिसूत्रस्यभाष्येति । तत्र षडि लत्वषलोपसंयोगादिलोपकुत्वदीर्घत्वानीतिवार्त्ति-

SGDF
Sri Gargeshwari Digital Foundation

कव्याख्यानावसरे क्रुञ्चेत्यत्र चोः कुर्झलीति कुत्वम्प्राप्नोति सञ्चीति वचनान्न भवति । एतदपि नास्ति प्रयोजनम् निपातनादेतत्सिद्धम् । किन्निपातनम् । ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चामिति प्रतिपादितम् । यद्ययन्नकारोपधः स्यात्तदाऽनुस्वारपरसवर्णयोरसिद्धत्वान्नकार एव कुत्ववि-धायकशास्त्रदृष्ट्याऽस्तीति कुत्वस्य प्राप्तिरेव नास्तीत्येवमभिधानमसङ्गतं स्यादिति प्रतिपादितम् । इदमेव । स्वाभाविकह्रस्वपरिग्रहार्थमित्यत्र भाष्यसम्मतसाधकाभावान्मुखसुखार्थत्वमेव । अजेर्व्यघञपोः । अत्राघञ-योरित्यस्य न प्रयोजनमिति पतिपादयितुमाह । अत्रेत्यादि । तेन । व्यवस्थितविभाषात्वस्वीकारेण । स्पष्टञ्चेम्भाष्य इति । तत्र हि वा लि-टीत्यतो वा ग्रहणमनुवर्त्त्याजेर्वीभावो भवति वा । व्यवस्थितविभाषा चेति । तेनेह भविष्यति । प्रवेता प्रवीतुम् । प्रवीतो रथः । संवीतिः । इह न भविष्यति । समाजः । उदाजः । समजः । उदजः । समजनम् । उदजनम् । समज्या चेति । तत्रायमप्यर्थः इदमपि सिद्धम्भवति । प्राजि-तेति । अत्र प्रवेता प्राजितेत्युभयोपादानाद्वलादावार्द्धधातुके परे विक-ल्प इति लब्धम् । विव्यतुः विव्युरित्यत्रोपधायाञ्चेतिदीर्घमाशङ्क्य स्या-निवद्भावेन समाहितम् । एतदुत्तरं यणादेशस्य बहिरङ्गत्वेनाप्येतत्सुसा-धमिति क्वाचित्कोऽपपाठः । त्रैपादिकेऽन्तरङ्गे बहिरङ्गपरिभाषाया अप्र-वृत्तेर्बहुषु प्रतिपादितत्वात् । प्राचीनरीत्या कार्यकालपक्षाश्रयणेन वा तस्योपपत्तिः कार्या । निषेधस्याप्ययन्नियम इति । अत्र च रिर्यतुः । रि-र्युः । संविव्यतुः । संविव्युरित्यत्र स्यानिवद्भावस्यैव दीर्घवारकस्य स्वी-कारपरभाष्यमेव मानम् । कस्तभृवृ । सूले चतुर्णामित्युक्तन्तन्नोपपद्यते वृ-इत्यनेन वृङो वृञश्च बोधनेनाधिक्यसम्भवादत आह । कृत्वादिनेति । न तदर्थत्वम् । न नियमार्थत्वम् । प्रकृत्याश्रयः । प्रकृतिविशेषसम्बन्धी । प्रत्ययाश्रयः । गित्किदितिप्रत्ययविशेषोपादानेनारब्धः । वृधातौ प्राप्त इति । वमादावित्यादिः । न च थलोऽस्मात्परस्य निषेधाप्राप्त्या तत्र

SGDF
Sri Gargeshwari Digital Foundation

विध्यर्थमेव ग्रहणमस्त्विति वाच्यम् । बभूथाततन्थ्येतिसूत्रेण थलि ववर्थे-त्यत्रेड्भावनिपातनेन लोके थलस्तस्मात्परस्येड़ागम इष्ट एवेत्याशयात् । नन्वेकाच उपदेश इति सूत्रस्य बहुषु प्राप्तत्वात्तन्नियम एव भविष्यती-त्यत आह । प्रत्ययाश्रयस्येति । ननु क्रादीनाश्चतुर्णाङ् ग्रहणस्य नियमा-र्थतोक्ता सा मोचिता स्तुद्रुादीनामप्यनुदात्तत्वात्तेष्वपि प्रतिषेधस्य प्रा-प्तेरष्टानामिति वक्तुमुचितमिति चेन्न । अष्टानामपि नियमार्थत्वे तुष्टोथ दुद्रोथेत्याद्येव स्तेषु भवति भवन्मते तु भारद्वाजनियमादिट्प्राप्तेः सेटा-मप्यापत्तेः । मम तु स्त्वादिभ्यः परस्य थलो भारद्वाजनियमात्प्राप्तो-ऽप्याट् स्त्वादिग्रहणेन निवार्यतेऽतो नैतेभ्य इड् भवतीति व्यवस्था सि-ध्यति । अन्यतरप्रापित इति । विकल्पस्यापि पक्षेऽभावतात्पर्यकत्वादिति भावः । सिषेधिथेत्येकमेवेति । ऊदित्त्वप्रयुक्तस्याप्यभावांशस्य नियमेन बाधनादेकमेवेत्यर्थः । उभयोरपि निषेधयोर्नियमेन निवर्त्तने साधकमा-ह । यदि त्वित्यादिना । इति प्रक्रमादिति । तत्रत्यस्य नेड़ित्यस्य प्रकृत-सूत्रे सम्बन्धादिति भावः । नित्यानिट इत्यस्याभाव इति । नित्यशब्दोपा-दानप्रयोजनकथनमेतत् । अचस्तास्वदितिसूत्रादनिट इत्येतावन्मात्रानुवृ-त्तौ तासावनिट्त्वमूदित्त्वात्तस्यास्त्येवेति भावः । भाष्यासङ्गतिमुपपादय-ति । तत्रेत्यादिना । विकल्पः स्यात् । उपदेशेऽत्वत इतिसूत्रबोध्यस्या-भावस्य विषये भारद्वाजनियमेन पक्षे इटः सत्त्वेन विकल्पः स्यात् । तत्सत्त्व इति । नित्यानिट इत्यस्य सत्त्व इत्यर्थः । तदसङ्गतिः । तद्भाष्या-सङ्गतिः । मम तु । विकल्पप्रापितस्याप्यभावांशस्य क्रादिनियमो बाधक इतिवादिनो मम तु । विपरीतनियमं वारयति । क्रादिभ्य इति । कृते परिवृत इति । कृते ग्रन्थे परिवृतो रथ इतिसूत्रस्थे लक्ष्ये । ऋतो भा-रद्वाजस्येतिसूत्र इति । तत्र ऋत इतिसूत्रस्याचस्तास्वदित्येव सिद्धेऽयं योगो नियमार्थ इत्यनेन नियामकत्वमभिहितम् । तच्चोपदेशेऽत्वतइति-सूत्रादुपदेशपदस्याचस्तास्वदित्यत्र सम्बन्धे सत्युपपद्यतेऽन्यथा जहर्थेत्या-

SGDF
Sri Gargeshwari Digital Foundation

दौ गुणे रपरत्वे च कृतेऽनजन्तत्वादचस्तास्वदित्यस्याप्राप्तौ ऋत इत्यप्राप्तप्रापकत्वेन विधायकमेव स्यादसति नियामकत्वे पेचिथ शेकिथेत्येतन्न सिध्येदतो नियामकत्वमावश्यकमिति भावः । एवञ्च । उपदेशपदसम्बन्धसिद्धौ च । कुर्यादिति । अग्ग्रहणे घेट उपदेशेऽगन्तत्वविरहादस्याप्रवृत्तिः स्यात् । तासौ नित्यानिडित्यस्य यस्तासौ नित्यं सेट् तद्भिन्न इत्यर्थकत्वे जघसिथेत्यत्रोपदेशेऽत्वत इत्यस्य प्राप्तौ ऋतो भारद्वाजस्येतिनियमाद्विकल्पः स्यादतो व्याचष्टे । तासौ सत इति । न च तासौ सत्त्वं स्थानिवद्भावेन भविष्यतीति वाच्यम् । अशास्त्रीयस्य धर्मस्यातिदेशेनालाभात् । वृत्तिरिति । नेड्वशि कृतीतिप्रक्रमात्तत्यादिग्रहणकृतनियमस्यात्राप्राप्तिरिति केचित् । अत्र वृत्तिरितिकथनेन तादृशं यन्मतन्तन्न युक्तं किन्तु नञ्वाशब्दान्यतरप्राप्तस्याभावांशस्य बाधकः क्रयादिनियम इति ध्वनितमेव मतं युक्तमन्यथा वृत्तिग्रन्थविरोधोऽपि स्यात् । यथा स्यादिति । अन्यथा उपदेशेऽत्वत इतिसूत्रेप्यनिडित्यस्यैव सम्बन्धे य उपदेशेऽत्वाननिट्चेत्यर्थः स्यात्तथा घेड्भावस्य शास्त्रीयत्वात्स्थानिवद्भावेनास्यानिट्त्वादनेन निषेधे प्राप्ते भारद्वाजनियमेन विकल्पः स्यादिति भावः । जिघृक्षतीति । अत्र हि सनि ग्रहगुहोश्चेतिनिषेधादनिट्त्वम् । आनञ्जिथेति भाष्यमिति । एतच्च प्रागुपपादितम् । इड्भावेऽपीति । तथा च नित्यपदाभावे यस्तासावस्ति अनिट्चेत्यर्थेऽस्यात्मनेपदपरतासावनिट्त्वादस्य प्रवृत्तौ भारद्वाजनियमः स्यादिति भावः । ननु ऋदन्तात्थलो नेट् भारद्वाजमतेऽन्यमते भवत्विति स्मृत्यन्तरानुसन्धानेन विकल्पेनेड्विधायकमिदमस्त्वित्यभिप्रायेण शङ्कते । न च ऋदन्त इति । समाधत्ते । अचस्तास्वदितीति । ननु वृञस्थलि परतो निषेधविधायकमेवेदं सूत्रमस्त्वित्यत आह । वृञादिष्विति । छन्दसि ववर्थेतिनिपातनेनेड्भावेऽपि लोके इडिष्ट एवेति तत्रेड्भावार्थमिदं विध्यर्थमिति न शङ्कनीयम् । अन्यस्येत्यस्य ऋकारान्तभिन्नो योऽजन्तोऽत्वांश्चेत्यर्थेऽजन्तत्वसत्त्वञ्चेडागमे प्र-

SGDF
Sri Gargeshwari Digital Foundation

योजकमिति लभ्यते तच्चायुक्तमाकारान्तपादिधातोरजन्तत्वेन ततः परस्य थल इडागमेऽजन्तत्वस्य प्रयोजकतया कृते इडागमे सन्निपातपरिभाषया लोपो न स्यादिति कस्य चिद्दूषणन्तच्चायुक्तमित्याशयेन व्याचष्टे । अत्रापीति । कल्पितेऽन्यस्यापीति वाक्ये । अन्यस्येत्यस्य व्याख्या ऋकारान्तभिन्नस्येत्येव । उपदेशेऽजन्तत्वमुपदेशेऽकारवत्त्वञ्च तद्विशेषणं यत्र निषेधविधायकयोः पूर्वपठितसूत्रयोः प्राप्तिस्तत्रैवास्य प्रवृत्तिरितिनियमसिद्धिरिति बोधनाय । एवञ्च ऋकान्तभिन्नत्वस्योपदेशेऽजन्तत्वसहितस्येडागमप्रवृत्तौ प्रयोजकतया तस्य जातेऽपि लोपे न विघात इति न सन्निपातपरिभाषया आकारलोपप्रतिबन्ध इति भावः । एवञ्च पपिथेति रूपम्भारद्वाजमतेऽन्यमते तु पपाथेति । एतेन । उपदेशेऽजन्तस्येत्युक्तत्वेन । कृतेऽपि लोपे तदा यद्यपि नाजन्तत्वन्तथाप्युपदेशेऽजन्तत्वस्य न विघातस्तदाह । उपदेश इत्युक्तेरिति । क्रादिनियमप्रापितस्यैवेति । एवकारेण भारद्वाजनियमप्रापितस्य व्यवच्छेदः । तेन येननाप्राप्तिन्यायाभावात् । एतेन । तत्पदसम्बन्धवानितिव्याख्यानेन । येन नाप्राप्तिन्यायेनेति । ऋकारान्तेऽचस्तास्वदित्यस्यैव प्राप्तेस्तस्योपदेशेऽत्वत्त्वस्याभावादिति नोपदेशेऽत्वत इत्यस्यावश्यकप्राप्तिः । इड् न स्यादिति । उपदेशेऽत्वत इत्यनेन निषेधादिति शेषः । ध्वनितं चेदमिति । तत्र हि जहर्थेत्यत्र गुणे रपरत्वे च कृतेऽजन्तत्वस्योपदेशेऽत्वत्त्वस्य चाभावेन निषेधाप्राप्तौ ऋत इति सूत्रं विधायकमेव भविष्यतीति नियमानुपपत्तिरित्याशङ्क्योपदेशपदस्य पूर्वसूत्रेऽपि सम्बन्धेन नियमार्थत्वमुपपादितन्तत्रोपदेशपदस्योभयत्र सम्बन्धोपपादनावसरे योगविभागः करिष्यते अचस्तास्वत्थल्यनिटो नित्यमुपदेशे । ततः अत्वतः अत्वतश्चोपदेशे इत्युक्तम् । अत्र द्वितीयसूत्रप्रदर्शनेन तस्यापि ऋत इति नियामकमिति ध्वनितमतस्थल्यनिटो नित्यमिति सूत्रे सम्बन्धेनेत्युक्तिरुचितैवेति भावः । मूलोक्तनचेत्यादिसङ्कासमाधानाभ्यां स्त्वादिधातुविषये इड्निषेध एवेति सिद्धन्तत्रैवार्थे सा-

SGDF
Sri Gargeshwari Digital Foundation

धकान्तरमाह । किञ्चेत्यादिना । नेड् वशि कृतीत्यत्रेति ॥ तत्र हि कर्त्तरि कर्मव्यतिहारे न गतिहिंसार्थेभ्य इतिवद्विध्युत्तरकाल एव प्रतिषेधप्रकरणङ्कुतो न क्रियत इत्याशङ्क्य नैवं शक्यम् इह हि तुष्टोथ तुद्रोथेति । ऋतो भारद्वाजस्येतिनियमादिट् प्रसज्येत कृसभृवृस्तुद्रुस्रुश्रुवो लिटीत्येष योगः प्रतिषेधार्थो भविष्यतीत्युक्तमेतेन स्त्वादिग्रहणेन यो नियमः स भारद्वाजनियमप्रापितेटो बलवानिति स्पष्टमेव लभ्यते ॥ पुरस्तात्प्रतिषेधे सति अनारभ्यापवादोयम्भवति तेन यावानिड् नाम तस्य सर्वस्य प्रतिषेधः सिद्धो भवतीति चोक्तम् ॥ वस्वेकाजादित्यत्र चेति । तत्र हि अस्य सूत्रस्य किम्प्रयोजनमिति प्रश्ने नियमार्थोयमारम्भः । वसौ एकाजाद्घसामेव । क्व मा भूत् । बिभिद्वान् । किमुच्यते नियमार्थमिति । न पुनर्विध्यर्थोपि स्यात् । प्रतिषेधोऽपि ह्यत्र प्राप्नोति । नेड्वशि कृतीति । कृत्स्वेव ह्ययं वशादिश्च । एवन्तर्हि कृसभृवृस्तुद्रुस्रुश्रुवो लिटीत्येतस्मान्नियमादत्रेड्भविष्यति । एवञ्च सिद्धे इडागमे वस्वेकाजिति सूत्रन्नियमार्थम्भविष्यतीति भावः । ततः प्रकृतलक्षणस्यैव प्रतिषेधस्य स प्रत्यारम्भ इत्याशङ्क्य प्रत्ययलक्षणस्यापि प्रत्यारम्भः । वृङ्वृञोर्ग्रहणादित्युक्तम् । वृङ्वृञोरुदात्तत्वात्प्रकृतिलक्षणो य एकाच उपदेशेऽनुदात्तादितिप्रतिषेधस्तस्याप्राप्तेः प्रत्ययलक्षणो यः प्रतिषेधो नेड् वशीति तस्यापि प्रत्यारम्भ इति भावः । एतेन कृसृञ्रितिसूत्रविषयेऽनन्तरस्येतिनियमो न प्रवर्त्तत एवेति लभ्यत इति । वृद्धिश्रुत्येति । विधेयसमर्पकवृद्धिपदश्रवणेन । तत्फलम् । इक्पदोपस्थितिफलम् । अकोषीदित्यत्र हलन्तलक्षणवृद्धेरिवास्यापि बाधो भविष्यतीत्याशयेनाशङ्कते । न चेति । समाधत्ते । तत्रेति । तत्र । नेटीति सूत्रे । तद्विषये । हलन्तविषये । परत्वात् । अपवादत्वेनोत्कृष्टत्वात् । प्रकृतसूत्रे इक्परिभाषाया अनुपस्थितौ सिचि वृद्धीतिसूत्रस्य हलन्तेऽपि प्रसक्त्या हलन्तलक्षणवृद्धेरेतदपवादत्वसम्भवादिति भावः । हलन्तलक्षणया । वृद्ध्येति शेषः ।

अस्याः । सिचि वृद्धिरितिसूत्रविहितवृद्धेः । अनया । सिचि वृद्धिरिति वृद्धया । अस्याः । सिचीति वृद्धेः । ननु सिचीतिवृद्धिबाधकहलन्तलक्षण-वृद्धेर्नेटीति प्रतिषेधेन बाधे सिचीति वृद्धिर्भ्रष्टावसरन्यायेन न भविष्य-तीतत्य आह । भ्रष्टावसरेति । नास्त्येवेति । तौ सदितिनिर्देशात् । ननु स न्यायो नान्तःपादमितिपाठे आवश्यकः । अन्यथा गो अग्रमिति स्थिते एच इतिसूत्रबाधकस्यैङ इतिसूत्रस्य सर्वत्र विभाषेतिसूत्रेण निषे-धेऽवादेशापत्तिरत आह । नान्तःपादमितीति । अट्ट अतिक्रमहिंसनयोः । अत्र मूले दोपधोऽयमिति । अस्य दकारोपधत्वफलन्तु द्वित्वे कर्तव्ये न न्द्रा इतिनिषेधेनाट्टिटत् । अट्टिटिषत इत्यत्राचः परदकारस्यपरित्यस्य द्वित्वप्रवृत्तिः । पूर्वत्रासिद्धीयमद्वित्वे इतिवचनस्य द्वित्वे कर्तव्ये प्रवृत्तिर्न तु तन्निषेधे कर्त्तव्ये । न च यदि दकारस्य ष्टुत्वेन डकारे तत्त्वर्त्त्वेन ट-कारेऽट्ट इति श्रवणन्तदा नकारजावनुस्वारपञ्चमौ झलि धातुषु । सकार-जश्शंकारश्चेर्षाट्टवर्गस्तवर्गज इत्यभियुक्तोक्त्या तस्यासङ्ग्रहः । अस्य टव-र्गस्य रषात्परत्वाभावादिति न्यूनतेति वाच्यम् । नेदं वचनमपूर्वङ्किन्तु त्रैपादिककार्यप्रवृत्तिसिद्धार्थकथनमिति प्रकृतेऽपि तस्य प्रवृत्तौ बाधका-भावात् । अथ वा रषाट्टवर्ग इति टवर्गयोगे श्रूयमाणष्टवर्गस्तवर्गज इ-त्यस्याप्युपलक्षणम् । तोपधत्ववादिमतेऽपि तथैव । अस्य मते पूर्वत्रा-सिद्धीयमितिवचनस्य प्रवृत्त्या आटिट्टदिति भवतीति विशेषः । वठि एकचर्यायाम् । एकस्यासहायस्य चर्या गमनन्तस्यामित्यर्थः । गमनमत्र नोत्तरदेशसंयोगफलकव्यापार एव । किन्तु स्थित्यनुकूलव्यापारोऽपि । तेनापत्यरहितायां विधवायाञ्च वण्ठेति प्रयोगसिद्धिः । वुड़ि वरणे । वरणमत्र स्वीकारः । ञ्ञड़ि रुजायां सङ्घाते च । तालव्योष्मादिरयम् । शण्डोऽसुरपुरोहितः । पड़ि गतौ । पण्डो गमनकर्त्ता । धातूनामनेका-र्थत्वात्पण्डा विलक्षणा बुद्धिरित्यपि भवति । बाडृ आप्लाव्ये । अत्रादौ प-ठितो वर्णो न यण् किन्तु जश्प्रत्याहारान्तर्गत एव । यणादित्वे तु ब-

SGDF
Sri Gargeshwari Digital Foundation

शादिरिति मूलोक्तव्यावर्त्याप्रसिद्धिः स्यात्। शाडृ श्लाघायाम्। इदमुपलक्षणम्। शाल धातुरप्यत्र बोध्यः। तेन शालत इत्यस्यापि सिद्धिः। ह्म्यन्तक्षणश्वसजागृ। अधाक्षीदिति। दह भस्मीकरणे। अयं हान्तोऽनुदात्त उपदेश इत्यस्मात्परस्यैकाच उपदेश इतिप्रतिषेधान्नेट्। नन्वत्र जागृग्रहणं व्यर्थम्। जाग्रोऽविचीतिगुणविधानाज्ज्ञापकात्। तथाहि। तत्र गुणविधानस्य प्रयोजनमजागरीदित्यत्र सिचि वृद्धिरिति वृद्धिम्बाधित्वा गुणो यथा स्यादिति। यदि गुणे कृते पुनर्वृद्धिः स्यात्तदा गुणविधानमनर्थकं स्यात् प्रथमप्राप्तवृद्धेरेव वृद्धिघटितरूपसिद्धेः। न च जागरक इत्यत्र गुणेऽचोञ्णितीति वृद्धिम्बाधित्वा गुणे जातेऽप्युपधालक्षणवृद्धिप्राप्तौ सा मा भूदित्येव ज्ञाप्यतान्तावतापि गुणविधानञ्चरितार्थमिति वाच्यम्। सामान्यतो वृद्धिर्नेत्येव ज्ञाप्यं वचनमस्तु न तु लक्षणविशेषप्राप्तेत्यस्य तत्र प्रवेशो लाघवार्थमिति स्वीकारादिति चेन्न। प्रकृतसूत्रभाष्यसन्दर्भबलेन गुणविधानस्य जागरक इत्यत्रोपधावृद्ध्यप्रवृत्तिज्ञापकतया चारितार्थ्यसम्भवात्। अनेकशास्त्रबाधकल्पनापेक्षया ज्ञापकस्य सजातीयापेक्षत्वमुचितमिति भाष्याशयात्। गुणस्यात इत्युपधावृद्धेश्च कथं साजात्यमिति चेत्। उच्यते। गुणस्य जागृत्वमात्रमुद्देश्यतावच्छेदकन्तच्च नान्यवृत्ति एवमुपधावृद्धेरप्यत्त्वमुपधात्वसामानाधिकरण्यविशिष्टन्तदप्यकारमात्रवृत्ति न त्विकारादौ। एवञ्च विजातीयानेकनिष्ठाधिकरणत्वानिरूपकधर्मावच्छिन्नोद्देश्यकविधित्वेन साजात्यमनयोरस्ति। सिचि निमित्ते सति वृद्धेस्त्विगन्ताङ्गत्वादिकमुद्देश्यतावच्छेदकन्तच्चानेकसाधारणमिति नान्यासां साजात्यम्। इदमेव गुणविधानमत्र शास्त्रे ज्ञापकस्य सजातीयापेक्षत्वन्याय्यमित्यर्थे ज्ञापकमस्तु। भाष्यसन्दर्भश्च किमर्थञ्जागर्तेः प्रतिषेध उच्यते। सिचि वृद्धिर्मा भूदिति। नैतदस्ति प्रयोजनम्। जागर्त्तेर्गुण उच्यते वृद्धिविषये प्रतिषेधविषये च स बाधको भविष्यति। गुणे तर्हि रपरत्वे च हलन्तलक्षणा वृद्धिः प्राप्नोति। नेटीति

SGDF
Sri Gargeshwari Digital Foundation

तस्याः प्रतिषेधो भविष्यति । इयन्तर्हि अतो ल्रान्तस्येति । तामपि बाधित्वाऽतो हलादेर्लघोरिति विभाषा वृद्धिः प्राप्नोति न च किञ्चिदिति । न च किञ्चिदिति । तस्याः पाक्षिक्या वृद्धेरपवादभूतन्न किञ्चिद् गुणविधानमस्ति यतो गुणविधानमकर्तव्यं स्यादिति कैयटः । एतेन भाष्यप्रघट्टकेन ह्म्यन्तेतिसूत्रस्यजागृग्रहणस्य पाक्षिकवृद्धिनिवारकतया चारितार्थ्यमिति लभ्यते । अत एव मूलकारोऽपि कैयटोक्तस्य गुणो वृद्धिर्गुणो वृद्धिरितिसङ्ग्रहश्लोकस्यानुवादङ्करिष्यति । किञ्च जागरितन्तेन । जागरितः जागरितवानित्यत्रार्द्धधातुकनिमित्तकगुणस्य प्रतिषेधविषये गुणविधायकतया जागृग्रहणस्य सार्थक्यम्बोध्यम् । इकारोऽत्र ह्रस्व इति । अभ्याससंज्ञक इकारः स्वभावतो ह्रस्वो न त्वस्य कोपि विकार इत्यर्थः । एतदेवोपपादयति । द्वित्वे कृत इत्यादिना । केचिदिति । इकारप्रश्लेषस्य प्रामाणिकत्वेऽस्येदित्त्वसम्भावना कर्त्तुं शक्या तत्रैव मानाभाव इति तेषां भावः । शिक्षायामिति । बह्वृचां चेत्यपि बोध्यम् । अम् न स्यादिति । ऋजिदृशोरितिसूत्रे कितीत्यस्योपादानात् । अस्यार्द्धधातुकत्वमिति । अत एव गोपायतीत्यादौ लघूपधत्वप्रयुक्तगुणस्य सिद्धिः । तत्फलम् । आयप्रत्ययाकारस्य फलम् तेन । यस्माद्विहितइत्याद्यंशोपस्थितिस्वीकारेण । एतत्साध्येति । सनाद्यन्तेतिसूत्रसाध्येत्यर्थः । सूत्रादीनामिति । सूत्रं करोतीत्यादिप्रयोगघटकानां सूत्रादीनामित्यर्थः । समुदायानाम् । णिजाद्यन्तानाम् । स्पष्टञ्चेदमिति । आद्येऽथास्य क्यजन्तस्य कानि साधनानि भवन्ति भावः कर्त्ता च अथ कर्म नास्ति कर्म ननु चायमिषिः सकर्मकः यस्यायमर्थे क्यज्विधीयते अभिहितं तत्कर्म अन्तर्भूतं धात्वर्थः सम्पन्नः कथं तर्ह्ययं सकर्मको भवति अत्र मुण्डमिवाचरति माणवकमिति अस्त्यत्र विशेषः उपमानकर्म उपमेयकर्म च उपमानकर्मान्तर्भूतं उपमेयकर्मणा सकर्मको भवति मुण्डं करोति मुण्डयति माणवकमिति । अत्रापि द्वे कर्मणी सामान्यकर्म विशेषकर्म च तत्र सामान्यङ् कर्मान्तर्भूतं विशेषक-

SGDF
Sri Gargeshwari Digital Foundation

र्मणा सकर्मको भवति । सामान्यं कर्म मुण्डादि ।विशेषकर्म माणवकादिः ननु चात्र वृत्त्यैव न भवितव्यं किं कारणमसामर्थ्यात् कथमसामर्थ्य सापेक्षमसमर्थवद्भवतीत्याशङ्क्य मुण्डादयो गुणवचनाः गुणवचनाश्च सापेक्षाः तत्र वचनात्सापेक्षाणां वृत्तिर्भविष्यतीति वचनात् मुण्डमिश्रेति-वचनसामर्थ्यात् एतेन क्यच्प्रत्ययस्य निरपेक्षेभ्यः पुत्रादिभ्यः प्रत्ययविधायकतया चारितार्थ्यात्पण्डितं पुत्रमिच्छतीत्यत्र क्यज् नेति सूचितम् । एवमुक्त्वा भगवतोक्तम् । अथ वा धातव एव मुण्डादयः । न चैव ह्यर्था आदिश्यन्ते क्रियावचनता च गम्यत इति । धातव इति । सौत्रा धातवो मुण्डादयः तेभ्यश्चुरादिवत्स्वार्थिको णिच् । न चैवेति । यद्यपि क्रियाविशेषाभिधायित्वं मुण्डादीनां नोपात्तं तथापि स्वाभाविकत्वादर्थाभिधानस्य प्रयोगादेव तदवसीयत इत्यर्थः । यथा च कण्ड्वादयो द्विविधास्तथा मुण्डादयोपीति भावः इति कैयटेनोक्तम् । अन्त्येप्युक्तं भगवता तत्र हि नमःशब्दयोगे चतुर्थीविधानात् नमस्यति देवानित्यत्र द्वितीया कथमित्याशङ्क्योपपदविभक्तेरितिसमाधाय क्यजादिषु प्रत्ययार्थनिर्देशः कर्तव्यः क्रियावचनता यथा स्यादित्याशङ्क्य साधने जायमानानां तव्यदादीनामुपपत्तये सनाद्यन्ता इति धातुसंज्ञाविधानसामर्थ्यात्सनाद्यन्तानां क्रियावचनत्वावसायो भविष्यतीति समाधाय अथ वा धातव एव क्यजादयः न चैवं भवति क्रियावचनता च गम्यते कः खलु पचादीनां क्रियावचनत्वे यत्नं करोति येनैव हेतुना पचादयः क्रियावचनाः एवमेतेऽपि एवमर्थं खल्वप्याचार्यश्चित्रयति क्वचिदर्थानादिशति क्वचिन्नेत्युक्तम् । अत्र कैयटः । विनाप्यादेशनमभिधानशक्तिस्वाभाव्याद्विशिष्टक्रियावचनत्वं सिद्धमिति । गोपायेति चेति । अत्र ह्यप्रत्ययादित्यनेन प्रत्ययान्तादकारः प्रत्ययः स्त्रियां विधीयते इति भावः । एतच्चेति । अपनीयेत्येतत् । कासीतीति । वार्तिकस्थं कासीतिपदमित्यर्थः । उपक्रमस्वारस्यादिति । तेनानेकाज्भ्यः प्रत्ययसिद्धिरत्र प्रयोजनत्वेनोक्ता न त्वे-

SGDF
Sri Gargeshwari Digital Foundation

काज्ञ्याावृत्तिः प्रयोजनत्वेनोक्ता तत्स्वारस्यादित्यर्थः । अत एव । प्रत्य-
यग्रहणस्यानभिप्रेतत्वादेव । अत एव । प्रत्ययग्रहणसत्त्वादेव । अकारस्य ।
अवगल्भेत्यत्र योऽकारोऽन्त्यरोकारस्तस्य । भौतपूर्विकेति । इत्संज्ञाप्रवृत्ति-
प्राक्कालिकमित्यर्थः । भूतपूर्वानेकाच्त्वाङ्गीकारे विरोधमाह । आमर्थ-
मित्यादिना । तदर्थमिति । अनुबन्धासङ्गार्थमित्यर्थः । तस्येति । अवग-
ल्भेत्यादिसमुदायोच्चारणस्येत्यर्थः । अनुबन्धासञ्जनप्रयोजनमात्मनेपदसि-
द्धिरित्याह । अवगल्भतीत्यादि । अस्य प्राप्ताविति शेषः । अस्मिन्नाचारे-
त्यादिवचने । न तेभ्यः क्विति । एवेत्यनेन । नन्वेवं न सर्वेत्यनेन सर्वप्राति-
पदिकेभ्यः क्विप उत्पत्तिर्जातेति सर्वेत्यपार्थकमत आह । सर्वग्रहणमिति ।
न च कर्तृक्विबन्तावगल्भादिभ्यः आचारे क्विपि कृतेऽवगल्भतीत्यादि स्या-
देवेति वाच्यम् । ह्रस्वनद्यापइतिसूत्रस्थभाष्यप्रामाण्येन हलन्तेभ्य आ-
चारे क्विबभावस्यान्यत्र प्रतिपादनात् । वादिन इति । हरदत्तस्येति शे-
षः । आर्द्धधातुके किमिति । सार्वधातुकस्य शप उपदेशेऽकारान्तस्य गो-
पायेत्यस्य सत्यपि लोपे रूपे न विशेष इति प्रश्नः । अत्र यद्यपि गोपाये-
त्यस्य धातुस्वरेणान्तोदात्तस्य शबकारेणैकादेशे एकादेश उदात्तेनेत्यनेन
उदात्तत्वे ततः परस्य तिपः पित्त्वादनुदात्तत्वे मध्योदात्तं गोपायतीति
भवति सार्वधातुकस्य शपः उपदेशे एव पकाराकारलोपे तु सर्वानुदात्तं
पदं प्रसज्यते इति स्वरे विशेषोऽस्त्येव तथापि स्वरकृतदोषस्य झटिति
ज्ञातुमशक्यत्वात् यत्र रूपे विशेषस्तमाह । वृक्षस्येति । व्युत्पत्तिपक्ष इ-
ति । उपदेशे अकारान्त इत्यस्य स्वस्योपदेशे अकारान्तस्येत्यर्थः स्यादित्य-
भिप्रायेण व्युत्पत्तिपक्षेत्याद्यभिहितम् । न चान्यस्य उपदेशे अकारान्तमित्यर्थे
उणाद्यन्तानामव्युत्पन्नत्वमितिपक्षे च नायं दोषः स्वप्रत्ययोपदेशमादाय
वृक्षशब्दांत्यलोपापत्तिस्तु न सन्निपातपरिभाषाविरोधात् इति वाच्यम् ।
अस्य वृक्षइत्यादिप्रथमान्तोपलक्षणत्वात् अत्र सूत्रे अनुदात्तोपदेशइति
सूत्रादेकदेशे स्वरितत्वप्रतिज्ञया उपदेशपदमनुवर्त्तते तस्मिन्सति कस्योप-

SGDF
Sri Gangeshwari Digital Foundation

देश इत्याकाङ्क्षायामुपस्थितत्वादार्द्धधातुकपदं विभक्तिविपरिणामेनान्वेति। न चार्द्धधातुके पर इत्येवास्तु इति वाच्यम्। अय्पयादिभ्यो धातुभ्यः क्विपि यलोपे अत् पत् इत्यादौ तुकं बाधित्वा परत्वाच्छिष्टावयवाकारस्य लोपापत्तेः। बध्यादित्यस्य सिद्धिस्तु आर्द्धधातुक इतिवच्छिडीत्यस्यापि विषयसप्तमीत्वात् इति बोध्यम्। घुण घूर्ण भ्रमणे। अस्य द्वितीयस्य प्रक्रियालाघवार्थ इति। ह्रस्वं पठित्वोपधायां चेतिदीर्घकरणे प्रक्रियागौरवमिति भावः। अत्र केचित् अस्माद्धातोरन्येभ्योपि दृश्यत इति वनिपि कृते विड्वनोरनुनासिकस्येत्यनेन नकारस्याकारे ह्रस्वपाठे घुरावेति दीर्घपाठे घूरावेति फलभेदस्य स्पष्टतया कथमेतत्। न च दीर्घे कर्तव्ये परनिमित्तकत्वेन बहिरङ्गस्यात्वस्यासिद्धत्वादादौ दीर्घे न फलभेद इति वाच्यम्। त्रैपादिकेऽन्तरङ्गे बहिरङ्गपरिभाषाभावस्योपपादितत्वादिति। अत्राहुः। कार्यकालपक्षे त्रिपाद्यामन्तरङ्गपरिभाषा प्रवर्तत इतिप्राचीनसम्मतपक्षाभिप्रायेण प्रक्रियालाघवार्थ इत्यभिधानमिति। वस्तुतस्तु कार्यकालपक्षेप्यप्रवृत्तिरेवन्याय्येत्याशयेनाह। अन्ये त्विति। एतन्मते घुरावा ब्राह्मणीत्येव वनिबन्तस्य भवति उपधायां चेतिदीर्घस्यात्वस्य च युगपत्प्राप्तौ दीर्घविधायकस्यासिद्धत्वादाकारादेशस्यैव प्रवृत्तेः। न चास्माद्विजन्तात्सौ भ्यामादौ च नलोपे कर्तव्ये नकारादेशणत्वयोः प्राप्तौ णत्वस्यासिद्धत्वान्नलोपे कृते लघूपधलक्षणगुणापत्तिः गुणे कर्तव्ये नलोपासिद्धत्वं तु न मलोपस्सुप्स्वरेतिपरिगणनादिति वाच्यम्। अन्येभ्योपि दृश्यत इत्यत्र दृशिग्रहणादस्माद्विज् न भवतीत्याशयात्। सम्प्रदायानुरोधात्। वृत्तिसम्मतव्याख्यानानुरोधात्। तदभाव इति। आयप्रत्ययाभावे इत्यर्थः। चारिताथ्र्यमिति। अनुबन्धस्येत्यादिः। ग्रहणादिति। क्विबप्यत्राचारार्थे यो विहितस्तद्भिन्न एव हलन्तेभ्योस्योत्पत्त्यभावात्। अयनुवादोयमिति। णेरार्द्धधातुकपरत्वनिमित्तकगुणेऽयादेशे च कृते सति सम्भवे अय्शब्दस्तदनुवाद इत्यर्थः। न चैवमामादिषु परेषु

SGDF
Sri Gargeshwari Digital Foundation

प्राप्तस्य णिलोपस्य निषेधार्थं नेत्येवाभिधीयताम् अय्विधानं किमर्थमिति शङ्क्यम् । ल्यपि लघ्वित्युत्तरसूत्रार्थं तत्सत्त्वात् । अनुबन्धकार्येऽनल्विधाविति निषेधानापत्त्या ल्यपः स्थानिवद्भावेन कित्त्वादत्र गुणाप्राप्तेरिति बोध्यम्। णिश्रिद्रुस्रु । णिशब्देन णिङ् णिचोर्ग्रहणम् एकस्यैव ग्रहणे साधकाभावात्। बाधादिति । न च क्तिचि कृत इटः प्राप्तिः तितुत्रेतिनिषेधात् । केचित्तु णिश्रितसूत्रेण च्लेः स्थाने अङादेश एव विधातव्यः चङीतिसूत्रे अङीत्येव कार्यम् चित्त्वमस्य स्थानिवत्त्वेन सिद्धम् इत्याहुः । अत्राहुः।अनुबन्धकार्येऽपि क्व चिदनल्विधाविति निषेधः प्रवर्त्तत इति ज्ञापनार्थं चकारोच्चारणमिति । पूर्वविप्रतिषेधाश्रयणमनर्थकमितिवादिमतमाह । यदि त्विति ।.अत एव । एतादृशस्थले स्थानिवत्सूत्रस्य प्रवृत्तेरेव । दृष्टान्तपरभाष्यं खण्डयति । तन्नेत्यादिना । अनल्विधित्वेनेति । आदेशविधायकशास्त्रे स्थानिनोऽच्पदेनैवोपादानात् । ननु वृद्धेः प्राग्यदि णिलोपस्तदाऽवीवददित्यस्य सिद्धिरग्लोपित्वान्न स्यादित्यत आह । ययन्तास्वाविति । अग्रिमभाष्यमिति । शब्दान्तरप्राप्तया वृद्धेरप्यनित्यत्वमुपपाद्य वृद्धौ कृतायां लोप इत्येतद्व्यवस्थापनेनानग्लोपित्वात्सिद्धेर्णेर्णिच्युपसंख्यानं न कार्यमित्यभिप्रायकम्भाष्यमित्यर्थः । एवम् । सन्वत्सूत्रभाष्यवत् । भोभगोइतिसूत्रस्थभाष्यविरोधेन एकदेशित्वमुक्त्वा भाष्यान्तरविरोधादपि तामाह । किं चेति । णिलोपो न स्यादिति । स्थानेद्विर्वचनपक्षेऽजादेर्द्वितीयस्येत्येकवाक्यतया चङीत्यनेन टिशब्दस्य स्थाने टिटीत्यादेशे प्रकृतिप्रत्ययविभागसम्मोहेन निर्दिश्यमानधर्मावच्छिन्नविषयकत्वस्यासम्भवाल्लोपो न स्यादिति भावः । गुणादीनामिति । इयङ्विधायकसूत्रस्य यणादिविधायकेभ्योऽप्यष्टाध्याय्यां पूर्वपाठेन वार्त्तिकनिर्देशेऽपि गुणस्येयङ्बाधकतयात्र वार्त्तिकोक्तक्रमव्यत्यासः । परे त्वेवम् पूर्वविप्रतिषेधानङ्गीकारे । अनेकवचनेति । गुणादीनां यत्र यत्र प्राप्तिस्तत्तद्विषयकस्य ल्युटि णेर्लोपः ण्वुलि णेर्लोपः इत्येवम्प्रकारेणानेकवचनेत्यर्थः । एवम् ।

SGDF
Sri Gargeshwari Digital Foundation

वचनानंगीकारे अनंतरस्येतिन्यायेन णिलोपस्योग्लस्य यणियङ्बाधकतया चारितार्थ्ये न गुणादिबाधकत्वं न स्यादिति भावः। औचित्यमिति। एकवचनकल्पनयैव सर्वसामंजस्यादिति भावः।णौचङि। अत्रसप्तमीनिर्देशेन णिपरे चङि चपरे यत्पूर्वन्निर्दिष्टमङ्गमित्यर्थे असंभवपरिहाराय यादृशी कल्पना कर्त्तव्या तामाह। णिचाङ्गस्येत्यादिना। असंभवेनेति। णिचा व्यवधानादित्यादिः। णौ चङीत्यत्र णिग्रहणं न कार्यं चङीत्यत्र तावदस्तु असंभवस्तु लक्ष्यस्यनास्तीत्यभिप्रायेण शङ्कते। न चेति। समाधत्ते। तत्रेति। अन्तरङ्गत्वात्। पूर्वोपस्थितनिमित्तकत्वेनान्तरङ्गत्वात्। अपवादः। येन नाप्राप्तिन्यायात्। ह्रस्वप्राप्तिकान्न इति। चङुत्पत्तिप्राक्काले वृद्धेः प्राप्तेरिति भावः। पदसंस्कारपक्षेऽप्याह। पदेति। णिजन्ते यत्रोपधाह्रस्वत्वमभिप्रेतं तत्र त्यं क्रममाह। धातुसंज्ञेत्यादिना। अस्य धातुज्ञाने णिजुत्पत्तिज्ञानमित्यादिःपूरणीयः। एवं च णिज्ज्ञानस्य चङ्विषयकज्ञानपूर्वकालिकतया पूर्वं वृद्ध्यावोः प्रवृत्तिः स्यादिति भावः। सामर्थ्येन। सूत्रारम्भसामर्थ्येन। तदपेक्षयेति। सामर्थ्यकल्पनापेक्षयेत्यर्थः। ननु णाविति ह्रस्वभाव्युपधाविशेषणमस्तु तावतैवाचकाङ्क्षदित्यादौ दोषो न भविष्यतीत्याशङ्कायामाह। प्रत्ययस्येति। सन्वल्लघुनि। चङ्पर इत्यत्र कर्मधारयस्य भ्रमवारणायाह। बहुव्रीहिरिति। तत्र मानमाह। परग्रहणमिति। कर्मधारयस्याभिप्रेतत्वे चङीत्येव वदेत्। परशब्दस्य परोपादानं तु न साधकम्। बहुव्रीहिपक्षेपि साम्यात् अङ्गस्येत्यस्यावृत्तौ चङ्परशब्दबोध्यविशेषणत्वमेकस्याङ्गस्येत्यस्य। द्वितीये त्वत्र षष्ठ्यर्थो निमित्तनिमित्तिभाव इत्याशयेनाह। अङ्गसंज्ञानिमित्तमितीति। अत एव। अङ्गसंज्ञानिमित्तं यच्चङ्परं णिरितिव्याख्यानादेव। न सन्वत्त्वमिति। णेर्विशेष्यत्त्वाभावे चङ् परो यस्मादित्येतावन्मात्रोक्तौ श्रिप्रभृतिष्वपि सन्वद्भावापत्तिरिति भावः। नन्वभ्यासस्यालघुत्वान्नाशिश्रियदित्यत्र सन्वद्भावापत्तिर्दोषः। अकाराभावेन सन्यत इत्यस्याप्यप्राप्तेः। मादुद्रुवदित्यत्रावर्णपरधात्वक्षरा-

SGDF
Sri Gangeshwari Digital Foundation

भावात् स्नवतिशृणोतीति सूत्रविहितमित्त्वमस्य तथा सति स्यादित्यपि न सन्वद्भावस्य निरस्वरोपि न प्रयोजनं चङ्न्यतरस्यामित्युपोत्तमोदात्तत्वस्य परत्वादिति चेन्न । श्रिशब्दस्य णेरभावेपि यस्माद्धातोः परस्च्लेश्चङ् तदुपलक्षणत्वात् । अत एव प्रभृतिशब्दोपादानं सार्थकम् । एवं चास्य वाक्यस्याचकमतेत्यत्र कमेश्च्लेश्चङ् वक्तव्य इतिवार्त्तिकेन णिङभावेपि यदा चङ् तदापि स्यादित्यत्र तात्पर्यम् । न च चङ् परो यस्मात्तादृशो लघुः ककाराकारो न च तत्परोऽभ्यासाकारः ककारेण व्यवधानादिति वाच्यम् । इष्टस्थले सर्वत्रैव व्यवधानेन येन नाव्यवधानन्यायेन सिद्धेः । यत्तु यद्यचकमतेत्यस्योपलक्षकं तदिति व्याख्यायते तदाचीकमतेत्येव स्यादिति कमेर्णिङितिसूत्रानन्तरमायादय इति सूत्रबाधनाय कमेर्लुङि चेति सूत्रं कार्यम् । कमेर्लुङि परतो णिङ् भवतीत्यर्थो भविष्यति तावतैवेष्टसिद्धेरिति तन्न । न्यासान्तरारम्भे गौरवस्य स्पष्टत्वात् । तदपेक्षयाङ्गस्येत्यस्यावृत्तया व्याख्यानस्योचितत्वात् । अत एव । चङ्परशब्दार्थस्य लघुविशेषणत्वादेव । नैव सन्वत्त्वमिति । प्रथमव्याख्यायामित्यादिः । यद्यपि चङ्परशब्दार्थस्यानुपाद्यविशेषणत्वं तथापि विधौ परिभाषेत्यस्याभावान्निर्दिष्टपरिभाषा प्रवर्तत एव । नैवदीर्घत्वमिति । प्रथम पक्ष एवेति शेषः । भवत्येवेति । नुशब्दस्य द्वित्वेऽभ्यासोत्तरखण्डस्य वृद्धावावादेशे ह्रस्वत्वेऽभ्यासस्य चङ्परणिपरलघुपरत्वसत्त्वाद्भवत्येव पक्षद्वयेऽपीति भावः । ननु येननाव्यवधानन्यायेन तादृशलघुपरत्वं यत्रैकव्यञ्जनव्यवहिताऽभ्यासस्य तत्र सन्वद्भावस्य चारितार्थ्यादचिक्षपदित्यादौ संयोगव्यवधाने न स्यादत आह । अचिक्षमेत्यादि । नन्वस्मिन्पक्षेऽचकथदित्यादौ सन्वद्भावाभावायोपात्तस्यानग्लोपिग्रहणस्य वैयर्थ्यमल्लोपस्य स्थानिवद्भावेनाभ्यासस्य चङ्परणिपरलघुपरत्वाभावात् । न चाभ्यासस्य नानादिष्टादचः पूर्वत्वमिति कथमत्र स्थानिवद्भाव इति वाच्यम् । द्विः प्रयोग एव द्विर्वचनमिति यः स्थानिभूतादचः पू-

SGDF
Sri Gargeshwari Digital Foundation

र्वत्वेन दृष्टस्तत्त्वमस्त्येवेति चेन्न। अभ्यासस्य कार्ये तदुत्तरखण्डादेश-स्य तत्प्रतिबन्धकीभूतं स्थानिवत्त्वन्त्वभ्यासस्यावर्ण इतिसूत्रस्यास-वर्णग्रहणज्ञापितवचनेन दोषाभावात्। अभ्यासस्याङ्गत्वाभावादाह। अवयव इति। अस्य फलमिति। अभ्यासविशेषणस्याङ्गस्येत्यस्य फल-मित्यर्थः। न चैकाचो द्वे पूर्वोऽभ्यासोऽङ्गस्येत्येषां कार्यकालपक्षे एकवा-क्यतयाऽङ्गसंज्ञकैकाच्धातुकर्मके ये द्वे उच्चारणे तयोः पूर्वस्य सन्वत्त्वमिति प्रकृतसूत्रार्थः स्यात् तथा चैकाच्धातुसम्बन्धाभ्यासस्यैव सन्वत्त्वंना-नेकाच्धातुविषय इत्येव फलमस्त्विति वाच्यम्। प्रकृतसूत्रभाष्ये इह कस्मान्न भवति। अजजागरत्। लघुनि चङ्परइत्युच्यते व्यवहित-ञ्चात्र लघु चङ्परमिति भाष्यविरोधात्। एतद्भाष्यविरोधेन यथोद्दे-शपक्षस्यैवाश्रयणमत्रोचितमिति। यदि कार्यकालपक्षमाश्रित्यैकवाक्यता विधिशास्त्रेण स्यात्तदाऽनेकाजु ह्रस्वत्वादिकमपि न स्यात्। उक्तभा-ष्येति। अचचकासदित्यत्र सन्वत्त्वाभावप्रतिपादनपरभाष्यविरोधादि-त्यर्थः। आपत्तिश्चात्र पक्षे इति। न च चङ्परणिपरन्नाङ्गमिति कथ-मत्र प्राप्तिरिति वाच्यम्। यस्मात्प्रत्ययविधिस्तदादिस्त्वमुन्दिद् इत्यस्या-स्त्येवेत्याशयात्। सन्वद्भावेन सनि यद्यत्कार्यन्दृष्टन्तस्य सर्वस्यातिदेश इत्यभिप्रायेणाशङ्कते। नन्विति। तस्यात्रेति। तदीयाभ्यासस्येत्यर्थः। अङ्गान्यत्वादित्यस्य द्विविधव्याख्यानेनाङ्गकर्मकद्विरुच्चारण इत्यर्थस्य भा-ष्यसम्मतत्वमिति स्पष्टमेवेति भावः। स्पष्टार्थमिति। ह्रस्वत्वविधानेना-भ्यासावयवस्यात्त्वमव्यभिचरितमिति भावः। अभ्यासस्य विशेष्यत्वमतो विशेषणत्वमित्यदन्ताभ्यासस्येत्यर्थं वक्ष्यमाणरूपासिद्धिरत आह। अ-भ्यासस्यानभ्यकारस्येति। अत एव। अत इत्यस्य विशेष्यत्वादेव। सन्-पराभ्यासस्येति। सनि परे तदपेक्षया यः पूर्वोऽभ्यासोत[illegible]डभिन्नव्य-वहितभिन्नस्तस्येत्यर्थः। अन्यथा पिपक्षतीत्यादावुत्तरभागेन व्यवधानान्न स्यात्। सूत्रसार्थक्यन्त्वधीषिषतीत्यादौ भविष्यत्येव। तद्भाष्यबाधा-

SGDF
Sri Gurgeshwari Digital Foundation

अयणे प्रमाणन्तु भ्राजभासेतिसूत्रे काण्यादीनां वेत्येतद्वार्त्तिकस्याथकाण-त । अचीकणदित्यादिप्रयोगदर्शनमेव । तत्पक्षे । कार्यकालपक्षे । इदञ्च। कार्यकालपक्षमाश्रित्योक्तव्याख्यानञ्च । वस्तुत इत्यादीति । आद्यपक्षस्य परिष्कारोऽयम् । नोपयुज्यत इति । सन्वद्भावविषये दीर्घस्य विधानात्। कृत्वा चिन्तान्यायेनेति । यद्यापुगागमः स्यात्तदा ह्रयं स्यादित्येवमत्र चिन्ता द्रष्टव्या । न स्यादेवेत्यर्थ इति । नियमबीजन्तु प्रागुपपादितम् । कमिप्रभृतीनामिति । एतेषामग्लोपित्वेऽपि णिञिनमित्तकाग्लोपित्व-मास्तीति भावः । अत एव । सनतेः सनोतेश्च ग्रहणादेव । सनोतेरनु-नासिकलोपादात्वं विप्रतिषेधेनेतिवार्त्तिकेन जनसनेतिसूत्र एव सन्-ग्रहणेन सनतेः सनोतेश्च ग्रहणमिति व्यवस्थाप्यते तत्रोभयोर्ग्रहणे सिद्धेऽ-र्थाधिकारानुरोधाद्वो विभाषेत्यत्रोभयोर्ग्रहणमर्थसिद्धम् । अन्ये जनादय इ-ति । उपक्रमभाष्यमिदम् । एतेन । पूर्वोक्तरीत्योभयोर्ग्रहणस्य व्यव-स्थापनेन । अकारोच्चारणेन । ह्रस्वाकारोच्चारणेन भाष्यविरोधापत्ते-रिति । यदि ह्रस्वाकारविशिष्टस्य येत्यस्य विवक्षा तदा भाष्यविरोधः स्पष्ट एव । ननु क्रमः परस्मैपदेष्वितिसूत्रे परस्मैपदेष्वित्युपादानाद्यत्र परस्मैपदपरत्वन्तत्रैव स्यादिति लुकि न स्यान्न लुमतेतिनिषेधादत आ-ह । उत्क्रामेत्यत्रेति । तन्निरूपितेति । परस्मैपदनिरूपितेत्यर्थः । स्नु-क्रमोरनात्मनेपद । प्रथमार्थे षष्ठीति । लाघवात्पर्युदासोऽयम् । आत्म-नेपदनिमित्तभिन्ने यत्र स्नुक्रमी तत्रैवेत्यर्थः । यदि तु प्रसज्यप्रतिषेध आश्रीयते आत्मनेपदनिमित्त इति भावप्रधाननिर्द्देशः । स्नुक्रमोरात्म-नेपदनिमित्तत्वाभावे सति प्रत्यासत्त्या ताभ्यां परस्यार्द्धधातुकस्येतिव्या-ख्याने तु षष्ठीनिर्द्देशो न्याय्य एव । नन्वेवं व्याख्याने प्रस्नवितव्यमि-त्यादिप्रस्तुत इत्यत्रापि स्यादत आह । प्रस्नुत इति । प्रकृतसूत्रस्यनि-मित्तपदस्य प्रयोजनमाह । स्नुक्रमोरिति । न चैवं प्रक्रन्तेत्यत्रापि प्र-तिषेधः स्यादिति वाच्यम् । क्रमेः कर्त्तरि चात्मनेपदविषयादितिवचनेन

SGDF
Sri Gargeshwari Digital Foundation

प्रतिषेधात् । प्रचिक्रंसत इत्यत्र तु प्रतिषेधो भवत्येव । पूर्ववत्सन इति-शास्त्रप्रामाण्येन स्नु क्रमोरात्मनेपदनिमित्तत्वादेव सन्नन्तादात्मनेपदविधानात् । दुरुपपादमिति । अवयवे समवेतोऽप्यवयवी न तु ततः पर इति भावः । अन्ये त्विति । अत्रारुचिबीजन्तु सामर्थ्यकल्पने गौरवं स्फुटमिति । अत एव । अङ्गादित्यस्यासम्बन्धादेव । युटः । दीङो युडिति-विहितस्य । उपसर्गस्यायताविति सूत्रेऽयतावित्युपसर्गविशेषणमिति रीत्या व्याख्यातन्तत्र कारणमाह । श्रुतत्वादिति । अत एव अस्योपसर्ग-विशेषणत्वादेव । इणो रूपमितिस्वीकारेण प्रत्यय इत्यस्योपपत्तावपि यदाऽयतिपरत्वम्प्रतेस्तदा प्लत्यय इत्यपि स्यादत आह । प्लत्यय इतीति । कैयट इति । अनभिधाने मानन्तु रेफस्यायताविति विशेषणमितिभाष्योक्तपक्षान्तरेणैकवाक्यत्वमिति । तस्मिन्पक्षे प्रत्यासत्त्याऽयतिम्प्रति य उपसर्गस्तदवयवस्य रेफस्यायतिपरस्येत्यर्थ आश्रयणीय इति श्रौताव्यवधाने चारितार्थ्यात्पल्ययत इत्यत्र न स्यादित्येव दूषणन्न तु प्रत्यय इति सिध्यतीत्यप्युक्तन्तदेव । किञ्च भवत्सम्मतस्य लकारघटितस्य प्रामाणिकत्वे तदसिद्धिरूपस्य दूषणस्य तस्मिन्पक्षे भाष्यकृतावश्यं कथनङ् कर्त्तव्यन्तच्चानुक्तमतस्ताट्टशरूपस्यानभिधानमिति । असाधुरेव । गत्यर्थस्य प्राधान्येन प्रतिपादकस्यासाधुत्वमत्र बोध्यम् । यदि तु पचाद्यचि कृते तदन्तादाचारे क्विप् क्रियते तदा साधुरेव । किन्त्वर्थभेद इति बोध्यम् । अभिमान इति । लिण्निमित्तकपीभावस्यानवकाशत्वादेवञ्चारितार्थ्यप्रदर्शनमयुक्तमिति । पर इति । एवञ्च लिडुत्पत्तेः प्रागेव पीभाव इति भावः । दीपजनबुध । इदं सूत्रङ्कर्त्तरि प्रवर्त्तते न तु भावकर्मणोः । तत्र हि परत्वाद्भावकर्मणोरित्यस्य प्रवृत्तेः । चिण् ते पद इतिसूत्रात्ते इत्यनुवर्त्तते । असिद्धत्वादिति । यदि तु प्रतिलक्ष्यं लक्षणभेदो नाश्रीयते तदा गमहनजनेतिसूत्रात् क्ङितीत्यनुवर्त्य विभक्तिविपरिणामेन क्ङितो लुगिति व्याख्येयम् । मूले तद्भाष्येति । षोपदेशलक्षणवाक्ये स्त्यायतिरिवायन्न पयु-

SGDF
Sri Gargeshwari Digital Foundation

दस्त इत्ययन्दन्त्याजन्तस्रादित्वात्षोपदेश एवान्यथा भाष्यस्य न्यूनत्वाप-त्तिरिति षोपदेशत्ववादिनो भाष्यविरोध इति भावः । ममन्थेति । अत्र यस्य हल इति यृशब्दस्य लोपो न तत्र यस्येति सङ्घातस्य ग्रहणात् । मूले स्नानमिति । अत्र स्नानं स्यादभिषव इत्यमरोक्तः स्नानशब्दार्थः । अतो ल्रान्तस्य । अत्रान्तशब्दः परसमीपवाची । ल्रान्तस्येत्यत्र न बहु-व्रीहिः । ल्रित्यस्य सापेक्षत्वात् । किन्तु भिन्नस्पदमित्युक्तम्मूले । अत इति त्वावर्त्तते । तदन्तस्याङ्गस्येति व्याख्यानादश्वल्लीदित्यत्र न वृद्धिः । यद्यपि व्यवहिते पदार्थेपि समीपव्यवहारो लोके दृश्यते । तथापि प्रकृ-तेऽव्यवहितसमीपवाचक एवान्तशब्दो भाष्यप्रामाण्यात् । सिचीत्यस्य ल्रविशेषणत्वमङ्गीकृत्य तस्याङ्गविशेषणत्वेन सिच्परल्रान्तस्याङ्गस्यातो वृद्धिरित्यर्थेन सामञ्जस्ये प्रकृतसूत्रस्थमन्तग्रहणमस्रति बाधके प्रत्ययस्या-ङ्गविशेषणत्वमेवेति ज्ञापयति । किञ्चान्तपदोपादानाद्वर्णग्रहणेपि न जा-तिग्रहणम् । नन्विदं सूत्रमतो हलादेरितिसूत्रानन्तरम्पाठ्यम् । अत इ-ति ततोऽनुवर्त्तनीयम्प्रकृतसूत्रस्थमत इति तु न पाठ्यमत इति प्रकृत-सूत्रे पञ्चम्यन्तविभक्तिव्यत्ययकल्पनेन भविष्यत्यतोऽश्वल्लीदित्यादौ न दोषः । अनुवादेपि तस्मादितिपरिभाषायाः प्रवृत्तिर्भविष्यतीति चेन्न । कण्ठताल्वादिव्यापारस्याधिकस्य प्रकृतसूत्रेऽत इत्यस्योपादाने आधिक्ये-प्यतो हलादेरितिसूत्रस्यात इतिपदे एव स्वरितत्वं हलादेरित्यत्र तु ने-तिकल्पनया विभक्तिव्यत्ययकल्पनया तस्मादितिपरिभाषोपस्थितिक-ल्पनया च मनोव्यापारगौरवस्य स्पष्टत्वात् । इदमेवाद्ग्रहणं मनोव्या-पारगौरवमपि दोषावहमित्यर्थे ज्ञापकमिति दिक् । अतः किम् । अ-खोरीत् । न च नेटीति प्रतिषेधः । तस्यानन्तरस्येति न्यायेन हलन्तल-क्षणवृद्धिमात्रबाधकत्वात् । मूले तृफलभजत्रेत्येत्वमिति । न च दिव औ-दितिसूत्र इवाप्रत्ययविधावपि निरनुबन्धकपरिभाषाप्रवृत्तया फलनिष्प-न्नावितिधातोरेव ग्रहणं युक्तमिति वाच्यम् । प्रकृतसूत्रस्थफकारेण ञिफ-

SGDF
Sri Gangeshwari Digital Foundation

लेत्यस्यापि ग्रहणात् । प्रचुरप्रयोगादिति । क्व चित्तु स्पष्टप्रतिपत्तये गम्यमानस्यापि नेत्रपदस्य प्रयोगोपि । सम्मीलने नयनयोर्न हि किञ्चिदस्तीत्यत्र यथा । अश्वीयमिति । अत एव घोरितकमितिस्वार्थकक्तान्तमश्वगतौ प्रयुज्यते । सन्लिटोर्जेः । सन्लिङ्निमित्त इत्यस्योपपत्तिरत्र परम्परया द्वित्वस्य तन्निमित्तकतया तदुत्तरमभ्याससंज्ञाप्रवृत्तया संज्ञायास्तन्निमित्तकत्वेन संज्ञिनि तद्धर्मारोपेण च कार्यो तदपेक्षया लाघवादाह । सन्लिट्पर इति । न च जिगीषतीत्यत्र कुत्वन्न स्यात् । अत्र हि द्वितीयाजवधिकस्य जिस्शब्दस्य द्वित्वेन सनः कार्यित्वादिति वाच्यम् । सन्ग्रहणसामर्थ्येन न हि कार्यीतिन्यायस्येहाप्रवृत्तेः । उभयोपदेशकालस्य । अकारादेशकालस्य उप्रत्ययोपदेशकालस्य च । एकत्वादिति । अत्रैकत्वं क्षणत्रयसमुदायात्मकस्य कालस्य विवक्षितम् । एतावताप्यार्द्धधातुकस्योप्रत्ययस्याधिकरणेऽकालेऽकारान्तबुद्धिसत्तासम्भवो बोध्यः । तस्य स्थानिवद्भावादिति । अल्लोपस्य स्थानिवद्भावादित्यर्थः । एतेन । प्रकृते लघूपधलक्षणगुणस्याप्रवृत्तेरिष्टत्वेन । ननूकारस्यार्द्धधातुकत्वे तदादेशस्य यणोप्यार्द्धधातुकत्वादिडागमः स्यादत आह । धिन्वन्तीत्यादाविति । एकदेशिनेतीति । स्थानिवद्भावस्यैवाप्राप्त्या तत्परिहारचिन्ताया वैयर्थ्यमिति तस्यैकदेशित्वन्द्रष्टव्यम् । साजात्यादिति । अत्र साजात्यं वर्णत्वेन ग्राह्यम् । तदन्तो यः प्रत्यय इति । धिन्वित्यत्र तदन्तत्वं व्यपदेशिवद्भावेन बोध्यम् । आप्नुहीत्यत्र लोपाभावायासंयोगपूर्वत्वमुकारविशेषणमिति न्याय्यमेव । वस्तुमुचितमिति । सामानाधिकरण्यं लाघवमौचित्यबीजम् । असवीदित्यादि । अत्रातो हलादेरिति विकल्पः । तस्यानुरोधादिति । तस्याजागरीदित्येवं दृश्यते तदनुरोधादित्यर्थः । न विरोध इति । अन्यथा सिच्यन्तरङ्गन्नास्तीत्यस्य णिश्रिग्रहणेन ज्ञापकेन सिद्धौ अचिमव्योर्नैत्यस्याभावेन विकल्पस्य दुर्वारतया विरोधः स्पष्ट एव । अव रक्षणेत्यादि । कान्तिरत्र शोभा इच्छा वा । दीप्तिस्तेजः । तृ-

SGDF
Sri Gargeshwari Digital Foundation

निरिच्छानाशः । स्वाम्यर्थः स्वामिधर्मः स्वामित्वरूपः । भाष व्यक्तायां वाचि । शुकादिविषये सम्यग्भाषते इत्यादिप्रयोगस्त्वारोपादतएव मृदङ्गशङ्खतूणवाः पृथङ् नदन्ति संसदीतिप्रयोगस्याप्युपपत्तिः । भासृ दीप्तौ । ऋकारोच्चारणमत्रात्मनेपदमात्रफलकम् । न तु माऽग्लोपीत्यस्य प्रवृत्त्यर्थम् । भ्राजभासेत्यनेनोपधाह्रस्वत्वस्य विकल्पात् । अनुबन्धान्तराकरणमृकारान्तप्रकरणानुरोधात् । मूले के चित्त्विति । अत्रारुचिबीजन्तु देवासुरान् प्रवल्ह्येतिश्रौतप्रयोगविरोधः । प्रवल्ह्येत्यस्यानृतं भाषित्वेति व्याख्यातारः । उक्तश्रुतिव्याख्यानुरोधादेवाह । परिभाषणमनृतभाषणमिति । एतेन परिभाषणमनृतभाषणमितिव्याख्याने यः सनिन्द उपालम्भस्तत्र स्यात्परिभाषणमितिकोशविरोध इति कस्य चिदुक्तिर्निरस्ता । आद्यः । वेहृधातुः । अंत एव । अस्य दन्त्योष्ठ्यादित्वादेव । अन्त्य इत्यस्य मूलस्यस्य बाहृधातुरित्यर्थः । अत एव बाहवः परिघोपमा इत्यस्योपपत्तिः । न चास्य धातोरात्मनेपदित्वाद्ववाह रक्तमुरुषास्ततो जाता इतिप्रयोगस्यानुपपत्तिरिति वाच्यम् । आर्षत्वात् । ऊह वितर्के । वितर्कोऽत्रानेकधर्मप्रकारकं ज्ञानम् । अस्य धातोरात्मनेपदित्वेनानुक्तमप्यूहति पण्डितो जन इति प्रयोगः प्रामादिकः । न स्यादिति । न विद्यते इडस्मादित्यर्थे सर्वत्रेड्भावसत्त्व एव प्रवृत्तिः स्यादिति भावः । अनिट्त्वे त्विति । नञेट्शब्दस्य समासङ्कृत्वा सामानाधिकरण्येन सम्बन्धस्वीकार इत्यर्थः । नित्यमेव स्यादिति । क्सादेश एव नित्यं स्यादित्यर्थः । नोदित इतीड्विति । उपजीव्यविरोधात्सोऽत्र न भवतीत्यर्थः । कित्त्वसामर्थ्यादिति । अत्र ककारो गुणाभावार्थ एव यदि पूर्वङ्गुणः स्यात्तदा ककारो व्यर्थ एव स्यात् । चातुरर्थिके । वुञ्छण्णितितदस्मिन्नित्यादिना पठितसूत्रचतुष्टयार्थे चतुर्थाध्यायपठितसूत्रविहिते स इत्यर्थः । उत्तरसूत्रस्येति । लुग्वादुहेतिसूत्रस्येत्यर्थः । अत एव । आत्मनेपदग्रहणापकर्षादेव । स्वरितत्वाकल्पनेन लाघवादाह । उत्तर-

SGDF
Sri Gargeshwari Digital Foundation

सूत्र इति । ननु कुत्सस्य लोपविधानं व्यर्थमजादावेवास्य प्रवृत्तया एत-दभावेऽपि सवर्णदीर्घेण सिद्धेरत आह । लोपाभाव इति । शब्देनेति । शब्दकरणकेऽर्थ एवोद्घोषशब्दस्य प्रसिद्धेरिति भावः । णिक्ष चुम्बने । प्रणिक्षतीति । उपसर्गादसमासेपीति णत्वम् । वा निंसनिक्षेति तु कृती-त्यनुवर्तनात्कृत्येव । तदर्थः । असूर्क्षणशब्दार्थः । यदि तादृशः पाठः स्यात्तदाऽभावाभावस्य प्रतियोगिरूपतयाऽवज्ञापर्यायवाचकत्वानुपपत्ते-रिति भावः । इच्छतीष्यात्योरेवेति । परिशेषादेतयोरेव ग्रहणमिति भावः । अत एव । विशेषणविशेष्ययोरुभयोः सप्तम्यन्तत्व एव तस्याः प-रिभाषायाः प्रवृत्तेरेव । ननु वलादेरित्यत्र वलपदार्थस्योपसर्जनत्वात्क-थन्तस्य तीतिविशेषणमत आह । सूत्रत्वादिति । भाष्ये स्पष्टमिति । न च विदंशे यङ्लुकि प्राप्तविभाषात्वं सम्भवति । पूर्वोक्तसाहचर्येणास्य यङ्लुक्यप्रवृत्तेरिति बोध्यम् । घस्लृ अदने स्वातन्त्र्येण पठितस्यास्य धात्वन्तरवन्न सार्वत्रिकत्वमित्यत्र लिट्यन्यतरस्यामित्यस्य ज्ञापकता सू-त्रकृतोक्ता भ्वादौ पाठस्य शपि परस्मैपदे प्रयोगे ज्ञापकता चोक्ता तामुपपादयितुं शङ्कते । न चेति । एतेन । अत्र पाठस्य शपि परस्मैपदे प्रयोगे ज्ञापकत्वेन । पाठस्य । तथा पाठस्य । घस्लादेशेन । लुङि घस्ला-देशेन । अघात्सीदितिप्रयोगेति । अदेः स्थाने यो विहितस्तस्य यद्यप्य-घसदिति सिध्यति तथापि स्वतन्त्रस्यास्याघात्सीदिति सयात्तद्वारणार्थम-स्य लृदित्त्वमित्यर्थः । नन्वाशिष्यप्रयोग इति न्यूनमाशिषि यत्र लोट् तत्र श-पि परस्मैपदे प्रयोगज्ञापकेनैव प्रयोगसम्भवादिति चेन्न । आशिषीत्यस्या-शिषि लिङीत्यर्थात् इदम् । आशिषीतिकथनम् । प्रयोगाभावसेऽपि । ज्ञा-पकमिति शेषः । लिट्यन्यतरस्यामित्यनेनादेशविधानात्सार्वत्रिकत्वे प्र-योगाभावज्ञापकत्वकल्पनापेक्षया लिट उपस्थितत्वात्तत्रैवाप्रयोगज्ञाप-कताऽस्त्वित्याशयेनाह । परे त्विति । लिटि परतः प्रयोगसत्वादेशस्यैव न तु स्वतन्त्रस्येऽतिज्ञाप्यसिद्धेरुपपत्तिमाह । जघस्येतीति । मूलोक्तप्र-

SGDF
Sri Gangeshwari Digital Foundation

कारकं खण्डयति । जघस्येत्यादिना । अत एव । स्वतन्त्रस्यास्य लिट्य-
प्रयोगादेव । प्रत्याख्यातं भाष्य इति । यद्यसार्वत्रिकत्वमात्रं ज्ञाप्यते
तदाऽनिट्कारिकापाठेन वलाद्यार्द्धधातुके प्रयोगरूपज्ञापकेन तासौ नि-
त्यानिट्त्वमस्य सम्भाव्यते तथा च जघस्येत्यस्य स्यात्तद्वारणाय घसेः प्र-
तिषेध इत्यावश्यकमिति प्रत्याख्यानासङ्गतिः स्यादिति भावः । अच्-
प्रत्यये घस्लादेशेति । तथोक्तम्भाष्ये । घस्लादेशेऽच्युपसङ्ख्यानम् । प्रा-
श्नीति प्रघस इति । पुषादिद्युता । अत्र पुषादयो न भ्वादिपठिता गृह्य-
न्ते । द्युतादीनाम्पुषादिपाठोत्तरम्पाठेन पुषादिपाठेनैव सामञ्जस्ये द्यु-
तादीनाम्पृथक्पाठसामर्थ्यात् । नापि चुरादिपठिताः । णिचा व्यव-
धानात् । नापि क्र्याद्यन्तर्गताः । तेषु पुषादिषु लृकारपाठेनैव सामञ्ज-
स्येऽत्र सूत्रे पुषादिग्रहणवैयर्थ्यापत्तेः । तेषु च ग्रहधातौ पठितव्यो लृ-
कारः स्वरितः पाठ्यस्तेनोभयपदं सिद्धमिति परिशेषादुक्तम्मूले श्यन्वि-
करणेति । न च श्यन्विकरणपुषादिष्वत्र पठितेषु द्युतादिषु चानुबन्धो
लृकारेण निमातव्यस्तेनैवाङः सिद्धौ सूत्रे पुषादिद्युतादिग्रहणवैयर्थ्यमि-
ति वाच्यम् । ञिमिदाञिक्ष्विदाधात्ववयवाकारस्यादितश्चेतिसूत्रप्रवृत्त्य-
र्थमावश्यकतया स्रंस्वादीनामुदित्त्वस्यापि क्त्वायामिड्विकल्पार्थमावश्य-
कतया च निमानासम्भवात्। न च ञिकारस्यादौ पाठवदनयोर्मध्ये पाठोऽ-
स्त्विति वक्तुं शक्यम्।विपरीतगौरवापत्तेः। एवं स्यन्दूधातोरूदित्त्वमपि न
स्यादिति बोध्यम्। पूर्वपक्षेति। तत्र हि वृद्धिग्रहणाभावेऽपि सिच्यन्तरङ्गस्य
प्रवृत्त्या वृद्धिग्रहणस्य न प्रयोजनमितिपूर्वपक्षेत्यर्थः । द्युतिस्वाप्योः
सम्प्रसारणम् । अत्र लोपोऽभ्यासस्येत्यतोऽभ्यासस्येत्यनुवर्त्तते । अ-
ङ्गाभ्यासयोरिति । अङ्गसंज्ञाभ्याससंज्ञयोरित्यर्थः । तत्फलमाह । दुद्यो-
तकीयिषीति । अत्र द्युतेरङ्गसंज्ञायां ण्वुल्प्रत्ययो निमित्तम्परम्परयाऽ-
भ्याससंज्ञायान्तु सन्प्रत्यय इत्येकनिमित्तकत्वाभावः स्पष्ट एव । ननु
णिजन्ते द्वयोः संज्ञयोरेकनिमित्तकत्वाभावाद्दोषोऽत आह । व्यदिद्युतदि-

SGDF
Sri Gangeshwari Digital Foundation

ति । इकारान्तस्येति । इशब्दो द्युतिप्रकृतिकेकारान्तलाक्षणिक इति भावः । वृत्त्यनुसारिण इत्यनेन सूचितामरुचिं सूचयन्नाह । अत्रेति । अत्र । उक्तद्वन्द्वगर्भद्वन्द्वे । भाष्यानुसारिणः । वक्ष्यमाणभाष्यानुसारिणः । नामधातुरिति । घञन्तात्स्वापशब्दात्तत्करोति तदाचष्ट इतिणिजन्तो नेत्यर्थः किन्तु णिजन्तः । अत एव भाष्ये स्वापिग्रहणं व्यवहितार्थमिति प्रयोजनमुक्त्वा सुष्वापयिषतीतिसम्प्रसारणघटितं रूपमुदाहृत्य शङ्कितमिहापि प्राप्नोति स्वापकमिच्छति स्वापकीयति स्वापकीयतेः सन् । सिष्वापकीयिषतीति । सिद्धन्तु णिग्रहणात् । णिग्रहणं कर्त्तव्यम् । व्यपेतार्थमित्यनेन व्यवहितेऽपि प्रवृत्तिर्दर्शिता सा यथा स्वप्धातोर्णिजन्तस्याभ्यासस्य भवति एवमधिकव्यवधानेऽपि प्राप्नोतीति पूर्वपक्षः । णिग्रहणमित्यनेन स्वप्धातुप्रकृतिकणिजन्तस्य यथा ग्रहणं भवति तथा व्याख्येयमित्युक्तम् । एतेन भाष्यप्रघट्टकेन स्वप्धातुविषये एव व्यवस्थोक्ता न तु इकारप्रश्लेषेण द्युतधातुप्रकृतिकणिजन्तस्य ग्रहणमित्युक्तन्तेन तादृशकल्पनायाम्मानाभाव इति लभ्यते । इदं सूत्रं लिट्यभ्यासस्योभयेषामिति सूत्रानन्तरम्पाठ्यम् षष्ठेऽध्याये । अस्मिन्सूत्रे सम्प्रसारणग्रहणन्न कार्यमित्यभिप्रायेण शङ्कते । न चेति । लाभानापत्तेरिति । अनुवर्त्तमानमभ्यासपदञ्चाङ्गाभ्यासनिमित्तप्रत्ययान्तयोरित्यर्थसम्पादकत्वेन चरितार्थमिति भावः।अभ्यासस्येत्यनुवृत्तनर्थमिति।प्रत्ययविशेषासम्बद्धस्याभ्यासस्येत्यस्यानुवृत्तनर्थमित्यर्थः । तत्र । समये । अङ्गाधिकारे पाठाकरणमात्रे एव चेच्छङ्का तत्राह । अशोकवनिकेति । ननु सम्प्रसारणग्रहणाकरणप्रयुक्तलाघवार्थन्तत्रैव पाठः कार्य इति वदाम इति चेत् । व्यथोऽलिटीत्यर्थन्तत्स्त्वात् । एवञ्चाङ्गाभ्यासयोरेकनिमित्तकत्वमनायासेन सिध्यति । ज्ञाने । अभ्यासत्वेन ज्ञाने । यद्यपि ज्ञाने विषयविधयाऽभ्यासो निदानन्तञ्च प्रत्ययो जनयतीति परम्परया प्रत्ययस्य प्रयोजकताऽस्त्येव । तथापि ज्ञानम्प्रत्यन्यथा सिद्धतया न कारणत्वमिति भावः । अत एव । अङ्गस्येत्य-

SGDF
Sri Gargeshwari Digital Foundation

स्य यत्र सम्बन्धस्तत्रैवोक्तप्रत्यासत्तिलाभो नान्यत्रेति स्वीकारादेव । भवत्येवेति । अत्रापि प्रत्यासत्त्याश्रयणे षत्वन्न स्यादिति भावः । षष्ठ्यर्थ इति । तेन लुङः स्थाने परस्मैपदमित्यर्थः सम्पद्यते । मिदेर्गुणः । प्रकृतसूत्रे ष्ठिवुक्लम्बिचमतोऽनुवर्त्तमानं शितीति पदमङ्गसंधारयप्रकृतिकसप्तम्यन्तत्तेनाङ्गाधिकारेण प्रत्ययाक्षेपाच्चेत्संज्ञकशकारादाविति लब्धम् । क्षुभ सञ्चलने । सञ्चलनम्प्रकृतिविपर्यासो मन्थनञ्च । पित्तादेः क्षोभः । अत्र पूर्वावस्थाविपर्यासः प्रतीयते । दध्नः क्षोभे नवनीतम्भवतीत्यत्र मन्थनम् । न वृद्भ्यश्चतुर्भ्यः । स्यन्दतेरूदित्त्वाद्विकल्पेऽन्येभ्यो नित्यमिटि प्राप्ते निषेधोऽयम् । गमेरिड़ित्यतोनुवर्त्तमानम्परस्मैपदपदन्तङानयोरभावं लक्षयति । तच्च सेऽसिचीत्यतोऽनुवर्त्तमानस्य स इत्यस्य वृद्भ्य इतिपञ्चमीबलादत्र षष्ठ्या विपरिणतस्य विशेषणमत एव वर्त्तिषीष्टेत्यत्र साद्यार्द्धधातुकस्य षीष्टशब्दस्य तङानयोर्योऽभावस्तत्परत्वाभावेपि नेट्प्रतिषेधः । साद्यार्द्धधातुकघटिते प्रयोगे तङानयोरभावसत्त्व एव निषेधस्य प्रवृत्तेरङ्गीकारात् । न चैवमपि विवर्त्तिषत इत्यत्र लङुत्पत्तेः प्राक् तयोरभावसत्त्वान्निषेधः स्यादिति वाच्यम् । परस्मैपदशब्दस्य तङानानिमित्ताभावलक्षकत्त्वात् । पूर्ववत्सन इत्यनेन यत्सनः प्रकृतिभूतो यो धातुस्तन्निष्ठस्यात्मनेपदनिमित्तस्यातिदेशात् । वृतादिभ्यो व्यवहितस्य साद्यार्द्धधातुकस्यानेनेट्प्रतिषेधः । अत एव विवर्त्तनीयिषतीत्यत्रेट्सिद्धिः । निमित्तत्वञ्च फलोपहितत्वरूपमत एव विवृत्सितेत्यत्र तृजन्ते निषेधस्य सिद्धिः । विवर्त्तिषत इत्यत्रेटो विवर्त्सितेत्यत्र निषेधस्य चेष्टत्वादेव भाष्ये वृतादीनामात्मनेपदेन समानपदस्यस्येड् भवतीति वक्तव्यमित्युक्तम् । न चैवं विवृत्सित्रीयत इत्यत्र क्यङन्ते पीट् प्रसङ्ग स्यादिति वाच्यम् । आत्मनेपदेनैव समानपदस्यस्येड् भवतीति तदर्थादत्र तु क्यङुत्पत्तेः प्राक् यः सुप्तेनापि समानपदस्यत्वम् । ऊदिल्लक्षणस्येटोऽन्तरङ्गत्वमुपपादयति । सकारादीत्यादिना । अभिमान इत्यभिधाने बीजन्तु शब्दशा-

SGDF
Sri Gargeshwari Digital Foundation

स्त्रे शब्दस्य प्राधान्यात्सप्तम्याद्यन्तशब्दोपात्तमेव निमित्तङ्गृह्यत इत्याद्यन्यत्र निरूपितम् । चतुर्ग्रहणाभावे कृपेरपि सङ्ग्रहापत्तिरिति शङ्कां वारयति । कृपिव्यावृत्तिस्त्विति । अत एव । घृतादिसमाहेरपीष्टत्वादेव । ननु यदि प्रतिषेधस्य पूर्वोक्तरीत्या बहिरङ्गत्वमिड्विधायकशास्त्रदृष्ट्या तदा प्रतिषेधवैयर्थ्यमत आह । न वृद्भ्य इतीति । ननु तासि चेतिसूत्रस्यापि स्वरतीतिसूत्रदृष्ट्या बहिरङ्गत्वम्पूर्वोक्तरीत्या स्यादिति तत्राप्यूदिल्लक्षणविकल्पापत्तिरत आह । कृपेस्त्विति । मूलोक्तरीत्या चतुर्ग्रहणसार्थक्यमुपपाद्य स्वसिद्धान्तमाह । वस्तुत इति । अत एव । उक्तरीत्या चतुर्ग्रहणवैयर्थ्यादेव । पूर्वोक्तम्बहिरङ्गत्वमभ्युपेत्य व्याख्यानम् । वस्तुतो बहिरङ्गत्वमेव नेत्याह । किञ्चेति । बहिर्भूतनिमित्तकस्येति । अन्तरङ्गशास्त्रनिमित्तबहिर्भूतनिमित्तकस्येत्यर्थः । परत्वेन । स्वरतीतिसूत्रापेक्षया न वृद्भ्य इतिसूत्रस्य परत्वेन । अपिना पूर्वोक्तस्य निषेधाश्चेति न्यायस्य समुच्चयः । स्पष्टञ्चेदमिति । वर्णैकदेशानां वर्णग्रहणेनाग्रहणेऽप्यन्तर्भूतानन्तर्भूतसाधारणजातिनिर्देशेनेष्टसिद्धिरिति भावः । सकृदुच्चरित इति न्यायाविरोधः सम्पूर्णसूत्रावृत्तिं विना न सम्भवतीत्याशयेनाह । सूत्रमितीति । नन्वयं कृप्कृकारोपधः पाठ्यः । लादेशविधायकञ्च सूत्रन्न पाठ्यम् । एतावतैव क्लृप्त इत्यादिरूपं सेत्स्यति । कल्पत इत्यादि तु गुणे लपरत्वे च कृते भविष्यति । न चैवं सति कृपणः कृपा इति न स्यादिति वाच्यम् । सूत्रारम्भपक्षेऽत्र लत्वाभावस्य बाहुलकेन सिद्धिवत् तथा पाठे लृकारस्य स्थाने बाहुलकादृकारादेशेनेष्टसिद्धेरिति चेन्न । अचीक्लृपदित्यस्यासिद्ध्यापत्तेः । धातोरृदुपधत्वे तु लत्वस्यासिद्धत्वाद् गुणे प्राप्ते उरृदित्यनेन ऋकारादेशे ततो लत्वे कृते सिध्यति सम्प्रति तु लृकारस्योरृदित्यनेन ऋकारादेशे गुणबाधके कृतेऽचीकृपदित्येव स्यात् । ऋकारेण सावर्ण्याल्लृकारोपस्थितावान्तरतम्याल्लृकारो भविष्यतीति तु वक्तुमशक्यम् । उरृदित्यनेनेररारामपवादभूतस्य ह्रस्वस्य ऋकारस्य

SGDF
Sri Gargeshwari Digital Foundation

विधानेनाचीकृतदित्यत्र दीर्घस्यापि ॠकारस्य स्थाने जायमानस्यापूर्वत्वे-न भाव्यमानेन सवर्णानाङ्ग्रहणन्नेतिनिषेधस्यावतारात्। अनेन निषे-धेन दीर्घॠकारो यथाऽचीकृतदित्यत्र न भवति तथाऽचीक्लृपदित्यत्र लृ-कारोऽपि न भविष्यति। किञ्च लृकारोपधपाठे लत्वविधायकसूत्रस्य करणे चलीक्लृप्यत इत्यपि न सिद्ध्यति। ऋकारेण लृकारग्रहणाद् रीगृदुपध-स्य चेत्यनेन रीगागमे रीशब्दस्यैव श्रवणापत्तेरिति । तासि च क्लृपः। अत्राप्यनुवर्त्तमानं गमेरिड्डितिसूत्रात्परस्मैपदपदन्तङानयोरभावलाक्षणि-कम्। तेन कृप्धातोः सन्नन्तात्तृचि चिकल्पिषिता चिक्लृप्सितेति सिध्य-ति। वृतेः। सम्पूर्त्तिबोधकाद्वृतुधातोः। तत्र घटादिषु। शबेव। विक-रणान्तराप्राप्तेः परिशेषाच्छबेव। मित्त्वन्न स्यादिति। यदि चौरादिकस्या-यमनुवादस्तदाऽनुकरणस्यानुवाद्यबोधकतया चौरादिकस्योपस्थितौ तत्र घटादयो मित इतिप्राप्तमपि मित्त्वन्नान्ये मित इत्यनेन निषिध्येतेत्यर्थः। नन्वनुवादसामर्थ्यान्न बाध इत्यत आह। अनुवादसामर्थ्येनेति। यस्या-निकेति। यकारस्य प्राप्ता या हलादिः शेष इत्यनेन बोधिता निवृत्तिस्त-स्या इत्यर्थः। विकारो भावस्वरूप एव न किन्त्वभावरूपोपीत्याह। भा-ष्ये उपन्यासादिति। न गणेरीत्वमपवादत्वाद्धलादिः शेषम्बाधते किन्तर्ह्यो-नवकाशत्वादित्यनेनोपन्यासादित्यर्थः। ज्ञापनेनेति। उभयेषां सम्प्रसा-रणमेव यदन्यत्प्राप्नोति तन्नेत्यर्थकल्पनयेत्यादिः । वैयर्थ्यापत्तेरिति। स्वविषये चारितार्थ्यविरहेण तस्य वैयर्थ्यापत्तिरिति भावः। न घ लिट्य-भ्यासस्योभयेषामिति सूत्रानन्तरं व्यथः। द्युतिस्वाप्योरिति पठनीयम्। लिटीति सम्प्रसारणमिति च न कार्यमिति वाच्यम्। द्युतिस्वाप्योरिति सूत्रे दत्तोत्तरत्वात्। असञ्जातविरोधेन। यद्यनुपधात्वेऽपि दीर्घविकल्पः स्वीक्रियते तदा मित्त्वस्य वैयर्थ्यशङ्कोद्भवेन विरोधो न सञ्जायत इति भावः। उपलक्षणमिति। तेन दक्षा स्त्री इति सिध्यतीति शेषः। हेड वे-ष्टने। उत्सृष्टोऽनुबन्धॠकारोऽस्य न त्वयमपूर्व एव। घटादिगणेऽनुवादा-

SGDF
Sri Gargeshwari Digital Foundation

नामपि पाठे भाष्यसम्मतिमाह । अत्र गण इत्यादिना । अत एव । अनुवादादेव । अपूर्वत्वे द्वयोरेवोपन्यासानुपपत्तिरिति भावः । तस्यापि । अर्थविशेषनियमस्यापि । एतदर्थमिति । अह्वीडीतिरूपसिद्ध्यर्थमित्यर्थः । ह्रस्वविकल्पे तु अहिडि । अहेडीति स्यादिति भावः । भाष्यसम्मतरीत्याह । परे त्विति । अत्र । घटादिषु । ध्वनितमितीति । तत्र ह्रस्वकालो ह्रस्वसंज्ञक इतिवाक्ये ग्रहणकशास्त्रप्रवृत्तौ दीर्घप्लुतयोः पूर्वसंज्ञाप्रसङ्ग इतिशङ्कायाकालग्रहणकरणरूपसमाधानोत्तरमथ वा ह्रस्वसंज्ञावचनसामर्थ्याद्दीर्घप्लुतयोः पूर्वसंज्ञा न भविष्यतीति समाहितम् । ह्रस्वसंज्ञावचनमित्यस्य ह्रस्वसंज्ञया वचनमित्यर्थस्तेन ह्रस्वविधानसामर्थ्यादिति च फलितम् । यदि ग्रहणकशास्त्रबलेन दीर्घप्लुतयोरपि ह्रस्वसंज्ञा स्यात्तदा ह्रस्वो नपुंसक इत्यादिना दीर्घस्यान्तरतम्याद्दीर्घ एव भविष्यतीति ह्रस्वसंज्ञाविधानस्य वैयर्थ्यमेव भविष्यतीति भावः । तत इदन्तर्हि प्रयोजनम् । एच इग्घ्रस्वादेश इति । यदि ह्रस्वसंज्ञाविधानन्न स्यात्तदा एच इग्घ्रस्वादेश इति वक्तुमशक्यमिति त्रिह्रस्वप्रदेशेषु इच इगिति वक्तव्यं स्यात् । ह्रस्वो नपुंसके प्रातिपदिकस्य । णौ चङ्युपधाया ह्रस्वः । ह्रस्वः । इत्येषु त्रिषु वाक्यभेदेन एचो ह्रस्व इग्रूप एव यथा स्यादित्येवमर्थंतत्तत्सूत्रानन्तरमेव इगिति वक्तव्यमिति भावः । एवङ्गौरवोद्भावनसमये त्रिह्रस्वप्रदेश इत्येवोक्तम् । यदि घटादिषु हेडधातोः पाठः प्रामाणिकः स्यात्तदा हिडयतीतिरूपसिद्ध्यर्थम्मितां ह्रस्व इत्यत्रापि एच इगिति वक्तव्यमिति त्रिग्रहणमसङ्गतं स्यादित्येतेन भाष्येण ध्वनितमित्यर्थः । हेडधातोर्घटादिपाठस्याभावेऽप्यशमीत्यत्र ह्रस्वसिद्ध्यर्थं दीर्घग्रहणस्यावश्यकत्वप्रदर्शने कृते न पदान्तसूत्रभाष्यग्रन्थे न्यूनत्वशङ्का भवति ताम्परिहरति । द्विर्वचनादीनीत्यादिना । मूलकारोक्तिङ् खण्डयति । किञ्चेति । ननु धातूनामनेकार्थत्वेनार्थविशेष इतिकथनं युक्तमेवात आह । किञ्चेति । तत्र । वेष्टनातिरिक्ते । वेष्टन इत्यस्य पाठस्य पाणिनीयत्वनिश्चयेऽर्थविशेष इत्युपपद्यते

SGDF
Sri Gangeshwari Digital Foundation

तत्रैव न मानमित्याह । किञ्चस्वेधेति । सर्वत्रार्थनिर्देशस्यापाणिनीय-
त्वं येषु कथितेष्वर्थेषु घटादीनाम्मित्त्वम्भवति तदधिकेष्वपि प्राप्नोति । धा-
तूनामनेकार्थत्वस्वीकारादत आह । अतिप्रसङ्ग इति । ज्वरादिभ्यः प्रागे-
व पाठे कर्त्तव्य इत्युक्तन्तदप्यसङ्गतङ्गौरवाभावादित्याह । किञ्च ज्वरादि-
भ्य इति । आहुः । भाष्यसिद्धार्थानुसारिण इति शेषः । नाट्यादिपदा-
र्थानाम्भेदमाह मूले । तत्रायं विवेक इत्यादिना । वाक्यार्थाभिनयः ।
हस्तादिचेष्टया वाक्यार्थसूचनम् । यथा एद्दहमेतत्थणियेत्यादिना काव्यप्र-
काशे स्पष्टमभिहितम् । पदार्थाभिनयस्तु लोके प्रसिद्ध एव । व्याख्याना-
दिति।लक्ष्यदर्शनमूलकव्याख्यानादित्यर्थः। लक्ष्यविसंवादादाह।पूर्वोत्तरेति।
नन्वेवन्धातुषु दीर्घ एव पठनीयो निपातनापेक्षया लाघवादत आह । धातु-
पाठ इति । अत्र । घटादिषु पाठवैयर्थ्यमिति।क्रथधातोरित्यादिः।तदभावे-
ऽपीति । चिण्णमुलोरितिसूत्रविहितदीर्घस्य वैकल्पिकतया तदभावेऽपीत्यर्थः।
बाधस्य । ह्रस्वत्व बाधस्य । तच्छास्त्रस्य । चिण्णमुलोरितिशास्त्रस्य । तदभावे
वृद्ध्यभावे । तत्करणम् । उदित्त्वकरणम् । ननु भौवादिकव्यावृत्त्यर्थमेवो-
दित्त्वमस्तु एवञ्चापूर्वत्वासिद्धिरत आह । विशिष्येति । अस्मिन्नेवार्थे
मित्त्वमितिनियमसत्त्वे उदित्त्वाभावे भ्वादिष्वर्थान्तरे पठितस्यार्थविशेषे
मित्त्वार्थोऽनुवाद इति वक्तुं शक्यन्तत्तु न तादृशनियमाभावादिति पूर्व-
त्र वनपाठसामर्थ्यादस्य भौवादिकानुवादत्त्वासम्भवे तानादिकानुवाद-
त्वं वाच्यमेवञ्चोदित्त्वं व्यर्थमेवेति भावः । अत एव । क्रियासामान्यार्थ-
त्वादेव । तत्र । पूर्वत्र । रूपव्यावृत्त्यर्थ इति । अर्थविशेषोपादा-
नस्यातानादिकत्वसूचकत्वात् । अन्यथा । पूर्वपाठस्यातानादिकत्व-
सूचकत्वन्न किन्तु वनतीतिरूपसिद्धिफलकत्वमितिस्वीकारे । तवे-
ति । तानादिकभिन्नत्वबोधनञ्चोदित्करणसामर्थ्यादिति वक्तुस्तवेत्यर्थः ।
। तद्वैयर्थ्यमिति । पूर्वपाठवैयर्थ्यमित्यर्थः । अत्र तु । भ्वादौ पूर्वत्र तु ।
अस्य । घटादिपठितस्य । ननु यदि तानादिकस्यैवानुवादोयन्तदाऽस्मा-
न्निष्ठायामिड्निषेधो यस्य विभाषेति स्यादित्यत आह । तानादिकेति ।

SGDF
Sri Gargeshwari Digital Foundation

दॄ विदारणे इतिक्र्यादेरयमनुवाद इत्युक्तम्मूले तत्र न्यूनतापूरणायाह । दिवादेरित्यपीति । भाष्यसम्मतत्वादिति । तत्र ह्यनेरभ्योऽपि दृश्यत इति सूत्रे दॄणातेर्ह्रस्वश्च द्वे च क्विप् चेति वक्तव्यम् । दद्रृत् । दॄणातेर्दीर्यतेर्वा इत्युक्तम् । ण्यन्तस्य दरयतीति मित्त्वे सत्युदाहृतम् । अण्यन्तस्य स्वयमाह । दृणातीत्यादि । क्र्यादेरयमनुवादइत्यस्य भयरूपेर्थे मित्त्वार्थ इत्यादिः । तदुक्तम्मूले भयादन्यत्रेति । इदमेव । धात्वन्तरत्वमेव । ये त्वयं ह्रस्वान्त इति वदन्ति तन्मतम्पाणिनीयसूत्रविरुद्धम् शृदृप्रामितिविकल्पेन ह्रस्वत्वं विहितम् । यद्ययं ह्रस्वान्तोऽपि स्यात्तदा धातुद्वयेन दद्रतुः ददरतुरितिरूपद्वयं सिद्धमेवेति विकल्पेन ह्रस्वत्वविधानं व्यर्थं स्यात् । विरोधे । द्वयोः परिभाषयोर्विरोधे । अनित्यत्वादिति । लुग्विकरणपरिभाषायाः साहचर्यपरिभाषामूलकत्वात्साहचर्यपरिभाषायाश्च क्त्वोऽर्थग्रहणेनानित्यत्वज्ञापनाल्लुग्विकरणपरिभाषाऽप्यनित्या । स्वरतिसूतिसूयतीतिसूत्रे सूङ इति वक्तव्ये सूतिसूयत्योः पृथङ्निर्देशस्य नास्यां ज्ञापकत्वम् । स्वरतिसाहचर्यादलुग्विकरणस्यैव ग्रहणे प्राप्ते पृथङ्निर्देशसार्थक्यात् । तस्माद्यस्य विभाषेतिसूत्रभाष्ये विदित इति प्रयोगे विभाषा गमहनविदविशामिति विकल्पसत्त्वान्निषेधमाशङ्क्य यदुपाधेर्विभाषा तदुपाधेः प्रतिषेध इति समाहितम् । विकल्पेनेड्विधायकसूत्रे च विशिसाहचर्याच्छविकरणस्य विभाषा लुग्विकरणश्चायमिति चोक्तन्तेनैषा ध्वनतेति । लक्षणप्रतिपदोक्तपरिभाषायास्तु भुवश्च महाव्याहृतेरिति सूत्रे महाव्याहृतिग्रहणेनानित्यत्वङ्कल्प्यते । तद्धि भूशब्दप्रकृतिजसन्तस्य भुव इत्यस्य रेफविकल्पाभावार्थमिति । विज्ञापना भर्तृषु सिद्धिमेतीत्यस्य निशामनं चाक्षुषज्ञानमिति माधवमते चाक्षुषज्ञानान्यज्ञानार्थकतयोपपत्तिसम्भवात्तदाह । माधवान्यमत इति।ज्ञाय इति।तज्ज्ञापयत्याचार्य इति भाष्यप्रयोगसंवादात्।ज्ञीप्समान इति तु ज्ञा नियोग इति चौरादिकस्य रूपमिति बोध्यम्।एवमन्यत्रापीति । जिह्वोन्मथने लड़िरित्यत्राप्येवमेव । तया ज्ञापयती-

SGDF
Sri Gargeshwari Digital Foundation

ति।जिह्वया तृषादि ज्ञापयतीत्यर्थः।लङ्घयति शत्रुमितीत्यत्रोन्मथनञ्चित्तविक्षे-
पानुकूलव्यापारस्तदाह । गालयतीति । अस्यैव। दैवादिकस्यैव।ध्वनशब्दे।
शब्दशब्दोऽत्र ध्वन्यात्मकशब्दस्यैव बोधकः । स्वन अवतंसने । अवतंसन-
म्भूषणन्तस्य द्रव्यत्वादवतंसनशब्दोऽत्र तदीयशब्दानुकूलव्यापारे द्रष्टव्यः।
मूले प्राप्तविभाषेयमिति । ज्वलधातोः पूर्वत्र पाठान्नमधातोरमन्तत्वा-
त्प्राप्तविभाषेत्यर्थः । टिलोपे । घञो लोपे । कथं सङ्क्रामयतीत्यत्र घञा
सिद्धिर्न भवति नोदात्तोपदेशस्येतिनिषेधादित्यभिप्रायेण शङ्का द्रष्टव्या ।
व्यवस्थितविभाषात्वे न साधकमित्याह । भाष्ये त्विति । मूलोक्तप्रयो-
गाणान्तर्हि का गतिरिति चेत् । बाहुलकत्वाद्दीर्घ इति तेषु बोध्यम् ।
यमोऽपरिवेषणे । प्रतियोगिबोधकपदं व्याचष्टे । परिवेषणमिति । टेरि-
त्यस्याप्राप्ताविति।विन्मतोर्लुकष्टिलोपापवादत्वात्।फणेः प्रागेव वृत्कर-
णमित्यत्र साधकमाह । य इत्यादि । राजृ दीप्तौ स्वरितेत् । सुधाकर
इत्युक्तिबीजन्दर्शयति। अस्यैवमर्थेति । उद्गरणमित्येवैतन्मते उद्गरणमन्तर-
र्गतस्य मुखेन निस्सारणम्। असाधव एवेति । वेमुश्च केचिद्रुधिरमिति त्वा-
र्षम् । वमेरुपदेशे यादित्वान्न निषेध इति केचिद्वदन्ति स्यसिजितिसूत्रा-
दुपदेशे इत्यस्य सम्बन्धेनोपदेशे यो वकारादिस्तस्य निषेध इति च स्वी-
कुर्वन्ति तेषाम्बहुयोगव्यवहितस्योपदेशपदस्य सम्बन्धे क्लेशः । ननु सहि-
वहोरितिसूत्रदृष्ट्या ष्टुत्वस्यासिद्धत्वात्कथन्निमित्तत्वं ढलोपे सतीत्यनेनो-
क्तमत आह । बहुव्रीहिपक्ष इति । तत्र ढलोप इति विषयसप्तमीति
पक्षे । तत्र कृते । क्तप्रत्यये कृते । ऊढः । ऊढवानित्यवावर्णस्येत्यस्य प्र-
त्युदाहरणन्तच्चान्यथा सिद्धमिति भावः । तदनुकूलः । विशीर्णत्वानुकू-
लः । तज्जन्येति । शातनपदवाच्यो यो व्यापारस्तज्जन्यविशरणमात्रमर्थ
इति भावः । शदेः शितः। अत्र शिच्छब्दस्य शिद्धाविनि लक्षणायाम्मानमा-
ह। शदेरिति । अत्र वृदिति क्वचिन्मूले पाठस्तदभिप्रायेण प्रतीकधा-
रणं वृदितीति । ननु यथेरित्यस्येतसंज्ञायामित्संज्ञकंन तेन समुदायेने-

SGDF
Sri Gargeshwari Digital Foundation

रित्त्वमेव नेदित्त्वमिति तथा स्वरितत्वमपि न स्यादत आह । रुन्ध इ-
त्यादाविति । इर इत्संज्ञा वक्तव्येत्यस्य प्रत्याख्यानपक्षे आह । प्रत्येक-
मिति । तद्विधानादिति । न दृश इतिसूत्रेणाप्ययमर्थो ज्ञाप्यते । अन्ते-
दित इति व्याख्यानाभावे दृशिधातोर्नुमागमे कृते इगुपधत्वाभावेन क्त्व-
प्राप्तिरेव नेति तद्वैयर्थ्यं स्पष्टमेव । वादित्रग्रहणेतिमूलस्य वादना-
र्थं यत्तस्य ग्रहणन्तत्रेत्यर्थः । ये विभाषा स्यादिति । ये
विभाषेत्यत्र ये इति विषयसप्तमी । तेन जायते स्वयमेवेत्यादावचः कर्तृ-
यकीति स्वरसिद्धिः । तत्र हि स्तीर्यत इतिप्रयोगसिद्ध्यर्थन्तास्यनुदात्ते-
दित्यत उपदेशपदं सम्बध्यते।न च यादिप्रत्ययविवक्षायाम्वेदस्य प्रवृत्तिस्त-
दा प्रत्यये परतो विधीयमानाङ्गसंज्ञा नास्तीत्यङ्गाधिकारस्य बाधः स्यादिति
वाच्यम्। अङ्गत्वमस्य भविष्यतीति बुद्धिविषयेऽङ्गस्येत्यस्य लक्षणाया एता-
दृशे विषये स्वीकारात्। स्पश बाधनस्पर्शनयोः। पस्पशेतिरूपमस्यैव यङ-
न्तादच्प्रत्यये संज्ञापूर्वकविधेरनित्यत्वात्पृषोदरादित्वाद्वाभ्यासदीर्घाभावे
साधु।सेयमुभयतःस्पाशारज्जुरित्यप्यस्यैव भिदादित्वादङ्प्रत्यये बोध्यम् ।
ऊदुपधाया गोहः।अत्रोपधापदस्य निष्फलत्वन्दर्शयति।उपधाया इति। वि-
षयार्थमिति । यत्र गोहरूपम् सम्भाव्यते तत्रादेश इति बोधनायेत्यर्थः।अत
एव। अलोन्त्यपरिभाषयाऽन्तस्य लोपादेव । ऋद्धनोःस्ये । प्रतिप्रसवविधिः ।
तदाहैकाच इतीति। रिङ्शय । ननु रिङादेशापेक्षया लाघवादृवर्णान्ता-
नामिगागमविधानेपीष्टसिद्धिर्भविष्यतीत्यत आह । इगागमेनेति । ह्र-
स्वादङ्गात् । रात्सस्येत्यतस्सस्येति झलोझलीत्यतो झलीत्यनुवर्त्तते । अत्र
सस्येतिपदं सिचो बोधकन्तदाह । अङ्गग्रहणमिति । परेति । इट इटी-
त्येतत् । परसाहचर्याश्रयणफलन्द्विस्तमामिति । पौर्वापर्याभावादिति ।
एवङ्कथनसङ्गादित्यस्य सत्त्वेप्यावश्यकमन्यथागमसन्निधानेप्यागमिनः सि-
चूत्ववत्प्रत्ययत्वमपि स्यादिति अलाविष्टामित्यादाविडन्तस्याङ्गसंज्ञासूत्रे
तदादिग्रहणादङ्गत्वाद्दोषः स्यात् । ढौकितेत्यादावतिप्रसङ्गं वारय-

SGDF
Sri Gargeshwari Digital Foundation

ति । कर्मव्युत्पन्न इति । ननु डोइत्युपदेशमादाय गोभ्यामित्यादौ दोषः स्यादत आह । उणादीनामिति । अत्रोपदिश्यमानस्येतिव्याख्यानादेव धातोरिति लब्धन्तदाह । तादृशश्चेति । धातोरेवेति । एतेन लिटि धातोरित्यतो । धातोरिति । सम्बध्यत इति वादिमतन्निरस्तम् । प्रत्युत तदनुवृत्तौ दोषोपीत्याह । धातोरित्यनुवृत्ताविति । भाष्ये उक्तत्वेनेति । तत्र हि धातोरिति किम् । लूञ् लविता पूञ् पविता इत्युक्तम् । ननु धातोरित्यस्यात्र सूत्रेऽसम्बन्धे विशेष्यासन्निधानात्कथन्तदन्तविधिरत आह । धातोरित्येतदिति । उपदेशे यदेजन्तमिति । एवङ्कथनेन शब्दस्वरूपमितिपदमध्याहृत्य तदन्तविधिरुपपाद्य इति ध्वनितमित्यर्थः । एवञ्चेति । धातोरित्यस्य पूर्वोक्तरीत्याऽसम्बन्धे गोभ्यामित्यादावदोषायोपदेशपदस्य चारितार्थ्यं चेत्यर्थः । चिन्त्येति । तदनित्यताज्ञापकन्तु भुवश्च महाव्याहृतेरिति सूत्रे महाव्याहृतिग्रहणमित्यवोचाम । अशितीत्यत्र बहुव्रीहेर्नञ्समास इति भ्रमं वारयति । कर्मधारयादिति । पूर्वोक्तेरेति । विभाषा परेः । न ल्यो लिटीति । अन्यासम्भवमुपपादयति । जगे इत्यादाविति । तदवयवत्वादिति । एवञ्चार्द्धधातुकत्वारोपोऽत्र बोध्यः । सूचनाच्चेति । टित आत्मनेपदानामितिसूत्रस्यस्य टित एत्वे आत्मनेपदेष्वानप्रतिषेध इतिवार्त्तिकस्य प्रकृतानामात्मनेपदानामेत्त्वमितितिबाद्यनुवृत्त्या प्रत्याख्यानोत्तरन्तस्मिन्नेवार्थे ज्ञापकमप्युक्तम् । आनेमुक् ज्ञापकं त्वे त्वे टिन्तङामिशिसीरिच इत्यादिना । अत्र कैयटः । यद्येत्वमानस्य स्यात् तदा आनयिमुगिति वक्तव्यं स्यादित्यर्थः । टित्तङामिति । टितः स्थाने ये तङस्तेषामेत्वन्न त्वानस्य । अध्येतेत्यादौ दोषाभावायाह । इशिसीत्यादि । एश् इरेच् थासः से इत्यादौ लाघवाय इकारमेवोच्चारयेदित्यर्थः । तङादेशानामिति । तङ्रूपादेशानामित्यर्थः । इदञ्च ज्ञापकमेकदेशयुक्तिः । शानन् चानश् सम्बन्ध्यानेमुक्सिद्धये तथा निर्द्देशस्यावश्यकत्वादिति । अविशेष इत्यस्य व्यवस्थापकपरिभाषया विशेषस्यैव ग्रहणमिति नियमो नेत्यर्थः । तत्त्वेनैव । अ-

SGDF
Sri Gurgeshudhi Digital Foundation

नर्थकत्वेनैव। न दोषः। नाप्याप्तिः। दाप्साहचर्यादिति। पूर्वोक्तरीत्या दाग्रहणे-न लाक्षणिकस्यापि ग्रहणे सिद्धे तत्साहचर्याद्धेटो लाक्षणिकस्यापि ग्रहणमित्यर्थः। अत एव। धेटोपि ग्रहणादेव। यमरमनम। ननु यमरमधातोः सग्विधानं व्यर्थम् सिचैव सिद्धेरत आह। अनयोरिति। वृद्धेरिति। अतो हलादेरितिसूत्रविहितवृद्धेः। वान्यस्य संयोगादेः। दीङो युडची-त्यतः क्ङितीति एर्लिङीत्यतो लिङीति वर्त्तते। परत्वादिति। घुमास्थे-तीत्वं स्थितमितयत्र वैकल्पिकमेत्वङ् ग्लाम्लाधातौ चरितार्थम्। क्ङिती-त्यनुवर्त्तत इति। दीङो युडचीति सूत्रे समासेन निर्देशादुभयोरनुवृत्ति-रुक्ता। अयश्चेति। अत्र चकारो वाक्यालंकारे। पिबादेश इत्यर्थः। ष्ठा गतिनिवृत्तौ। धात्वादेः षःसः। नन्वकृतव्यूहपरिभाषाया निमित्तापाये नैमित्तिकस्याप्यपाय इत्यस्यापि वा स्वसिद्धान्तविरुद्धतया धात्वादेरिति-सत्वेपि पूर्वकालप्रवृत्तष्टुत्वनिष्पन्नस्य ठकारस्य स्थितिः स्यादेवेति तच्छ्र-वणापत्तिरत आह। अत्र सपादेति। एवञ्च यद्यपि धातुस्वरुपबोधनाय ष्ठा इत्युपदेशस्तथापि सपादसप्ताध्यायीस्थस्य सत्वादिकार्यस्य प्रवृत्ति-योग्यतासत्त्वात् ष्टुना ष्टुरित्यस्याप्रवृत्तिरिति थस्यैव श्रवणम्भवति। षोपदेशफलं प्रतिप्रयोगे प्रतिष्ठाता प्रतिष्ठेत्यादौ षत्वस्य सिद्धिः। नन्व-यन्धातुर्यदि गतिनिवृत्तिवाचकस्तदा प्रतिष्ठतीत्यादौ कथं गतिप्रतीतिर-त आह। प्रतिष्ठतीत्यादाविति। ध्वनितमिति। एकस्यापि शब्दस्यान्यार्थे प्रक्रान्तस्यान्यसम्बन्धविवक्षायामन्यार्थत्वम्भवतीत्यर्थे दृष्टान्ततया तत्र ह्ये-वमुक्तम्। तद्यथा कश्चित्कञ्चित्पृच्छति क्व देवदत्त इति स तस्मा आचष्टे असौ वृक्षे। कतरस्मिन्। यस्तिष्ठति। वृक्षोऽधिकरणम्भूत्वा कर्त्ता सम्पद्यते इ-ति। तत्र कैयटः। यदाऽन्ये निपतिता वृक्षाएकस्तूर्द्ध्वस्तदा विशिष्टवृक्षा-धिकरणत्वेन देवदत्तः प्रतिपाद्यते। एतेनोर्ध्वदेशसंयोगोप्यर्थ इति ध्व-नितमित्यर्थः। ऋतश्च संयोगादेर्गुणः। दयतेरित्यतो लिटीति वर्त्तते। स्पष्टार्थमिति। दीर्घान्तेऽपि प्रवृत्तेः। अत्राकारविधानेन सिद्धे गुणग्रहणं

SGDF
Sri Gurgeshwari Digital Foundation

चिन्त्यप्रयोजनमिति कश्चित्तन्मतन्दूषयति। अत्रैव सिद्ध इत्यादिना। निषेधाङ्गीकारादिति। तेन तितीर्षोनित्यस्य सिद्धिः। ननु यदि गुणोत्तरं वृद्धिस्तदा जाग्र इति सूत्रेण वृद्धिविषये गुणविधानवैयर्थ्यमत आह। जाग्रो वीतीति। अत एव। ज्ञापकस्य विशेषापेक्षत्वादेव। अयम्। गकारः। ननु स्नुप्रत्ययःकिदेवास्त्वित्यत आह। स्यास्नुसिद्धय इति। कित्त्वेत्विस्त्वापत्तिः। पुरस्तादिति मूले। अत एव सनीवन्तेतिसूत्रे स्वृग्रहश्चरितार्थम्। ननु निषेधो यदि बलवांस्तदाऽस्यापि बाधकः स्यादत आह। क्रादिनियमादिति। एतस्य निषेधबाधकत्वं स्पष्टमेव। अन्यथेति। ऋकारस्य प्रश्लेषाभाव इत्यर्थः। इडत्यर्ति। ननु गमेरिडितिसूत्रादिड्ग्रहणानुवृत्त्यैव सिद्धे प्रकृतसूत्रे इड्ग्रहणवैयर्थ्यमत आह। इड्ग्रहणं स्पष्टार्थमिति। न च विभाषा सृजीतिसूत्रे विभाषापदासम्बन्धायेड्ग्रहणमस्त्विति शङ्क्यम्। अर्तिव्यत्ययोर्विषये भारद्वाजनियमेन विकल्पस्य सिद्धौ पुनरत्रैतयोरुपादानसामर्थ्याद्विकल्पस्य निवृत्तेः। न च न वृद्ध्र इत्यतो नग्रहणाननुवृत्त्यर्थमस्तु। ऋग्रहणसामर्थ्यात्तन्निवृत्तेरिति भावः। उभयोः। भ्वादिजुहोत्यादिपठितऋधात्वोः। व्याख्यानादिति। अभौवादिकात्तिसाहचर्यभौवादिकव्ययतिसाहचर्यमूलकव्याख्यानादित्यर्थः। श्रुवः शृ च। चिन्त्यमिति। तत्र पाठे हि स्वादिभ्य इतिसूत्रेणैव श्नुप्रत्यये सिद्धे पुनरनेन वाक्यभेदेनश्नुप्रत्ययविधानन्नकार्यमिति लाघवम्। यदि स्वादिभ्य इतिसूत्रेण श्नुप्रत्ययस्तदा श्तिपा शपानुबन्धेनेतिनिषेधाद्यङ्लुकि न स्यादिति के चित्तन्मतन्दूषयितुमाह। यत्त्विति। पक्षान्तरे। आदेशाभावपक्षे। साहचर्येण। स्वादिभ्य इतिसूत्रसाहचर्येण अदन्दौ पाठाच्चेति। तथा च तेन वचनेन निषेधादिति न वाच्यमस्य विशिष्यादादित्वबोधनेन स्वादिभ्य इत्यस्य प्राप्तेरेवाभावादिति भावः। के चित्तु गणकार्यस्यानित्यत्वबोधनायास्य स्वादावपाठ इत्याहुः। तत्प्रत्याख्याने। असिद्धवदत्राभादित्यस्य प्रत्याख्याने। ननु प्रत्याख्यानस्योत्तरकालिकत्वेन तदभिप्राये-

SGDF
Sri Gargeshwari Digital Foundation

ण पूर्वस्पाणिनिना हुश्नु ग्रहणङ्कृतमिति कथं वक्तुं शक्यमत आह। स्पष्टा चेयमिति । तदनित्यत्वेति । आभीयानित्यत्वेत्यर्थः । यत्तु योयुवतीत्यत्र यङ्लुकि यणभावार्थं हुश्नु ग्रहणम्भाष्यसंवादादिति मतन्तद्दूषयति । भाष्ये यङ्लुक इति । अत एव । पूर्वभाष्यस्यैकदेशियुक्तित्वादेव । यदि सा सिद्धान्तयुक्तिः स्यात्तदा भाषायामपि यङ्लुग्भवतीत्यस्योवर्णान्तधातोरेव प्रयोग उदाहर्तव्य इत्याशयः। तत्र ।उवर्णान्ते । व्याख्यानादिति। स्थानिनो ङित्कार्यलाभे सिद्धे पुनर्गाेङित्यत्र ङकारोच्चारणङ् गाङ्ग्रहणेऽस्यैव ग्रहणार्थमित्येवङ्कल्पनमूलकव्याख्यानादित्यर्थः। भ्वादौ पाठपक्षेऽतिप्रसङ्गः स्यादित्यभिमानेन शङ्कते । न चेति । स्थान्येकत्वे । अङ्गवार्णकार्ययोर्यत्राङ्गात्मकमेकं कार्यि तत्र तस्याः परिभाषायाः प्रवृत्तेः । इष्यत इत्युक्त्वा वृत्तिरितिकथनेन वृत्तिप्रामाण्यादेव बाधकल्पनेति भ्रान्तिः स्यादित्येतस्यानुत्पत्तये आह । इदमुपलक्षणमिति । अयम्भावः । दयतेर्लिटि परे दिग्यादेशद्वित्वयोः प्राप्तौ येन नाप्राप्तिन्यायेन दिग्यादेशे पुनर्बाध्यस्य द्वित्वस्याप्रवृत्तिः । यासुड्विषये सीयुट इवेति। न चैवमस्तेर्भू रित्यनेनापि लिङ्विषयकेन द्वित्वबाधा स्यादिति वाच्यम्।तत्रार्द्धधातुक इत्यस्य विषयसप्तमीत्वात्। प्रकृते लिटीति परसप्तम्येव लक्ष्यानुसारादिति। स्याघ्वोरिच्।न चाधासीदित्यत्रातिप्रसङ्गः।स्यासाहचर्येण घोः परस्मैपदे परतोऽप्रवृत्तेः।लिङ्सिचावात्मनेपदेष्विति सूत्रादात्मनेपदेष्वित्यस्यानुवृत्तत्या दोषाभावाभावाच्च।तपरत्वमस्य मुखसुखार्थम् । न तु सवर्णस्याग्रहणाय । भाष्यमानत्वात् । मान्वध । आभ्यासस्येतिछेदस्तदाह । अभ्यासविकार इति । आकारप्रश्लेषवादिमतमुपन्यस्य सिद्धान्तमाह । वस्तुत इति । यद्यपि गुपादयः सामान्यत एव सूत्रे निर्दिष्टास्तथापि सन्नन्तस्य जुगुप्साविरामप्रमादार्थानामित्यत्रार्थविशेषे प्रयोगदर्शनेन क्षेत्रियच्परक्षेत्रे चिकित्स्य इतिसौत्रप्रयोगेण विचिकित्सा तु संशय इतिकोशबलेन वृत्त्यादिप्रामाण्येन विशेषार्थकेभ्य एव गुपादिभ्यः स्वार्थे सन् भवतीत्याशयेन

SGDF
Sri Gangeshwari Digital Foundation

मूले गुपेरित्यादिकथनम् । मीमांसत इतिशब्दाज्जिज्ञासा न प्रतीयत इत्याशयेनाह । तत्प्रयोज्य इति । अत एव । सन्यङोरित्यस्य षष्ठीत्वादेव । अत एव । उक्त एवार्थः । न स्यादिति । इदमुपलक्षणम् प्रतीषिषतीत्याद्यपि न स्यादित्यपि बोध्यम् । कैयट इति । अत एव मूले भ्वादौ परस्मैपदिषु पठितः । एवमुक्तमिति । गुपिप्रभृतयः किद्भिन्ना इत्यादुक्तम् । धातुपाठे तथा पाठः सम्प्रति दृश्यत इत्यपि बोध्यम् । वृत्त्याद्यनुसारिमूलोक्तं व्याख्याय भाष्यानुसारिमतमाह । परे त्विति । अत एव । अननुबन्धकत्वादेव । अन्यथा । अर्थान्तरेऽपि सानुबन्धकत्वे । सनः । नित्यसनः । तस्य । अनुबन्धस्य । चुरादय इतीति । किमत्र प्रमाणमिति चेत् । गुपिज्मानां चुरादिषु पाठदर्शनाद् वृत्त्यादिप्रामाण्येन बहुलग्रहणाच्च तथात्वमिति । अत एवाह । एतच्च वृत्त्याद्यनुरोधेनेति । यङ्णिलोपयोरिति । णिचि सति धातोरनेकाच्त्वाद्यङोऽप्राप्तेर्यङो णेः सत्त्वात्तिलोपस्य च निपात्यता स्यादित्यर्थः । इति परास्तमिति । गोपनादिष्वर्थेषु सनोऽभावेऽप्यात्मनेपदं यथा स्यादित्येवमर्थन्तथा पाठस्यावश्यकत्वादिति भावः । स्वीयकल्पनायाम्भाष्यग्रन्थाविरोधायाह । गुपादिष्विति । वेः स्कन्देरनिष्ठायाम् । दन्त्याजन्तसादित्वाभावान्नायं षोपदेश इति षत्वाप्राप्तेरप्राप्तविभाषेयम् । अत्र । कृत्येवेतिनियमे । कृतयेवेतिभवदुक्तार्थे विपूर्वस्यास्य तिङन्तस्यापि प्रयोगे पर्युदासपक्षे षत्वाभावस्य प्रसज्य प्रतिषेधे षत्वस्य च प्राप्तेः फलभेदस्य सत्त्वादत्रापि तथा विचारस्यावश्यकता स्यादिति भावः । मतान्तरे त्वितिमूले तुनाऽरुचिर्बोधिता । तद्बीजन्तु लक्ष्यानुरोधेनान्यतरपक्षानुसरणस्यैवावश्यकतया प्रकृते उभयानुसरणवैयर्थ्यमिति । नन्वनयोर्मतयोः कस्याश्रयणमिहोचितमिति चेत् । अभिषिषेणयिषति । अभिषुणु इतिभाष्यप्रयोगदर्शनेनाद्यपक्ष एवेह ग्रहीतुमुचित इति गृहाण । इदन्त्रिपाद्यामबहिरङ्गपरिभाषाप्रवृत्तिमभ्युपेत्य । स्वमतमाह । इदमेवेति । मण्ड कप्लुत्येति । शसाक्षष्टाना-

SGDF
Sri Gangeshwari Digital Foundation

मित्यत्रासम्बन्धादित्यादिः । अचीति वर्त्तत इति । क्सस्याचीत्यतोनु-
वर्त्तत इत्यर्थः । एवञ्च । भाष्यप्रामाण्यादज्ग्रहणसम्बन्धेन व्याख्यानस्य
प्रामाणिकत्वे चेत्यर्थः । उदित्पाठो ह्यत्रेष्यतीस्मात्योर्व्यावृत्त्यर्थौ वाच्य-
स्तयोर्व्यावृत्तिस्त्वेवमेव जातेति तथा पाठो व्यर्थ एवेति भावः । गमी-
त्यत्रोपधालोपशङ्कायामाह । इका निर्देशेऽपीति । अत एव । तादृशार्थ-
लाक्षणिकत्वादेव । पृषोदरादित्वादनुनासिकलोपकथनमपि न सर्वत्र कि-
न्त्वर्थविशेषविवक्षायामेवेत्याह । स चेति । सूत्रोपात्तयोरिति । उपस्थि-
तत्वादिति शेषः । वचिस्वपियजादीनाम् । वचिरदादिश्चुरादिश्च । वचि-
स्वपियजेत्येषां त्रयाणान्द्वन्द्वोत्तरमादिशब्देन समासे आदिशब्दस्य वचि-
नापि सम्बन्धः स्यादत आह । आदिशब्द इति । स्वपिग्रहणादिति । व-
चिना सम्बन्धे स्वपेर्वच्यादित्वेनैव ग्रहणे सिद्धे स्वपेः पृथगुपादानं व्य-
र्थं स्यादिति भावः । न च स्वपिना सम्बन्धोऽस्तु तथा सति श्वसेर्ग्रहण-
म्भविष्यतीति वाच्यम् । त्रयाणान्द्वन्द्वस्यादिशब्देन समासेन द्वन्द्वान्ते
श्रूयमाणमितिन्यायेन सहविवक्षामूलकेन सर्वत्रैव सम्बन्ध उचितो न त्वे-
कत्र तत्परित्यागोऽन्यत्र तत्सम्बन्धः। तथा स्वीकारे द्वन्द्वस्यैवासाधुता स्या-
त् । ननु चुरादिपठितवच्यादिग्रहणार्थं वचिनापि सम्बन्धोऽस्त्वित्यत आ-
ह । चुरादाविति । अभावाच्चेति । वचधातोराधृषीयत्वास्मिजभावे कि-
ति परे सम्प्रसारणयोग्यता सत्त्वेऽपि तदन्येषां यण्घटितानामभावादित्य-
र्थः । न च वरादयस्तत्र सन्त्येवेति वाच्यम् । तेषामदन्तत्वादाधृषीय-
त्वाभावाच्च सम्प्रसारणयोग्यत्वाभाव इति भावः । अत एव । बीजसन्ता-
नपदस्यैतादृशार्थकत्वादेव । द्वयमपीति । शास्त्वनुशिष्टौ । आङः शासु
इच्छायामित्येतद्द्वयमपीत्यर्थः । अभिमान इत्येतत्कथनबीजन्दर्शयति ।
परे त्विति । ननु सम्प्रसारणयोग्यस्य द्वितयस्य यत्र सन्त्वन्तत्र परस्य य-
णः पूर्वं सम्प्रसारणेन भाव्यमित्युवायेत्यनुपपन्नमत आह । लिटीति ।
ग्रहिज्यावयिव्यधि । परस्मैपदिन इति । परस्मैपदयोग्यस्य । तेन वया-

SGDF
Sri Gangeshwari Digital Foundation

देशस्य स्थानिवद्भावेन ञिस्वादात्मनेपदपक्षे ऊये ऊवे इत्यत्र सम्प्रसारणसिद्धिः । अत्रेदमवधेयम्। ग्रहिज्येतिसूत्रे वयिग्रहणन्न कार्यम् । स्थानिवद्भावेनास्य वेञ्त्वाद्वचिस्वपीत्यैव सिद्धेः । न च वेञ इतिनिषेधे प्राप्ते प्रतिप्रसवविधिरयमस्त्विति वाच्यम् । लिटि वयो य इतिनिषेधारम्भसामर्थ्येन वेञ इतिनिषेधस्यात्राप्रवृत्तेः । न च लिटि वय इति सूत्रं वयेर्यस्यैव सम्प्रसारणन्नेतिनियमार्थमस्त्विति वाच्यम् । एवमपि वयादेशस्य यो यकारस्तस्य नियमेन सम्प्रसारणाभावे वकारस्य परिशेषाद्वचिस्वपीत्यनेन सिद्धे ग्रहिज्येतिसूत्रे वयिग्रहणवैयर्थ्यस्य तदवस्थत्वात् । वेञ इत्यत्र कितीत्यनुवृत्तया कित्येव निषेध इति तु न वाच्यम् । अविशेषेण लिटि प्रतिषेधस्येष्टत्वात् । अत एव ववौ वविथेत्यस्य सिद्धिः । तदुक्तम्भाष्ये । अविशेषेण प्रतिषेधः । निवृत्तन्तत्र कितीति । आतश्चाविशेषेण । वेञोऽपि हि पित्सु वचनेष्वभ्यासस्य सम्प्रसारणन्नेष्यत इति । वश्चास्यान्यतरस्याङ्किति । अत्रास्येत्यनेन वयिः परामृश्यते । य इति चानुवर्त्तते । नन्वनेन वकारे कृते सम्प्रसारणापत्तिः । वेञ इति निषेधस्तु न भविष्यति । लिटि वयो य इतिसूत्रारम्भसामर्थ्यादत आह । वकारे कृत इति। अत्र चकारेण सम्प्रसारणनिषेधस्यापि विधानमित्यपि बोध्यम् । अत्रेदमवधेयम् । भाष्यकृता प्रकृतसूत्रस्थं वश्चास्येति प्रत्याख्यातम् । वश्चास्य ग्रहणं शक्यमकर्त्तुमिति । अन्यतरस्याङ्किति वेञ इत्येकमेवास्तु नेतिसम्प्रसारणमिति चानुवर्त्तनीयम् । वेञः किति सम्प्रसारणङ्किति वा न स्यात् । निषेधविकल्पे विधिविकल्पपर्यवसानमिति वेञः सम्प्रसारणस्य वचिस्वपीतिप्राप्तस्य पक्षेऽभावार्थमेतत्सूत्रमिति फलितम् । ऊवतुः । ऊवुरित्यस्य सिद्धिस्तु द्वित्वापेक्षया परत्वात्सम्प्रसारणे पूर्वरूपे च कृते ततो द्वित्वे वार्णादाङ्गमितिन्यायेन सवर्णदीर्घम्बाधित्वोवङि ततः सवर्णदीर्घे भविष्यति । सम्प्रसारणाभावे तु ववतुरिति भविष्यति । न च वेञ इत्यस्य निषेधसूत्रस्याभावे ववौ वविथेत्यत्र लिट्यभ्यासस्येतिसम्प्रसा-

SGDF
Sri Gargeshwari Digital Foundation

रणापत्तिरिति वाच्यम्। इयपि चेतिचकारेण लिटीत्यस्यानुकर्षणात्सर्वेष्टसिद्धिर्भविष्यतीति। उपदेश इति। स्यान्युपदेश इत्यर्थः। अत्त्वत्त्वादित्यस्यादेशस्येत्यादिः। शक्येति। अशास्त्रीयत्वादिति शेषः। उभयेषांग्रहणेनाभ्यासावयवस्य हलादिः शेष इत्यनेन प्राप्ता या निवृत्तिस्तस्या बाध इति इत्युक्तन्तल्लाभोऽक्षरमर्यादया न लभ्यत इत्यत आह। तत्सामर्थ्यादिति। अन्यथा। इङ्त्यत्तीतिसूत्रापरामर्शी। अभ्यस्तस्य च। अभ्यस्तस्य ह्वेञः सम्प्रसारणमित्यर्थे जुहूषति जोहूयत इति न सिध्यति। जिह्वाययिषतीत्यत्र सम्प्रसारणाभावायाभ्यस्तनिमित्ते परे सम्प्रसारणमित्यर्थो वक्तव्यः एवञ्च न सम्प्रसारण इतिनिषेधादभ्यासस्य न स्यादित्याशयेन शङ्कते। नन्विति। अभ्यस्तीभविष्यत इत्यत्र च्विप्रत्ययोपादानेन प्रकृतौ यस्य समुदायस्याभ्यस्तसंज्ञा भवति तद्रूपत्वारोपेणात्राभ्यस्तशब्दो निर्दिष्ट इति सूचितम्। एवञ्च यस्याभ्यस्तनिमित्तप्रत्यये कृते द्विर्वचनं सम्भाव्यते तस्याभ्यस्तनिमित्तप्रत्ययानुत्पत्तावेव सम्प्रसारणमितिणिजन्तात्सनि कृते ह्वाययतेरभ्यस्तनिमित्तप्रत्ययपरत्वं यत्र तत्र न भविष्यतीति भावः। न च प्रकृतसूत्रे निमित्तशब्दानुपादानादेतावतोऽर्थस्य कथंल्लाभ इति वाच्यम्। दधित्रपुसम्प्रत्यक्षो ज्वरः।आयुर्वै घृतमित्यत्रेव कार्यस्य निमित्ते कारणतादात्म्यारोपेण व्यवहारात्। न च षाष्ठद्विर्वचनस्यादेशरूपत्वेऽभ्यस्तप्रकृतित्वं ह्वः सम्भवति द्विः प्रयोगपक्षे तु कथमयं व्यवहार इति वाच्यम्। आरोपितप्रकृतिविकृतिभावस्य सुलभत्वात्। उक्ताशयानभिज्ञः शङ्कते। न चेति। जिह्वायकीयिषतीति। ह्वेञो ण्वुल् क्यच् सन्। अत्र सन्नन्तस्य यः प्रथमैकाच् तस्य द्विर्वचनप्रवृत्तया ह्वोऽभ्यस्तनिमित्तत्वमस्त्येवेति भावः। उक्ताशयम्प्रकटयति॥ अभ्यस्तीभविष्यत इत्यादिना॥ तत्प्रकृतिः॥ अभ्यस्तप्रकृतिः॥ अत एव अभ्यस्तस्य चेति सूत्रस्यैतादृशार्थकत्वादेव॥ स्पष्टञ्चेदम्भाष्य इति॥ प्रकृतसूत्रे भाष्ये ह्वः सम्प्रसारणमभ्यस्तस्येतिसूत्रे जुहावयिषति अजूहवदित्यस्य सन्चङ्परणिजन्तस्य रूपसिद्ध्यर्थं योगविभाग-

SGDF
Sri Gargeshwari Digital Foundation

मदर्श्य जिह्वायकीयिषतीत्यत्र सम्प्रसारणमाशङ्क्याभ्यस्तस्येति न ह्वय-तिसमानाधिकरणा षष्ठी का तर्हि सम्बन्धषष्ठी अभ्यस्तस्य यो ह्वयतिः किञ्चाभ्यस्तस्य ह्वयतिः ॥ प्रकृतिः ॥ ह्वोऽभ्यस्तप्रकृतेरित्युक्तम् । असङ्गत-मिति ॥ जिह्वायकीयिषतीत्यत्र दोषवारणायैषा कल्पना तेन कृता तस्य च दोषस्याभ्यस्तस्य प्रकृतेर्ह्वयतेरितिव्याख्यानेन भाष्यकृता निरासस्य सूच-नादिति भावः ॥ अनैमित्तिकत्वेनेति ॥ अभ्यस्तीभविष्यत इति व्याख्या-नेनानुत्पन्न एवाभ्यस्तनिमित्तप्रत्यये सम्प्रसारणविधानात् ॥ अनित्यत्वा-श्रयणेनेति ॥ तस्याः परिभाषायाः प्रवृत्तौ त्वाकारलोपः स्यात् ॥ उवङा-देशेऽचः परस्मिन्निति स्थानिवद्भावमाशङ्क्याह ॥ उवङीति ॥ वस्तुतः प्र-कृते स्थानिवद्भावशङ्कैवासङ्गते त्याह ॥ आकारैकादेशस्येति ॥ अजादेशा-धिकरणत्वपर्याप्त्यधिकरणस्य यत्र परस्मिन्नितिशब्दबोध्यपरत्वेन ग्रह-णन्तत्र स्थानिवद्भावस्य प्रवृत्तेरिति भावः ॥ गतित्वमिति ॥ एतेना-स्मिन्वदधातावस्य गतिसंज्ञा भवतीति स्वरूपकथनङ्कृतम् ॥ गतिसंज्ञा-फलन्तु अच्छोद्येत्यत्र द्रष्टव्यम् ॥ शुशावेत्यत्र द्वित्वात् परत्वाद् वृद्ध्यावायादेशे च रूपासिद्धिरत आह ॥ अत्रेति ॥ नित्यत्वादिति ॥ कृताकृतप्रसङ्गित्वमात्रे-ण नित्यत्वादित्यर्थः ॥ एतदभावे ॥ अस्य वैकल्पिकत्वेनैतदभावे ॥ ए-तत्सामर्थ्यात् ॥ श्वयतेर्लिटीतिवचनसामर्थ्यात् ॥ अनेन ॥ विभाषा श्वेरित्य-नेन ॥ तस्य ॥ वचिस्वपीत्यस्य एवञ्चैतद्बोधिताभावांशेन बाधनाञ्चित्य-भ्यासस्येति न भविष्यतीति भावः ॥ दत्तुमशक्यत्वाच्चेति ॥ वैकल्पिकशा-स्त्रेण स्वबोधितभावांशस्य प्रवृत्तिः पक्षे प्रतिबध्यते न तु शास्त्रान्तरप्रा-पितस्य बाध्यार्थस्य ॥ यत्र तु स्वबोधितस्याभावांशस्य भावांशप्रापक-शास्त्रान्तरप्रवृत्तौ वैयर्थ्यप्रसक्तिस्तत्र शास्त्रान्तरबोधितस्यापि तस्य बा-धः ॥ स्वरतिसूतीत्यत्र यथा ॥ न चैवम्प्रकृत इति भावः ॥ अन्तरङ्गत्वा-भावादिति ॥ परस्मैपदपरसिज्निमित्तकत्वेन वृद्धेर्बहिरङ्गत्वङ्गुणस्य तु सिज्मात्रापेक्षत्वेनान्तरङ्गत्वमिति भावः ॥ अयादेश इति ॥ गुणे कृत इ-

SGDF
Sri Gangeshwari Digital Foundation

त्यादिः॥ दिगिति ॥ दिगर्थस्तु न न सिच्यन्तरङ्गमस्तीतिपरिभाषान्तरेणायमर्थो बोध्यते किन्तर्हि येन नाप्राप्तिन्यायेन वृद्धेरन्तरङ्गबाधकत्वमूलकमेव तद्वचनमिति ॥ अधिकमन्यत्र स्पष्टम् ॥

॥ इति भ्वादिविवरणम् ॥

ऋतधातोः सौत्रत्वे ऋतेरीयङितिनिर्देशेन ज्ञातस्येकारान्तत्वभ्रमस्य वारणायाह॥ कमेर्णिङितीति ॥ एवञ्चेका निर्देशोयमत एव वञ्चिलुच्यृतश्चेति सङ्गच्छते ॥ यङा सिद्धे ईकारोच्चारणसामर्थ्यान्नायमिकारान्तोऽन्यथाऽकृत्सार्वेति दीर्घेण सिद्धे ईकारोच्चारणं व्यर्थं स्यात् ॥ न च यङि सति सन्यङोरित्यस्य प्रवृत्त्यापत्तिरिति वाच्यम् ॥ ङ्यप्रत्ययेनेष्टसिद्धेः ॥ हुझल्भ्यो ॥ हुझल्भ्यः परस्य निर्दिश्यमानस्य हेरित्यर्थाभिप्रायेण समाधत्ते ॥ निर्दिश्यमानस्येति ॥ केचित्तु घसिभसोरित्यतो हलीत्यस्यानुवृत्तिङ्कृत्वा हलादेर्हेरितिव्याख्यानेन रुदिहीत्यादौ न दोष इत्याहुः। तन्न। निर्दिश्यमानपरिभाषयैव दोषाभावे सिद्धे हलीत्यनुवृत्तेर्गौरवग्रस्तत्वात् ॥ स्वस्वनिमित्तेति ॥ न च हुझल्भ्य इतिसूत्रस्य प्रवृत्तौ झलन्तानन्तर्यं यद्यपि प्रयोजकन्तथापि तातङः प्रवृत्तौ न कस्याप्यानन्तर्यमाश्रीयत इति कथमेतदिति वाच्यम् ॥ निमित्तपदस्य स्यानितावच्छेदकधर्मप्रकारकबुद्धिपरत्वात् ॥ तदानन्तर्यस्योभयशास्त्रप्रवृत्तिहेतुत्वं स्पष्टमेव॥ अस्याङ्गाधिकारीयत्वेन हेर्यस्माद्विधानन्तदादेरित्यस्य स्वीकृतपञ्चम्यन्तस्योपस्थित्या तदपेक्षत्वाच्च ॥ तेन ॥ लुप्तविभक्तिकस्यानुनासिकेतिपदस्य वनतीतरविशेषणत्वेन ॥ मुचादाविति ॥ आदिना नहधातुपरिग्रहः ॥एतद्विशेषणाभावेऽनुदात्तयोरेतयोः क्तप्रत्यये मुक्तो नद्ध इत्यत्राद्यानुनासिकलोपापत्तिः ॥ मृशनुदादीनामप्यनुदात्तोपदेशत्वादेतेऽनुदात्तोपदेशा इति न्यूनमत आह ॥ अनुनासिकान्ता इतीति ॥ न दोषः॥ नाव्याप्तिः॥ अभ्यासाङ्गनिमित्तेति ॥ अभ्याससंज्ञानिमित्तद्विर्वचननिमित्तस्य हन्तिनिष्ठाङ्गस-

SGDF
Sri Gargeshwari Digital Foundation

ज्ञानिमित्तस्य प्रत्ययस्यैक्य इत्यर्थः ॥ न वृद्धिरिति ॥ अल्लोपस्य स्थानिवत्त्वात् ॥ अन्तोदात्त इति ॥ चित्त्वादन्तोदात्त इत्यर्थः ॥अन्तेदित इति ॥ नुम्विधौगोः पादान्तइतिसूत्रादन्तग्रहणमनुवर्त्तत इति भावः ॥ इदम् ॥ ज्ञापकत्वकथनम् ॥ मोधवानुरोधेनेति ॥ अक्षरसमाम्नायेऽकारस्य प्रथमत उपदेशाच्चक्षेतिपठितव्यो युजर्थस्तेनैवात्मनेपदे सिद्धे ङकारो ज्ञापनार्थ इति तेषाम्भावः॥ अत्र यदीकारस्य स्थानेऽकारः पठितः स्यात्तदा भवदुक्तं सङ्गच्छेत स तु न पठितः । अपि चाकारेकारयोः पाठे नमाम्नालाघवगौरवचर्चा ॥ प्रथमोपस्थितत्वन्तु न नियामकन्निजात्त्रयाणामिति सूत्रे त्रयाणाङ्ग्रहणादिति सिद्धान्तिनः ॥ वस्तुतस्तु विचक्षण इतिवैदिकप्रयोगेऽन्तोदात्तत्वं व्यत्ययो बहुलमित्यनेनापि सिद्धमिकारस्तूदात्त एवेति ङकारोपादानमात्मनेपदार्थमन्तेदित्त्वाभावश्च तेन सिद्ध्यति ॥ एवञ्च ज्ञापनार्थ इत्यसङ्गतमेवेतिभाष्यानुक्तज्ञापकेन लक्ष्यसिद्धिर्नेत्येव युक्तम् । तास्यनुदात्तेदितिस्वरस्तु ङिदुपदेशात्परत्वात्सिद्धः॥ इकार उच्चारणार्थ इति तत्त्वम् ॥ तेन ॥ असिद्धकाण्डे पाठेन ॥ छ एवेति ॥ वृद्धाच्छ इति छ एवेत्यर्थः॥णत्वन्नेति॥ कृत्यच इतिसूत्रदृष्ट्या ख्शाञः शस्य यो वेत्यस्यासिद्धतयाऽडादिभिन्नेन शकारेण व्यधानाण्णत्वन्नेत्यर्थः ॥ तङर्थङ्ग्रहणमिति ॥ यदा कर्मव्यतिहारे तङ् तदा व्यत्यस्यतेत्यादौ परस्मैपदपरत्वाभावादङादेशार्थङ्ग्रहणम् ॥ ख्याधातूनामिति॥ बहुवचनम्प्रयोगबाहुल्येन ॥ अत्र प्रयोगस्यख्याधातूनामितिकथनाद्यदा लौकिके प्रयोगे ख्शाञः शस्य यो वेतियत्वन्तदाऽङादेश इति बोधितम् । यत्तु वक्तीति कृतकुत्वसाहचर्याद्यदा यकारादेशस्तदा भविष्यति सूत्रे तु ख्शाञोऽनुकरणसित्यकृत्।सीदित्यसङ्गतमिति ॥ तन्न ॥ ख्शाञः क्वापि लौकिके शब्देऽदर्शनेन तदनुकरणमित्यस्य वक्तुमशक्यत्वात् ॥ किन्तु ख्यातीतिनिर्देशाद्यदा यकारस्तदैवाङ् ॥ न चैतद्दृष्ट्या यत्वस्यासिद्धतया कथङ्ख्यातीत्यनेनास्य ग्रहणमिति वाच्यम् ॥ ख्याप्रकथन इत्यस्य सार्वधातुकमात्रविषयत-

SGDF
Sri Gangeshwari Digital Foundation

या विधिसामर्थ्यं नासिद्धत्वस्याभावात् ॥ ईशः से ॥ ईडजनोर्ध्वे च ॥ अत्र यन्मूले वैचित्र्यार्थं इत्युक्तन्तत्र वैचित्र्यमाह ॥ ध्वे इत्यस्येति ॥ भाष्यविरोधादिति ॥ एवं हि भाष्ये उक्तम् ॥ किमर्थो योगविभागः ॥ न ह्रशीडजनां स्ध्वे इत्येवोच्येत ॥ ईशो ध्वे मा भूत् ॥ इष्यते ईशिध्वे इत्यादिना त्रिष्वपि धातुषु यत्र यत्रादिप्रसङ्गस्तत्रेष्टापत्त्या तम्परिहृत्य योगविभागे फलाभाव इति ॥ भाष्यसम्मत इति ॥ स्ध्वे इतिनिर्देशादेवङ् कल्प्यत इति भावः ॥ उभयत्रैदन्तानुकरणफलन्तु मूल एवोक्तम् ॥ भाष्यस्वरस इति ॥ तत्र हि जक्षित्यादिषु सप्तग्रहणं वेवीत्यर्थमित्युक्त्वा न वार्थः परिगणनेन अस्त्वागणान्तमभ्यस्तसंज्ञा । इहापि तर्हि प्राप्नोति । आङः शासु ।अस्तु। अभ्यस्तकार्याणास्वरस्मै पदेषु विधानमात्मनेपदी चायम् । स्वरस्त्वभ्यस्तनिमित्तकोऽनुदात्तेतः परत्वात्सिद्धस्तीति ॥ ननु प्रशास्महे इत्यत्रेच्छारूपार्थप्रतीत्यभावान्नायन्धातुरत आह ॥ धातूनामिति ॥ नमो वाकमित्यस्य नमस्ते रुद्रमन्यव इत्यादिवचनमर्थः ॥ ऋस्यैवेति ॥ अद्ग्रहणानुवृत्तावित्यादिः ॥ दुर्लभ इति ॥ निर्द्दिश्यमानस्य व्यवधानात् ॥ अव्यवहितेत्यादि ॥ रुसाहचर्यमपि बोध्यम् ॥ ननूर्णोतेरनेकाच्त्वाद्धार्त्तिकमते आम् स्यादेवेत्यत आह ॥ ऊर्णोतेरिति ॥ आदिभूतादिति ॥ तेनेन्दिद्रीयिषतीत्यस्य सिद्धिः ॥ नन्वसिद्धेऽपि जायमानकार्यस्य यत्रारोपस्तस्यैव प्रसक्त्या प्रयोगेण श्रवणन्दर्वारमत आह ॥ यद्वद्धेति ॥ अत्रोन्तरखण्डइतिकथनेनागन्तूनामन्ते सन्निवेशस्य सुप्रसिद्धत्वाद्द्विर्वचननिष्पाद्यत्वमुत्तरखण्डस्येति सूचितम् ॥ तच्च ॥ अद्वित्व इत्येतत् ॥ एवञ्च द्वित्वभिन्ने पूर्वत्र कर्त्तव्ये इति सिद्धम् ॥ द्वित्वविधायकशास्त्रदृष्ट्या तु नासिद्धत्वम्॥द्वित्वञ्चात्र षाष्ठमाष्टमिकञ्च गृह्यते इत्युक्तमत एव षष्ठाध्याये सन्यङोरितिसूत्रे स्थानेद्विर्वचनमिति पक्षे यियक्षति यियक्षा इत्यत्र सनः सकारविशिष्टस्य द्विर्वचने कृते प्रकृतिप्रत्ययविभागसम्मोहात्सनः सकारस्य षत्वन्न स्यादिति दोषस्य कृते षत्वे द्वित्वमिति प्रक्रियया परि-

SGDF
Sri Gargeshwari Digital Foundation

हारः कृतः ॥ आष्टमिकद्वित्वविषये च बिभाषिता विधयः पूर्वत्रासिद्ध-मित्यधिकारस्थाः पूर्वत्रासिद्धीयमद्विर्वचन इति वचनारम्भप्रयोजयन्ती-त्यभिधाय द्रोग्धा द्रोग्धा द्रोढ़ा द्रोढेति प्रयोजनमुक्तम् ॥ आष्टमिकञ्च पदद्विर्वचनं वर्णद्विर्वचनञ्च गृह्यते ॥ अत एवानचि चेतिसूत्रघटकानचीति पदे प्रसज्यप्रतिषेधमाश्रित्य वाक् वाक्क् इत्यस्य सिद्धेः प्रयोजनत्वमुक्त-म्॥अन्यत्र॥कार्यान्तरे कर्त्तव्ये ॥भवत्येवेति॥तेन निष्पीतन्दुष्पीतमित्यादौ जातेऽपि द्विर्वचने इदुदुपधस्येति षत्वे कर्त्तव्ये तस्यासिद्धत्वेन षत्वसि-द्धिः । एवञ्च ॥ अनित्यत्वाच्च यणे च ॥ तस्यैव सम्भवेनेति ॥ तस्य पर-स्मैपदित्वात् । निषेधाच्चेति । विभाषापदश्रवणेन्तस्य पक्षे निषेधविधि-त्वम् । नन्वाहस्थ इत्यत्राहस्त इत्येव प्रक्रियालाघवाय कर्त्तव्यमत आ-ह । महाप्राणादेशप्रकरणादिति ॥ होढ़इत्यादिप्रकरणादित्यर्थः ॥ उवक्-थेति । लिट् चेत्यनेनासत्वार्द्धधातुकत्वात्॥इयायेति ॥ अत्र इशब्दस्य द्वि-त्वे वार्णादाङ्गमितिन्यायेन सवर्णदीर्घम्बाधित्वा परस्य वृद्धौ पूर्वस्या-भ्यासस्यासवर्ण इतीयङादेशः॥ तत्र शङ्कते ॥ न चेति॥परत्वादिति ॥ इ-यङादेशापेक्षया परत्वादित्यर्थः ॥ आपत्तेः ॥ कितीत्यस्यानुवृत्तावनि-ष्टस्यापत्तेः ॥ दीर्घविधानसामर्थ्यादिति ॥ येन नाप्राप्तिन्यायेन दीर्घस्य यणपवादत्वात् पुनर्यणभाव इत्यर्थः ॥ ननु यण्वत्सवर्णदीर्घस्यापि तेन बाधोऽस्त्वित्यत आह ॥ अनन्तरस्येतीति ॥ कर्त्तव्य इति ॥ अजादीना-मटा सिद्धमितिभाष्योक्तेः ॥ न वृद्धिरिति ॥ अस्वपो हसतीदयत्राङ् गा-र्ग्यगालवयोरितिविहितस्याटोऽचि परे वृद्धिर्नेत्यर्थः॥ हसतीत्यस्योपादा-नमुत्त्वाय ॥ आटोऽभावेप्यायुनगिति साधयति ॥ आयुनेति ॥ इणित्य-त्र प्रत्याहारग्रहणशङ्कानुत्थानायाह ॥ प्रसिद्धत्वादिति ॥ उभयत इति-वचनस्य युक्तिसिद्धत्वमाह ॥ पूर्वपरेति ॥ स्थानिवत्त्वमिति ॥ प्रथमसूत्र-विहितं स्थानिवत्त्वमित्यर्थः । न चान्तादिवद्भावप्रवृत्तावपि न क्षतिः । एकादेशे धर्मद्वयलाभेऽपि तासौ नितरामिट्त्ववदशास्त्रीयत्वेनोपसर्गा-

SGDF
Sri Gargeshwari Digital Foundation

त्परत्वस्यातिदेष्टुमशक्यत्वादिति वाच्यम् । पूर्वत्वातिदेशेन तदतिदेश-स्यापि वक्तुं शक्यत्वात् । पूर्वत्वस्य शास्त्रीयत्वाच्चेतरधर्मसमाजग्रस्तत्वेन पूर्वस्मात्परत्वं वक्तुं शक्यमिति तद्भावः । अचः परस्मिन्निति तु प्रव-र्त्तत एव । अन्यथा ह्लायत इत्यस्यासिद्धिः स्यात् । लक्ष्यानुसारादिति । अभीयादितिलक्ष्यस्य सम्प्रतिपन्नस्यानुसारादित्यर्थः । अन्य इत्यनेनारुचिः सूचिता । एकदेशविकृतन्यायस्य लौकिकतया लोकदृष्टप्रकारस्य त्यागे बी-जाभाव इति । उक्तेन । उभयत इत्यनेन । अस्य लौकिकत्वन्तु प्रागुप-पादितमेव । एतेन तस्य न्यायस्यात्र शास्त्रेऽनाश्रयणं सूचितम् । नन्वे-तन्न्यायाभावे कथमभीयादित्यस्य सिद्धिरत आह । किञ्चेति । पूर्वो-क्ताशयेन शङ्कते । न चेति । तद्वद्भावेऽपीति । पूर्वपरान्तादिवद्भावेऽपी-त्यर्थः । अनुपपादेनेति । अवध्यवधिमतोर्भेदे एव लोके पूर्वपरव्यवहार-स्य प्रसिद्धेरिति भावः । अतिदेशेनापि न लाभ इत्याह । न हीति । तेनातिदेशेन । अन्तादिवदित्यतिदेशेन । तदारोपः । व्यपवर्गारोपः । अत एव । एतादृशे विषयेऽन्तादिवद्भावेन व्यपवर्गाभावादेव । नुम्प्रति-षेधः । नाभ्यस्तादित्यनेन नुम्प्रतिषेधः । युक्ततरप्रकारेणाभीयादित्यत्रै-कादेशे कृते ह्रस्वत्वाभावं साधयति । किञ्चेति । व्याश्रयत्वादिति । उपसर्गापेक्षत्वेन व्याश्रयत्वात् । तेन । कैयटेन । इयायेत्याद्यसिद्धिरिति । अत्रापि वृद्धेः प्रत्ययापेक्षतया बहिरङ्गत्वेनान्तरङ्गैकादेशे रूपासिद्धिः वा-र्णपरिभाषा तु तथैव व्याश्रयत्वान्नेति तस्माद्वार्णप्रवृत्तावुभयोरङ्गसम्बन्धि-त्वमात्रस्प्रवृत्तौ नियामकमिति वक्तव्यन्तच्चास्त्येवेति यथेयायेत्यस्य सि-द्धिस्तथाभीयादित्यस्यापि भविष्यतीति भावः । स्वोक्तौ भाष्यान्तरा-विरोधमाह । यद्पीति । तेन न्यायेन । वार्णादाङ्गमितिन्यायेन । अत एव । ह्रस्वत्वस्यैकादेशात्पूर्वम्प्रवृत्तेरेव । उपेयाजेत्यत्राभ्यासनिमित्तकस्य प्रोह्यत इत्यत्रोपसर्गादितिविहितस्याम्बात्रेत्यत्राम्बार्थनद्योरितिविहितस्य ह्रस्वत्वस्य प्राप्तिः । तदपवादेति । बहिरङ्गपरिभाषापवादेत्यर्थः । वार्ण-

SGDF
Sri Gangeshwari Digital Foundation

परिभाषयाऽभीयादित्यस्य सिद्धिरिति यत्प्रागभिहितन्तदपि तत्सत्त्वमभिप्रेत्य । वस्तुतो भाष्यान्तरस्वारस्यादस्यानभिधानमेवेत्याह । किञ्चेति । उत्तरपदप्रकृतिस्वरः । गतिकारकोपपदादिति विहितः । तस्य तत्त्वमिति । उभयत इत्युक्तेरेकदेशयुक्तित्वमित्यर्थः । अत एव । उभयत इति वचनस्य लक्ष्यासाधकत्वादेव । ननु समीयादित्यत्राणत्वाद्ध्रस्वत्वन्दुर्वारमत आह । मूले भौवादिकेति । इत्येतावतैवेति । किदाशिषीतिकित्त्वस्य तत्रैव विधानात् । नियमपूर्वकत्वमिति । एवञ्चास्य विशेषणस्य द्योतकोऽत्रावधिः । एवञ्च । लावस्थायामित्यस्य स्वीकारे च । इदमार्द्धधातुक इत्यस्यासम्बन्धमभिप्रेत्य । वस्तुतस्तत्सम्बन्धेऽपि न दोष इत्याशयेनाह । मूले विवक्षित इति । शब्देनेति । एतेनोपसर्गद्योत्यार्थस्योपसर्गसंज्ञकशब्दयोगात्प्राग् धात्वर्थेऽन्तर्भावो भवत्येवेति बोधितन्तेनोपास्यते हरिरित्यस्य सिद्धिः । णेरध्ययन इतिदर्शनस्यापूर्वार्थज्ञापकत्वापेक्षया भाष्यसम्मतपक्ष एव ज्ञापकत्वकल्पने लाघवमिति भावः । अत एव । उपसर्गसंज्ञकशब्दयोगस्य प्रागभावादेव । पूर्वन्धातुः साधनेनेत्यत्र बीजमाह । साध्यत्वेनेत्यादि । साधनार्थकप्रत्ययस्थले व्यवस्थामुक्त्वा भावार्थकप्रत्ययस्थले तामाह । घञ्लुडादय इति । तदर्थसम्बन्ध इति । भावार्थकप्रत्ययद्योत्यस्य सिद्धत्वस्य सम्बन्ध इत्यर्थः । भिन्नपदेति । एतेन बहिरङ्गत्वन्तत्प्रयुक्तकार्यस्य द्योतितम् । वृद्धौ । आटश्चेति वृद्धौ । कथञ्चिदिति । पदस्य विभज्यान्वाख्यानमितिपक्षमभिप्रेत्य । उक्तरीत्येति । प्रत्याख्यानपक्षे वृद्धिरन्तरङ्गत्वादाटा सहेतिरीत्या यणाप्रवृत्त्या नियमासम्भवादित्यर्थः । नित्यत्वाङ्गीकारादिति । यस्य लक्षणान्तरेण निमित्तं विहन्यते न तदनित्यमिति परिभाषया नित्यत्वस्य बोधनादिति । न दोष इति । एवङ्कल्पनया ह्यत्र पूर्वं लादेश इति तद्भावः । इत्याहुरिति । भाष्यानुक्तत्वमत्रारुचिः । व्याख्यानमत्रेति । गाङ् लिटीत्यत्र ङकारस्यात्रैव विशेषणार्थमुपादानमित्येतन्मूलकमित्यर्थः । न ह्याङो व्याख्याना-

SGDF
Sri Gargeshwari Digital Foundation

दिति । जहातीतिनिर्द्देशमूलकव्याख्यानादित्यर्थः । हाङो ग्रहणे हि भृञामिदितीत्त्वापत्तिः स्यात् । अत एव । आर्द्धधातुकाधिकारोक्तकार्यातिदेशस्येष्टत्वादेव । असिद्धत्वप्राप्तिमुपपादयति । लावस्थायामिति । अत एव । सर्वथा तत्प्रत्याख्यानस्यानभिप्रेतत्वादेव । स्वीकार्यमिति । अन्यथा फलभेदः स्यात् । इत्यनुवृत्त्या सिद्ध इति । ङित आदन्तात्परत्वं लङ्येव सम्भवतीति भावः । स्स्थानशब्द इति । शब्दस्य स्वप्रयोज्यार्थोपस्थितौ प्रकारतया भानेन त्वप्रत्ययान्तेन शब्द एवोच्यत इति भावः । त्वान्तस्य शब्दपरत्वे तस्य लक्ष्ये प्राप्त्यभावेऽपि लक्षणया त्वान्तस्य वाच्यार्थपरत्वमित्याशयेनाह । तेनेति । लक्षणानाश्रयणेनाह । यद्वेति । अन्यथा । ख्याधातोरार्द्धधातुकेऽपि प्रयोगे । सामान्यापेक्षज्ञापकाश्रयणे न ध्याख्यापॄमूर्छीति सूत्रे ख्याग्रहणन्न कार्यम् । यत्त्वस्यासिद्धतया यत्वत्ताविरहादिति लाघवमप्यस्याङ् कल्पनायामस्तीति बोध्यम् । मूले अयमन्तीति । अत्रायमित्यनेनादादिकस्यैव तत्राप्रयोगः । यस्तु चुरादिपठित आधृषीयस्तस्य णिजभावेऽपि तत्र प्रयोगो भवत्येवेति सूचितम् । विदो लट इतिसूत्रे वेत्तेरेव ग्रहणे प्रमाणमाह । निपातनेति । निपातनादगुणत्वमितिभाष्यादुषविदजागृभ्य इतिनिर्द्देशाच्चायमर्थः कल्प्यते । कस्य चिन्मतमाह । कर्तृत्वेति । उच्चारणसामर्थ्यादिति । विदाङ्कुर्वन्तुशब्दे लोडुच्चारणसामर्थ्यादित्यर्थः।अत एव ॥ लोटो विवक्षितत्वादेव । अत्र लोटोऽविवक्षायामनेनैव लिख्यप्यामः सिद्धौ तस्मिन्सूत्रे विद्शब्दोपादानमनर्थकं स्यात् ॥ ननु तत्र विद्ग्रहणेनान्यस्य विदधातोर्ग्रहणमस्त्वित्यत आह।तत्रापीति । परस्मैपदिन इति।तेन विद विचारण इत्यस्य रुधादिगणपठितस्य व्यावृत्तिः॥ ननु कृञ्ग्रहणेन कृञ् हिंसायामित्यस्य स्वादौ पठितस्य ग्रहणमिति वक्तुं शक्यमिति कथङ्कृञ्ग्रहणस्य गणकार्यानित्यत्वज्ञापकत्वमत आह । तनादिसाहचर्येणेति ॥ युक्त्यन्तरमाह । क्रियेति ॥ सिद्धान्तमाह । भाष्य इति ॥ भाव्यमानत्वेन सवर्णाग्राह-

SGDF
Sri Gargeshwari Digital Foundation

कतया तपरत्वमत्र व्यर्थमिति तस्योत्तरकालिकविकाराभावार्थत्वमस्त्वित्याशयेन मूले तपरत्वसामर्थ्यादिति ॥ केचिदिति ॥ भाष्यविरोधोऽत्रारुचिः ॥ ननूदवोढामित्यतोऽस्य वैषम्यन्तत्र हि वकारस्य वृद्ध्या आकारे कृते तस्मिन्नाकारे स्थानिवद्भावेन तत्त्वबुद्धिस्सम्भवति प्रकृते तु न तथा ऋकारस्याकारे गुणे तस्य स्थाने उकारादेशे कृते उकारे ऋकारबुद्ध्यसम्भवादतस्तदाशयमाह । तत्स्थानिक इति ॥ स्वमते भाष्याविरोधमाह ॥ स्वस्थानिकेति ॥ नन्वन्तरङ्गानपीतिन्यायेन हेर्लुकि कृते सार्वधातुकपरत्वाभावात्कथमुत्त्वमत आह । मूले लुक इत्यादि ॥ वस्तुतस्तस्यानावश्यकत्वमाह । सार्वधातुक इति ॥ अत्र श्नसोरिति सूत्रे॥ इतिवदिति॥अल्लोपस्यासिद्धत्वादाह ॥ सकारनिरूपितेति ॥ यः शिष्यत इति न्यायेन तस्यैव क्रियावाचकत्वात् ॥ व्याख्यानादिति ॥उभयोरपि धात्वोरुदित्त्वकरणेन व्यवस्थापकस्य वचनान्तरस्याप्रवृत्त्या चोभयोरपि ग्रहणं युक्तमित्येतन्मूलकादित्यर्थः ॥ अनित्यत्वादिति ॥ यस्य विभाषेतिसूत्रभाष्ये विदित इत्यत्रेण्णिषेधमाशङ्क्य यदुपाधेर्विभाषेत्यादिना लुग्विकरणपरिभाषाया विभाषा गमहनेति सूत्रे विशिसाहचर्याच्छविकरणस्यैव ग्रहणमित्यनेन साहचर्यपरिभाषामूलकत्वसूचनात्साहचर्यपरिभाषायाश्च ह्रीश्रिसितिसूत्रे कृत्वोर्थग्रहणेनानित्यत्वस्य ज्ञापनादियमप्यनित्येति भावः । अधिकमन्यत्र स्पष्टम्॥ आद्यंशः । अजादावित्यंशः। वेति तु इहान्ये वैयाकरणा मृजेरजादौ सङ्क्रम इत्यत्रान्य इत्युपादानाल्लब्धः।अस्तिसिच इति सूत्रादपृक्तग्रहणानुवृत्त्यैव सिद्धे पित इति किमर्थमत आह । पित इतीति निर्दिष्टपरिभाषेति । तस्मादितिपरिभाषेत्यर्थः । तदेकवाक्यतया वाक्यताया बोधस्त्वव्यवधानांशघटित इति गुरुभूत इति भावः ॥ प्रकृतीति सूलोक्तमुपपादयति । प्रत्ययेत्यादिना ॥ अत्र ॥ रुदादिभ्य इतिसूत्रे । पुपिभूत इति । एतेन पूर्वमुपसर्गयोगवादिमते साधकमुपन्यस्तम् । पूर्वं साधन योग एवेतिभाष्यीयसिद्धान्तानुसारेणाह । यदि त्वित्यादि ॥ अस्या-

SGDF
Sri Gangeshwari Digital Foundation

स्वविकारे बाध्यबाधकभावादाह । अभ्युच्चय इति । अन्यथा । अर्थवत्त्वविशेषणघटितव्याख्यानाभावे । अनितेः समीप इति । अव्यवहितसमीप इत्यर्थः । अपकर्षसामर्थ्यात् ॥ तृतीयादिष्विति पुंवद्भावस्य नुमभावमात्रबोधकत्वमिति ग्रामण्ये कुलायेत्यादौ ह्रस्वत्वे घित्वाद् गुणापत्तिरितिशङ्कायामर्थातिदेशात्सिद्धमित्यादिना ह्रस्वत्वाभावोऽप्यतिदिश्यत इति भाष्ये प्रतिपादितन्तत्र पुंवद्भावो विभक्तिसापेक्षत्वेन बहिरङ्गो ह्रस्वत्वन्त्वनैमित्तिकत्वेनान्तरङ्गमिति पुंवद्भावात्पूर्वमेव स्यादित्याशङ्कायाङ्कैयटेन यदुक्तन्तदाह । यद्यप्यन्तरङ्ग इति । अपवादविषयमिति । अपवादस्य पुंवद्भावप्राप्यह्रस्वत्वाभावस्य विषयमित्यर्थः ॥ अत एव । अनत इत्यस्यापकर्षादेव ॥ अपवादो यद्यन्यत्र चरितार्थ इतिन्यायस्य तु नात्र विषयः । अन्तादेशप्राप्तियोग्ये चारितार्थ्यविरहात् ॥ एतच्छास्त्रकल्प्य इति । एतेनोणादीनामव्युत्पन्नत्वेऽपि न पर्युदासानुपपत्तिरिति ध्वनितम् ॥ नन्वनेन गुणाभावेऽपि सार्वधातुकार्द्धधातुकयोरिति स्यादेवेत्यत आह । विग्रहणसामर्थ्यादिति । स्तः । इकारः ॥ ननु जाग्रोऽवीतिसूत्रेण गुणोत्तरं यदि वृद्धिप्राप्तिस्तदा जागरक इत्यत्र गुणोत्तरमुपधावृद्ध्यापत्तिरत आह । जागेति ॥ स्वरसो दृश्यत इति । तत्र हि यदयमचिस्तलोरिति प्रतिषेधं शास्ति तज्ज्ञापयत्याचार्यो न गुणाभिनिर्वृत्तस्य वृद्धिर्भवतीत्येवमुक्तम् । इट्दरिद्रस्य । गमहनेत्यतः क्ङितीत्यत उदित्यतः सार्वधातुकपदञ्चानुवर्त्तत इति केचित्तत्राह । आर्द्धधातुक इति । एवञ्चानुवृत्तिर्व्यर्थेति भावः । आत इत्यनुवृत्त्या । श्नाभ्यस्त इत्यत आत इत्यनुवृत्त्या । नन्वोकारौकारयोर्द्विमात्रत्वाविशेषात् कथं ज्ञापकत्वमत आह । ओकारस्येति । नन्वाल्लोपे कृते आकारान्तत्वविरहादत औरित्यस्य न प्राप्तिरत आह । आर्द्धधातुक इति । सामान्यत आम्रेत्यसङ्गतम् । उषविदेत्यनेन तस्य विधानादत आह । पक्ष इति । इदम्मतम् । औकारविधानसामर्थ्यादाम्नेतिमतम् । भाष्ये ध्वनितमिति । तत्र ह्येकाज्ग्र-

SGDF
Sri Gargeshwari Digital Foundation

हणङ्क्तिमर्थम् । इह मा भूत् । बिभिद्वान् । क्रियमाणेऽप्येकाज्ग्रहणेऽत्र प्राप्नोति एषोपि ह्येकाच् । एवन्तर्हि कृते द्विर्वचने एकाच् । कथम् । एकाज्ग्रहणसामर्थ्यात् । न हि कश्चिदकृते द्विर्वचनेऽनेकाजस्ति यदर्थमेकाज्ग्रहणं क्रियते । ननु चायमस्ति जागर्त्तिः । जागृवांसो अनुग्मन् । छन्दसि वेति वक्तव्यमिति द्विर्वचनाभावः । यत्तर्ह्याकारग्रहणङ्करोति न हि कश्चिदकृते द्विर्वचने आकारान्तोऽनेकाजस्ति । ननु चायमस्ति दरिद्रातिः । न दरिद्रातेरिटा भवितव्यम् । किङ्कारणमुक्तमेतत् । दरिद्रातेरार्द्धधातुके लोपः सिद्धश्च प्रत्ययविधाविति भाष्ये उक्तम् । अत्र दरिद्रातेरिट्शङ्कया आम्नेति ध्वनितमित्यर्थः । कैयटेनेति । तेन हि दरिद्रातेरनित्य आमित्यात औ णल इत्योकारे विधातव्ये औकारविधानेन ज्ञापितमित्युक्तम् । अयम्प्रयोग इति । एतेन लुङि वेत्यत्र प्रमाणमुपन्यस्तम् । तद्भावः । भाष्यकारस्य भावः । सर्वमा इदम् । अस्तिसिच इतीड्भावाय छान्दसमुदाहरणमुपन्यस्तम् । उत्तरार्थम् । दश्चेतिसूत्रेऽनुवृत्तयर्थमित्यर्थः । न च ससजुष इतिसूत्रानन्तरमस्तेरितिसूत्रङ्कार्यमनेन दत्वस्य बाधे सिद्धेऽनस्तेरिति न वाच्यमिति तु न शङ्क्यम् । योगविभागेन पुनर्विधानसामर्थ्येन बाधकल्पनापेक्षया यथान्यासे प्रतिपत्तिलाघवात् । स्थानषष्ठीति । शब्दाधिकारात् । अत एव । छान्दसत्वादेव । ननु नित्यत्वाद्दीर्घत्वमित्यसङ्गतम् । कृतेऽप्यत्वे भूतपूर्वगत्या लोपप्रवृत्तेः । यीवर्णयोरित्यत्र यि इवर्णयोरिति छेदात् । द्विवचननिर्द्देशेन इवर्णान्तरपरिग्रहसामर्थ्याद् भूतपूर्वगतिरिहाश्रीयते । अत एव दीधीङो णिजन्तात् ण्वुलि णिलोपेऽपि कृतेऽनेनान्त्यलोप इति चेन्न । अचः परस्मिन्नितिसूत्रस्यभाष्यप्रयोगविरोधात् तदाह । अच इति । लुप्तेऽपीत्वमिति । आदीधक इत्यत्र दीधयतेण्वुलि णिलोपस्य स्थानिवत्त्वादित्वमित्यर्थः । तत्र हि णेर्णिच्युपसंख्यानमित्यनेनावीवददित्यस्य सिद्धौ चङ्परनिर्ह्रासेत्यनर्थकमिति मनसि निधायाममालदित्यत्र टिलोपस्य स्थानिवत्त्वादनुपधात्वा-

SGDF
Sri Gargeshwari Digital Foundation

देव सिद्धावग्लोपिग्रहणमास्त्विति शङ्किते हलच्समुदायस्यात्यरराजदित्यादौ लोपे प्राप्नोतीत्याशङ्क्यावयवलोपेनाग्लोपित्वमिवावयवाचमाश्रित्यैव स्थानिवत्त्वप्राप्तिरितिशङ्कायामग्लोपिग्रहणमेवोत्तरत्र स्थानिवत्त्वाभावे ज्ञापकमस्त्वित्युक्तं आदीधक इत्यत्र यीवर्णयोरिति न प्राप्नोतीति पूर्वपक्षे वर्णग्रहणसामर्थ्यात्स्थानिवत्त्वमित्युक्तम् । भाष्यस्वरस इति । तत्र हि जक्षित्यादिषु सप्तग्रहणं वेवीत्यर्थमितिवार्त्तिकस्यापरिगणनमागणान्तत्वादित्यनेन प्रत्याख्याने कृते आङः शास्वित्यत्रातिप्रसङ्गमाशङ्क्यास्त्वित्यनेनेष्टापत्त्या समाहितमिति । सूत्रस्थभाष्यस्वरसादिति । तत्र हि षसिवशी छान्दसावित्युक्तम् । अत्र कैयटः । षस सस्ति स्वप्ने इति ये न पठन्ति केवलं षस स्वप्ने वश कान्ताविति तन्मतेनैतदुक्तम् । मतान्तरं तेनोक्तम् तदाह । तत्रैवेत्यादिना । भाष्यविरोध इति । तत्र हि बहूनां समवायेऽपि निर्ग्लेयान्निर्ग्लायान्निर्म्लेयान्निर्म्लायादित्यादौ वान्यस्य संयोगादेरित्येत्वस्य वैकल्पिकप्रवृत्तिः स्वीकृता । असाधुरेव । षसिवशी इतिपूर्वोक्तभाष्यात् । औष्टामित्यत्र सम्प्रसारणे अजादित्वादाडित्युक्तन्तच्च लावस्थायामजादित्वाभावान्न प्राप्नोतीति वाच्यम् । भाव्यजादेरप्याड्विधानात् । यङ्लुकः संज्ञेति । न तु तदन्तस्य संज्ञा । तत्रोपष्टम्भकम्भाष्यमाह । अस्य । यङ्लुगन्तस्य ॥

इत्यदादिविवरणम् ।

इत्यत्रेति । एवञ्चाह्लादानुकूलो व्यापारो हुधात्वर्थः । तत्र । वैधे आधारे । अजादेशत्वाभावेनेति । स्थानितावच्छेदकत्वेनोपात्तस्य धर्मस्य यत्राच्त्वावच्छिन्नपर्याप्तत्वन्तत्रैव स्थानिवद्भावप्रसक्तिः । वस्तुतोऽत्र द्वितीयकोटिरभ्युच्चयवादेन । अत एव णिलोपस्य स्थानिवद्भावसिद्धिः । अभ्यस्तस्येति । यद्यपि श्नाभ्यस्तयोरितिसूत्रेऽभ्यस्तयोरित्युपात्तम् । तथाप्येकदेशानुवृत्त्या विभक्तिविपरिणामेनैवमुक्तम् । अत एव क्लेशादाह सा-

SGDF
Sri Gargeshwari Digital Foundation

र्वधातुक इति । दीर्घोच्चारणमिति । पॄ इत्यत्र दीर्घोच्चारणमुदोष्ठ्यपूर्वस्येत्युत्त्वाय । तत् । अङ्गावयवइत्युपादानम् । श्रॄदॄप्रामिति । न च ऋच्छत्यॄतामिति प्राप्तस्य गुणस्य विकल्पेन सिद्धौ ह्रस्वविधानमनर्थकमिति वाच्यम् । वार्णादाङ्गमितियणस्बाधित्वोत्त्वापत्तेस्तदाह । ह्रस्वविधानस्येत्यादि । स्पष्टार्थमिति । सामर्थ्यादर्थविशेषकल्पनापेक्षया सौत्रनिर्देशेन तस्यार्थस्य कल्पने स्पष्टप्रतिपत्तिर्भवतीति भावः । कपिञ्जलाधिकरणेति । तत्र यथा बहुवचनेन त्रयाणामेव ग्रहणमिति प्रतिपादितन्तद्वत् । नाभ्यस्तस्याचि पितिः । अनन्तरस्येतिन्यायेन लघूपधगुणस्यैवायम्प्रतिषेधः। नन्वत्र पितीति व्यर्थम् । अपित्त ङित्त्वादेव गुणाभावस्य सिद्धेरत आह । पितीत्युत्तरार्थमिति । उत्तो वृद्धिरित्युत्तरसूत्रार्थमित्यर्थः । व्याख्यानादिति । प्रकृतसूत्रे ङिद्ग्रहणं गाङ्कुटादिभ्य इत्यतोऽनुवर्त्तते । तस्मिन्सूत्रे च कुटादिपदेन श्रूयमाणविकरणकस्यैव ग्रहणमिति प्रकृतसूत्रेऽपि श्रूयमाणविकरणकस्य विज्धातोर्ग्रहणमित्येतन्मूलकादित्यर्थः । लोपरूपेति । स्वरदीर्घेतिनियमात् । तदुत्तरम् । आदेशनिमित्तककार्योत्तरम् । अत एव । लोकेऽपि प्रयोगादेव । प्रकारान्तरमिति । लावस्थायामड़ागमेऽपि शब्दान्तरप्राप्त्या वृद्धेरनित्यत्वाद्द्वित्वेऽभ्यासकार्ये च कृते वृद्धिरिति बोध्यम् । दनूधन्त इति यङ्लुगन्तस्य रूपम् । अनुनासिकस्येति दीर्घस्तु न । बहुलग्रहणात् ॥

इति जुहोत्यादिविवरणम् ।

निरूपितम् । बलादिग्रहणानुवृत्तेः ॥ उत्तरार्थो ॥ आतो लोपेतिसूत्रेऽनुवृत्तयर्थो । एतेन दीङ इति पञ्चम्या अकृतार्थत्वात्तद्बलेन सप्तम्यन्तस्य षष्ठ्यन्तत्वकल्पनं युक्तमेव ॥ उपदेशोत्तरकालमितिव्याख्यानादात्वस्यैज्निमित्तप्रत्ययविषयेऽनुत्पन्न एव प्रत्यये प्रवृत्तिरत एवोपदायेत्यत्र घञ्प्रत्ययः सिध्यति । अन्यथा भावे एरच् स्यात् ॥ फलञ्चिन्त्यमिति । शि-

SGDF
Sri Gargeshwari Digital Foundation

त्प्रत्ययस्य श्यनः श्नोश्चैत्तिनिमित्तत्वाभावादेव व्यावृत्तिः । विभाषा लीयतेः । यका निर्द्देश इति ॥ न च सार्वधातुके यगितिविहितो यक् धात्वर्थफले आश्रयान्वयविवक्षायाम्भवति प्रकृते च न तद्द्योत्यार्थसद्भाव इति कथं यगिति वाच्यम् । सौत्रत्वेन यकः साधुत्वात् ॥ यत्तु विभाषा लिय इत्येव सूत्रयतान्तावतैव सर्वेषां ग्रहणम्भविष्यति किं सर्वसङ्ग्राहकयङ्निर्द्देशेनेति मतं तन्न युक्तमित्याशयेनाह । क्र्यादिराधृषीयश्चेति । ली श्लेषणे । ली द्रवीकरण इत्युभयत्र निरनुबन्धकपाठात् ॥ एवञ्च निरनुबन्धकपरिभाषया तयोरेव ग्रहणापत्तिः । लीङ इतिनिर्द्देशे त्वस्यैव ग्रहणापत्तिरिति यका निर्द्देशेन निरनुबन्धकपरिभाषाया बाधात्सर्वेषाङ्ग्रहणं सिध्यतीति भावः । अत्र परस्मैपदीत्येतस्योपादानं वस्तुस्थितिकथनाय न तु प्रकृते किञ्चिदस्य प्रयोजनम् ॥ अत्र । प्रीङ्धातोः सकर्मकत्वे । मानञ्चिन्त्यमिति । अनन्यथासिद्धस्य साधकस्यालाभात् ॥ न च रुच्यर्थानाम्प्रीयमाण इति निर्द्देश एव साधक इति वाच्यम् । तेन निर्द्देशेन तत्र धातूनामनेकार्थतया विषयत्वावच्छिन्नप्रीत्यनुकूलव्यापारस्य धात्वर्थत्वात् । तस्य निर्द्देशस्य दर्शनेन मूलकृता सकर्मक इत्युक्तम् । आधेयत्वावच्छिन्नप्रीत्यनुकूलव्यापारस्य धात्वर्थत्वं सर्वत्र प्रीयमाण इतिनिर्द्देशस्तु सौत्र इति प्रकृतग्रन्थाभिप्रायः ॥ षोऽन्तकर्मणि ॥ कर्मशब्दोऽत्र क्रियापरः ॥ अत्र पाठे ॥ पतेतिपाठे । श्यनादीनिति । अत्रादिना गापोष्टगिति टकः किंत्वस्य सङ्ग्रहः । तेन श्यनः शकारस्यैतः श्यनीत्यत्र विशेषणार्थतया ज्ञापकत्वासम्भवशङ्का निरस्ता ॥ आद्युदात्तार्थम् । प्रकृतेराद्युदात्तार्थम् । एवञ्च दीव्यत इति पदमाद्युदात्तम्भवति । चानशीति ॥ दीव्यमान इत्यत्र ताच्छील्यादिविषये चानशीत्यर्थः । आद्युदात्तार्थमिति । यद्यपि तत्र चित्त्वादन्तोदात्तत्वम्भवति । तथापि तत्रेष्टस्यापि चित्त्वप्रयुक्तस्वरस्य बाधोऽस्त्वित्याशयः । तस्यापि । अन्यत्र विकरणेभ्य इत्यस्यापि ॥ तत्सामर्थ्यात् । नित्त्वसामर्थ्यात् । औचित्यादिति ॥

SGDF
Sri Gargeshwari Digital Foundation

एवं सति मध्येऽपवादाः पूर्वान्विधीन्बाधन्त इतिन्यायस्याप्यनुसरणम्भवतीति भावः ॥ धातुस्वरेणासिद्धेः । प्रकृतेराद्युदात्तत्वासिद्धेः । तत्सामर्थ्याभावेन । नित्त्वसामर्थ्याभावेन ॥ भट्टिप्रयोगस्य तु गतिमाह । भट्टीत्यादि ॥ पृषोदरादित्वादिति । एवञ्च तत्र यस्य विभाषेतीट्प्रतिषेधे कर्त्तव्ये पञ्चमीसमासमाश्रित्य स्थानिवद्भावो न भवति । नियम एव युक्त इति । एवञ्च समकक्षत्वे लाघवस्य साधकत्वन्तदेव नात्रेति भावः । अत एव । क्नदस्य पूतीभावपदार्थत्वादेव ॥ मूले कथं युध्यतीति । युध् धातोरनुदात्तेत्त्वात्परस्मैपदानुपपत्तिरिति भावः । एतद्भाष्येति ॥ व्यत्ययेन परस्मैपदप्रतिपादनपरभाष्येत्यर्थः। अनित्यमपीति। अपिना युधमिच्छतीति मूलोक्तप्रकारप्ररिग्रहः। इच्छार्थस्य नियमेनास्मात्प्रतीतिरित्यत्र मानाभावोऽपि बोध्यः ॥ न विरोधइति । एतत्तत्त्वन्तत्रैव निरूपयिष्यते।समार्थ्यर्थे तु अकर्मक एव॥ राधोऽकर्मकाद् वृद्धौ॥अन्तर्गणसूत्रमेतत् । अत्र य एवकारस्तस्यान्यत्र सम्बन्धे बीजमाह । एवकारादिति । अत एव । एवकारस्य भिन्नक्रमत्वादेव ॥ इति सार्थकमिति । एवकारस्य भिन्नक्रमत्वाभावे राधो वृद्धावेवेत्युक्तेऽपि वृद्धिप्रतिपादकस्याकर्मकत्वाव्यभिचारादकर्मकादिति व्यर्थं स्यादिति । अन्ये पुषादय इति ॥ न च पुषादिषु श्लिषः पाठवैयर्थ्यमिति वाच्यम् । समश्लिषज्जतु काष्ठमित्यत्र प्रत्यासत्त्यर्थकत्वे तस्य चारितार्थ्यात्। वक्ष्यमाणनियमेति। आलिङ्गनइतिविभक्तसूत्रसिद्धनियम इत्यर्थः। परत्वान्नुमि ॥ कित्त्वापेक्षया परत्वान्नुमि । अकित्त्वादिति संयोगात्परत्वादिति भावः । मूलकारोक्तरीत्याह । नञा प्रापितेति ॥ नञ्वाशब्दान्यतरप्रापितेति पूर्वोक्तसिद्धान्तिमतेनाह । दुद्रोहिथेत्येकमेवेति ॥ तस्य । थुकः ॥ एवञ्च । दिवादिपाठस्य श्यनर्थत्वे च । पठितुं युक्तः । अङोऽन्यथासिद्धेः ॥ अत्र । दिवादौ ॥

इति दिवादिविवरणम् ॥

SGDF
Sri Gargeshwari Digital Foundation

सुरासन्धानमिति समस्तपाठः। तदाह। सुरेति। अभिसुसूरिति। अभिपूर्वकात्सुनोतेः सनि सुनोतेरित्यनेन षत्वनिषेधेऽज्झनेति दीर्घरूपम्। ऋतश्च संयोगादेरितिसूत्रे लिङ्सिचोरितिसमुदायस्यानुवृत्तिपक्षे सिज्विषयेऽसंम्भवमाशङ्कते। न चेति। अत एव। पूर्वोक्तज्ञापकादेव। वधर्षेतिनिपातनस्य नियमार्थत्वमुपपादयति। क्रयादिनिषेधादेवेति। स्थानिवत्त्वात्। सर्वे सर्वपदादेश इतिन्यायेन स्थानिवत्त्वात्। बहिरङ्गपरिभाषा त्विति। इदन्धातूपसर्गयोः कार्यस्यान्तरङ्गत्वमभ्युपेत्य तस्याः प्रवृत्तिस्वीकारेणान्तरङ्गे णत्वप्रतिषेधे कर्त्तव्ये बहिरङ्गस्य गुणस्यासिद्धत्वादेव सिद्धे स्थानिवद्भावस्यात्र नोपयोग इति कस्य चिच्छङ्कानिवारणायोक्तम्। पूर्वन्धातुः साधनेन युज्यत इति सिद्धान्तिसम्मतेऽर्थे तु तस्याः प्राप्तिरेव नास्तीति बोध्यम्। यणिति। अस्य नेत्यत्र संबन्धः। क्विब्वचिश्रिवत्युवङ्। राधो हिंसायाम्। अत्रात इत्यवश्यमनुवर्त्तनीयमन्यथाऽलोन्त्यस्येत्यन्त्यस्य स्यात्तथा च तपरत्वबोध्यार्थस्यासत्त्वात्कथमत्र प्रवृत्तिरत आह। अत इत्यादि। अत इत्यस्य प्रकृतसूत्रे असम्बन्धेऽप्याह। श्वाभ्यस्तयोरिति। भाष्यस्वरस इति। तत्र हि तासावत्त्वप्रतिषेधे घसेः प्रतिषेधप्रसङ्गोऽकारवत्त्वात्। सिद्धन्तु हलादिग्रहणात्। हलादिग्रहणं कर्त्तव्यम्। तच्चावश्यं कर्त्तव्यम्। अत्त्यशी प्रयोजयतः। अत्त्यशी तावन्न प्रयोजयतः। तासावनिट इत्युच्यते सेटौ चेमौ तासौ। अञ्जवशू तर्हि प्रयोजयतः। तासौ नित्यानिट इत्युच्यते विभाषितेटावेतौ। एतस्य भाष्यस्य थल्प्रसङ्गेन प्रसक्तस्य यस्मात्थलः सम्भवस्तत्रैव प्रवृत्तिर्वाच्या तेनास्य परस्मैपदसम्बन्धित्वमपीति ध्वनितमिति कल्प्यते। आत्मनेपदित्वन्तु अनुदात्तत्वादेव सिद्धम्। दम्भु दम्भने। दम्भो नाम लोकानुरञ्जनार्थं कर्मानुष्ठानम्। व्याकरणान्तरीयवचनस्येह व्याकरणे प्रवृत्तौ मानमाह। सदेः परस्येत्यादि। दम्भेश्चेत्यस्य सूत्रत्वभ्रमं वारयति। दम्भेश्चेत्यत एकेतीति। पिदपिद्विषयकमितिवादिनो मतेऽस्यापूर्वत्वमेव वा-

SGDF
Sri Gargeshwari Digital Foundation

च्यम् । एवञ्च लिट्पदङ्कित्पदञ्चापूर्वङ्कार्यमित्याह । अत्रेत्यादि । अत एव । अस्य वचनस्याकिद्विषयकत्वादेव । अत्रत्यः । स्वादिषु पठितः । सेट्कः । तृप्यतितृप्यतीति तत्र पाठात् । गणसूत्रमिति । तस्याधिकारत्वे गणे पठिता ये धातवस्तेषां छान्दसत्वमेवेति सिद्धम् ॥

इति स्वादिविवरणम् ।

दिश अतिसर्जने । अयं केवलो दाने प्रयुज्यते । उपसर्गवशेन त्वर्थान्तरेऽप्यत्यस्य प्रयोगः । अत एव तस्मिन्निति निर्दिष्ट इति सूत्रव्याख्यानावसरे निःशब्दो नैरन्तर्यवचनः । दिशिरुच्चारणक्रिय इति व्याख्यानं सङ्गच्छते । ननु त्रस्जो रोपधयोरमन्यतरस्यामितिसूत्रे रोपधयोरितिषष्ठीनिर्देशाद्भ्रस्जेः सम्बन्धिनो रेफस्य निवृत्तिस्वीकारे बरीभृज्ज्यत इत्यत्र रीको रेफस्य निवृत्त्यापत्तिरत आह । वरीत्यादि । नैरर्थक्यमिति । भ्रस्ज इति रोपधयोरर्थविशिष्ट एव विशेषणम् । उक्तरीत्येति । अनर्थकत्वरूपयोक्त्या । रम आगमत्वेऽपि यथाऽस्य प्रसङ्गेन रोपधयोर्निवृत्तिस्तथार्थमाह । रोपधयोः स्थान इति । सुवचमिति । एवञ्च पूर्वविप्रतिषेधो न स्वीकार्य इति भावः । अवधारण इति । एवञ्चायं कुटादित्वातिदेशः कित्संज्ञकप्रत्ययपरत्व एवेति सिद्धम् । प्रश्लेषेणेति । ऋच्छति ऋ ऋृतामृच्छत्यृृतामिति प्रश्लेषेणेत्यर्थः । अत एव । ऋकारप्रश्लेषादेव ॥ तृपतृम्फ ॥ आद्यः । तृपधातुः । अनयोः । तुदादिपठिततृपद्रूपधात्वोः ॥ वृण च । अयमपि धातुः प्रीणने द्रष्टव्यः ॥ अस्य तुदादौ पाठे भाष्यविरोधाशङ्कां वारयितुमुपक्रमते ॥ यत्त्विति ॥ व्याख्यानादिति । यद्यपि करोतेः कुर इति स्वरूपं लाक्षणिकन्तथापि विदांकुर्वन्त्वित्यन्यतरस्यामितिलत्यदर्शनमूलकव्याख्यानान्तरय ग्रहणमिति भावः ॥ प्रामादिकमेवेति । अस्य कुटादिबहिर्भूतत्वेन ततो जातस्य तुमुनो ङित्वाभावेन निषेधाप्राप्तेः ॥ अनिगलक्षणवृद्धेः । अतो हलादेरितिप्राप्तायाः ॥ कश्चिदिति ॥ कडतीतिरूपसिद्ध्यर्थ-

SGDF
Sri Gargeshwari Digital Foundation

तुदादावस्य क्व चित्पाठस्यावश्यकत्वम् । तत्र कुटादिबहिर्भावेन तेषु वा पाठे न लाघवगौरवविचार इत्यरुचिबीजम्॥भ्वादौपाठे तु शप्श्यनोरिति-सूत्रविषयता स्यात् ।अत एवाह । अशोकेति ॥मृङ् प्राणत्यागे । अस्य धातो-ङित्त्वादात्मनेपदे सिद्धे म्रियतेरितिसूत्रन्नियमार्थम् । स चात्मनेपदसा-मान्यस्य न तु तङ एवेत्याशयेनाह ॥ तङित्यानम्येति॥ ननु म्रियतेरिति-सूत्रस्य विध्यर्थत्वमेवास्तु धातोङित्त्वम्मास्त्वितो मूले स्वरार्थमिति ॥ मा हि मृतेत्यत्र ङितः परत्वेन लसार्वधातुकानुदात्तत्वे धातोरुदात्तत्वस्य श्र-वणम्भवति । न च सिज्लोपस्य स्वरे कर्त्तव्येऽसिद्धत्वापत्तिरिति वाच्य-म् । अस्य ङित्त्वसामर्थ्येनासिद्धत्वस्य बाधादित्याहुः ॥ रिपि गतौ ॥ रि-यति । लघूपधगुणादन्तरङ्गत्वादियङ् । तस्याः । नाजानन्तर्यपरिभाषायाः । व्याख्यानादिति । अचि विभाषा । णावुपसंख्यानम् । इहापि यथा स्या-त् निगार्यते । निगाल्यते । इत्युक्त्वा णिलोपे कृतेऽच्परत्वाभावादन्यथा न स्यादित्युक्त्वाऽचः परस्मिन्निति स्थानिवद्भावमाशंक्य पूर्वत्रासिद्धे न स्थानि-वदितिवचनोत्तरम्भाष्ये पठितम् । गिरतेर्लत्वे णावुक्तम् । किमुक्तम् । तस्य दोषः संयोगादिलोपलत्वणत्वेष्विति। अत्र गिरतेरितिकथनेनास्य ग्र-हणमिति स्पष्टमेवेत्येतन्मूलकव्याख्यानादित्यर्थः ॥ अत एव। धातोः का-र्यमितिपरिभाषयोपस्थितस्य विशेष्यत्वादेव । एतत्फलम् । अन्त्यात्पूर्व इत्यस्य फलम् । विशेषः । पूर्वोक्तप्रक्रियातो विशेषः॥ इति पठ्यत इति। तस्य धातुस्वरूपप्रतिपादने तात्पर्यमिति शेषः । न तु लृदित्त्वाभावे त-था सत्यङभावापत्तिः स्यात्। षिच क्षरणे । क्व चित्त्वयमिरित्पठितः । सो-ऽपपाठः । लिपिसिचिह्वश्चेतिनित्यमङ्विधानात् ॥

॥ इति तुदादिविवरणम् ॥

रुधादिभ्यः श्नम् । अस्य मित्त्वेपि प्रत्ययाधिकारपाठात्प्रत्ययत्वमप्यत एव शसेरत्वम् । शकारोच्चारणन्तु श्नान्नलोप इत्यत्र विशेषणार्थम् । तेन

SGDF
Sri Gargeshwari Digital Foundation

यत्नानामित्यत्र न दोषः ॥ न च शः श्रवणार्थ एवास्तु । तृणह इतिनिर्देशात् । न च श्नमः प्रत्ययत्वे भनक्तीत्यत्र दीर्घापत्तिरिति वाच्यम् । यस्मात्प्रत्ययविधिरित्यस्य यद्रूपावच्छिन्नमुद्दिश्य प्रत्ययविधिरित्यर्थात् । स च धर्मो रुधेत्याद्यानुपूर्वीरूपस्तदाश्रयत्वमनावयवानाम् । समुदायस्याप्यत्र नाङ्गत्वन्तत्प्रत्ययपरत्वाभावात् । शर्वभ्यो न सत्यपि सम्भवे बाधनमिति न्यायेन श्नमो बाधकत्वात् । रुधादिभ्यो धातुभ्योऽन्त्यादचः परः श्नम् प्रत्ययो भवतीति वाक्यार्थो बोध्यः ॥ननु शिण्ढिशब्दव्युत्पादनावसरे जश्त्वं ष्टुत्वमित्युक्तन्तच्चायुक्तम् । ष्टुत्वदृष्ट्या जश्त्वस्यासिद्धत्वादत आह । अत्र प्रक्रियेति । भाष्योक्तसिद्धान्तानुसारेणाह । शिण्ढीति सानुस्वार इति । तृणह इम् । मूले एतत्सूत्रव्याख्यानावसरे तृहः श्नमि कृत इति यदुक्तन्तत्फलमाह । श्नमि कृत इत्यादिना । येन नाप्राप्तिन्यायेनेति । श्नमि कृतेऽपि तन्मध्यपतितन्यायेन श्नम्विशिष्टस्य तृहग्रहणेन ग्रहणं स्यादिति येन नाप्राप्तिन्यायस्येह सम्भवः ॥

॥ इति रुधादिविवरणम् ॥

तनादिभ्यस्तथासोरित्यत्र साहचर्याश्रयणेनैकवचनस्य ग्रहणे सति यत्फलं सिद्धन्तन्मूले उक्तमत निष्ट । अतानिष्टेति । अतो हलादेरिति वा वृद्धिः । ननु क्षिणिवत्यस्योतश्चेतिसूत्रे कैयटोक्तस्य का गतिरत आह । क्षिणिवत्यादीति । भाषायामपीत्येक इति । अस्य एवन्तद्ग्रहणव्याख्यानावसरे मूल एवोक्तमिति शेषः । नित्यङ्करोतेः । आरम्भसामर्थ्यान्नित्यत्वे लब्धे नित्यग्रहणं स्पष्टार्थम् । सम्परिभ्याम् । तदावश्यकतेति । चकारस्यावश्यकतेत्यर्थः । केचित्विति । अत उत्सार्वधातुक इतिसूत्रभाष्ये सम्परिभ्याम्भूषणसमवाययोरितिपाठानुसारिण इत्यर्थः । न च भाष्यरीतिस्वीकारे यथासङ्ख्यापत्तिरिति वाच्यम् । संस्कृतम्भक्षा इतिनिर्देशेन तस्येहानाश्रयणात् । समवायशब्दस्य सम्बन्धमात्रपरतया प्रकृते सुट् सुलभः । अत एवोक्तं समवा-

SGDF
Sri Gargeshwari Digital Foundation

यः सम्बन्धः समूहश्चेति । सुट् कात्पूर्वः । आद्यम् । सुट् कादिति । अन्त्यम् । अड्भ्यासव्यवायेऽपीत्येतत् । अनर्थकत्वेन । परभागसमभिव्याहारप्रतिबद्धार्थबोधकत्वशक्तिमत्त्वेन । एतच्च प्रागुपपादितमेव । विकरणान्तभक्ततया । अङ्गस्याड्विधानादट् समुदायभक्तः । एवञ्च वार्त्तिकरीत्या प्रत्ययनिमित्तकद्वित्वाद्युत्तरं सुटः प्रवृत्तिः । वार्त्तिकप्रत्याख्यानप्रकारमाह । भाष्यकृता त्विति । तदर्थेन । उपसर्गार्थेन । उपसर्गद्योत्यार्थान्तर्भावःतत्प्रतिपादकता । धातोः।प्रत्ययोत्पत्तेः प्रागेव धातोः स्वीक्रियते । अत एव । धातोरुपसर्गद्योत्यार्थे वृत्तिस्वीकारादेव । ननु लावस्थायामड्तिपक्षे सुट् कात्पूर्व एव यथा स्यादित्येवमर्थं कात्पूर्वग्रहणं कार्यमेवेत्यत आह । लावस्थेत्यादि । उभ्यरखण्ड एवेति । एतेन प्रघट्टकेन यदि द्वित्वादितः पूर्वं सुट् तदा गुणस्य ऋतश्चेतिविहितस्य प्रवृत्तिदुरुपपादेत्युक्तम्भवति । न चेति । तद्दुर्वारमित्यत्रास्यान्वयः । आनुपूर्वीमात्रावच्छिन्नेति । न च हलादिः शेष इत्यादिशास्त्रस्य प्राक् प्रवृत्तौ न सानुपूर्व्यस्तीति वाच्यम् तस्याङ्गाधिकारे पाठेनाङ्गसंज्ञाया एव प्राक् प्रवृत्तेः।अत एव।प्रत्ययोत्पत्तिवेलायामित्यर्थाश्रयणादेव । तस्य नित्यग्रहणस्य । विधेयविशेषणत्वादिति । उऋ्र्दितिसूत्रानन्तरम्पाठेन । विधेयस्य ऋकारादेशस्य विशेषणत्वादित्यर्थः। अत एव । नित्यग्रहणासम्बन्धादेव । एतेन । प्रत्येकं संयोगसंज्ञापक्षे संहृषीष्टेत्यत्रेड़ापादनपरभाष्यप्रामाण्येन । प्रतिषेधवचनारम्भ एवेति । असुट इति तत्र तत्र वक्तव्यमिति भावः ॥

॥ इति तनादिविवरणम् ॥

मूले विष्टभ्नोतीति । स्तन्भेरिति षत्वम् । अवष्टभ्नोतीति । अवाच्चालम्बनेति । विष्कभ्नोतीति । ननु वेः स्कभ्नातेर्नित्यमितिसूत्रे श्नाप्रत्ययनिर्देशाद्यदा श्नाप्रत्ययस्तदैव षत्वं न्याय्यमिति कथं श्नुप्रत्ययपक्षे षत्वमि-

SGDF
Sri Gargeshwari Digital Foundation

ति चेन्न। धातुनिर्द्देशे श्तिप्प्रत्यये कृते विकरणस्यावश्यकतया शबपवादयोः श्नुश्नाप्रत्यययोः प्रवृत्तिरवश्यं स्वीकार्या तत्रान्यतरोच्चारणं साधुत्वार्थमेव न त्वितरव्यावृत्त्यर्थमिति स्वीकारात्। दृ विदारणे। अयं दिवादिरपि प्रागुक्तः। दीर्यतेर्दृणातेर्वा दट्टदिति भाष्यात्। हलः। तेन। अङ्गस्येत्यस्यावृत्तया हल्विशेषणत्वेन। आवृत्त्या सम्प्रसारणं विशेष्यतयाऽङ्गस्योपादानन्तु विध्यतीत्यादौ दीर्घाभावाय। क्षीष् हिंसायाम्। षित्त्वमस्याङर्थम्। तेन क्षिया इत्यस्य सिद्धिः। क्षिया धर्मव्यतिक्रमरूपा। धातूनामनेकार्थतया धर्मव्यतिक्रमेऽप्यस्य प्रवृत्तिः। दीर्घनिर्द्दशेतीति। जा इतिदीर्घनिर्द्देशेत्यर्थः। अत्र सामान्यतो दीर्घनिर्द्देशसामर्थ्यादित्येवोक्तन्तेनाङ्गवृत्तपरिभाषाभावो ध्वनितस्तदाह। अङ्गवृत्ते ति। मतेनेदमिति। सिज्लोपस्यासिद्धत्वादितिकथनमित्यर्थः। न सिद्ध्येति। वतिघटितानामतिदेशानां त्रिपाद्यामपि प्रवृत्तिरिति प्रागुपपादितम्। इष आभीक्ष्ण्ये। बहुव्रीहिरिति। श्यन्प्रत्ययो यस्मादित्यतद्गुणसंविज्ञानो बहुव्रीहिरित्यर्थः। इडित्यनुवृत्तस्य। आर्द्धधातुकेतिसूत्रादिडित्यनुवृत्तस्य। प्रथमा तु पूर्वसूत्रे चरितार्था। विहितस्येति किम्। ग्राहिता। णिजन्तान्तृच्। न चात्राचः परस्मिन्निति स्यानिवत्त्वम्। अपूर्वविधित्वात्। पञ्चमीसमासेऽपि दीर्घविधिम्प्रति न स्यानिवदितिप्रतिषेध इत्यभिप्रायः। न पदान्तसूत्रभाष्ये वरे यलोपस्वरवर्जमिति भाष्यन्दीर्घस्याप्युपलक्षणम्। विहितविशेषणादेव जरीग्रहिता। जरीग्रहितुम्। जरीगृहितव्यमितयत्र यङन्ते न दीर्घः। आर्द्धधातुकस्येडितिसूत्रादिटोऽनुवर्त्तनादर्थाधिकारान्तस्यैवेटोऽनेन दीर्घ इति चिखदिटो नानेन दीर्घः। तेन ग्राहिता। ग्राहिष्यत इत्यस्य सिद्धिः। यत्तु मूले एकाचो ग्रहेरितिव्याख्यातन्तत्रैकाजिति न प्रकृतन्नापि वार्त्तिककृताऽत्रैकाज्ग्रहणङ्कर्त्तव्यमित्युक्तन्तथापि हरदत्तानुरोधेनोक्तञ्जाग्रहिता जाग्रहिष्यतीत्यत्र यङ्लुगन्ते दीर्घाप्रवृत्तिश्चैकाच इत्यस्य फलमित्यपि वक्तुं शक्यम्। परन्तु भाष्यानुक्तत्वादप्र-

SGDF
Sri Gargeshwari Digital Foundation

माणमेतदित्यभिप्रायेणाह । हरदत्तानुरोधेनेति । तन्मते दोषान्तरमप्याह । अग्रहीष्टामित्यादाविति । न चाडागमस्य बहिरङ्गत्वेनासिद्धत्वादेकाचो विधानमस्त्येवेति वाच्यम् । नाजानन्तर्यपरिभाषायास्तन्मते सत्त्वेन तथा निषेधात् । बहिरङ्गपरिभाषायाऽनित्यत्वाच्चेति ॥

॥ इति क्र्यादिविवरणम् ॥

स्वार्थे विधानार्थमिति । अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवन्तीति स्वार्थविधानार्थमित्यर्थः । सत्यस्य कृञ्यापुक् । सत्यशब्दस्य कृञर्थे णिचि आपुगित्यर्थः । एतेन । लक्षयतेः स्वरितत्वस्यानार्षत्वेन । किन्तेन । इदित्त्वेन । तत्स्वरितार्थमिति । इदित्त्वञ्चरितार्थमित्यर्थः । क्विशब्दमुच्चार्यविहितेति । लक्षणप्रतिपदोक्तपरिभाषयेति भावः । भाष्यानुक्तत्वादिति । णिचः पाक्षिकत्वस्येत्यादिः । चुरादित्वापेक्षमिति । चुरादिभ्यो णिज्वैकल्पिक इत्यर्थे एतज्ज्ञापकमित्यर्थः। एतन्मते आधृषाद्वेतिज्ञापकसिद्धस्यासार्वत्रिकत्वबोधनाय । आधृषीयाणामेव सर्वत्र विकल्पोऽन्येषान्तु लक्ष्यानुरोधेनेति बोधनाय चेति भावः । गणयतेरनेकाच्त्वेप्यामोऽभावायाह । मन्त्रत्वादिति । अनित्यत्ववादिमतं व्याख्याय स्वयमाह । नित्यण्यन्तत्वेपीति । न साधिकेति । आमोऽभावस्य तेनैवोपपादनादिति भावः । अत एव । सामान्यापेक्षज्ञापकाभावादेव । ॠकारान्तत्वप्रयुक्तकार्येति । ॠच्छत्यॄतामितिगुणात्मककार्यं ॠतश्चेतिसूत्रविहितरुगभावात्मककार्यविशिष्टग्रहणमित्यर्थः । ननु ङित्त्वास्सिज्विकल्प इत्येव कुतो नोक्तमत आह । चित्रङादाविति । उक्तन्यायस्य । अवयवेऽचरितार्थस्य समुदायोपकारकत्वमितिन्यायस्येत्यर्थः । उक्तरूपेति । अदनीयवस्तुनो भोजनार्थस्भोजनपात्रे निःक्षेपरूपा इत्यर्थः। भुज्यर्थयमधातोरिति । यमोऽपरिवेषणइत्युक्तत्वादस्मिन्नर्थे तस्य निषेधस्याप्रवृत्तेः । एवञ्च तस्यार्थस्य ग्रहणे यम् चेत्यनेन चुरादिण्यन्ते मित्त्वविधानं व्यर्थं स्यात् । मित्त्वं स्यात् यम् चे-

SGDF
Sri Gargeshwari Digital Foundation

त्यनेनेत्यादिः । वेष्टनापि गृह्यत इति । एवञ्चापरिवेषणे स निषेधः वेष्टना तु परिवेषणमेवेति तस्य निषेधस्यायमविषय इति बोध्यम्। ननु घटादिपठितवचने परिवेषणशब्देन वेष्टनस्यापि ग्रहणे तस्य निषेधस्याप्रवृत्त्याऽमन्तत्वेन सिद्धे यम चेत्यस्य वैयर्थ्यमत आह। घटादिपठितेति। तस्य। घटादिपठितवचनस्य! हेतुमण्णावेवेति। पूर्वोत्तरसाहचर्यात्। फलाभावादिति। यदि वेष्टनस्य परिवेषणशब्देन ग्रहणङ्कृत्वा निषेधाविषयत्वं सम्पाद्यते तदा वैयर्थ्यं वेष्टनरूपेऽर्थे स्वार्थे णिचः सत्त्वेन तस्य वचनस्याप्रवृत्ते रित्यर्थः। अत्र सूत्रे। चुरादिपठिते यम चेतिसूत्रे। अर्थत्रयेति। वेष्टनभोजनावेष्टनारूपार्थत्रयेत्यर्थः। नन्वत्रार्थत्रयग्रहणे परिवेषणे मित्त्वाभ्यनुज्ञासूचकं यद् घटादिपठितवचनेऽपरिवेषण इति तद्व्यर्थमनेन मित्त्वसिद्धेरत आह। घटादिपठित इति। ततः। स्वार्थणिजन्तात्। एकणिज्ज्ञानेन। यमयतीत्यत्रैकणिज्ज्ञानेन। प्रतिपदोक्तत्वात्। साक्षाच्चुरादित्वसिद्धणिशब्दानुवादेन विहितत्वात्। अत एव। चुरादिणिच एवात्र ग्रहणादेव। ञित्त्वं व्यर्थमिति। आत्मनेपदस्यणिचश्चेत्येवसिद्धेः। ननु चिशब्देन सामान्यग्रहणार्थं ञित्त्वमस्त्वित्यत आह। सामान्येति। नात्वमिति। तत्रास्याप्रवृत्तेरुक्तत्वात्। स्वादिपठितचेरपि चिस्फुरोरित्यनेनात्वमित्यभिप्रायेणाह। परे त्विति। उभयोः। हेतुमण्णिच्स्वादिपठितचिञ्धात्वोः। ईदृशरीत्या। चिञ्धातोश्चुरादित्वात्ततो णिज्विधानेन प्रतिपदोक्तत्वमितिरीत्या। णिशब्देन णिसामान्यग्रहणे लाघवमपीत्याह। उत्तरत्रेति। म्लेच्छ अव्यक्ते शब्दे। अव्यक्तावागपशब्दरूपा। गुर्द पूर्व निकेतने। गुर्दपूर्वेति द्वौ धातू। अन्ये तु गुर्देत्येक एव। पूर्वनिकेतनमित्यस्य पूर्वनिवास इत्यर्थ इत्याहुः। अकर्तृगेतीति। परगामि क्रियाफले परस्मैपदवाधनार्थमित्यर्थः। णिच्संयोगेनैवेति। अत एव दंशिप्रभृतिभ्य इदित्वाण्णिजभावपक्षे दंशतीत्यत्रात्मनेपदन्न। भल आभण्डने। आभण्डनमन्त्रलक्षणस्वरूपप्रा-

SGDF
Sri Gargeshwari Digital Foundation

साध्यादिप्रकारकज्ञानानुकूलव्यापाररूपम् । नाम्नो वेत्यंशमिति । नामत्वमस्य नाव्युत्पन्नत्वेन । किन्तु कुशब्दपूर्वकस्मयतेरन्येभ्योऽपीति डप्रत्यये कुगतीतिसमासे बोध्यम् । धात्वर्थ इत्यस्य लाभस्तु प्रातिपदिकाद्धात्वर्थे बहुलमित्यस्य व्यापारसत्त्वात् । क्यङा बाधाभावायेति । अन्यथा शब्दवैरकलहेत्यत्र शब्दशब्दस्य विशिष्योपादानात्क्यङा णिचो बाधः स्यादिति भावः । हन्त्यर्थाश्चेति विहितो णिज्वैकल्पिक इत्यत्रार्थे मानमाह । तेषान्तद्ग्रहण इति । एवं कुपेरपीति । कुपेश्चेत्यनेन स्वार्थेऽत्र णिज्विधानात्कुपधातोर्भ्वादौ पाठसामर्थ्याण्णिज्विकल्प इत्यर्थः। एतत्सामर्थ्यादिति।हन्त्यर्थाश्चेत्यस्य सामर्थ्यादित्यर्थः। यदि निवृत्तप्रेषणादिति सार्वत्रिकं स्यात्तदा हन्त्यर्थेभ्योऽपि धातुभ्यो निवृत्तप्रेषणेभ्यो हेतुमत्स्वार्थे णिचि योऽर्थस्तस्य लाभे हन्त्यर्थाश्चेति स्वार्थे णिज्विधायकं वचनं व्यर्थं स्यादिति भावः। घुषिरविशब्दने । विशब्दनेऽर्थे घुषिरिति धातुश्चुरादौ द्रष्टव्यः । मूले निषेधाल्लिङ्गादिति । अस्माण्णिचो नित्यत्वेऽस्मात्परा निष्ठा नास्तीति स प्रतिषेधो व्यर्थः स्यात्। न च भ्वादिपठिताद्यदा निष्ठा तदा तद्व्यावृत्त्यर्थन्तदस्तु । घुषिरविशब्दने इत्युक्तत्वेन भ्वादेर्विशब्दने वृत्तेरभावात् । न च चुरादिण्यन्तात्क्विपि णिलोपे तत आचारे क्विपि निष्ठायां सम्भवोऽस्तीति वाच्यम्। हलन्तेभ्य आचारे क्विपोऽभावात्। णिलोपस्य स्थानिवत्त्वाच्च । क्वौ लुप्तमिति न सार्वत्रिकम् । एवमिदित्करणमपि णिचः पाक्षिकत्वे ज्ञापकं बोध्यम् । अस्य चेति। चुरादिपठितस्वदधातोः। अस्य । अर्चधातोः। एवमन्येषामपि परस्मैपदिनामिति । यथा तपधातोर्वदधातोश्च भ्वादौ पाठोऽनावश्यकः । आधृषीयत्वेन णिजभावे समीहितरूपसिद्धेः । परस्मैपदिनामित्युपादानमात्मनेपदीयः । षहधातुस्तद्व्यावृत्त्यै णिजभावेऽप्यात्मनेपदार्थमस्य भ्वादौ पाठस्यावश्यकत्वात्। अन्येषामपीतिबहुवचनस्प्रयोगभेदेन । बोध्यः । अनावश्यकत्वेन बोध्यः । ली द्रवीकरणे । लाययति । णिचि वृद्धिः । इति भाष्यादिति । वस्तुतो

SGDF
Sri Gargeshwari Digital Foundation

लाययतीत्यत्रैव लेख उचितः लेतेत्यस्य तु णिजभावे आत्वस्य वैकल्पिकत्वेन तदभावेऽपि सिद्धेः। अस्य पाठात्। धूञ्प्रीञोरित्यस्य पाठात्। एवं प्रीञ्धातोरस्मिन्मते प्राययतीत्येव रूपम्। सूलेकथ वाक्यप्रबन्धे। कथयति। स्वार्थेणिज्विवक्षायामल्लोपः। आर्द्धधातुकस्य बुद्धिस्थत्वे लोपविधानेन लोपस्य परिनिमित्तकत्वम्। एतेन। णिच्प्राग्वर्त्ति गणशब्दानुकरणत्वस्वीकारेण। गणेरितिण्यन्तानुकरण इति। गणधातोरदन्तत्वान्नेकाऽयन्निर्द्देश उपपद्यते किन्तु ण्यन्तस्यैव। वृत्तौ गणेरन्यःस्यस्येत्यत्र गणेरिति तु लुप्ताकारानुकरणादिका बोध्यः। णौ चङ्पर इति। यद्यपि णाविति न प्रकृतम्। तथापि चङ्पर इति बहुव्रीहिणा सन्वदिति सूत्रे तथाक्षिप्तमितीहाप्येवमुक्तम्। णस्य दीर्घ इति। णस्य ईकारादेश इत्यर्थः। क्व चित्स्यादिति पाठः। स्तन गदीदेवशब्दे। ननु गदधातोरदन्तत्वाद्गदी इत्यनुपपन्नमत आह। इगन्तादिति। लुप्ताकारान्तानुकरणादिका निर्द्देशोऽयमिति भावः। वस्तुतोयमकारान्त एव तदाह। प्रकरणादिति। अन्तरङ्गत्वादिति। आर्द्धधातुकोपदेश एव लोपविधानेनाल्लोपस्य प्रथमत एव प्रवृत्तेः। यदुक्तम्पययोरिति सूले तस्योपपत्तिमाह। अयम्भाव इत्यादिना। इत्येव सिद्धेरिति। एतेन वर्गग्रहणाभावेपीष्टसिद्धिरुपपादिता। एतत्सूत्रारम्भसामर्थ्येन। पययोरित्युपादानसामर्थ्येन। तदभावात्। स्थानिवत्त्वाभावात्। तन्निमित्तकादेशस्य। णिज्निमित्तकादेशस्य। एवञ्च द्वित्वे कर्त्तव्ये णिज्निमित्तकादेशो न भवतीति वचनव्यक्त्या निषेधस्य बलवत्त्वात्तद्विषयेऽन्तरङ्गस्यापि कार्यस्य पूर्वमप्रवृत्तिरिति भावः। तुतावयिषतीत्यादि। एतेष्वभ्यासे उकारस्य श्रवणम्भवति। एकव्यवधाने प्रवृत्तिरिति। अस्य इत्येव ज्ञाप्यत इति शेषः। तेन। येन नाव्यवधानन्यायाश्रयणेन। तदन्यतरेति। द्वित्वनिमित्तप्रत्यय व्यवधायकैकप्रत्ययेत्यर्थः। अत्र णिज्ग्रहणमिसामान्योपलक्षणम्। तेन आस्यशब्दात्सिङ् अङ्गानिरसन इति णिङ्प्रत्ययेऽपि निषेधप्रवृत्त्या आसस्यदित्यत्र प्रक्रियादशायामुत्तरखण्डे ऽवर्णसत्त्वेन नि-

SGDF
Sri Gangeshwari Digital Foundation

धेधसिद्धिः । तदुक्तम्भाष्ये । ओः पुयण्जिषु वचनं ज्ञापकं णौ स्थानिवद्भावस्येति ॥नन्वेवमिति । यत्र प्रक्रियादशायां परिनिष्ठिते वेत्यस्य स्वीकारे ॥द्वितीयद्वित्वे। लशब्दस्य द्वित्वे । अत्र प्रक्रियादशायामुत्तरखण्डेऽवर्णलाभस्य सत्त्वात् ॥ एतद्भाष्येति ॥ इतायां वृद्धौ टिलोप इत्यत्र हलिकल्योरत्वनिपातनस्य ज्ञापकत्वप्रतिपादनपरभाष्येत्यर्थः॥ तत्पाठेन॥यथेष्टमित्यस्यपाठेनयथा कथेत्यत्राकारोच्चारणं वृद्ध्यभावार्थन्तथोनेत्यत्राकारोच्चारणन्लोपधाकार्यप्रतिबन्धार्थम्।दीर्घोकारस्य सत्त्वादित्यकारोच्चारणादिहाल्लोपविकल्प इति कश्चिदाह तन्मतन्दूषयति॥ यत्त्विति ॥ णिज्विकल्पार्थमिति ॥ एवञ्च णिजभावेप्यनेकाच्त्वादस्मादाम्भवतीति तद्भावः। अपास्तम् । अम्याऽसेऽकारस्यश्रवणेनाकारोच्चारणस्य चारितार्थ्यात्सामर्थ्यस्यैवाभावादिति भावः॥ फलान्तरमप्याह॥ किञ्चेति ॥ माधवादिसम्मतरीत्या मूलोक्तं व्याख्याय भाष्यस्वारस्यसिद्धार्थमाह । परे त्विति ॥ इत्यत्रापि प्राप्नोतीति ॥ उपधायाश्चेतीत्वस्य स्थानिवद्भावः प्राप्नोतीत्यर्थः ॥ तुतावयिषतीत्यादीति । आदिना नुनावयिषतीत्यस्य सङ्ग्रहः। तुनुधातुभ्यां हेतुमति णिचि सनि रूपम् । अवर्णपरत्वसम्पादकेति । अत्रावर्णपरत्व सम्पादकेत्युपादानात्साक्षात्स्वस्यावर्णसम्पादकत्वाभावेऽपि तुतावयिषतीत्यादौ वृद्ध्यादेशावावादेशस्यतत्सम्पादकत्वाद्वृद्धेरप्यवर्णसम्पादकत्वम्बोध्यम्। एतेन। वक्ष्यमाणदूषणेन। सर्वथेति॥ अत्र सर्वथेतिकथनेनावर्णपरत्वसम्पादकादेशस्यानित्त्वेन तुल्यतेतिसिद्धान्तरीत्या स्थानिवद्भावाप्रवृत्तिः सूचिता । आदेशस्यावर्णपरत्वसम्पादकत्वाभावात्॥ मूलोक्तरीत्यापि न स्थानिवद्भावप्रवृत्तिरित्याह । द्वित्वप्रवृत्तिवेलायामित्यादिना ॥ सूत्रादेरिति । अत्रादिना स्थूलसत्रयोः परिग्रहः ॥ अत्र स्थूलादेरिति वक्तुमुचितम् ॥ मध्योदात्तमिति। शपा शहैकादेशेऽप्येकादेश उदात्तेनोदात्त इति मध्योदात्तमित्यर्थः ॥ इति कश्चिदिति ॥ भाष्योक्तोदाहरणास्वारस्यमत्रारुचिः ॥ सूत्राम्चकारेत्यामर्थः पाठ इत्यपि कश्चि-

SGDF
Sri Gargeshwari Digital Foundation

त् ॥ गणसूत्रमिति ॥ चुराद्यन्तर्गणसूत्रमित्यर्थः ॥ अत एव ॥ प्रातिपदिकपदोपादानादेव ॥ अत एव । प्रातिपदिकपदोपादानं यत्र तत्र सुवन्तादित्यर्थालाभादेव ॥ तदन्तार्थकादिति ॥ द्वितीयान्तार्थकत्कार्मसमर्पकादित्यर्थः ॥ अत एव । सुवन्तादुत्पत्त्यभावादेव । पचयतीत्यत्र पचाद्यजन्ताण्णिच् । न च कुत्वेकर्तव्ये स्थानिवद्भावष्टिलोपस्य भविष्यतीति वाच्यम् । कुत्वे न स्थानिवदितिनिषेधात् । वार्त्तिकादिति । तत्करोति तदाचष्ट इतिवार्त्तिकादित्यर्थः । ख्युनामित्यादीनामिति । टिड्ढाणञितिसूत्रे तरप्ख्युनामिति हि के चित्पठन्ति । केचित्तु सुवन्ताण्णिजुत्पत्तावपि नातपरराजतपचतीत्यत्र कुत्वस्य प्राप्तिः । इष्ठवदित्यदिष्टेन भत्वेन पदत्वस्य बाधात् । यथोद्देशपक्षाश्रयणेन पूर्वकालजातभत्वेन णिचो लोपेऽपि पदत्वबाधस्य वक्तुं शक्यत्वात् । प्रातिपदिकाण्णिजितिपक्षेऽपि भत्वातिदेशोऽवश्यमङ्गीकार्यः । अन्यथा स्त्रग्विणमाख्यदस्रजदित्यत्र कुत्वापत्तिरिति । तन्न । सुवन्तादित्यस्य सुप इत्यस्याप्रकृतत्वेन तस्य पक्षस्य पूर्वमेवासम्भवस्योपपादितत्वात् । न च तत्करोतीत्यत्र तदिति तेनातिक्रामतीत्यत्र तेनेति विभिन्नविभक्तिनिर्देशात्स पक्षः स्वीक्रियत इति वाच्यम् । तत्तेनेतिविभिन्नविभक्तिनिर्देशस्य क्व चित्कर्मसमर्पकात्क्व चित्करणसमर्पकात्प्रातिपदिकाण्णिज्यथा स्यादित्येवमर्थत्वस्य स्वीकारात् । प्रातिपदिकपदस्य लक्षणायां साधकाभावाच्च । इष्ठवदित्यतिदिष्टभत्वेन पदत्वस्य बाध इत्यपि न । कार्यकालपक्षे णिचो लोपेन तन्निमित्तकस्य भत्वस्य वक्तुमशक्यत्वात् । प्रत्ययलोप इतिसूत्रस्य नियमार्थत्वमेव भाष्यकृता सिद्धान्तितमिति स्थानिवद्भाव एव प्रकृते वाच्यः स च न सम्भवति । यन्निमित्तवैकल्यप्रयुक्तोपदेशाप्रवृत्तिस्तन्निमित्तातिरिक्तसर्वनिमित्तकस्वभतिदेशस्येत्यस्य सर्वसम्मतत्वादन्यथा सर्वस्मिन्नित्यत्रापि सुप्त्वातिदेशेन यञादित्वाभावेऽपि दीर्घापत्तिः स्यात् । एवञ्चातिदिष्टभत्वस्याप्यज्विधिनिमित्तकतयाऽनल्विधावितिनिषेधात् । न चात्र यथोद्देशपक्ष एवाश्रीयते

SGDF
Sri Gargeshwari Digital Foundation

न तु कार्यकालपक्ष इति वाच्यम् । अन्तर्वर्त्तिसुब्निमित्तकपदत्वस्य बहिर्भूतणिज्निमित्तकभत्वेन बाधायोगात् । न च पदत्वोन्तरम्भत्वमस्तु । संज्ञाद्वयस्याकडारीयत्वेनासमावेशात् । यदपि प्रातिपदिकात्णिजिति पक्षेऽपि भत्वातिदेशोऽस्स्रजदित्येवमर्थं स्वीकार्य इति । तदपि न स्रग्विणमाचष्टे स्रजयतीत्यत्र कुत्वादर्शनेनैतादृशे विषयेऽन्तर्वर्त्तिसुप्निमित्तकपदत्वस्यापि बहिरङ्गणिज्निमित्तकभत्वेन भाष्यप्रामाण्येन बाधस्य कल्पनादिति दिक् । प्रातिपदिकादेवेति । अन्यथा सुप इत्येव वदेत् । इष्ठवदित्यनेनेष्ठन्निमित्तककार्यस्यैवातिदेशो न त्विष्ठनो यत्कार्यन्तस्याप्यतिदेश इत्याह । तत्रेत्यादिना । अत एव । इष्ठन्निमित्तककार्यस्यैवातिदेशादेव । पाश्चमिकः कन्निति । युवाल्पयोः कनन्यतरस्यामितिसूत्रविहितः कन्नित्यर्थः । एतेन पाश्चमिकज्याद्यादेशनिरासः । अत एव । पाश्चमिककन्मात्रातिदेशस्येष्टत्वादेव । केचिन्मुख्याः । मन्वते । भारद्वाजीयवार्त्तिकन्तु न परिगणनङ्किन्तूदाहरणनिदर्शनपरमिति च सम्प्रतिपद्यन्ते इत्यपि बोध्यम् । अमुमेवार्थमाह यद्यपीत्यादिना । तस्या अपि । भसंज्ञाया अपि । ऐडविडयतीति । इडविडोऽपत्यं स्त्री इडविड् । जनपदशब्दादित्यञ् । तस्यातश्चेति स्त्रियां लुक् । तत आख्यातार्थे णिच् । पुंवद्भावेनाञन्तत्वमिति टिलोपेऽप्यञ एव निवृत्तिः । नन्विष्ठवदित्यतिदेशे न णिचस्तद्धितत्वातिदेशे तस्मिन्नित्यादिवृद्धिरपि स्यादित्यत आह । इष्ठनि दृष्टेति । तद्धितत्वन्तु नातिदिश्यते । उपमेये सप्तमीदर्शनादित्युक्तत्वादिति भावः । भारद्वाजीयवार्त्तिकम्परिगणनपरमितिवादिनोऽपि टिलोपपदस्टिलोपनिमित्तभसंज्ञाया अप्युपलक्षणम् । स्रजयतीतिभाष्योदाहरणादित्यपि दिगित्यनेन सूचितम् । एनीमाचष्टे एतयतीत्येतत्पुंवद्भावोदाहरणन्नोपन्यस्तम् । टिलोपेन ङीपि निवृत्ते तत्सन्नियोगशिष्टनस्यापि निवृत्तिसिद्धेः । एवन्दारदयतीत्यपि पुंवद्भावोदाहरणन्द्रष्टव्यम् । अत एव । वृद्धौ सत्यां टिलोप इतिपक्षस्वीकारादेव । ननु लोपस्य नि-

SGDF
Sri Gargeshwari Digital Foundation

त्यत्वेन परत्वादित्यसङ्गतमत आह । लोपस्येति । तस्यापि टिलोपस्येति । अपिनाऽकृतायां वृद्धौ टिलोपसंग्रहः । अत एव । वृद्धेर्लोपो बलीयानितिपक्षस्वीकारादेव । प्रत्याहारग्रहणञ्चरितार्थमिति । तद्धि यत्रेको लोपप्राप्तिस्तत्र वृद्धेः पूर्वं यदि लोपः स्यात्तदा चरितार्थम्भवेत् वृद्धौ सत्यां लोपे त्वनग्लोप इत्यग्लोपित्वमकारलोपेनैव सम्पादनीयमित्यलोपनोव्यावृत्तये नालोपीत्येव वदेदिति भावः । ननु स्वामिनमाख्यदस्वामद्दोदुहमाख्यदजुगोहदित्यत्र वृद्धेः प्राप्त्यभावात्प्रत्याहाराश्रयणञ्चरितार्थमत आह । इदुदुपधेन्य इति द्वयोः पक्षयोर्युक्तम्पक्षमाह । साम्प्रमिकमेवेति । तत्त्वेति । एकदेश्युक्तित्वमित्यर्थः । तदेतदुपपादयति । लोपस्येति । एकस्या वृद्धेः कृताकृतप्रसङ्गित्वस्य वक्तुमशक्यतया नित्यत्वाशङ्काया एवासङ्गत्या प्रकारान्तरेण तस्या अनित्यत्वोपपादनमयुक्तमिति सा एकदेश्युक्तिरिति भावः । अत एव । वृद्धेर्लोपस्य बलवत्त्वादेव । अवीवददिति । णिजन्तात्सिच् लुङ् चङ् । णिलोपे । प्रथमणिचो लोपे । कैयटस्यापि द्वितीयः पक्षः सम्मत इत्याह । एतदेवेति । द्वितीयपक्षस्यैव युक्तत्वेऽप्यचकलदित्यस्य सिद्धिमाह । किञ्चेति । नियमार्थत्वेनेति । हलप्रतिपादकाद्यदि णिच् तदा हलकलयोरेवेतिनियमार्थत्वेनेत्यर्थः । उपसंख्यानेन सिद्धेरिति । अत एव णौ चङीतिसूत्रभाष्ये णेर्णिचीतिवचनस्यावीवददित्यत्र प्रयोजनमुक्त्वा णिलोपे कृते व्यवधानाभावशङ्कायां स्थानिवद्भावेन व्यवधानमुक्त्वा चङ्परनिर्ह्रासे स्थानिवत्त्वनिषेधमुक्त्वा यदर्थमयं प्रतिषेधस्तस्य ह्रस्वत्वस्य नाग्लोपीतिनिषेधः स्यादिति शङ्कायां वृद्धेर्लोपस्य प्रत्याहारग्रहणेन बलवत्त्वं नोपपादनङ्कृत्वाऽवीवददित्यस्य णेर्णिचीतिवचनेनैव सिद्धिरुपसंहारे उक्ता तस्मादुपसङ्ख्यानङ्कर्त्तव्यमित्यनेन । अन्येषान्त्विति । भासस्य इः भासेः । वासस्य उः वासौः । भासयमाख्यत् अबीभसत् वासामाख्यदवीवसदित्यादीनामित्यर्थः । तत्साध्यानाम् । चङ्परनिर्ह्रासेतिवचनसाध्यानाम् । कैयटे स्पष्टमिति । तेन हि ता-

SGDF
Sri Gargeshwari Digital Foundation

ल्लोपीतिसूत्रस्थाध्यस्यामनालदित्यस्य टिलोपस्य स्थानिवत्त्वादनुपधात्वा-
त्प्राप्तिरेव नास्तीत्याशङ्कायां भाष्यीयाया अभिप्रायमुक्त्वा ननु प्रतिषिध्यते
स्थानिवत्त्वं चङ्परनिर्ह्रासिनेत्याशङ्कयोक्तन्नैतदस्ति। यदर्थः स प्रतिषेध-
स्तस्य णेर्णिच्युपसङ्ख्यानमित्यनेन साधितत्वान्न वक्तव्य इति प्रतिपादित-
म्। चकारस्यानुक्तसमुच्चयार्थत्वे साधकमाह मूले तथा च वार्त्तिकमि-
त्यादिना। आख्यानशब्दे कर्मणि ल्युट्। वार्त्तिकार्थमाह। आख्यानवा-
चकेति। अत एव। वार्त्तिकस्योक्तार्थत्वादेव। अन्यथा यात्त्वाशङ्-
कारकमित्यर्थास्वीकारे॥ यदुक्तम्प्रकृतिप्रत्यापत्तिरित्यस्य कृतो या प्रकृ-
तिस्तस्याविकारपरित्यागेन स्वरूपेणावस्थानिति व्याख्यानन्तन्न यु-
क्तमित्यभिप्रायेणाह। परे त्विति॥ प्रकृतिपदयोः॥ वार्त्तिकस्थप्रकृति-
पदयोः। आख्यानपदे कर्मणिल्युटो बाहुलकत्कारणे न यद्यदाख्येयं तत्स-
र्वङ्गृह्यते न तु प्रसिद्धमेव। अत एव काश्याः प्रस्थितो द्वियोजने सू-
र्योद्गमनं सम्भावयते सूर्यमुद्गमयतीत्यपि भवति॥ किञ्च यदाख्येय-
न्तद्दर्शनसमानकालिकमेव कथनं यत्र तत्रैवास्य प्रवृत्तिरिष्यते। यदा
त्वरण्ये मृगरणन्दृष्ट्वा ततो ग्रामे आगत्य मृगरमणमाचष्टे तत्र वाक्यमेव भ
वति न तु णिच्॥ कंसवधादिशब्दानामाख्यानवाचककृत्पदेन ग्रहणङ्-
कृद्ग्रहणपरिभाषया बोध्यम्॥ न च प्रकृतिवच्च कारकमित्यनेन कृतिस-
ति कारकं यद्विभक्त्यन्तन्तस्यानिवृत्तिरपूर्वा तत्प्रकृतिवाच्यार्थकारकवा-
चिका विभक्तिर्विधीयते तदा राजानमागमयतीत्यत्र प्रत्ययलक्षणेन
पदत्वान्नलोपः स्यादिति वाच्यम्। उत्तरकालजातविभक्तिनिमित्तकभत्वे-
न पदत्वस्य बाधात्॥ न द्वन्द्वो व्याख्यानादिति॥ द्वन्द्वस्याभिप्रेतत्वे द्वि-
वचनेनैव निर्दिशेत्। किञ्च तेनातिक्रामतीत्यतस्तेनेत्यनुवृत्त्यैव सिद्धे क-
र्तृकरणादित्युपादानवैयर्थ्यञ्च स्यादित्येतन्मूलकव्याख्यानादित्यर्थः। क-
र्तुर्व्यापार्यमितीति कर्तृवृत्तिव्यापारप्रयोज्यव्यापाराश्रय इत्यर्थः। कर्तृ-
ग्रहणाद्यद्यत्कर्तृव्यापार्यन्तत्सर्वङ्गृह्यते न तु करणत्वेन लोकप्रसिद्धमेवे-

SGDF Sri Gargeshwari Digital Foundation

पत्येति ॥ तत्र ह्यार्द्धधातुकइत्यस्य परसप्तमीत्वपक्षे भव्यम्प्रयमाख्ये-यमित्यत्र ण्यति कृतेऽनिष्टे प्रत्यये आदेशाः स्युरितिदोषस्यसाम्याश्रयत्वा द्विशेषस्यानाश्रय इत्यादिनाऽर्द्ध धातुकत्वजातौ भव्यमित्यादावस्तेर्भूरित्या देशे कृते यो यतः प्राप्नोति स ततो भविष्यतीति समाधाने जातिवादिनैक-देशिना कृते सामान्येन पौर्वापर्याभावाज्जग्ध्यादीनामनुपपत्तिरितिदूषण-मभिधायार्थसिद्धिरेवैषा यत्सामान्येन पौर्वापर्यन्नास्तीत्यसति पौर्वापर्ये विषयसप्तमी विज्ञास्यत इत्युक्तम् ॥ तदुक्तरीत्या जात्या पौर्वापर्यमभ्यु-पेत्याप्याह । किञ्चेति । अत एव । णावग्लोप इतिपदस्य भवदुक्तव्या-ख्याने विकल्पेन दूषणसम्भवादेव ॥ इत्याहुः । भाष्यतत्त्वविदः ॥ अ-न्तरङ्गत्वाद् वृध्यादेरिति । अन्तरत्वादप्राप्तस्य वृद्ध्यादेरित्यर्थः ॥ तत्फलम् । उपसर्गनिमित्तादितिव्याख्यानफलमित्यर्थः ॥ अन्यथा । उपधाह्रस्वत्वस्य प्रागप्रवृत्तिस्वीकारे ॥ मूले उब्जआर्जवे ॥ उपदे-शे । धातूपदेशे ॥ दकारोच्चारणसामर्थ्यादिति । तद्धि न न्द्राइति-निषेधप्रवृत्त्यर्थमेव यदि निपातनेन बकारोऽन्तरङ्गो द्वित्प्राक् स्यात्तदा दकारोच्चारणं व्यर्थं स्यात् ॥ नन्विदम्भुजन्युब्जमितिसूत्रव्याख्यानकालि-कग्रन्थविरुद्धम् ॥ तथाहि । तत्र हिपाण्युपतापयोः किम् । भोगः स-मुद्ग इति । अत्र समुद्ग इत्यत्र दकारस्य श्रवणं यथा स्यादित्येवमर्थ-न्दकारोच्चारणस्य चारितार्थ्याद्दकारोच्चारणसामर्थ्यादितिसामर्थ्योक्तयसङ्ग-तेरिति चेन्न ॥ इको गुणवृद्धीतिसूत्रे यथा इग्ग्रहणमात्सन्ध्यक्षरव्यञ्जननि-वृत्यर्थमित्यनेन व्यञ्जननिवृत्यर्थत्वे कथिते तृतीयप्रयोजननिराकरणावसरे गमेरप्ययण्डो वक्तव्यः अभ्युद्गः समुद्ग इति यथास्यादित्युक्तम्भाष्ये । यदि कुत्वविषयेप्युब्जेः प्रयोगः स्यात्तदाऽस्माद् घञि अभ्युद्गः समुद्गइति प्र-योगयोः सिद्धौ गमेरपीति भाष्यासङ्गतिरिति अविरविकन्यायेनास्यकु-त्वविषये कुत्वविषयेगमधातुप्रकृतिकडान्तस्य प्रयोग इत्यत्रभाष्यतात्पर्य-न्तथा पाण्युपतापयोः किम् अभ्युद्गः समुद्ग इतिग्रन्थस्यापि तद्भाष्यैकवाक्य

SGDF
Sri Gargeshwari Digital Foundation

तयाऽकुत्वविषयेऽस्योब्जधातोः कुत्वविषये गमूधातुप्रकृतिकडान्तस्य प्रयोग इत्यत्रैव तात्पर्यङ्कल्प्यते इत्याशयात्॥परे तु दकारोच्चारणन्नाम्युद्नः समुद्नइत्यत्र दकारश्रवणार्थन्तयोरुपधायान्तकारस्य थकारस्य वोच्चारणेन सिद्धिसम्भवादिति दकारोच्चारणन्नन्द्रा इतिनिषेधप्रवृत्यर्थमेवेत्याशय इति न पूर्वापरविरोध इत्याहुः। अदिद्रियदिति। अत्र दकारस्य संयोगादित्वेप्यादिभूतादचः परत्वाभावान्निषेधो नेति भावः। इतिपक्ष इति। मयतेरिदन्यतरस्याम् लुङ्लङ्लृङ्क्ष्वडुदात्त इति द्विलकारकनिर्द्देशपक्षे। परत्वादपीति। शब्दान्तरप्राप्त्या द्वयोरप्यनित्यत्वमिति भावः। अधिकारसूत्रत्वेन। एकाचो द्वे इतिवदधिकारसूत्रत्वेन। एतेन द्वित्वविधायकसूत्रे धातोरित्यस्य सत्त्वात्तदेकवाक्यतासम्भवो ध्वनितः। एवञ्च चङीतिसूत्रेऽप्युपस्थितौ तत्प्रदेशे धातुसंज्ञाकालिकाद्यदेरचः पराः संयोगादयो नदरा द्विर्न भवन्तीति वाक्यार्थः प्रसज्यप्रतिषेधपक्षे पर्युदासन्यायेन तु धातुसंज्ञाप्रवृत्तिकालिकादादिभूतादचः परे ये संयोगादयो नदरास्तद्भिन्ना द्वे भवन्तीत्यर्थान्निषेधाप्राप्तिरिति भावः। किञ्च विधिशास्त्रैकवाक्यतया पिषेधस्यान्तर्भूतचङ्निमित्तकत्वे नैतद्दृष्ट्या वहिर्भूयलकारनिमित्तकस्याटोऽसिद्धत्वेन निषेधाभाव इत्यपि बोध्यम्। नाजानन्तर्यपरिभाषा त्वनित्या नास्त्येव वेति बोध्यम्। अलाक्षणिकत्वादिति। एतेन पै इत्यस्य व्यावृत्तिरसूचिता। अर्त्तिह्रीत्यस्य इति। युगागमविधायके पिवतेरेव ग्रहणमिति हि प्रतिपादितम्। वचनम्। पातेर्णाविति वचनम्। पातेर्णाविति वचने णावित्यस्य निमित्तस्योपादानेन प्रत्यादर्शनस्योक्तिसम्भवाभावान्न लुक्शब्दस्य संज्ञाभूतस्य ग्रहणमित्यपि बोध्यम्। व्याख्यानादिति। सूत्रेऽन्यतरस्याङ्ग्रहणकरणमूलकव्याख्यानादित्यर्थः। यदि निरनुबन्धकत्वात् क्र्यादेर्लीधातोरादादिकस्य लाधातोः प्रतिपदोक्तस्यैव ग्रहणमभिप्रेतमभविष्यत्तदा धातुभेदेन रूपद्वयसिद्धौ प्रकृतसूत्रेऽन्यतरस्याङ्ग्रहणन्नाकरिष्यादिति भावः। आत्मनेपदविषयेति।

SGDF
Sri Gangeshwari Digital Foundation

लियः सस्मानतेत्यनेन तत्रात्मनेपदविधानादिति भावः । इदमेव । मतान्तरमेव । इहापि द्वयोर्ग्रहणं व्याख्यानादिति । अन्यतरस्याङ्ग्रहणेन लीधातुविषये व्यवस्थापकन्यायाप्रवृत्तिज्ञापनमूलकव्याख्यानादित्यर्थः । कारणपरहेतुशब्देन षष्ठीसमासे हेतुपादानमनर्थकमित्याह । हेतुसम्बन्धीति । एतत् । इकारप्रश्लेषेण दोषवारणम् । भीस्मीप्रकृतिकेति । प्रत्यासत्त्या तथा कल्प्यत इति भावः । णाविति चेति । आर्द्धधातुक इत्यस्य विषयसप्तमीत्वं प्राग् व्यवस्थापितमिति तत्सामानाधिकरण्यात्साविप्यपि विषयसप्तमीति भावः । ओः पुयण्जीतिसूत्रस्थवर्गादिग्रहणज्ञापितवचनस्येहाप्रवृत्त्या णौ कृतस्य गाङादेशस्य न स्थानिवत्त्वमित्याह । तत्रादेशस्येत्यादिना । सिध्यतेरपार । अपारलौकिकोऽर्थः प्रकृते धात्वर्थफलरूपो विवक्षितः । परलोकः प्रयोजनमस्य पारलौकिकम् । अन्नं साधयतीत्यत्र धात्वर्थफलन्निष्पत्तिरूपन्तच्च परम्परया यद्यपि ब्राह्मणेभ्यो दानादिना पारलौकिकम्भवति । तथापि साक्षाद्यत्पारलौकिकन्तदेव फलमपारलौकिकेत्यत्र प्रतियोगित्वेन विवक्षितमित्येतत्सूचनाय ऐहलौकिक इति वक्तव्येऽपारलौकिक इत्युपात्तम् । प्रजने वीयतेः । विशेषाभावादिति । आत्वभावाभावयोर्विशेषाभावादित्यर्थः । विशेषसम्भावनानिरासायाह । वचीस्वपीत्यादीति । पक्षयोरिति । तत्र हि काम्यचः ककारस्य फलाभावादित्संज्ञाभावे उक्ते इदन्तर्हि प्रयोजनमुपयट्काम्यतीत्यत्र सम्प्रसारणं यथा स्यादितिपूर्वपक्षिणोक्ते यजादिभिरत्र कितं विशेषयिष्यामः यजादिभ्यो विहिते कितीति समाधायायापि कथञ्चिदित्कार्यं स्यादेवमपि न दोषः सुप आत्मनः क्यच् काम्यच्चेतिचकारस्य प्रश्लेषेण काम्यचः ककारस्यानादित्त्वं साधितम् । अथापीति । यजादिभिः किन्न विशेष्यते कार्यित्वेन यजादयो निर्दिश्यन्त इति कैयटः । एतेनोभयोः पक्षयोः फलैक्यम्बोधितम् । यदि सम्प्रसारणयोग्येभ्यो यन्तेभ्यः क्विप्स्यात्तदा णिलोपे क्वौ विधिम्प्रतीति स्थानिवद्भावनिषेधे विहितवि-

SGDF
Sri Gargeshwari Digital Foundation

शेषणाभावपक्षे । सम्प्रसारणस्य विहितविशेषणपक्षे सम्प्रसारणाभावस्य प्राप्तिरिति फलभेदः स्यादिति तादृशेभ्यः क्विब्भावः कल्प्य इति भावः । एतेन । पूर्वोक्तव्याख्यानेन । व्याः । व्यौ इत्यादिरूपाणीति । आत्वपक्षे णौ युगागमेऽपि णिजन्तात्क्विपि णिलोपे वल्निमित्तकयकारलोपे व्या इत्यादिरूपम् । वलि लोपे णिलोपस्य स्थानिवत्त्वन्तु न । क्वौ लुप्तमिति निषेधात् । आत्वाभावपक्षे तु णिच्परत्वेऽपि युगागमो न । शाच्छासेति-सूत्रे आत इत्यस्यार्त्तिह्रीतिसूत्रादनुवर्त्तनात् । अत एवाजूहवदजुहाव-दित्यत्र युगागमाभावः । एवञ्चाचोञ्णितीति वृद्धौ व्यैरित्यादिरूपसि-ति बोध्यम् । ननु णिजन्ताद्विचि सत्यात्वपक्षे युगागमे वलि लोपे णि-लोपस्य स्थानिवत्त्वेन यान्तमात्वाभावे तु व्यैरितिविशेषोऽस्त्येवेत्यत आ-ह । विच इति । वा चित्तविरागे । चित्तम्मनः । तस्य विरागोऽप्रीतिः । स्वीययोग्यार्थग्रहणानुकूलव्यापाराभावरूपा । तस्य । क्रत्वादेः । अनेन । आखेट इतिव्याख्यानेन । मृगरमणमितिसमुदाय आखेटकपरः मृगपदा-र्थो न विवक्षितः । आखेटश्च ग्रहणानुकूलव्यापारविशेषः । अन्ये त्विति । एतन्मते मृगरमण इत्यत्र मृगपदार्थो विवक्षित एव । यत्र रञ्जधातुर्मृगनि-ष्ठग्रहणाद्यनुकूलव्यापारवाचकस्तत्रैवास्य प्रवृत्तिः । चिस्फुरोर्णौ । अत्र चिशब्देन चुरादिस्वादिपठितयोर्ग्रहणम् । मित्त्वे तु विशेषः । ननु प्रति-पदोक्तपरिभाषया चुरादिणिच एव णावित्यनेन ग्रहणमिति मते चिनो-तेश्चापयतीत्यनुपपन्नमत आह । इदञ्चुरादीति । ननु कृतात्वस्य द्वित्वे-ऽभ्यासेऽकारश्रवणापत्तिरत आह । आत्वस्येति । ननूभौ साभ्यासस्येत्यत्र साभ्यासस्येति कार्यिणो नकारस्य विशेषणं स्याद्गुणानाञ्च परार्थत्वादि-तिन्यायादुभाविति च न नकारस्य विशेषणम्भविष्यति । साभ्यासस्येत्य-नेनैवाभ्यासावयवनकारस्य निवृत्तेर्लाभे सत्युभाविति व्यर्थं स्यादिति सामर्थ्यादुभाविति विधेयस्य णस्य विशेषणं स्यात्तथा चाभ्यासस्योत्तर-खण्डनकारस्य च भ्रस्जो रोपधयोरमन्यतरस्यामित्यत्रेव स्यान्नषष्ठीनिर्दे-

SGDF
Sri Gargeshwari Digital Foundation

ज्ञान्निवृत्त्यापत्तिरत आह । साभ्यासस्येति । गुणः कृतात्मसंस्कार इति-न्यायेन प्रकृते गुणानाञ्चेत्यस्य बाध इति भावः । व्याख्यानादिति । लक्ष्यानुसारिव्याख्यानादित्यर्थः । इदञ्च प्रकृतसूत्रभाष्ये साभ्यासस्य द्वयोरिष्टमित्यनेन स्पष्टम् । अत एव । उक्तार्थस्यैवाभिप्रेतत्वादेव । अत एव । अभ्यासश्रवणस्येष्टत्वादेव । अभ्यासेनेति । विना तद्योगमित्युक्तत्वेन सहार्थे तृतीया । तदनुवादकम् । अनितेरितिसूत्रसिद्धार्थानुवादकम् । अत एव । उभावित्यस्य विधेयविशेषणत्वादेव । अत्पूर्वस्येतिवदिति । तस्य यथा स्थानिविशेषणत्वेन षष्ठ्यन्ततया निर्देशः कृतस्तद्वदित्यर्थः । अन्यथा । उभौग्रहणाभावे । ण्यन्तः सन्नतश्चेत्येवोपात्तन्न तु लिट्पदमपि तदभिप्रायमाह । ईर्ष्यतेराम इति । आद्यव्याख्याने । तृतीयव्यञ्जनस्येतिव्याख्याने ॥

इति हेतुमण्ण्यन्तविवरणम् ।

धातोः कर्मणः समानकर्त्तृकात् । अत्र केचित् । प्रकृतसूत्र एवात्मन इत्युपादेयम् । तदेवोत्तरसूत्रेऽप्युपकरिष्यति । आत्मन इति प्रकृतसूत्रे धातोरित्यस्य विशेषणम् । षष्ठ्यर्थश्चात्र कर्त्तृत्वमिति समानकर्त्तृकादित्यस्य लाभो भविष्यति । तदेवेच्छायामित्यस्य च विशेषणम् । प्रकृतेऽपि षष्ठ्यर्थः कर्त्तृत्वमेवेत्युभयोरर्थयोर्लाभे समानकर्त्तृकादिति व्यर्थमित्याहुः । अत्रेदं वक्तव्यम् । आत्मन इत्यत्राकृष्टस्य स्वरितत्वस्य कल्पनयोत्तरत्र सम्बन्धस्य प्रत्यासत्त्या चैकात्मबोधकत्वकल्पनायाङ्गौरवमिति स्पष्टमेव । किञ्चैकस्यात्मन इत्यस्य परम्परया धातुपदबोध्यविशेषणत्वमिच्छायामित्येतद्विशेषणत्वन्तु साक्षादित्येतत्कल्पने समानस्वभावविरोधः । किञ्च सकृदुच्चरितस्यात्मन इतिपदस्योभयविशेषणत्वं सकृदुच्चरित इतिन्यायविरुद्धम् । आवृत्त्योभयविशेषणत्वे तु मनोव्यापारगौरवमधिकं स्पष्टमेवेति । अत एव । सम आर्द्धधातुकत्वादेव । तद्धि गुणाभावार्थम् । यद्यस्यार्द्ध-

SGDF
Sri Gargeshwari Digital Foundation

धातुकत्वन्न स्यात्तदाऽत्र गुणस्य प्राप्तिरेव नास्तीति कित्त्वविधानवैयर्थ्यं स्पष्टमेवेति भावः। कर्मण इत्यस्याभावेऽपि यथा कर्मण इत्यस्य लाभस्त-म्प्रकारमाह। प्रत्ययवाच्य इति। प्रत्यासत्त्या। शीघ्रोपस्थितिकत्वेन। धातोरितिपदस्यार्थविशिष्टतत्तद्धातूपस्थापकतया विशेषणतयाऽर्थस्यापि तस्यामुपस्थितौ विषयत्वादिति भावः। दुर्ज्ञेयेत्युत्तरमिति। कर्मण इत्य-स्याभावे समानकर्तृकाद्धातोरित्यनेन यस्य यस्य समानकर्तृकत्वं तस्य स-र्वस्योपस्थितौ करणभूतार्थवाचकादपि यत्किञ्चित्कर्मिकायामिच्छायामपि स्यादिति भावः। रुदविदमुष। रुदसाहचर्याद्विदेरेव ग्रहणमिति शङ्कां वारयितुमाह। लक्ष्यानुरोधादिति। अन्यथा। उगनुकर्षाभावे। कित्त्वा-भावेन। इको झलितिसूत्रप्रवृत्तेः प्राक्कित्त्वाभावेन। एकाजित्येवेति। ए-काच उपदेश इत्यत एकाज्ग्रहणमनुवर्तत इत्यर्थः। ननु परत्वेन षत्व-कत्वयोरिति। अत्र लक्ष्ये षत्वकत्वयोः प्रवृत्तिर्भवतीत्येतावतैव षत्वकत्वयो-रित्युक्तन्न त्वेवं क्रमः कत्वात्पूर्वं षत्वाप्राप्तेः किन्तु कत्वे षत्वे च पर-त्वात् कृते इति विवक्षितम्। षत्वस्येति। कत्वस्याप्युपलक्षणमिदम्। अप-वादत्वादिति। कृतेऽपि तेनेडागमेऽस्य प्राप्तेः। एतेन प्रतिपदोक्तत्वेन किरश्च पञ्चभ्य इति कृतेपीट् सनि वेत्यनेन पुनरिट् स्यादित्यपास्तम्। इकोझल्। नन्विदं सूत्रं व्यर्थम्। एतद्धि गुणाभावार्थम्। स च येन ना-प्राप्तिन्यायेनाज्झनगमामिति दीर्घविधानेन सिद्धः। न च गुणे कृते दीर्घो गुणस्वरूप एव भविष्यतीति फलाभावात्तदा दीर्घाप्राप्तेः कथं येन नाप्राप्ति-न्याय इति वाच्यम्। पर्जन्यवल्लक्षणन्यायेन तदापि प्राप्तेः। न च गुणा-भाव इव चिकीर्षतीत्यत्रेत्वाभावोऽपि स्यादिति वाच्यम्। दीर्घस्येत्वनि-मित्ततया तद्बाधायोगात्। यो दीर्घऋवर्णान्तस्तत्रापि गुणाभावरूपो दीर्घ-स्योपकारो भविष्यतीति तत्रापि पर्जन्यन्यायेन दीर्घः स्यादेव। मिञ्धातोः सनि दीर्घे मीग्रहणेन तस्य ग्रहणं यथा स्यादित्येवमर्थन्दीर्घत्वस्य चारि-तार्थ्यान्न गुणबाधकत्वमित्यपि न। तत्र दीर्घाभावेऽपि गुणविषये आत्वे-

SGDF
Sri Gangeshwari Digital Foundation

कृते माग्रहणेन तद्ग्रहणसिद्धेः । न च कुटादिपठिताभ्यां गुधुभ्यां सनि गुणाभावस्य ङित्वेन सिद्धेर्जुगूषतीत्यत्र दीर्घस्य चरितार्थत्वात्कथङ्गुणबाधकत्वमिति वाच्यम् । उहनीत्येव सिद्धेऽज्ग्रहणस्य गुणाभावप्रवृत्तौ ज्ञापकत्वसम्भवात् । न च वक्ष्यमाणरीत्याऽज्झनगमामिति सूत्रेऽजादेशगमेरित्यर्थलाभोऽज्ग्रहणसत्त्वे भवति । सम्प्रति तु कथमिति वाच्यम् । सनीत्यस्यावृत्त्या सन्निमित्तकगमेरित्यर्थेन तल्लाभसम्भवादिति चेन्न । इसन्ताच्चेत्युत्तरार्थत्वात् । न च तत्रैव पठनीयं योगविभागो व्यर्थ इति वाच्यम् । दीर्घविधानस्य विषये बाध्यसामान्यचिन्ता भवताऽवश्यं वाच्याऽन्यथापुरस्तादपवादन्यायेन दीर्घस्य णिलोपबाधकत्वमेव स्यात् । एवं सति यथा गुणस्यायं बाधकस्तथा णिलोपस्यापि बाधकः स्यादिति कित्त्वविधानमर्थवदित्यभिप्रायात् । णिलोपोदाहरणं ज्ञीप्सतीति । अत्र हि णेर्गुणदीर्घलोपाः प्राप्तास्तत्र विशेषाभावादनवकाशत्वेन दीर्घत्वमुभयोर्गुणलोपयोर्बाधकं स्यात् । येन नाप्राप्तिन्यायेन गुणस्यैव बाधकन्दीर्घत्वमिति तु न शङ्क्यंबाध्यस्य भेदेनापेक्षायां स न्यायो न तु सामान्यचिन्तायाम् । षष्ठ्या विपरिणम्यत इति । अन्तपदार्थान्वयायेत्यादिः । अज्झनगमां सनि । अत्र गम्शब्दो नानादेशगम्परः । जिगंसत इत्यत्र दीर्घोपत्तेरत उक्तमजादेशगमेरिति । एतादृशार्थलाभस्त्वत्रैवाज्ग्रहणेन भवति । एतद्धिअजन्तानामित्यर्थलाभायोपात्तम् । एतदभावेऽप्यचश्चेतिपरिभाषयोपस्थितस्याच इत्यस्याङ्गविशेषणतयाऽजन्तानामित्यस्य लाभः स्यादेव । न चाचश्चेतिपरिभाषयोपस्थितमच इतिपदं हनगम्विशेष्यबोधकमेव भविष्यतीति वाच्यम् । हनगमामितिबहुवचननिर्देशस्यैवं सति वैयर्थ्यापत्तेः । एवञ्चाजितिपदं षष्ठ्यन्तं गम्विशेषणमिति । तादृशार्थलाभस्य सनीतिपदस्यावृत्त्याकल्पने तु न बहुवचनसामर्थ्यकल्पनाक्लेश इत्यवधेयम् । तत्र । गमेरिङितिसूत्रे । सर्वोऽपि । स्वतन्त्र आदेशरूपश्च । व्याख्यानादिति । सनि चेतिसूत्रभाष्यमूलकव्याख्यानादित्यर्थः । स्वतन्त्रस्य ग्रहणन्तु प्रतिप-

SGDF
Sri Gargeshwari Digital Foundation

दोक्तत्वान्न्याय्यमेव । तथाऽऽदेशस्यापि ग्रहणम् । तत्र भाष्ये इणवदिक इत्येव । अधिजिगमिषति । अधिजिगमिषत इत्युक्तम् । अत्रेडागमदर्शनेनादेशस्यापि ग्रहणम् । रलो व्युप । व्याख्यानादिति । दिद्युतिषते । दिद्योतिषत इत्यादीड्घटितप्रयोगदर्शन मूलकव्याख्यानादित्यर्थः। सामान्यापेक्षेतीति । इदम्प्राचामनुरोधेन । भाष्यरीत्याह । णौ चङीति । सामान्यापेक्षज्ञापकत्वाभावेऽध्येषिषिषतीत्यस्य सिद्धिमाह । किञ्चेत्यादिना । नैरर्थक्यादिति । एतच्च सनः समात्रस्य द्वित्वमितिमतेन । तदा तस्याऽनर्थकतयाऽप्रत्ययत्वेनार्द्धधातुकत्वाभावादिति भावः । यदि तु धात्ववयवषकारसहितद्विर्वचनन्तदोत्तरखण्डस्य ष्य इत्यस्यनैरर्थक्येन सन्ग्रहणेनाग्रहणादिडागमस्य सन्यत इतीत्वस्य चानापत्तिरिति रूपासिद्धिरिति बोध्यम् आप्ज्ञप् । इह ज्ञपीत्यनेन चुरादिण्यन्तस्य ग्रहणे णिच ईकारादेशे ईप्सतीतिरूपासिद्धिरत आह । अवादिभिरिति । अनन्त्य इति । आप्धसाहचर्याज्ज्ञपिधातोरप्यनन्त्यस्येत्त्वमिति भावः । यदि पूर्वेति । अत्र यदीत्युपादानाद्वृद्धिशब्दसाहचर्याद्दीर्घशब्दोच्चारणेन विहितदीर्घस्यैव ग्रहणे त्वनन्त्यस्येति न वाच्यमिति ध्वनितम् । इदञ्च व्याख्यानं ज्ञपीतिणिजन्तानुकरणमितिमतेन।यदि तु पान्तानुकरणमेव ज्ञपीति त्विका निर्द्देशस्तदा णिचोऽप्राप्तिरेवेति बोध्यम् अत्र लोपो । अत्रेत्येतद्बोध्याकाङ्क्षाशान्त्यर्थक्रमाह । सनिमीत्यादीति।लोपस्याविकारत्वादिति । लोपागमवर्णविकारज्ञो हि सम्यग्वेदान् परिपालयिष्यतीत्यत्र भाष्ये लोपपदोपादानेऽपि विकारपदोपादानात् । नानर्थक इति परिभाषाप्रत्याख्यान पक्ष आह ।यद्वासनीति । ईर्त्संतीत्यत्र शास्त्रप्रवृत्तिक्रममाह । पूर्वत्रासिद्धीयमिति । एतेनात्र यत्केन चिदजादेर्द्वितीयस्येत्यनेन धूसशब्दस्य द्वित्वमित्युक्तन्तन्निरस्तम् । नन्वाप्ज्ञपीत्यत्र प्रतिपदोक्तत्वाच्चुरादिपठितस्यैव ग्रहणन्न्याय्यमत आह। ह्रस्वविशिष्टेति । गुणस्य बाध इति । ण्यल्लोपाविति वचनादित्यादिः । आशङ्कायामर्थेऽनेन सन्निति भ्रमवारणायाह । आशङ्काविषयार्थे सि

SGDF Sri Gargeshwari Digital Foundation

व्याख्यानादिति। गामादाग्रहणेष्वविशेष इति परिभाषया माग्रहणेन सर्वेषा-ङ्ग्रहणे सिद्धे तत्साहचर्यान्मीशब्दांशेऽपि न्यायाप्रवृत्तिः। न चैव दिवा-दिपदितमीङ्धातोरपि ग्रहणापत्तिरिति मिनातिमिनोत्योरित्यनुपपन्नमिति वाच्यम्। इको झलितिसूत्रभाष्ये मीग्रहणेन कृतदीर्घमिनोतेर्ग्रहणेनोभ-योर्ग्रहणस्यैव प्रतिपादितत्वात्। द्वयोरिति। शकॢ इत्तौ शकविभाषि-त इत्यनयोः। कित्वात्। हलन्ताच्चेति कित्त्वात्। वचनम्। मुचोऽकर्मकस्ये-ति वचनम्। इदमुपलक्षणम्। अभ्यासलोपार्थमित्यपि बोध्यम्। आख्या-नादितिवचनपठितप्रकृतिप्रत्यापत्तिरितिवचनस्य ज्ञापकत्वमितिभ्रमनिवार-णायाह। पुष्ययोगमिति। एतच्च आख्यानादिति वचनस्यप्रकृतिप्रत्याप-त्तिरित्यस्य परे तु मतोक्तरीत्या ज्ञापकत्वासम्भव इतिमतेन। तत्परिभा-षाभावः। निमित्तापायपरिभाषाभावः। सिद्धे सतीतिन्यायेन स्तौतिण्यो-रित्यस्य नियमार्थत्वे लब्धे एवकारोव्यर्थ इत्यत आह। एवकार इति। पुषूष इहेति। सन्नन्तादिट्। अयादेशे यलोपः। षे-त्युच्यमाने यत्र कृतषत्वस्य सनोऽकारान्तस्य श्रवणन्तत्रापि नियमः स्यादित्यत्र न स्यात्। षणीत्युक्ते तु इड्विशिष्टस्यानार्थकत्वान्न षण्पदेन ग्रहणम्। शपा सहैकादेशेतु विकरणानामनर्थकतया विशिष्टस्यार्थवत्वमस्त्येव। परिषिषिक्षतीत्यत्र स्तौतिण्योरितिनियमेन व्यावृत्तिशंकायामाह। स्तौतिण्योरितीति। प्रतीषिषतीत्यत्र द्वितीयषकारे सन्त्वबुद्ध्या तन्निरूपिताङ्गत्वसत्वेपीत्यत्र सम्भवेनाऽझनगमामिति दीर्घः प्राप्नोतीत्यत आह। अत्राभ्यासान्तस्येति। भाष्योक्तरीत्येति। तावेव सु-प्तिङौ यौ ततः परौ सैव च प्रकृतिराद्या समुदायपदत्वमेतेनेति यथोक्त-न्तद्रीत्याप्रथमषिशब्दे सर्वे सर्वपदादेशा इतिन्यायेन स्थानिसनुबुद्धौ तत्प-रत्वन्न तदन्तस्य द्वितीयसनि च न तत्त्वबुद्धिरागन्तूनामन्ते सन्निवेश इ-ति न्यायादिति द्वितीयसः प्रत्ययपदेनाङ्गसंज्ञासूत्रस्थेन न ग्रहणमिति भावः। अप्रत्ययतयेति। न चादेशप्रत्यययोरिति षत्वमप्युभयखण्डावय-

SGDF
Sri Gangeshwari Digital Foundation

षस्य न स्यादिति वाच्यम्। पूर्वत्रासिद्धीयमद्विर्वचन इतिवचनेन कृत-षत्वस्य द्वित्वमित्यभ्युपगमात्। ननु यदि नेषीत्यास्याङ्गत्वन्तदा सनयत इतीत्वमपि न स्यादत आह। श्रुतिप्रापीति। अङ्गावयवेति। न चा-भ्यासान्तरस्य नाङ्गत्वमिति प्रागुक्तमिति कथं सनि परे यदङ्गन्तदवयव-त्वमिति वाच्यम्। सनि सति यत्किञ्चिन्निरूपिताङ्गावयवस्य ग्रहणात्। न च यंस्येतियङन्तात्सनि यंयमिषत इत्यत्रेत्वापत्तिः सन्निमित्ताभ्यासस्या ङ्गावयवस्य ग्रहणात्। अङ्गत्वञ्च सन्निरूपितमनन्यनिरूपितं वेत्यन्यदेतत्। एवमपि प्रतीषिषतीत्यत्र षण्परत्वात्स्तौतिण्योरितिनियमेन षत्वमत्र न स्यात्पूर्वत्रासिद्धीयमद्वित्व इत्यनित्यत्वात्प्रादप्रवृत्तिरितिपक्ष इत्याशयेन कस्य चिच्छङ्कायामाह। धातूपेति। षण्परत्वमिति। इदं वस्तुस्थितिकथ-नम्न त्वस्येदानीमुपयोगः। न षण्परत्वमिति। एवञ्च तद्विषये शङ्कैव नेति भावः।द्विःप्रयोगपक्षे सन्त्वबुद्धिवत्प्रत्ययावयवत्वबुद्धिरपि सकारेऽस्ती-ति भावः। प्रत्ययत्वन्तु न सकारे गृह्यते प्रत्ययावयवत्वन्तु गृह्यते इति तु विरुद्धमाभातीति नायम्प्रकारः साधुः किन्तु कृतषत्वस्य द्विर्वचनमि-त्येव युक्तमिति वक्तव्ये तथानभिधानं स्वरूपव्याक्रियैव पराक्रियेति न्यायेन। भवप्रत्ययान्तादिति। शैशिकादित्यत्राध्यात्मादित्वाठञ्। अत्र शैषिकाच्छैषिको नेतिवाक्येऽपि सरूप इत्यस्य सम्बन्धो बोध्यस्ततफल-माह। वाक्यमेवेत्येवेति। अत्र शालीयेवाक्यमेवेति मूलपाठः। अत्र। शैषिकादिति वाक्ये। अत एव। शैषिकादित्युपादानेन निषेधादेव। अ-त्र प्रातिपदिकत्वेन त्वान्तस्याप्युपस्थितिरस्तीति भावः। सत्यभिधान इति। घटत्वत्वमित्यादिप्रयोगाभिधाने। अर्थान्तरे। कुत्साद्यर्थे। तेन। शब्दतोऽर्थतो वेतिकथनेन। षष्ठीसप्तम्यर्थादिति। अत्र यथासङ्ख्येनान्व यः। तच्चाऽपि ब्रुवता। मत्वर्थीयान्मतुबादेः प्रतिषेधं ब्रुतता। समान-वृत्तौ। समानार्थवृत्तौ तृतीयवाक्यार्थे विशेषमाह।सनि त्वर्थेति॥

॥ इति सन्नन्तविवरणम् ॥

SGDF
Sri Gurgeshwari Digital Foundation

धातोरेकाचो हलादेः । द्योतकमिति । एवञ्च पुनः पुनरुत्पत्तिकत्व-रूपस्यौनःपुन्यन्धातुवाच्यन्तत्पुनःपुनःपदसमभिव्याहारे प्रतीयते । न चैकस्याः क्रियायाः पुनपुनरुत्पत्तिर्न सम्भवतीति कथमेतदिति वाच्यम्। यथाऽवयवसमूहरूपक्रियायाः प्रारब्धापरिसमाप्तत्वरूपस्य वर्त्तमानत्वस्या-सम्भवेऽपि विवक्षितक्रियासमूहस्य विलक्षणबुद्धिविषयस्य तादृशवर्त्तमा-नत्वव्यवहारस्तथा सजातीयानेकसमुदायावयवकस्य समूहस्यैकबुद्धिविष-यत्वे सैकत्वविवक्षया तादृशसमुदायस्य समुदायान्तरस्य सजातीयस्य पुनः-पुनरुत्पत्तिर्यत्र तादृशस्थले पापच्यत इतिप्रयोगस्तादृशसमुदायविवक्षया भवति एवञ्च द्योत्यार्थस्य विशेषणतया पुनः पुनरुत्पत्तिकैककर्तृका वर्त्त-माना पचिक्रियेत्यादिरीत्या बोधः पापच्यत इत्यादितो भवति। तस्य । द्विर्वचनविधायकवचनस्य । न तत् । न द्विर्वचनम् । य-त्र तु कृत्स्ना विवक्षिता क्रिया पुनःपुनरुत्पन्नेति विवक्षा तत्र भव-त्येव द्विर्वचनमित्याह । भृशार्थ इति । तथैव पौनःपुन्ये यङि द्वित्वस्य प्रशक्तिस्तु नेत्याह । पौनःपुन्ये यङि त्विति । धातोरेवेति । द्रव्यन्तु स्व-भावतः सिद्धरूपमेव प्रतीयते शब्दशक्तिस्वभावादिति शेषः । भृशमीक्षते इत्यत्र हलादित्वाभावाद्यधोऽभावेऽपि भृशं शोभत इत्यर्थविवक्षायां शु-भधातोः प्राप्तिशङ्कायाम्भाष्यप्रामाण्यादेव यङोऽनभिधानन्तादृशस्थल इ-त्याह। अनभिधानादिति । फलमिदमिति । वार्त्तिकप्रतिपादितेभ्यो यङ्विधानम् । स्पष्टम्भाष्य इति । एवं हि तत्रोक्तम् । एकाजहलादिग्रह-णं किमर्थम् । जागर्त्ति भृशम् । ईक्षते भृशमिति । एकाऽजकादिग्रह-णे चोक्तम् । तत्र तावदुक्तङ्कर्मसमानकर्तृकग्रहणानर्थक्यमिच्छाभिधाने प्र त्ययविधानादकर्मणो ह्यसमानकर्तृकाद्वा अनभिधानदि इहाप्येका-ज्हलादिग्रहणानर्थक्यङ्क्रियासभिहारे यङ्वचनात् अनेकाचो हलादेर्ह्यनभि-धानमिति । तच्चावश्यमनभिधानमाश्रयितव्यम् । क्रियमाणे ह्येका-ज्हलादिग्रहणे यत्रैकाचो हलादेश्चोत्पद्यमानेन यङार्थस्याभिधानन्न

SGDF
Sri Gargeshwari Digital Foundation

भवति न भवति तत्रोत्पत्तिः । तद्यथा भृशं शोभते भृशं रोचते । यत्र चानेकाचोऽहलादेर्वोत्पद्यमानेन यङाऽर्थस्याभिधानम्भवति तत्रोत्पत्तिः । अटाट्यते अरार्यते । अशाश्यते । सोसूच्यते । मोमूत्र्यते । वार्त्तिकोक्तमूर्णोतिग्रहणन्तु न कार्यमित्याह । यथान्यासेपीति । नुवद्भावेनास्माद्यथाऽऽमो अभाव इडभावश्च भवति तथा यङपि भविष्यतीति भावः । एतेन । भाष्योदाहरणादितिकथनेन । यश्प्रतीति । न चैवं स्यण्डिलाच्छयितरीत्यस्य निर्देशस्य परिभाषायां ज्ञापकत्ववर्णनासङ्गतिः । प्रकृते यथा द्वित्वम्प्रति कार्यित्वेऽपि दीर्घम्प्रति निमित्तत्वम्भवति तथा प्रकृतेऽपि गुणम्प्रतिकार्य्यत्वेऽपि निषेधम्प्रति निमित्त स्यादितिवाच्यम् । निषेधस्य पर्युदासन्यायेन विध्यङ्गतया विधीयमानकार्यसत्वं स्बन्धिन एकत्वमित्यभिप्रायेण ज्ञापकत्वसम्भवात् । नित्यङ्कौटिल्ये गतौ । अवधारणार्थ इति । नित्यशब्दस्य कौटिल्य एवान्वयो न तु क्रियायाम् । धातोरेकाच इतिसूत्रे भाष्य इति । धातोरेकाच इति सूत्रं यस्मिन्प्रकरणे तत्प्रकरणस्य व्याख्यानपरे भाष्य इत्यर्थः । तेनैवं विधभाष्यस्य नित्यङ्कौटिल्य इति सूत्र एव सत्त्वेऽपि नासङ्गतिः ॥ तद्विषयस्यैव । लुपसदेतिसूत्रविषयस्य । भृशं जपति ब्राह्मणः । भृशं समिधो दहतीत्येव ह्युक्तम् । अतोऽपि । अस्माद्भाष्यादपि । अत एव । गत्यर्थेभ्यः क्रियासमभिहारे यङः सत्त्वादेव । एवमेव । योगद्वयोदाहरणार्थप्रदर्शकवाक्ये विशेषासंप्रत्ययादित्यत्रैवोत्तरयोरित्यस्यान्वयेनैव । यत्र । पूर्वसूत्रे ॥ तत् । नित्यग्रहणम् । तत्प्रत्याख्याने । नित्यग्रहणस्य प्रत्याख्याने । भावगर्हायामेव । भावो धात्वर्थस्तद्गर्हायामित्यर्थः । इदमपि । एवकारघटितवाक्येन व्याख्यानमपि ॥ पूर्वसूत्रस्थनित्यग्रहणस्य सम्बन्धेन हि वृत्तावेवमुक्तम् । कैयटीयं व्याख्यानङ् खण्डयति । यत्त्विति । तस्य न्यायस्य । तक्रकौण्डिन्यन्यायस्य । अचरितार्थैति । उत्सर्गाप्राप्तियोग्ये विषयेऽचरितार्थविषयत्वादित्यर्थः । तथा तु न प्रकृते । कुटिलं व्रजति वाव्रज्यत इत्यत्र क्रि-

SGDF
Sri Gargeshwari Digital Foundation

यासमभिहाराप्रतीतेरिति । अत एव । अर्थयोर्बाध्यबाधकभावाभावादेव । यङुदाहृतो भाष्य इति । अटाट्यते । अरार्यत इति यथा । प्रत्याख्यातमिति । तच्च प्रागुपपादितम् । अनुवर्त्तमानमिति । अत्र लोपोऽभ्यासस्येतोऽनुवर्त्तमानम् । ग्र इतिनिर्देशस्य गॄ शब्दे इतिक्र्यादिपठितस्यापि सम्भवादाह । गिरतेरेवेति । तुदादेरेवेत्यर्थः । व्याख्यानादिति । अचि विभाषेतिसूत्रे यङीत्यस्यानुवृत्तिपक्षे यङ्निमित्तस्य गिरते रेफस्येति कथनमूलकव्याख्यानादित्यर्थः । अपवादत्वाःदिति । संयोगादिविषयेऽपवादत्वादित्यर्थः । अन्तरङ्गत्वञ्चोपसर्गद्योत्यर्थान्तर्भावेन धातोः पूर्वमेव वृत्तेः स्वीकारेण यथा पूर्वन्धातुः साधनेन युज्यते पश्चादुपसर्गेणेतिमतेऽपि टः पूर्वम्प्रवृत्तया सुट् कात्पूर्व इतिसूत्रस्थं कात्पूर्वङ्ग्रहणम्प्रत्याख्यातन्तथात्रापि समृशब्दद्योत्यार्थविशिष्टक्रियाद्योत्या पौनःपुन्यविवया यङः प्रागुपसर्गयोगेन बोध्यम् । सूत्रभाष्यध्वनितेनेति । सुट् सर्वतोऽन्तरङ्गतरको भवतीतिभाष्यध्वनितेनेत्यर्थः । अत एवैतदुन्तरम्भाष्य एव संस्कृषीष्ट ऋतश्च संयोगादेरितीट् प्राप्नोति संस्क्रियते गुणोर्त्तिसंयोगाद्योरिति गुणः प्राप्नोतीत्तिशङ्कायाः सुटष्टकारमकृत्वाऽभक्तत्वं स्वीकृत्य संयोगादित्वाभावेन परिहारे कृते संस्करोतीत्यत्र तिङ्ङतिङ इतिनिघातो न प्राप्नोतीति दूषणेनाभक्तत्वपक्षस्य परिहारे कृते सति परिहारो न कृतः । एतद्व्याख्यानावसरे कैयटेनापि सुटः परादित्वमुपपाद्येड्गुणयोः प्रतिषेधो वक्तव्य एवेत्युक्तम् । एतेन सुटः सकारेण संयोगादित्वादृतश्चेतिसूत्रेऽसुट इति वक्तव्यङ्गुणोर्तीत्यत्रासुट इति वक्तव्यमितिप्रतिषेधवचनन्ध्वनितन्तथा यङिचेत्यत्राप्यसुट इति वक्तव्यमिति भावः । यत्वत्र कैयटेनेड्विधावेकाच उपदेशेऽनुदात्तादितिसूत्रादुपदेशपदसंवन्धेनोपदेशे संयोगादित्वाभावादिटो गुणोर्त्तीतिसूत्रे नित्यञ्छन्दसीतिसूत्रान्नित्यग्रहणम्यसम्बन्धेन गुणस्य परिहार इति समाधानान्तरङ्कृतन्तन्न युक्तम् । संयोगसंज्ञासूत्रभाष्ये प्रत्येकं संयोगसंज्ञेति पक्षे संस्कृषीष्ट संस्क्रिय-

SGDL Sri Gargeshwari Digital Foundation

त इत्यत्र ङ्गुणयोरापादनपरभाष्यविरोधात् । नित्यग्रहणसम्बन्धेनाप्यर्थासङ्गतिरिति तनादिशेषे निरूपितम् । तदाह । एतच्चेति । सिचो यङि । यद्यप्युपसर्गात्सुनोतिसुवतीतिसूत्रं सात्पदाद्योरितिनिषेधस्य बाधकन्तथापि सिचो यङीतिसूत्रं सर्वस्य बाधकम् । विनिगमनाविरहात् । श्नापा निर्द्देशस्य । कवतेरितिशपा निर्द्देशस्य । कसधातुर्भ्वादिरेवेति । एतेनादादौ कस्य चिन्मते कसेतिपाठेऽपि तस्य व्यावृत्तिः । अजन्ताभ्यासस्येति । दीर्घोऽकित इत्यत्र दीर्घश्रुत्योपस्थितस्याच इत्यस्याभ्यासविशेषणत्वादेतल्लाभः । अन्तरङ्गत्वात्तुकीति । दीर्घादितितुको वर्णमात्रापेक्षत्वेनान्तरङ्गत्वादित्यर्थः । अपवादत्वाद्येन नाप्राप्तिन्यायेनापवादत्वात् । तेषाम् । अभ्यासविकाराणाम् । तेषु व्यवस्थामाह । तत्रेति । अत एव । बाध्यस्य पूर्वम्प्रवृत्तिरितिस्वीकारादेव । मीमांसत इत्यत्र मान्वधेतिसूत्रविधीयमानदीर्घो यद्यप्यन्तरङ्गस्तथापि पूर्वन्नप्रवर्त्तते लक्ष्यानुसारात् । हन्तेर्हिंसायाङ्घ्नीभावो वाच्यः । यद्यप्यत्र ह्नीत्येवास्तु । अभ्यासाच्चेतिकुत्वेनेष्टसिद्धिर्भविष्यति । तथापि प्रक्रियालाघवाय घ्नीभाव एव कृतः । घ्नीभावस्य द्वित्वोत्तरम्प्रवृत्तौ दोषादाह । अत्रेति । यङ्लुकि नेति । न लुमेतिनिषेधात् । अन्योक्तिङ्खण्डयति । एवञ्चेति । अत एव । प्रत्याख्यानस्यानभिप्रेतत्वादेव । अत एव । रुग्रिकौ चेतिसूत्रे ऋदुपधस्येत्यस्य सम्बन्धादेव । तृक्षमृक्षादाविति । तृक्ष गतौ । मृक्ष सङ्घाते । आदिना ष्टृक्ष गतौ । वृक्ष वरण इत्यनयोः सङ्ग्रहः । ई घ्राध्मोःह्रस्वेकारादेशेऽप्यकृत्सार्वेति दीर्घेण यद्यपि जेघ्रीयत इत्यादि सिध्यति तथाप्युत्तरार्थन्दीर्घोच्चारणमित्याह । दीर्घ इति । अन्यथा विषयसप्तमीत्वाभावे ॥

॥ इति यङन्तविवरणम् ॥

यङोऽचि च । व्याख्यानादिति । अच्प्रत्ययपरकस्यैवोदाहरणस्य यो-

SGDF
Sri Gargeshwari Digital Foundation

यूय इत्यस्य भाष्येऽन्यत्र च प्रदर्शनपरकव्याख्यानादित्यर्थः। स च। वाक्यभेदेन विधीयमानो लुक् च। भाष्यस्वरस इति। तत्र हि यान्ति धियन्ति सुवन्ति अयुवन्। ऊर्णुवन्तीत्येषामसंयोगपूर्वोवर्णस्याजादौ सार्वधातुके इत्यर्थेनानेकाज्ग्रहणेनाटोऽसिद्धत्वेन च सिद्धौ यङ्लुगर्थं हुश्नुग्रहणमित्युक्त्वा योयुवन्तीनां वृषभं रोरुवन्तीनां वृषभमित्यत्र छन्दस्युभयथेत्यनेनार्द्धधातुकत्वात्सिद्धमित्युक्त्वा एवन्तर्हि सिद्धे सति यद्धुश्नुग्रहणं करोति तज्ज्ञापयत्याचार्यो भाषायामपि यङ्लुग्भवतीत्युक्तम्। ततो बेभिदीति चेच्छिदीत्येतत्सिद्धम्भवतीत्युक्तम्। एवं विधप्रयोगद्वयस्यैवोपादानान्न सर्वत्र भाषायाम्भवतीति कल्प्यते। प्रयोगद्वयोदाहरणमुपलक्षणमिति तु प्राञ्चः। अन्तरङ्गत्वादितीति। अत्रान्तरङ्गत्वम्प्राथमिकप्राप्तिकत्वरूपम्। लुक्त्वाच्चेत्यपीति। सर्वविधिभ्यो लुको बलवत्त्वात्। न चायमिति। श्तिपा शपेतिपरिभाषासत्त्वबादिप्राचीनरीत्येयमाशङ्का। तस्य सूत्रस्य। प्रत्ययलोप इतिसूत्रस्य। तन्निषेधाभावे। श्तिपाशपेतिनिषेधाभावे। तदुक्तनियमार्थमिति। अत्रैव यङ्लुगन्तादितिनियमार्थम्। अत एव। अर्थान्तरवृत्तेर्धातोरिदं रूपमित्यस्याभिप्रेतत्वादेव। उक्तरीत्या। प्रत्ययलक्षणसूत्रस्य नियमार्थत्वेन। प्रत्ययलक्षणेन। यङ्त्वस्य प्रत्ययासाधारणत्वात्। ननु भूसुवोरितिगुणनिषेधो यङ्लुकि भाषायान्नेति नियमस्वीकारे सुधातोरपि यङ्लुकि भाषायान्निषेधाप्रवृत्तिः स्यादत आह। सङ्कोचे मानाभावेनेति। सुधात्वंशे सङ्कोचे मानाभावेनेत्यर्थः। लोट्येवेति। यद्वा तादृशनियमस्वीकारे यङ्लुकि भाषायान्निषेधाप्रवृत्तिलाभेऽपि छन्दसि लङादावपि निषेधः स्यादत आह। संकोच इति॥ नियमसंकोचे मानाभावेनेत्यर्थः। तत्र सूत्रे। भूसुवोरितिसूत्रे। सर्वत्र गुण एव लभ्यत इति। एकाच्त्वस्य तत्राभावात। अत एव। उक्तस्य द्विविधनियमस्याभिप्रेतत्वादेव। नोद्भावितेति। तत्र गुणस्येष्टत्वादिति शेषः। ननु लोट्येवेतिनियमश्चेदभिप्रेतस्तर्हि निपातनवैयर्थ्यम्। छन्दसि सर्व-

SGDF
Sri Gurgeshwari Digital Foundation

विधीनां वैकल्पिकत्वेन लोडतिरिक्ते निषेधप्रवृत्तेर्लाभादत आह । अ-त एव । भाष्यायामप्रयोगाभावादेव । लेटि उदाहृतमिति । नतु भाषा-यामिति शेषः । तस्य । यङ्लुगन्तस्य बोभू इत्यस्य । समुदायस्य शब्दा-न्तरत्वादिति भावः । नियम इति । एवञ्च प्रकृतिग्रहण इत्यस्य ज्ञाप्य-वचनस्याभावेऽपि निषेधस्य प्राप्तेर्नियमोपपत्तिरिति भावः । प्रकृति-ग्रहणे यङ्लुगन्तस्यापीतिवचनस्वीकारेऽपीष्टासिद्धिरित्याह । द्विःप्रयोग-स्त्वेऽपीति । अत एव । समुदायस्य शब्दान्तरत्वादेव । रुत्वमसिद्धमिति । एवञ्च ढ्रलोपपदघटकटशब्दे नैतत्सूत्रविधेयरेफस्य ग्रहणन्न भविष्यतीति भावः । एतत्सूत्रेति । ढ्रलोपसूत्रेत्यर्थः । नन्वयं ग्रन्थो हल्ङ्याप्सूत्रस्य-शब्दरत्नग्रन्थेन सह विरुध्यते तत्र हि हल्ङ्यापः सोरित्येव सूत्रयितुमु-चितमिति मनोरमास्थसुपदन्तिस्योरप्युपलक्षणन्तेनाऽविभा राज्यमिति सिद्धमत्राह्वविभर स इति स्थिते सकारस्य संयोगान्तलोपे रेफस्य रो री-ति लोपे ढ्रलोप इति दीर्घोऽन्यथा न स्यात्संयोगान्तलोपस्यासिद्धत्वा-दित्युक्तम् । यदि ढ्रलोपसूत्रस्यपूर्वग्रहणेन पूर्वत्रासिद्धमित्यत्राग्रहणन्त-दाऽविभा राज्यमित्यस्यानायासेन सिद्धिर्भवितीति चेन्न । अस्य शेखरग्र-न्थस्य सामान्यापेक्षज्ञापकत्वाभिप्रायकत्वं शब्दरत्नग्रन्थस्य तु यथा मनुन इतियोगविभागेनक्वचिदसिद्धत्वाभावः कल्प्यते तथाऽजर्घा इतिभाष्योदा-हरणेन प्रामाणिकप्रयोगस्थले प्रयोगदर्शनेनासिद्धत्वाभावसिद्धौ सामन्या-पेक्षज्ञापकत्वाश्रयणे मानाभाव इत्याशयात् । वस्तुतस्तु बहुषु स्थलेषु प्र-योगाणामप्रामाणिकत्वस्य निश्चे तु मशक्यतया सामान्यापेक्षज्ञापकत्व-मेव युक्तमिति बोध्यम् । प्रत्ययलक्षणेन यङ्निमित्तस्यानिदितामितिन-लोपस्य शङ्कायामाह । नलोपस्तु नेति । लुका लोपादिति । नलुमताङ्ग-स्येतिनिषेधादिति शेषः । अनयथासामानयापेक्षत्वानङ्गीकारे सूत्रस्यभा-ष्यविरुद्धमिति । तन्नयथाऽर्द्धधातुक इत्यस्य परसप्तमीत्वपक्षे वभूवेत्यत्रा-भूस्तेरित्यनेन लिटि परत्वाद्द्वित्वे परस्य भूभावे पूर्वस्य श्रवणम्प्राप्नोती-

SGDF
Sri Gurgeshwari Digital Foundation

त्युक्तत्तथा यङन्तत्वाद्धन्तेर्द्वित्वोत्तरं वधादेशश्चेत्स्यात्तदा परस्यैव स्यादितिभाष्यविरुद्धमित्यर्थः । निरूपितमिति। परस्यैव धातुत्वमितिनिरूपितमित्यर्थः । तस्माद्वध्यादित्यस्य प्रामाणिकत्वे यङ्लुकि श्तिपा शपेतिनिषेधानित्यत्वस्य सामान्यापेक्षज्ञापकेन पूर्वोक्तस्य ज्ञापकसिद्धन्न सर्वत्रेतिपरिभाषाया अप्रवृत्तिस्वीकारेणैकाज्ग्रहणघटितस्य तद्विषयकस्य यङन्तद्विर्वचनविधायकवचनस्याप्रवृत्तिरितिप्राचीनरीत्या निर्वाहः कार्यः । यङ्लुकश्छान्दसत्वे तु न कापि क्षतिः । एतेन । इतिमत इत्युपादानेन। वहिरङ्गत्वेनेति ।अपरनिमित्तकस्य तपरसूत्रस्यान्तरङ्गत्वेन तद्दृष्ट्या गुणस्य वहिरङ्गत्वादिति भावः । ननु तपरत्वेन चञ्चूर्यत इत्यत्र गुणाभाववत्पोपूर्यत इत्यत्र गुणो यङ्लुकोरिति गुणोऽप्यभ्यासस्य न स्यादतआह । उदोष्ठ्य इति ।भाष्येति। तथा च भाष्यप्रामाण्यान्न तत्र तपरत्वेन व्यावृत्तिरिति भावः । अकित इत्यस्य न किदकित्तस्मैरित्यर्थे ह्याकः कित्वाद्दीर्घनिषेधः स्यात्तथा तु न बहुव्रीहिसमासाश्रयणादित्याह । नविद्यत इत्यादिना । तत्सामर्थ्यात् । तादृशसमासाश्रयणसामर्थ्यात् । तद्ग्रहणस्य । ऋत्वच्छब्देन तद्ग्रहणस्य । इदम्माधवेति । यङो वेतिसूत्रविहितस्येडागमस्याभावेऽवर्वत् इत्याकारकस्य रूपस्याभिधानं माधवानुरोधेनेत्यर्थः । यङो लुका लुप्तत्वादिति । अत्र लुकेत्युपादानादन्तरङ्गानपीतिन्यायप्रवृत्तिः सूचिता । लुगुत्तरमपि नेत्याह। लुप्तत्वादिति ।ननूरदत्वस्याप्यभ्यासनिमित्तप्रत्ययनिमित्तकतया तस्येह लुकाऽपहारान्न लुमतेतिनिषेधादप्रवृत्त्यापत्तिरत आह । उरदत्त्वमिति । निरूपितमिति । उरदत्त्वन्न साक्षात्प्रत्ययनिमित्तकङ्कित्वङ्गावयवाभ्यासस्य य ऋवर्णस्तस्यात्त्वमित्येवाङ्गत्वम्परन्द्वित्वनिमित्तप्रत्ययनिमित्तकन्तच्च भवत्येवाङ्गसंज्ञायान्न लुमतेतिनिषेधाप्रवृत्तेः।उरदत्वस्याङ्गसंज्ञाद्वारा परनिमित्तकत्वमाश्रित्य स्थानिवद्भावोऽचः परस्मिन्नित्यनेन प्रवर्त्तते वव्रश्चेति भाष्योदाहरणादिति भावः । चाकर्तीति । अत्राभ्यासविकारे वाध्यवाधकभावाभावेन पूर्वं हृ-

SGDF
Sri Gargeshwari Digital Foundation

स्वत्वस्य तत उरदत्वस्य प्रवृत्तिस्ततो हलादिः शेषदीर्घयोरिति क्रम इत्याशयेन शङ्कते । न च चाकर्त्तीत्यत्रेति । तपरत्ववैयर्थ्येनेति । अभ्यासह्रस्वत्वेन सर्वस्य ऋत्त्वत्त्वादिति भावः। नित्यत्वेन। रीगागमापेक्षया नित्यत्वेन । तदभावात् । ऋत्त्वत्त्वाभावात् । इत्युपक्रम्येति । रीग्विधायकसूत्रभाष्ये तपरकरणे किम्प्रयोजनम् चाकर्त्ति चाकीर्त इत्युपक्रम्येत्यर्थः । पचतीत्यत्र यो नयेदिति ।लङन्ते एवंविधशब्दं यः परिनिष्ठितत्वेनोपपादयेदित्यर्थः । अन्यत्र । लङतिरिक्ते । आरतीति । ऋधातोर्यङ्लुगन्ताल्लटि झेरदादेशे रुगागमस्योत्तरखण्डादेशस्य यणि रो रीति लोपे ढ्रलोप इति दीर्घः । यणः स्थानिवत्त्वमिति । अचः परस्मिन्नित्यनेन स्थानिवत्त्वमित्यर्थः । तदनवयवधात्ववयवादेशस्येति । अभ्यासानवयवधात्ववयवादेशस्येत्यर्थः ।अत्र तदनवयवधात्ववयवेति समुदाय उत्तरखण्डपरः । धातुत्वस्योत्तरखण्डे विश्रान्तेः सिद्धान्तिततया धात्ववयवस्याभ्यासानवयवत्वविशेषणस्याव्यावर्त्तकतया यथाश्रुतशब्देनैव निवेशस्यापुष्टार्थत्वापत्तिरन्यथा स्यात् । तथा सत्युत्तरखण्डादेशस्येत्येवं वक्तव्ये एव मुक्तिर्वैचित्र्याय । तत्प्रतिबन्धकम् । अभ्यासकार्यप्रतिबन्धकम् । अभ्यासस्यासवर्णं इत्यसवर्णग्रहणेनेत्यस्यासवर्णेति पदं गृह्यते परस्मिन्नित्यर्थेनाभ्यासस्यासवर्णं इतिसम्पूर्णसूत्रेणेत्यर्थः । एतद्धीयायेत्यादावभ्यासस्येयङुवङौ स्यातामित्यर्थमारभ्यते । यद्युत्तरखण्डादेशस्य स्थानिवत्त्वं स्यात्तदा सवर्णपरत्वमेवायातीति सूत्रवैयर्थ्यं स्पष्टमेव। अत्र तत्प्रतिबन्धकमित्युपादानादरियृयादित्यस्य सिद्धिः ॥ ऋधातोरेव यङ्लुगन्ताल्लिङि तिवादेशे यासुटि रिङादेशेऽपि तस्य स्थानिवद्भावेनाच्त्वादभ्यासावयवस्य रिगागमस्येयङादेशः ॥ न चास्मिन्कृतेऽपि वलि परतो लोपः स्यादिति वाच्यम् । रिङादेशस्य बहिरङ्गत्वेनासिद्धत्वात्स्थानिवद्भावाच्च ॥ अत्रेदमवधेयम् ।यदि रिङादेशान्तरङ्गत्वात्पूर्वमेवेयङादेशस्तर्हि प्रतिबन्धकेतिविशेषणवैयर्थ्यम् ॥ किञ्चतत्प्रतिबन्धकेत्यस्य निवेशेऽचकापदित्य-

SGDF
Sri Gargeshwari Digital Foundation

त्र कारयादीनामित्वेतिह्रस्वत्वाभावपक्षे उत्तरखण्डावयवदीर्घस्य स्थानिवद्भावेन ह्रस्वत्वबुद्ध्या सन्वद्भावे सन्यत इतीत्वापत्तिः॥एतस्य स्थानि-वद्भावस्याभ्यासकार्यप्रतिबन्धकत्वाभावादतो अभ्यासकार्यैत्यत्राभ्यासपदमभ्यासत्वाश्रयमात्रपरं वाच्यम् ॥ एवञ्चाचकाणदित्यत्राभ्यासत्वाश्रयस्य सन्वद्भावे कर्त्तव्ये उत्तरखण्डावयवाजादेशस्य स्थानिवत्त्वनिषेधान्न सन्वत्वम् ॥ तत्प्रतिबन्धकेतिपरित्याजरमेव उत्तरखण्डपदमुत्तरखण्डावयवाच्परम् ॥ एवञ्चारिरिय्रियादित्यत्र रिङादेशापेक्षयाऽन्तरङ्गत्वादियङित्येव स्वीकार्यमिति तत्वम् एवमेवारतीत्यत्रापि दीर्घे कर्त्तव्ये यणादेशस्य स्थानिवत्त्वनिषेधः ॥ अरियृतीतीति ॥ अत्र यणादेशस्य स्थानिवत्त्वादित्युपपादनन्तत्प्रतिबन्धकेत्युपादानेन । पूर्वोक्तरीत्या तस्य परित्यागे तु स्थानिवद्भावस्य निषेधः स्यादत आह । परत्वादिनेति ॥ अत्रादिपदोपादानेनान्तरङ्गत्वस्य परिग्रहः ॥ माधवस्येति ॥ एवञ्च माधवस्तु दीर्घमाहेतिमूलोक्तमसङ्गतमिति बोधितम् ॥ मूले भाष्ये ध्वनितमिति ॥ तत्र हि छ्वोरिति सूत्रे क्ङिद्ग्रहणमनुवर्त्तते उताहो नेति वि ारे एतावानेव विशेषः अनुवर्त्तमाने क्ङिद्ग्रहणे छः षत्वं वक्तव्यमननुवर्त्तमाने तु छः शादेशे शान्तत्वादेव प्रष्टेत्यादिरूपसिद्धौ व्रश्चेतिसूत्रे छग्रहणन्न कार्यम् । अत्रैतावानेवेतिवदता ऊड्भाविभ्यो यङ्लुग् नास्तीति ध्वनितमन्यथादिवेर्यङ्लुगन्तस्य देदेति देदेषीत्यादावूठो भावाभावाभ्यां विशेषस्य स्पष्टतया एतावानेवेत्येवकारो विरुध्येतेति ॥ तद्विषयकमिति ॥ तत्रैव विचारकरणात् ॥ ज्वरत्वरेत्यूड्भाविन इत्युक्तन्तत्र प्रसङ्गादाह । सम्बन्धनेति ॥ ज्वरत्वरअत्र छ्वोरितिसूत्रादूडिति एकवचनान्तमनुवर्त्तते क्व चित्तु ज्वरत्वरेत्यूठावित्युच्यते तत्र मतभेदमाह ॥ अत्रोपधाया इत्यादिना। आदेशिभेदेन ॥ अन्त्योपधारूपादेशिभेदेन ॥ इक्परिभाषानिषेधे त्विति ॥ धात्वंशलोपनिमित्तार्द्धधातुके यत्र गुणवृद्धी प्राप्नुतस्तत्रेक्पदन्नोपतिष्ठत इत्यर्थकल्पनेनेक्परिभाषाबोध्यनिषेधे सति परिभाषानिषेधः

SGDF
Sri Gargeshwari Digital Foundation

स्पष्ट एव । असम्बद्धं स्यादिति ॥ तथा व्याख्याने भवितेत्यादाविटो गुणः स्यादेवेति तदसम्बद्धमित्यर्थः ॥ एवम् ॥ गुणवृद्धिनिषेधविधायकत्वे ॥ भाष्योक्तरीत्येति ॥ तत्र यथा नन्दनदधि कारकदधि इत्यत्र समासाद्यांविभक्तिस्तस्या लुकि अङ्गत्वाभावात्कथं युवोरनाकावित्यस्य प्रवृत्तिरितिशङ्कायान्न चेह परन्निमित्तमाश्रीयते अस्मिन्परतो युवोरनाकौ भवत इति किन्तर्हि अङ्गस्य युवोरनाकौ भवतः ॥ अङ्गसंज्ञा भवति प्रत्ययलक्षणेनेत्युक्तम् ॥ तृज्वद्भावस्येति ॥ तत्र यथा पञ्चक्रोष्टु कुलमित्यत्र तृज्वद्भावो न प्राप्नोतीतिशङ्कायाम्भाष्ये न चापरन्निमित्तमाश्रीयते किन्तर्ह्यङ्गस्य क्रोष्टुस्तृज्वदिति ॥ अङ्गसंज्ञा भवति प्रत्ययलक्षणेनेति प्रतिपादितम् ॥ अस्यापि ॥ अभ्यासलोपस्यापि ॥ तदभावे ॥ धात्वितिपदाभावे ॥ तोतोर्त्तीति ॥ तुर्वीधातोरिदं रूपम् ॥ भाष्यातत्त्वेषामिति ॥ तत्र हि क्ङिति चेतिसूत्रे तन्निमित्तग्रहणं कर्त्तव्यङ्किम्प्रयोजनमुपधारोरवीत्यर्थमित्युक्तम् ॥ तत्र रोरवीत्यर्थेन नार्थः ॥ छान्दसमेतत् ॥ दृष्टानुविधिश्छन्दसि भवतीत्यभिधायाथ वा पूर्वस्मिन्योगे यदार्द्धधातुकग्रहणन्तदनवकाशन्तस्यानवकाशत्वाद्गुणो भविष्यतीत्युक्तम् ॥ आर्द्धधातुकग्रहणस्यापि न धातुलोपइतिसूत्रेरोरवीतीत्यस्य सिद्धिः प्रयोजनमुक्तम्॥ यदि तेन निषेधाभावेऽप्यनेन निषेधः स्यात्तर्हि तत्रार्द्धधातुकग्रहणस्य वैयर्थ्यापत्तिरिति भावः ॥ अभाव एवेति ॥ यदि तोतोर्त्तीत्यादीनामभिधानं स्यात्तदा पूर्वस्मिन्योगे यदार्द्धधातुकग्रहणन्तदनवकाशमित्यनवकाशत्वोक्तिर्व्यर्था स्यादिति ॥ भाविज्ञानस्येति ॥ भावियत्परत्वेन ज्ञानम्प्रत्ययस्य तद्यत्रास्ति तत्रैव विषयत्वव्यवहार इति भावः ॥

॥ इति यङ्लुगन्तविवरणम् ॥

सुप आत्मानः क्यच् ॥ अत्र सुप्पद सुबन्तपरन्तस्यार्थद्वारकमात्मन इ-

SGDF
Sri Gangeshwari Digital Foundation

ति विशेषणम् ॥ इच्छायामित्यनुवर्त्तते ॥ आत्मपदञ्च कर्तृपरम् ॥ कर्त्रा च प्रत्यासत्त्या इषेर्ग्राह्यः ॥ तत्र सुबन्तविशेषणमात्मन इति किमर्थमिति पृच्छति ॥ आत्मन इति किमिति ॥ इति चेति ॥ चेन पूर्वस्य पदसंज्ञा च प्रयोगजनमिति बोधितम् ॥ तदेव स्पष्टप्रतिपत्तये आह ॥ काम्यचीत्यादि। चेन क्यचि परतोऽपि ॥ तेन राजीयतीत्यादेः सिद्धिः ॥ न च क्यचः प्रथमोपस्थितत्वात्तम्परित्यज्य काम्यजुपादाने बीजाभाव इति वाच्यम् ॥ नः क्ये इतिसूत्रस्य तदा विधायकत्वात्क्यचि पदत्वस्य सिद्धेः यद्यपि भाष्ये गोसमानाक्षरनान्तादि पठ्यते तथापि क्यजन्यप्रकृतिकादपि भवतीत्यत्र हेतुमाह ॥ गोसमानाक्षरेति ॥ अत एव ॥ तस्यैकदेशयुक्तित्वादेव ॥ वाक्शब्दस्य वच्धातोः क्विपि निष्पन्नतया क्यचि सम्प्रसारणप्राप्तेराह ॥ अत्रेति ॥ क्यज्विधायकसूत्रे सान्ताव्ययानाम्प्रतिषेध इत्येव वार्त्तिकन्तच्च यथाश्रुतमसङ्गतम्पुत्रमिच्छतीत्यत्रापि प्रतिषेधापत्तेः ॥ सूत्रन्तु द्विवचनबहुवचनान्तात्प्रत्ययविधायकत्वेन चरितार्थमतः शेषपूरणेन मूले व्याख्यातम्मान्तप्रकृतिकेति ॥ अशनायोदन्यधनायाः ॥ एते समुदायाः बुभुक्षादिष्वर्थेषु निपात्यन्ते ॥प्रकृतत्वर्थोऽत्र न विवक्षितः ॥ उदन्या तु पिपासा तृडितिकोशात् ॥ अशनशब्दः कर्मल्युडन्तः॥ कालान्तरोपयोगार्थं योऽशनमिच्छति स्नानायोदकमिच्छति॥दारिद्र्यपीडितः सन् यो धनमिच्छति तत्र न प्रत्ययः ॥ किन्तु धनेसत्यपि धनेच्छारूपगार्द्ध्य एव॥अश्वक्षीरेत्यनेन प्रकृतिविशेषोपादानेऽपि वृषस्यन्ती तु कामुकीतिकोशात्प्रकृतत्वर्थोऽत्रापि न विवक्षितः॥तथा च मानुष्यामपि वृषस्यन्तीति प्रयोगः ॥ लालसा ॥ उत्कण्ठेच्छा ॥ चिन्त्यप्रयोजनमिति ॥ केचित्तु घेटष्टित्ववद्यत्र काम्यजन्तात्स्यन्तत्र सति शिष्टमपि नित्स्वरञ्चित्स्वरो बाध्यतामितित्वमर्थं चित्त्वमित्याहुः ॥ कर्त्तुः क्यङ् सलोपश्च ॥ अत्र चकारोन्वाचये ॥ सेतिलुप्तषष्ठीकम्पृथक्पदम् ॥ तच्च कर्तुरित्यस्य विशेषणम् ॥ सलोपो नेति ॥ कर्तृवाचकस्य सान्तत्वविरहात् ॥ तेन ॥ कर्तृङ

SGDF
Sri Gangeshwari Digital Foundation

सन्नियोगशिष्टत्वाङ्गीकारेण ।नाना मातेति । तत्र हि रुलोपसन्नियोगेनायं
क्यङ् विधीयते तेन यत्र सलोपस्तत्रैव क्यङित्येकवाक्यतयेदं विधायक-
मित्येकम् । अन्वाचयशिष्टः सलोप इति निष्कृष्टन्द्वितीयम् । सलोपो वा॥
ओजसोप्सरसो नित्यम्। अपर आह सलोपोप्सरस एवेति नाना सतमि-
त्यर्थः ॥ एतत्तत्त्वमिति ॥ शत्रुपर्यायात्सपत्नशब्दाच्छार्ङ्गरवादिङीनन्ताद्भा-
षितपुंस्कात्क्यङि क्यङ्मानिनोश्चेति पुंवत्वे सपत्नायत इति रूपम् । वि-
वाह निबन्धनसंस्कारविशिष्टे रूढो यः सपत्नी शब्दस्तस्मात्क्यङि भाषि-
तपुंस्कत्वाभावान्न पुंवत्वमित्यादि तत्त्वमित्यर्थः । जातेश्चेतिसूत्रे भा-
ष्ये स्पष्टमिति । इदमत्रानुपपादितम् ॥ आचारेऽवगल्भेत्यपि सुप् इति
प्रक्रान्ते पठ्यतेऽतोऽस्यापि सुबन्तादुत्पत्तिरिति भ्रमवारणायाह ॥ ए-
ताननुक्रम्येति ॥अस्य ॥ क्विपः ॥ भूतपूर्वादपीतीति॥क्विपि सति प्रत्यया-
न्तत्वादाम्भवति यदा त्वनेकाज्ग्रहणङ्क्रियते तदा तु तत्सन्नियोगेनाच्
प्रत्ययस्यानुदात्तत्वानुनासिकत्वप्रतिज्ञाकरणादित्संज्ञया तस्य निवृत्तौ ग-
ल्भेति नानेकाजिति कथमेन्य आमित्याशङ्कावारणाय भूतपूर्वादपीत्यु-
क्तम् । तत्र प्रमाणमाह । अत एवेति । तादृशार्थस्याभिप्रेतत्वादेव । अ
वजिगल्भिषत इति । अवेत्यस्य पृथक्करणाद्गल्भशब्दात्सनि गल्भ् इ-
त्यस्य द्वित्वम् । सुबन्तपरतयेति । नमन्त्याख्यातार्थम्प्रति विशेषणता-
म्प्राप्नुवन्तीत्यर्थस्यान्यत्र प्रदर्शितत्वात् । तत्प्रकृतिके । सुबन्तप्रकृतिके
असमयथेष्टमित्यस्य । नमन्त्याख्यानार्थम्प्रति विशेषणीभवन्तीति नामा-
नीत्यर्थस्य सत्वादेव लक्षणेहाश्रिता । पुपुत्रीयिषद्यस्यैव भाष्ये उदाहर-
णत्वेन प्रदर्शनात् । कर्मधारयसमासाश्रयणेन नामाभिन्नाद्धातोरित्यर्थे
यत्राचारक्विबन्तात्सनि ततः कर्त्तरि क्विप् तत्रैवस्यादिति भाष्योदाहरण
विरोधः स्पष्ट एव । तदुक्तोदाहरणे यथेष्टमितंत्रशास्य प्रवृत्तिमभ्युपेतय
मासधात्वितंत्र शाभावान्न तस्य वचनस्य प्रवृत्तिरितरभिधाय यथेष्टमि-
तंत्रशोऽप्यवजिगल्भिषत इतरत्र नास्तीत्याह । आचारक्विबन्तेभ्य इति॥

SGDF
Sri Gargeshwari Digital Foundation

सन एवानुत्पत्तेरिति। प्रकृते यथेष्टमित्यं शप्रवृत्तिप्रयोजकस्य सनोऽनुत्पत्तेरित्यर्थः। तदेवोपपादयति। अकारस्येति। अवेत्यस्य पृथक्करणेन गल्भेत्यस्मात् क्विबन्तात्सन उत्पत्तिर्वाच्या द्वित्वार्थन्तच्च द्वित्वम्प्रकृते न सम्भवति। यत्र नामघटितधात्ववयवैकाच्त्रयसद्भावस्तत्र द्वित्वस्य प्रवृत्तेः स्वीकारादिति भावः। मूले इत्यादि सिद्धिरिति। आचारेऽर्थे इत्यादि सिद्धिरित्यर्थः॥ वचनम्। आचारेऽवगल्भेतिवचनम्। एषां बोध्यत इति। पूर्ववार्त्तिकेनेति शेषः। प्रत्ययान्तत्वादेवेति। अत एव भाष्ये प्रत्ययान्तादित्यान्यथा स्यादित्येवोक्तन्त्वनेकाजित्युक्तम्। एकाज्भ्यः। लिङ्गादिप्रातिपदिकेभ्यः। हल्ङ्याबिति सूत्रभाष्यप्रामाण्येन हलन्तेभ्य आचारे क्विबभावे तु कादिप्रातिपदिकेभ्य इत्यर्थो वा वाच्यः। फलभेदेऽपि वसेस्तव्यदित्यस्य प्रत्याख्यानन्दृष्टं यद्यपि तथाप्यत्र तथा नास्तीत्याह। यत्र भिन्नेति। इत्यपीति। तथा तु नोक्तमतः प्रत्ययशब्दापनयनन्नाभिप्रेतमिति भावः। एवन्तदपनयनस्याभिप्रेतत्वे। नन्वल्लोपस्यापि प्राप्तिसत्वात्तस्यानुक्तिः कथमत आह। अतो लोपमिति। फलैक्यायेति। यद्यादन्तेभ्य आचारे क्विप्स्यात्तदा धातुग्रहणसत्त्वे लोपः स्यादचाप इत्युक्ते तु नेति फलभेदः स्पष्ट एव। कस्य स्त्री की। तस्मादाचारक्विबन्ताद्यङ्लुकि लङ्यचेकेदित्यस्य सम्भवाभिप्रायेणाह। इकाररूपेति। असम्भव इति। शपा व्यवधानादसम्भ इत्यर्थः। इको गुणेतीति। अस्य सूत्रस्य भाष्येत्यत्रान्वयः। वदव्रजेतीति। अस्य सूत्रमुपक्रम्येति शेषः। एवञ्चेको गुणेतिसूत्रस्थभाष्यप्रमाण्यादेङन्तेभ्य आचारक्विपोऽभावः ओतः श्यनि आदेच उपदेश इतिसूत्रस्थभाष्यप्रामाण्यादोकारान्तेभ्य इति परित्यज्य सामान्यत एजन्तेभ्य इतयुक्तम्। आद्ये वृद्धिग्रहणस्य प्रयोजननिरूपणावसरे इहार्थमेव सिजर्थं वृद्धिग्रहणं कर्त्तव्यम् सिचि वृद्धिरिक एव यथा स्यादित्येन्निरूपणावसरे कस्यानिकः प्राप्नोतीतिशङ्कायां सन्ध्यक्षरस्य प्राप्नोतीति परेण कथिते न वै सन्ध्यक्षरमन्त्यमस्ती-

SGDF
Sri Gangeshwari Digital Foundation

स्युक्तम् । यद्येङन्तेभ्यः सेगोप्रभृतिभ्य आचारे क्विप्स्यात्तर्हि तद्भाष्यविरो-
धः स्पष्ट एव । द्वितीये ओतः श्यनीत्यत्र शितीति वक्तव्यम् । किम्प्रयो-
जनम् । उत्तरत्रशिद्ग्रहणाभावायेत्युक्तम् । अत्र ष्ठिवुक्लम्विचमितिसूत्रे शिद्ग्र-
हणाकरणप्रयुक्तलाघवन्दर्शितन्न तु तथा सत्योकारान्तादाचारक्विपि लटि
शपि लोपप्राप्तिरुद्भाविता । तत्र कैयटोऽप्याह । न ह्योतः श्यनोऽन्य
ओतः शिदस्तीति । तेन गोप्रभृतिभ्य आचारेक्विबभावो ध्वनितः ॥
तृतीये प्रातिपदिकानाम्प्रतिषेधो वक्तव्यः । गोभ्याम् । नौभ्याम् । स
तर्हि प्रतिषेधो वक्तव्यो न वक्तव्यः ॥ धातोरिति वर्त्तते ॥ क्व प्रकृतम् ।
लिटि धातोरनभ्यासस्य । अथापि निवृत्तम् । एवमप्यदोषः । उपदेश
इत्युच्यते । उद्देशश्च प्रातिपदिकानान्नोपदेश इत्युक्तम् । यद्यजन्तेभ्य आ-
चारे क्विप्स्यात्तदा धातुग्रहणानुवृत्त्या समाधानासङ्गतिः स्फुटैव । भूद्रुश-
ब्दौ पृथवीवृक्षयोर्वाचकौ । वार्त्तिकोक्तमाधवरीत्येति । तत्र तेन यथा सर्वप्रा-
तिपदिकेभ्य इतिवार्त्तिकस्य दध्यस्यति मध्वस्यति दधिस्यति । मधुस्यतीत्ये-
वमर्षमितिशेषादिदन्दधि मधुशब्दविषयमेवेत्युक्तन्तथात्रापि कल्प्यत इति
भावः । भाष्ये स्पष्टमिति । तत्र हि कास्प्रत्ययादितिसूत्रविहितस्यामो
मकारस्येत्संज्ञा कुतो नेत्याशङ्कायामित्कार्याभावान्न भविष्यति । प्रत्य-
यान्ततदयमाम् विधीयते तत्रा नास्ति विशेषः प्रत्ययपरत्वेऽन्त्यादचः पर
त्वे वेत्युक्तन्तेन हलन्तेभ्यः आचारे क्विबभावो ध्वनितः । सजातीयापे-
क्षत्वादिति । तस्मिन्सूत्रे शाविति उपादानात्तथा कल्प्यते ॥ वृत्रघ्नीत्यसि-
द्धयापत्तेरिति । अत्र वृत्रहन्शब्दस्य क्विबन्ततया तत्रानुनासिकस्येति दी-
र्घः स्यात्तथा चास्मात्पुंयोगात् स्त्रियां वृत्तौ नान्तलक्षणे ङीपि कृतेऽल्लो-
पो न स्यादिति । तदुक्तमिति । कास्प्रत्ययादितिसूत्र इति शेषः । त-
त्र हि सूत्रवार्त्तिकयोः फलैक्यायैकाज्भ्यः क्विपोऽनभिधानमुक्तम् । तदा-
हेति । तदभिप्रायेणाहेत्यर्थः । अत एव । अन्वाचयशिष्टत्वाङ्गीकारादेव ।
चरितार्थमिति । समुच्चयविवक्षायान्तु यत्र हलो लोपसम्भवो लोन्त्यपरि-

SGDF
Sri Gargeshwari Digital Foundation

भाषैकवाक्यतया स्यात्तत्रैव प्रत्ययोऽपि स्यादिति भृशग्रहणवैयर्थ्यं दुर्वारमिति भावः। वक्ष्यमाणेति। उपसर्गसमानाकारमित्यादिरूपमित्यर्थः। अनुबन्धासङ्गस्तु तत्रातो गुण इति पररूपेण द्रष्टव्यः। अन्यथा। अत्र समानाकारमिति पदाभावे। उपसर्गसंज्ञकम्पूर्वपदमित्येवोक्तौ। यत्रोपसर्ग एव पूर्वपदन्तत्राव्याप्तिं वारयति। उपसर्गस्यापीति। उपसर्गसमानाकारेत्युपादानफलन्तु तुन्दपरिमृजादिप्रातिपदिकात्क्यङ्प्रत्ययचिकीर्षायान्न तुन्देत्यस्य पृथक्करणम्। पूर्वपदमित्युपादानेनान्दोलयित्वा प्रेङ्खोलयित्वेत्यत्र आप्रशब्दयोर्यात्वत्रयत्रयोर्न पृथक्करणम् यत्र समानावयवत्वम्पूर्वपदस्य तादृशस्यास्ति तत्रैव पृथक्कृतिर्भवति। अशाप्रवृत्त्येति। अन्यथा तस्य सुपस्समुदायप्रकृतिकतया मनस् स् इत्यस्य यस्मात्सुप्विहितस्तदादिसुबन्तत्वविरहादसम्भवः स्यादिति भावः। तेन। पृथक्करणेन। अत एव। जातस्यप्यभावकल्पनादेव। सोपसर्गादित्यत्रोपसर्गपदमुपसर्गसमानाकारपरम्। अत एव। एकादेशरूपेणेतिव्याख्यानादेव। स्वाशब्दादित्यादौ तूपसर्गसमानाकारस्य सुशब्दादेर्यणादेशेन विकारेऽपि पृथक्कृतिर्भवत्येवेति भावः। तस्य पृथक्करणेन धातुसंज्ञाप्रयोजके प्रत्यये कृते ततः क्त्वाप्रत्यये च कृते पुनर्यथा समासो भवति तथोपपादयति। अवगल्भेतीति। धातुना। गल्भेतिशब्देन। सर्वत्र। यत्र पृथक्करणन्तत्रैव यत्र न धातुसंज्ञाप्रयोजकप्रत्ययचिकीर्षा तत्रापि। यथा अच्छगत्येत्यत्राच्छेत्यस्य गत्वाशब्देकदेशागमुधातुद्धारकमेव सामर्थ्यमिति। मूले आटः प्रतिषेध इति। उस्यपदान्तादोमाङोश्चेतिप्राप्तस्य पररूपस्य प्रतिषेध इत्यर्थः। एतद्विधेयसामर्थ्यात्प्रकृतेऽर्थवद्ग्रहण इति परिभाषायाः प्रतिपदोक्तपरिभाषायाश्चाप्रवृत्तिरिति बोध्यम्। विशेषापेक्षज्ञापकाभावे तु प्रकृतवार्तिकोदाहरणविषयेऽप्याङः पृथक्कृतिः स्यादिति क्यच्प्रत्यय उस्रशब्दात्स्याद्दन्ताल्लुङि कृते आडागम आङः परो जायेत तत्रश्चोमाङोश्चेत्यस्य प्राप्तिरेव नास्तीतिवार्तिकस्योक्तिसम्भवो न स्यादिति भावः। अत एव।

SGDF
Sri Gargeshwari Digital Foundation

अच्वेरित्यस्यानुवृत्तेः सत्त्वादेव अन्यथा। बाध्यसामान्यचिन्तानाश्रयणे। अत्रेदम्बोध्यम्। इदञ्च ज्ञापकम्भृशादिपठितसुदुस्पूर्वमनस्शब्दे स्वराति रिक्तविषये। तेन चैत्रः सुमनायत इत्यादौ सुविशिष्टस्य निघातस्ततः परस्यानिघातः। अत एवास्य सिध्यर्थम्भाष्यकृता भृशादिषूपसर्गः पराङ्गवत्स्वरविधाविति वचनम्पठितम्। भृशादिपाठे। भृशादिब्वितराणीत्यनेन भृशादौ पाठे। नित्यात्मनेपदमेवेति। अत्रैव पाठेत्वनेन क्यषि वा क्यष इत्यनेन विकल्पः स्यात्। ककारस्यापीति। न चककारो नः क्ये करस्य विभाषेत्यत्र विशेषणार्थोऽस्तु। लोहितडाज्भ्य एव क्यष्विधानेन फलाभावात्। वा क्यष् इत्यत्रापि वा यष इत्येवास्तु। उक्तभाष्य इति॥लोहितडाज्भ्यः॥ क्यष्वचनम्भृशादिष्वितराणीतिभाष्येत्यर्थः। कष्टाय क्रमणे। कष्टार्थप्रतिपादकप्रातिपदिकप्रकृतिकसुबन्तात्क्रमणेऽर्थे क्यङ्। स च सुप् कष्टायेत्युपादानाच्चतुर्थी। अत्र सूत्रे क्यङ्ग्रहणमनुवर्त्तते। मण्डूकप्लुत्या। न च लोहितादिडाजितिसूत्रे क्यष्ग्रहणमकृत्वा लोहिताडाज्भ्यो ञिच्चेति पठनीयम्। क्यङस्तत्राप्यनुवृत्तिः कार्या। प्रकृते मण्डूकप्लुतिर्न स्वीकार्या वा क्यष इतिसूत्रञ्च न कार्यम्। ञित्वादेवोभयपदसिद्धेरिति वाच्यम्। लोहिनीशब्दात्कयङि क्यङ्मानिनोश्चेति पुंवद्भावापत्तेः। कर्तृगामिक्रियाफलविवक्षायाम्परस्मैपदाभावापत्तेश्चेति। अन्तरङ्गत्वात्। करोत्यर्थस्य शीघ्रोपस्थितत्वात्। वृत्तिसर्गेतितीयाङ॥ तत्रसूत्रेसर्गेत्यनेनोत्साह एव प्रामाणिकैरुक्तः। न चैतत्सूत्रभाष्ये क्रमणेऽनार्जवे क्यङ् निपात्यत इत्युक्तन्तेन विरोध इति वाच्यम्। अनार्जवपदेनानृजुः सम्बन्ध उच्यते। भाष्यप्रामाण्याद्भावार्थकेऽप्युत्तरपदवृद्धिः॥अनार्जवे गम्ये॥ कष्टायेति निपात्यते। क्रमणङ्गमनम्। तच्चनार्जवविषयकं विवक्षितन्तेन तद्विषयकोत्साहो गम्यत इत्यभिप्रायेण। मूलकारस्याभिप्रायमाह। कष्टायत इत्युक्त्येति। अन्तरङ्गत्वादिति। करोत्यर्थस्य व्यापारस्य सर्वोपकारकत्वेनान्तरङ्गत्वम्।

SGDF
Sri Gargeshwari Digital Foundation

तत्त्वे। पापार्थत्वे । अस्य । पापार्था इति कथनस्य । अत एव । तदभिप्रायकत्वादेव । कण्वचिकीर्षायामित्यस्य कण्वचिकीर्षारूपेऽर्थे इत्यर्थः प्रतीयते स न युक्त इत्याह । कण्वचिकीर्षायामिति । कर्मणो रोमन्थ। अत्र यद्वर्त्तनायामिति व्याख्यातन्तल्लाभप्रकारमाह । वर्त्तीतीति॥अत एव तन्निरूपितकर्मत्वस्यापि सम्भवः। चरेत्यत्र सम्पदादित्वाद्भावे क्विप् । कैयटोक्तौ प्रमाणमाह । उक्तञ्चेति । उभयत्रान्वयाय मन्थश्चर्वणमिति व्याख्यातम् ।शब्दवैरकलह।करणशब्दस्य कारकविशेषबोधकतया करणे कारक इत्यर्थः प्रतीयते स तु न युक्तः । शब्दशब्दाद्यर्थस्याक्रियात्वात्तन्निरूपितकारकत्वासम्भवादत आह । व्याख्यानादिति। सुदिनदुर्दिनेत्यादिवार्त्तिकम् । अत्रत्य चकारेण भाष्योक्तानामटाऽट्टाशीकाकोटापोठासोठाप्रुष्टाप्लुष्टानाङ्ग्रहणम् । वेदनेत्यत्र विदधातोर्ज्ञानार्थकाण्णिचि युच् । प्रत्यासत्तिलभ्यार्थमाह। वेदनाकर्तृसम्बन्धीति । नमोवरिवश्चित्रङः क्यच् ।वरिवस्शब्दोऽव्युत्पन्नम्प्रातिपदिकं सेवार्थकम् । यद्यप्यत्र क्रियासामान्यार्थकङ्करणपदमनुवर्त्तते तथापि भाष्यीयव्याख्यानात्क्रियाविशेषः क्रमेण विवक्षित इत्याशयेनाह । पूजायामित्यादीति । तदुक्तम्भाष्ये । नमसः पूजायाम्॥वरिवसः परिचर्यायाम् । चित्रङ आश्चर्ये । मूले नमस्यति देवानिति। अत्र नमः शब्दस्य योगेऽपि वृत्तिघटकस्यानर्थकत्वान्न तद्योगे नमः स्वस्तीति चतुर्थी । स एवायमिति प्रत्यभिज्ञयाऽर्थवत्त्वमेवेति चेदुपपदविभक्तेः कारकविभक्तिर्बलीयसीति द्वितीयेति भाष्ये उक्तम् । चतुर्थी तु नमोऽस्तु देवेभ्य इत्यत्र चरितार्था । यत्र नारायणन्नमस्कृत्येति प्रयुज्यते तत्राप्युपपदेतिन्यायेन द्वितीयैव । नमः शब्दस्य निपातस्य द्योतकतया करोतेस्तत्र स्वनिष्ठापकृष्टत्वप्रकारकज्ञानानुकूलव्यापारवाचितया देवानाङ्कर्मत्वात् । अन्यत्रेऽचरितार्थतयेति । अस्य चित्रङ इत्युच्चारणस्य सत्त्वाद्यद्यप्युपदेशेऽयं ङित् । तथापि चित्रीयेतिसमुदायस्य तदन्तत्वाभावादात्मनेपदाप्राप्तेः सामर्थ्यादेवङ्कल्प्यत इति भावः । पुच्छभाण्डचीव

SGDF
Sri Gargeshwari Digital Foundation

रा । यद्यपि करण इति प्रागुक्तन्तथापि तत्सृखादिभ्यः कर्तृ वेदनायामित्यनेन व्यवहितमत आह । अत्र पुच्छादय इति । टिलोप इति । णाविष्ठवत्प्रातिपदिकस्येत्यत्र सामान्यतो णावित्येवोक्तमतोऽस्यापि ग्रहणमिति भावः । तस्य॥टिलोप । तस्य । शब्दान्तरेत्यस्य । कृताकृतप्रसङ्गमात्रेण नित्यत्वस्य लक्ष्यानुरोधादाश्रयणमिति भावः । कैयट इति । एतेन तस्य भाष्यानारूढत्वन्ध्वनितम् । भाष्यसम्मतरीत्या त्वाह । गमकत्वादिति । यद्यपि माणवकम्मुण्डङ्करोतीतिवाक्ये माणवकस्य कर्मसमानाधिकरणत्वमस्ति तथापि वृत्तौ मुण्डीतिणिजन्तस्यार्थो मौण्ड्यानुकूलव्यापार इति मौण्ड्यरूपफलाश्रयत्वान्मुण्डयति माणवकमित्यत्र माणवकपदोत्तरं द्वितीया मौण्ड्याश्रयस्य करणासम्भवादित्याशयेनाह । माणवकमित्यादि । आपुकः प्रातिपदिकावयवत्वाट्टिलोपशङ्कायामाह । विधानसामर्थ्यादिति । एषाम् । सत्यापेतिसूत्रविहितपुक्तानाम् । अत एव । लुङ्यनभिधानकल्पनादेव । आपुङितिभाष्यमिति । तत्र हि सत्यस्यापुगागमे टिलोपस्य प्राप्तिमाशङ्क्य एवन्तर्ह्यापुट् करिष्यते इत्युक्तम् । आपुटो णिज्भक्तत्वात्तस्मिन् टिलोपेऽपि सत्यापयतीति भविष्यतीत्यभिप्रायः । तदुत्तरमथ वा पुनरस्तु आपुगेव । ननु चोक्तष्टिलोपः प्राप्नोति । आपुग्वचनान्न भविष्यतीत्युक्तम्॥एवमुक्तमिति त्वन्यत्। अत्र णिच आपुडागमपक्षे टिलोपे च सति ततो लुङि चङि द्विर्वचनेऽससत्यदिति रूपमापुगागमपक्षे तु णौ चङीति ह्रस्वत्वेऽससत्यपदिति स्यादिति, लुङ्यापुट्पक्षेऽनभिधानमावश्यकमन्यथाऽथ वा पुनरस्त्वितिकथनस्यासङ्गः स्यात्। अयम् घप्रत्ययः ।हलन्त्या ।त्करोतीति णिचि तु तुत्थयतीत्येव । परत्वात् ।पुंवद्भावात्परत्वात् ।तदतिदेशसामर्थ्याच्चेति । पुंवद्भावातिदेशसामर्थ्याच्चेत्यर्थः । भवदुक्तरीत्या सर्वत्र टिलोपस्य प्राप्त्या तदतिदेशोऽन्यथा व्यर्थः स्यात् । अत एव । तस्याप्रवृत्तिस्वीकारादेव । अनित्यत्वे श्नसोरल्लोप इति तपरत्वम्प्रमाणमि-

SGDF
Sri Gargeshwari Digital Foundation

त्यन्यत्रोपपादितम् ॥ अत एव ॥ छन्दस्येतल्लोपसत्त्वादेव । मूले । पर्यववृढदिति । प्रभौपरिवृढ इति निपातनेन ढत्वस्य प्रवृत्तया तत्र यथा वृढशब्दद्वित्वन्तथोढिशब्दस्य नेतिध्वनयितुमेतदुपादानम् । उपसर्गसमानाकारस्य परिशब्दस्यपृथक्कृतिरत्र द्रष्टव्या ॥ तद्भावः । ढिशब्दस्य द्वित्ववादिनो भावः । ननु ढिशब्दद्वित्वेऽप्यभ्यासावयवस्य चुत्वे ढत्वस्यासिद्धत्वादौजिढदिति स्यादत आह । द्वित्वे कृत इत्यादि । वैयाघ्रपद्यवार्त्तिके । शुष्किकाशुष्कजङ्घा च क्षामिमानौजढत्तथेतिवार्त्तिके। तत्रैवोक्तमिति । परि स्वित्यादिना षत्वादिघटितधात्ववत्तुल्यत्वं यत्र तत्रैव स्थानिवद्भाव इत्युक्तम् ननु यदि स्वशब्दस्याप्यवोऽञ् णितीतिवृद्धिस्तदास्य सूत्रस्यात उपधा इत्यनेन योगविभागस्य सत्त्वर्थमित्येवप्रयोजनमुक्तन्तदसङ्गतमत आह । प्राप्तीत्यादि । अन्तरङ्गत्वादिति । छ्वोरितिसूत्रे सतुक्कग्रहणाद्धि साऽनित्या ॥ दृढतरमानाभावादिति ॥ पदस्य विभज्यान्वाख्याने हि सतुक्कनिर्देशस्य ज्ञापकत्वं सम्भवति ॥ यदि साऽनित्या न स्यात्तदा तया परिभाषया शादेशस्याङ्गस्य पूर्वम्प्रवृत्तिः स्यादिति सतुक्कनिर्देशो व्यर्थः स्यादितिरीत्या। यदि तु प्रकृते क्रमेणान्वाख्यानमेव कल्प्यते तदा वार्णशास्त्रास्याङ्गशास्त्राप्राप्तिसमये प्राप्त्या तुकोऽश्रवणाय सतुक्कनिर्देशस्यावश्यकत्वेन तस्यानित्यत्वे ज्ञापकत्वन्न सम्भवतीति भावः । व्याश्रयेऽपीति । समाननिमित्तिकत्वं समानाश्रयत्वमिति भवत्सम्मतमिति भावः ॥ परत्वात्प्राद्विधिति ॥ न च प्राग्वादेशविषये टिलोपस्यावश्यप्राप्त्या चारितार्थ्याभावात्कथमेतदिति वाच्यम् ॥ कृतेऽपि टिलोपेऽवशिष्टे आदेशस्य चारितार्थ्यमित्यभिमानात् ॥ वस्तुतष्टिलोपाप्राप्तियोग्ये चारितार्थ्याभावेन प्राग्वादेशानामपवादत्वमेवेत्याह ॥ किञ्चेति ॥ अन्त्यमेव अपवादत्वेन समाधानमेव ॥ अत एव ॥ अपवादत्वादेव ॥ उच्चारणसामर्थ्यादिति ॥ अत्राप्यपवादत्वादिति तु नोक्तम् ॥ आदेशात्पूर्वन्तस्याप्राप्तेः॥ननुवर्णमा-

SGDF
Sri Gargeshwari Digital Foundation

प्रसगादेशत्वे सर्वादेशत्वन्तस्य न स्यादत आह॥सर्वादेशत्वमिति॥ आतिदेशिकमिति ॥ त्वादयतीत्यादिमूलोक्तम्॥ ननु स्वादित्वविरहात् कथम्भत्वमत आह । इष्टेति । अतिदेशेनेत्यनेन यचि भमित्यस्याप्राप्तिमङ्गीकृत्यैव समाहितम् । न ह्यतिदेशेन णिचः स्वादित्वातिदेशो लभ्यते । इष्ठवदित्यत्र सप्तम्यन्ताद्वतेः स्वीकारात् । अत एव श्वयुवेतिसूत्रघटकस्यातद्धित इत्येतद्बोध्यनिषेधस्याप्रवृत्तिः । ननु श्वादीनां सम्प्रसारणे नकारान्तग्रहणमनकारान्तप्रतिषेधार्थमिति वार्त्तिककारोक्तेः कथमत्र सम्प्रसारणमत आह । नान्तेति । कथं सम्प्रसारणमिति । नान्तत्वविरहात्कथं सम्प्रसारणमित्यर्थः । वार्त्तिकैकवाक्यतयेति । अस्यास्यापीत्यत्रान्वयः । तत्साहचर्येण । अल्लोपोऽन इत्येतत्साहचर्येण । सूत्रान्तरसाहचर्यन्न व्यत्रस्यापकमत आह । अर्थाधिकारेति । टिलोपमभ्युपगम्य सम्प्रसारणाभावमुपपाद्य टिलोप एव तावद् दुर्लभ इत्याह । किञ्च षपूर्वेतीति ।प्रकृतिभावस्य नस्तद्धितइतिसूत्रबाधकत्वाङ्गीकारेऽपि भाष्यविरोधः प्राप्नोति । यस्येतिसूत्रानन्तरपठितेष्वेव यस्येत्यादौ प्रकृतिभाव इत्यनेन प्रकृतिभावस्य लाभ इति तद्विरोधशङ्कावारणाय तदभिप्रायमाह । यत्त्विति । न च पूर्वोक्तरीत्या तद्धितत्वाभावात्कथन्नस्तद्धित इतिप्राप्तस्यापि प्रकृतिभाव इत्येतदिति वाच्यम् । तद्धितत्वाभावेपि ब्रह्मिष्ठ इत्यत्र तस्य दर्शनेन तदतिदेशस्य सम्भवात् । न च मूलोक्तरीत्या तद्दर्शनमेव दुर्लभमिति वाच्यम् । वक्ष्यमाणरीत्या तद्दर्शनसम्भवात् । तन्नयायेति । वार्णादाङ्गमितिन्यायेत्यर्थः। टेरित्यस्याप्राप्ताविति । विन्मतोर्लुकस्तदपवादत्वस्य कथनात्। ब्रह्मिष्ठ इतिरूपङ्किम्मतुबन्तस्य उत ब्रह्मनूशब्दस्यैवेति वितर्क्य पक्षद्वयेऽपि दूषणमाह। किञ्चेति। तेन।लुका।न चोत्सर्गस्य टेरित्यस्य प्रवृत्त्युत्तरं यदि विन्मतो रित्यस्य प्राप्तिस्तदास्यापवादत्वं येन नाप्राप्तिन्यायेन स्यात्तदा प्रवृत्तिमात्रबाधः स्यात्सैव तु कथम् । पूर्वम्ब्रह्मवच्छब्दादिष्ठनि मतुबवयवस्यातो निवृत्तौ ह्यद्धाधिकविकारसत्त्वेनैकदेशविकृतन्यायाप्रवृत्त्या मतुप्त्वबुद्ध्यसम्भवादिति

SGDF
Sri Gangeshwari Digital Foundation

वाच्यम्।विभाद्यन्तं यद्गाभिन्नमङ्गन्तदवयवस्य निर्द्दिश्यमानसजातीयावयवस्य लुगित्यर्थेन लुगुत्तरमपि सर्वे सर्वपदादेशा इतिन्यायेन तान्तस्य वान्तादेशे स्थानिवद्भावेन मतुबन्तत्वबुद्ध्या तदवयववकारे निर्द्दिश्यमानावयवत्वबुद्ध्या लुक्प्राप्तेर्निरूपयितुं शक्यत्वात्। परत्वादित्युक्तिमपि खण्डयति। किञ्चेति। ध्वनिततयेति। तत्र हि प्रकृत्यैकाजितिसूत्रोदाहरणानामन्यथा सिद्धिनिरूपणावसरे विन्मतोर्लुगर्थमित्यभिधाय ननु च विन्मतोर्लुक् टिलोपम्बाधिष्यते। यथैव खल्वपि विन्मतोर्लुक् टिलोपम्बाधते एवन्नस्तद्धित इत्येतमपि बाधेतेत्युक्त्वा येन नाप्राप्तिन्यायेन टिलोपस्यैव बाध इत्युक्तम्। ततश्च स्त्रग्वीयानिति न सिद्ध्यतीति। अथ वा पुरस्तादपवादन्यायेन टिलोपस्यैव बाधकस्स इत्यभिहितम्। अत्र पुरस्तादपवादन्यायेनेति नस्तद्धित इत्यस्य टिलोपापेक्षया परत्व एवोपपद्यत इति तथा कथनेन तस्य परत्वन्ध्वनितमिति। नेत्येक इत्यत्रैकपदाभिधानस्य बीजन्दर्शयति। टिलोपेनेत्यादिना। तत्परिभाषेति। अङ्गवृत्तपरिभाषेत्यर्थः। परिभाषायाः प्रदर्शनानन्तरं किमेतस्याः प्रयोजनमितिप्रश्ने पिबतेर्गुणप्रतिषेध उक्तस्स न वक्तव्य इत्येव प्रयोजनमुक्तन्न तु लक्ष्यसिद्धिरूपन्तेन परिभाषाभावो ध्वनितः। इदमेव। वस्वन्तत्वस्य दुर्लभत्वमेव। चाविति दीर्घ इति। वाक्यसंस्कारपक्षे प्रति अच् इ इति स्थिते प्रकृत्यैकाजितिप्रकृतिभावेऽच इत्यल्लोपे चाविति दीर्घ इत्यर्थः। असमास इति तु नेति। सिन्नित्यसमासयोरितिप्रतिषेधो नेत्यर्थः। ननु यदि पृथक्करणेन समासनिवृत्तिस्तर्ह्युत्तरपदपरत्वाभावेन सम्यादेशाभावात्कथं समीत्यस्य श्रवणमत आह। पृथक्करणेनेत्यादि। स्थानिवत्त्वेन। सर्वस्याच् इत्यस्य च् इत्यादेशकल्पनया। न चान्तरङ्गत्वात्सम्यादेशस्यैव प्रत्यञ्चमाचष्टे प्रतीचयतीत्यत्रापि णिजुत्पत्तेः प्राग्यणादेशोऽपि स्यादिति प्रतीचयतीत्यस्यासिद्धिः। अकृतव्यूहपरिभाषायाः स्वीकारे तु समीचयतीत्यस्याप्यसिद्धिरिति वाच्यम्। चौ प्रत्यङ्गस्य प्रतिषेध इतिवार्त्तिकेन

SGDF Sri Gargeshwari Digital Foundation

समीचयतीत्यस्य सिद्धिः। प्रत्यङ्गमन्तरङ्गम्। न च वार्त्तिकेन समीचयतीत्यत्रापि प्रतिषेधः प्राप्नोतीति वाच्यम्। तदुत्तरभाष्ये एतदेव ज्ञापयति न चौ प्रत्यङ्गम्भवति। यदयञ्चौ दीर्घत्वं शास्तीत्युक्तम्। तद्भाष्यैकवाक्यतया यत्रान्तरङ्गनिमित्तस्य बहिरङ्गेणाच्सम्बन्धिलोपेन विनाशसम्भावना तत्रैव वार्त्तिकेनान्तरङ्गस्य प्रतिषेधो बोध्यते। समीचयतीत्यत्र तु स्थानिवत्त्वेन तथा नास्तीति भावः। तिर्यञ्चमाचष्ट इत्यत्र प्रकृतिभावाभावं साधयति। तिरस इति। अलोप इतिप्रतिषेधस्त्वत्र न प्रवर्त्तत इत्याह। तिरसस्तिर्यलोपेति। विष्वग्देवयोरितिसूत्रादञ्चतावप्रत्यय इत्यनुवर्त्तते। न लोपो यस्येत्यर्थकमलोप इतिपदञ्च तस्य विशेषणमिति प्रतियोगितासम्बन्धावच्छिन्नप्रतियोगिताकलोपाभाववतो ग्रहणमित्यर्थश्चेत्स्यात्तदा टेरितिसूत्रविहितलोपस्य ग्रहणात्स्यात्तिर्यादेशस्य प्रतिबन्धः। परन्तु स लोपो न गृह्यते किन्त्वनन्तरस्यादच इत्यलोप एव टिलोपस्तु ततो व्यवहितः। एवञ्चात्र नलोपो यस्येति बहुव्रीहिसमास एव। अच इतिसूत्रविहितो लोपश्च प्रतियोगितयाऽवयवे वर्त्तते। तदभेदोऽञ्चतावित्यनेन बाधित इत्यलोपपदमर्शआद्यजन्तमिति लोपाभाववत्संबन्धिनो ग्रहणम्। सम्बन्धश्चावयवावयविभावो लोपाभाववतावयवेनाबाधित इत्यच इतिलोपस्तिरश्चेत्यादौ वर्त्तते तत्र तिर्यादेशो न भवति। प्रकृते तु स्यादेवेति भावः। ननु तिर्यादेशे जातेऽपि टिलोपेऽव्ययानामितिविहितः प्राप्नोतीत्यत आह। स्थानिवत्त्वेनेत्यादि। अत एव। असिद्धत्वादेव। टिलोपस्य पराच्सम्बन्धित्वेन बहिरङ्गत्वमिति भावः। अनेन। असिद्धत्वेन। तस्याः। अङ्गवृत्तपरिभाषायाः। फलाभाव इति। पिबतेर्गुणप्रतिषेधोकरणमात्रस्य तत्प्रयोजनत्वेन भाष्ये कथनात्। मूले आमुमुमुआयदिति। अत्र मुत्वस्यासिद्धत्वेन दशब्दबुद्ध्या द्वित्वेऽभ्यासे दकारस्यैव श्रवणापत्तिरिति तु न शङ्क्यम्। पूर्वत्रासिद्धीयमद्विर्वचन इति निषेधात्। अव्ययानामिति टिलोप इति।

SGDF
Sri Gargeshwari Digital Foundation

प्रकृत्यैकाजिति प्रकृतिभावस्तु टेरित्यस्यैव बाधक इति प्रागुक्तमिति शेषः। यदि तु सर्वस्य प्रकृतिभावः प्रकृत्येतिपदस्वारस्यात्कल्प्यते तदा स्वरयतीत्येव। संज्ञापूर्वकविधेरनित्यत्वम्प्राचीनसम्मतं यद्यपि तथापि कैयटेन तेन वचनेन समाधानन्न कृतङ् किन्तु परिभाषान्तरेणेति तस्या असत्त्वन्ध्वनितमित्यभिप्रायेणाह। णावित्याङ्गेनेति। अस्याङ्गत्वमतिदिश्यमानकार्याणामुत्पत्तिदेश एव देश इति स्वीकाराद्बोध्यम्। अत एव। अङ्गवृत्तपरिभाषया निषेधादेव। सिद्धान्तिसम्मतम्पक्षमाह। परे त्विति। एतद्भाष्यप्रयोगात्। दवयतीतिभाष्यप्रयोगात्। अस्मिन्वाक्ये। इष्ठवदितिवाक्ये। वाचकत्वसम्बन्धावच्छिन्नाधारत्वं सप्तम्यर्थः। अभावातिदेशः। इष्ठनि यन्न भवति तस्मावपि नेतिरीत्याऽभावातिदेशः। इष्टसिद्धिः। दवयति प्रापयतीत्यनयोः सिद्धिः। तदनुक्तेति। भाष्यानुक्तेत्यर्थः। एतेनेति। अभावातिदेशेन। अस्येत्येवोक्तमित्यत्रान्वयः। नञ्घटितानित्यत्वेन। नञ्घटितमनित्यमितिपरिभाषया। अरराजदित्यत्रेव मतुपो लुकरप्यग्लोपित्वमस्त्येव। एतत्। अशश्रयदित्यस्याभिधानम्। इत्युचितमिति। नञ्घटितमितिपरिभाषाया असत्त्वादिति भावः। यणादिलोप इति। वन्शब्दस्य लोपः। माधवानुरोधेनेति। आदेशस्य आदेरुच्चारणमिति शेषः। स्रजयतीतिवदिति। तत्र यथा प्राचीनैः संज्ञापूर्वकविधेरनित्यत्वादुपधावृद्ध्यभाव उपपाद्यते तथात्रापि तत्र यदिसंज्ञापूर्वकेतिपरिभाषाया असत्त्वेऽप्यभावातिदेशेन वृद्ध्यभावस्तदाऽत्रापि तथेति भावः। कनादेशो युवाल्पयोरिति भवतीति तमुपपाद्य तत्प्रसङ्गेन आदेशोऽप्युपस्थित इति तद्विषये विशेषमाह। मूले इह अजगौ नेति। विशिष्टस्य। प्रशब्दसहितस्य। इदमपि माधवरीत्यैव। यस्मात्प्रातिपदिकाण्णिज्विधीयते तस्यैव प्रातिपदिकस्यातिदेशेनादेशः प्रकृते तु णिच्प्रकृतिभूतं प्रातिपदिकं शस्येतयेव तस्य न स्थानित्वेनोपादानमतोऽत्र नादेशस्य प्रवृत्तिः॥

॥ इति नामधातुविवरणम् ॥

SGDF
Sri Gangeshwari Digital Foundation

नन्वेभ्यो धातुभ्य इत्यनुपपन्नं भ्वादिपठितानामेव धातुसंज्ञाविधानादत आह । धातोरित्यनुवृत्तीति । धातोरेकाच इत्यतो धातोरित्यनुवृत्तिसामर्थ्यादेषान्धातुत्वमस्तीति ज्ञायते । कण्ड्वादयः । भ्वादिपठिताः । धातुप्रकृतिककार्योद्देश्यत्वादित्यनुमानम् । अनुवृत्तिसामर्थ्यादित्युपलक्षणम् । यकः कित्त्वसामर्थ्यादित्यपि बोध्यम् । तद्धि कण्डूयति कण्डूयत इत्यादौ गुणाभावार्थम् । एषाम्प्रातिपदिकत्वे च दीर्घपाठः कण्डू मन्तू इत्यादौ दृष्टो ज्ञापकः । यद्येते धातव एव स्युस्तर्हि दीर्घोऽकृत्सार्वधातुकयोरित्येव सिद्ध इति दीर्घोच्चारणं व्यर्थं स्यात् । तदुक्तम्भाष्ये । धातुप्रकरणाद्धातुः कस्य चासञ्जनादपि । आह चायमिमन्दीर्घमतो धातुर्विभाषित इति । न च दीर्घविधानाभावेप्येभ्यः क्विपि सर्वप्रातिपदिकेभ्य इत्यनेन कृते पुनः कर्त्तरि क्विपि कण्डूरित्यादिसिद्ध्यर्थन्दीर्घोच्चारणमस्त्विति कथन्दीर्घोच्चारणस्य ज्ञापकत्वमिति वाच्यम् । नैतेभ्यः क्विप् दृश्यत इत्यनेन भाष्यकृतैव समाधानात् । कण्ड्वादीनामाकृतिगणत्वस्वीकारे प्रमाणमाह । कण्ड्वादीति ।

॥ इति कण्ड्वादिविवरणम् ॥

तृतीयस्येत्यनेनाच्सहितस्य द्विर्वचनन्न लभ्यतेऽतोऽत्राप्येकाच इत्यस्य सम्बन्धो बोध्यस्तस्मादेवाह । एकाच इत्यर्थ इति । तद्घटितेति । कण्ड्वादिघटितेत्यर्थः । लक्षणायाम्मानमाह । भाष्य इति । कण्वादिघटित एव लक्षणा न तु यगन्तघटिते । तेन कण्डूमिच्छतीत्यर्थे यत्र केवलकण्डूप्रकृतिकसुबन्तात्क्यच् ततः सन् तत्रापि द्वित्वसिद्धिर्यथेष्टं बोध्या । नामधातुष्वित्यत्र नामधातुशब्दो नाम्नो धातुरित्यर्थकस्तत्पुरुषसंज्ञकः । विग्रहवाक्ये दृष्टा या षष्ठी तदर्थश्च घटितत्वरूपः सम्बन्ध इति तदर्थान्तर्भावेणैकार्थीभावस्वीकारादाह । नामघटितेति । नामपदञ्च सुबन्तपरमिति प्रागुक्तम् । अत एव । नामघटितधातौ यथेष्टं द्वित्वस्वीकारादेव । अतोऽपीति ।

SGDF Sri Gargeshwari Digital Foundation

सुबन्तघटितधातोरेव भाष्यीयोदाहरणदर्शनादपि । ण्यन्ताच्चङि । प्रातिपदिकप्रकृतिकण्यन्ताच्चङि । नामघटितधातुस्थल एव पुपुत्रीयिषतीत्युदाहरणादेव नामधातुशब्दस्य कर्मधारयत्वशङ्कापि न कार्या । यदुक्तम्मूलेऽन्यतमस्य तत्साधकमाह । एकाच इत्यादि । ननु यत्र कण्ड्वादियगन्तास्सिच् तदन्तात्सन् तत्र कण्ड्वादेरित्यनेन कण्डूययिसेति स्थितौ यशब्दस्य द्वित्वे कण्डूयिययिषतीति एवङ्कण्ड्वादियगन्तविषये आयादय आर्द्धधातुके वेत्यनेन यकोऽभावेऽपि कण्डूधातोर्ल्युट् तदन्तादाचारे क्विप् ततः सन् आचारक्विबन्ताद्धेतुमण्णिजन्ताच्चङ् वा तत्रापि तृतीयैकाचो द्वित्वापत्तिरेवं पुत्रीयेतिक्यजन्ताण्णिजन्तात्पुनर्णिच् ततः सन् चङ् वा तत्रापि यथेष्टमित्यस्य प्रवृत्त्यापत्तिरत आह । एषां वचनानामिति । अत्र बहुवचनमीर्ष्यतेस्तृतीयस्येत्यस्यापि सङ्ग्रहाय । तद्वदेव । नन्द्रा इतिसूत्रवदेव । आदिभूतादचः परस्यैवेति । अजादेरित्यनुवृत्त्या नटभार्याबद्धरज्जुनानीति न्यायेन नकारसहितस्य यत्राद्रिशब्दप्रकृतिकसुबन्तात्क्यच् तदन्तात्सन् तत्र दकारसहितस्य च प्राप्तमपि द्वित्वन्न न्द्रा इतिनिषेधेनादिभूतादचः परस्यैव नेत्यर्थः। इन्द्रीयतेः सनि इडागमेऽतोलोप इत्यल्लोपस्य द्विर्वचनेऽचीतिनिषेधाद्यशब्दस्य द्वित्वप्राप्त्या यिशब्दस्येत्युपपादनमनुचितमित्यभिप्रायेण शङ्कते । न चेति । कार्यानुभवसत्त्वेन । समुदायावयवयोरिकारयकारयोर्द्वित्वप्राप्त्या सनो द्वित्वानुभवसत्त्वेन द्विर्वचनेऽचीत्यस्याप्रवृत्तिरिति भावः । नामधातुष्वित्यनेन सुबन्ते यत्रैकाच्त्रयन्तत्र प्रवृत्तिर्यथेष्टमित्यस्येत्यभिमानेन शङ्कते । न चेति । नामघटितधातुषु नामघटितधातुघटकवर्णसम्बद्धैकाचामित्यर्थस्याश्रयणेन प्रकृते नामघटितधातुघटकयकारस्य तद्घटकत्वान्निषेधस्य प्रवृत्तिर्यथेष्टमितिवचनस्य च प्रवृत्तिरस्त्येवेत्याह । नामधा[illegible]ति । ननु मूले यिशब्दस्येत्येवोक्तन्न तु यिस्शब्दस्येत्यत्र किम्बीजमत आह । यिशब्दद्वित्वेऽपीति । अनास्थयेति । यथा कथञ्चित्कार्यानुभवसत्त्वापेक्षिता साऽस्त्येव यिस्शब्दस्य द्वित्वेऽपि सनोऽका-

SGDF
Sri Gargeshwari Digital Foundation

रान्तस्य यथा द्वित्वानुभवो भवन्मतेऽपि नास्ति तथापि न हि कार्यीतिवचनस्य प्रवृत्तिर्भवत्येव तथास्माकमपीति भावः । इदमिति । चन्दिद्रीयिषतीत्यत्र नकारपरित्यागेन द्वित्वकरणमित्यर्थः । माधवानुरोधेनेति । अत एव नदराणां संयुक्तानामचः परस्यैव द्वित्वनिषेध इत्येव प्रागुक्तम् । आदिभूतादचः परस्येति । अत्रादित्वन्न धातुघटकाजन्तरापेक्षयैवेति किन्तु यत्र द्वित्वस्य प्रसक्तिस्तत्र तस्य समुदायस्यावयवो योऽच् स्वाव्यवहितोत्तरत्वसम्बन्धावच्छिन्नप्रतियोगिताकतादृशसमुदायघटकाभाव--वांस्ततः परेषान्नदराणामेव निषेधस्य प्राप्तिरिति न चन्द्रशब्दस्यावयवो यो नकारस्तस्य निषेधप्राप्तिरिति भावः । माधवेनेति । एतेन पूर्वोक्तदवयतीरिभाष्यप्रयोगे यथा वृद्ध्यभावोऽभावातिदेशात्तथा स्रजयतीत्यत्रैव वृद्ध्यभावस्तेनापि स्वीकार्य इति ध्वनितम् ॥

इति प्रत्ययमालाविवरणम् ।

कर्तरि कर्मव्यतिहारे । क्रियापि कृत्रिमङ्कर्मेति भाष्योक्त्या यद्यपि कर्मशब्देन क्रियाग्रहणे विरोधो नास्ति तथापि कर्मशब्दस्य लौकिककर्मपरत्वमेव प्रसिद्धत्वादिति प्रतिपादयितुमाह । कर्मेह क्रियेति । न कृत्रिमकर्मग्रहणम् । न लोकप्रसिद्धकर्मग्रहणम् । कर्मशब्दस्य क्रियापरत्वे सूत्रार्थानुपपत्तिं शङ्कते । यद्यपीति । अत एव । उक्तस्य व्यतीहारस्य क्रियासम्बन्धित्वाभावादेव । एतेन । क्रियायाः साध्यस्वभावत्वेन । क्रियाया एकत्वे हि देवदत्तकर्तृकक्रियाया यज्ञदत्तेन करणं सम्भवेत्तदेव न सम्भवति कर्तृभेदेन क्रियाया भेदादिति भावः । अत एव । परिवर्तनरूपस्य व्यतीहारस्यासम्भवादेव । तत्तत्साध्यत्वेनेति । यथा देवदत्तसाध्यत्वेन ज्ञाता या क्रिया सा यदा यज्ञदत्तेन क्रियते तदा व्यतिलुनीत इत्यादि व्यवहारः । अन्यक्रियामन्यः करोतीत्यादि जयमङ्गलाकारोक्तेरप्ययमेवार्थः । सः । प्रकृतसूत्रघटककर्मव्यतिहारशब्दार्थः । अर्थान्तरम-

SGDF
Sri Gangeshwari Digital Foundation

प्याह । परस्परकरणमिति । तत्कर्तृमात्रे । अत्र मात्रपदं कार्त्स्न्ये । अत एव । एतादृशे विषये द्वयोर्बहूनां वा तादृशक्रियाकर्तृत्वविवक्षया यत्र सद्भावस्तत्रैव सूत्रोदाहरणादेव । एतेन । वक्ष्यमाणप्रकारेण एकस्यैव कर्तृत्वासम्भवेन च । अपास्तमित्यत्रास्यान्वयः । देवदत्तेन सह चैत्रो व्यतिलुनीत इत्यस्माद्देवदत्तसाहित्यवच्चैत्रकर्तृकं व्यत्यस्तं लवनमिति शाब्दबोधे देवदत्तेन कर्तुं योग्या या लवनक्रिया तामेकश्चैत्रः करोतीति मानसबोधसम्भव इति कर्मव्यतिहारोऽस्त्येव । अत एव । एतादृशे विषये एकवचनान्तप्रयोगस्येष्टत्वादेव । अकर्मव्यतिहार इति । कर्मशब्दोऽत्र क्रियापरः । क्रियाव्यतिहाराभावेऽपीत्यर्थः। तस्यै विश्राण्यतया सहोपभुङ्क्त इत्यत्र तस्याविश्राणनक्रियासम्प्रदानत्वविषयकशाब्दबोधे सति तत्साहित्यवदेककर्तृकवर्त्तमानकालिकी उपभोगक्रियेतिशाब्दबोधे तस्याः शाब्दीय उपभोगान्वयस्तदभावस्य सत्त्वेन तस्या अप्राधान्यसत्त्वात्सहयुक्तेऽप्रधान इत्यनेन तृतीया सहार्थयोगे एव जातेति तृतीयान्तप्रयोगस्य यद्यप्युपपत्तिस्तथापि क्रियाभेदादेकजातीयोपभोगक्रियायामन्यकर्तृकत्वेन सम्भावितायामन्यकर्तृकत्वस्याप्रतीतिरतो व्यतीहाराप्रतीतिरिति भावः । ननु विश्राणनकर्त्तरि दासीसाहित्यविवक्षायां सहार्थतृतीया स्यादेवेत्यत आह । किञ्चेति । अयम्भावः । विश्राणनविशिष्टोपभोगोऽत्र सम्पूर्वकदाण्धात्वर्थः। दाण्धात्वर्थघटकदाने च तस्याः कथमपि न कर्तृत्वमिति सम्प्रदानत्वमेव कल्पनीयमुपभोगकर्त्तरि च साहित्यमिति कारकविभक्तेः प्राबल्याच्चतुर्थ्येव युक्तेति । परोक्तमभ्युपेत्याह । किञ्च धातोरिति । दास्या प्रोत्साहितः कामुकस्त्वस्यै यावद्ददाति तावत्त्वया विपरीतरत्यादिना प्रथमत एवोपभोगः प्रारब्धो यत्र तत्र प्राधान्येन भासमानोपभोगे तस्याः कर्तृत्वमिति कारकविभक्तित्वात्प्रथमैव युक्ता । तस्यै विश्राण्येत्यस्य क्त्वाप्रत्ययस्योपपत्तिस्तूपभोगमध्य एव कामुककर्तृकदानानन्तरमप्युपभोगसत्त्वान्मुखं व्यादाय स्वपितीत्यत्रेव कार्या । अ

SGDF
Sri Gangeshwari Digital Foundation

एव । उपपदविभक्तेरिति न्यायेन कारकविभक्तेः प्राबल्यादेव । अक्रियायोगार्थमिति । क्तप्रत्ययार्थकर्त्तरि साहित्यविवक्षया क्रियायोगाभावार्थमित्यर्थः । नन्वेकवचनान्तप्रयोगो भट्टिकाव्य एव दृश्यत इति चेद्दूषे तर्हि सोऽप्यनुचित इत्याह : एतेनेति । पूर्वोक्तस्य तत्तत्साध्यत्वेन ज्ञातक्रियायाः साध्यसाधनभावव्यत्यासस्यैव कर्मव्यतिहारपदार्थत्वेन । आत्मनेपदौचित्याच्चेति । प्रकृते तु न तथा । उभयोरपि धर्मयोः कर्तृत्वस्यास्धात्वर्थनिरूपितस्य युगपत्प्रतीतिर्न तु त्वद्धर्मकर्तृकत्वेनोचितक्रियायास्तद्धर्मस्यैव कर्तृत्वप्रतीतिरिति नात्रात्मनेपदमुचितमिति भावः । तत्तद्भाष्ये दृष्टानामेकवचनान्तप्रयोगाणान्तु छान्दसत्वमेवेत्याह । तासस्त्योरित्यादिना । इति दिगिति । दिगर्थस्तु द्वितीयस्यापि परस्परकरणरूपव्यतीहारस्य नात्र भट्टिप्रयोगस्थले प्रसङ्गः । यत्र कर्तृभेदेऽपि युगपदुभयकर्तृका क्रियाऽऽशुसञ्चारित्वेनालातचक्रवदेकत्वे नैककालिकत्वेन च गृह्यते तत्रैव तादृशव्यतीहारसत्त्वस्यात्मनेपदप्रयोजकत्वम् । संप्रहरन्ते राजान इत्यत्र यथा । प्रकृते तु न तथा । क्रौर्याक्रौर्यकर्तृकत्रत्नयोर्भेदस्यैव प्रतीतेरिति । नन्वस्मिन्सूत्रे कर्तृग्रहणं व्यर्थम् । भावकर्मनिवृत्त्यर्थत्वन्तु तस्य न सम्भवति । तत्र हि भावकर्मणोरित्यनेनेष्यत एवात्मनेपदम् । व्यतिगम्यन्ते ग्रामाः । व्यतिहन्यन्ते दस्यव इति यथा । न च न गतीतिसूत्रेणात्मनेपदस्य कर्मव्यतिहारे निषेधेन न स्यादिति वाच्यम् । अनेन सूत्रेण प्राप्तस्यानन्तरस्येति न्यायेन निषेधेऽपि व्यवहितेन भावकर्मणोरित्यनेन प्राप्तस्य निषेधारम्भत्रादिति चेन्न । शेषात्कर्तरीतिसूत्रार्थमेतदुपादानात् । तत्र हि कर्तरीत्यनुवर्त्य कर्तैव यः कर्ता तत्र यथा स्यादित्यर्थ इष्यते । अनुपराभ्यामितिसूत्रार्थञ्चेति तत्रैव वक्ष्यते । नेर्विशः । पूर्वन्धातुः साधनेन युज्यत इतिन्यायेन साधनबोधके लकारे तस्यापरनिमित्तकत्वेनान्तरङ्गत्वान्तिप्तसितिसूत्रेण सामान्यत आदेशे उपसर्गयोगेऽपि कृताकृतप्रसंगित्वेन नित्यत्वाद्विकरणा-

SGDF
Sri Gargeshwari Digital Foundation

न्ताङ्गस्यादि कृते तस्य समुदायभक्ततया धातोर्नेः परत्वासम्भवान्नियमो नस्यादित्याशयेनाह । नेरिति षष्ठीति । अत एव । द्योतकानान्न्यादीनाङ्ग्रहणादेव । तेनोन्निकुलङ्ग्रामम्प्रविशतीत्यर्थके उन्निविशति ग्राममित्यत्र न । आङो दोऽनास्य । ददातेर्ञित्वादात्मनेपदं सिद्धमेवेत्यत आह । अकर्त्रभिप्राय इति। विकासार्थत्वमिति । ओष्ठपुटविभागार्थत्वमित्यर्थः । अत एव विपादिकां व्याददातीत्यत्रापि प्रतिषेधः सिद्धः । एवञ्चाविकासार्थस्य ददातेर्ग्रहणे यदोपसर्गवशाद् ग्रहणाद्यर्थकता तदाऽनेनात्मनेपदमिति सिद्धौ प्र ीऽमाददातीत्यादि न भवति तदाह । प्रतीकेति । लाभाच्चेति । एवञ्च मनोरमोक्तौ हरदत्ताद्यनुसारीसमाधानाभासो निरस्तः । अस्यैव । पूर्वोक्तस्यैव । अत्र भाष्ये स्वाङ्गकर्मकाच्चेत्युक्तन्तस्य स्वाङ्गकर्मकादेव प्रतिषेध इत्यर्थस्तदभिप्रायेण मूले पराङ्गकर्मकान्न निषेध इति । भाष्ये ण्यन्तस्यैव इति । माणवक आगमयस्व तावदित्यस्य । नन्वागमयस्वेत्यत्र प्रयोजकव्यापाराप्रतीतेः कथण्णिजित्यत आह । हन्त्यर्थाश्चेतीति । शिक्षेर्जिज्ञासायामित्यत्र शिक्षविद्योपादान इ यस्य न ग्रहणङ्किन्तु शकिः सन्नन्तः। सनिमीमेति सूत्रेण कृतेस् भावविशिष्टोऽनुकृतः। एवञ्च जिज्ञासायामित्यस्यान्वयाय ज्ञानपदाध्याहार आवश्यक इत्याह । अत्रेत्यादि । मूले नियमार्थमिति । न चैताद्दशनियमस्वीकारेऽस्यानुदात्तत्वं व्यर्थमिति वाच्यम् । युजर्थन्तत्सत्त्वात् । हरतेर्गतताच्छील्ये । धर्म इति । गुणक्रियादिः । मातुरनुहरतीति प्रत्युदाहरणे तु सादृश्यमात्रप्रतीतिर्न तु मातृवृत्तिगुणस्य सततम्परिशीलनमिति नात्मनेपदम्। किरतेर्हर्षजीविका । यद्यपि कुलायो नीडमस्त्रियामिति कोशान्नीडवाचीकुलायशब्दस्यथापि भाष्येऽपस्किरतेश्वाऽऽश्रयार्थीत्युदाहृतमित्यत्रोऽत्र कुलायशब्दो वासस्थानमात्रपरः । सुड्भाव इति । अपाच्चतुष्पादिति विहितसुटोऽभावः । मूले नेष्यत इति । किरतेरिति वार्त्तिकोदाहरणानां समुद्रा ात्र भाष्य कृतोदाहरण सुड्भावे नेष्यत इति क-

SGDF
Sri Gargeshwari Digital Foundation

त्यत इत्याह । अत एवेति । शप उपालम्भे । मूले उपालंभ इति प्रा-
चीनसम्मतपाठमाक्रोशार्थादित्यनेन व्याख्याय भाष्यसम्मतमाह । परे
त्विति । प्रकाशनमात्रशक्तस्योपलम्भनशब्दस्य शपथकरणके प्रकाशने
लक्षणा । अत एव । शपथकरणेऽर्थे वृत्तिस्वीकारादेव । चतुर्थ्येव । श्लाघ-
ह्नुङिति चतुर्थ्येव । प्रकाशनस्थेयाख्ययोश्च । प्रकाशनं ज्ञापनम् । स्थे-
यो विवादपदनिर्णेता । स्थेयशब्दे च कृत्यल्युटो बहुलमित्यत्र बहुलग्रहणा-
दधिकरणे यत् । तिष्ठन्ति यस्मिञ्जना विवादपदनिर्णयकर्तृत्वप्रकारक-
निश्चयविशेष्यतया स्वीकुर्वन्तीत्यर्थः । स्थेयो विवादस्थानस्य निर्णेतरि पु-
रोहिते इति मेदिनीकारः । कर्णादिषु तिष्ठत इत्यत्र तथा स्पष्टम् । उ-
दोऽनूर्ध्वकर्मणि । अत्रोर्ध्वशब्द ऊर्ध्वदेशानुयोगिकसंयोगपरस्तस्य नञा
समासे क्रियापरकर्मशब्देन षष्ठीतत्पुरुषः । ऊर्ध्वदेशवृत्तिसंयोगभिन्नसंयो
गानुकूलव्यापारलाभेनोर्ध्वदेशसंयोगफलकक्रियालाभात्तादृशक्रियायां व-
र्त्तमानादुदः परात्स्थाधातोरात्मनेपदमित्यर्थः । मुक्तावुत्तिष्ठते काशीमि-
त्यत्र निमित्तात्कर्मयोग इति सप्तमी । मुक्तिफलककाशीवृत्तिसंयोगानुकू-
लैककर्तृको वर्त्तमानो व्यापार इति शाब्दबोधः । उद ईहायामिति
वार्त्तिकमूलकाद्ध्याख्यानान्मूले ईहायामेवेत्युक्तन्तत्रेहापदार्थमाह । का-
यपरिस्पन्देति । मुक्तावुत्तिष्ठत इत्यत्रेहा स्पष्टैव । पीठादुत्तिष्ठतीत्यत्रापी-
हाऽस्त्येवेति अनूर्ध्वकर्मणीत्युपात्तम् । शतमुत्तिष्ठतीत्यत्र नेहेति बोध-
यितुमाह । शतेति । उपान्मन्त्रकरणे । मन्त्रकरणकेऽर्थे वर्त्तमानादित्यर्थो
बहुव्रीहिसमासाश्रयणात्कार्यस्तदाह । मन्त्रेति । आग्नेय्याऽग्नीध्रमुपति-
ष्ठत इत्यत्र मन्त्रकरणकोऽर्थः स्तुतिरूपः । आग्नेयी अग्निर्देवता यस्या-
स्सा ऋक् । अग्निमिन्धे अग्नीत् । ऋत्विग्विशेषस्तन्तया ऋचा स्तौती
त्यर्थः । वा लिप्सायामित्यत्र लिप्सा लाभेच्छा सा यत्र गम्यते तत्रात्म-
नेपदमिष्यत इत्याशयेनाह । लिप्सोपसर्जनक इति । भिक्षुकः प्रभुमुप
तिष्ठत इत्यत्र स्थाधातोः समीपगमनानुकूलो व्यापारोऽर्थस्तस्यालिप्-

SGDF
Sri Gangeshwari Digital Foundation

साकरणभूतेतिभवत्युदाहरणम् । आङो यमहन इत्यस्य स्वाङ्गकर्मकेऽर्थे वृत्तिराजघ्ने विषमविलोचनस्य वक्ष इत्यत्र तु न तथेति कथमात्मनेपदमत्रेति शङ्कायाम्प्राप्येत्यध्याहारेण समाधाने ल्यब्लोपे कर्मणीतिपञ्चमीमाशङ्क्य ल्यबन्तं विनेत्याद्युक्तम् । तत्रोच्चरितः शब्दः प्रत्यायको नानुच्चारित इति भाष्योक्तेः कथन्तदर्थावगतिरित्याशङ्कायामाह । वाक्य इत्यादि । लोपपदस्वारस्यादयमर्थो लभ्यते । ननु शब्दाध्याहारेऽपि लोपोऽप्रयोगोऽस्त्येवेत्यत आह । अस्यायुक्तत्वमिति । तद्घटितेति । तुमुनन्त घटितेत्यर्थः । समो गमृच्छिभ्याम् अकर्मकाच्चेत्यनुवर्तमानं द्विवचनान्तानुरोधेन द्विवचनान्तत्वेन विपरिणम्यत इत्याशयेनोक्तम्मूले अकर्मकाभ्यामित्येवेति । विदिप्रच्छिस्वरतीनाम् व्याख्यानादिति । संविद्रे इति भाष्यीयोदाहरणदर्शनमूलकाद्वेत्तेर्विभाषेति रुडादेशानुवादेन रुडागमविधानदर्शनमूलकाच्च व्याख्यानादित्यर्थः । व्याख्यानादिति । साहचर्यानाश्रयणमूलकात् । तदाश्रयणे तु श्रुदृशिसाहचर्यादलुग्विकरणस्यैव ग्रहणं स्यात् । ननु परत्वात्सिज्लोप इत्यसङ्गतम् । सिज्लोपस्यासिद्धत्वादत आह । सिज्लोप एकादेश इतीति । वार्णादाङ्गमिति परिभाषायामाङ्गपदेनाङ्गसम्बन्धिकार्यस्य ग्रहणात्तादृशं कार्यं लोपोऽप्यङ्गपदोपादानादित्यभिमानेन वृद्धैः पूर्वमेव लोपप्रवृत्तिवादिनो मतन्निरस्यति । यत्त्विति । तन्नैवोक्तमिति । अलाविष्टामित्यादौ लोपाभावरूपम्प्रयोजनमित्यर्थः । नन्वेवमध्यैष्टेत्यत्रापि सिचः श्रवणन्न स्यादत आह । अध्यैष्टेति त्विति । सिज्लोपस्यासिद्धत्वादिति । गुणविधायकशास्त्रदृष्ट्याऽसिद्धत्वादित्यर्थः । यत्तु ह्रस्वात्सिच इत्येव वाच्यम् सिचा चाङ्गस्याक्षेपेण यस्मात्सिज्विहित इत्यर्थेन निर्दिश्यमानपरिभाषयाऽलाविष्टामित्यादिसिद्धावङ्गग्रहणवैयर्थ्यमिति तत्सामर्थ्यादङ्गाधिकाराभावेऽपि वार्णपरिभाषायाः प्रवृत्तिरिति । तन्न । आक्षेपादिक्लेशपरिहारार्थमेव तत्राङ्गपदोपादानात् । यद्यपि सिज्लोप एकादेश इत्यत्रैकादेशपदेन यणेकादेशस्य सिज्लोपोत्तरप्रवृत्तिकस्यैव ग्रह-

SGDF
Sri Gurgeshwari Digital Foundation

णम्। अग्रहीदित्यादौ यथा। वृद्धिस्त्वतथात्वात्तस्यामसिद्धत्वम्भवत्येवेति। तदपि न। तादृशनियमे मानाभावात्। यच्च वार्णपरिभाषायाः समाननिमित्तकत्वे प्रवृत्तिर्न तु समानस्थानिकत्वे। अन्यथा द्यौरिवाचरति द्यवतीत्यत्र दिवशब्दादाचारे क्विपि वस्योठि दिऊअतीतिस्थिते यण्गुणयोः प्राप्तयोरङ्गत्वाद् गुण एव स्याल्लघूपधत्वान्न तु यण्। मन्मते तूभयोः समाननिमित्तकत्वाभावन्न परिभाषाप्रवृत्तिरिति। तदपि न। हलन्तेभ्य आचारे क्विबभावस्य प्रागुपपादनात्। पक्षान्तरे। लादेशाद्युत्तरमडागम इति पक्षान्तरे। पूर्वोपपादितं सिज्लोपस्य सिद्धत्वमप्यनुचितमित्याह। किञ्चेति। ननु पूर्वोक्तरीत्या यद्येकादेशपदेन सवर्णदीर्घ एव गह्येत तदा स्पष्टप्रतिपत्तये सवर्णदीर्घपदमेवोच्चारयेदत आह। न चैकादेशपदेति। ननु मा सस्मरेतेत्यत्राङ्दुर्लभः। पुषादीतिसूत्रस्यस्य परस्मैपदेष्वित्यस्य रितो वेत्यादौ सम्बन्धात्सर्त्तिशास्तीत्यत्रापि सम्बन्धादित्यत आह। सर्त्तिशास्तीतिसूत्र इति। अत एव। तत्र तस्यासम्बन्धादेव। भाष्यानुसारिमतमाह। परे त्विति। कैयटेनेति। मरुन्कुम्ब्रूरिकल ने गैराधस्माच्छासेरङ्विहित इति भाष्याक्षरस्वारस्याच्च सर्त्तीति सूत्रेऽपि तस्य सम्बन्ध इति तद्भावः। नन्वेवं योगविभागवैयर्थ्यमत आह। किञ्चास्येति। निरूपयितुमशक्यमिति। भवदुक्तलक्ष्यानुसंवादादिति शेषः। किन्तु विपरीत एव दृश्यत इत्याह। अत एवेति। द्वयेति। अर्त्तीयर्त्तीतिद्वयस्येत्यर्थः। तेनैव सिद्ध इति। तन्नोपसंख्यानेनैव सिद्ध इत्यर्थः। धातोरर्थान्तरे वृत्तेरिति इदम् मूले पठितम्प्राचां वचनं ध्वनितमुद्भिभ्यामिति सूत्रे भाष्य कृतेति केचिदाहुस्तत्र किं युक्तङ्किन्न युक्तमिति बोधयति। वहतीतीत्यादिना। तत्र हि अथोद्भिभ्यामित्यत्र किम्प्रत्युदाह्रियते। निष्टप्यत इति। किम्पुनः कारणमात्मनेपदमेव प्रत्युदाह्रियते न पुनः परस्मैपदम्प्रत्युदाहार्यं स्यात्। तपिरयमकर्मकः। अकर्मकाश्चापि सोपसर्गाः सकर्मका भवन्ति। न चान्तरेण कर्मकर्त्तारं सकर्मका अकर्मका भ-

SGDF
Sri Gargeshwari Digital Foundation

वन्ति । यत्तूच्यते न चान्तरेण कर्मकर्त्तारं सकर्मका अकर्मका भवन्तीति । अन्तरेणापि कर्मकर्त्तारं सकर्मका अकर्मका भवन्ति । तद्यथा । नदी वहतीत्यकर्मकः । भारं वहतीति सकर्मकः । तस्मान्निष्टपतीति प्रत्युदाहार्यमित्युक्तम् । उद्विपूर्वोऽण्यन्ततपिः सुवर्णमुत्तपतीत्यत्र सकर्मकत्वेन दृष्टोऽप्यकर्मको भासनेऽर्थे भवति । उत्तपते । वितपते सूर्य इति । भासत इत्यर्थः । यदि कर्मणः कर्तृत्वं विनाप्यकर्मकत्वमुत्तपतेस्तदायं योगो विध्यर्थः । यदि तु कर्मणः कर्तृत्वेनैवाकर्मकत्वन्तदा कर्मवद्भावेन सिद्धे आत्मनेपदे उद्विभ्याम्परस्मादात्मनेपदमेव न यगादीत्येवमर्थकं नियमार्थमेतत्स्यादित्यभिप्रायकार्थेति शङ्कायान्निष्टप्यत इत्युत्तरेण नियमार्थत्वमेकदेशिनोक्तम् । ततस्तपिरयमित्यादिना विध्यर्थत्वं सूचितम् । अकर्मकाणामुपसर्गसम्बन्धे सति सर्वत्र सकर्मकत्वमेव भवतीति न नियमः । प्रलम्बत इत्यादौ व्यभिचारात् । किन्तूपसर्गसम्बन्धादन्तर्भावितण्यर्थताऽर्थान्तरवृत्तित्वं वा तदैव सकर्मकत्वम्भवति तथात्र न विवक्षितमिति विध्यर्थमेवैतत्सूत्रमिति सिद्धान्तः । अत्र नदी वहतीत्यत्राकर्मकत्वप्रदर्शनेनायं श्लोकः सप्रमाण एवेति सूचितम् । स्यन्दने वृत्तिरिति । एवञ्च स्यन्दनक्रियाविशेषस्तदनुकूलो व्यापारो वेगादिस्तयोरेकत्र सत्वात्प्राप्तापि कर्मसंज्ञा परया कर्तृसंज्ञया बाध्यत इत्ययमकर्मक एव । एवमन्यत्रापि बोध्यम् । यत्र कर्म धात्वर्थेऽन्तर्भूतन्तस्याकर्मकत्वमपि युक्तिसिद्धमित्याह । जीवतीत्यत्रेति । जीवनम्प्राणाः । ननु यदि प्राणानाङ्कर्मत्वन्तदा कर्मण उपसङ्ग्राहादित्यनुपपन्नम् । यदि च कर्मत्वन्तदा धारणपदार्थैकदेशधृतावन्वयोऽस्त्येवेत्यत आह । पृथगुपस्थितेति । अन्वयशब्देन विभिन्नशब्दाभ्यामुपस्थितयोः संसर्गबोध एव सकर्मकलक्षणे विवक्षित इति । यदि चैकेन तिङोपस्थितयोः सङ्ख्याकारकयोरप्यन्वयबोध इति विभिन्नशब्दाभ्यामुपस्थितयोरेव संसर्गबोधोऽन्वयबोध इति न नियम इति विभाव्यते तदा पृथगुपस्थितिविषयसंसर्गबोधो ऽन्वयत्र-ध-

SGDF
Sri Gargeshwari Digital Foundation

पदार्थः । प्रसिद्धेरित्यस्योदाहरणम्मूले मेघो वर्षतीति । कर्मविषयकोत्थिता काङ्क्षाऽविषयत्वं हि तत्त्वमिति प्राचामाशयः । परन्त्विदमकर्मकत्वन्न युक्तमित्याह । इदञ्चिंत्यमिति । अन्वयसम्भवेनेति । यदि पृथगुपस्थितिस्तदा अन्वयस्य सम्भवः । यदि च तत्रैववाक्यैकदेशन्यायेन कर्मघटितेऽर्थे शक्तिरेव स्वीक्रियते तदा शाब्दबोधस्तद्विषयको भवतु परन्तु नान्वयबोध इति व्यवहारः । अत एव । झटिति यस्य प्रतीतिस्तद्वाचकशब्दाप्रयोगेऽप्युपस्थितस्यान्वयबोधादेव । एवं रीत्या । प्रसिद्धत्वेन । कर्मणोऽविवक्षायामाह । कर्मण इत्यादि । भावे लादीनामिति । मूलोदाहृते तु कर्त्तर्यस्ति । भावोदाहरणञ्चैत्रेण श्रूयते इति । अत्र श्रूधात्वर्थः श्रावणप्रत्यक्षन्तच्च नियमेन शब्दशाब्दाभावान्यतरविषयकमिति कर्मणोऽन्यतरस्यान्वयाविवक्षा । वृत्तिविषये । वृत्तिविषय एव । एवमविवक्षा च न स्वेच्छया कार्या । किन्तु भाष्यकारादिप्रयोगादवसेया । तृतीयमप्यविवक्षापदार्थमाह । किञ्चेति । अत एव सम्बन्धसामान्येनान्वयस्थलेऽप्यविवक्षयाऽकर्मकत्वस्येष्टत्वादेव । हितार्थस्येत्यनेन सम्बन्धसामान्येनान्वयो बोधितः । निसमुपविभ्यो ह्वः । अत्र ह्व इत्येकारान्तानुकरणं लक्षणवशसम्पन्नमात्वम् । तेन निह्वयत इत्यत्राप्यात्मनेपदम्भवति । कृतात्वानुकरणे तु यत्रात्वविषयतास्ति तत्रैव स्यात् । गन्धनावक्षेपण । मूले गन्धनं हिंसेति । गन्ध अर्द्दने । अर्द्द हिंसायामिति हि चुरादौ पठितम् । सहसा वर्त्तते साहसिकः । तत्कर्म साहसिक्यम् । बलात्कारेणाविचारेण वा यः कर्म करोति तत्कर्तृका क्रियेति यावत् । अत्र त्रासाद्यनुकूलो व्यापारो धात्वर्थः । गन्धनादिकन्तु प्रयोगोपाधिः । सम्माननोत्स । प्रयोगोपाधयः । प्रयोगनियामकाः । नयतेर्ञित्वात्परगामिक्रियाफलविवक्षायामात्मनेपदार्थं वचनम् । शरीरशब्दस्य शरीरावयवलक्षणायास्बीजन्दर्शयति । शरीरतादात्म्येति । तादात्म्यापन्नस्य । शरीराभिन्नत्वेन लौ-

SGDF
Sri Gargeshwari Digital Foundation

किकव्यवहारविषयस्य। स्तुतोऽयं व्यवहारो न युक्तः ॥ आत्मनोऽन्तःकरणस्य वा कर्तृत्वन्तयोश्च न शरीरतादात्म्यमित्यतद्ध्वनयितुमापन्नपदोपादानम्। सम्बन्धविशेषेण। स्वनिष्ठाधिकरणता निरूपितसमवायसम्बन्धावच्छिन्नाधेयत्वसम्बन्धेन। वृत्तिसर्गतायन। मूले वृत्तिरप्रतिबन्धइति। यत्र न प्रतिबन्धस्तत्र। लोके एतादृशव्यवहारस्य दर्शनात्। स्फीतानीति। प्रवृद्धानीत्यर्थः। उपपराभ्याम्। क्रम इत्यनुवर्त्तते। यदुक्तम्मूले आभ्यामेवेति तदेवयुक्तमित्याह। अस्य नियमत्वमिति ॥ आङ् उद्गमने। उद्गमनमूर्द्ध्वदेशसंयोगानुकूलव्यापारः। अत्रोर्द्ध्वदेशत्वङ्कल्पितमेव। आकाशस्यानवयवकत्वात्। वेः पादविहरणे। विहरण इत्येव सिद्धे पादशब्दोपादानस्य प्रयोजनमाह। धातूनामिति। सूत्रस्थभाष्येति। तत्र हि अनुदात्तङित इति किमर्थमित्याशङ्क्य नियमार्थम्। सामान्यतो लस्य स्थाने तिप्सिद्धेः ॥ विकरणेभ्यो व्यवधानादनुदात्तात्परत्वासम्भवात्पुनरप्यनुपपत्तिशङ्कायां विकरणेभ्यो नियमो बलीयानिति समाहितन्तत्रादौ पुषादिद्युतादीत्यादिसूत्रे परस्मैपदादीनान्निमित्तत्वेनोपादानस्य ज्ञापकत्वमुद्भाव्य सामान्यसूत्रेण परस्मैपदादीनां सिद्धत्वान्निमित्तत्वानुपपत्तिं परिहृत्य यत्तद्वानुपसर्गाद्वेति विभाषां शास्ति युक्तम्। एतद्धि शेषादिति प्राप्तनियमबाधनार्थं यदि नियमस्य विकरणापेक्षया बलवत्त्वन्न स्यात्तदा सामान्यसूत्रेणोभयपदे सिद्धे विकरणव्यवधानेन शेषादित्यस्याप्राप्त्याविष्टं सिद्धमित्येवेति अनुपसर्गाद्वेत्यस्य वैयर्थ्यमिति प्रतिपादितम्। तच्च ज्ञापकत्वन्तदा घटेत यदि वैयर्थ्यं स्यात्। तदेव तु न सम्भवति चक्रमे। चक्राम। क्रम्यात्। क्रंशीष्टेत्यत्र विकरणाभावच्छेषादिति प्राप्तनियमबाधकतया ऽस्याचारितार्थ्यमित्यतोऽस्य लिडादावप्रवृत्तिः स्वीकार्येति भावः। पूर्वविप्रतिषेध इति। न चेति विभाषेतिसूत्रभाष्ये एतत्स्पष्टम्। उत्कण्ठापूर्वकमिति। झटिति झटित्युदबुद्धसंस्कारजन्यस्मरणं ह्युत्कण्ठा तज्जन्यन्द्धि-

SGDF
Sri Gargeshwari Digital Foundation

तीयादिस्मरणमित्यर्थः । यः कौमारहर इत्यादिनोद्बोधकसमवधानम्प्रदर्श्य वेतसीतरुतले चेतः समुत्कण्ठते इत्यनेन काव्यप्रकाशे स्पष्टमियन्दर्शिता । मेयमानमिति । भाष्ये तु न दृश्यत इति शेषः।भासमान इति। कर्त्तरि ल्युट्। अन्यदीयज्ञानस्य प्रत्यक्षमन्यस्य न सम्भवतीति ज्ञान इत्यरूपेदङ्कथनमयुक्तमित्याशङ्कायामाह। बोधोत्तरमिति। शास्त्रे वदत इति शब्दजन्यशाब्दबोधोत्तरमित्यर्थः। ज्ञानवत्त्वमित्यस्य वदनकर्त्तुरिति शेषः। उत्साहः चित्तवृत्तिविशेषः। तद्विषयकविलक्षणज्ञानजन्यसुखविशेषो वा। प्रसिद्धतरमिति। खगानाञ्च तथा तदुच्चारितशब्दे सादृश्यात्तथा प्रतीतिमात्रमेतेन शुकसारिकादीनां व्यावृत्तिः। वरतन्विति। अयि विजहीहि दृढोपसङ्ग्रहनन्तराज रतिसङ्गमकाङ्क्षमानसे। अरुणकरोद्गम एष वर्त्तते वरतनुसम्प्रवदन्ति कुक्कुटाः। विरामीचिन्तेयति। इदमुपलक्षणन्नवोढाया रमणेच्छोर्नायकस्योक्तिरियमित्यपि बोध्यम्। तद्यथा। अयि विजहीहि दृढोपगूहनन्तराज नवसङ्गमभीरुवल्लभे। अरुणकरोद्गम एष वर्त्तते वरतनु सम्प्रवदन्ति कुक्कुटाः। तदुक्तम्भाष्ये। व्यक्तवाचामित्युच्यमानेऽप्यत्र प्राप्नोति। एतेऽपि हि व्यक्तवाचः कुक्कुटेनोदिते उच्यते कुक्कुटो वदतीति। एवन्तर्हि सर्व एव व्यक्तवाचस्तत्र प्रर्षगतिर्विज्ञास्यते साधीयो ये व्यक्तवाचः। येषां वाच्यकारादयो वर्णा व्यज्यन्त इति। परस्परविरोधेनेति। विप्रलापो विरुद्धोक्तिरिति कोशात्। इति भाष्यमितीति। तत्र हि गिरतेरिति वक्तव्यङ्गृणातेर्मा भूत्। तत्तर्हि वक्तव्यन्न वक्तव्यम्प्रयोगाभावात्। न चाद्पूर्वस्य गृणातेः प्रयोगोऽस्तीत्युक्तम्। समस्तृतीया युक्तात्। अत्र समस्तृतीययेत्येव सिद्धे युक्तग्रहणाद्यत्र श्रूयमाणतृतीयान्तपदयोगस्तत्रैवात्मनेपदमिदन्तेनोभौ लोकौ सञ्चरसीति प्रत्युदाहरणं साधु सङ्गच्छते। सर्वत्रैव षष्ठीति। येन येनोपसर्गयोगे विधानं सर्वत्रैव षष्ठीत्यर्थः। उपाद्यमः स्वकरणे। नन्वस्वं यदा स्वं करोति तदा भविष्यतीति भाष्याच्च्विप्रत्य-

SGDF
Sri Gargeshwari Digital Foundation

योऽत्रोचित इत्येवन्निर्देशोऽनुपपन्नोऽत आह । च्विरस्त्विति । भाष्ये करोतिर्ग्रहणार्थश्चेत्प्रकृते च्विः स्यात्स एव नु न किन्तु निष्पादनवचनः । अविवक्षणादिति । इदमुपलक्षणम् । नवास्तवे तथा भवने च्विप्रत्ययः किन्त्वारोपित एव स्वभावादित्यपि बोध्यम् । यद्येवन्तदा स्वीकारो द्रव्यस्य प्रतिग्रहादित्यादावारोपाभावाच् च्विप्रत्ययानुपपत्तिरत आह । स्वीकार इत्यव्युत्पन्नमिति । अकर्मक इति । सर्पिषोऽनुजिज्ञासत इत्यत्र ज्ञो विदर्थस्येति षष्ठी । अकर्मकत्वन्तु प्रवर्त्तनार्थकत्वात्स्पष्टञ्चेदमनोः प्रतिषेधे सकर्मकग्रहणमित्यादिना भाष्ये । प्रत्यासत्त्येति । एवञ्च पष्ठ्यर्थे पञ्चमीति फलितम् । पूर्वत्वस्य सावधिकत्वात्कस्मात्पूर्व इत्याकाङ्क्षायामाह । प्रत्यासत्तेरिति । पूर्ववदित्यनेन सन्प्रकृतितुल्यत्वं सन्नन्तस्य कल्प्यते तच्च यथा प्रकृतिगतङकारादिनिमित्तातिदेशेन तथा शद्लधातौ सन्नन्तेऽपि सम्भवति शिद्विषये आत्मनेपदप्रयोजकत्वेनेत्यत आह । नन्विति । प्रोपाभ्यां युजेरयज्ञपात्रेषु । प्रोपाभ्यां युक्ताद्युजेरात्मनेपदं स्यात् । यज्ञपात्रेषु साधनेषु नेत्यर्थः । द्वन्द्वन्न्यञ्चि पात्राणि प्रयुनक्तीत्यस्य न्यञ्चि न्युब्जीकृतानि पात्राणि द्वन्द्वम्प्रयुनक्तीत्यर्थः । अत्र यज्ञीयपात्राणां युज्धात्वर्थक्रियासाधनत्वं स्पष्टमेव । णेरणौ यत्कर्मणौ चेत्सकर्त्ताऽनाध्याने । इह । प्रकृतसूत्रे । वाक्यत्रयम् । विधेयात्मनेपदसम्बन्धिवाक्यत्रयम् । द्वितीयम् । अणौ यत्कर्म णौ चेदित्येतत् । अस्य तच्छब्दाक्षेपेणार्थपर्यवसानमित्याह । यत्तदोरिति । कर्मशब्दोऽत्र क्रियापरः कर्त्तरि कर्मव्यतिहार इतिसूत्रस्थकर्मशब्दवत् । यद्ययं कर्मकारकपरः स्यात्तदा अणौ यत्कर्म णौ चेदिति वाक्यस्य कर्मकारकत्व एव प्रवृत्तिरित्येतद्वाक्यप्रतिपाद्यकर्मणः कर्मत्वेन सद्भावस्यात्मनेपदनिमित्तत्वं लभ्येत तच्चोदाहरणभूतकट्यायान्नोपपद्यते तस्य कर्मणः कर्त्तृत्वे एवात्मनेपदप्रवृत्तेः स कर्त्तेत्यनेन वाक्येन प्रतिपादनादतः कर्मशब्दोऽत्र क्रियापरः । अत एव वाक्यभेदस्याप्युपपत्तिरन्यथाऽणौ यत्कर्म णौ चेत्स कर्त्तेत्येवाविरो-

SGDF Sri Gurgeshwari Digital Foundation

यं स्यात् । तच्छब्दस्याक्षेपे सति तस्य क्रियाबोधकतया सेत्यस्याध्याहारे सर्वनाम्नामुद्देश्यविधेयान्यतरलिङ्गत्वेन सुप्रसिद्धतयाऽणौ यत्कर्म णौचेत्से-त्येवं सामानाधिकरण्ये न किञ्चिद्बाधकम् । इदञ्च द्वितीयवाक्यमेवकका-रस्याप्यध्याहारेण व्याचष्टे । यत्तदोरित्यादिना । तत्रैवकारस्य नियम-परतयाऽन्ययोगव्यवच्छेदः प्रकृते प्रतिपाद्यस्तत्फलं वक्तुं शङ्कते । न चा-त्रेति । द्वितीयकक्ष्यायाम् । दर्शयति भवः । आरोहति हस्तीत्यत्र । वा-क्यवैयर्थ्यापत्तेरिति। एतद्धि तस्मिन् पक्षेऽन्ययोगसत्त्वे नात्मनेपदाव्यावर्त्त-कत्वेन व्यर्थं स्यादित्यर्थः । चाक्षुषज्ञानविषयत्वानुकूलव्यापारानुकूल व्यापारस्य णिजन्तेन प्रतिपादनात्प्रकृत्यर्थस्य तत्र सद्भावादेवकाराभावे व्यर्थमेव । कारकपरः । कर्मकारकपरः । व्याख्यानादिति। तत्रापि क-र्मशब्दस्यक्रियापरत्वे तस्याः कर्त्तृत्वे सत्येव तृतीयवाक्यप्रवृत्तिर्वाच्या सा न सम्भवति । क्रियायाः कर्तृत्वस्य प्रकृतसूत्रोदाहरणस्थलेऽप्रतीतेरि-त्येतन्मूलकव्याख्यानादित्यर्थः । तत्र । तृतीयवाक्यजन्यबोधस्थले । ब्रा-ह्मणः पण्डित इति वाक्यस्थलेऽवच्छेदकावच्छेदेन विधेयान्वयासम्भ-वादसति बाधक इति । तेन । अवच्छेदकावच्छेदेनान्वयस्वीकारेण । देवदत्तो गां याचते यज्ञदत्तमिति । अत्र स्वसम्प्रदानकदानानुकूलव्या-पारानुकूलव्यापारो याचतेरर्थः । दानमत्र स्वत्वन्तदाश्रयतया गोः कर्म-त्वन्तदनुकूलव्यापाररूपफलाश्रयतया यज्ञदत्तस्य च कर्मत्वम् । यज्ञदत्तो गां याचत इति । अस्यां द्वितीयकक्ष्यायां द्वितीयव्यापारस्य सौकर्यविव-क्षया त्यागे स्वसम्प्रदानकदानानुकूलव्यापार एव याचतेरर्थस्तदाश्रयत-या यज्ञदत्तस्य कर्तृत्वम् । पुनर्देवदत्तस्य प्रयोजकत्वविवक्षया हेतुम-ति चेति णिचि देवदत्तो गां याचयति यज्ञदत्तेनेति तृतीया कक्ष्या । अत्र गतिबुद्धीति सूत्रस्य नियमार्थत्वान्न यज्ञदत्तस्य कर्मत्वम् । पुनश्चतु-र्थकक्ष्यायां णिजर्थव्यापारस्य त्यागेन यज्ञदत्तस्य कर्तृत्वेन यज्ञदत्तो गां याचयतीति चतुर्थी कक्ष्या । नात्मनेपदमिति । अत्र द्वितीयकक्ष्यायां या

SGDF
Sri Gargeshwari Digital Foundation

क्रिया सैव चतुर्थ्यामस्ति । अणौ कर्मणो णौ कर्तृत्वञ्चास्तीति प्राप्तमप्यात्मनेपदमवच्छेदकावच्छेदेनान्वयस्वीकारान्न भवति । अणौ कर्मत्वस्य गत्यपि सत्त्वात् तस्याश्च न णौ कर्तृत्वमिति । स्पष्टार्थत्वादिति । प्रत्यासत्त्या णावित्यस्य लाभेऽपि साक्षादुच्चारणं विना वृत्त्यनुपस्थितत्वाच्छाब्दबोधविषयता न संभवतीति श्रूयमाणशब्दस्य तद्घटिते शक्तिः कल्पनीया तदपेक्षया णावित्यस्योच्चारणस्यैव युक्तत्वादित्यर्थः । यत्तु तृतीयवाक्ये णावित्यस्याभावेऽणौ या क्रिया सा चेण्णावित्येतदुदाहरणभूतकक्ष्याघटितकक्ष्यासमुदायघटकयत्किंचित् कक्ष्यामादाय] यथोपपाद्यते तथाऽणौ यत्कर्म स चेत्कर्तृत्वस्याप्यर्थो याङ्काञ्चित्कक्ष्यामादायोपपादनीय इत्यपि स्यात्तथा च निवृत्तप्रेषणपक्षीयतृतीयकक्ष्यायामात्मनेपदापत्तिः । प्रथमामादायाणौ या क्रिया सा चेदित्यस्य यथोपपादनन्तथाऽणौ यत्कर्म स चेत्तादृशसमुदायघटकयत्किञ्चित्क्रियायामित्यस्य द्वितीयामादायोपपादनसम्भवात् । णावित्युपादाने तु णिजन्तघटिततादृशसमुदायघटककक्ष्यामादायैव तृतीयवाक्यार्थस्योपपत्तिः कार्या सा च यां कक्ष्यामादाय भवति तस्यामेवात्मनेपदमिति वदन्ति तन्न युक्तमित्याशयेनाह । अत्र फलकल्पना त्विति । प्रत्यासत्त्यैव भवदुक्तफलस्य गतार्थत्वादिति भावः । अणावकर्मकादिति सूत्रस्य प्राप्तिमुपपादयति । यत्र क्वाप्येति । इत्यर्थे नेति । अस्य द्वितीयामादायाणावकर्मकत्वस्य सत्त्वादिति शेषः । अत्र पूर्वविप्रतिषेधे । दर्शयते राजेतीति । दर्शयते भृत्यान् राजेत्युदाहरणमिति बोध्यम् । भृत्यानित्यस्यानुपादानन्तु दर्शयते भव इत्येतत्तुल्यत्वप्रदर्शनाय । यदि परस्मैपदबाधनार्थमेवैतत्सूत्रन्तदा यत्र परस्मैपदप्राप्तिस्तादृशोदाहरणमेव प्रदर्शयितुमुचितमिति भावः । अत्र । पश्यति भव इत्यत्र । कर्मस्थक्रियत्वाभावेनेति । यत्र कर्मणि क्रियाकृतो विशेषो दृश्यते तत्रैव क्रिया कर्मस्था प्रकृते तु न तथेति भावः । व्यापारे इति । अभिधेये इति शेषः ।

SGDF
Sri Gargeshwari Digital Foundation

ननु पुनरर्थस्य चेदविवक्षा तदा तत्प्रतिपादकणिचोऽपि निवृत्तिः स्यात्प्रयोजव्यापारविवक्षायामेव तस्य साधुत्वाभ्यनुज्ञादर्शनादत आह । यत्तस्येत्यादि । सर्वनाम्नो वृत्तिमात्र इति । क्व चित्सर्वनामत्वेन दृष्टस्य पुंवद्भावः । तद्दर्शनञ्च प्रकृतेऽप्यस्तीति भावः । भूमिः प्रयोगात्मकं स्यानम् । प्राप्यते ज्ञायत इत्यर्थः । इत्येका कक्ष्येति । अत्र न्यग्भवनानुकूलव्यापारो रुहधात्वर्थः । आरुह्यते हस्ती स्वयमेवेति । अत्र कर्मणि हस्तिनि न्यग्भूते क्रियाकृतविशेषस्य दर्शनाद्भवत्यात्मनेपदं यक् च । इयम् । आरोहयन्ति हस्तिनं हस्तिपका इति कक्ष्या । व्या त्यर्थभूतेति । अणौ कर्मणो णौ कर्तृत्वविरहेण सा व्यावर्त्यते । शुद्धे । णिज्रहिते । यथा कथञ्चिदिति । अवस्थाचतुष्टयस्थले पूर्वोक्तैव रीतिः । पञ्चमीत्वपक्षे तु द्वितीयकक्ष्यायास्फलसमानाधिकरणो व्यापारोऽर्थः । ततः प्रयोजकव्यापारे णिच् । ततः प्रयोजकव्यापारस्य फलसमानाधिकरणव्यापारस्य च त्यागे चतुर्थी कक्ष्या । ततः फलसमानाधिकरणस्य व्यापारस्यैव प्रयोजकत्वविवक्षया तस्मिन्विवक्षिते पुनर्णिजिति । एतादृशार्थसूचनाय सर्वान्ते हरिणा निवृत्तप्रेषणादित्याद्युक्तम् । उदाहरणभूतकक्ष्यायामणावित्यादिवाक्यार्थद्वयसत्त्वमाविष्कर्तुम्भूमिकामाह । न्यग्भवनेत्यादिना। अन्यथा । स्वरूपयोग्यतानिश्चयस्यानपेक्षायाम् । एतत्प्रतीयते इति कथनेन न्यग्भावनादीनां वाच्यत्वमिति भ्रमः स्यात्तद्वारणायाह । अत्रेत्यादि । आर्थी । मानसबोधविषयरूपा । अत एव । ऊर्द्धदेशसंयोगावच्छिन्नव्यापारस्य रुहधात्वर्थत्वादेव । अत्रापि पक्षे । अध्यारोपितप्रेषणपक्षे । तस्याः । निवृत्तपक्षीयकक्ष्यायाः । मूलभूतत्वात् । क्रियासाम्यं यां कक्ष्यामुद्दिश्य बोधनीयं सा कक्ष्या तन्मूलभूतेति व्यवहारादिति रीत्या मूलभूतत्वात् । आधिक्यमात्रेति । अणौ या क्रिया सैव चेदित्यनेनाधिका तदपेक्षया या क्रिया सा व्यवच्छिद्यते न तु न्यूनेति भावः । अयमपि । यद्वेत्यादिना उक्तो द्वितीयोऽपि । स देवदत्तादेर्विना कटादिषु

SGDF
Sri Gargeshwari Digital Foundation

विद्यत इत्यन्वयः । अस्याः । प्रथमकारिकायाः । देवदत्तादिनिष्ठव्यापारस्य कटादिकर्मवृत्तित्वविवक्षायाः फलमाह । प्रेरणास्वीकार इत्यादि । अत्र पक्षे । यद्वेत्यादिप्रदर्शितद्वितीयपक्षे । स्वयन्दूती । स्वकार्यसाधनाय स्वयमेव नायकम्प्रतिगत्वाऽधुना मद्गृहे भवताऽऽगन्तव्यमिति या वक्ति सा। निदर्शनम्। दृष्टान्तः। न तङिति। तदैकस्य व्यापारस्याधिक्यात्समानक्रियत्वाभाव इति भावः । अन्तर्भावितण्यर्थस्येति । शुद्धरुहधातोरेवोर्द्धदेशसंयोगावच्छिन्नक्रियानुकूलव्यापारानुकूलव्यापारे शक्तिकल्पनयेति शेषः । सा । अन्तर्भावितण्यर्थपक्षे या दर्शिता तदेतदुपपादयति । तत्तत्कक्ष्या स्येति । एवं हि । एवम्परिष्कारे हि । परोक्तामनुपपत्तिम्परिष्कृत्य परिहरति । न चेति । वाच्यमिति परेणान्वयः । कक्ष्याशब्दः कक्ष्यापर्यायः । कक्षो बाहुमूले । कष्धातोर्वृतृवदिहनिकमकषिभ्यः स इति सप्रत्ययान्तः । तस्मादाचारेऽर्थे कक्ष इव आचरति या सा कक्षा आचारक्विबन्तादचि टाप् कक्ष्याशब्दे आचारक्विबन्ताद्बाहुलकात्कर्त्तरि यत् ततष्टाप् । तद्वदाचरणञ्च स यथा प्राणिनोऽवयविन उपकारङ्करोति तद्वदियमवस्था चतुष्टयस्योदाहरणोपपादकस्य घटकतयोपकारङ्करोतीति । प्रकृते । अन्तर्भावितण्यर्थतायाम् । भाष्याक्षरानारूढत्वादिति । एवञ्च कक्ष्ययोर्मूलत्वविचारेण समाधानमसङ्गतमिति भावः । अन्तर्भावितण्यर्थेति। प्रथमकक्ष्यायामेवान्तर्भावितण्यर्थेत्यर्थः । तद्यथा प्रथमकक्ष्यायामेव चाक्षुषज्ञानविषयत्वानुकूलव्यापारानुकूलव्यापारार्थको यो धातुस्तदर्थघटकव्यापारस्यैकस्य त्यागं कृत्वा ततः परित्यक्तव्यापार एव णिचि कृते यो धातुर्दर्शयेति तस्य दर्शयति भव इत्यत्र प्रयोगेणेत्यर्थः । तदर्थमूलकादिति । प्रथमकक्ष्यास्थधात्वर्थमूलकाद्यो मध्ये निवृत्तप्रेषणको धातुः कल्प्यते तदर्थादित्यर्थः । तत्र द्वितीयकक्ष्यायाम् । एवं ह्यत्र क्रमः प्रथमकक्ष्यायाञ्चाक्षुषज्ञानविषयत्वानुकूलव्यापारानुकूलव्यापारैकदेशस्य द्वितीयव्यापारस्य त्यागेन चाक्षुषज्ञानविषयत्वानुकूलव्यापाररूपेऽर्थे पश्यन्ति भ-

SGDF
Sri Gangeshwari Digital Foundation

वम्भक्ता इति प्रयोगस्ततो यः परित्यक्तो भवनिष्ठो व्यापारश्चाक्षुषज्ञान-विषयत्वानुकूलव्यापारस्य प्रयोजको व्यापारस्तत्रैव णिचि दर्शयति भव इति प्रयोगः । ततो द्वयोरपि व्यापारयोस्त्यागे चाक्षुषज्ञानविषयतामात्रेऽर्थे णिजन्तस्य लक्षणां स्वीकृत्य दर्शयते भव इति प्रयोगस्तत्राणौ प्रथमकक्ष्यायां या क्रिया ततो न्यूना यद्यप्यस्ति तथाप्यधिका नास्ति नियमेन सैव चेदित्यनेन व्यावृत्तिस्तु तत्र वक्तुमशक्या । आधिक्यमात्रव्यवच्छेदे तात्पर्यमित्युक्तत्वात् । अणौ कर्मकारकस्य भवस्य तत्र कर्तृत्वाच्च भवत्यात्मनेपदमिति । एतादृशस्थले द्वितीयकक्ष्यायामात्मनेपदस्य शङ्कैयन्द्वितीयकक्ष्यायामपि प्रथमकक्ष्यायां या क्रिया सैवास्ति न ततोऽधिका न्यूना वा। अणौ कर्मकारकस्य कर्तृत्वञ्चास्तीति । समाधत्ते । गमकं विनेति । एवञ्च प्रकृते तादृशगमकस्यादर्शनेन द्वयोर्मध्ये एकस्य त्यागङ्कृत्वा परित्यक्तव्यापार एव णिजिनिर्वक्तुमशक्यमिति भावः । अणाविति किमिति। कर्म णौ चेदित्येव द्वितीयं वाक्यमस्तु । यत्किञ्चित्क्रियानिरूपितकर्मत्वं विवक्षितम् । कर्मशब्दश्च क्रियापर एव । एवञ्च स्वमूलभूतकक्ष्यायां या क्रिया प्रतीयते सैव चेस्तन्तेनोच्यतेत्यर्थोऽस्त्विति भावः । निवृत्तप्रेषणेत्यादि । अत्रेदम्बोध्यम् । चाक्षुषज्ञानविषयत्वानुकूलव्यापाररूपेऽर्थे पश्यन्ति भवम्भक्ता इति प्रथमकक्ष्या ।ततो व्यापारस्य त्यागेन चाक्षुषज्ञानविषयत्वमात्रस्य धात्वर्थत्वविवक्षया पश्यति भव इति द्वितीया । ततः परित्यक्तव्यापारे ज्ञानविषयीभवनानुकूलत्वेनविवक्षिते णिचि दर्शयन्ति भवम्भक्ता इति तृतीया । ततः कर्मणो भवस्यैव प्रयोजकत्वविवक्षया तदीयव्यापारे विषयीभवनरूपे द्वितीयणिचि दर्शयति भवो भक्तैरिति तुरीया कक्ष्या तत्र तुरीयकक्ष्यायां मा भूदिति । यस्य भवनिष्ठव्यापारस्य प्रयोजकत्वविवक्षा तं व्यापारन्दर्शयति । कर्मनिष्ठेत्यादिना । अणावित्युपादाने चाणौ प्रथमकक्ष्यायां ज्ञानविषयत्वमात्रस्य सत्वन्न तु ज्ञानविषयीभवनस्येत्याधिक्यसत्त्वान्नात्मनेपदमिति भा-

SGDF
Sri Gargeshwari Digital Foundation

वः। न च ज्ञानविषयीभवनानुकूलव्यापारस्य यत्र प्रथमकक्ष्यायां विवक्षा तत्रातिप्रसङ्गो दुर्वार इति वाच्यम्। अणौ या क्रियेत्यस्याण्यन्तावस्थास्थधातुजन्यबोधीयक्रिया निष्ठा यावद्विषयतास्ताभिरतिरिक्तविषयतायस्यन्तज्जन्यबोधीया नास्ति तस्मयन्तादात्मनेपदमित्यर्थात्। न ह्येवं पूर्वोक्तविवक्षायामस्ति। ज्ञानविषयीभवनस्य द्वेधा भानादिति बोध्यम्। ननु भट्टिप्रयोगे मध्वपाययतेत्यत्रात्मनेपदं दृश्यते तत्रात्मानमित्यस्य कर्मत्वदर्शनेन तस्य कर्मत्वोपपत्त्यर्थं क्रियाधिक्यं स्वीकार्यमिति कथमात्मनेपदमित्याशङ्कायामाह। मध्वपाययतेत्यादि। ईदृशम्मधु स्वच्छं सोत्पलं सुरताभोगः सुरतविमर्दस्तस्मिन्यो विश्रम्भो विश्वासस्तस्य यदुत्पादनन्तत्र समर्थमात्मानन्दर्शयितस्य कामुकस्यान्तिके समीपे दर्शयित्वाऽपाययत इत्यन्वयः। ईदृशं यत् पूर्वश्लोकेनोक्तं रक्षसां गणः सुरामलसुपाभुङ्क्ताभ्याहृतवान् तत्। दर्शयित्वेत्यस्याध्याहारे सत्यात्मानमित्यस्य दर्शनक्रियानिरूपितकर्मत्वन्न तु पानक्रियानिरूपितमिति फलाधिक्यमात्मनः कर्मत्वोपपत्तये न कार्यमित्यणौ या क्रिया सैव ण्यन्तेनोच्यते कर्मणो मधुन एवाणौ तथात्वेऽपीदानीमणौ कर्तृत्वञ्चास्तीति भवति प्रकृतसूत्रेणात्मनेपदम्। सः मधु पिबतीति प्रथमकक्ष्या। ततः कर्म मधु पिबन्तं रक्षोगणं प्रेरयतीत्यर्थे णिचि तमपाययतीति द्वितीया कक्ष्या। ततः सौकर्यविवक्षया द्वयोरपि प्रकृत्यर्थणिजर्थव्यापारयोस्त्यागे मध्वपाययतेत्येवमनेनैवात्मनेपदमिति भावः। उत्पादनमित्यत्र ण्यन्तात्पदेः कृत्यल्युटो बहुलमिति कर्त्तरि ल्युट्। उदाहरणभूतकक्ष्यायान्दर्शनविशिष्टम्पानन्यात्वर्थो विवक्षित इत्यणौ या क्रिया तदधिकास्तीति नानेन सूत्रेणात्मनेपदङ्किन्तु णिचश्चेत्यनेनेत्याशयेनाह। करेणुरित्यादि। मित्वाद्ध्रस्व इति। स्मृ आध्यान इति घटादौ पाठेन मित्वाद्ध्रस्व इत्यर्थः। एवन्नव्यसम्मतां व्याख्याम्प्रदर्श्य भाष्यानुसारिमतमाह। अपरे त्विति। उपक्रमवार्त्तिकस्थेति। णेरात्मनेपदविधाने ऽण्यन्तस्य कर्मणस्तत्रोपलब्धिरि-

SGDF
Sri Gargeshwari Digital Foundation

ति हि तत्र वार्त्तिकम् । तद्व्याख्याऽणौ यत्कर्म यदा पश्यन्ति तदेव कर्म भव-
तीति । उभयत्रापीति । कर्मवत्कर्मणेति सूत्रे प्रकृतसूत्रे चेत्यर्थः । एवञ्च क-
र्त्तरि कर्मेति सूत्रदृष्टान्तेन क्रियापरत्वेन व्याख्यानमयुक्तम्प्रकृतसूत्रे ॥ अत
एव । कर्मशब्दस्य कर्मकारकपरत्वादेव । नन्वेवमणौ कर्मणो णौ कर्तृ-
त्वन्तृतीयवाक्येन प्रतिपाद्यमानं विरुध्येतेत्यत आह ॥ तत्र द्वितीयवा-
क्येनेति । तत्र । कर्मशब्दस्य कर्मकारकपरत्वे । कर्मान्तरनिवृत्तिरिति ।
अणौ यत्कर्म तदतिरिक्तङ्कर्म न चेदित्येवङ्कर्मान्तरनिवृत्तिरित्यर्थः । भृत्य
रूपकर्मण इति । भृत्या राजानम्पश्यन्तीति प्रथमकक्ष्यायाम्भृत्यानाङ्कर्तृ-
त्वन्तेषाम्मन्तावस्थायाङ्कर्मत्वेनाणौ यत्कर्म तदतिरिक्तकर्मणो विद्यमा-
नत्वाद्विरोधः । ये कर्तृकर्मणी इति । एवञ्च भृत्यानान्तदानीङ्कर्तृत्वेनो
भाभ्यामतिरिक्तङ्कर्म नास्तीति न विरोध इति भावः । नन्वेवङ्कर्मशब्द-
स्यैतन्मते लक्षणापत्तिः । पूर्वमते तु क्रियापि कृत्रिमं कर्मेति न लक्षणे-
त्यत आह । कर्त्तरि कर्मेत्यत्र इति । एकशेषेणेति । नपुंसकमनपुंसके-
नेतिसूत्रे णैकशेषेणेत्यर्थः । कर्मान्तरनिवृत्तेः फलमाह । कर्मान्तरेति ।
तत्र हि । स्थलमारोहयतीत्यत्र हि । प्रेरणा वृद्धिवदिति । यथाऽध्यारो-
पितप्रेषणपक्षे प्रेरणा वृद्धिः पूर्वमते प्रतिपादिता तद्वत् ॥ अत्र । स्थल-
मारोहयति मनुष्यानित्यत्र । धात्वर्थः । प्रकृत्यर्थः । नन्वेतादृशस्य धा-
त्वर्थत्वे प्रथमत आरोहन्ति हस्तिनं हस्तिपका इत्येव भाष्ये दर्शितन्न
तु स्थलमपि कर्मेति न्यूनता प्राप्नोतीत्यत आह । आरोहन्तीत्यादि । इ-
त्यस्यैव मूलभूतेति । एवञ्च यत्प्रत्युदाहरणत्वेनाभिप्रेतन्तस्य सा कक्ष्या मू-
लभूता न भवतीति न न्यूनतेति भावः । तत्प्रदर्शनवैयर्थ्यशङ्कां वारय-
ति । आरोहयमाणेत्यादिना । तस्य दृष्टान्ता भिन्नोपादानमित्येतद्विशदय-
ति । किञ्चास्योदाहरणस्येति । कर्मशब्दस्य क्रियापरत्ववादिना मनुष्याः
स्थलमारोहन्तीति प्रथमकक्ष्या न्यग्भवनानुकूलो यो मनुष्यनिष्ठो व्यापा-
रस्तद्बोधतात्पर्यिका वाच्या । ततः सौकर्यविवक्षया कर्मणोऽपि स्थल-

SGDF
Sri Gangeshwari Digital Foundation

स्य कर्तृत्वविवक्षया तत्र यः कश्चनविलक्षणो न्यग्भवनसमानाधिकरणो व्यापारस्तस्य मनुष्यनिष्ठव्यापारजनकत्वविवक्षया मनुष्यान्स्थलमारोहयतीति प्रयोगो यत्र तत्रात्मनेपदव्यावृत्तिपरत्वमस्य भाष्यग्रन्थस्येति वाच्यन्तन्न युक्तमित्याह । न मनुष्या इत्यादिना । स्थलनिष्ठायाः क्रियाया अधिकायाः प्रतीत्याऽणौ या क्रिया तदधिकायाः प्रतीत्या द्वितीयवाक्यार्थाभावेन नात्मनेपदमिति भवता वाच्यन्तन्न सम्भवति हस्तिन एव स्वरसतः कर्तृत्वस्य प्रतीतेरिति भावः । हस्तिन एव कर्तृत्वप्रतीतेः । मध्यमणिन्यायेन हस्तीत्यनेन पूर्वोच्चारितवाक्यार्थे परोच्चारितवाक्यार्थे च कर्तृत्वप्रतीतेः । हस्तिन एवेत्येवकारेण स्थलस्य कर्तृत्वं व्यवच्छिद्यते। तदेतदुपपादयति । शतृशानजेति । यथा कुर्वन्कुर्वाणो वा सृष्टिं हरिर्विजयत इत्यत्र शतृशानच्प्रत्ययार्थकर्तुर्हरेर्विजयत इत्यत्र कर्तृत्वम्प्रतीयते तथा सर्वत्र प्रतीतिः शब्दशक्तिस्वभावतो भवतीति भावः । क्रियान्तरस्य । आरोहणातिरिक्तक्रियायाः । प्रत्युदाहरणासङ्गतिरिति । तृतीयवाक्यार्थाभावेनैतद्व्यावृत्तिलाभाद्द्वितीयवाक्यार्थघटकैवकारव्यवच्छेद्यत्वमस्य न सम्भवतीति भावः । ननु नारोहयमाणो हस्तीति वाक्यार्थघटकस्य हस्तिनः कर्तृत्वप्रतिपादने आरोहयमाणो हस्तीति वाक्योच्चारण तात्पर्यङ्किन्तु शुद्धदृष्टान्तार्थन्द्वितीयवाक्यार्थे कर्तृत्वं स्थलस्यैव विवक्षितमित्यत आह । तव हस्तीति । तिङन्तमेवेति । तिङ्संज्ञकात्मनेपदस्यावर्त्यत्वे नैतत्तुल्यतया तिङन्तमेवोच्चारयेदित्यर्थः । कर्मशब्दस्य क्रिया परत्ववादिमते भाष्यग्रन्थे न्यूनतापत्तिरित्याह । किञ्च कर्मपदस्येति । एवकारबोध्यस्याभावस्य ज्ञानम्प्रतियोगिज्ञानजन्यमिति तत्सम्पादनाय द्वितीयकक्षोदाहर्त्तुमुचितेति भावः । एवमिति । अस्य इति सूचितमिति परेणान्वयः । अकर्मकाणामेवैतदिति । अधिकव्यच्छेदफलकस्य समानक्रियत्वस्य तत्रैव सम्भवादिति भावः । आचार्यदेशीयेनेति । यद्यपि तर्हि वक्तव्यन्न वक्तव्यमित्यादिना समानक्रियत्वाभावप्रदर्शन-

SGDF
Sri Gargeshwari Digital Foundation

परवाक्योच्चारणेन समाधानार्थम्प्रवृत्तश्च स आचार्यस्तथापि साक्षाद्याधि-का क्रिया सैव स्पष्टप्रतिपत्तये प्रदर्शनीया सा न प्रदर्शिता किन्तु सक-र्मकोदाहरणमेव दर्शितमतोऽयमाचार्यदेशीय इति भावः । इत्युक्ते । प-रेणैवमुक्ते । कर्मकर्तृत्वात्सिद्धम् । कर्मण एव कर्तृत्वे कर्मवत्कर्मणा तुल्यक्रिय इत्यनेन सिद्धम् । कर्मवद्भावातिदेशे भावकर्मणोरित्यनेनात्मने पदम्भविष्यतीति भावः । इत्याशङ्क्येति । इदन्तर्हि प्रयोजनमनाध्या-न इति वक्ष्यामि । इह मा भूत् । स्मरति वनगुल्मस्य कोकिलः । स्मर-यत्येनं वनगुल्मः स्वयमेवेतीत्यनेनाशंकेत्यर्थः । कर्तृस्थभावकत्वादिति । कर्मणि क्रियाकृतविशेषानुपलम्भादयन्न कर्मस्थक्रियः । नन्वत्राधीगर्थेति सूत्रेण कर्मणः शेषत्वविवक्षया वनगुल्मस्येति षष्ठी वाच्या । एवञ्च कर्म-ण एवाभावेनाणौ यत्कर्मकारकमित्यंशाभावात्कथमात्मनेपदप्राप्तिरिति चेन्न । सूत्रस्थकर्मशब्दस्य फलाश्रयमात्रपरत्वात् ॥ न च कर्मवद्भावात्सिद्ध-मिति भाष्यग्रन्थस्याकर्मकार्येवोदाहरणानीति मत्वा प्रवृत्तेरत्रैनमित्य-स्य कर्मवाचकस्योपादानेन नायमकर्मक इति कथमियमाशंकेति वाच्य-म् । कर्मबोधकपदाघटिते स्मरयति वनगुल्म इत्यत्र तात्पर्यात् । यद्य-पि गतिबुद्धीतिसूत्रे ज्ञानसामान्यस्यैव बुद्धिपदेन ग्रहणन्न तु ज्ञानत्वन्यून-वृत्तिधर्मावच्छिन्नवाचकस्येति स्मरयति योगेनाण्यन्तकर्तुः कर्मत्वप्राप्ति-रित्येनमित्यस्यानुपपत्तिस्तथापि तत्र सूत्रे आध्यानार्थस्मरयतेरप्येतद्भा-ष्यबलाद्ग्रहणमिति तात्पर्यम् । यथा तव तत्र कर्मवद्भावस्याप्राप्तेर्निषेध-वैयर्थ्यन्तथा ममापि तेनात्मनेपदाप्राप्तेरात्मनेपदसिध्यर्थमिदं सूत्र मि-त्याह । यथा तवेत्यादि । इत्यर्थ इति । प्रकारवचनार्थकजातीयरप्रत्यय-स्योपादानादिति ॥ तज्जातीयत्वमित्यर्थः । सकर्मकाण्यप्यस्य इति । क-र्मवद्भावस्य तु तत्र निवर्तनादिति भावः । दर्शयते भृत्यान् राजेति । भृत्या राजानम्पश्यन्ति । भृत्यान् राजा दर्शयते । अत्र प्रथमकल्पायाश्चा-क्षुषज्ञानविषयत्वानुकूलव्यापारोऽर्थः । ततो दृशधातोस्ताद्दृशव्यापारानु-

SGDF
Sri Gargeshwari Digital Foundation

कूले व्यापारे णिच्। अत्र सकर्मकत्वकर्मस्थक्रियकत्वाभावौ स्पष्टावेव। कर्तृस्थभावक्रियवदिति। अपरिस्पन्दनसाधनसाध्यो धात्वर्थो भावः। सपरिस्पन्दनसाधनसाध्यो धात्वर्थः क्रिया। परिस्पन्दनं शरीरव्यापारः। दृश्धात्वर्थे दर्शनेऽपरिस्पन्दनसाधनसाध्यत्वं स्पष्टमेव। अत एव। प्रकृतसूत्रस्थकर्मशब्दस्य कर्मकारकपरत्वादेव। द्वितीयपक्षेति। अध्यारोपितप्रेषणपक्षेत्यर्थः। कारिकयोः। शेषाश्चिद्देवदत्तादेरित्यादिनोक्तकारिकयोः। न च तयोः कारिकयोराद्यकारिकायां देवदत्तादेर्यो व्यापारस्स देवदत्तादेर्विना कटादिषु विवक्ष्यते इत्यनेन व्यापारस्यैव विवक्षाऽविवक्षे दर्शिते इति कर्मशब्दस्य क्रियापरत्वमेव तदभिमतमिति प्रतीयत इति वाच्यम्। देवदत्तादेर्यो व्यापारः प्रधानीभूतः स यदा कटादिषु विवक्ष्यत इत्यनेन प्रथमकक्ष्यायामप्रधानीभूतधात्वर्थाश्रयत्वं देवदत्तस्य सिद्धं यत्तद्देवदत्तं विनापि कटादिषु विवक्षितन्तदा कट एव प्रधानीभूतधात्वर्थाश्रयो भवति न तु देवदत्त इत्येतत्प्रदर्शनन्देवदत्तस्य कर्तृत्वाभावप्रदर्शनतात्पर्यकमेव न तु कर्मशब्दस्य क्रियापरत्वाभिप्रायकमत एवैतदुदाहरणदिक्प्रदर्शनाय द्वितीयकारिकया स्वीकृतप्रेषणङ्कर्म स्वस्य कर्तुः प्रयोजकमित्यनेन तस्य प्राधान्यमेव दर्शितमित्यभिप्रायात्। तेन सूत्रस्थकर्मशब्दस्य कर्मकारकपरत्वेन तत्र। तस्मिन्पक्षे। सूत्रार्थप्रदर्शनपरभाष्ये द्वितीयकक्ष्याप्युदाहरणमिति सूचितम्। अत्रेदम्बोध्यम्। कर्मशब्दस्य क्रियापरत्वमिति मते णेरणाविति सूत्रस्योदाहरणस्थले सूत्राभावेऽप्यात्मनेपदङ्कर्मवद्भावात्सिद्धम्। दृश्धातोश्चाक्षुषज्ञानविषयत्वानुकूलव्यापारे रुहधातोश्च न्यग्भवनानुकूलव्यापारे शक्तेः पच्यते ओदनः स्वयमेवेत्यत्र यथा पच्धातोर्विक्लित्तिमात्रपरत्वे कर्मस्थया क्रियया तुल्यत्वसत्वादात्मनेपदञ्जायते तथाप्रकृतसूत्रोदाहरणस्थले दर्शयते भव इत्यत्र णिजन्तस्य चाक्षुषज्ञानविषयत्वमात्रार्थकत्वे आरोहयते हस्ती यत्रापि रोहेर्न्यग्भवनमात्रपरत्वे कर्मस्थया क्रियया तुल्यक्रियत्व-

SGDF
Sri Gurgeshwari Digital Foundation

सत्वात्। न चात्मनेपदमेव न तु यक्चिणाविति नियमार्थमेव सूत्रमस्तु। अन्यथा कर्मवद्भावाद्यावपि स्यातामिति वाच्यम्। यक्चिणोः प्रतिषेधे णिश्रन्थिग्रन्थिब्रूञात्मनेपदाऽकर्मकाणामुपसङ्ख्यानमिति वार्त्तिकेन तयोर्निषेधादेव सिद्धेः। न च यत्र क्रिया कर्मस्था तत्र कर्मवद्भाव इष्यते। कर्मस्थत्वञ्च यत्र कर्मणि क्रियाकृतो विशेषो दृश्यते तत्र कल्प्यते यथा पच्यते ओदन इत्यत्र तत्र पक्वापक्वतण्डुलयोर्विशेषस्य दर्शनात्। प्रकृते तु न तथा। दृष्टादृष्टभवे विशेषानुपलम्भादिति वाच्यम्। पच्धात्वर्थक्रियाकृतस्य श्रमादिरूपस्य विशेषस्य कर्त्तर्यपि सत्वेन पच्धातोः कर्तृस्थक्रियकत्वापत्तेः। चिन्तयत्यादीनां कर्तृस्थभावकत्वाभावापत्तेश्च। न हि कर्त्तरि क्रियाकृतो विशेष उपलभ्यते। तस्मादत्र व्यवस्था न विशेषदर्शनमात्रेण। किन्तु फलताव्यापारजन्यतान्यतरावच्छेदकसम्बन्धेन कर्तृकर्मवृत्तिफलन्धातुना प्रतिपाद्यते यत्र तत्र स धातुः कर्तृस्थभावक इति व्यवहारः। यथा पश्यति घटं। ग्रामं गच्छतीत्यादौ। अत्र हि फलं दृशृधातुप्रतिपाद्यञ्चाक्षुषज्ञानविषयत्वानुकूलव्यापारस्य धात्वर्थवादिमते चाक्षुषज्ञानविषयतैव सा फलतावच्छेदकस्वरूपसम्बन्धेन कर्मणि स्वप्रयोजकज्ञानवत्त्वसम्बन्धेन कर्त्तरि चास्तीत्ययन्धातुः कर्तृस्थभावकः। चाक्षुषज्ञानानुकूलव्यापारस्य धात्वर्थत्ववादिमते तु फलतावच्छेदकविषयतासम्बन्धेन कर्मणि व्यापारजन्यतावच्छेदकसमवायसम्बन्धेन कर्त्तरि चास्तीति। गम्धात्वादिगत्यर्थकधातुस्थले संयोगरूपम्फलमनुयोगितारूपफलतावच्छेदकसम्बन्धेन ग्रामादिकर्मणि व्यापारजन्यतावच्छेदकसमवायसम्बन्धेन कर्त्तरि चास्ति। एवन्देवदत्तमुपहसतीत्यत्रापि बोध्यन्तत्रापि हस्धात्वर्थ इच्छानुकूलव्यापारस्तत्रेच्छा रूपम्फलं स्वप्रयोज्यदुःखवत्वसम्बन्धेन कर्मणि व्यापारजन्यतावच्छेदकसमवायसम्बन्धेन कर्त्तरि चास्तीति। एवमेवान्यत्र कर्तृस्थभावकत्वस्य यथा यथमुपपत्तिः कार्या। यत्र तु कर्त्रवृत्तिधर्मरूपम्फलन्धातुना प्रतिपाद्यते स धातुः कर्मस्थभाव-

SGDF
Sri Gargeshwari Digital Foundation

कः। यथा भिनत्ति पचपीत्यादौ । आद्ये द्विधा भवनन्द्वितीये विक्लित्तिः फलन्तच्च कर्त्रवृत्तीति स्पष्टमेव। अत एव कर्मवत्कर्मणा तुल्यक्रिय इति सूत्रभाष्ये उक्तन्न च कर्तृस्थभावकानाङ्कर्मणि क्रियायाः प्रवृत्तिरस्तीति। तेषान्धातूनां वाच्यायाः क्रियायाः कर्ममात्रे प्रवृत्तिर्नास्तीत्यर्थः। तदुक्तं हरिणा। विशेषदर्शनं यत्र क्रिया तत्र व्यवस्थिता। क्रियाव्यवस्था त्वन्येषां शब्दैरेव प्रकल्पितेति। एतत्कारिका पूर्वार्द्धोक्तार्थे पूर्वोक्तामनुपपत्तिम्परिचिन्त्योत्तरार्द्धे नान्येषाम्मते शब्दैरेव क्रिया व्यवस्था प्रकल्पितेति तेनोक्तम्। शब्दश्चानुपदमुक्तो ज्ञातव्यः। न च पूर्वोक्तरीत्या दृश्धातोः कर्तृस्थभावकत्वाद्यद्येवङ्कर्म कर्त्तायम्भवति तत्र कर्म कर्तृत्वात्सिद्धमिति भाष्यग्रन्थासङ्गतिरिति वाच्यम्। णेरणाविति सूत्रोदाहरणभूतकल्पायां व्यापारस्य वाच्यत्वाभावेन व्यापारघटितोक्तशब्देन कर्तृस्थभावकत्वस्योपपादनासम्भवात्। ननु यद्येवमिति भाष्यग्रन्थेन कृता शंका कर्मवत्कर्मणेति सूत्रस्थभाष्योक्तरीत्या न सङ्गच्छते। तत्र हि कर्मवदकर्मकाणाङ्कर्त्ता कर्मवद्भवतीति वक्तव्यम्। किम्प्रयोजनम्। भिद्यमानः कुसूलः पात्राणि भिनत्तीति। अत्र भिद्धात्वर्थफलन्द्विधा भवनन्तच्च कुसूले पात्रे चास्तीति प्राप्नोति। तथा समानधाताविति वक्तव्यम्। इह मा भूत्। पचत्योदनन्देवदत्तः। राध्यत्योदनः स्वयमेवेति प्रतिपादितमेवञ्च प्रकृतसूत्रोदाहरणस्थले समानधातुत्वाभावो णिचः सत्त्वासत्त्वाभ्यामस्तीति चेन्न। लुनाति केदारन्देवदत्तः। लावयते केदारः स्वयमेवेतिवदुपपत्तेः। तत्र यथा प्रथमा लुनाति केदारन्देवदत्त इति कल्पा। ततो लुनन्तन्देवदत्तङ्केदारः प्रयुङ्क्त इति विवक्षया लावयति केदारो देवदत्तेनेति द्वितीया कल्पा। ततः प्रयोज्यप्रयोजकभावाविवक्षायां लावयते केदारः स्वयमेवेति तृतीया कल्पा। तत्र यथा न्यूनक्रियासत्त्वेऽपि व्यवच्छेद्याया अधिकक्रियाया अभावाद्भवति तथा प्रकृतेऽपि स्यादिति। कर्मशब्दस्य कारकपरत्वमेवेति मते सकर्मकाणामेवो-

SGDF
Sri Gargeshwari Digital Foundation

दाहरणत्वेन तत्र कर्मवद्भावो न भवतीति प्रागुपपादितम् । व्यापारद्वय-त्यागेनोदाहरणस्थले लक्षणया गङ्गायाङ्घोष इत्यत्र गङ्गापदस्य घोषे लक्षणायामपि टाप्स्थितिवस्स्विवः स्थितिस्तेनोपपादिता सा न युक्तेत्याह । किञ्च गभीरायामित्यादिना । गभीरनदीतीरे यदि नदीपदस्य लक्षणाऽऽश्रीयते तदा नद्याः पदार्थैकदेशतया तत्र गभीरपदार्थान्वयो न स्यादिति नदीपदस्य गभीरनदीतीरे लक्षणा गभीरपदञ्च तादृशेऽर्थे लक्षणायान्तात्पर्यग्राहकमिति यथोच्यते तथा प्रकृते णिच्सत्त्व एव कर्मवत्रापरे लक्षणा सम्भवति तदभावे तात्पर्यग्राहकाभावान्न सम्भवतीति वक्तुमशक्यम्पच्यते ओदनः स्वयमेवेत्यादिदर्शनादितिभावः।स्वास्वर्थसम्बन्धइति स्वार्थप्रतीतिश्चोभयसद्भावे भवतीति तयोरुपादनं सार्थकमिति भावः।वक्तुमशक्यत्वादिति । नचैवङ्गङ्गायाङ्घोष इत्यत्र तीरे लक्षणायामपि टापः साधुत्वानापत्तिरिति वाच्यम् । लक्षणा हि न शक्यसम्बन्धरूपा ॥ न वा शक्यतावच्छेदकातिरिक्तधर्मावच्छिन्नस्य लक्षणया बोध इति युक्तम् किन्तु शक्यतावच्छेदकारोपो लक्षणा ॥ आरोपितशक्यतावच्छेदकप्रकारिकैव प्रतीतिरिति यद्धर्मावच्छिन्नबोधनाय टाबन्तस्य साधुत्वम्बोधितन्तद्धर्मावच्छिन्नविषयताशाल्येव बोध इति नासाधुत्वम् ॥ अत एव कचतस्त्रसति वदनं वदनात्कुचमण्डलन्त्रसति ॥ मध्याद्बिभेति नयनन्नयनादधरः समुद्विजतीत्यतश्चमत्कारो भवति ॥ अत्र कचशब्दस्य राहौ वदनशब्दयोश्चन्द्रे कुचमण्डलशब्दस्य कमलकुड्मले मध्यशब्दस्य सिंहे नयनशब्दयोः कुरङ्गे अधरशब्दस्य रक्तनूतनाम्रादिपर्णे लक्षणाऽस्ति ॥ यदि राहुत्वादिप्रकारको बोधो लक्षणया स्वीक्रियते तदा न तथा चमत्कारो यथा कचत्वादिप्रकारकबोध इति । स्वमते उपपत्तिमाह । तस्मादिति ॥ णिजर्थ इति ॥ दर्शयते भव इत्यत्र णिजर्थः ॥ स्वस्य ॥ भवस्य ॥ अत एव । उदाहरणभूतकद्यायामपि प्रेरणाया णिजर्थत्वादेव ॥ह्युक्तरीत्या पञ्चमी कद्या सूत्रोदाहरणमित्येतद्बोधयितुमादौ दृष्टान्तमाह ॥ नियत-

SGDF
Sri Gargeshwari Digital Foundation

प्रेषणादिति ॥ प्राकृतेऽर्थे ॥ प्रकृतेरयम्प्राकृतः ॥ निवृत्तिप्राक्कालिकप्रतीतिविषये व्यापाररूपेऽर्थे ॥ ब्रवीति पचतेरर्थमिति ॥ निवृत्तप्रेषणकपचतेरर्थमित्यर्थः । सिध्यतिर्न विना णिचेति ॥ सिद्धत्योदन इत्यत्र सिध्यतिर्विक्लित्तिमात्रार्थको भवति स सिध्यतिर्णिचि सति साधयतीत्यत्र णयन्तसमुदायघटकतया पचतेरर्थे पचत्योदनमित्यत्र यः पचतेरर्थस्तस्मिन्सर्वथा वर्त्तते तदा विक्लित्त्यनुकूलव्यापारः साधयतेरर्थो भवतीत्यर्थः । तद्वद्रुहेरिति ॥ निवृत्तिप्रेषणकरुहधातोर्णिचि पूर्वावस्थायां यो न्यग्भवनानुकूलव्यापाररूपोऽर्थस्तमादाय तुल्यार्थत्वमिति ॥ इदमुक्ततृतीयकक्ष्योदाहरणेत्यादि ॥ तृतीयकक्ष्यायामुदाहरणभूतपञ्चमकक्ष्यायाञ्च समानमित्यर्थः ॥ ताः कक्ष्या दर्शयति ॥ तत्र द्वितीयेत्यादिना ॥ प्रथमकक्ष्यायान्यग्भवनानुकूलो यो हस्तिपकनिष्ठो व्यापारस्तस्य प्रतीतिः ॥ आरोहन्ति हस्तिनं हस्तिपकाः ॥ आरोहति हस्तीति द्वितीया ॥ अत्र न्यग्भवनसमानाधिकरणो व्यापारो विवक्षितः ॥ ततो हस्तिपकस्य प्रयोजकत्वविवक्षया तदीयव्यापारेऽणिचि आरोहयन्ति हस्तिनं हस्तिपका इति तृतीया ॥ तत उभयोरपि व्यापारयोस्त्यागे सति तादृशोभयराहित्यबोधनाय शुद्धरुहधातुघटिता आरुह्यते हस्तीति तुर्या कक्ष्या ॥ अत्र कर्मवद्भावाद्यगात्मनेपदे ॥ ततो न्यग्भवनसमानाधिकरणव्यापारस्य प्रयोजकत्वविवक्षया तस्मिन्व्यापारे णिच् ॥ आरोहयते हस्तीति पञ्चमी कक्ष्या ॥ अत्र स्वयन्दूती दृष्टान्तत्वेन कल्पनीया ॥ एतदेव न्यग्भावनान्यग्भवनं ण्यन्तेऽपि प्रतिपद्यत इति प्रागभिहितम् ॥ भिन्नार्थः॥ तृतीयायां व्यधिकरणस्य व्यापारस्य सत्त्वाऽत्र तु नेति भिन्नार्थत्वमित्यर्थः॥असम्भवोऽपीति ॥ न च द्वितीयामादाय समान क्रियत्वमस्तीति वाच्यम् । तत्र फलसमानाधिकरणस्य व्यापारस्यानुद्भूतस्य प्रतीतिः ॥ अत्र तु तस्य हेतुत्वं विवक्षितमत उद्भूतत्वमिति वैलक्षण्यात् ॥ अत्रैतादृशवैलक्षण्येऽपि कर्मवद्भावस्य प्राप्तिरिति न शङ्क्यम् ॥ अण्येते प्रथमकक्ष्यायां समाना-

SGDF
Sri Gangeshwari Digital Foundation

धिकरणव्यापारस्याप्रतीतेः । द्वितीयायां यद्यपि तत्प्रतीतिस्तथापि तदा हस्ती न कर्म । तृतीयायां यद्यपि कर्म । तथापि तामादाय तुल्यक्रियत्वमेव न । तदा समानाधिकरणव्यापारस्यानुद्भूतस्य प्रतीतेः । तुरीयायां तु हस्ती न कर्मेति कर्मवद्भावस्याप्राप्तेरेतत्सूत्रोदाहरणमिति द्रष्टव्यम् । एवञ्च कर्मशब्दस्य कर्मकारकपरत्वमेवेति व्यवस्था सिद्धौ द्वितीयाया अध्यारोपितप्रेषणपक्षे कल्प्या तत्राप्यात्मनेपदमपेक्षितमिति लावयतीति परस्मैपदप्रयोगानुपपत्तिरत आह । तद्रीत्येति । कर्मशब्दस्य क्रियापरत्ववादिरीत्या । सः । परस्मैपदप्रयोगः । मूले यदुपक्रमे पूर्वविप्रतिषेधेनेत्युक्तन्तत्खण्डयति । एवम्पूर्वेति । यद्यस्य सूत्रस्योदाहरणेऽणावकर्मकादित्यस्य प्राप्तिस्तदा युज्यते पूर्वविप्रतिषेधः । वस्तुतो न प्राप्तिरिति दर्शयितुं शङ्कते । दर्शयत इति । भाष्यप्रयोगदर्शनेन पूर्वविप्रतिषेधकल्पनापि नेत्यर्थः । परस्मैपदविधायकसूत्राप्राप्तिमुपपादयति । अण्यन्तसकर्मकेष्विति । अत एव भाष्ये पश्यन्ति भृत्या राजानमिति दर्शयित्वा दर्शयते भृत्यान् राजेति भाष्ये उदाहृतम् । विभाषोपपदेन। अस्याः प्राप्तविभाषात्वे हेतुमाह । स्वरितेत्यादि । ननु क्रियाफलस्य कर्तृगामित्वद्योतकमत्र स्वमितिपदान्तरमुच्चारितमेवेत्यात्मनेपदप्रयोगो न सम्भवति यथा हेरामेत्यादौ हे इत्यस्य हेशब्देन द्योतितेऽर्थे प्रयोगो न भवति । एवञ्च समीपोच्चारितेन पदेनेत्यनुपपन्नमत आह । कर्त्रभिप्राय इत्यादि । इहापि प्राप्नोतीति । यत्र स्पष्टप्रतिपत्तये आदौ स्वमित्यादिप्रयुक्तं तत्रापि व्यतिलुनीत इतिवत्प्राप्नोतीत्यर्थः ॥

इत्यात्मनेपदप्रक्रियाविवरणम् ।

शेषात्कर्तरि परस्मैपदम् । शेषात् । आत्मनेपदनिमित्तहीनात् । नन्वत्र शेषग्रहणेनात्मनेपदनिमित्तहीनस्य ग्रहणे भिद्यते कुसूलः स्वयमेवेत्यत्रापि परस्मैपदम्प्राप्नोति । कर्तुः कर्मत्वातिदेशेऽपि स्वातन्त्र्यस्य

SGDF
Sri Gangeshwari Digital Foundation

कर्तृत्वस्यानिवर्तनात् । अतिदिश्यमानधर्मविरुद्धस्वाश्रयधर्मप्रयुक्तका-
र्याभावस्यातिदेशस्वभावसिद्धत्वेन समाधानन्तु प्रकृते नास्ति । अतिदि-
ष्टकर्मत्वेन कर्तृत्वस्य विरोधाभावात् । कर्तुरेव हि कर्मवद्भावो भवति ।
अत एव चाभिहिते कर्त्तरि प्रथमेति प्रथमा कुसूलशब्दाद्भवति । न च
शेषपदं सप्तम्यन्तं करिष्यते । एवञ्चात्र शेषे कर्त्तरि गृह्यमाणे कुसूलात्म-
कङ्कर्तृकर्मत्वातिदेशेनोपयुक्तम्भावकर्मणोरित्यत्रेति परस्मैपदन्न भविष्य-
तीति वाच्यम् । एधादिभ्योऽनुदात्तङिद्भ्यः परस्मैपदस्य शुद्धे कर्त्तरि
दुर्वारत्वात् । यदि च सौत्रमेव शेषादिति पदमावर्त्यैकस्य सप्तम्यन्तत्व-
कल्पनया शेषाच्छेषे कर्त्तरीत्युच्यते तदा कर्त्तरीति व्यर्थम् । भावकर्म-
णोरुपयुक्ततयाऽशेषत्वादिति चेन्न । सप्तम्यन्ते कर्त्तरीत्यस्योपादाने आ-
वर्त्तितस्यैकस्य विशेष्यानुरोधात्सप्तम्यन्तत्वम्भवतीति तत्रैव तात्पर्यग्रा-
हकतया कर्त्तरीत्यस्य चारितार्थ्यात् । उत्तरार्थत्वाच्च । अत एवानुपरा-
भ्याङ्कृञ इति परस्मैपदमनुक्रियते स्वयमेव पराक्रियते स्वयमेवेत्यत्र न
भवति । यदि च सप्तम्यन्तस्य कर्त्तरीत्यस्यावश्यमुत्तरार्थत्वे तत्रैक कर्त-
व्ये इह कर्त्तरीत्यस्योपादानाच्छेषपदं सप्तम्यन्तमेवास्तु । अनुदात्तङित
इति सूत्रमनुदात्तङित आत्मनेपदमेवेत्येवम्प्रकृतिनियमपरमित्याश्रीयते
तदा शेषादित्यस्यावृत्तिर्न कार्या । अनुपराभ्याङ्कृञः । कर्तृगामिक्रिया-
फलविवक्षायां स्वरितञित इत्यस्य बाधनार्थमिदं सूत्रम् । अत्र मूले क-
र्त्तरीत्येवेत्युक्तम् । एतच्च प्रत्ययनियमपक्षे बोध्यम् । कार्यातिदेशस्य
मुख्यतयेति । शास्त्रातिदेशस्य कार्यसम्पत्तिफलकत्वात्कार्यातिदेशस्य मु-
ख्यत्वम् । एवञ्च प्रकृते आत्मनेपदविधायकं कर्त्तरि कर्मेत्येव तच्चानुप-
राभ्यामित्यतः परमिति कर्मकर्त्तरि न भविष्यतीति भावः । यादेशस्य
सुप्त्वात्सुपि चेति दीर्घ इतिवत्प्रकृते कार्यम्भावकर्मणोरित्यनेनैवेत्याश्री-
यते तदाप्याह । शास्त्रातिदेशपक्षे त्विति । मुख्यकार्यातिदेशपक्षेऽपि
कर्तृग्रहणद्वयस्यानुवृत्तत्या कर्त्तैव यः कर्त्तेत्यावश्यकमित्याह । कार्याति-

SGDF
Sri Gargeshwari Digital Foundation

देश इत्यादिना। इति मत इति। इदञ्च मतम्मुख्यम्। अत एव परिवीरित्यत्र व्येञः क्विपि सम्प्रसारणेऽन्तरङ्गत्वात्क्विपो लोपेऽपि स्थानिवद्भावेनाङ्गत्वात्तु ग्दीर्घत्वयोः प्राप्तौ परत्वाद्दीर्घ इति सङ्गच्छते। भाष्यस्वरस इति। आत्मनेपदबाधनाय यत्पूर्वसूत्रे भाष्यकृतोक्तङ्कर्त्तरि कर्मव्यतिहार इत्यत्र कर्तृग्रहणम्प्रत्याख्यायते तत्प्रकृतमुत्तरत्रानुवर्त्तिष्यते शेषात्कर्त्तरि कर्त्तरीति तद्भाष्यस्वरस इत्यर्थः। पूर्वसूत्रे कर्तृग्रहणस्य पूर्वोक्तरीत्या प्रकृतसूत्रार्थत्वस्य स्वीकारादिति भावः। अभेद एव सूचित इति। एतेनातिदिश्यमानकार्याणामुत्पत्तिदेश एव देश इत्यर्थादुक्तम्भवति। अग्रेऽपीति। अभिप्रत्यतिभ्य इति सूत्रेऽपीत्यर्थः। यौजादिकस्य परिमर्षतीति मूले आधृषीयत्वात्स्विजभाव इत्यपि बोध्यम्। स हि स्वरितेत्। मतान्तरे त्वनुदात्तेत्। व्याङ्परिभ्यो रमः। रम्धातुरनुदात्तेदित्यस्यारम्भः। अकर्मकाणाम्। युध्नश्जनू इत्येषाम्। तदर्थमिति। अणावकर्मकादित्यस्य तदाऽप्राप्तेः। यो जनयत इति। यः ईश्वरः। अत्र चित्तवत्कर्तृकत्वात्परस्मैपदन्याय्यमिति भावः। ण्यन्तास्त्राविति। अणावकर्मकादित्यस्य यो धातुरणावकर्मकस्तत्प्रकृतिकण्यन्त एव प्रवृत्तिरिति भावः। ननु भक्तजनस्य प्रीतिकर्तृकोत्पत्त्यनुकूलव्यापाररूपफलाश्रयत्वात्तस्य कर्मसंज्ञायान्द्वितीया स्यादत आह। प्रयोज्यकर्तुरिति। निगरणचलन। कठिनद्रव्यवृत्तिगलाधः संयोगानुकूलव्यापारे निगरणशब्दस्य प्रसिद्धेः पा पान इत्यस्य ग्रहणन्न स्यादत आह। अत्र निगरणेति। पाग्रहणादिति। निषेधस्य प्राप्तिपूर्वकत्वादिति भावः। ननु च सुधातोरदनार्थत्वेन निगरणार्थत्वाच्छ्रीहर्षपद्ये आचामयस इत्यत्रात्मनेपदमनुपपन्नमत आह। इमाङ्क्षिमिति। अत एव। सादरज्ञानलाक्षणिकत्वादेव। कर्मत्वमिति। गतिबुद्धीतिसूत्रेणेति शेषः। इति न्यायादिति। न चैवमदेः प्रतिषेध इत्यस्य वैयर्थ्यमिति शङ्क्यम्। निगरणचलनेति सूत्रस्य णिचश्चेत्येतत्सूत्रापवादतया यत्र कर्तृगामित्वं क्रियाफलस्य विव-

SGDF
Sri Gargeshwari Digital Foundation

क्षितन्तत्रात्मनेपदस्याप्रदकत्वेन चारितार्थ्यात् । अणावकर्मकादिति सूत्रे यच्चित्तवत्कर्तृकादिति तदणावकर्मकादित्यस्य यद्विशेष्यन्तस्यैव विशेषणन्तदभिप्रायेण तत्प्रयोजनमाह । शुष्यन्ति व्रीहय इति । अत्र व्रीहीणां यद्यपि प्राणित्वमस्ति तथापि यादृशं चित्तवत्त्वम्मनुष्यादीनामस्ति तादृशन्नेति विवक्षितञ्च चित्तशब्देन तथैव । चित्तञ्चैतन्यम् । अणावित्यत्र प्रतियोगिभूतो णिर्हेतुमत्सिरेव । पूर्वस्मिन्बुधयुधेतिसूत्रे तस्यैव बुधादिभ्यः सम्भवात् । स एव च णिशब्द इहानुवर्त्तते । एवञ्च यस्मिञ्जन्तादनेन परस्मैपदं विधीयते प्रत्यासत्त्या प्रतियोगित्वमपि तस्यैव। तेन चुरादिण्यन्ताद्धेतुमत्तौ भवत्येव परस्मैपदम् । चेतयमानम्प्रयोजयति चेतयतीति यथा । न पादम्याङ् । निषेधस्य प्राप्तिपूर्वकत्वादेभ्यः प्राप्तिरुपपादिता पिबतिर्निगरणार्थ इत्यादिना मूले तेषु यदिदम् धातुस्सकर्मक एव तदाऽणावकेत्यस्य न प्राप्तिरितीह तदुपादानं व्यर्थं स्यादित्याशयेनाह । दमिरकर्मकोऽपीति । वसधातुः प्रकृतसूत्रे भ्वादिरेव गृह्यतेऽत्र प्रमाणमाह । लुग्विकरणेति । धेट्धातोर्निगरणार्थत्वात्प्राप्तस्यपरस्मैपदन्निवर्त्तयितुमिहोपसंख्याने शेषादिति प्राप्तस्यापि निषेधे प्राप्ते आह । अनन्तरस्येतीति । योगद्वयस्येति । पादम्यादिभ्य योगद्वयस्यैव प्राप्तेरिति द्वयपदोपादानम् । समीचि इत्यत्र प्रथमा द्विवचने वा छन्दसीति पूर्वसवर्णदीर्घः । अनन्तरस्येति न्यायस्येहाश्रयणे सानन्तु भिक्षावासयतीति हेतुमति चेति सूत्रस्थभाष्यप्रयोग एव ॥

इति परस्मैपदप्रक्रियाविवरणम् ।

सार्वधातुके यक् । अनुवर्त्तत इति । तच्च सौत्रस्य सार्वधातुक इत्यस्य विशेषणम् । भावकर्मवाचिनीत्यस्य भावकर्मबोधक इत्यर्थः । तेन भावे यत्र लकारस्तत्र सार्वधातुकस्य धातुवाच्यभावनानुवादकत्वेऽपि न क्षतिः। भावो भावनेत्यत्र भूधातुरुत्पत्त्यनुकूलव्यापारवाचकस्तस्माद्धेतुमत्यन्ता-

SGDF
Sri Gargeshwari Digital Foundation

दच् प्रत्ययः । अत एव भावनाशब्दस्योत्पादनाशब्दपर्यायवाचकता सङ्गच्छते । ननु फलशब्दस्योत्पत्त्याश्रयबोधकतया द्रव्यादिषु सत्तया स्थीयत इत्यत्र स्थितेरुत्पत्त्यभावादनुपपत्तिरत आह । फलत्वञ्चेति । कर्तृप्रत्ययसमभिव्याहार इति फलव्यापारयोः कर्मणि प्रत्यये विशेषणविशेष्यभावव्यत्यासेऽपि फलत्वासम्भवव्युदासाय । तद्धात्वर्थविशेषणत्वे सतीति । तद्धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारताश्रयत्वे सतीत्यर्थः । विशेष्यता च न मुख्यविशेष्यतैव । किन्तु प्रकारत्वावच्छिन्नविशेष्यतापि। अत एव गत्याद्यर्थकधातुप्रकृतिकणिजन्तस्थले संयोगस्य फलत्वमुपपद्यते। तद्धात्वर्थत्वञ्च तद्धातुवाच्यत्वम् । वाच्यतावच्छेदकञ्च फूत्कारत्वादिकमेव । चेतनाचेतनेति । तेन गम्यते ग्रामो रथेनेत्यस्योपपत्तिः । अत एव । क्रियाया धातुवाच्यत्वादेव । कृञ इति । व्यापारार्थककृञाविवरणविवियमाणयोः समानार्थत्वस्य भूवादिसूत्रस्थभाष्ये कथं ज्ञायते क्रियावचनाः पचादयः यदेतेषाङ्करोतिना सामानाधिकरण्यमित्यनेन स्पष्टमदर्शनात् । क्रियावचना इत्यत्र क्रियात्वेन रूपेण क्रियायाः प्रवेशस्तच्च क्रियात्वङ्किमित्याकाङ्क्षायामाह । क्रियात्वमिति । धातुवाच्यत्वसमानाधिकरण इत्युपात्तन्न तु धातुवाच्यतावच्छेदकमिति । क्रियात्वरूपसामान्यधर्मस्य वाच्यतानवच्छेदकत्वात् । अत एव पचति चैत्र इति वाक्यजन्यशाब्दबोधोत्तरम्फूत्कारवान्न वेति संशयानुत्पत्तिः सङ्गच्छते । यदि क्रियात्वरूपसामान्यधर्म एव वाच्यतावच्छेदकः स्यान्न तु फूत्कारत्वादिविशेषधर्मस्तदा सामान्यधर्मावच्छिन्नप्रकारनिश्चयस्य विशेषधर्मावच्छिन्नाभावकोटिकसंशयविरोधिता न स्यात् । न चैवं फूत्कारत्वादिविशेषधर्मावच्छिन्नप्रकारकशाब्दबोधे जाते सामान्यधर्मावच्छिन्नाभावकोटिकः संशयः स्यादिति वाच्यम् । विशेषधर्मावच्छिन्नप्रकारकनिश्चयोत्तरं सामान्यधर्मावच्छिन्नप्रकारकमानसस्यानुमितेर्वा जननात् । जातिविशेषः । शब्दत्वव्याप्य इति शेषः । धातुत्वेनेत्यत्र तृतीया प्रकृत्या-

SGDF
Sri Gargeshwari Digital Foundation

दित्वात् । ज्ञायमान इति शेषः । अन्वयश्चास्य सकलधात्वित्यत्र । गम-कत्वात्समासः । धातुत्वञ्च न शक्ततावच्छेदकन्तदजानतोऽपि शाब्दबो-धदर्शनात् । शक्ततावच्छेदिका च पचाद्यानुपूर्व्येव तदाह । तद्व्याप्येति । ना ना शक्तिकल्पना । शक्यतावच्छेदकभेदेन ना ना शक्तिकल्पना । अंशद्वयेति । फलव्यापाररूपांशद्वयेत्यर्थः । अकर्मधातोः फलप्रतिपादक-त्वादेव स्तोकमेधत इत्यादौ फलसामानाधिकरण्यात्स्तोकादिपदेभ्यो द्वितीया । तथा क्लृप्तत्वात् । धातुवाच्यत्वस्य क्लृप्तत्वात् ॥ यत्र तु फल-मात्रं वाच्यम् । व्यापारांशस्य त्यागस्तत्र फल एव क्रियात्वव्यवहारोऽत एव धातुसंज्ञा तत्प्रयुक्तकार्यञ्च । भावनायाधातुवाच्यत्वाभिधानञ्च भा-वनाप्रत्ययबोध्येति मीमांसकमतनिरासाय । युष्मदादीति । आदिनाऽ-स्मच्छब्दसंग्रहः । न चैवं शेषपदेन युष्मदस्मद्भिन्नोपस्थितौ तत्सामा-नाधिकरण्याभावात्प्रथमोऽपि कथमिति वाच्यम् । शेषे प्रथम इत्यस्यो-पयुक्तसामानाधिकरण्याभाव इत्यर्थात् । वक्ष्यमाणया रीत्या शेषपदस्य त्यागाद्वा । पञ्चकन्धात्वर्थ इतिमताभिप्रायेणाह । तिङन्तर्थे इति । इ-त्येच सूत्रमिति । एवञ्च तेन यथाऽव्ययेभ्यो भवत्येवम्भावाख्यातस्थलेऽपि भवतु विशेषानुपलम्भादिति भावः । एका क्रियेति । अत्रैकत्वमेकबुद्धि-विषयत्वेन । तस्य । क्रियागतैकत्वस्य । क्रियायान्तस्यैकत्वस्यान्वयः प्रकृ-तिप्रत्ययौ सहार्थमिति न्यायादित्याशयेनाह । एवञ्च तस्येति । न केवलं भावाख्यातस्थल एव क्रियायामन्वयः । किन्तु यत्र कर्त्तरि कर्मणि वा तत्रापि क्रियायां सङ्ख्यान्वयः । द्वित्वादिकन्तु न स्वत इत्याह । द्वित्वा-दिकमिति । शायिका इति । धात्वर्थनिर्द्देशे ण्वुल् । उपमानगतबहु-त्वारोपेणेति । न चोपमानोपमेययोरभेदान्वयस्वीकारादारोपस्य नात्रो-पयोग इति वाच्यम् । सादृश्यमूलकस्याभेदस्य कल्पनामात्रन्न तु वास्त-वाभेद इत्याशयात् । नन्वेवङ्करणादिकारकगतसंख्याया अप्यारोपः कु-तो नेत्यत आह । लिङ्गवाच्येति । लिङ्गाख्यो भेदः । लिङ्गाख्यो विशेषः ।

SGDF
Sri Gargeshwari Digital Foundation

तत्र । आख्याते । आख्यातपदञ्च तिङन्तपरम् । तदाश्रयः । क्रियाश्रयः । शेषग्रहणन्त्यक्त्वेति । अयम्भावः । यदि युष्मदीत्यादिसूत्राणामुपपदनियमार्थत्वं युष्मदि मध्यम एवास्मदि उत्तम एवेति तदा शेषे मध्यमोत्तमयोर्व्यावृत्त्यर्थं शेषे प्रथम एवेति नियमोऽपि स्वीकार्यः स च शेषपदसत्त्व एवोपपद्यत इतिशेषग्रहणङ्कर्त्तव्यम् । यदि पुरुषनियमो युष्मद्येव मध्यमः । अस्मद्येवोत्तम इति तदा शेषग्रहणन्न कार्यमिति विचारे पुरुषनियमेऽपि शेषवचनं कार्यमन्यथा मध्यमोत्तमयोर्नियतत्वेऽपि प्रथमस्यानियतत्वादुस्मत्सामानाधिकरण्येऽपि प्राप्नोतीत्यभिधायभाष्यकृतोक्तम् । उपपदनियमे शेषग्रहणं शक्यमकर्तुम् । कथं युष्मदस्मदी नियते मध्यमोत्तमावनियतौ तौ शेषेऽपि प्राप्नुतः । ततो वक्ष्यामि प्रथम इति । तन्नियमार्थम्भविष्यति यत्र प्रथमश्चान्यश्च प्राप्नोति तत्र प्रथम एव भवतीति । एवं व्याख्यानेन भावे यत्र लकारस्तत्र मध्यमोत्तमौ प्राप्तावपि प्रथम इत्यनेन व्यावर्त्तिताविति प्रथमस्यैव श्रवणम्भवति । भवतामप्येवं विधनियम आवश्यक इत्याह । तवेति । भावाख्यातस्थले एकवचनमेवेति वदतस्तव मतेऽपि यत्रैकवचनञ्चान्यच्च प्राप्नोति तत्रैकवचनमेवेति नियमस्वीकार एवेष्टसिद्धिरन्यथा द्वित्वे द्विवचनमेव बहुत्वे बहुवचनमेवेति नियमेन द्विवचनबहुवचनयोरनियतत्वादेकत्वेप्येतौ स्याताम् । यदुक्तम्मूले तस्यौत्सर्गिकत्वेन संख्यानपेक्षणादिति तद्दूषयति । एकवचनमित्युत्सर्गेण त्विति । यथा कर्मण्येव द्वितीयेत्यादिरीत्या प्रत्ययनियमेऽव्ययेभ्यो विभक्तिसामान्याभावे प्रसक्ते सत्येकवचनमिति सूत्रमप्राप्तप्रापणार्थन्तच्चाविशेषात्सर्वासां सुप्विभक्तीनामेकवचनानि विधत्ते तथेहापि सर्वेषाम्पुरुषाणामेकवचनानि प्राप्नुवन्ति । पूर्वोक्तरीत्या एकवचनमित्यस्य नियमत्वे तु येषाम्प्रत्ययानामेकवचनञ्चान्यच्च प्राप्नोतीत्याकारकोक्तिबोध्यत्वन्तेष्वेकवचनमेवेति नियमे प्रथमपुरुषैकवचनमेव भवतीति भावः । स्पष्टञ्चेदमिति । शेषग्रहणपरित्यागेन प्रथम इत्यस्यो-

SGDF
Sri Gangeshwari Digital Foundation

क्रनियमार्थत्वं स्पष्टमित्यर्थः । स्यसिच्सीयुट् । अव्यभिचारादिति । यथा कारिष्यते हारिष्यत इत्यादौ परत्वाद्गुणे रपरत्वे च कृतेऽजन्तत्वस्य व्यभिचारोऽस्तीत्यप्राप्तप्रापणार्थमुपदेशग्रहणङ्क्रियते तथा न हनादिष्वस्तीति भावः । उपदेश इत्यस्याज्मात्रविशेषणत्वे सापेक्षत्वेनासमर्थत्वेन समासानुपपत्तिपरिहारायाह । अजितीति । विपरिणाम इति । स्यसिच्सीयुट्तासिष्वित्यस्यावृत्तिङ्कृत्वा एकत्र विभक्तिविपरिणाम इत्यर्थः । नत्वङ्गस्येत्यस्य षष्ठ्यन्तत्वङ्क्लृप्तमेवेति तस्यैवेडस्त्वित्यत आह । अङ्गस्य त्विति । तत्सन्नियोगशिष्टः । चिण्वद्भावसन्नियोगशिष्टः । भावकर्मणोरित्यस्य कुत्रान्वय इत्याकाङ्क्षायामाह । भावकर्मण इत्यादि । असम्भवमुपपादयति । आगमेति । अननुवृत्तय इति । तच्चिण्ग्रहणन्नकारसम्बद्धमभूदिति भावः । गुणानाञ्च परार्थत्वादिति न्यायेनोपदेश इत्येतदजन्तविशेषणं स्यादित्याशयेन शङ्कते । नन्विति । गुणः कृतात्मसंस्कार इतिन्यायमाश्रित्याह । उपदेश इति । आर्द्धधातुक इति । अच्पदमङ्गविशेषणमार्द्धधातुकमित्यपि सप्तम्यन्तन्तस्यैव विशेषणङ्गुणानामिति न्यायश्चानुगृहीत इति भावः । तत्रैव । अतो लोप इति सूत्रे इव । सीयुड्विशेषणत्वमपीति । तेन विधिलिङो व्यावृत्तिः । तथा च भूयेतेति सिद्धम् । न चात्र नित्यत्वाल्लिङः स लोप इति सलोपे वलादित्वन्नास्तीति ट्सन्नियोगशिष्टश्चिण्वद्भावो न प्राप्नोतीति सीयुट आर्द्धधातुक इति विशेषणं व्यर्थमिति वाच्यम् । वलादित्वस्यानपेक्षणात् । अत एव नित्यश्चायं वल्निमित्तो विघातीति भाष्य उक्तम् । न च विधिलिङः सार्वधातुकत्वाद्यक् स्यात्तस्मिंश्च सति तेन व्यवधानाद्भूधातोश्चिण्वद्भावो न भविष्यतीति वाच्यम् । यगन्तस्याप्युपदेशे योऽच् तदन्ताङ्गत्वानपायाद्दोषः स्यात् । आर्द्धधातुक इत्यस्य सत्वे ह्यार्द्धधातुकोपदेशे यदजन्तमित्यर्थो भवति । तपोऽनुतापे च । तपश्च्लेः स्थाने प्राप्तश्चिणनुतापे गम्ये यत्र निषिध्यते तत्र कर्मणि भावे वा लुङ् सम्भाव्यत इत्याशयेन

SGDF
Sri Gargeshwari Digital Foundation

मूले आदौ कर्मणि लुङुदाहृतः । अन्वतप्तेत्यत्र तप्धातुर्दुःखानुकूलव्यापारबोधकः । दुःखवत्त्वाच्चैत्रः कर्म । पापकर्तृ । पापनिष्ठो व्यापारस्स्वासधारणादिरूप इति फलव्यापारयोर्वैयधिकरण्यादयं सकर्मकः । पापदुःखयोर्जन्यजनकभावे पापनिष्ठात्सधारणमपि दुःखजनकम् । अत्र फलतावच्छेदकसम्बन्धोऽवच्छेदकता तेन सम्बन्धेन दुःखस्य चैत्रनिष्ठत्वात्तस्य कर्मत्वम् । चैत्रशब्दस्यात्मावच्छिन्नशरीरपरत्वेऽवच्छेदकतासम्बन्धः फलतावच्छेदकः । शरीरावच्छिन्नात्मपरत्वे तु समवायसम्बन्धः फलतावच्छेदकोबोध्यः । पापेन कर्त्रा दुःखित इत्यर्थः । यस्य दुखमुत्पन्नं तेनाहमन्वतप्सीति प्रयुक्ते दुःखितगतोऽनुतापो गम्यते । यत्र त्वन्यदीयकार्श्यरोदनादिविषयकज्ञानोत्तरमयमन्वतप्तेति दुःखितपुरुषादन्येन प्रयुज्यते तदा प्रयोक्तुरनुतापो गम्यते । अनुतापश्च दुःखविषयकज्ञानवत्वमेव । भावे वेति । यद्वेत्यादिना भावे लुङ् यत्र तत्रार्थमाहेत्यर्थः । पापेन पुंसेत्यत्र पापशब्दोऽर्श आद्यजन्तः । कर्त्तरि तृतीया । अत्र दुःखानुभवानुकूलव्यापार एव धात्वर्थः । धात्वर्थसङ्गृहीतकर्मकत्वेनायमकर्मकः । अशोचीत्यत्र शुच्धात्वर्थोऽपि स एव । अनुभवस्य फलत्वं समवायसम्बन्धावच्छिन्नाश्रयतया । तदनुकूलो व्यापारश्च मनःसंयोगादिरूप एव । अशोचीत्यत्रापि भावे लुङ् । अत्राप्यनुतापो यथा गम्यते तथाह । अविचार्येति । मूले जग्ले मम्ले इत्यत्र भावे लिट् । दायिता दातेत्यत्र कर्मणि लुट् । विकल्पेन चिण्वद्भावः । अदायि । कर्मणि लुङ् । चिण् । अग्लाहीत्यत्र भावे लुङ् । चिण् । घानितेत्यादौ कर्मणि प्रत्ययः । चिण्वद्भावः । अचिण्लोरित्यत्रपर्युदासः प्रसज्यप्रतिषेधो वा उभयथापि लक्ष्यसिद्धिरित्याशयेनाह । प्रसज्येत्यादि । अजादीनाञ्चिण्वत्कार्यातिदेशविधानेन स्यादीनाञ्चिण्त्वमतिदिश्यते तथा च पक्षद्वयसम्भव इति भावः । ननु चिण्वद्भावसन्नियोगशिष्टे इटि कृते ऋद्धनोः स्य इतीट् पुनः कुतो नेत्यत आह । वलीतिहीति । स एव । वधादेश एव । हन्तेरपि सीयुटा

SGDF
Sri Gargeshwari Digital Foundation

सम्बन्धेनेति । हन्तेः सीयुटि चिण्वदिति वाक्यकल्पनाऽत्र बोध्या ॥ पश्चात् । तादृशकल्पनोत्तरकाले । तेन । कल्पितेन तादृशवाक्येन । एतदेवाह। मूले विशेषविहितत्वादिति । सीयुट् त्विति । सौत्रसीयुट्शब्दस्त्वित्यर्थः । न्याय्य इति । अन्यथा द्वन्द्वस्यैवासाधुत्वं स्यादिति भावः । अत एव ॥ अपवादत्वाभावादेव । ननु भाष्यकाराभिमतविप्रतिषेधः पूर्वोक्तरीत्या बधभावस्यात्र नोपपद्यत इत्यत आह । चिण्वद्भाववाक्येऽपीति । अदर्शि । कर्मणि लुङ् । तस्य तादेशः । च्लेश्चिण् । अदर्शिषातामित्यत्र प्राप्तस्य क्सादेशस्य निषेधे एव सिचः सम्भव इत्याशयेनाह । न दृश इतीति । मूले कर्मणि ल इति । शमूधात्वर्थो नाशानुकूलो व्यापारः । तत्र फलतावच्छेदकसम्बन्धः प्रतियोगिता । ततो हेतुमति णिचि कृते नाशानुकूलव्यापाराश्रयस्य गतिबुद्धीतिसूत्रेण शमूधातोरकर्मकत्वात्कर्तुः कर्मत्वम् । मूले ह्रस्वविकल्पासिद्धेरिति । अनेन प्रथमस्य णेर्यो लोपस्तस्य स्थानिवद्भावे सति चिण्परणिपरत्वन्नास्तीति दर्शयति । णावित्याकृतिनिर्देशेन समाधानस्याभिप्रायमाह । भाष्यन्दुर्बलमिति । प्रकारान्तरेण । आकृतिनिर्देशस्वीकारेण । न पदान्तसूत्रे दीर्घग्रहणञ्च न कार्यमित्येव युक्तमिति तदाशयः । अभिमान इत्युक्तिबीजम्प्रकटयति । प्राकृतसूत्रस्येत्यादिना । प्राक् । घटादौ । मिद्भ्यः । शमादिभ्यः । तदनभिधानेति । यङ्लुकोऽनभिधानेत्यर्थः । इत्यंशस्येति । चिस्फुलोर्णिज्व्यवेतानां यङ्लोपे चोपसङ्ख्यानमिति हि प्रकृतसूत्रे वार्त्तिकम् । प्रत्याख्यानासम्भवः । आकृतिनिर्देशेनेति रीत्या प्रत्याख्यानासम्भवः । शंशमयतेर्णिचि लुङि चिणि अशंशमि । अशंशामि । शंशमम् । शंशाममिति यथा स्यादित्येवमर्थन्तस्यां शस्यावश्यकत्वात् । वचनारम्भ इति । तव मत इति शेषः । एवञ्च भाष्यकृतो अभिमानकल्पनापेक्षया मदुक्तव्याख्यानमेव युक्तमिति भावः । इत्यर्थ इति । प्राचीनसम्मतैषा व्याख्या-स्पष्टमित्यन्ता । स्वमतमाह । भाष्यरीत्या त्विति । अकर्मकत्वादिति ।

SGDF Sri Gargeshwari Digital Foundation

अहमाकारादिवृत्तेरनुत्पत्तेरनुकूलव्यापारस्य प्रकृते धात्वर्थत्वे तादृशनिवृत्त्यर्थव्यापारस्य चैकनिष्ठत्वेनाकर्मकत्वादित्यर्थः । भाष्यस्वरसादिति । एवञ्च विभाषा चिण्णमुलोरित्यस्य व्यवस्थितविभाषात्वं सप्रमाणमेवेति ध्वनितम् । विभाषानेतीति । एवञ्च नुमो नित्यत्वमर्थादेव लभ्यते । सूत्रविषयाणाम् । दुहियाचिप्रच्छीत्यादिना भाष्ये पठितानाम् ॥ स्पष्टञ्चेति । प्रधानकर्मणीत्यारभ्य यदुक्तन्तत्सर्वमेवमेव स्पष्टमभिहितमित्यर्थः । नन्वेवन्दुह्यते पयो गोपेनेति न स्यात्पयसो मुख्यकर्मत्वादत आह । एतदप्यनेकेति । गवा दोग्धव्यम्पय इति । अत्र गोः करणत्वविवक्षा द्रष्टव्या । सपर इति । सह परेण गतिबुद्धीतिसूत्रेण । तत्र गुणकर्मशब्देन प्रयोज्यकर्म विवक्षितम् । अपर आहेत्यादिना ण्यन्ते कर्तुश्च कर्मण इत्यभिधानेन तदेकवाक्यत्वात् । ध्रुवचेष्टितयुक्तिषु । ध्रुवयुक्तिषु । अकर्मकेषु चेष्टितयुक्तिषु । गत्यर्थेषु । पूर्वाचार्यप्रसिद्धयाद्ध्रुवयुक्तयोऽकर्मका उच्यन्त इति कैयटः ।

इति भावकर्मप्रक्रियाविवरणम् ।

तत्स्कारकेति । करणादिकारकेत्यर्थः । अत एव तेषाङ्कर्तृत्वोपपत्तिः । फलसमानाधिकरणेति । एवञ्च कर्तृसंज्ञायाः कर्मसंज्ञा बाधकत्वेनैतच्छास्त्रीयकर्मसंज्ञकार्थानन्वय्यर्थकत्वसत्त्वेनाकर्मकत्वम् । द्विकर्मकस्थले त्वेकस्य कर्मणः कर्तृत्वेऽप्यपरस्य कर्मणः सत्त्वान्नै तादृशमकर्मकत्वम् । कर्मवत्कर्मणा तुल्याक्रियः । तत्स्था क्रियाकर्मस्थक्रिया । अत्र क्रियाशब्दः फलपरः । बहुव्रीहिरिति । तुल्या क्रिया यस्मिन्निति विग्रहः । भेदारोपेणेति । सादृश्यस्य भेदघटितत्वमताभिप्रायेणेदम् । गोतोणिदिति वद्धतिनिर्देशाभावेऽपि लाभो भविष्यतीति शंकायामाह । कर्मसंज्ञक इति । तयोः । यगात्मने पदयोः । ननु भावे यत्र पच्यते ओदनेन भिन्नव्यङ्कुसूलेनेति प्रयोगस्तत्र ओदनादिपदाद्द्वितीयाया आपादानमसङ्गतमतिदिश्यमानकार्याणामुत्पत्तिदे-

SGDF
Sri Gangeshwari Digital Foundation

शएव देश इति सिद्धान्तात् द्वितीयायास्तृतीयापेक्षया पूर्वत्वादित्याशङ्कते। न चेति। न शङ्कितमिति । एकस्मिन्नेव पुत्रे ज्येष्ठत्वातिदेशेऽपि कनिष्ठत्वव्यवहारवद्भावे लकारो भविष्यतीति भावः। केचिन्मुख्याः। कर्तुर्लकारवाच्यत्वमुपपादयति ॥ तत्र तस्य विधानादिति। कर्त्तरि लकारस्य विधानादित्यर्थः। द्विलकारकादित्यस्य द्वौ लकारौ यस्मिन्नित्यर्थः। अन्यपदार्थजिज्ञासायामाह ॥ सूत्रमिति॥ लुप्तषष्ठ्यन्तलकारसहितं लिङ्गशिष्यङिति सूत्रमित्यर्थः॥ निर्द्देशः । ङ्किङीति निर्द्देशो वाऽन्यपदार्थः। इदमिति। मूलोक्तकृत्यस्योपलक्षणम् । एतत्फलमाह । कर्तरीत्यादिना । भिन्दानाभेदवन्तः । भेदो द्विधाभवनम् । क्तप्रत्ययविषये विशेषमाह । कोऽत्रेति । भवत्येवेति । कर्मत्वं यस्योत्पन्नौ निमित्तन्तस्यातिदिष्टकर्मत्वेन प्रसक्तिर्वाच्या गत्यर्थाकर्मकेति क्तस्त्वतिदेशात्पूर्वमपि प्राप्नोतीति न तस्य बाध इति भावः। अत एव। क्तविशेषस्य ग्रहणादेव। लकारवाच्यः कर्त्ता कर्मवदित्यतिदेशान्निष्ठेति सूत्र विहितः क्तप्रत्ययो न भवतीत्युक्तन्तस्य फलमाह । तेनेति । परशुभिन्नः कुसूल इत्यादाविति। परशुना भिन्न इति करणतृतीयान्तस्य गत्यर्थेति सूत्रविहितक्तान्तेन सह समासः साधनङ्कृतेति । यद्यत्रातिदिष्टकर्मत्वमादाय निष्ठेतिसूत्रविहितः कर्मणि क्तः स्यात्तदा तृतीयान्तस्य पूर्वपदङ्कर्मवाचकक्तान्ते उत्तरपदे प्रकृतिस्वरं स्यादित्यर्थकं यत्तृतीया कर्मणीतिसूत्रन्तत्प्रवर्त्तेत। यत्वत्र कैयटेन भिद्यते कुसूल इत्यत्रातिदिष्टकर्मत्वमादाय द्वितीया कुसूलपदान्न भवतीत्युक्तन्तत्तु न युक्तङ्कर्मत्वातिदेशेऽप्यनभिहितत्वाभावेन द्वितीयाया अप्राप्तेः । अनभिहितत्वविशिष्टकर्मत्वस्याप्यतिदेशस्तु वक्तुमशक्यः । सामान्यस्यातिदेशेऽपि विशेषानतिदेशात्। एतेन । लकारवाच्यकर्तुरेव कर्मत्वातिदेशेन । कर्मण्येवेति। पच्यते ओदनः स्वयमेवेत्यत्र मुख्ये कर्मण्येवास्तु । अपास्तमिति । कर्त्तरि प्रत्ययो यत्र तत्रैवातिदेश इति भवदुक्तशङ्कावसराभावादपास्तमित्यर्थः। क्तोदनामिति ॥ तथात्वे इष्टापत्तिस्तु कर्त्तुमशक्या परशुभिन्नः कुसूल इ-

SGDF
Sri Gargeshwari Digital Foundation

त्ति प्रयोगे तृतीया कर्मणीति पूर्व पदप्रकृति स्वरापत्तेः । अतिदेशविधायकसूत्राभावे दूषणान्तरमाह। निवृत्तेति । नमते दण्डः स्वयमेवेत्यत्र चेत्कर्मणि प्रत्ययस्तदा दूषणान्तरमाह ।नमत इत्यादिना । नन्वेवं स्वयमेवेत्यस्य वैयर्थ्यात्प्रयोग एव न स्यादत आह ॥ क्वचिदिति । न च लिङ्याशिष्यङित्यत्र लिशब्दात्पूर्वं लकारप्रश्लेषे तस्य श्रवणापत्तिरितिवाच्यम् ॥ संहितापाठे व्यत्ययो बहुलं ल्लिङ्याशिषीत्यत्रैव हलो यमां यमीत्यनेन लोपात् ॥ राध्यत्योदन इत्यादौ कर्मवद्भावातिप्रसङ्गं वारयति । प्रत्यासत्तेति ॥ साध्वसिरित्यत्र कर्मणेत्यस्याभावेऽपि कर्मवद्भावस्य नापत्तिरित्याशंकते ॥ ननु करणत्वेति । लक्ष्यत इति ॥ एवञ्च लक्ष्यमाणार्थस्य शाब्दबोधविषयता सिध्यर्थङ्कर्मणेत्यावश्यकमिति भावः । कर्तृस्थेत्येव व्यवहार इति। एतत्त्वभ्प्राग.भिहितम् ॥ ज्ञानेच्छावद्यत्नस्यापि कर्तृस्यत्वात् क्रियते घट इति नैयायिकमते करोतेर्यत्नार्थकत्वेन सिद्धेरदित्याह । करोतिरुत्पादनार्थ इत्यादिना मूले । ननु केवलयत्नमात्रस्य कृञवाच्यत्वन्न वदामः किन्तु इत्यनुकूलयत्नस्येति शङ्कां वारयति । अनापत्तेरिति बीजे तादृशयत्नाभावादनापत्तेरित्यर्थः । न च करोतेरुत्पत्त्यनुकूलव्यापारसामान्यर्थकत्वे कृतिशब्दाद्यत्नातिरिक्तव्यापारस्यापि बोधापत्तिरिति वाच्यम् । तस्य क्तिजन्ततया यत्नमात्रे रूढिस्वीकारात् । ननु पच्यते ओदन इत्यत्र यथा कर्मस्था क्रिया विक्लित्तिरूपा सैवावस्था भेदेन कल्पितभेदवती व्यापारस्य त्यागेन कर्तृस्था सम्पन्नेति तामादाय कर्तृस्थक्रियत्वाद्भवति कर्मवद्भावस्तथा नान्योऽन्यं स्पृशत इत्यत्रस्ति एकस्य चैत्रस्य यत्क्रियामदाय कर्मत्वन्तत्क्रियामादाय न कर्तृत्वमिति कर्मवद्भावस्य न प्राप्तिरिति कथमेतत्सकर्मकाणामित्यस्योदाहरणमत आह । अयम्भाव इति ॥ यैवेति । यज्जातीयैवेत्यर्थः । साजात्याद्भेदापरामर्शेन यैवेत्युक्तिः । प्रकृते तुल्यत्वमवस्थाभेदेन न किन्तु स्वरूपत एवेत्याह। आश्रयभेदादिति। कर्तृस्थः स्पर्श इति । तथा च कथङ्कर्मवद्भावप्राप्तिरिति भावः । मूलेऽजा

SGDF
Sri Gargeshwari Digital Foundation

ग्रामन्नयति इति । अत्र नयतेर्द्विकर्मकतया अजारूपकर्मणः कर्तृत्वविवक्षायाङ्कर्मस्थया क्रियया तुल्यक्रियत्वसत्वात् प्राप्तः कर्मवद्भावो ग्रामरूपकर्मणा सकर्मकत्वान्निषिध्यत इति भावः । इदन्तु चिन्त्यमिति । अजायाः कर्मत्वं संयोगानुकूलव्यापारमादायोपपादनीयं स एवेदानीं कर्तृस्थो यद्यपि भवतीति कर्मवद्भावस्य प्राप्तिर्वाच्या सा न युज्यते । तद्व्यापारकृतविशेषस्य तत्रादर्शनात् । कर्त्रन्तरभेदमादाय विशेषो वाच्यस्सोऽपि नेत्याह । नेतृव्यापारेणेति । तथेति । कर्मणि विशेषसम्पादकः । गम्यर्थस्यापीति । तथा च गच्छति ग्राम इत्यत्र कर्मवद्भावापत्तिः । अत एव ॥ यत्र क्रियाकृतस्य विशेषस्य सुप्रसिद्धिस्तदेवोदाहरणं युक्तमित्यभिप्रायादेव इत्येवेति ॥एतज्जातीयकमेव ॥एतेन प्रकृतवार्त्तिकोदाहरणावसरे भाष्यकृता अन्योऽन्यमाश्लिष्यतः । अन्योऽन्यं संस्पृशतः ॥ अन्योऽन्यं गृह्णीतः इत्येवमुदाहरणत्रयोपादानेन इत्येवेत्युपादानमसङ्गतमित्यपास्तम् दुहिपच्योर्बहुलम् । सकर्मकयोर्दुहिपच्योः कर्त्ता बहुलं कर्मवद्भवतीति वाच्यमित्यर्थः । दुग्धे गौः पयः स्वयमेव । अत्र गोः कर्मणः कर्तृत्वविवक्षायान्द्रवद्द्रव्यवृत्तिविभागानुकूलव्यापारमात्रं धात्वर्थः । गोः कर्तृत्वेऽपि पयसः कर्मणः सत्त्वान्निषेधे प्राप्ते वचनम् । पचधातूदाहरणम्भाष्ये उदुम्बरः फलम्पच्यत इति प्रदर्शितम् । द्विकर्मकत्वे तूदाहरणमुदुम्बरम्फलङ्कालः पचतीति तत्रोदुम्बरस्य कर्मणः कर्तृत्वविवक्षायामुदुम्बरः फलम्पच्यत इति प्रयोगः ॥ अत्र द्विकर्मकत्वमुपपादयति । द्व्यर्थत्वादित्यादिना । तण्डुलानोदनम्पचतीत्यत्र विक्लित्त्यनुकूलो निष्पत्त्यनुकूलश्च व्यापारो धात्वर्थः । स च व्यापारो वह्निभूतदेवदत्तादिनिष्ठः । तद्वत् प्रकृते विभागानुकूलव्यापारानुकूलो विलक्षणरसोत्पत्त्यनुकूलश्च व्यापारश्च धात्वर्थः । स च व्यापारः कालनिष्ठः । यदा सौकर्यविवक्षया कालनिष्ठव्यापारस्य त्यागे उदुम्बरनिष्ठव्यापारस्य तादृशरसोत्पत्त्यनुकूलव्यापारानुकूलत्वविवक्षा तदा कर्मण उदुम्बरस्य कर्तृत्वं विवक्षाभेदेन वृक्षनिष्ठव्यापारमादय समानक्रि-

SGDF
Sri Gargeshwari Digital Foundation

यंत्वादादौ कर्मवदित्यस्य प्राप्तिः । विभागः फलावयवनिष्ठस्तन्निष्ठा कार्यता स्वाश्रयसमवेतत्वसम्बन्धवच्छिन्ना बोध्या । यद्वेति । अयम्भावः । द्विकर्मकत्वावस्थायां रसविशेषोत्पत्त्यनुकूलव्यापारानुकूलो यः कालनिष्ठो व्यापारः स एव धात्वर्थः । सौकर्यविवक्षातः पूर्वं वृक्षे पाकश्च तादृशरसोत्पत्त्यनुकूलव्यापार एवेति । अनिष्टत्वादिति । बहुलवचनङ्किमर्थम् । परस्मैपदार्थंबहुवचनम् । यद्येवन्नार्थो बहुलवचनेन । न हि परस्मैपदमिष्यत इति भाष्यकारोक्तिरत्र प्रमाणम् । एवञ्च बहुलग्रहणम्प्रत्याख्यातमेवेति प्रतिभाति । परन्त्वेवम्बोध्यम् । प्रकृतवार्त्तिके यद्यपि न बहुलग्रहणस्य प्रयोजनन्तथापि करणेन तुल्यक्रिय इति वचने भाष्यकारपठिते उपयुज्यते । परिवारयति कण्टकैर्वृक्षम् । परिवारयन्ते कण्टका वृक्षमिति । अत्र बहुलग्रहणात्साध्वसिम्छिनत्तीत्यादौ न भवतीति कैयटः । अत एव तस्यात्रानिष्टत्वादिति लेखनेनैतद्वार्त्तिके बहुलवचनस्य प्रयोजनाभावः सूचितः । मूले चिण् तु विकल्पेनेष्यत इति । तत्र नेयमपूर्वेष्टिः किन्तु दुहश्चेतिसूत्रसिद्धार्थकथनमेतदिति बोध्यम् । तदेवाह । दुह इति । इत्येतदर्थ इति । गौः पयो दुग्ध इत्यस्य गौः पयस्त्यजतीत्यर्थ इत्यर्थः । उचितमिति । करोतेरजन्तत्वादिति भावः । दुहश्चेत्यस्य कर्मकर्त्तर्यैव विकल्पेन चिण्विधायकत्वात्तत्रास्मादेव सूत्रात्कर्मकर्त्तरीत्यनुवर्त्तत इति मूलाशय इति कश्चित् । स चेति । स्रजेः श्रद्धोपपन्नः कर्त्ता चेत्यर्थः । विध्यर्थमिति । इदं वार्त्तिकमिति शेषः । युज्धातुविषये कर्मणः कर्तृत्वन्दर्शयति । योग इति । युनक्तीत्यस्य सम्बध्नातीत्यर्थः । सम्बन्धश्च योगप्रतियोगिको ब्रह्मचार्यनुयोगिकः । योगश्च शमदमादिसम्पत्तिरूपः । प्रथमकक्ष्यायामाश्रयतारूपो यः सम्बन्धस्तद्वत्त्वाद्ब्रह्मचारिणः कर्मत्वम् । ततो द्वितीयकक्ष्यायां योऽर्थस्तमाह । तत इति । यत्तु द्वितीयकक्ष्यायां युजेः सम्बन्धमात्रमर्थः । योगमिति द्वितीया तु प्रतिशब्दाध्याहारेण तद्योगेऽभितःपरित इत्यनेन । एवञ्चाकर्मकत्वात्कर्मवद्भा-

SGDF
Sri Gargeshwari Digital Foundation

वः कर्मवत्कर्मणेत्येव सिद्धः। प्रकृतवार्त्तिके युजिग्रहणन्तु श्यनुमात्रविधानार्थमिति। तन्न। सृजियुज्योः इयँस्त्विति वार्त्तिकव्याख्यानावसरे भाष्यकृता दुहिपच्योरिति वार्त्तिकात्सकर्मकयोरित्यस्यानुवृत्तिः सृजियुज्योः सकर्मकयोः कर्त्ता बहुलङ्कर्मवद्भवतीत्युक्त्या दर्शिता तद्विरोधात्। युज्यत इत्यत्र श्यन्यको विशेषश्च स्वरविशेषसम्पादकत्वेन द्रष्टव्यः। श्यनि नित्वात्प्रकृतेराद्युदात्तत्वम्भवति। यकि तु तङो लसार्वधातुकानुदात्तत्वे प्रत्ययस्वरेण यक एवोदात्तत्वं स्यात्। भूषाकर्मकिरादीनाम्। कर्मवत्कर्मणेतिसूत्रस्थं वार्त्तिकम्। चिण्वदिड्भावायेति। चेनतस्य सङ्ग्रहः। अवकिरतीति। ताड़यतीत्यर्थः। आद्ययोः। कृगअनयोः। कर्मस्थक्रियतयेति। अन्येषामिति। आद्यस्योपादेयत्वादिप्रकारकज्ञानानुकूलव्यापारो द्वितीयस्य धारणानुकूलव्यापारोऽर्थः। एतयोः कर्मणि क्रियाकृतविशेषानुपलम्भः स्पष्टः। तृतीयस्य ज्ञानेच्छानुकूलव्यापारोऽर्थः। अत्रेच्छारूपफलविशेषणज्ञानविषयस्यापीच्छाकर्मत्वम्। ग्रामञ्जिगमिषतीतिवत्। कर्मस्थक्रियकत्वाभावोऽत्रापि पूर्ववत्। आपृच्छते चैत्र इत्यादि। मूले चिकीर्षते कट इति। अत्र सन्प्रत्ययार्थेच्छाविशेषणकरोत्यर्थनिरूपितकर्मत्वाश्रये उत्पत्तिरूपफलकृतस्य विशेषस्य दर्शनात्सन्नन्तेऽपि कर्मस्थक्रियकत्वादात्मनेपदव्यतिरिक्तनिषेधार्थं यत्र तु जिज्ञासते घट इति प्रयोगस्तत्रात्मनेपदाप्राप्ते विध्यर्थञ्च सन्ग्रहणमिति बोध्यम्। न रुधः। अवारुद्ध गौः। निर्गमप्रतिबन्धपूर्वकदेशविशेषाधिकरणचिरस्थित्यनुकूलव्यापारो रुधधात्वर्थः। चिरस्थितेः कर्मनिष्ठत्वादयं कर्मस्थक्रियकः। तपस्तपः कर्मकस्यैव। क्रियाभेदादिति। यदा तपसः कर्तृत्वविवक्षा तदा या दुःखोत्पत्त्यनुकूलव्यापाररूपा क्रिया ततस्तपसः कर्मत्वे या अर्जनरूपा क्रिया साभिन्नास्तीति कर्मस्थया क्रियया तुल्यक्रियत्वाभावादित्यर्थः। भाष्ये त्विति। न दुहेतिसूत्रे भाष्यकृतस्त्वित्यर्थः। एवकारसामर्थ्यात्। एवकारबलात्। नियमद्वयलाभाय योगविभागो द-

SGDF
Sri Gargeshwari Digital Foundation

र्शितः । ननु वृत्युक्तरित्या क्रियातेदाद्विध्यर्थमेवैतत्सूत्रम्भविष्यतीति क-थन्नियमपरत्वेनास्य विवरणमिति चेन्न । कल्पाद्वयेऽपि कर्मकर्तृवृत्तिक्रि-यायास्तुल्यत्वात् । तथाहि । तपति तापसन्तप इति प्रथमा कल्पा । अत्र तपतिरन्तर्भावितण्यर्थः । शरीरसन्तापानुकूलव्यापारानुकूलव्यापारो धात्वर्थः । शरीरसन्तापानुकूलो व्यापारश्च शरीरसन्तापस्वीकारस्तदा श्र-यतया तापसस्य कर्मत्वम् ॥ तपःपदार्थश्च शरीरसन्ताप एव ॥ तत्र ता-पसवृत्तितादृशस्वीकाररूपफलानुकूलो व्यापारश्च स्वस्वरूपेणावस्थानमेव॥ तप्यते तपस्तापस इति द्वितीया कल्पा । अत्र ण्यर्थस्य त्यागेन शरीर-सन्तापानुकूलव्यापार एव तपेरर्थः ॥ तदाश्रयतया तापसस्य कर्तृत्व-मिति । स्तोकम्पचतीत्यत्रेव तपः पदार्थस्य प्रकृतधात्वर्थघटकशरीरस-न्तापेऽभेदान्वयात्तपसः कर्मत्वम् । एवञ्च प्रथमकल्पायाङ्कर्मस्थाया क्रि-या तत्तुल्या क्रिया तापसस्य कर्तृत्वावस्थायां वर्त्तत एवेत्यस्य कर्मव-द्भावस्य प्राप्तिरित्यस्य योगस्य नियमार्थत्वं युक्तमेव । सकर्मकत्वसाध-र्म्यात्सकर्मकसामान्यविषयको नियमो न त्वत्र कर्मणो भेदाभेदान्वय-विचार इति सकर्मकाणामित्यस्य प्रत्याख्यानं युक्तमेव । ततस्तपकर्मक-स्यैवेति द्वितीयो नियमः ॥ अभेदान्वयाभिप्रायेणैव भाष्ये किमिदन्तप इति प्रश्ने तपेरयमौणादिको ऽसकार इत्युत्तरितम् ॥ एतद्भाष्यैकवाक्यतया उणादीनामव्युत्पन्नत्वपक्षेऽप्ययमेवार्थस्तपःशब्दस्य ॥ न च तपस्तपःक-र्मकस्येत्युक्तन्नोपपद्यते क्रियाकर्मणोर्भेदस्य सुप्रसिद्धत्वादिति वाच्यम् ॥ एवं विधनिर्देशसामर्थ्यात्सामान्यविशेषभावेनैकस्या एव क्रियायाः क्रि-याकर्मभावसम्भवात् ॥ अमुमेवार्थन्दर्शयितुम्भाष्यकृतोक्तम् ॥ अथ कः प्रत्ययार्थः कः प्रकृत्यर्थः ॥ स एव सन्तापः ॥ कथम्पुनः स एव नाम प्रकृत्यर्थः स्यात्स एव च प्रत्ययार्थः सामान्यतपेरवयवतपिः कर्म भव-तीति । यदि तपसस्तपधात्वर्थकर्मत्वन्तापसस्य कर्तृत्वन्तदा तापसेन तपस्तप्यत इति प्रयोगोऽपि स्यात् तत्र प्रत्ययार्थप्रकृत्यर्थयोर्भेदाभावा-

SGDF
Sri Gargeshwari Digital Foundation

दनुपपत्तिरित्याशयेनाथ क इत्याद्युक्तिरिति ॥ स एवेत्यनेनोत्तरम् ॥ तपधात्वर्थ एव क्रियापदेन कर्मपदेन च गृह्यते इत्यर्थः ॥ तपधात्वर्थश्च स्नानविशेषजनकोपवासादिरूपस्ततः ॥ अवयवतपिः स एव विशेषः सन्तापपदव्यवहार्यः ॥ अत्र यथा विशेषसामान्ययोः कर्मक्रियाभावो दर्शितस्तथान्यत्राप्यस्तीति दृष्टान्ततया भाष्ये प्रदर्शितमेतान्योषानपुषत् गोपोषमश्वपोषम् । रैपोषमिति । सामान्यपुषेरवयवपुषिः कर्म भवति॥ अत्र पोषानिति भावघञन्तम् सामान्यन्तस्य विशेषसमर्पकानि गोपोषमित्यादीनि भावघञन्तान्येव बोध्यानि । ननु विशेषस्य सामान्यनिरूपितकर्मत्वेऽपि विशेषस्य सामान्यार्थेऽभेदेनैवान्वयो वाच्यस्तथा च कर्मणि लकारो न सम्भवति ॥ लः कर्मणीतिसूत्रघटकः कर्मशब्दो धात्वर्थाभेदसम्बन्धेनान्वयि कर्मबोधक एव भविष्यति कर्तृसाहचर्यादिति कथन्तापसेन तपस्तप्यत इति प्रयोग इति चेन्न । प्रकृतभाष्यग्रन्थस्य प्रामाण्येन सामान्यविशेषभावेन यस्यान्वयस्तादृशकर्मणोऽपि ग्रहणङ्कर्मपदेनेति स्वीकारात् । द्वितीयनियमस्य प्रयोजनम्भाष्यकृतोत्तपतीत्यादिनोक्तन्तत्रापि तपिरन्तर्भावितण्यर्थ एव सुवर्णं सुवर्णकारमुत्तपयतीत्यर्थ एवेत्यर्थः । एतदेव विशदयति ॥ अयम्भाव इत्यादिना भाष्ये उक्तमित्यन्तेन । उक्तवीजमिति ॥ चिण्वदित्यत्र सप्तम्यन्ताद्वतिरिति प्रागुक्तन्तेन चिणि यत्कार्यन्तस्यातिदेशोऽयम् । चिण्नेत्यतिदेशो हि न चिणि कार्यमतः स्यादीनामत्र चिण्वदिड्भवत्येवेति भावः ॥ कर्मस्थक्रियत्वमस्येति ॥ तथा च कर्मवद्भावस्य विषयतासत्त्वात्तेनातिदेशेन यक्चिणोः प्राप्तिर्बोध्या ॥ भारद्वाजीयवार्त्तिके णीत्येवोपात्तन्न तु हेतुमण्णिरिति तेन णिङोऽपि ग्रहणमित्याशयेनोदाहृतम्मूले उत्पुच्छयते गौरिति ॥ आत्मनेपदाकर्मकाणामित्यस्यात्मनेपदविधौ योऽकर्मकस्तस्येत्यर्थस्तदभिप्रायेणोदाहृतम् विकुर्वते सैन्धवा इति ॥ तदभावपक्षे ॥ चिण्वद्भावाभावपक्षे॥ कुषिरजोः ॥ न दुहेत्यतो नेति यगिति च वर्त्तते । किन्तु श्यन्निति ।

SGDF
Sri Gargeshwari Digital Foundation

यत्र यकः प्राप्तिस्तत्र श्यन्परस्मैपदञ्चेत्यर्थः ॥ यकस्तु सार्वधातुक एव प्राप्तिरित्यनेन सार्वधातुक एव श्यन्विधीयते इति लभ्यते । एतेन लिटि लिङि च प्रवृत्तिर्नेति ध्वनितम् । चुकुषे पादः स्वयमेव । कोषिषीष्ट पादः स्वयमेव । ररञ्जे वस्त्रं स्वयमेव । रंक्षीष्ट वस्त्रं स्वयमेवेत्यत्र न श्यन् । यग्विषये श्यनः फलन्तु न्जित्यादिरिति स्वरस्य प्रवृत्तिरूपम् । अत्र ताच्छीलिके चानशि कतीह कुष्णानाः पादा इत्यत्र श्यन्न । लवाच्यकर्तुः कर्मत्वातिदेशविधानेनात्र कर्मत्वातिदेशाप्राप्त्या यग्विषयतायां अभावादित्यपि बोध्यम् । एवं श्यनि कुष्यन्ती जङ्घा । अत्र शाप्श्यनोरिति नित्यन्नुम् । यत्र यत्र स्वयमेवेति प्रयुज्यते तत्र स्वयमेवेत्यस्यात्मनेत्यर्थः । तत्रात्मनः करणत्वन्न तु कर्तृत्वमन्यथा कर्मण्येव लविधानं स्यात् ॥

इति कर्मकर्तृप्रक्रियाविवरणम् ।

अभिज्ञावचने लृट् । अभिज्ञा स्मृतिः । वचनशब्दः करणल्युडन्तः । उदाहरणे गोकुले वत्स्याम इति वाक्यार्थोऽभिजानासीत्यस्यार्थे कर्मत्वेन सम्बध्यते । तेनास्मिन्विषये पश्य मृगो धावतीत्यत्रेव गोकुलाधिकरणकास्मत्कर्तृकभूतानद्यतनवासकर्मकं त्वत्सम्बोध्यकं स्मरणमिति बोधः। इदञ्चेत्यमिति । इदशब्दोपादानेनाभिज्ञावचन इति सूत्रेऽभिज्ञायामित्येव वक्तव्ये यथा कथञ्चिदभिज्ञा यत्र प्रतीयते तत्राप्यस्य प्रवृत्तिरित्यस्य मानस्य सम्भवेऽपि भाष्ये तथा नोक्तमतः संस्कारजन्यतावच्छेदकजात्यवच्छिन्नवाचकोपपद एवास्य प्रवृत्तिरिति ध्वनितम् । वचनशब्दस्तु स्पष्टार्थ एव । यद्वनेऽभुञ्ज्महीत्यत्र यच्छब्दः स्मृतिविषयार्थस्य झटित्युद्बोधकसन्निहितत्वद्योतनाय । भूतानद्यतनवनाधिकरणकास्मत्कर्तृकभोजनकर्मकं स्मरणमिति बोधः । विभाषा साकाङ्क्षे । साकाङ्क्षपदस्य प्रायेणाकाङ्क्षाविषये एव प्रसिद्धिदर्शनादाह । विद्यमानेति । तेन निरुपक-

SGDF
Sri Gargeshwari Digital Foundation

त्वविषयत्वान्यतरसम्बन्धेनाकाङ्क्षावैशिष्ट्यं विशेषणमत्रेति बोधितम्। विवक्षितत्वादिति। ज्ञापकत्वेन ज्ञाने कँस्यायमर्थो ज्ञापकः। ज्ञाप्योऽयमिति ज्ञाने किमस्य ज्ञापकमित्याकाङ्क्षाया उत्थिताया दर्शनात्प्रकृतेति रूपकत्वविषयत्वान्यतरसम्बन्धेनाकाङ्क्षावैशिष्ट्यमुभयत्रास्तीत्युभयत्राप्यस्य प्रवृत्तिः। ज्ञाप्यज्ञापकभावसम्बन्धेन वाक्यार्थविशिष्टवाक्यार्थस्य कर्मत्वमभिप्रायाम्बोध्यम्। परोक्षे लिट्। इदं सूत्रम्प्राग्व्याख्यातमप्यत्यन्तापह्नव इत्यस्यापरोक्षविषय एव प्रवृत्तिं बोधयितुम्पुनरत्र व्याख्यातम् परोक्षे तेनैव सिद्धेः। भूतानद्यतनत्वन्तु इहाप्यपेक्षितमेव। अत्राधितपरोक्तेति एतेन यत्र चैत्रकर्तृकवङ्गगमनाभावेऽपि तदीयवङ्गगमनभ्रान्त्या वङ्गेष्वत्रास्तीरिति प्रश्नस्तत्र नात्यन्तापह्नव इत्यर्थादुक्तम्भवति। अयञ्चात्यन्तापह्नवः स्वरूपतः सन्नेव लिट्प्रयोजको न त्वस्य शाब्दबोधविषयत्वापेक्षा। प्रश्ने चासन्नकाले। प्रश्नशब्दे कर्मणि नङ्प्रत्ययस्तेन यादृशो वाक्यार्थः सम्पन्नस्तमाह। प्रश्नविषयीभूतेति। अत्राप्यासन्नकालत्वम्प्रयोगनियामकमेव न तु तस्य शाब्दबोधविषयत्वम्। आसन्नकाल इत्यत्र बहुव्रीहिः। मूले लिड्विषय इत्यनेन भूत इत्यादीनामिहानुवृत्तिर्ध्वनिता। लट् स्मे। अस्यापि सूत्रस्य लिड्विषययेव प्रवृत्तिः। अत एवापवादत्वम्। अपरोक्षे च। ननु लट् स्म इति सूत्रे परोक्षशब्दस्य सम्बन्धो न कार्यः एवञ्चोभयत्र स्मशब्दयोगे लटः सिद्धाविदं सूत्रन्त्याज्यमिति चेन्न। तद्वदनद्यतन इत्यस्यापि निवृत्तिशङ्का मा भूदित्यर्थन्तत्वात्। ननौ पृष्टप्रतिवचने। मूले निवृत्तमिति। लट् स्म इति सूत्रभाष्ये न पुराभूतमात्र इत्युक्तिरत्र प्रमाणम्। ननु क्रियानिवृत्तावपि केन चिल्लिङ्गेन क्रियाया अनुमानेन ननु कुर्वन्तम्पश्य ननु कुर्वाणम्पश्येति प्रयोगो दृश्यते तत्र शत्राद्यादेशो न प्राप्नोति। वर्तमाने विहितलट एव स्थाने तयोर्विधानादत आह। यदा प्रमादीति। ननु तेनैव प्रकारेण लटः सिद्धावस्य सूत्रस्य वैयर्थ्यमत आह। सूत्रन्त्विति। अत्र

SGDF
Sri Gargeshwari Digital Foundation

नन्विति समुदायो वितर्के। नन्वोर्विभाषा। अत्र ननू शब्दौ पर्यायौ। प्रत्येकमनयोर्निमित्तत्वमित्याशयेनाह। अनयोरिति। अनद्यतने त्विति। अनद्यतनत्वविवक्षायान्त्वित्यर्थः। क्रियागतनिश्चितत्वद्योतकौ ननू शब्दौ॥ पुरि लुङ् चास्मे॥ मूले मण्डूकप्लुत्यानुवर्त्तत इति॥ लुङिति। तस्य पुनरुपादानेन लुङिति सूत्रापेक्षयाऽस्य वैलक्षण्यम्बोधितमिति प्रकृतसूत्रेऽनद्यतन इत्यस्य सम्बन्धः॥ अत एव एतदभावेऽनद्यतनत्वमात्रविवक्षायां लङ् परोक्षत्वस्यापि विवक्षायान्तु लिङ् भवती। न तु लुङ्। अपवादस्य विषयतायाः सत्त्वात्॥ यावत्पुरा। निश्चयद्योतकौ। क्रियागतस्य विषयतया निश्चयविशिष्टत्वस्य द्योतकौ। एवञ्च यावद्भुङ्क्त इत्यत्र भुजधातोर्विषयतासम्बन्धेन निश्चयविशिष्टे भोजने लक्षणा। तया प्रत्यायितो निश्चयो यावच्छब्दसन्निधाने शाब्दबोधे भासते। लक्षणप्रतिपदोक्त परिभाषयैव सिद्धे निपातग्रहणन्तस्याः परिभाषाया अनित्यत्व एव ज्ञापकम्॥ इदं सूत्रं मण्डूकप्लुऽनद्यतन इत्यत्रानुवर्त्य वाक्यभेदेन व्याख्येयम्। तेन यावच्छ्वो भुङ्क्त इत्येवेति भाष्ये स्पष्टम्॥ मूले करणभूतयेति। एतेन पुरायास्यतीत्यत्र पुरीवाचकात्पूःशब्दात्तृतीयेति ध्वनितम्॥ विभाषा कदाकर्ह्योः॥ भविष्यतीति लडिति वर्त्तते॥ कदा कर्हि वा भुङ्क्ते। भोक्ष्यते भोक्ता वा। भविष्यत्वे विधीयमानोऽयं लट् यदाऽनद्यतनत्वविशिष्टेऽपि काले प्रवर्त्तते। एतदभावे भविष्यत्त्वमात्रविवक्षायां लृट्। सामानाधिकरण्यसम्बन्धेनानद्यतनत्वस्यापि यदा विविवक्षा तदा तु लुट्। ननु कर्हि भोक्ष्यत इत्यनुपपन्नमनद्यतने र्हिलन्यतरस्यामित्यनेनानद्यतने एवर्हिल्प्रत्यस्य विधानेन लुड्विषयताया एव सत्त्वात्। लादेशविषये वासरूपन्यायाभावेन वासरूपन्यायेनापि न स इति चेन्न। भूतमियं ब्राह्मणीतिवच्छक्यश्चात्तुदुपहन्तुमितिवच्च भविष्यत्वसामान्ये भोक्ष्यत इति पदं व्युत्पाद्य कर्हि शब्दयोगः कार्य इति कल्पनयाऽदोषात्। स्पष्टा चेयं रीतिर्भविष्यति गम्यादय इति सूत्रभाष्ये। तत्र

SGDF
Sri Gurgeshwari Digital Foundation

हि भविष्यतीत्यनद्यतने उपसङ्ख्यानम् । श्वो ग्रामं गमी । किम्पुनः कारणन्न सिध्यति । लृटायन्निर्देशः क्रियते । लृट्चानद्यतने लुटाबाध्यते । तेन लृट एव विषये प्रत्ययाः स्युः । लुटोविषये न स्युरित्याशङ्क्य न वा पश्चादस्य निमित्ताभावादनद्यतने हि तयोर्विधानमित्युत्तरितम् । भविष्यतीति सामान्येन निर्द्देशात्तावन्मात्रविवक्षायामयम्प्रत्ययो भविष्यति विशेषस्य विवक्षायान्तु नेत्याशयेन शङ्का ॥ वास्तवविशेषसत्त्वेऽपि तस्यादावविवक्षया सामान्यस्यैव विवक्षामाश्रित्य तदाश्रयो णिनिः अनद्यतनत्वस्तु विशेषः पश्चात् श्वःशब्दसन्निधाने प्रतीयते इत्युत्तराशयः ॥ व्यत्ययो बहुलमिति सूत्रस्थं श्वोऽग्नीनाधास्यमानेनेत्यादौ कालव्यत्ययपरमधाता अयष्टेति प्राप्त इतिभाष्यन्तु वाक्यसंस्कारपक्षाभिप्रायेण ॥ किं वृत्ते लिप्सायाम् ॥ अत्र सूत्रे यद्यपि किं वृत्तमिति सामान्येनैवोपात्तन्तथापि प्रयोगानुसारेण त्रयाणामेव ग्रहणमिति वृत्तिकाराशयः ॥ किंवृत्तमितिसामान्येनोपादानाद्यद्यत्किंशब्दनिष्पन्नन्तस्य सर्वस्य ग्रहणन्तेनकमित्यादीनाङ्कस्मै दास्यसीत्यादीनाञ्च सङ्ग्रह इति भाष्यसम्मतैव रीतिर्युक्ता तदाह ॥ रुद्रादिति ॥ लिप्सायामित्यस्य लिप्सायां वाच्यायामित्यर्थ इति भ्रमं वारयति ॥ उदाहरण इत्यादिना । ननु यत्र यथाकथञ्चिल्लिप्सागम्यते तत्राकिं वृत्तेऽप्युत्तरसूत्रेण चेल्लटतदाप्रकृतसूत्रे किं वृत्तग्रहणमनर्थकमतआह ॥ अत्र कि मिति ॥ सिद्धिरहितायामिति ॥ याचकस्य लिप्सायत्रास्ति दातुस्तुदानेच्छाभावादप्रवृत्तिस्तत्र किं वृत्तप्रयोग एव लडित्यर्थमितिउत्तरम् ॥ लोडर्थलक्षणे ॥ प्रैषविषयगोचारणरूपाक्रियायथालक्ष्यतेतथाह ॥ कृष्णभोजनमिति ॥ अन्यदीये क्षेत्रे गोचारणार्थम्प्रवृत्तङ्गोपम्प्रतिकृषण विषयकश्रद्धावतः क्षेत्रस्वामिनो वाक्यमिदम् ॥ लिङ् चोर्द्धमौहर्त्तिके दिक् शब्दइति । ऊर्द्ध्वशब्दस्यापि दिशि दर्शनादिति भावः ॥ अत्र लोडर्थलक्षणइत्यनुवर्त्तते ॥ उपाध्यायस्य स्वगृहात्सत्वे तत्र समागतङ्कालविलम्बेन ततः

SGDF
Sri Gangeshwari Digital Foundation

परावर्त्य स्वगृहम्प्रतिगन्तुं प्रवृत्तं शिष्यम्प्रतिगुरुपत्न्यादेरुक्तिरिहोदाहरणमित्याह ॥ मूले उपाध्यायश्चेदित्यादि ॥ स्वार्थे ष्यञिति प्रियतद्धिता दाक्षिणात्या इति भाष्यकारोक्तेः ॥ येनोपाधिनेत्यस्य येन निमित्तेनेत्यर्थः ॥ मूले कदा आगतोऽसीति प्रश्नोल्लेखो भूतकालाभिव्यक्तये ॥ ननु कदा आगत इति प्रश्ने कदेत्युपादानादागमनाधिकरण कालविषयकजिज्ञासावक्तुः प्रतीयतेऽतोऽत्रोत्तरवाक्यमपि तादृशकालबोधकमेवापेक्षितमित्ययमागच्छामीत्यनुपपन्नम् ॥ किञ्चागमनक्रियाया अतीतत्वादयमितीदमः सन्निकृष्टवस्तु परामर्शकस्य प्रयोगश्चानुपपन्न इति चेन्न ॥ अयमित्यनेन नागमनम्प्रतिनिर्द्दिश्यते किन्तु वर्त्तमानसमीपः सूर्योदयादिरूपो यः काल आगमनकर्तृपुरुषगतपांसुलपादत्वपरिकरबन्धनादिनाऽनुमितः स एव बोध्यते तत्रेत्यस्य चाध्याहारेण वाक्यार्थस्य पर्यवसानात् ॥ एवम्भविष्यत्कालविषयेऽपि येन केन चिन्निमित्तेन तस्य कालस्य ज्ञाने तस्मिन्नित्यस्याध्याहारेण पर्यवसानङ्कल्प्यम् ॥ आशंसायां भूतवत् ॥ अप्राप्तेति ॥ अप्राप्तस्य प्राप्तीच्छा । एतेनैतस्य सूत्रस्य प्रयोजनन्दर्शितम् ॥ वर्त्तमानत्वेऽपीति ॥ यस्मिन्काले देवश्चेदवर्षीदित्यादि प्रयुज्यते तस्मिन्काले निरुक्ता आशंसा अस्ति एतद्विषयो वर्षणं तन्नोत्पन्नमिति भविष्यत्कालिकवर्षणसम्बन्धादाशंसापि भविष्यत्वेनोच्यते ॥ आशंसायामित्यस्य विषयभूतायामिति शेषः ॥ एवञ्च प्रत्यासत्त्या यादृशार्थलाभस्तन्दर्शयति ॥ आशंसमानेति ॥ मूले सामान्यातिदेश इति ॥ भूतवदित्यनेन भूतसामान्यस्योपस्थितिर्न तु भूतत्वव्याप्य धर्मस्येति भूतत्वव्याप्यधर्मविशिष्टकालनिमित्तकङ्कार्यमत्र न भवतीत्यर्थः ॥ अत एवात्र भाष्ये भूतवदतिदेशे लङ्लिटः प्रतिषेधो वक्तव्य इत्युक्त्वा न वा अपवादस्य निमित्ताभावादिति समाहितम् ॥ पूर्वसूत्राद्वाग्रहणानुवृत्तयाऽस्यातिदेशस्य वैकल्पिकत्वादेतद भावे स्वाश्रयभविष्यत्सामान्यकृतमपि कार्यमित्याशयेन वर्षिष्यति वप्स्याम इत्युपात्तम् ॥ क्षिप्रवचने लृट् अत्र

SGDF
Sri Gurgeshwari Digital Foundation

वचनग्रहणात्पर्यायलाभः । नेत्युक्तौ भूतवदित्यस्यातिदेशस्य निवृत्तौ चकारेण बोधितस्य वर्त्तमानवदित्यस्याप्यतिदेशस्य निवृत्तौ पूर्वोक्तरीत्या आशंसाविषयस्य भविष्यत्त्वाल्लृटः सिद्धौ लृङ्ग्रहणमनर्थकमित्यत आह मूले लुटोऽपि विषय इति । तस्या विषयतायाः सूचनाय स्म इत्युपात्तम् । अस्येति । क्षिप्रवचन इत्यस्येत्यर्थः ॥ एवञ्च यत्र क्षिप्रपर्यायस्याशंसावाचकस्य च प्रयोगस्तत्रापवादविषयपरिहारेणोत्सर्गस्य प्रवृत्तेर्भूतवदित्यस्य वर्त्तमानवदित्यस्य चातिदेशस्याप्रवृत्तौ क्षिप्रपर्यायप्रयोगाभावे चरितार्थस्य लिङ्विधायकस्य क्षिप्रपर्यायप्रयोगस्य सत्त्वात्प्राप्तलृङ्बाधकत्वमित्याह ॥ क्षिप्रप्रयोगेऽपीति ॥ नानद्यतनवत् ॥ सातत्यम् ॥ नैरन्तर्यम् ॥ इदञ्च यावज्जीवमित्यस्य प्रयोगेण गम्यते ॥ अनद्यतनत्वस्य भूतत्वभविष्यत्त्वान्यतरसमानाधिकरणतयाऽनद्यतनवन्नेत्यनेन विहितस्य निषेधेन लङो लुटो लिटश्च प्रतिषेधे भूतत्वविवक्षायान्तन्मात्रे विहितो लुङ् भविष्यत्त्वस्य विवक्षायाञ्च लृट् भवतीति बोद्धव्यम् ॥ लङ् लुटौ नेति मूले लिडपि नेति पूरणीयम् ॥ एतेषामप्राप्तिश्च भूतत्वभविष्यत्त्वात्मकसामान्य धर्मसमानाधिकरणविशेषधर्मविवक्षायामबोध्या ॥ सामीप्यन्द्विविधमप्रसिद्धम् ॥ कालकृतन्देशकृतञ्च ॥ तद्द्विविधमपि विनिगमनाविरहाद्गृह्यते तदाह । सामीप्यञ्चात्रेत्यादि ॥ तत्र कालकृत सामीप्यमूल एवोपपादितन्देशकृतन्तत्स्वयमाह । देशसामीप्य इत्यादि ॥ अतिक्रान्त आगामी त्यनयोर्यथा सङ्ख्यं नाधित आधास्यत इत्यनयोरन्वयः ॥ न च कालविशेषविहितप्रत्ययस्यैव नानद्यतनवदित्यनेन निषेधात्प्रत्यासत्त्या कालकृतसामीप्यस्यैव ग्रहणंयुक्तमिति वाच्यम् ॥ भविष्यति मर्यादेति सूत्रभाष्यप्रामाण्येन देशकृतस्यापि ग्रहणात् । तत्र हि योऽयमध्वा गन्तव्य आपाटलिपुत्रात्तस्य यदवरंसाकेतादित्यादौ नानद्यतनवदितीष्यत इत्युक्तम् ॥ भविष्यति मर्यादा ॥ सूत्रस्य प्रयोजनमाह । अक्रियेत्यादि । उभयार्थत्वे प्रमाणमाह । यद्यपीत्यादिना । कैयट इत्यभिधानसूचि

SGDF
Sri Gangeshwari Digital Foundation

तामरुचिम्प्रकटयति । असामीप्य इति । अनभिधाने प्रमाणन्तु भाष्यकारेण तथानुक्तत्वमित्येव॥अतिक्रान्त इत्यनेनातीतत्वस्याभिव्यक्तिः।कालविभागे॥ काले न कृतः कालकृतः कालकृतश्चासौ विभागश्चेति कालविभागः शेषषष्ठीति कालविभागशब्दार्थापेक्षया शेषषष्ठीत्यर्थः तेनाहोरात्राणामन्येन कालेन विभागे कालान्तरस्य वाऽहोरात्रैर्विभागेऽहोरात्राणामेवाहोरात्रैर्विभागे- वाऽयन्निषेधः प्रवर्त्तते मूलेऽवरः पञ्चदशरात्र इति । एतेनैतन्मासीयपञ्चदशरात्रान्तरेण मध्ये व्यवधानेन सामीप्याभावलाभः॥अतः पुँस्त्वमिति । बहुव्रीहित्वादेव पुँस्त्वमित्यर्थः।सङ्ख्यापूर्वं रात्रं क्लीबमिति तु रात्राह्नाहा इत्येतदपवादतया द्वन्द्वतत्पुरुषयोरेवेति योगविभागेन समासान्तकल्पनापेक्षया पञ्चदशरात्र इत्यस्य साधुत्वम्प्रकारान्तरेणाह । पृषोदरेति ॥ भाष्ये स्पष्टमिति । तत्र हि कस्मिन्परस्मिन्। कालविभागे । कुत एतत्। योग विभागसामर्थ्यादित्युक्तम् ॥ भविष्यति मर्यादावचने वरस्मिन्ननहोरात्राणामित्येकयोग एव कर्त्तव्ये पृथग्योगोपादानम्परस्मिन्विभाषेत्यत्र काल विभागग्रहणसम्बन्धार्थमेवेत्यर्थः । गर्हायां लडपिजात्वोः ॥ अपिजात्वोर्योगे लट् स्याद्गर्हायां विषये ॥ भविष्यतीत्यादिप्रकृतसूत्रे न सम्बध्यते तेन कालत्रय इत्यस्य लाभः ॥ नन्वपिजातुशब्दयोगे त्रिषु कालेषु यस्य कस्य चित्कालस्य विवक्षायां लकारान्तरस्यावश्यम्प्राप्त्या निरवकाशोऽयं योग इतिपरत्वादित्यनुपपन्नमत आह । उत्कृष्टत्वादिति ॥ यदा त्वतीतानागतयोर्गर्हातिशयप्रतिपादनाय वर्त्तमानत्वस्यारोपस्तदा वर्त्तमाने लडितिलटि शानजादेशोऽपि।अपि गणिकामाददानम्पश्येति।प्रकृतसूत्रन्त्व नारोपार्थमिति बोध्यम् । विभाषा कथमि । अत्र भविष्यतीति । अत्र विभाषा कथमिति सूत्रे भविष्यति । भविष्यदर्थे । लिङो निमित्तङ्कथं शब्दो गर्हा च एतद्द्वयमप्यस्ति भविष्यदर्थश्चास्ति यदवशिष्टन्तदाह । क्रियातिपत्तावित्यपीति । किं वृत्ते लिङ् लृटौ । किमावृत्तन्निष्पन्नमित्यर्थः । कालत्रय इति। भविष्यतीत्यादि निवृत्तेरुक्तत्वात् । लट्वारणायेति।

SGDF
Sri Gargeshwari Digital Foundation

यदा वर्त्तमानत्वविवक्षा किंवृत्तसद्भावो गर्हा च तदा लिङोऽभावे लट् स्यादिति भावः। अपि जातु शब्दयोरन्यतरयोगे तु गर्हीयामित्यनेन लट् स्याल्लृट्ग्रहणसत्त्वे तु तस्य योगस्य परत्वादनेन बाध इति भावः। ननु लिङ्निमित्त इति सूत्रस्येदं सूत्रम्परत्वाद्बाधकम्भविष्यतीति कथम्भविष्यतीत्याद्युक्तिरत आह। लिङ्निमित्त इतीति॥ वाक्यभेदादेव क्रियातिपत्त्यभावेऽपीदं सूत्रं प्रवर्त्तत इति भावः॥ अनवक्लृप्त्य॥ लिङ्लृटावित्यनुवर्त्तते॥ भविष्यतीत्यादिनुवृत्तेः प्रागुक्तत्वादाह कालत्रयेऽपीति॥ नेष्यत इति। तत्प्रयोजकस्वरितत्वस्येहाभावात्। यथा सङ्ख्यसूत्रभाष्ये स्पष्टमिदम्॥ अत्राकिंवृत्तेऽपीति किंवृत्तग्रहणासम्बन्धप्रतिपादनायोपात्तन्तच्च न कर्त्तव्यम्। पूर्वसूत्रस्यकिंवृत्तशब्दे स्वरितत्वाभावात्तस्येहासम्बन्धेनोभयत्र सिद्धेः। न चाकिंवृत्त इत्यस्य पर्युदासतया किंवृत्तशब्दसदृशशब्दान्तरस्योपपदसंज्ञार्थमेतद्भविष्यतीति वाच्यम्। अतिङिति समासनिषेधेनोपपदसंज्ञायाः फलाभावात्। न च यदा सदादेशस्तदा नित्यसमासप्रवृत्तिः फलमस्त्विति वाच्यम्। भविष्यतीत्यनुवर्त्य विहितलृट एव सदादेशस्य प्रवृत्तेः। तदुक्तम्भाष्ये किंवृत्तस्यानधिकारादुत्तरत्राकिं वृत्तग्रहणानर्थक्यम्। तस्मिन्निवृत्तेऽविशेषेण किंवृत्ते चावृत्ते च भविष्यति। इदन्तर्हि प्रयोजनमुपपदसंज्ञां वक्ष्यामि। अतिङिति हि प्रतिषेधः प्राप्नोति। यदा तर्हि सत्संज्ञौ तदोपपदसंज्ञा भविष्यति। भविष्यदधिकारविहितलृटः सत्संज्ञाविति॥ किंकिलास्त्यर्थेषु। लिङपवादत्वमुपपादयति। पूर्वसूत्र इति॥ ङिलो निवृत्तये ति। लृट्ग्रहणेन तस्यबाधनमनुपदमेवोक्तमित्यर्थः॥ यच्चयत्रयोः॥ अयमपीति॥ अपिना जातुयदोरित्यस्य सङ्ग्रहः। लिङ्वेति कथनेनेदं सूत्रन्नियमार्थमिति न भ्रमितव्यङ्किन्तु फलितार्थकथनमेतदित्याह। अनेनेत्यादिना॥ शेषे लृङयदौ। अत्र लृङनेति। एतत्सूत्रस्य यन्निमित्तन्तस्मिन् सति लिङो विधानाभावेन लिङ्निमित्त इति सूत्राप्राप्तेरिति शेषः॥ उताप्योः समर्थयो-

SGDF
Sri Gurgeshwari Digital Foundation

लिङ्। निवृत्तत्वादिति। बोताप्योरित्युक्तत्वादिति भावः॥ कामप्रवेदने॥ मूले कच्चिज्जीवतीति। न चात्र कामप्रवेदनस्य गमकाभावान्न लिङः प्राप्तिरित्यकच्चितीति व्यर्थमिति वाच्यम्। कामो मेऽस्ति कच्चिज्जीवतीति वाक्यस्य कल्पनसम्भवात्। अथ वा कच्चिदित्यस्येष्टप्रश्न एव प्रयोगात्तत्प्रयोगेणैव कामप्रवेदनङ्गम्यते तदाह। अयमिति॥ प्रौढिपदार्थं व्याचष्टे। प्रौढिरिति॥ अपि गिरिं शिरसाभिन्द्यादित्युक्ते कर्तृत्वेन प्रतीतस्य पुरुषस्याङ्गदार्ढ्यनिश्चयेऽस्य कृत्यसाध्यन्नास्तीति गम्यत इति भावः॥ सम्भावनेऽलमित्यत्र च विभक्तिविपरिणामोऽर्थानुरोधात्। सकृदुच्चरित इति न्यायाबाधायाह॥ आवर्त्येति॥ अनुष्ठातुं समर्थ इति। अनेन क्रियानिष्पादनसामर्थ्यं निष्ठायोत्कटत्वाख्याविषयतातच्छालिज्ञानम्मास्तीति गम्यत इति प्रौढिरस्त्येव॥ अलमिति किम्। प्रायेण गमिष्यति॥ अत्र संभावनस्य भविष्यद्विषयत्वाद्भविष्यद्विषयसर्वलकारापवाद इति हरदत्त आह॥ विभाषा धातौ सम्भावनवचने॥ उत्प्रेक्षत इति उत्प्रेक्षापि संभावनैव शक्तत्वनिष्ठोत्कटत्वाख्यविषयताविशेषनिरूपितविषयिता शालिज्ञानरूपसम्भावनाया अत्र सत्वात्पूर्वसूत्रस्य प्राप्तिरस्ति॥ प्रत्युदाहरणे। अयदीत्यस्य प्रत्युदाहरणे॥ हेतुहेतुमतोर्लिङ्॥ हेतुहेतुमतोरर्थयोर्वर्त्तमानभ्यां धातुभ्यां लिङ्। यत्र द्वयोर्धात्वर्थयोर्हेतुहेतुमद्भावः प्रतिपिपादयिषितस्तत्र विनिगमनाविरहादुभाभ्यामपि धातुभ्यां लिङ्भवति॥ एतत्सूत्रोदाहरणात्कृष्णन्नमेच्चेत्सुखं यायादित्यादिभ्यो जायमानः शाब्दबोधो हेतुहेतुमद्भावसम्बन्धेन हेतुक्रियाविशिष्टकार्यक्रियाविषयको भवतीति भवतीह लिङः साधुत्वम्॥ लिङिति वर्त्तमान इति। उताप्योरिति सूत्राल्लिङिति वर्त्तमान इत्यर्थः॥ न च विभाषा धाताविति सूत्रे ततोऽनुवर्त्तमानं लिङ्ग्रहणं विभाषापदसम्बद्धमभूदिति विभाषापदानुवृत्त्यर्थमत्र लिङ्ग्रहणमस्त्विति वाच्यम्। विभाषापदसम्बन्धस्यात्रापीष्टत्वात्। अत एव हेतुहेतुमतोर्लिङ्वेति भाष्ये उक्तम्॥

SGDF
Sri Gargeshwari Digital Foundation

ननु लिङ्ग्रहणसामर्थ्याच्चेद्भविष्यतीत्यस्य कल्पना तदा भूतेऽथ वा वर्त्तमाने इत्येवास्त्विति चेन्न ॥ भविष्यदधिकारे च । भविष्यदधिकारे चेति वक्तव्यम् । वर्षतीति धावति । हन्तीतिपलायत इति भाष्यस्यैव मानत्वात् ॥ अत्र प्राप्तिः । वर्त्तमानत्वेऽपि प्राप्तिरित्यर्थः ॥ नन्विह लक्षणहेत्वोरित्यनेन शत्राद्यादेशः कुतो नेति चेन्न । शाच्छोरन्यतरस्यामिति सूत्रभाष्यपठिते देवत्रात इति वचने इतियोगे सद्विधिरित्युक्तत्वेन व्यवस्थितविभाषाश्रयणात् ॥ अत्र मूलानुक्तमपि लिङ्प्रकरणात्स्वयमाह । उपसंवादेति ॥ कर्तव्ये पण्वबन्धः कर्त्तव्येऽर्थे सति यथा तस्य सिद्धिर्भवति तथा चरणप्रतिज्ञा ॥ कर्त्तव्य इत्यत्रावश्यके कृत्यः कर्मणि एतादृशे विषये हेतुहेतुमत इति सूत्रस्याप्राप्तिमुपपादयति । अत्रेति । आशंकोत्प्रेक्षा । भावकोटिनिष्ठोत्कटत्वाख्यविषयताकसम्भावना ॥ इच्छार्थेषु लिङ्लोटौ। अत्रेच्छार्थेषु लोट्चेति वाच्यम्पूर्वसूत्रविहितस्य लिङः सम्बन्धश्चकाराद्भविष्यतीति केचित् ॥ तन्न । तत्र यथा हेतुहेतुमत्क्रियावाचकाभ्यामुभयत्र लिङ्भवति तथेहापीच्छार्थकादपि लिङ्स्यादतस्तस्मादस्यलिङो वैलक्षण्यसूचनाय पुनर्लिङ्ग्रहणात् । अत एवेच्छामीत्यस्योपादानम्।लिङ् च।इच्छार्थेष्वित्यत इच्छार्थेष्विति समानकर्तृकेषु तुमुनित्यतः समानकर्तृकेष्विति सम्बन्ध्यते।प्रैषातिसर्गप्राप्तकालेषु।प्राप्तश्चासौ कालश्च प्राप्तकालः प्राप्तो यो निमित्तत्वेन कालान्तरे स्वीकृतस्स लब्धावसरः। एतेष्वर्थेषु गम्यमानेषु कृत्या भवन्ति लोट्च । प्राप्तकाले यथा । भवता भोक्तव्य ओदनः । भवतः प्राप्तः कालो भोजनस्येति यत्र पूर्वकालिकस्य निश्चयस्य कर्त्ताऽन्येन बोध्यते तत्र कृत्यप्रत्ययान्तस्य लोडन्तस्य वा प्रयोगः प्रकृतसूत्रे पुनः प्रैषातिसर्गग्रहणस्य प्रयोजनमाह । अनयोरिति। सामान्यविहितेति । सर्वेभ्यो धातुभ्योऽर्थसामान्ये विहितानाम् ॥ कृत्यग्रहणम्पाणिनीयसंकेतसम्बन्धेन कृत्यशब्दावच्छिन्नस्य बोधकन्त्वेकस्य कृत्यस्य. सर्वेभ्यो धातुभ्यो विधानाभावेऽपि न क्षतिः।लिङ्चोर्ध्वमौहूर्त्तिके

SGDF
Sri Gurgeshwari Digital Foundation

उद्र्ध्वमौहूर्त्तिकत्वं स्वरूपसन्निमितन्तच्च धात्वर्थविशेषणम्।न स्वस्यार्थस्य प्रत्ययवाच्यत्वमनेनप्रतिपाद्यते। अन्वयोः। प्रैषातिसर्गयोः। प्राप्तकालपदम्बहुव्रीहिसंज्ञकं यजनविशेषणतयोपात्तङ्गम्यमानस्याप्यर्थस्य स्पष्टप्रतिपत्त्यर्थम्॥ स्मे लोट्। स्मशब्दे उपपदे प्रैषादिषु गम्यमानेषु ऊर्द्ध्वमौहूर्त्तिके धात्वर्थे वर्त्तमानाद्धातोर्लोट् स्यात्॥ लिङ्कृत्यानामयमपवादः। निरवकाशत्वेन बाधकः। स च नित्य एवेत्येतद्विषये लिङादीनामप्रवृत्तिरेव॥ अधीष्टे च। अधीष्टः सत्कृत्यव्यापारः। ऊर्द्ध्वमौहूर्त्तिकत्वाभावेऽपि प्रवृत्त्यर्थमिदम्॥ लिङ् यदि॥ अस्य तु मुनपवादत्वमुपपादयति। भाव इति॥ कर्तुर्विवक्षायामयञ्चरितार्थः॥ भगवता भवता कन्या वोढव्या। वहतीया॥ सद्विद्यादिगुणसम्पन्नम्प्रत्युक्तिरियम्॥ शकि लिङ् च। भावे क्विविति। सूत्रे शकीति शकधातुप्रकृतिकभावक्विवन्तप्रकृतिकम्। शक्नोत्यर्थः सामर्थ्यम्॥ क्रियाजननानुकूलविजातीयव्यापारः॥ अत्र शकीतिप्रकृत्यर्थविशेषणम्॥ तेन शक्नोत्यर्थोपाधिकेऽर्थे वर्त्तमानाद्धातोरित्यर्थः॥ माङि लुङ्॥ सर्वलेति। वर्त्तमानाद्यर्थकानामयमपवादो यतस्ततः शङ्केयमिति भावः॥ ननु निरनुबन्धकमाशब्दप्रयोगे यदि सर्वे लकारान्तर्हि सूत्रवैयर्थ्यमत आह। सूत्रमिति। असाधुत्वमेवैतादृशप्रयोगाणामनार्षाणामित्याह। वस्तुत इति। ध्वनितत्वादिति। प्रागुपपादितमेतत्॥ धातुसम्बन्धे प्रत्ययाः॥ द्विवचनान्तेन समासः। धात्वोः सम्बन्ध इत्यर्थः। इदञ्च विधिसूत्रन्न त्वधिकारसूत्रन्तथा सति धातुसम्बन्ध इत्येव सिद्धे प्रत्यया इत्यस्यवैयर्थ्यापत्तेः। न च वृत्तौ सङ्ख्याविशेषानवगमात्कथन्द्विवचनान्तेन समासेऽपि सङ्ख्याविशेषावगतिरिति वाच्यम्। द्वित्वात्मकसङ्ख्यायाऽनवगतावपि व्यक्तिद्वयप्रतीतौ बाधकाभावात्॥ ननु धात्वोः सम्बन्धः समानकर्तृकत्वादिरूपो वाच्योऽर्थद्वारकः परस्परसम्बद्धार्थकानेकधातुप्रयोगे यत्र तेषाम्प्रत्ययानां शास्त्रान्तरेण विधानन्ततोऽन्यत्र तेभ्यो धातुभ्यः प्रत्ययाः सा

SGDF
Sri Gargeshwari Digital Foundation

धव इत्यर्थः । एवञ्च गोमानासीत् । गोमान् भवितेत्यादावनुपपत्तिः । तदस्यास्त्यस्मिन्नित्यनेन वर्त्तमानसत्ताकर्तृगोसम्बन्धिपुरुषकर्तृकातीतसत्तानेन प्रतिपादयितुमशक्या । गोकर्तृकसत्ताप्रतिपादकधातुप्रयोगाभावेन तेन सम्बन्धस्य प्रतिपादनासम्भवात् । यदि तथा स्यात्तदा गौरस्तीत्यत्रास्तेरनेन सूत्रेणातीतकाले प्रत्ययं विधाय तेन धातुना सम्बन्धः स्यात् । किन्तु विद्यमान एव चैत्रे तद्गवीनामतीतानागतत्वप्रतिपादनायायम्प्रयोगो गोसम्बन्धिनो दरिद्रत्वभवनमेतद्व्यङ्ग्यम् । एवञ्च गोकर्तृकभूतसत्तायाः सम्बन्धवती या गौस्तद्वत्पुरुषकर्तृकभूतभविष्यत्सत्त्वार्थस्य भाष्यसम्मतस्य प्रतीत्यनुपपत्तिः । न च तदस्यास्तीति सूत्रे कालाविवक्षयाऽयम्प्रयोग इति वाच्यम् ॥ धनसम्बन्धस्यातीतत्वे धनिनञ्चच्छेत्युक्ते शब्दप्रयोगाधिकरणकालजातदरिद्रत्ववत्पुरुषस्यापि प्रतीत्यापत्तेरत आह । धातुशब्देनेति । तदर्थः । धात्वर्थः ॥ लक्ष्यत इति । एवञ्च गोकर्तृकसत्ताप्रतिपादकधातुप्रयोगाभावेऽपि तदर्थस्य गम्यमानतया तस्मिन्सत्तारूपेऽर्थेऽतीतत्वसम्बन्धेनान्वये न तदर्थावगतिरस्त्येव गोसत्त्वस्यातीतत्वात्तद्विशिष्टपुरुषकर्तृकसत्ताया अप्यतीतत्वेन गोमानासीदिति प्रयोगः । शब्देनाप्रयुज्यमानेनसम्बन्धाभावेऽप्यर्थेन बुद्धिस्थेन सम्बन्धो वक्तुं शक्य एव । एवङ्गोमानभवितेत्यत्र गोकर्तृकसत्तायां भविष्यत्वकल्पनया प्रयोगस्योपपादनङ्कार्यम् ॥ मतुप्प्रत्ययो यद्यप्यसन्निहितस्तथापि प्रकृतसूत्रे प्रत्यया इत्युपादानसामर्थ्यात्तस्योक्तरीत्योत्पत्तिरसम्भाव्या यदि प्रत्ययपदम्प्रकृतप्रकरणस्थलकारपरमेवस्यात्तदा प्रत्ययाधिकारेणैव सिद्धेऽस्य वैयर्थ्यं स्यात् । न चाधिकृतम्प्रत्ययसंज्ञा परमिति कथमधिकारेण संज्ञिलाभ इति वाच्यम् । संज्ञ्यन्तरस्येहा निर्देशेन संसंज्ञिपरत्वसम्भवात् । कृतञ्चैतत्प्रत्ययपदमसन्निहितप्रत्ययस्यापि कालान्तरे साधुत्वार्थमिति विज्ञायते ॥ न च स्पष्टप्रतिपत्तये क्रियासम्बन्ध इत्येवोच्यतामिति वाच्यम् । मात्रा गौरवात् । न च सम्बन्धे प्रत्यया इ-

SGDF
Sri Gargeshwari Digital Foundation

त्येवास्तु धातोरित्यस्याधिकृतस्य षष्ठ्या विपरिणामेन सम्बन्धविशेषणत्वम्भविष्यतीति वाच्यम् । सम्बन्धेऽर्थे प्रत्ययविधायकत्वापत्तेः ॥ प्रत्यया इति बहुवचनं विषयबहुत्वाभिप्रायेण ॥ ननु तत्तत्प्रत्ययविधायकसूत्रेणैव प्रत्ययस्य सिद्धौ किमनेन सूत्रेण । अप्राप्तस्य प्रत्ययस्यानेन विधानमिति तु न युक्तम् । यस्मिन्नुपाधौ याभ्यश्च प्रकृतिभ्यो येषाम्प्रत्ययानां विधानमस्ति तेषामुपपदान्तरेऽन्यप्रकृतिभ्यश्च विधानमित्यपि कल्पना स्यादत आह ॥ यत्र काल इतीति । एवञ्च प्रत्ययानां यथायोगं विहितानाङ्कालान्यन्वय्यैव प्रतिपादनायैतत्सूत्रमिति भावः । तदेवाह । वर्त्तमानसामीप्य इत्यादिना ॥ एतेन । अर्थायत्तया लटोऽन्यकाले साधुत्वकल्पनेन। प्रयोगे श्रूयमाणानामिति कथनेनास्मिन्प्रकरणे एतत्सूत्रप्राक्तनसूत्रविहितानाम्प्रयोगे श्रूयमाणानां शत्रादीनामन्यकाले उत्पत्तिकल्पना न तु तिङामपीति सूचितम्। एतेन श्रूयमाणपदघटित वाक्यघटकधात्वर्थयोः साक्षात्सम्बन्धे पपा च भवतीत्यादौ चरितार्थमिदं सूत्रमिति गम्यमानधात्वर्थसम्बन्धे गोमानासीद्गोमान्भवितेत्यादौ न स्यादित्यपास्तम् । तिङाम्प्राक्तन सूत्रविहितत्वाभावत् । अत्र सम्बन्धो धात्वर्थयोः समानकारककत्वस्वकारकसम्बन्धिकारककत्वान्यतररूपो बोध्यः। एवं सति यत्राभिनवजातशत्रुत्वदत्पुरुषसम्बन्धिग्रामाभिप्रायेण ग्रामो गम्यमान आसीदित्यादिप्रयोगस्तत्राप्युपपत्तिः । सूत्रारम्भकृत्सूत्रकारस्याशयमुपवर्ण्य प्रकृतसूत्रानारभाभिप्रायकम्भाष्यकारीयकल्पनमाह । भाष्यकृतस्त्विति । पर्यायतयेति । न च भावीत्यत्र भूधातुस्सत्तार्थकस्ततोऽतीते प्रत्ययकल्पनेऽस्तु पर्यायत्वञ्जनिष्यमाणेत्यत्र तु कथम्पर्यायत्वञ्जनधातोरुत्पत्त्यनुकूलव्यापारवाचकत्वस्यधातोस्सत्तार्थकत्वमित्यर्थभेदादिति वाच्यम् । धातूनामनेकार्थत्वेनास्तेरप्युत्पत्त्यनुकूलव्यापारार्थकत्वसम्भवात् । वर्त्तमानत्वं बुद्धिस्थीकृत्य वर्त्तमानत्वमारोप्य । प्रत्ययः । शता ॥ तत्फलम् । आरोपेण तादृशप्रयोगकरणफलमित्यर्थः । प्रत्ययः ॥

SGDF
Sri Gargeshwari Digital Foundation

प्रतीतिः । प्रकृतसूत्रस्य सरूपाणामिति सूत्रस्थभाष्यप्रयोगोऽप्युदाहरणमित्याह । ननु चोत्पतवैवेत्यादिना । तत्र हि पृथक् सर्वेषां विभक्तिपराणामेकशेष इति पक्षे एकशेषेण प्रातिपदिकानान्निवृत्तावपि विभक्तिश्रवणापत्तिरूपो दोष उक्तस्तस्य द्वन्द्वे कृते एकशेष इति पक्ष माश्रित्योद्धारबोधकमिदं वाक्यन्ननु चोत्पततैव वचनदोषश्चोदितास्मेति ॥ अस्यार्थः । उत्पतता विभक्तिपराणामेकशेषपक्षे दोषमुपक्रमता पृथग्विभक्त्युपलब्धिस्तदाश्रयत्वादित्यनेन दोषश्चोदिता स्म इति । अत्रोत्पततेति शत्रन्तम् तस्य वर्त्तमानार्थकलट्स्थानिकत्वे दोषश्चोदिता इति भूतार्थकनिष्ठाचात्वयानुपपत्तिरिति प्रकृतसूत्रेण वर्त्तमानार्थकोऽपि भूते उपपाद्यः ॥ प्रत्याख्यानपक्षे तु वसन्ददर्शेत्यत्रे वोत्पूर्वकपतधातोर्भूते वर्त्तमानत्वारोपेण शतोपपाद्यः । न चोपक्रमतेत्यनुपपन्नम्प्रोपाभ्यां समर्थाभ्यामित्यनेन धातोः प्रारम्भार्थकत्वे आत्मनेपदविधानादिति वाच्यम् । उपक्रमतेत्यस्य दोषकथनाग्रहवतेत्यर्थात्प्रारम्भाविवक्षणात् । अत्राप्युत्पतनक्रियायाश्चुदधात्वर्थक्रियायाश्च समानकालत्वप्रतीतिरेवं सति भवति ॥ क्रियासमभिहारे लोट् ॥ कालविशेषानुपादानेन विधानादयं सर्वकाले भवति एवञ्च लडादिभिरव्याप्तावकाशाभावेनायं सर्वेषा म्बाधक इत्याशयेनाह । सर्वलापवाद इति ॥ लोट एव स्थाने ह्स्वादेशविधानस्य फलमाह । यदीति । एतयोर्हिस्वयोर्यथा परस्मैपदात्मनेपदसंज्ञा भवति तथाऽह । लोडित्यनुवर्त्तते ति ॥ द्वितीयवाक्ये लोडित्यनुवर्त्य लोटो लोड्वद्धिस्वौ भवत इति वाक्यनिष्पत्तिस्तत्र यदि लोड्धर्मस्य कृत्वप्रत्ययत्वमात्रस्यातिदेशार्थं लोड्वेदित्यतिदेशस्तर्ह्यतिदेशविधानवैयर्थ्यं स्थानिवद्भावेन सिद्धेरतो लोट्छब्दः स्वादेशलाक्षणिक इत्याशयेनाह । लोडादेशेति ॥ एवमपि नैकादेशसादृश्यबोधनङ्किन्तु विनिगमनाविरहात्सर्वेषामादेशानान्तीस्यन्ते न परस्मैपदात्मनेपदसंज्ञयोर्लाभः । एवञ्च सामान्यातिदेशे विशेषाननिदेश इत्येषा परिभाषाऽतिदेशविधा-

SGDF
Sri Gangeshwari Digital Foundation

नस्यासम्ब्योद्धाव्यत इति भावः ॥ हिस्वयोरतिदिष्टे परस्मैपदात्मनेपदसं-ज्ञे यथा सङ्ख्येन भवतस्तदाह मूले क्रमेणेति । हिस्वविधानसामर्थ्या-दिति । यद्यनयोः पुरुषैकवचनसंज्ञयोरप्यतिदेशः स्यात्तदा युष्मद्युपपद इत्यस्यैकस्यैकवचनमिति च शास्त्रसंवादिनी प्रवृत्तिरनयोः स्यादेवञ्च सा-न्यशास्त्रेण वचनद्वयैकवाक्यतया विधायकेन सिद्धावेतयोर्विधानं व्यर्थं स्यादिति भावः ॥ व्याख्यानादिति । ध्वंशब्दसाहचर्यमूलकव्याख्यानादि-त्यर्थः ॥ मूले हिः कर्त्तरीत्युक्तन्नोपपद्यते अनुप्रयुज्यमानसमभिव्या-हारेणैव कर्त्राद्यर्थस्याभिव्यक्तेरेतयोः कर्त्राद्यर्थकत्वानङ्गीकारादत आह ॥ कर्त्रादयश्चेति ॥ ननु स्वातन्त्र्येण क्रियासमभिहारे हिस्वौ विधेयौ न तु लोट् लोड्वदिति च वाच्यमत एव सर्वसामञ्जस्ये लोडिति प्रथमान्तन्न वक्तव्यमिति चेन्न । लोडित्यस्यातिदेशवाक्यघटकस्य लोडादेशबोधकता-नापत्तेः ॥ लोटः स्थानेऽनयोर्विधाने हि पूर्वोक्तरीत्या लक्षणा भवति ॥ क्रियासमभिहारे विहितोऽयं लोट् तस्याभिव्यक्तये द्विर्वचनमपेक्षते व्यति-लुनीत इत्यादावात्मनेपदेन कर्मव्यतिहारस्य द्योतनेऽपि व्यतिशब्दव-त् । अत एवात्र क्रियासमभिहारे द्विर्वचनं वक्ष्यते ॥ यङ्पुनरस्मिन्न-र्थार्थे शक्त इति तस्य न द्विर्वचनापेक्षा ॥ समुच्चयेऽन्यतरस्याम् ॥ अनेक क्रियाणां स्वस्वबोधकधातुघटितशब्दबोध्यानां विवक्षा समुच्चयः ॥ प्र-कृते समुच्चयशब्दो बहुलग्रहणेन कर्मणि विधीयमानाजन्तोऽयञ्च क्रिया-पदार्थस्य विशेषणन्तदाह । समुच्चीयमानेति ॥ अत एव । कर्मार्थकाज-न्तस्य क्रियापदार्थविशेषणत्वादेव ॥ भावाजन्तत्वे हि विनिगमनावि-रहात्कारकसमुच्चयेऽपि स्यादिति भावः । एवञ्चैककारककानेकक्रियावि-वक्षायामस्य प्रवृत्तिः ॥ व्याख्यानादिति ॥ पूर्वसूत्रवदस्मिन्नपि सूत्रे वा-क्यत्रयकल्पनेन प्रथमवाक्यघटकलोट्कर्तृकभवनस्य पुरस्फूर्त्तिकत्वमूलक-व्याख्यानादित्यर्थः ॥ यथा विध्यनुप्रयोगः पूर्वस्मिन् ॥ विधानं विधिः विधिमनतिक्रम्य यथाविधि । विधानस्य सावधिकत्वाद्यस्मादित्यस्या-

SGDF
Sri Gargeshwari Digital Foundation

ध्याहारः विधानक्रियाकर्म चोपस्थितत्वात्सोऽेव तस्येत्यस्य चाध्याहार इति यस्माद्धातोर्लोड्विधानन्तस्यानुप्रयोगोऽनेन बोध्यते। यद्यपि प्रकृतस्य लोटः कर्त्राद्यर्थानभिधायकत्वेनैतदन्तादपरिसमाप्तोऽर्थ इत्यनुप्रयोगः सङ्ख्याकर्त्राकाङ्क्षाशान्त्यर्थं प्रकृतसूत्राभावेऽपि सिद्ध एव। तथापि यथा विध्येवानुप्रयोग इति नियमार्थमिदं सूत्रम्। पूर्वस्मिन्निति तु स्पष्टार्थम्॥ समुच्चये विशेषस्य वक्ष्यमाणत्वात्॥ कृञ्चानुप्रयुज्यत इति सूत्रविहितानुप्रयोगादस्य वैलक्षण्यमाह। अस्येति॥ यथा विध्येवेति नियमाद्याहि याहीति यातीत्येव प्रयोगो न तु याहि याहीति गच्छति लुनीहि लुनीहीति छिनत्तीति भवति॥ समुच्चये सामान्यवचनस्य। सामान्यमुच्यते येन स सामान्यवचनः। सामान्यं समानो धर्मः स च समुच्चितधात्वर्थवृत्तित्वे सति अनुप्रयुज्यमानधात्वर्थवृत्तिरेवञ्च यत्सिद्धन्तदाह। सामान्यवचनत्वञ्चेति॥ अनुप्रविष्टेति। अनुप्रविष्टः समुच्चितधात्वर्थो यस्मिन्नर्थे तादृशोऽर्थो यस्य धातोस्तत्त्वमित्यर्थः॥ भाष्ये स्पष्टमिति। लोड्मध्यमपुरुषैकवचनस्य क्रियासमभिहारे द्वे भवत इत्यनेन स्पष्टम्॥ अस्वास्थ्यक्रिया इत्यत्रास्वास्थ्यस्य क्रियेति भ्रमवारणायाह। अस्वास्थ्यमिति प्रथमान्तमिति। तेन प्रथमान्तेन क्रियाशब्दस्य प्रथमान्तस्य कर्मधारयसमासः॥ नन्वभेदान्वयतात्पर्यग्राहकस्येतिशब्दस्य प्रयोगे मध्ये कृतेऽनुप्रयोग इत्यस्य वाच्यार्थविरोध इति चेन्न। अत्रानुशब्दस्यानुवादकपरत्वात्। ननु गान्दोग्धीत्यादौ यथाऽवधित्वफलाश्रयत्वयोर्युगपद्विवक्षायाम्परत्वात्कर्मसञ्ज्ञायाङ्गोशब्दादुत्पन्नद्वितीयया कर्मत्वभानेऽप्यवधित्वम्भासते तथेहापि समुच्चयक्रियासमभिहारयोर्विवक्षायाम्परत्वादनेन लोड्यप्युभयभानम्भविष्यत्यतीत्यत आह। उभयेति॥ आकाङ्क्षामुत्थाप्येति। अनेन तस्या उत्थितत्वनिरासः। तस्य। पुर्य्येवस्कन्दनाद्यभिन्ना स्वास्थ्यस्य। न च मनोवृत्तिदुःखप्रयोजकव्यापारो ह्यत्रास्वास्थ्यपदेन प्रतीयते न तु मनो दुःखमेवेति अस्वास्थ्यपदेन मनो-

SGDF
Sri Gargeshwari Digital Foundation

दुःखार्थकेनेत्यसङ्गतमिति वाच्यम् ॥ तादर्थ्यात्ताच्छब्द्यमिति न्यायेन प्रयोजकव्यापार एव मनोदुःखपदस्य प्रवृत्तेः ॥ तत्र । तस्मिन्पद्ये ॥ उपात्तेनेति शेषः ॥ उपादानात् ॥ प्रतिपादनात् ॥ तस्य । रावणस्य ॥ तस्यावगतिः । अतीतत्वस्यावगतिः ॥ तदनुपयोगः । अनुप्रयोगानुपयोगः। कालकारकतद्गतसंख्याविशेषावगत्यर्थं सामान्यवचनस्यानुप्रयोगः प्रार्थनीयः । तेषाञ्चावगतिः प्रकरणाद्वाक्यैकदेशन्यायेन भविष्यतीति भावः ॥ विधौ लोट् तदा वक्तव्यो यदि प्रेरणा प्रतीयेतेत्याशङ्कायामाह । स्वसेवकेति ॥ प्रेरणाविषयश्चासौ अवस्कन्दनादिश्चेत्यर्थः ॥ अत एव । गम्यमानस्थलेऽनुप्रयोगानावश्यकत्वादेव ॥ अत एव । प्रकरणसद्भावादेवानुप्रयोगे सिद्धे तदर्थं वचनस्यानावश्यकत्वादेव । प्रत्याख्यातमिति ॥ किमर्थमिदमुच्यते । अनुप्रयोगो यथा स्यात् । नैतदस्ति प्रयोजनम् ॥ हिस्वान्तमनभिव्यक्तपदार्थकन्तेनानुप्रयोगो भविष्यति । यथा विधीति वक्ष्यामीति । एतदपि नास्ति प्रयोजनम् । समुच्चये सामान्यवचनस्येति वक्ष्यति तत्रान्तरेण वचनं यथा विध्यनुप्रयोगो भविष्यति ॥ समुच्चय एव सामान्यवचनस्यानुप्रयोग इति नियमात् क्रियासमभिहारे यथा विध्यनुप्रयोगो भविष्यतीति भावः । एवम्प्रकारेण प्रथमं सूत्रन्द्वितीयमपि हिस्वान्तमनभिव्यक्तपदार्थकन्तेनापरिसमाप्तोऽर्थ इतिकृत्वाऽनुप्रयोगो भविष्यति । इदन्तर्हि प्रयोजनम् । सामान्यवचनस्येति वक्ष्यामि । एतदपि नास्ति प्रयोजनम् । सामान्यवचनस्याऽनुप्रयोगोऽस्तु विशेषवचनस्येति । सामान्यवचनस्यैवानुप्रयोगो भविष्यति लघुत्वादित्यनेन प्रत्याख्यातमित्यर्थः ॥ इदञ्च लाघवङ्क्वचिदेव पर्यायवचनस्थले आद्रियते न सर्वत्र पर्यायेषु लाघवगौरवयोरनादरात्प्रकृते त्वपर्यायत्वं स्पष्टमेवेति भावः। विस्तरस्त्विति ॥ यदि तु पुरीमवस्कन्देत्यत्रावश्यमनुप्रयोगोऽपेक्षित इति दुराग्रहस्तदा चक्र इत्यस्य तन्त्रेणोभयत्रान्वयोऽस्त्वित्यनेनेत्यर्थः ॥

SGDF
Sri Gangeshwari Digital Foundation

मूले भ्रम एवेति । पुरुषांशे वचनांशे चेति शेषः । पूर्वोक्तरीत्यैव निर्णयसम्भवादिति सकलेष्टसिद्धिः ॥

॥ इति लकार्थप्रक्रियाविवरणम् ॥

इति श्रीमदनन्तकल्याणसद्गुणनिधानाखिलपण्डितसार्वभौमभूमण्डलप्रसारिविमलतरानवद्यसद्यशःपार्वणपीयूषभान्वगस्त्यकुलवंशावतंसश्रीभवदेवमिश्रात्मजभैरवमिश्रकल्पितायाञ्चन्द्रकलायां शब्देन्दुशेखरव्याख्यायान्तिङन्ताख्यम्प्रकरणं सम्पूर्णम् ॥ श्रीमत्सीतारामचन्द्रार्पणमस्तु ॥

SGDF
Sri Gangeshwari Digital Foundation

॥ श्रीः ॥

चन्द्रकलायाः

अर्थात्

अगाधमेधश्रीभैरवमिश्रसंकलितायाः

शब्देन्दुशेखर व्याख्यायाः

चतुर्थः खण्डः ।

ग्रन्थकर्तुः प्रपौत्रेण श्रीपण्डितगणेशदत्त-
शर्ममिश्रेण ग्रन्थकर्तृहस्तलिखितपु-
स्तकमवेक्ष्य संशोध्य संस्कृत्य र-
सिकजनसौलभ्याय द्विवेदपं-
डितरामनाथशर्मद्वारा

काशिस्थकाशिकायन्त्रालये मुद्रयित्वा प्रकाशितः ।

सं० १९४४ भा० शु० १४

SGDF
Sri Gargeshwari Digital Foundation

॥ अथ कृदन्तप्रकरणम् ॥

श्रीगणेशाय नमः ।

नत्वा श्रीजानकीजानिं सानुजं वरदम्प्रभुम् ॥
कृतां व्याख्यानमधुना क्रियते तत्प्रसादतः ॥ १ ॥

धातोः । अधिकारसूत्रमिदन्तस्य फलमाह । सोपसर्गाणामिति । एतत्सूत्राभावे वर्त्तमाने लडित्यादेर्वर्त्तमानाद्यर्थे प्रत्यासत्त्या तादृशार्थप्रतिपादकेभ्यो लडादयः स्युरित्यर्थे पर्यवसन्ने सति सोपसर्गाणामपि तादृशार्थप्रतिपादकतया तेषामप्यङ्गत्वापत्तावडाद्यव्यवस्थापत्तेरिति भावः । यद्यपि तृतीयाध्यायसमाप्तिपर्यन्तम्धातोरेकाचसूत्रस्थस्य धातोरित्यस्य सम्बन्धेन धातोरेव लडादयो भविष्यन्तीति न सोपसर्गाणामङ्गत्वस्य प्रसक्तिस्तथापि द्वितीयस्य धातोरित्यस्याधिकारसूत्रस्याभावे तिङ्शिदित्यस्यार्द्धधातुकमित्यस्य च धातोर्ये तिङ्शितश्च ते सार्वधातुकाभिन्नास्तेभ्यो भिन्नाश्चार्द्धधातुकाभिन्ना इत्यर्थापत्तिः स्यात् । तथा सति क्विबन्तानां लूप्रभृतीनामपि धातुत्वाल्लूभ्याम्पूभ्यामित्यादौ भ्याम आर्द्धधातुकत्वस्य सत्त्वादिडागमः स्याद्द्वितीयस्य धातोरित्यस्य सत्त्वे तु उक्तसूत्रयोर्धातोर्धातोरित्येवमानुपूर्वीकशब्दोच्चारणेन विहितानान्ते संज्ञे भवत इत्यर्थनिष्पादान्न भ्याम आर्द्धधातुकत्वस्य प्रसक्तिः । नन्वातृतीयसमाप्तेर्यदयमधिकारस्तदा स्यादिप्रवृत्तियोग्ये विषये नित्यत्वात् स्यादिषु कृतेषु तदनन्तरं लस्य स्थाने तिवाद्यादेशस्य तेन व्यवधानात्प्रवृत्तिर्न स्यात् । सूत्रस्य तिप् तसित्यस्य चारितार्थ्यन्तु दस्य विकरणस्य सार्वधातुकनिमित्तकत्वन्तस्य शत्रादेर्विषये स्यादत आह । स्यादिव्यवधान इति । तिप् तसिति सूत्रे धातोरित्येतत्सम्बन्धस्य प्रयोजनमाह । लुनातीत्यादाविति । व्याख्यात इति । पूर्वार्द्धे प्रसङ्गतो व्याख्यात इत्यर्थः । वासरूपोऽस्त्रियाम् । असरूप इति छेदः । असरूपत्वञ्च किमपेक्षयेत्याकाङ्क्षायां यस्य स्वविषये सर्वत्र प्रवृत्तिस्तदपेक्षयेति प्रत्यासत्त्या लभ्यते । एतादृशश्चोत्सर्ग एवेति फलितमत उक्तम्मूलेऽसरूपोऽप-

SGDF
Sri Gargeshwari Digital Foundation

वाद इति । न चापवादेनासरूप उत्सर्गो वा भवतीत्येवार्थोऽस्त्विति वाच्यम् । तथा सत्यपवादस्यान्यत्रेवात्रापि बाधकत्वन्नित्यमेव प्राप्तमिति प्रकृतसूत्रस्यापवादविषयेऽप्युत्सर्गो भवत्विति विध्यर्थः कल्पो विकल्पस्य कल्प्य इत्युभयविधायकत्वापत्तौ गौरवापत्तेः । अपवाद इतिकथनादेव विप्रतिषेधविषयतास्य सूत्रस्य प्रवृत्तिः । उभयोरपि सूत्रयोस्तत्र चारितार्थ्येन कस्यापि सूत्रस्य स्वविषयताव्यापकान्यविषयताकत्वस्याभावात् । तदुक्तं भाष्ये । सापेक्षोऽयन्निर्देशः क्रियते वासरूप इति । न चोत्सर्गवेलायाङ्किञ्चिदपेक्ष्यमस्ति । अपवादवेलायाम्पुनरुत्सर्गोऽपेक्ष्यते । किञ्चिदित्यस्य स्वविषयता व्यापकविषयताकं किंचिदित्यर्थः । अपवादवेलायामिति । बाध्यत्वेन यावदुत्सर्गो नापेक्ष्यते तावदपवादस्य प्रवृत्तिर्नास्तीत्यर्थः । अयम्भावः । भिन्नस्वरूपत्वं ह्यसरूपत्वन्तच्च किमपेक्ष्येत्याकाङ्क्षायां तद्विधानसमये यः सर्वत्रोपस्थितो भवति तदपेक्ष्ययेति कल्प्यते एवञ्चोत्सर्गः सर्वत्रापवादविषयं लभमान एव बुद्ध्यारूढ इत्यतस्तदपेक्षयाऽसरूपत्वङ्गृह्यते । न च प्रकल्प्यवापवादविषयमितिन्यायेनोत्सर्गस्याप्यपवादापेक्षाऽस्तीति वाच्यम् । लक्ष्यसंस्कारवेलायान्तथाऽपेक्षायामपि वाक्यार्थप्रमितिवेलायान्तदभावात् । अस्याः परिभाषायाः सत्त्वादपवादशास्त्रस्य च वाक्यार्थबोधजननवेलायामप्येकवाक्यता भवतीति । अस्य सूत्रस्याधिकारत्वन्निरस्यति । अधिकारत्व इति । प्रत्ययत्वम्भावीत्यर्थाकल्पनलाघवानुरोधेनाह । यद्वेति । अत एव । उत्सर्गबाधकत्वेन निश्चितस्य भवनविकल्पस्यैवानेन बोधनादेव । यस्य शास्त्रेण विकल्पो बोध्यते तस्यैव पाक्षिकाभावप्रवृत्तिकत्वम्भवतीति यदि बाधकत्वविकल्पोऽनेन शास्त्रेण बोध्येत तदोत्सर्गापवादयोः पक्षे समावेशः स्यादेवेति भावः । ननु बाधक इत्यनेनार्थाद्बाधकशास्त्राभावे एव बोध्यत इत्यत आह । धर्मनिषेध इति । स्वरितत्वादिति । तेनाधिकः कार इत्यर्थाश्रयणात् स्त्रियामित्यधिकारीयप्रत्ययलाभो गोस्त्रियोरुपसर्जनस्येति सूत्रघटकस्त्रीपदेनेवेति भावः ॥ तेन । अस्त्रियामित्यत्र स्वरितत्वकल्पनेन । स्त्रियामित्यधिकारीयप्रत्ययविषये तु न विकल्पः । तेन चिकीर्षाजिहीर्षाजिगमिषेत्यादावप्रत्ययादित्यकारप्रत्यय एव । असारूप्यश्चोपेति । एतत्परिभाषैकवाक्यतापन्नस्य तत्तद्विधिशास्त्रस्य लक्ष्यसंस्कारकतया तस्यामवस्थायां यद्रूपमुपस्थितभव-

SGDF
Sri Gargeshwari Digital Foundation

ति तस्यैव ग्रहणमुचितमिति भावः । न दोष इति । परिनिष्ठितरूपे श्रूयमाणं यद्रूपन्तत्कृता सारूप्यस्य ग्रहणे क्विपः श्रवणाभावेन तत्र वासरूपपरिभाषाया अव्याप्तिरूपो दोषः स्यादिति भावः । तदप्यनुबन्धभिन्नेति । असारूप्यमप्यनुबन्धभिन्नकृतमेव । उपदेशावस्थायामनुबन्धकृतस्याप्यसारूप्यस्य सम्भवात् । एतेन विकल्पारम्भेण नानुबन्धकृतमसारूप्यमिति परिभाषा सिद्धा । न चानुबन्धानामनैकान्तत्वपक्षेणैष परिभाषा गतार्थेति वाच्यम् । एकान्तत्वपक्षस्यैव स्थिरत्वात् । किञ्च तस्मिन्पक्षे चुटू लशक्वितिसूत्रसम्बद्धस्यादिपदस्य पूर्वसमीपलाक्षणिकत्वमवश्यं वाच्यमिति चुञ्चुप्चणपोर्यादित्वकल्पनेन समाधानस्यासङ्गतिर्यकारलोपेऽप्युकारादिसमुदायपूर्वसामीप्यस्याक्षतत्वात् । यकारप्रश्लेषसामर्थ्यकल्पनापेक्षयाऽनुबन्धानामेकान्तत्वपक्षस्यैव युक्तत्वादित्याशयः । कर्त्तरि कृत् । कार्याः शब्दा इति वादिनः शङ्काम्प्रदर्श्य नित्याः शब्दा इति सिद्धान्तानुरोधेनाच समाधातुं कार्यशब्दपदमतन्त्रवदुपन्यस्यति न चेति । वाच्यमिति परेणान्वयः । प्रत्ययनियमोऽयमिति । धातोः परः कृत्प्रत्ययः कर्त्तरि वर्त्तमानमिवेत्यनेन यो धातोः परः श्रूयते सकर्त्तरि भवन् सन् कृत्संज्ञः स्यादित्यर्थमेतत्सूत्रं स्यादिति तदाशयः । तत्र वृत्तिरिति । धातोः परत्र वृत्तिरित्यर्थः । यः स्वभावत इति । अर्थस्य लोकतः सिद्धेस्तद्विधानेन शास्त्रव्यापार इति भावः । अत एव अस्य सूत्रस्य संज्ञानियामकत्वादेव । यदि शास्त्रमपूर्वार्थविधायस्यात्तदा नित्यत्वस्य हानिः स्यात् । स्पष्टञ्चेदमिति । किमयम्प्रत्ययनियम आहोस्वित्संज्ञानियम इत्यादिना स्पष्टमित्यर्थः । तयोरेव कृत्यक्तखलर्थाः । तथाभूतस्यैव । असत्त्वभूतस्यैव । एतेन संख्यान्वययोग्यता दर्शिता । एकवचनम् । द्वित्वाद्यभावेनैकवचनम् । तिङन्तवाच्यभावनोऽस्य किञ्चिद्वैलक्षण्यमपीत्याह । स्वभावाच्चेति । शब्दशक्तिस्वभावादित्यर्थः । एतावतैवं सत्त्वप्रधानानि नामानीति निरुक्तस्यापि प्रकृते सङ्गतिः । एवकारः । प्रकृतसूत्रस्यैवकारः । नन्वकर्मकेभ्यो भाव एवेति कर्त्तृव्यावृत्तिफलकनियमबोधनायैवकारोऽस्त्वित्यत आह । कर्त्तृव्यावृत्तय इति । एतेन [illegible] कर्मणीतिसूत्रानन्तरं कृत्यक्तखलर्था इतिसूत्रम्पठनीयम् । च इतिपदम्परित्यज्य सम्पूर्णसूत्रम्पूर्वमनुवर्त्तनीयमस्मिन्सूत्रे तयोरेवेति न वाच्यमिति कस्यचिदुक्तिः प्रत्युक्ता । पूर्वसूत्रादस्य

SGDF
Sri Gargeshwari Digital Foundation

किञ्चिद्विशेषस्य सूचनाय तयोरेवेत्यस्यावश्यकत्वात् ॥ वसेस्तव्यत्कर्त्तरि णिच्च ॥ वसधातोस्तव्यत्कर्त्तरि स्यात्स च णित् स्यात् ॥ भूलेऽयमिति । केलिमरप्रत्ययः । कृत्यचः ॥ उपसर्गादिति रषाभ्यामिति चानुवर्त्तते । तत्स्थात्ताच्छब्द्यमित्याशयेनाह उपसर्गस्थादिति । अत्र च । कृतस्थस्येति व्याख्याने च । एतेन कृति परे यतः कृतो विधानं तदवयवस्योपसर्गस्थान्निमित्तात्परस्य नस्येत्यर्थ उचित इति निरस्तम् । प्रत्यासत्त्याऽजपि कृत्स्थ एव ग्राह्य इति शंकां वारयति । अजपीति । णेर्विभाषा ॥ अत्र णेरिति विधानक्रियानिरूपितापादाने पञ्चमीत्याशयेन ण्यन्ताद्विहित इति व्याख्यातं तस्यायमाशयः । अट्कुप्वाङित्यस्य सम्बन्धेन रषाभ्यामित्यंशे निर्दिष्टपरिभाषाबाधेऽपि णेरिति पञ्चमीदर्शनेन तदंशे निर्दिष्टपरिभाषाबाधे मानाभाव इति ॥ एतत्फलञ्च मूलकारेणैव दर्शितम् । इजादेः सनु ॥ इजादेर्हलन्तादिति यदत्र व्याख्यातं तदस्य सूत्रस्य नियमार्थत्वसम्पत्तये । एवं व्याख्याने ह्यस्य सूत्रस्य ण्यन्तेऽप्रवृत्तिर्लभ्यते तदाह । विहितविशेषणञ्चेति । व्याख्यानादिति । अट्कुप्वाङिति सूत्र एव नुम्ग्रहणस्यानुस्वारसामान्यार्थकत्वेन तस्यैवेहानुवृत्तिमूलकव्याख्यानादित्यर्थः ॥ वा निंसनिक्षनिन्दाम् ॥ कृत्यच इत्यतः कृतीत्यनुवर्त्तते । तच्च तत्र यद्यपि नकारविशेषणं तथापीह निमित्तमित्याह ॥ कृतीति ॥ ण्यन्तभादीनामुपसङ्ख्यानमिति वार्त्तिकारम्भस्य बीजमाह ॥ प्रभायमाणमित्यादाविति ॥ भा दीप्तौ । भावे लट् । शानच् । यक् । अत्र यका व्यवधानाद्भाधातोः परत्वाभावात्कृतो निषेधो न स्यादतो वेषामिति पञ्चम्यर्थे षष्ठी विहितविशेषणञ्चावश्यकम् । एवञ्च ण्यन्तस्य शब्दान्तरत्वादप्राप्ते निषेधे निषेधविध्यर्थं वार्त्तिकमिति भावः ॥ अत्र । णत्वप्रकरणोपरिपाठे ॥ कृतो बहुलमिति । बहुलग्रहणेनान्येषाङ्कृतां ग्रहणापेक्षया लाघवात्कृतो बहुलमित्येव युक्तमिति भावः ॥ तव्यदादिषु यतः पाठेऽयमप्युत्सर्गः । अस्य विशेषविहितत्वाण्ण्यद्बाधक इति भावः । नन्वज्ग्रहणसत्त्वे दित्स्यन्धित्स्यमित्यादौ यति सन्निपातपरिभाषयाऽतो लोपो न प्राप्नोति तदकरणे तु प्राप्नोतीति फलभेद इत्यत आह । अज्ग्रहणमिति । ननु यतो ण्यता बाधोऽधुनाऽवश्यं वाच्य इति यतस्तव्यदादिषु पाठे यत्साहचर्यात्तव्यदादयोऽपि ण्यता बाध्येरन्नित्यत आह । वासरूपेति । न च ण्यत्तव्यदादिषु पठनीयः । अट-

SGDF
Sri Gargeshwari Digital Foundation

ग्रहणञ्चास्तुयुजपीन्यत्र कार्यम् । हल्ग्रहणन्न कार्यमित्येव कुतो नोक्तमिति वाच्यम् ॥ ऋशब्दस्य तत्र पाठे धातुसाहचर्येण ऋधातोर्ग्रहणमिति कल्पनस्यापि सम्भवात् ॥ नन्वजन्तभूतपूर्वादपि यद्यथा स्यादित्येवमर्थमज्ग्रहणमस्तु । अत एव दित्स्यधित्स्यमित्यादावार्द्धधातुकसामान्ये बुद्धिस्थेऽतो लोपे कृतेऽपि यद्भवति । तेन यतोऽनाव इत्येषस्वरो भवति । अतो लोप इतिसूत्रसम्बद्धार्द्धधातुकपदे विषयसप्तमीस्वीकारेऽपि यस्य बुद्धिर्यस्य प्रवृत्तौ नियामिका तस्य तन्निमित्तकत्वव्यवहारः । अत एव गणयतीत्यत्राल्लोपस्य स्थानिवद्भावाद्वृद्ध्यभाव इति चेन्न । भाष्यकारस्य तथैवेष्टत्वे नेष्टापत्तेः । अत एव भाष्यकृतोक्तरीत्याज्ग्रहणवैयर्थ्यमुपपाद्य इदन्तर्हि प्रयोजनमजन्तभूतपूर्वादपि यथा स्यादित्युक्तम् ॥ मूलन्तु तस्यार्द्धधातुकपदस्य परसप्तमीत्वाभिप्रायेण ॥ प्रकृताज्ग्रहणमिवार्द्धधातुकपदस्य विषयत्वार्थकसप्तम्यन्तत्वाभिप्रापकमिति तु भाष्यकृतामाशयः । यत्तु दरिद्रातेरार्द्धधातुकविवक्षायामाकारलोपे भूतपूर्वाजन्तत्वेन यत्सिद्धिरज्ग्रहणफलमिति ॥ तन्न ॥ दरिद्रा इत्यस्य त्र्यच्कत्वेन ण्यद्यतोर्विशेषाभावात् ॥ इत्यत्र नेति । यत्प्रत्ययो न । किन्तु ण्यत् । एवञ्च यतोनाव इत्यस्य तदनुबन्धकपरिभाषयाऽप्रवृत्तौ तित्स्वरितमिति प्रत्ययस्य स्वरितत्वम्भवति ॥ हनो वा यद्वधश्च वक्तव्यः ॥ हन्धातोः सकर्मकत्वात्कर्मणि यत् स चार्हे कृत्यतृचश्चेति योग्यतायाम् ॥ यत्र तु न योग्यता किन्तु बलावष्टम्भेन हन्यते स घात्य एव ॥ तद्धितो वेति भाष्यात् ॥ तत्र हि तद्धितो वा पुनरेष भविष्यति वधमर्हतीति वध्यः । दण्डादिभ्य इति यत् ॥ यदि तद्धितान्तोऽयन्तदा समासविधायकलक्षणाभावादसिवध्यो मुसलवध्य इति न प्राप्नोति । यदि षष्ठीसमासस्तदान्तोदात्तत्वापत्तिः । यदि हन्धातोर्यत्तदापदन्तस्याद्युदात्ततया तेन सह साधनङ्कृतेति समासे गतिकारकोपपदादिति कृदुत्तरपदप्रकृतिस्वरे आद्युदात्तमेव भविष्यतीत्येवमर्थमिदं वार्त्तिकम्भाष्यकृता स्थापितम् । भाष्ये स्पष्टमिति ॥ एवञ्च कृदुत्तरपदप्रकृतिस्वरेणालभ्यशब्दे स्वरितस्यैवावस्थानम्भवति ॥ अपाल्लभ्यंसायाम् । प्रशंसायाङ्गम्यमानायाम् । प्रत्ययस्तु प्राप्त्यर्थकात्कर्मण्येव । तेन यस्य यस्माद्वा लाभे सति प्रशंसा तस्य लाभहेतुका भवति तदिहोदाहरणम् अत्रापि यीत्यनुवर्त्तमाने विषयसप्तम्येव । तेनान्तस्वरितकत्वसिद्धिः । इत्येके

SGDF
Sri Gargeshwari Digital Foundation

इति ॥ यदि पुनरर्थाभावशब्दस्य नञ्घटिततया सूत्रगृहीताव्ययेन समासाभाव इति प्रागुक्ता रीतिस्तदा नाव्ययीभावस्य प्रसक्तिरित्यस्वरसः। समासस्तु नञ्तत्पुरुष एव। पञ्चम्यर्थे सप्तमी ॥ नियमार्थमितीति। यमेर्यदि यत्तदोपसर्गाभाव एवेति नियमार्थमित्यर्थः ॥ मूले नियमे साधुरिति वेति ॥ यदि पूर्वोक्तनियमस्याबाध एवेति स्वीक्रियते तदा नियमशब्दात्तत्र साधुरिति यत्। नचैवं सति त्वयेति तृतीयानियमपदार्थभूतक्रियान्वयविवक्षया वाच्या सा न सम्भवति कर्तृकर्मणोरिति षष्ठ्या बाधात्। कृद्यति तु कृत्यानां कर्तरि वेति विकल्पात्सा भविष्यतीति वाच्यम्। कर्त्तुः करणत्वविवक्षया तस्याः सिद्धेः ॥ अजर्यं सङ्गतं अत्र सङ्गतशब्दोऽर्थविशेषे रूढ इत्याशयेनाह ॥ सङ्गच्छतीति ॥ निपातनादिति ॥ अतो बाधाभावाय निपातनस्यावश्यमाश्रयणीयतया तत एवायङ्कर्त्तरीत्यर्थकल्पनमपि भविष्यतीति बहुलग्रहणेनैषा कल्पना न कार्य्येति भावः वदस्सुपि क्यप् च। उपसर्गग्रहणन्नेति। तथा च सुप्ग्रहणमुपसर्गभिन्नसुबन्तलाक्षणिकमितिभावः। लक्षणायाम्मानमाह। सत्सू इतीति ॥ तत्र हि ज्ञापकमनुपसर्गग्रहणमन्यत्र सुब्ग्रहणे उपसर्गग्रहणन्नेत्यर्थस्येति भावः। भाव इत्यस्यापकर्षे निमित्तमाहाकर्मकत्व इति। उत्तरत्रभुवोऽभाव इति सूत्रे ॥ व्यर्थत्वादिति ॥ तथा च पूर्व्वसूत्र एव तस्य सम्बन्धेन तत्सफलमिति शेषः उत्तरसूत्रेऽपि तस्य साफल्यमाशङ्क्य निराचष्टे ॥ यद्यपीति न तद्ग्रहणमिति ॥ भूप्राप्तावित्यस्यान्तर्भावितण्यर्थस्यास्य च न ग्रहणमित्यर्थः। एवञ्च तत्रत्यभावग्रहणमेतत्सूत्रार्थमेवेति भावः ॥ इदञ्चिन्त्यमिति ॥ वदस्सुपीति सूत्रार्थमेव तत्सूत्रस्थ भाव इतीति चिन्त्यमित्यर्थः। ननूत्तरार्थमिति कुतस्तस्मिन्नपि सूत्रे अनुपूर्व्वकभूधातोस्सकर्म्मकान्मा भूदित्यर्थन्तस्यावश्यकत्वादित्यत आह ॥ सोपपदस्येति ॥ ब्रह्माद्युपपदसहितस्येत्यर्थः। सोपसर्गस्य व्यावृत्तिस्तु गदमदेति सूत्रादनुपसर्गग्रहणानुवृत्त्या भविष्यति। यद्यपि भाष्ये भुवोभाव इतिसूत्रेप्यनुपसर्गग्रहणदसम्बन्धो दर्शितस्तथापि, सोपपदस्येति सोपसर्गस्याप्युपलक्षणमित्येतत्तात्पर्य्यकमत एव सत्सू इति सूत्रस्थमुपसर्गेऽपीतिपदन्तस्य सुब्ग्रहणे उपसर्गग्रहणन्नेत्येज्ज्ञापकत्वपरतया वर्णवपरसत्सू इतिसूत्रस्थपरग्रन्थविरोधो न सकर्म्मकत्वादिति। यदेस्सकर्म्मकत्वात्तयोरिवेत्यस्य प्रवृत्तिर्न्या-

SGDF
Sri Gargeshwari Digital Foundation

र्थ्यैवेतिभाव इत्यस्यापकर्षणेन प्रमाणमिति भावः। नन्वेवम्ब्रह्मोद्यमित्यस्य का गतिरत आह भाव इति। अत एव। भाव इत्यस्यापकर्षणाभावादेव;। प्रत्युदाहृतमिति। हत्यादाविति शेषः। भाष्ये तु सुवाद्यमपवाद्यमिति प्रत्युदाहृतमिति बोध्यम्। पूर्व्वोक्तमेवार्थन्द्रढयति। एयवक्षादिति। हनस्त च। नन्वस्य सूत्रस्य हन्ते स्तकारः प्रत्ययः क्यप् त्येवार्थः किन्न स्यादत आह। व्याख्यानादिति। खहत्या वर्त्तत इति भाष्यीयोदाहरणदर्शन मूलकव्याख्यानादित्यर्थः। घात इति। भावे घञ्। तदप्राप्तेरिति। तयोरेवेति नियमादिति भावः॥ खघात्य इति। कर्मणि ण्यत्। शुना घात्य इत्यर्थः। अनुपसर्गे किमिति। वदस्सुपीतिसूत्रादुपसर्ग्गं भिन्न सुपि लाच्चणिकसुप्पदानुवृत्तिः किमर्थेत्यर्थः। असाध्विति। विनापि प्रत्ययमित्यस्याश्रयणे प्रमाणसम्भावे तु साधुरेव। केचित्तु हनस्तः क्यप्यचिसलोरित्यनेन सूत्रेण क्वापि सकारादेशो विधेयः प्रकृते तु हन्भुगर्भाव इति सूत्रङ्कार्यमेतावतैव सिद्धो हनस्त चेति पृथक्सूत्रकरणमस्य क्वचिदनुपपदेऽपिप्रवृत्त्यर्थम्। तेन निरुपपदेऽपि हत्येति साध्वित्याहुः॥ तत्र। भाष्यानुक्तत्वात्। शब्दशक्तिस्वभावादेतद्विहितक्यबन्तस्य क्लीत्वम्। एतिस्तुशा। ननु यस्माच्छासेरङ् तस्य शासेरुपधाया इत्वमिति कथं शास्तेरित्वमत आह। शास इदङिति। अत्र निरोधस्येति अत एव भाष्ये क्यप्विधौ हृञो ग्रहणङ्कर्त्तव्यम्। इह मा भूत्। वार्या ऋत्विज इत्युक्तम् निरोधस्य देशविशेषे स्थापननियमाचरणादिरूपः। ननु पूर्व्व सूत्रे चकारवशात्क्यपः सम्बन्धादस्मिन्सूत्रे तदसम्बन्धात्क्यब्ग्रहणमस्त्वित्यत आह। तकारस्येति स्पष्टार्थमिति। पुनः क्यबुक्तेर्ण्यद्बाधकत्वं स्पष्टम्। तत्र हि क्यबिति वर्त्तमाने पुनः क्यप्ग्रहणङ्किमर्थम्। क्यबेव यथा स्याद्यदन्यत्प्राप्नोति तन्मा भूत्। किञ्चान्यत्प्राप्नोति। ण्यत्। ओरावश्यके इत्युक्तम्। ननु हलन्तत्वाण्यतापि रूपसिद्धिर्भविष्यतीत्यत आह। ण्यति त्विति॥ ई च खनः। अत्र खनधातोरीकार आदेशो विधीयते न प्रत्यय इति विधेयस्य प्रत्ययान्तरस्याभावात्क्यपोऽनुवृत्तिः सिद्धैव चकारस्तु कार्यद्वयसमावेशार्थ एवेति क्यपश्चानुकृष्टत्वाभावादुत्तरत्र सम्बन्धो भवत्येवेति बोध्यम्। ननु ये विभाषेति सूत्रेणेकारादेशे कृतेऽप्यात्वम्प्राप्नोतीति तद्बाधनायेकारान्तरस्य प्रश्लेषसूचको दीर्घनिर्देश इति क्लसः सुपठ इत्यसङ्गतमत आह। ये

SGDF

विभाषेत्यत्रेति । विषयसप्तमीत्वेऽपीति ॥ कीर्यते स्वयमेवेत्यत्राचः कर्तृय-
कीत्याद्युदात्तत्वसिद्धये तास्यनुदात्तेदितिसूत्रादुपदेशपदानुवृत्त्योपदेशेऽजन्ता-
नामित्यर्थस्यावश्यकत्वे यक्पदेन सम्बन्धाद्यगुपदेशेऽजन्तानामिति वाच्यमे-
वञ्च जायते स्वयमेवेत्यत्र स्वरो न स्यादिति ये विभाषेत्यत्र विषयसप्तमीत्व-
मावश्यकमिति भावः । अत्र तदभावस्येति । ये विभाषेत्यस्य यादि प्रत्ययविवक्षा-
यामेवप्रवृत्तिस्तदा प्रत्ययोत्पत्तेः प्रागेवेत्वन्ततो यादिः प्रत्यय इति यादि
प्रत्ययप्रकृतिपरामर्शकाल एव सौत्रक्रमलोचनेपर्य्यां न पूर्वकाल इति तस्मिन्
कालेऽयमोकारान्त इति भावः । ह्रस्वपाठेऽप्ये वमेवात्वाप्राप्तिर्बोध्या । एतत्क्ले-
शपरिहारायैवेति । यदि यादिप्रत्ययविवक्षायामात्वन्तदाऽऽत्वमुक्तरीत्यानान्तर-
ङ्गमिति ई च खन इति सूत्रप्रवृत्तेः प्राक् तस्याप्रवृत्त्या रूपासिद्धिः स्फुटैवेति दी-
र्घपाठेनेकारान्तरस्य प्रश्नेषसामर्थ्यान्न पूर्वमीत्वमित्यन्तरङ्गस्यात्वस्याप्राप्तिः ।
यदि तु ई चेति सौत्रक्रमानुरोधेनादावीत्वन्ततः क्वचितिक्रमकल्पनया यादि-
प्रत्ययोत्पत्तिकालपूर्वस्मिन्कालेऽन्तरङ्गस्यात्वस्याप्राप्तिरिति कल्पना तदा क्लेश
इति भावः । भृञोऽसंज्ञायाम् । भार्या वधूरित्यत्र संज्ञायां समजेति क्यपः प्रा-
प्तिमाशङ्क्य विभर्त्तेः क्र्यादेर्वा ण्यति भार्या वधूरित्यस्य सिद्धिः संज्ञायां
समजेति क्यप् तु भरतेरवेत्युक्तम्मूले अत्रेदम्बोध्यम् । यो बिभर्त्ति डुभृञ्धार-
णपोषणयोरिति तस्य तदनुबन्धकपरिभाषया क्यब्विधौ न ग्रहणम् यस्तु भृ
भर्त्से न इति क्र्यादिस्तस्य ञकारानुबन्धकत्वाभावान्न ग्रहणमिह स्वराधिका-
रस्थसूत्रे च ञकारानुबन्धकस्य ग्रहणादिति । अत एव सामान्ये नोक्तम् । क्यप्
त्विति । अर्थमिति । भृञोऽसंज्ञायामिति विहितः । स्वराधिकारस्थः । संज्ञायां
समजेति सूत्रविहितः । युक्तः । भृञ् इति ञकारमात्रानुबन्धकोच्चारणरूपयु-
क्तेः । इहत्यम्भरतेरेव भवनकथनन्तु स्वरूपनिर्णयाय । न तु भार्या वधूरि-
त्यस्य समाधानाय । संज्ञात्वादिहत्यस्य तत्राप्रातेः । नन्वेवम् । विभर्त्तेः
क्र्यादेर्वा क्यपोऽप्राप्तौ । भरतेर्भार्यायां क्यप्वारणायेति । भार्यार्थं विव-
क्षितयां भरतेः क्यप्वारणायेत्यन्वयः । भार्यायामित्यस्य भर्त्तव्यायामिति
नार्थः किन्तु स्त्रीविशेषे योगरूढो यो भार्याशब्दस्तत्रेत्यर्थः न चेह संज्ञायां
समजेत्यस्य प्राप्तिस्तस्य भावे प्रवृत्तेः । तदुक्तमर्थे भाव इति तत्र वर्त्तते

SGDF
Sri Gargeshwari Digital Foundation

तत्र ध्रञ्विषये भाव एवेष्यत इत्यर्थः । मूले भार्यशब्दो बहुवचनान्तः । पञ्जोः कुविखतोः । रागादित्यादीति । तेन रक्तं रागादिति निर्देशादित्यर्थः । आदिना त्यागरागहासेत्यस्य सङ्ग्रहः । एषु । न्यं क्वादिषु । क्यपो डितीति । यदा षूप्रेरण इति धातोः क्यप् तदेत्यर्थः । निपातनात्कर्त्तरीति । तयोरेवेति नियमात्कर्त्तर्यप्राप्ते निपातनमावश्यकम् । तत्त्वेन । धनत्वेन । विपूयविनीय । पूङितीति । पूञिति क्वचित् पाठः । न्यूनताभङ्गायाह । तैलाद्याविति । एषु चतुर्ष्विति । गम्यमानेष्विति शेषः । ननु पत्रशब्दस्य नपुंसकत्वविशिष्टार्थाभिधायकत्वेन युग्यशब्दस्य विशेष्यसमानलिङ्गकत्वं युक्तमेवेति सामान्ये नपुंसकत्वमित्यभिधानमनुचितमत आह । पत्रपात्रेति । एतेन । उक्तरीत्या पुंस्त्वस्यापि सम्भवेन । असावस्यदन्यतर । वारणायेति । तकारोच्चारणेन एयतो निश्चयादिति शेषः । यथोत्तरमित्यनेन वार्त्तिककारोक्तेः सप्रमाणत्वं यदुक्तन्तदुपपन्नमेवेत्याह । वार्त्तिकस्येति । शोक इत्यस्यासिद्धिरिति । निष्ठायां सेट्त्वाद् घञि कुत्वस्याप्राप्त्याऽसिद्धिरित्यर्थः । एवञ्च शोकशब्दस्य वार्त्तिकेन निष्ठायामनिट इति पूरणेन सिद्धिः सूचिता । बाह्वाविति । करबोधकाद् भुजशब्दादजित्यर्थः । इत्येतद्व्याहृत्तय इति । एतेन निपातनेन स्तोः श्चुनेति सूत्रानन्तरमुदजेर्बं इति वचनङ्कार्यमित्यनुमीयते । तत्र स्तोः श्चुनेति सम्बन्ध्यते । उदजेः स्तोः श्चुना योगे बो भवति । एतस्य वचनस्य सन्यङोरित्येतद्दृष्ट्याऽसिद्धत्वादुब्जिजिषतीत्यत्र जिशब्दस्यैव द्वित्वम् । समुद्ग इत्यादौ पदस्य विभक्त्यान्वाख्यानमिति पक्षाश्रयेण बकारादेशविधायकस्यानुमितवचनस्यासिद्धत्वात्कुत्वमादौ भवति । एतद्वचनस्योक्तविषयेऽर्थविशेषे न्युब्ज इत्यस्य प्रवृत्तिर्नत्वन्यत्रेति बोधनाय च निपातनमन्यथा न्युब्जेरचापि सिद्धे निपातनं व्यर्थमिति शङ्का स्यात् ॥ अत्र ॥ यजयाचेति सूत्रे ॥ व्याख्यानादिति ॥ भक्ष्याभक्ष्यप्रकरणेऽताद्दृशस्यापि स्मृतौ निदर्शनमूलकव्याख्यानादित्यर्थः ॥ ओरावश्यके ॥ अवश्यमित्यव्ययान्मनोज्ञादित्वाद्भावे वुञि परेऽव्ययानामिति टिलोपेऽस्य साधुत्वम् । द्योत्य इति । प्रकरणादिहावश्यकत्वस्य प्रतीतिः । अवश्यकर्त्तव्य इत्यर्थेऽवश्यं शब्दो वर्त्तते वाक्यैकदेशन्यायेन । न च लाव्यमित्यनेनैवावश्यकत्वस्य प्रकरणादिना प्रतीतिसम्भवादवश्यं शब्दस्य प्रयोगोऽनुचित इति वाच्यम् । ग-

SGDF
Sri Gargeshwari Digital Foundation

म्यमानार्थस्यापि स्पष्टप्रतिपत्तये प्रयोगस्य बहुशो दर्शनात्। व्यतिलुनीत इत्यादौ यथा। अवश्यलाव्यमित्यादौ मयूरव्यंसकादित्वादवश्यं शब्दार्थस्यैकदेशान्वयेऽपि समासः। कृदुत्तरपदप्रकृतिस्वरोऽप्येवमेव निपातनात्। लुम्पेदवश्यम इत्यन्तलोपः॥ आसुयु॥ प्रकृतसूत्रे सुग्रहणेन सुञ एव ग्रहणमित्यत्र प्रमाणमाह। सुनोतेरित्यादाविति॥ ननु निरनुबन्धकस्यैव निरनुबन्धकपरिभाषया ग्रहणं युक्तमत आह। निरनुबन्धकेति॥ इति पाठ इति॥ आङः सत्त्वेनोदात्तोपदेशस्येति निषेधविधायकसूत्रस्यानाचमेरित्युक्तत्वादप्रवृत्तिर्भवतीति भावः॥ दक्षिणाग्निविशेष एवेत्यत्र विशेषपदोपादानादाह॥ योगार्हेति॥ द्वौ दक्षिणाग्नी तयोर्मध्ये यो गार्हपत्यादानीयते तस्मिन्नेव निपातनन्तथैव शिष्टाचारानुसारिव्यवहारात्॥ मूले वैश्यकुलादेरिति। वित्तवद्वैश्यकुलादेरित्यर्थः॥ आदिना भ्राष्ट्रपरिग्रहः॥ प्रणाय्योऽसम्मताविति बहुव्रीहिरित्यनेन यस्मिन्नर्थे निपातनमत्र चौरादौ क्रियते तस्य बोध्यत्वं सूचितम्। सम्मतिरित्यत्र सम्पूर्वकान्मनधातोः प्रीतिभवनानुकूलव्यापारार्थकात्कर्मणि बाहुलकात्क्तिन्। भावे क्तिन्प्रत्ययेनैवेष्टसिद्धौ तावत्पर्यन्तानुसरणं व्यर्थमित्याशयेन मूले भोगेष्वादर इति॥ सा यत्र लोकानान्नास्तीत्यर्थविवक्षायां सप्तम्यर्थे बहुव्रीहिः॥ अथ वा सम्मतिशब्दः पूर्ववदेव। सा यस्य नास्तीति षष्ठ्यर्थे बहुव्रीहिर्वा॥ तदुक्तमन्तेवासीति॥ प्रणेयोऽन्य इति। घटादिरिति शेषः॥ अत्र कर्मणि यत्॥ पाय्यसान्नाय्य॥ मानकरणेऽर्थे पाय्यमिति निपात्यते तस्य द्वाभ्यामपि धातुभ्यामुपपत्तिरित्याशयेनाह॥ मिनातीति॥ पयोदधिवेत्यर्थ इति॥ ऐन्द्रन्दध्यमावास्यायामैन्द्रम्पयोऽमावास्यायामित्युक्तत्वादिति भावः। ऐन्द्रं हविरित्यत्र हविः सामान्ये प्रयोगस्तु लक्षणया॥ मूले धाय्या ऋगिति। सामिधेनीनाम्मध्ये ऋग्विशेषः॥ क्रतौ कुण्डपाय्य॥ अत्र कुण्डपाय्ये यत्प्रत्ययो द्रष्टव्यः। कुण्डपाय्ये यद्विधिः। कुण्डपाय्ये यद्विधेयः। कुण्डपाय्यः क्रतुरिति भाष्यात्। पाधातोर्यतितस्य युग्निपात्यते तेन यतोऽनाव इत्याद्युदात्तत्वम्भवति। तत उपपदसमासे कृदुत्तरपदप्रकृतिस्वरेणाकारोदात्तकोऽयम्॥ सञ्चाय्यशब्दे तु ण्यत्प्रत्यय एव। प्रकरणात्। निपातनन्त्वायादेशस्य॥ क्रतौ किम्। कुण्डपानम्। सञ्चेयः काष्ठादिः॥ अग्नौ परिचाय्योपचाय्य॥ सूत्रेऽग्निपदं सधारणार्थं यदिष्टकाप-

यनादिनिर्मितं स्थलन्तत्र शाब्दिकम्। निपातनञ्च स्वादायादेशयोः। एवमे-वोपचाय्येऽपि बोध्यम्॥ समूह्यं तु सम्पूर्वकाद्वहधातोर्ण्यति सम्प्रसारणन्दी-र्घश्च निपात्यते॥ अत एव प्रत्युदाहरणोपपादनावसरे संवाह्यमित्युपात्तम्॥ अत्र यो विशेषस्तमाह। वह्निसमानार्थ इति॥ चित्याग्निचित्ये च॥ चित्यश-ब्दे कर्मणि क्यब्न्तो निपात्यते॥ अग्निचित्यशब्दे तु भावे क्यबन्तोदात्तत्वयो-र्निपातनम्। अत एवाग्निचित्येत्यन्तोदात्तो भाव इति भाष्यसंवादः॥ सर्वो-पकारकत्वात्प्रकरणान्ते आह। प्रैषातिसर्गप्राप्तकालेति मूले॥ लोटा बा-धेति। लोटस्तत्र विशिष्यविधानादिह प्राप्तो बाधो नेत्यर्थः॥ वा सरूपन्या-येन बाधाभावसिद्धौ पुनरपि कृत्यग्रहणवैयर्थ्यमत आह। स्त्र्यधिकारादिति॥ अत्र स्त्र्यधिकारादूर्ध्वमित्यस्त्रियामित्यस्यार्थकथनम्। प्राप्यांशस्तु वासरूप-विधिः क्वचिन्नेत्येव॥ अत एव। एतादृशस्य प्राप्यांशस्य सत्त्वादेव॥ न नि-त्यम्बाध इति॥ अयम्भावः। समानकर्तृकयोः पूर्वकाल इति सूत्रस्य समानक-र्तृकयोरर्थयोर्मध्ये पूर्वकालविशिष्टार्थवृत्तेर्धातोः क्त्वाप्रत्यय इत्यर्थेन पूर्वकाल-कत्वं क्त्वाप्रत्ययद्योत्यन्तच्च प्रकारतयाऽसित्वा भुङ्क्त इत्यत्रासनक्रियायाम्भासते। तादृशी चासनक्रिया स्वसमानकर्तृकत्वस्वोत्तरकालिकत्वोभयसम्बन्धेन भुजि-क्रियायाम्प्रकारतया भासते। उक्तोभयसम्बन्धेन पूर्वकालिकासनविशिष्टम्भोज-नमिति बोधः। आस्यते भोक्तुमित्यत्रापि तुमुन्ण्वुलौ क्रियायाङ्क्रियार्थायामिति सूत्रे क्रियार्थायामित्युपादानात्तुमुन्प्रकृत्यर्थक्रियापूर्वकालत्वस्यासनक्रियायाम् फलार्थकतुमुन्समभिव्याहारात्प्रतीयते॥ एवञ्चोभयोः प्रयोगयोः समानार्थक-त्वादास्यते भोक्तुमित्यर्थे आसित्वा भुङ्क्ते इत्येव स्यात्। न तु आस्यते भोक्तु-मिति। न च तुमुना क्त्वाप्रत्ययस्य बाधशङ्का भवति। क्त्वाप्रत्ययविधायकसूत्रे पूर्वकाल इत्यस्य साक्षादुपादानात्। तुमुन्विधायके तु कार्यार्थकार्थशब्दोपादाने-न कारणत्वङ्गम्यते। कारणत्वस्य च पूर्वकालघटितत्वेन तत्र पूर्वकालत्वङ्गम्यते तेन क्त्वाप्रत्ययेन तुमुनो बाध उक्तः। वा सरूपन्यायस्य प्रवृत्तौ तु भुज्धातो-स्तुमुनि कृते सति तत्समभिव्याहारेणासने पूर्वकालकत्वङ्गम्यत इति नासधा-तोस्त्वाप्रत्ययः किन्तु लट्। एवञ्च यत्र धातोः पूर्वकालविशिष्टक्रियावाचकत्व-न्तत्र तद्द्योतकः क्त्वाप्रत्यय इति॥ तदुक्तं समानकर्तृकयोरिति सूत्रभाष्ये

इह कस्मान्न भवति आस्यते भोक्तुमिति। कुतः कस्मान्न भवति। किमासेः भा-
वः स्विद्भुजेः। भुजेः कस्मान्न भवति। अपूर्वकालत्वात्। आसेस्तर्हि कस्मान्न
भवति। यस्मादत्र लङ्भवति। एतदत्र प्रष्टव्यं लङत्र कथम्भवतीति॥ लट्चात्र
वासरूपेण भविष्यतीति॥ अत्र लट्चात्र वासरूपेणेत्युपादानाद्यत्र धातोः
पूर्वकालविविशिष्टक्रियावाचकत्वन्तत्र क्त्वाप्रत्यय इति ध्वनितमन्यथा लटः पू-
र्वकालार्थकत्वाभावेन कथं वा सरूपेण तदुपपादनम्॥ न च वा सरूपोऽस्त्रिया-
मितिसूत्रे स्त्रियामित्यनेन स्त्र्यधिकारात्पूर्वं वासरूपविधिर्नेति स्त्रियामित्यधि-
कारमुद्दिश्यवासरूपविधिर्निवर्त्तत इति वाऽर्थ इति क्त्वाविषये कथं स इति वाच्यम्।
अस्त्रियामित्यस्य स्त्र्यधिकारे नेत्येवार्थो न तु तमुद्दिश्येति। एवञ्च स्त्र्यधिकारा-
दूर्ध्वमपि वासरूपविधिर्भवति परन्तु क्वचिदेवेत्याशयेनात्र मूले क्वचित्पदो-
पादानमिति। मूले :क्तल्युडिति॥ हसितञ्छात्रस्येत्यर्थे हसनमित्यर्थे च घञ्।नर्द्द
षस्यानः सोम इत्यत्रातो युजित्यस्य विषये ख्लुम॥ इच्छति भोक्तुमिति तुमु-
न्विषये इच्छार्थेषु लिङ्लोटाविति लोड्न॥ लिङ् तु भवत्येव। क्वचिन्नेत्यु-
क्तेः॥ अर्हे कृत्यतृचश्च॥ अत्र चकारेण लिङ् यदीति सूत्राल्लिङनुकर्षः। अने-
न लिङा कृत्यतृचोर्बाधस्य प्रसक्तिः॥ भव्यगेयप्रवचनीय। यदुक्तम्मूले कर्त्तरि
वा निपात्यत इति तस्योपपत्तिमाह। कर्त्तरि कृदित्यत इति॥ इति कृत्यप्रक्रि-
येति। न च कृत्याः प्राङ् ण्वुल इत्युपादानात्कृत्याधिकारस्य प्रागेव निवृत्ते-
र्भव्यगेयेति सूत्रस्य कृत्येषु व्युत्पादनमनुचितमिति वाच्यम्। कर्त्तरि कृदिति
सूत्रभाष्ये कर्त्तरीतिसूत्रस्यानिर्दिष्टाद्इतिन्यायेन प्राप्तस्य स्वार्थत्वस्य वारकतया
सार्थकत्व मुक्त्वा घञ्विधायकेन भाव इति सूत्रेणज्ञापकेनपुनः स्वार्थत्वाप्रसंग-
माशंक्योक्तोभावभेदोभाष्यइत्यनेन तस्य सूत्रस्य चारितार्थ्यम्प्रदर्श्य कृतांस्वार्थि-
कत्वापत्तिवारकतयाकर्त्तरीत्यावश्यकमित्युक्तम्। ततः ल्युन्विधायकेऽआव्येति
सूत्रे करण इति पाठेन कृत्यविषयेतयोरित्यनेनविशेषविहितेन बाधेसिद्धेतयो-
रेवेतिसूत्रस्थैवकारस्य तत्रभव्याद्यर्थमित्यनेन कृत्यसंज्ञया कृत्संज्ञायाः समावे-
शसूचनेनगेयोमाणवकः साम्नाम्। गेयानिमाणवकेनसामानीत्युदाहरणप्रदर्श-
नेन च भव्यादीनामपिकृत्यान्तत्वमनुमीयतइत्यभि प्रायेणभव्येतिसूत्रस्यकृत्यप-
क्रियायां व्युत्पादनात्। भव्यादिष्वष्टकायदादयः। कृत्याः। कर्त्तर्यवाधककर्मार्थ-

SGDF
Sri Gurgeshwari Digital Foundation

कत्वतात्पर्यंकत्वादितिन्यायस्यध्वननादिति ॥

इति कृत्यप्रक्रियाविवरणम् ।

ण्वुल्तृचौ । अत्र तृचः प्रत्ययस्वरेणान्तोदात्तत्वे सिद्धे चकारोऽप्तृन्तृजित्यत्र विशेषणार्थः । तस्मिन् सूत्रे तृ इत्युच्यमाने मातरौ मातर इत्यत्र प्राप्नोति स्वसृनप्तृग्रहणन्नियमार्थं भविष्यति एतयोरेव योनिसम्बन्धयोर्नान्येषां योनिसम्बन्धानामिति । एवञ्च तत्रानुपयुक्तत्वाच्चकारस्य प्रयोजनमाह । तृच इति । यद्यपि कालविशेषोपादानं कृत्वा एतौ न विहितौ तथापि भाष्यप्रामाण्याद्वर्त्तमानकाल एवानयोः प्रयोग इत्याह । अनयोरिति । तदुक्तं भाष्ये तृजादिषु वर्त्तमानकालोपादानमध्यापकवेदाध्यायाद्यर्थम् । अध्यापकः वेदाध्यायः अधीतवति अध्येष्यमाणे वा मा भूदिति न वा कालमात्रे दर्शनादन्येषाम् न वा कर्त्तव्यम् । किं कारणम् कालमात्रे दर्शनादन्येषाम् कालमात्रे अन्ये प्रत्यया दृश्यन्त इति अन्येषाम् ण्वुल् तृज्व्यतिरिक्तानाम् एतेन वर्त्तमानकालोपादानङ् क्रियते तदा तस्याधिकारत्वात्प्रत्ययान्तरेषु दोषः स्यादिति वर्त्तमानाधिकारो न कार्यः अनयोः कालान्तरे अनभिधानमिति ध्वनितम् । न ह्यध्यापकोऽध्येता प्रयोगोऽधीतवत्यध्येष्यमाणे वा दृश्यते । आशिषि च । अत्राशिषीति प्रकृत्यर्थस्य विषयतासम्बन्धेन विशेषणम् । न तु प्रत्ययार्थः कर्त्तरि कृदिति कर्त्तरि प्रत्ययविधानात् । सा चाशीः प्रयोक्तृसमवेताऽप्राप्तप्राप्तीच्छा । एवं च जीवक इत्यादौ जीवधातोः शब्दप्रयोगकालावधिकोत्तरदीर्घकालावच्छिन्नप्राणधारणेच्छाविशिष्टजीवने लक्षणा । एतादृशस्य धात्वर्थस्य वुन्प्रत्ययस्य समभिव्याहारेण प्रतीतिः । एवमेव नन्दक इत्यादावपि बोध्यम् । तदाह । शास्यमानेति । कर्मण्यण् । धातोरण् प्रत्ययः कर्म चोपपदसंज्ञं भवतीत्यर्थः । मूलेऽनभिधानादिति । अनभिधाने मानन्तु प्रकृतसूत्रस्थभाष्यमेव । तत्र हि कर्मणि निर्वर्त्यमानविक्रियमाण इति वक्तव्यम् इह मा भूत् आदित्यं पश्यति हिमवन्तं शृणोति ग्रामङ्गच्छतीति निर्वर्त्यकर्मस्वरूपञ्च हरिणा दर्शितम् । सती वाऽविद्यमाना वा प्रकृतिः परिणामिनी । यस्य नाश्रीयते तस्य निर्वर्त्यत्वमाचक्षते इति । यस्य सती परिणामिनी प्रकृतिः कार्यसामानाधिकरण्येन यदा न विवक्ष्यते तदा तन्निर्वर्त्यङ्कर्मोच्यते । यथा कुम्भङ्करोतीति । अत्र

SGDF Sri Gargeshwari Digital Foundation

कुम्भस्य विद्यमानापि मृद्रूपा प्रकृतिः कुम्भसामानाधिकरण्येनाविवक्षितेति कुम्भात्मकं कर्म निर्वर्त्यम् । यदा तु प्रकृतेः कार्याभेदेन प्रतीतिर्जायतामितीच्छया मृदङ्घटङ्करोतीति प्रयोगस्तदा तद्घटादिरूपङ्कर्मविकार्यमेव । अत्रोभयोपादानेन कार्यस्य घटस्य रूपान्तरपरिग्रहः प्रतीयते इति घटात्मकं कर्म विकार्यम् । तदुक्तं हरिणा विकार्यं कर्म । प्रकृत्युच्छेदसम्भूतङ्किञ्चित्काष्ठादिभस्मवत् । किञ्चिद्गुणान्तरोत्पत्त्यासुवर्णादिविकारवदिति । एतदुत्तरार्द्धोपात्तं विकार्यकर्मत्वन्तदा घटादेरस्त्येव । इदानीम् घटादिकं कर्म विकार्यमेव न तु प्राप्यम् । क्रियाकृतविशेषाणां सिद्धिर्यत्र न गम्यते । दर्शनादनुमानाद्वा तत्प्राप्यमिति कथ्यत इति तल्लक्षणात् । दर्शनात् प्रत्यक्षात् । यदा तु प्रकृतेः कार्याभेदेन करणत्वेन सम्बन्धित्वेन वा विवक्षा मृदा मृदो वा घटङ्करोतीतिरीत्या तदा घटादिकं कर्म निर्वर्त्यमेव । अनुमानेन कर्मरूपाप्रतीतिर्यत्र तत्कर्म निर्वर्त्यमेव । यथा पुत्रः सुखं करोति । अत्र पुत्रस्य चेष्टादिदर्शनेन पित्रादिनिष्ठं सुखात्मकङ्कर्म सुखविकासादिनानुमीयत इति । अत्र कर्मणः सुखस्याविद्यमाना प्रकृतिः कार्याभेदेन न प्रतीयत इति यद्यपि तथापि सुखस्य प्रकृतिरन्तःकरणीयविलक्षणज्ञानाकारा सा प्रकृतिरनुमितिगोचरा भवतीति प्राप्यत्वाभावान्निर्वर्त्यत्वम् । प्रकृतेः सामानाधिकरण्येन विवक्षाया अभावात् । एवञ्चादित्यम्पश्यतीत्यादावादित्यादिः प्राप्यङ्कर्मेति स्पष्टमेव । ततः कर्मणि निर्वर्त्यमाना विक्रियमाण इति चेद्वेदाध्यायादीनामुपसङ्ख्यानम् । वेदाध्यायः चर्चापारः शत्रुघ्नीवद्विभ्यश्चेति वक्तव्यम् । भारहरः कमण्डलुग्राहः उष्ट्रप्रणायः भारवाहः । अपरिगणनं वा न वार्थः परिगणनेन कस्मान्न भवति आदित्यं पश्यति हिमवन्तं शृणोति ग्रामङ्गच्छतीति । अनभिधानात् अनभिधानादेवात्र न भविष्यतीति । अन्यत्राप्यनभिधानं वा चिदाश्रयमित्याह । ओदनपचादय इति । मूले आरम्भसामर्थ्यादिति । सुपीत्यनेन सिद्धेऽस्यारम्भसामर्थ्यादित्यर्थः । आरम्भसामर्थ्यात्पूर्वापेक्षया स्य इतिसूत्रविषये किञ्चिद्वैलक्षण्यमवश्यं वाच्यमेवञ्चार्थनियामकस्य कर्त्तरीत्यस्यानुपस्थितिरेव कल्प्यते । एवञ्चानिर्दिष्टार्थत्वाद्भाव इति लब्धम् । अत एवैतद्विहितप्रत्ययान्तस्य नित्यैकवचनान्तत्वमेव । लिङ्गसिद्धिस्तु लोकाश्रयत्वात् । उपपदसमाससिद्धिफलकस्सायं योगः । तेन घञर्थे

SGDF
Sri Gargeshwari Digital Foundation

कविधानमित्यनेन सिद्धिर्न शङ्कनीया। घञर्थे कविधानमित्यस्य कर्तृकारका-ऽर्थत्वात्प्रतिष्ठतेऽस्मिन् धान्यादिकमित्यर्थे प्रस्थशब्दस्य सिद्धिः। वयसि च। वयसि गम्यमाने इत्यर्थः। कवचहर इत्यनेन कवचस्यातिगुरुत्वेऽपि तद्धरणेन सम्भाव्यमानेन वा कर्तुः पौगण्डाद्यवस्थाविशेषो गम्यते। रूपातेरिति। तत्र हि पुनर्धातुग्रहणेन टप्रत्ययस्य बाधनमुक्त्वा कुमारवाडवस्त्वाह नैषा शङ्का शङ्क्यैषा; रूपातिः शब्दकर्मा तस्यैषः प्रयोग इति प्रतिपादितम्। स्थः क चेत्यत्र भाष्य; इति। तत्र हि किमर्थं स्थः ककिपावुच्येते न क्विप्सिद्धः अन्येभ्योऽपि दृश्यते इति। कस्तातोऽनुपसर्गे क इति। न सिध्यति। विशेषविहितः कः सामान्यविहितं क्विपम्बाध्येत वासरूपेण क्विबपि भविष्यति इदं तर्हि शंस्थः शंस्थाः उक्तमेतत् शमि संज्ञायां धातुग्रहणं कृञो हेत्वादिषु टप्रतिषेधार्थमिति स यथैवाच् टम्बाधते एवङ् ककिपावपि बाधेतेत्युक्तम्। अत्र शंस्थ इतिप्रयोगसिध्यर्थं को विधेयः अग्रस्थ कोऽज्बाधकत्वेन चरितार्थ इत्यस्य क्विबपवादत्वङ्गतमिति; वासरूपन्यायानवसरात्क्विपः परत्वात्केन नित्यम्बाधः स्यादिति क्विबपि विधेयः न चाच्प्रत्ययेन शंस्था इति भविष्यतीति वाच्यम्। भसंज्ञानिमित्तप्रत्यये आतोलोपानापत्तेः। पुरस्तादपवादन्यायेन टस्यैव बाध इति तु न शक्यम्। येन नाप्राप्तिन्यायेन क्विबेव बाध इत्यपि वक्तुं शक्यमित्यस्य भाष्यस्य बाध्यसामान्यचिन्तामाश्रित्योभयबाधकत्वतात्पर्यकत्वात्। शंस्थाशब्दे घुमास्थेतिसूत्रविहितेत्वस्य भाष्यकारीयप्रयोगादेवाप्रवृत्तिः ईत्वमवकारादाविति वार्त्तिकन्तु धीध्यायतेर्दधातेर्वेति ध्यायतेः सम्प्रसारणमिति वार्त्तिकव्याख्यानावसरे उक्तत्वेन प्रत्याख्यातमेव। अथ वा क्विप्पदं साहचर्याद्विच उपलक्षणम्। चरेष्ट इत्यत्र भाष्यमिति। तत्र हि कुरूं चरतीत्यत्र टप्रत्ययमाशङ्क्य चरेर्भिक्षाग्रहणं ज्ञापकङ्कर्मण्यप्रसङ्गस्येत्युक्तम् भिक्षाशब्दे उपपदे भिक्षासेनेत्यनेन टो विधीयते यद्यनेन कर्मण्युपपदे टः स्यात्तदानेन तत्र टविधानं व्यर्थं स्यात्। अत्र चरतिश्चरणकरणकेऽर्जने वर्त्तते भक्षणार्थको वा। ज्ञापकपरभाष्यप्रामाण्यात्तत्रैवास्य प्रयोगः। एतच्चाधिकरण इत्यस्य कर्मणीत्यस्य च सम्बन्धप्रदर्शनेन यथायोगं सम्बन्ध इति ध्वनितमिति भावः। चरेष्टः। अधिकरण इतीति। ज्ञापकेन कर्मण्युपपदेऽस्याप्रवृत्तावधिकरण इत्येव परिशेषाल्लब्धम्। प्रत्ययाव-

SGDF
Sri Gargeshwari Digital Foundation

यवत्वादिति। उणादीनां व्युत्पन्नत्वाभिप्रायेण। अन्तकरशब्दस्य नञा समासेऽनन्तकरस्य तु नेष्टस्य सिद्धिः। अनन्तशब्दे उपपदे कृञष्टे उपपदे समासे तदुत्तरप्रकृतिस्वरस्य प्रवृत्तिर्भवति नञाऽन्तकरशब्दस्य समासे तु तत्पुरुषे तुल्यार्थेति पूर्वपदप्रकृतिस्वरापत्तेः। यदुक्तम्परत्वादिति तस्योपपत्तिरच्प्रत्ययस्य टप्रत्ययाप्राप्तियोग्ये विषये चारितार्थ्ये सति घटत इत्याशयेनाह। अजहेलादाविति। किंदीत्यादिना यत्तच्छब्दयोः परिग्रहः। एतेषां ग्रहणसत्त्वे त्वहेलादावपि किमादिषूपपदेषु सूत्रेण टस्य प्राप्त्याऽच्प्रत्ययस्य चारितार्थ्यं न स्यादिति भावः। अभिमान इति कथनबीजन्तु भाष्यकृता सूत्रस्थकिमादिग्रहणस्याप्रत्याख्यानेनाच पर्यायेण द्वयोरपि टाचोः प्रवृत्तिरिष्टैवेति। किञ्च पुंयोगाविवक्षायामपि स्त्रियाः कर्तृत्वे किङ्करीति सूत्रकारमतसिद्धस्य भवदुक्तरीत्याऽसिद्धिरपि द्रष्टव्या। कर्मणि भृतौ अत्र कर्मणीत्यनुवृत्त्यैव सिद्धे पुनः कर्मणीत्युपादानात्कर्मणीति कर्मशब्दपरम्। अस्य कर्मशब्दस्य। व्रीहिवत्सयोरिति वक्तव्यमितिवार्त्तिकस्य समुदायेन प्रतिपादयितुमिष्टयोरित्यर्थः। तेन तयोः प्रत्ययार्थकर्तृविशेषणत्वमेवाभिप्रेतमिति बोध्यम्। फले ग्रहिरात्मम्भरिश्च। फलेग्रहिशब्दस्यार्थविशेषे रूढिम्प्रदर्शयति स्यादवन्ध्यः फलेग्रहिरित्यमरः। यस्य वृक्षस्य फलग्रहणयोग्यता तस्मिन् वृक्षे चायम्प्रयोगः फलोत्पत्त्यनवच्छेदककालसम्बन्धेऽपीष्यते। एजेः खश्। अत एव। ण्यन्तादिति व्याख्यानादेव। चरितार्थमिति। शकारोच्चारणमस्य सार्वधातुकत्वे शप् यथा स्यादिति कृतम्। केवलाद्यजेर्यद्ययं स्यात्तदा शपि सत्यसति वा फलतो न विशेषः। न चोत्तरार्थमस्य शित्वमस्त्विति वाच्यम्। इहार्थत्वस्यापि सम्भवे उत्तरार्थत्वमात्रत्वस्यायुक्तत्वादिति भावः। न नुमिति। अनव्ययस्य सम्बन्धेऽपि न सर्वत्राव्ययस्य प्रतिषेधः। उपकुम्भम्मन्ये इत्यादौ मुमागमस्येष्टत्वात्। एतच्चाव्ययीभावश्च लुङ्मुखस्वरोपचारेष्वेवाव्ययत्वस्वीकारेण लभ्यते। नासिकास्तन। मूले यथासंख्यं नेष्यते इति। प्रकृतसूत्रे भाष्ये स्तने धेटः नासिकायां ध्मश्चेति कथनादिति भावः। नाड़ीमुष्ट्योश्च। इदन्नासिकानाड़ीमुष्टीघटीखरीष्विति वक्तव्यमिति नासिकास्तनेति भाष्यदर्शनेन वार्त्तिकमिति प्रतीयते यद्यपि तथापि वृत्तावष्टाध्यायाञ्च पृथक् पाठाद्यथासङ्ख्यसूत्रस्थभाष्यस्वारस्याच्च सूत्रमेवेति प्रतिपन्नाः। यथासंख्यसूत्रस्थ

SGDF Sri Gurgeshwar Digital Foundation

सामान्यत: प्रवृत्तौ करणाधिकरणयोरित्यनुवर्त्तमानेऽपि तृष्णोर्घञिति सूत्रेण घञि विधीयमाने तृष्णौ द्वौ करणाधिकरणे इह तत्र संख्यातानुदेश: प्राप्नोतीत्यादिना भाष्ये सङ्ख्यातानानुदेशाप्ति प्रसङ्गमाशङ्क्य समानयोगे संख्यातानुदेशं वक्ष्यामीत्यनेन समाधाय धाधेटोर्नाडीमुष्ट्यो: खलगोरथात् इनित्रकटजचश्च सिन्ध्वयकराभ्यां कन् अणजौ चेत्यत्र संख्यातानुदेशो न प्राप्नोतीति तादृशोऽपि दोष उक्त:। एतदर्थे यथासङ्ख्यमनुदेश: समानां स्वरितेनेत्यनेन सिद्धान्तितम्। तत्र दोषप्रतिपादनपरभाष्ये खलगोरथादित्यस्य सिन्ध्वपकराभ्यामित्यस्य च यथा सूत्रत्वन्तथा नाड़ीमुष्ट्योरित्यस्यापि सूत्रत्वमिति समभिव्याहाराप्रतीयते। वस्तुतस्तु नाड़ीमुष्ट्योर्विषये संख्यातानुदेशो न प्राप्नोतीति यथासंख्यसूत्रस्थमेकदेशयुक्ति:। नासिकास्तनयोरिति सूत्रभाष्यविरोधेनात्र यथासंख्याभावस्येष्टत्वात्। तथाहि। स्तने धेट: नासिकायां ध्मश्च धेटश्चेति वक्तव्यमित्यनेन यथासंख्याभावार्थं वार्त्तिककृता योगविभागो दर्शित:। तन्माध्यव्याप्तिमुद्भावयन् भाष्यकार आह। अत्यल्पमिदमुच्यते नासिकानाड़ीमुष्टिघटीखरीष्विति वक्तव्यम्। नासिकन्धम: नासिकन्धय: नाडिन्धम: नाडिन्धय: मुष्टिन्धम: मुष्टिन्धय इति रीत्या प्रतिपादितम्। उदि कूले रुजिवहो: ख-शोदीति नोपपदम्। हरतेर्दृतिनाथयोरितिसूत्र इवोत्कूलयोरितिद्विवचदनिर्देशे कर्तव्ये उदि कूल इति विभिन्नविभक्तिनिर्देशसामर्थ्यात् किन्तूदि सति कूले उपपदे रुजिवहोरनन्तर: प्रत्यय इत्यर्थस्तेन यत्सिद्धन्तदाह मूले उत्पूर्वाभ्यामिति। अत एव यथासंख्यसूत्रे भाष्ये उक्तञ्चोदिरुपपदम्। किं तर्हि विशेषणमिति। युक्तत्वादिति। द्वितीताया इति शेष: राजदाराणाङ्गुप्तत्वतिशय प्रतिपादनपरमेतद्वाक्यम्॥ एवं ता गुप्ता यन्निवारणानर्हदर्शनमपि सूर्यन्न पश्यन्तीति॥ प्रियवशे वद: खच्। अत्र चकार: खचि ह्रस्व इत्यत्र विशेषणार्थ उपायतस्तस्य वैयर्थ्यमुपपादयति। खचखित्त्वमिति। खे ह्रस्व इत्युच्यमाने कुलात्ख इति कुलशब्दात् खप्रत्यये कुलीन इत्यत्र यस्येति लोपस्य स्थानिवद्भावेन सकारस्योपधात्वेऽपि नातिप्रसङ्ग इत्याह। णावित्यनुवृत्त्येति। मन्वचस्येतिपरिभाषयाऽच इत्यस्योपस्थितौ खचि यददन्तस्योपधाया अच इत्यर्थेन कुलीन इत्यस्य सिद्धिर्भविष्यतीति णावित्यनुवृत्तिर्व्यर्थेति चेन्न। ऊदुपधाया इतिसूत्र-

SGDF
Sri Gurgeshwari Digital Foundation

दुपधापदसम्बन्धे सति निर्दिष्टस्थानिकत्वेनाचस्येति परिभाषाया अनुपस्थितिरित्याशयात्। किञ्च क्वचिद्यदङ्गं तदुपधाया अच इत्यर्थश्चेत् स्यात्तदा द्विषत्परयोस्तापेरितिसूत्रस्य यदुदाहरणमिच एकाचोऽमितिसूत्रीयभाष्ये उक्तम्। हत्तिकारादिमर्वंजनसिद्धन्द्विषन्तपः परन्तप इति तस्यासिद्धिः स्यात् ह्रस्वत्वे चिकीर्षिते णिलोपस्य स्थानिवद्भावेन खच्परमङ्गं णिजन्तमेव तदुपधाभूतस्य पकारस्याच्त्वाभावात्। णावित्यनुवृत्तौ तु खच्परे णौ यदङ्गन्तदुपधायाऽश्चाव्यभिचारादचपरिभाषाया इहानुपस्थितिरेवेत्याशयः। णावित्यस्याभावे यदि कुलीन इत्यत्र लकारस्य यस्येतिचेत्यल्लोपस्य स्थानिवद्भावेनोपधाभूतस्य ह्रस्वः स्यात्तदा ऌकारः स्यात् तस्मिंश्चेकारनिमित्तकयणादेशापेक्षयाऽन्तरङ्गत्वादुकारस्य यण् स्यादन्तरङ्गत्वञ्च पट्व्या मृद्व्या कर्त्रीतिवल्लक्ष्यभेदेन लक्षणस्य भेदकल्पनया पूर्वोपस्थितनिमित्तकत्वरूपम्बोध्यम्। भाष्यप्रामाण्यादिति। तत्र ह्युपपदविधौ भयाढ्यादिग्रहणमित्युक्तम्। व्याख्यानादिति। संज्ञापदापकर्षमूलकव्याख्यानादित्यर्थः। इयञ्च संज्ञायातौदनेनातिथ्यादिभीर्जितो भवतितावत्प्रमाणकस्य। अलोन्त्यपरिभाषयैव सिद्धे दारावाहन इत्यत्रान्तशब्दोपादानमर्थकमत आह। अन्तग्रहणं स्पष्टार्थमिति। वार्तिकेषु प्रायो लाघवगौरवचर्चा नाद्रियत इत्यस्यार्थस्य स्पष्टप्रतिपत्त्यर्थमित्यर्थः। चरितार्थमिति। भविष्यद्वर्तमानयोः प्रत्ययविधायकतया चरितार्थमित्यर्थः। आढ्यसुभगाच्विप्रत्ययस्य वैकल्पिकत्वेनच्विप्रत्ययाभावेऽपि च्व्यर्थत्वन्न विरुध्यते। मूले निषेधसामर्थ्यादिति। च्व्यन्ते उपपदे ख्युनो निषेधेऽपि यदि ल्युट् स्यात्तदा प्रतिषेधोऽनर्थकः स्यात्। रूपस्वरे विशेषाभावात्। च्व्यन्तस्याव्ययत्वेन मुम्कृतस्य च्व्यन्तस्य गतिसंज्ञकत्वेन नित्यसमासकृतस्य च विशेषस्याभावात्। भाष्यमतेत्विति। कर्तरि भुवः खिष्णुच्खुकञावित्युत्तरत्रानुवृत्त्यर्थत्वेनाच्वावित्यचारितार्थ्यस्य प्रदर्शनात्। तेनाढ्योभवितेत्यत्र तौ नेति पूर्वसूत्रविषये ल्युङ्भवत्येवेति भावः। ख्युच तु नेति ग्लाजिस्थश्चेतिसूत्रार्थं विभक्तं यद्भुवश्चेतिसूत्रन्तस्य लोकसाधारणत्वस्य वक्ष्यमाणत्वात्खिष्णुच् तु नेत्यर्थः यद्यपि भुवश्चेतिसूत्रव्याख्यानावसरे मूले छन्दसीत्यस्य णिच्छन्दसीत्यतोऽनुवर्तमानस्य सम्बन्धो दर्शयिष्यमाणस्तथाप्याढ्यसुभगेतिसूत्रभाष्ये पूर्वोक्तरीत्याऽच्वावित्यस्य वैयर्थ्यमादृश्य उत्तरार्धं तर्हि प्रतिषेधो वक्तव्यः

SGDF

कर्तरि भुवः खिष्णुच्खुकञौ अच्वावित्येव आढ्यीभविता अथेदानीमनेन उक्तो-ताच्छीलिक इष्णुच्विधीयते सोऽत्र कस्मान्न भवति रूढिशब्दप्रकारास्ताच्छीलिकाः न च रूढिशब्दाःगतिभिर्विशिष्यन्ते न हि भवति देदवतः प्रदेवदत्त इतीष्णुजा-प्तिपरम् भाष्यमेव भुवश्चेत्यस्य लोकवेदसाधारणत्वे प्रमाणमिति भावः । न चक-र्त्तरिक्रदितिसूत्रेण कर्त्तर्यस्य सिद्धेः कर्तरीति व्यर्थम् । करण इत्यस्यानुवृत्तिभ्रम-वारकतयाऽस्य चारितार्थ्यात् । यदि करण पदस्यास्वरितत्वेनैवासम्बन्ध इतिकल्प्य-तेतदा तु कर्त्तरीति व्यर्थमेव । ननुभूधातोरुदात्तत्वेनेटा भविष्णुशब्दः सिद्ध एवेति खिष्णुच इकारो व्यर्थः । एवञ्च प्रत्ययस्वरेणान्तोदात्तत्वे सिद्धे चकारोऽप्यत्र न कार्य इत्यपरं लाघवमिति चेन्न । नञः परत्वं यत्रेष्णुजन्तस्य तत्र क्रत्योकेष्णुचा-र्वादयश्चेत्युत्तरपदान्तोदात्तत्वसिध्यर्थमिहेकारस्यावश्यकत्वात् इडागमे सत्य-यमपि णुजेवेति तु वक्तुमशक्यम् लाक्षणिकत्वात् । स्नुग्मोऽनुदकेक्विन् । अत्रत्यो नकारो भाष्यकृता प्रत्याख्यातः । तथाहि । नायं स्वरार्थः । स्नुशेरेकाच्त्वात् । ना-प्युत्विगित्युत्तरार्थः तत्र दधृकसब्दस्य द्विर्वचनान्तोदात्तयोर्निपातनात् । क्विन्प्र-त्ययस्येत्यत्र विशेषणार्थ इत्यपि न तत्रापि क्विप्रत्ययस्येत्येव सिद्धिः । क्विपो व्या-वृत्तिस्तु तदनुबन्धकपरिभाषया भविष्यतीति न च स्पृशधातोर्यङ्लुगन्ताद्यत्र क्विन्तत्राद्युदात्तत्वसिध्यर्थन्नित्वमस्त्विति वाच्यम् । नकारप्रत्ययाख्यानपरभाष्य-प्रामाण्येन यङ्लुक्यस्यानभिधानस्य । कल्पनात् । सामर्थ्यादिति । स्पृशधातो-रेकाच्त्वान्क्विन्क्विपोः स्वरेऽपि विशेषाभावात् । कुत्वकृतो विशेषस्तु न । क्विन्प्र-त्ययस्येति बहुव्रीह्याश्रयणात् । सत्सूद्विषद्रुह । अत्र सदादिषु केषाञ्चिद्धातूनां सकर्मकात्सुपीत्यनुवर्तमानेऽपि कर्मण्युपपदत्वप्राप्तौ तीत्यतोभाष्ये उपसर्ग-ग्रहणं कर्तव्यमित्युक्तम् । तेन कर्मणीति निवृत्तमित्यन्वाख्यातम्भवति । अनुप-सर्ग इत्यस्येति । आतोऽनुपसर्गे इतिसूत्रस्थस्यानुपसर्ग इत्यस्येत्यर्थः । यत्तु वदः सुपीतिसूत्रेऽनुपसर्गग्रहणानुवृत्तिप्रदर्शनपरं वात्तिकन्तदपि नापूर्वङ्किन्तु प्रकृत-ज्ञापकसिद्धार्थानुवाद एव । सप्तम्यन्ते तरादिति । युसदितिप्रयोगे सप्तम्यन्तेतर-त्पूर्वपदमित्यर्थः । एवञ्च सदधातोर्गत्यर्थत्वात्कर्मण्युपपदे प्रत्ययः सप्तम्यन्ते-प्युपपदे क्विप् दृश्यते । आदितेयादिविषद इत्यत्र यथा अत्र सुषामादित्वात्ष-

SGDF
Sri Gargeshwari Digital Foundation

त्वम्। द्युसदित्यत्र पूर्वपदादितिप्राप्तमपि षत्वञ्छन्दसीत्यनुवृत्तेर्न। उपनिषदित्यत्र तु सदिरप्रतेरिति षः। स्पष्टश्चेदम्भाष्य इति। तत्र च्छदेऽनन्ने इत्येव सिद्धे क्रव्यग्रहणं वा रूपान्तरत्यर्थमित्युक्तमिति। ननु क्रव्याद इत्यस्य पृषोदरादित्वात्साधुत्ववत्क्रव्यादित्यस्यापि सिद्धौ क्रव्ये चेतिसूत्रवैयर्थ्यमत आह क्रव्ये चेतिसूत्रन्त्विति। विचोऽपि सम्बन्ध इति। विजुपे छन्दसीतिसूत्राद्विजग्रहणं सम्बध्यते छन्दसीतिनिवृत्तमित्यर्थः। दृशिग्रहणाद्यथा प्रयोगो दृतेश्च तथैव साधनीयमिति लभ्यते तेनोपपदस्य व्यभिचारोऽपि लभ्यत इत्याह। दृशिग्रहणादिति॥ अन्तः। अनितेरितिवर्त्तते। अत्रान्त इत्यस्यानितेरिति न विशेषणमव्यभिचारात्किन्तु पदस्येति तदाह। मूले पदान्तस्येति। हे प्राण्। अन् प्राणने क्विप् अनुनासिकस्येति दीर्घः। न ङिसम्बुध्योरिति नलोपस्य निषेधः। सुप्यजातौ णिनिस्ताच्छील्ये। अजाताविति सुपीत्यस्य विशेषणम् जातिप्रवृत्तिनिमित्तकस्याजातावित्यनेन निषेधः। उष्णभोजीत्यादावुष्णादिशब्दो गुणप्रवृत्तिनिमित्तकः। अत्रोपसर्गभिन्नः एवेत्यस्य यथालाभस्तथ्यकारमाह। सुपीतीति। भाष्येतीति। एवं हि भाष्ये उक्तम् सुपीति वर्त्तमाने पुनः सुब्ग्रहणं किमर्थम् अनुपसर्ग इत्येवंतदभूत् इदं सुम्मात्रे यथा स्यात्॥ उदासारिण्यः प्रत्यासारिण्य इति। साधुकारिणीत्यत्र साध्विति क्रियाविशेषणम् यः सकृदपि साधु यथा स्यात्तथा ददाति साधु करोति स एवमुच्यते अत एव आक्वेरितिसूत्रे तच्छीलापेक्षया तत्साधुकारीत्युपात्तम्। व्रते। अव्रतशब्द उपपदे इति नार्थः। अश्राद्धभोजीतिभाष्योदाहरणात् किन्तु प्रयोगोपाधिपरम्। एवञ्च यस्मिंश्चन्तदाह। सुप्युपपदे इत्यादिना। स्थण्डिलशायीत्यत्र यथा व्रतङ्गम्यते तथाह। स्थण्डिल एवेति। भाष्योदाहरणे त्वसमर्थसमासो द्रष्टव्यः। नञ् एवायम्भुजिप्रतिषेधवाचिनः श्राद्धशब्देनासामर्थसमास इति भाष्यात्। अत एवात्र व्रतङ्गम्यते। श्राद्धशब्देन नञा समासे तु सर्वेषामेव तथात्वेन व्रतन्न प्रतीयेत। बहुलमाभीक्ष्ण्ये। अत्राभीक्ष्ण्ये इति धातोर्विशेषणमर्थद्वारकम्। तेन द्योत्य इत्यस्य लाभः। व्रत इतिसूत्रभाष्य इति। तत्र ह्यश्राद्धभोजीत्यत्र व्रतस्यगम्यमानतायान्दृष्टान्तत्वेनोपात्तम् यथा स्थण्डिलशायी यदा स्थण्डिले न तिष्ठति तदास्य व्रतलोपो भवतीति। मनः। सुपीति व-

SGDF Sri Gargeshwari Digital Foundation

तेते। अत्र मन इत्यनेन मन्यतेरेव ग्रहणम्। न तु तनादेः। उत्तरसूत्रे दिवादेरेव ग्रहणेनार्थाधिकारात्। आत्ममाने खश्च। मननं मानः भावे घञ्। आत्मशब्दः प्रत्ययवाच्यत्वे नोपस्थितकर्तृपर एव। कर्मषष्ठ्या समासः, न तु कर्तृषष्ठ्या आत्मशब्दोपादानसामर्थ्यात्तथा च यत्फलितन्तदाह। स्वकर्मकेति। अत्र भाष्ये कर्मकर्तृग्रहणं कर्तव्यम्। कर्मापदिष्टो यक् यथा स्यात्। श्यन्मा भूदित्युक्तम्। अत्र कर्मकर्तृग्रहणङ्कर्तव्यमित्यस्य कर्तुः कर्मवद्भावः। पूर्वोक्तरीत्या कर्तुर्लकारवाच्यत्वस्याभावेन कर्मस्थक्रियया तुल्यक्रियत्वसत्वेन चाप्राप्तो वाच्य इत्यर्थः श्यन्मा भूदित्यनेन हि अत्र दिवादेर्ग्रहणमिति स्पष्टमेव। ततः श्यनैव सिद्धो कर्मवद्भावो न वाच्यः रूपे स्वरे च विशेषाभावादिति प्रतिपादितम्। पूर्वपचिण इति। परन्तप इत्यादौ सुमागमे सति मोऽनुस्वारे चिकीर्षिते बहिरङ्गपरिभाषयासुमोऽसिद्धत्वाशङ्कायामिदमुक्तम्। अत एव। प्रियम्मन्य इतिरूपस्यैवासिद्धत्वस्य प्रवृत्त्याऽभिप्रेतत्वादेव। न च यदि न सुपो धात्विति लुकः प्राप्तिस्तर्हि पुंसि चरितार्थस्य सुमो नपुंसकत्वे प्रियम्मन्यङ्कुलमित्यत्र लुक्स्यादेवेति वाच्यम्। पूर्वपदस्योत्तरपदस्योत्तरपदार्थेन सह भेदान्वयान्नपुंसकत्वाभावात् स्वमोर्नपुंसकादितिसूत्रे सुशब्दसाहचर्येणार्थवत एवामो ग्रहणस्य वक्तुं शक्यत्वाच्च। भूते। इदं धात्वर्थस्य विशेषणम्। अत एव भूतार्थादित्युक्तिसङ्गतिः। सोमेन लताविशेषेणेति। अत्र सोमशब्दस्य द्रव्यपरत्वेऽपि न क्षतिरितिभावः। अग्निष्टोमशब्दस्य रूढ्यर्थाभिधायकत्वाभिप्रायेणाह। अग्निष्टोमसंस्थाकेति। अग्नेः स्तोमः स्तुतिर्यत्र क्रतौ स क्रतुरग्निष्टोमः। रूढोऽयं शब्दः अग्निष्टोमसंस्थाकेत्यस्याप्यग्निष्टोमेति संस्थावाचकः शब्दो यस्य त्यर्थः। समुदायार्थन्निरूप्यावयवार्थं निरूपयति। यजेश्चेत्यादिना। त्यागश्च मन्त्रकरणको देवदत्तोद्देश्यको हविःकर्मको विवक्षितः एतादृशत्यागकरणकभावनाया भाव्याकाङ्क्षायां यद्यपि स्वर्गकामादिपदोपस्थितस्य स्वर्गस्य भाव्यत्वमन्यत्रोक्तन्तथापि तस्य कालान्तरभावितया भावनायास्तदव्यवहितपूर्वकालवृत्तित्वाभावेन भावकत्वन्न सम्भवत्यतोऽपूर्वस्य भाव्यत्वमाह। पूर्वं भावितवानिति। मनुव्यापाररूपा या भावना तया त्यागात्मकमफलन्तज्जन्यत इति तदेव भाव्यत्वेन कुतो नान्वीयत आह। धात्वर्थत्यागस्येति। धातुप्रतिपाद्यर्थघटकतया करणत्वेनोपस्थितेरित्य-

SGDF
Sri Gargeshwari Digital Foundation

र्थः । त्यागकरणकेन व्यापारेण कम्भावयेदिति याऽकांक्षा सा पूर्वानुभूतार्थातिरिक्तविषयित्वेनैवोचितेति भावः । ननूपस्थितम्परित्यज्यानुपस्थितकल्पने मानाभाव इति न्यायेनोपस्थितस्यैव समानशब्दोपात्तत्वप्रत्यासत्त्या तथात्वमुचितमत आह । पुरुषार्थत्वाभावाच्चेति । यज्ज्ञातं सत् स्वसम्बन्धित्वेनेष्यते स पुरुषार्थः । तत्त्वञ्च सुखदुःखाभावान्यतरस्य साक्षात्तत्साधनस्य वात्यागश्च तेभ्यो भिन्न इति भावः । अपूर्वम् । परमापूर्वम् । ननु करणस्य कार्यपूर्ववृत्तित्वकल्पनञ्च दृष्टस्त्यागस्तु भावनायाः कार्यन्न तु भावनापूर्ववृत्तीति कथं करणमत आह । त्यागस्य करणत्वञ्चेत्यादि । भावनायाः भाव्यो भावना भाव्यः भावना भाव्यम्भावयति जनयतीति भावना भाव्यभावकस्तत्त्वम् । अस्ति चेदृशं करणत्वं त्यागे भावनाभाव्यपूर्वम्प्रति यागस्य जनकत्वात् । सर्वत्र । नकेवलं फलांशस्यैव किन्तु सर्वत्र दण्डेन घटं करोतीत्यत्रापि दण्डस्य भावनाभाव्य घटोत्पत्तिम्प्रति जनकतायाः सत्वात् । धातोरंशद्वयाभिधायकतयो प्रायः फलांशस्य भावनाम्प्रति भाव्यत्वेन सम्बन्धात्कर्मत्वङ् क्व चित्तु करणत्वेन सम्बन्धित्वविवक्षा तदा तृतीया तदभिन्नार्थवाचकपदात् अग्निष्टोमेन यजेतेत्यादौ यथा । अत्र च करणे यज इतिसूत्रमेव मानम् । पूर्वोक्तो बहुव्रीहिः । संख्यावाचकपरत्व एव सम्भाव्यत इत्याशयेनाह । संख्यावचनस्यापीति । क्व चित्तु ज्योतिष्टोमशब्दस्येतिपाठस्तु ज्योतिःष्टोमेन स्वर्गकामो यजेतेतिवाक्याभिप्रायकः । ईशानाम् । भाव्यतयाभावनाम्प्रतिसम्बन्धिनाम् । यत्र तु फलांशस्यैव भाव्यत्वेन सम्बन्धिविवक्षातत्र करणाकाङ्क्षावह्निर्भूतकरणवाचकपदेन पूर्यते काष्ठैः शोभनम्पचतीत्यादौ बाह्यफलाकाङ्क्षायामुत्पत्त्यै तण्डुलम्पचतीत्यादौ यथा । पूर्वोक्तां लक्षणामसहमान आह । केचित्त्विति । सङ्कल्पद्वारा प्रवृत्तिं प्रति प्रयोजको यः सङ्कल्पः ज्योतिःष्टोमेन स्वर्गो जायतामितीच्छारूपस्तद्द्वारा शब्दार्थयोस्तादात्म्याज्ज्योतिःष्टोमशब्दार्थवज्ज्योतिष्टोम शब्दस्यापि तादृशेच्छाविषयतया तदिच्छाम्प्रति विषयविधया जनकत्वेन तद्द्वारा भावनाम्प्रत्यपि करणत्वमिति भावः । अग्नौ चेः । सुपि कर्मणीति सम्बध्यते । अग्नौ कर्मण्युपपदे चितेः क्विप् । अत्रापि चतुर्विधो नियम इति काशिकायाम् । अग्निचिदितिसमुदायः स्थलविशेषे इष्टकानिर्मिते आहवनीयधारणार्थे रूढः ॥ तदुपलक्षितेति । अनुबन्धोप-

SGDF
Sri Gargeshwari Digital Foundation

लक्षितेत्यर्थः । का कवद्दे वदत्तग्टह्हमित्यत्रास्थिरेण काकेन वेदिकापुष्करीकादिकं यथोपलक्षितं तद्वत् । यद्रूपमिति । क्तते इयङि यद्यान्तं रूपन्तदनुकरणमेतत् । एवञ्चानुकरणस्यानुकार्योपस्थापकतया क्षि क्षये क्षि निवासगत्योरित्येतद्द्वयोरपि ग्रहणे तत्रापि तयोर्ग्रहणापत्तौ भावे कर्मणि वा यत्र निष्ठातत्रातिप्रसङ्गवारणाय दीर्घग्रहणमिति भावः । क्षितः काम इत्यत्र क्षिधातोरन्तर्भावितण्यर्थकत्वेन सकर्मकत्वात् कर्मणि क्तः । भावे तु क्षितङ्कामिनेति बोध्यम् । दीर्घविधायकवृत्ताविति । दीर्घविधायकस्य सूत्रस्य वृत्तौ विवरणवाक्ये रदाभ्याम् । पूर्वत्वस्य सावधिकत्वेन प्रथमे वाक्ये निष्ठाया उपस्थितत्वात्तस्या एवावधित्वङ् कल्प्यत इत्याशयेनाह । निष्ठापेक्षयेतीति । पूर्वग्रहणमिति । रदाभ्यान्निष्ठातो नो दस्येत्येव कर्तव्ये क्तं यत्पूर्वग्रहणन्तदित्यर्थः । ल्वादिभ्यः । यदुक्तं मूलकृता एकविंशतेरिति तद्भावस्तु यद्यपि गॄधातू तत्र दश्येते तथापि ताभ्यान्निष्ठाया रदाभ्यामित्येव सिद्धमिति । ज्याधातोर्निष्ठायाः संयोगादेरित्यनेन सिद्धिर्न नत्वस्यासिद्धतया प्रथमं सम्प्रसारणे यण्वत्ताविरहात् । ग्रासकर्मकर्तृकस्येति । ग्रास एव कर्मकर्ता यस्येत्यर्थः । पिण्डीक्रियमाण ओदनादिर्यदा व्यञ्जनदध्यादिसम्बन्धेन स्वयमेव झटिति ग्रासताम्प्राप्नोति तदेतदुदाहरणम् । व्याख्यानादिति ॥ उत्तरसूत्रारम्भमूलकव्याख्यानादित्यर्थः । विभाषाऽभ्यव । अत्रविभाषा भ्यवादिति सिद्धे पूर्वग्रहणङ्किमर्थमत आह । पूर्व ग्रहणमिति । पूर्वशब्दाभावे तस्मादितिपरिभाषयाऽभिसंशीनमित्यत्र समा व्यवधानान्न स्यादिति भावः । स्वोक्तरीत्या व्यवस्थितविभाषा भाष्योक्तस्थल एवेत्याशयेनाह । एतदपीत्यादि । अञ्चोनपादाने । अनपादाने । इत्यसमर्थसमासोऽसूर्यललाटयोरितिवत् । अपादानवाचकस्य प्रयोगे नेत्यर्थः । तदर्थात् । प्रकाशार्थात् एतेन व्यक्तमित्यत्र नत्वापत्तिनिरस्ता । उदक्तमुदकङ्कूपादित्यस्य कूपापादानकोद्धरणकर्मोदकमित्यर्थः । यस्य विभाषा । अध्या इति । शब्दाध्याहार इत्यर्थः । यस्येति षष्ठ्यर्थस्यार्द्धधातुकस्येत्यत्रान्वयः । यदीयार्द्धधातुकस्येड्विकल्पेन विहितस्तस्मान्निष्ठाया इड्न स्यादित्यर्थः । निष्ठादेशः षत्वस्वरप्रत्ययेड्विधिषु । वृक्ण इति । ओव्रस्चू छेदने अस्मान्निष्ठायां ग्रहिज्येति सम्प्रसारणम् । ओदितश्चेत्यस्य निष्ठादेशविधायकस्यासिद्धत्वात्स्कोरिति सलोपः । यस्य विभाषेतीड़

SGDF
Sri Gargeshwari Digital Foundation

भावः। निष्ठादेशस्य नत्वस्य व्रश्चेति षत्वे कर्तव्ये सिद्धत्वात्परत्वान्नत्वे षत्वाभावे चोः कुरिति कुत्वम्। स्वरप्रत्यय योरिति। उभयोरुदाहरणमित्यर्थः। चोब्धातोर्निष्ठायां इति कृतेऽनुपसर्गात्फुल्लक्षीबेत्यनेनेट्सहिततकारस्य लोपे निपातनेन स्वरे प्रत्यये च कर्त्तव्ये यदि निष्ठादेशस्यासिद्धत्वं स्यात्तर्हि चरच्कत्वान्निष्ठादेशे सत्यपि स्वरानापत्तिर्नौ इच इति ङीष न स्यादिति क्रमेण बोध्यम्। तकारमात्रस्य लोपनिपातनपक्षे तु इडागमे कर्त्तव्ये तस्य लोपस्य सिद्धत्वादिडभावे स्वरे कर्त्तव्ये तल्लोपस्यासिद्धत्वेऽपि इच्क एवयमिति स्वरो भवत्येव परिस्कन्दः प्राच्य इदन्निपातनन्निष्ठान्तस्याच्चप्रत्ययान्तस्य वेतिमतभेदेनाह। अत्रैवेति। प्रत्ययभेदेन स्वरभेदस्तु भवत्येव। प्रतिस्तब्धनिस्तब्धौ च। सौत्रस्य स्तन्भुधातोर्निष्ठायां यस्य विभाषेतीडभावे स्तन्भेरिति षत्वे प्राप्ते तदभावस्य निपातनमिदम्। निर्वाणोऽवाते। समानपदत्वाभावाण्णत्वाभावे प्राप्ते निपातनमिदम्। कर्तर्येव निष्ठा वाधातोर्गत्यर्थात्। भाष्ये त्विति। कर्तर्येव निपातनमितिनियमाभावाद्भावे कर्मणि वा प्रत्यय उभयथा समुदायेन वातानभिधाने णत्वमित्यर्थः। अनुपसर्गात्फुल्ल। निरनुबन्धकपरिभाषया फलनिष्पत्तावितयस्यैवेदन्निपातनं युक्तमित्याशङ्कायामाह। व्याख्यानादिति। भाष्याच्चरध्वनितव्याख्यादित्यर्थः। तत्र हि फलेर्लत्वे उत्पूर्वस्योपसंख्यानं कर्त्तव्यम् उत्फुल्लोऽन्तङ्कथयति। अन्यत्वमिदमुच्यते उत्पूर्वादिति उत्फुल्लसम्फुल्लयोरिति वक्तव्यमित्युक्तम्। अत्र फलेर्लत्वे इत्यभिधानेनफुल्ल विकसने इत्यस्य नेदन्निपातनङ् लत्व इत्येवोक्तन्तु इडभाव इत्यपि तेनेड्भावस्यादितश्चेतिसिद्धिः सूचिता। एवञ्च ञिफलाधातोः क्ते इडभावेऽपि चरफलोश्चेत्यनेनोत्वम्भवत्येवेति तस्मिन्सूत्रे उभयोर्ग्रहणमस्तीति। भाष्ये स्पष्टमिति। तत्रहि अनुपसर्गादित्युच्यते तत्रेदन्न सिद्ध्यति। परिकृशमिति। एवमाशंक्य कृशेः क एष विहितइगुपधात् नैतन्निष्ठान्तम् किन्तर्हि कृश एषइगुपधात्को विहितः नैवं शक्यम् स्वरे हि दोषः स्यात्। निष्ठान्तस्य चेद्रूपन्तदा तनूकरणार्थकाद्धातोः कर्मणि क्तप्रत्यये गतिरनन्तर इत्यनेनपरिकृशशब्दस्याद्युदात्तत्वं भवति। तनूभवनार्थात्कृशेः कर्तरिकप्रत्यये थाथघञ्क्ताजबित्यनेनान्तोदात्तत्वम्प्रसज्येतेत्यर्थः। एवमाशङ्क्य एवन्तर्हि पदस्य लोपोऽत्र द्रष्टव्यः पर्यागतः

SGDF Sri Gargeshwari Digital Foundation

कार्य्येन परिक्लश इत्युक्तम्। तत्र कैयटः। गम्यमानार्थत्वादप्रयोगएव लोपस्तु-न्नगमिम्प्रति परिरुपसर्गो न तु क्लशिम्प्रतीत्यनुपसर्गत्वात्परेर्निष्ठान्त एव क्लश शब्द इति तत्पुरुषे तुल्यार्थेत्यव्ययस्वरेणाद्युदात्ततेति। ननु क्लवत्वैकदेश-स्यापि निपातनमिष्यते इत्यनुपपन्नम्भाष्यानुक्तत्वात् अत आह। वृत्तिकारैरिति। ननु निष्ठादेश इतिवार्त्तिकेनेड़भावे सिद्धे तादेशनिपातनस्वीकारो व्यर्थोऽत आह। निष्ठादेश इति। आदितश्च। नन्विदं सूत्रं विभाषा भावादिकर्मणोरि-तिसूत्रेण सहैव पाठ्यमेवञ्च तत्रेड्विकल्पाद्यस्य विभाषेति निषेधेनान्यत्रेड़भावे सिद्धे योगविभागवैयर्थमिति चेन्न। यदुपाधेर्विभाषा तदुपाधेः प्रतिषेध इति ज्ञापनार्थत्वात्। तेन विभाषा गमहनेत्यनेन विशिसाहचर्याच्छविकरणस्य विकल्पविधानात्तस्मादेव निष्ठाया इण्निषेधो न तुलुग्विकरणान्निष्ठाया इति फलसिद्धेरिति भाष्ये स्पष्टम्। व्याख्यानादिति। वित्तो भोगेतिसूत्रभाष्यसम्मत-व्याख्यानादित्यर्थः। तत्र हि वित्तेस्तु विदितो निष्ठा विद्यतेर्विन्न इष्यते। वि-त्तेर्वित्तश्च विन्नश्चभोगे वित्तश्चविन्दतेरित्युक्तम्। ऋणमाधमर्ण्ये। ऋणशब्दस्या-धमर्ण्यशब्देन बहुव्रीहिः ऋणस्याधमत्वं च दुःखप्रदत्वात्। ततो भावे ष्यञ्। तदन्तस्य च तादृशव्यवहारे लक्षणा एवञ्च विषयत्वनिरूपकत्वान्यतरसम्ब-न्धेन तादृशव्यवहारसम्बन्धिनि गम्यमाने ऋणमिति निपात्यते। निरूपकत्व-निर्वेशे मानं तु धारेरुत्तमर्ण इति निर्द्देश एव। नन्विह निष्ठायामित्येव सूत्रमस्तु नित्यार्थत्वञ्चास्यारम्भसामर्थ्याद्भविष्यति विकल्पस्य निरः कुष इत्यनेन सिद्धेरत आह। निष्ठायामित्येतत्त्विति। न च निरः कुषोऽनिष्ठायामित्येव सूत्रमस्तु एवञ्चानिष्ठायामित्यनेन निष्ठायां विकल्पस्य व्यावृत्तौ पर्युदाससा-मर्थ्याच्च यस्य विभाषेति निषेधस्यापि बाधे सिद्धे इहेड्ग्रहणं व्यर्थमिति वाच्यम्। वेः स्कन्देरनिष्ठायामितिवत्कृत्येव विकल्प इति शङ्कास्यादतः पृथ-ङ्निष्ठायामित्यस्या वश्यकत्वात्। एवञ्चेहेड्ग्रहणाद्वाशब्दस्यासम्बन्ध इति सिद्धम्। तीषसहे त्यादावुत्तरत्र तु सम्बध्यत एव। आरोप्येति। वर्तमाने यत्र प्रत्यय-स्तत्रापि यत्किञ्चिदवयवसद्भावे क्षणे सर्वेषामवयवानामविद्यमानत्वेऽपि तस्मि-न्समूहत्वारोपेण वर्तमाने प्रत्ययस्तथेहापीति भावः। उपदेशइत्यनुवृत्तेरिति। तच्चोकारस्य विशेषणम्। प्रत्ययोपदेश इति प्रत्यासत्त्या कल्पना कार्या तेन

SGDF
Sri Gangeshwari Digital Foundation

लुभादिभ्यः क्तौ निषेधस्य सिद्धिः। न च जागरितमित्यत्रापि निषेधापत्तिरिति वाच्यम्। एकाज्ग्रहणस्याप्यनुवृत्तेः सम्प्रसारणत्वस्य स्थान्यल्वृत्तित्वेनानल्विधाविति निषेधे प्राप्ते आह। अत्रेति। ननु हल इत्येतत्सामर्थ्यादित्यसङ्गतमेकादेशे कृतेऽपि परत्वादन्तवद्भावस्य प्रवृत्त्या सम्प्रसारणत्वस्य सुलभत्वादत आह। तत्सामर्थ्यादिति। हल इतिसूत्रारम्भसामर्थ्यादित्यर्थः। अयम्भावः। यद्यप्यन्तादिवच्चेति सूत्रम्परन्तथापि विप्रतिषेधसूत्रे परशब्दस्येष्टवाचकतया पूर्वोप्यचः परस्मिन्निति स्थानिवद्भावः स्यात्। तत्र दृष्टान्तमाह। कृदतिङ्सूत्रस्थभाष्यरीत्येति। तत्र यथाऽतिङ्ग्रहणाभावे चिकीर्षतीत्यत्र शपा सहैकादेशे कृते यदि तिङः। कृत्संज्ञा स्यात्तदा तुक् स्यादिति प्रयोजनमुक्त्वा पूर्वविप्रतिषेधेनान्तवद्भावस्याचः परस्मिन्निति स्थानिवद्भावेन बाधनात्तु कोऽप्राप्त्याऽतिङ्ग्रहणम्प्रत्याख्यातम्। तथेहापि प्राप्तोऽचः परस्मिन्निति स्थानिवद्भावो न भवति हल इतिसूत्रारम्भसामर्थ्यादिति। मूले अनायाससाध्य इति। चूर्णमौषधमुष्णोदके प्रक्षिप्तञ्चेत्तस्मिन्नेव काले यज्जायते तत्फाण्टमिति। धृषिशसी वैयात्ये। विकल्पे प्राप्त इति। आदिकर्मणि यत्र निष्ठेत्यादिः। भावादिकर्मणोर्वैयात्ये धृषेर्वृत्त्यभावे मानमाह। मूले अतएवेति। तत्र वृत्तित्वाभावादेव। अविनीतेति। विरुद्धं यथा स्यात्तथा यातो वियातस्तस्य भावो वैयात्यमिति व्युत्पत्त्याऽविनीतत्वं पुरुषवृत्तिधर्म उच्यते। ञिधृषाधातोरादित्त्वादिड्भावे सिद्धे नियमार्थोऽयं योग इति भावः। एवं सति वैयात्याभावेऽस्मान्निष्ठाया इडिष्ट एव चेद्धृषेरादित्त्वाभावेऽपि वैयात्ये इड्भावोऽस्य सूत्रस्य विधायकत्वेऽपि भविष्यतीति धृषेरादित्त्वं व्यर्थमिति हरदत्तमतं खण्डयति। अत्राअरुचीत्यादिना। आदित्त्वसामर्थ्यादेवानभिधाने प्रमाणन्नास्तीति कल्प्यत इति भावः। अभेश्चाविदूर्ये। अत्राविदूरशब्दाद्भावे ष्यञ् ब्राह्मणादित्वात्। न नञ्पूर्वादिति निषेधस्त्वत एव निपातनान्न। णेरध्ययने वृतम्। अधीयत इत्यध्ययनं कृत्यल्युट इति बाहुलकात्कर्मणि ल्युट्। तदाहाधीयमान इति। दो दद्घोः। अयमादेशस्थान्तः। इहजश्त्वे कृते निर्देशस्य तान्तादेशपक्षेऽप्युपपत्तिरित्याशयेन मूले तान्तो वायमादेश इत्युक्तम्। दस्तीति सूत्रस्य दाधात्वोर्यस्तान्तादेशस्तस्मिन्सत्युपसर्गस्य दीर्घ इत्यर्थाभि-

SGDF
Sri Gargeshwari Digital Foundation

प्रायेण शङ्कते। न चैवमिति। एवम्। आदेशस्य तान्तत्वे। दाधातोर्यस्त-
कारादेशस्तस्मिन्नित्यर्थे यस्मिन्विधिरितिपरिभाषया तदादिविधिः स्यात्तथा
च तकारादावुत्तरपदे दीर्घ इत्यर्थाभिप्रायेण समाधत्ते। तकारादाविति।
प्राचीनसम्मतसूत्रार्थरीत्याव्याख्याय भाष्यसम्मतसूत्रार्थाभिप्रायेणाह। स्वप्रा-
स्वेत्यादि। तान्तदाधाताविर्त्यर्थे खरि चेति चर्त्वे कृते आदेशस्य तान्तत्वमेवे-
ति व्यावर्त्याभावेन नेदं व्याख्यानयोग्यङ्किन्तु यस्मिन्विधिपरिभाषालभ्यमेवेति
शङ्कान्वारयति। परिभाषासम्मतव्याख्याने चर्त्वं स्यासिद्धत्वे नादेशस्यातान्तत्वपक्षे
दीर्घव्यावृत्तिर्विशेषणस्य फलमिति बोध्यम्। तत्र परिभाषाबाधेन व्याख्यानमे-
वोचितमिति भावः। दोदद्वित्यनेन थान्तस्यादेशस्यविधानमेवेत्यत्र भाष्यस-
म्मतिमाह। तान्ते दोष इति। ध्वनितत्वादिति। तत्र द्विद्भिरित्यत्र नलोपे
कृते ऐस्भावस्य प्राप्तौ सन्निपातपरिभाषया तद्वारणरूपस्य प्रयोजनस्य
नलोपः सुप्स्वरेत्यनेन नलोपासिद्धत्वेन वारणेनान्यथासिद्धिः कृता न त्वसि-
द्धस्य सन्निपातविघातकपदेनाग्रहणमित्यर्थप्रदर्शनेन ध्वनितमित्यर्थः। भाष्य-
कारेण दान्तत्वे निष्ठानत्वस्य धान्तत्वे धत्वप्राप्तिररिति यदुक्तन्तस्योपपत्ति-
माह। जग्धमित्यादाविति। अच उपसर्गात्तः। तस्यैवानुवर्तमानङ् घोरि-
ति विशेषणम्। अत्राच इति पदमावर्तते एकमुपसर्गस्य विशेषणन्तेन-
तदन्तविधिः द्वितीयमादेशस्य तकारस्य स्थानिबोधनाय। अन्यथोपसर्गादि-
तिपञ्चमीनिर्देशादादेःपरस्येति स्यादिति भावः। इति भाष्यमिति। तत्र हि
द्यतेरित्वादचस्त इत्येतद्भवति विप्रतिषेधेन द्यतेरित्यस्यावकाशः निर्दित्तन्निर्दि-
त्तवान् अचस्त इत्यस्यावकाशः प्रत्तम् अवत्तम्। इहोभयम्प्राप्नोति नीत्तम्
वीत्तम् अचस्त इत्येतद्भवति विप्रतिषेधेनेत्युक्तम् यद्यपि दद्भावस्येत्वमपवा-
दस्तथापि तद्वत्तत्वमप्यपवाद इत्यपवादयोर्विप्रतिषेधे परत्वात्तस्याप्रवर्तत
इति भावः। कपिष्ठलोगोत्रे। गोत्रेऽभिधित्सिते कपिष्ठल इतिनिपात्यते। यः
कपिष्ठलशब्दो गोत्रप्रत्ययप्रकृतित्वेन दृष्ट इति यावत्। भाष्यस्वरस इति। त-
त्र हि कपिष्ठलः कापिष्ठलिः कापिलायन इतिरूपस्य गोत्रे यनिच सिद्धये क-
पिष्ठलोगोत्रप्रकृताविति वार्तिककृतोक्तम्। इदञ्च वार्त्तिकं यो दृष्टइत्यस्याध्या-
हारेण प्रत्याख्यातमिति त्वन्यत्। क्तोऽधिकरणे च। अत्र चाद्यथा प्राप्त-

SGDF
Sri Gargeshwari Digital Foundation

मित्युक्तन्तच्च स्थैर्यार्थात्कर्तरि प्राप्तिं दर्शयितुमाह । प्रायेणाकर्मकाद् क्लि यथास्थैर्यार्थक आस्धातुरकर्मकस्तस्माद्गत्यर्थाकर्मकेत्यनेन कर्त्तरि प्राप्तिः अयमित्राधिपूर्वश्चेत्तदा सकर्मकः एवमुपपूर्वश्च सकर्मकस्तदापि कर्त्तरि प्राप्तिः आश्रित ओदनन्देवदत्त इति । अत्र हि न कर्मणि प्रत्ययः । ओदनपदाद्द्वितीयादर्शनात् । सकर्मकत्वाद्भावेऽपि न । कर्तरि त्वप्राप्त इत्याद्युदात्तस्यैतादृशस्य प्रयोगस्येष्टत्वेनेत्यर्थः । अत एव प्रकृते कर्मणोऽविवक्षाया अभावादेव यदि तया स्यात्तदा भावे प्रत्ययेऽयुक्तोयन्निर्देश इत्यप्युक्तम् स्यात् । ननु यदि गत्यर्थेतिसूत्रेणाविवक्षितकर्मकाणामकर्मकत्वे चेद्भावे प्रत्ययं कृत्वाऽच्प्रत्ययान्तस्य प्रयोगस्तर्हि दत्तवानित्यर्थे दत्त इत्यपि स्यात् । कर्मक्तान्तान्मतुपि यथा दत्तवानिति भवति तथा तदन्तादजपि स्यात् । भावक्तान्ताद्वा तस्मिन्सति स्यादत्त आह । दत्तवानित्यर्थ इति । निष्ठाप्रसङ्गात्तत्सम्बन्धिकार्यजातं समुद्भाव्य प्रकृतं व्याचष्टे सुयजोर्ङ्वनिप् । सुनोतेरिति । अत्रोभयपदिना यजिना साहचर्यात्सुनोतेरेव ग्रहणन्न तु सु गतौ षुप्रसवैश्वर्ययोरित्यनयोः । जीर्ण इति । अत्र जॄधातोः कर्तरि प्रत्ययः । ध्वनितमिति । प्रकृतसूत्रभाष्य एव न च क्वसोर्वा वचनञ्छन्दसि तिङोऽदर्शनादित्युक्तन्तेन ध्वनितमित्यर्थः । हशश्वतोर्लङ्चेत्यनेन त्वादेशगतवैरूप्यमादाय लकारविषये वासरूपन्यायोनप्रवर्तत इत्येव ज्ञापनमिति भावः । यत्तु वृत्तौ छन्दसि लिट इतिसूत्राल्लिड्ग्रहणानुवृत्तौ विभक्तिविपरिणामेन च सिद्धे पुनर्लिड्ग्रहणेन लिट्सामान्यस्यादेशो ज्ञाप्यत इति प्रकृते वा वचनमित्युक्तम् । तन्न प्रकृतभाष्यविरोधात् । तत्र हि कानच्क्वसोर्वा वचनञ्छन्दसि तिङो दर्शनात् । छन्दसि तिङपि दृश्यते । अहं सूर्यमुभयतो ददर्श । अहं द्यावापृथिवी आततानेति । न वाऽनेन विहितस्यादेशवचनात् । न वा एतत्प्रयोजनमस्ति । किङ्कारणमनेन विहितस्यादेशवचनात् एवमुक्त्वा केन विहितस्यादेश इत्याकाङ्क्षायाञ्छन्दसि लुङ्लङ्लिट स्तिङः श्रवणम्भविष्यतीति समाधाय तदेतद्वाचनन्तिष्ठतु तावत्साभ्यासिकमित्युक्तम् । तत्र तदेतदितिप्रतीकमुपादायोत्तरत्रोपयोक्ष्यत इत्युक्तं कैयटेन केचित्तु तस्य धातुसम्बन्धे विधाने नाधातुसम्बन्धे पक्षे भूतसामान्ये लिट्स्थानिकतिङः श्रवणार्थमिदमावश्यकमित्याहुः । अनुप्रकृतिक्तसुपरमितीति । अत्रापि प्रकृतसूत्रस्थभाष्यमेव मानम् ॥ तत्र हि असं-

SGDF Sri Gargeshwari Digital Foundation

योगाश्चिद् क्विदित्येव क्विस्त्वे सिद्धे क्वित्करणं संयोगान्तार्थमित्यभिधाय द्व-मस्य यद्ददधानस्य रोधसी त्वमर्णवान्ददधानामरमृणाः अन्ने: आजिवानित्यु-दाहरणानि प्रदर्श्य छान्दसौ कानच्क्वसू लिट् च छन्दसि सार्वधातुकमपि दितिङित्वादुपधालोपो भविष्यतीत्यभिहितम् । ददधानस्येति । बन्ध बन्धने छान्दसत्वादभ्यासधकारस्य निवृत्त्यभावे झलाञ्जश्झशीति जश्-त्वम् । एतज्ज्ञाप्यमन्येऽन्ने: आजिवानितिप्रयोगस्य छान्दसस्य प्रदर्शनेनाद्व-प्रकृतिकक्वसुपरमिति कल्प्यते । यदुक्तमेकाज्ग्रहणसामर्थ्यं लब्धमिति तदेतदुपपा-दयति । तद्धीति । व्याख्यानादिति । भाषायां सदादिभ्यो वा लिड्वक्तव्य: क्वि-प्रयोजनम् तद्विषये लुङो निवृत्त्यर्थमिति भाष्यकारोक्तिमूलकव्याख्यानादित्य-र्थ: । इडिति । इण्धातो: क्वसौ द्वित्वोत्तरमभ्यासेन सह सवर्णदीर्घेऽस्य कृत-द्वित्वैकाच्त्वसत्त्वाद्वस्वेकाजाद्घसामितीडिति भाव: । पचति ब्राह्मण इति । न च सामानाधिकरण्यमेकार्थविशेष्यकप्रतीतिजनकत्वं तच्च प्रकृते नास्ति प्रत्य-यार्थकर्तुर्विशेषणत्वादिति वाच्यम् । काल्पनिकस्य प्रथमासामानाधिकरण्य-सत्वात् । यथा शतृशानच्प्रत्ययान्तस्य प्रयोगे सति प्रधानभूतयो: कर्तृकर्मणो: प्रतीतिर्न तु लकारस्य प्रयोगे इति लटोऽप्रथमान्तेन सामानाकिरण्ये इत्यनु-वादोऽनुपपन्न इति प्रक्रियादशायां कल्पिते स्थानिनि लकारेऽप्रथमासामाना-धिकरण्यमपि कल्पितं शास्त्रप्रवृत्तिनिर्वाहकन्तथा च कृदन्ते सत्त्वप्रधानानि नामानीति वचनात्कर्तृकर्मणो: प्राधान्यदर्शनेनायं लकार: प्रधानकर्त्राद्यभि-धायकस्तथा विधाऽनुवादविषयत्वादित्यनुमानेन कृदन्तदृष्टान्तेन काल्पनि-कमेव तत्प्रक्रियानिर्वाहकन्तादृशकल्पना प्रकृते चाहार्या संभवत्येव । जाति त्वादेशे भावप्रधानमाख्यातमितिवचनेन श्रूयमाणप्रत्ययार्थस्य तिङस्तु विशेष-णत्वं कृतस्तु विशेष्यत्वमिति त्वन्यत् । वस्तुतस्तु सामानाधिकरण्यं समानार्थक-त्वमात्रन्न तु तत्र प्राधान्यनिवेश इति नाहार्यायास्तस्या: कल्पनेति बोध्यम् । क्व चिदित्यस्य लाभस्तु नन्वोर्विभाषेतिसूत्राद्विभाषापदानुवृत्त्याऽनयोरादेशयो-र्विकल्पेन प्रवृत्त्या कल्प्यते सा चानुवृत्ति: सम्बन्धानुवृत्त्यो मण्डूकगतिवद्वा कार्या । प्रथमासामानाधिकरण्येऽपि क्व चिदित्यस्य लाभ: पुनर्लङ्ग्रहणस्य क-रणेन दर्शिता सा न शब्दाधिक्यादर्थाधिक्यमितिकल्पनया किन्तु पुनर्लङ्ग्रहणे-

SGDF
Sri Gargeshwari Digital Foundation

न पुनर्विधिः। स हि पूर्वेण विधिनाऽप्राप्तेऽपि विषये प्रवर्त्तते इति वृत्तिकाररीत्या व्याख्यातः।भाष्ये त्विति। अयम्भावः। यदीह लड्ग्रहणन्न स्यात्तदाऽस्य प्रत्ययान्तरत्वन्न स्यात्तथा च कर्त्तरीत्यस्योपस्थित्या कर्मण्यभावापत्तिरतो योगविभागेन लट् एवस्थानेऽयमादेशो विधेय इति। सम्बोधने च॥ प्रथमासामानाधिकरण्ये ऽप्ययम्। सम्बोधनविषये लटः शतृशानचौ स्तः। लक्षणहेत्वोः॥ यथायथन्द्योत्यं लक्षणत्वादिदर्शयति॥ शयनमित्यादिना॥ एवञ्च परिचायकशयनकर्तृपवनाभिन्नानेककर्तृका वर्त्तमाना भुजिक्रियेति बोधः। प्रथमात्॥ द्वितीयात्तु फलभूतार्जनकर्तृकर्तृका वास इति तृतीयाच्च जनकहरिदर्शनाश्रयनिष्ठो मोक्ष इति बोधः॥ अर्जयन्पुरुष इतिरीत्या प्रथमासामानाधिकरण्यम्बोध्यम्। विदेः शतुर्वसुः। अत्र विदेरितिनिर्देशस्य समानत्वेऽपि वेत्तेरेव ग्रहणमित्यत्र मानमाह॥ सत्तेत्यादिना। शतृप्रत्ययस्योगित्वात्स्थानिवद्भावेनैवोगित्कार्ये सिद्धेऽस्योगित्वं वसोः सम्प्रसारणमित्यत्र क्वसोरपि ग्रहणार्थमन्यथाऽस्य संग्रहार्थं वस इति कथनीयम्॥ तथा सति निरनुबन्धकत्वादस्यैव ग्रहणं स्यात्॥ एवन्निर्देशे तु तदनुबन्धकपरिभाषा न प्रवर्त्तते उकारोच्चारणसामर्थ्यात्॥तौ सत्।शतृशानजमात्रे। मात्रशब्दोऽत्र कात्स्न्र्ये।तेन लट्स्थानिकत्वरूपधर्मपरित्यागेन स्वरूपमात्रं शतृशानचोः संज्ञीत्युक्तम्भवति। एतत्फलमाह। द्विषन्नित्यादि। द्विषोऽमित्रे। लृटः सद्वेतिसूत्राभ्यां विहितावेतौ। प्रकृतसूत्रे भाष्यकृतैवैतदुक्तम्। नौग्रहणं क्रियतेऽसंसर्गार्थमिति। वर्त्तमानत्वादिविशेषणासंसृष्टयोरपि सङ्ग्राहार्थमित्यर्थः। लृटः सद्वा। लृट् इत्यनेन भविष्यदधिकारे विहितो यो लृट् शेषे चेति लृट् स एव गृह्यते। स्पष्टञ्चेदमनवक्लृप्त्यमर्षयोरितिसूत्रभाष्ये। तत्र ह्यकिंवृत्तेऽपीत्यस्योपपदसंज्ञारूपप्रयोजनमभिधाय किम्प्रयोजनमिति प्रश्ने उपपदमतिङिति समाससिद्धिरित्युक्त्वाऽतिङिति प्रतिषेधात्समाससिद्धिर्न प्रयोजनमित्यभिधाय यदा तर्हि लृटः सत्संज्ञं भविष्यतीति प्रयोजने परेणाभिहिते सिद्धान्तिनोक्तम्भविष्यदधिकारविहितस्य लृटः सत्संज्ञावुच्यते अविशेषविहितस्यायमिति। तदेतदाह। भाष्ये स्पष्टमिति। पूङ्यजोः शानन्। अयं स्वातन्त्र्येण विधीयते न तु लृटः स्थाने। लृट इत्यस्याननुवृत्तेः। कर्त्तरि चायम्। तौ सदितिसूत्रे भाष्ये पूङ्य-

SGDF
Sri Gargeshwari Digital Foundation

जो: शानन् । ताच्छील्यवयोवचनशक्तिषु चानश् ।इङ्धार्योः शत्रकृच्छ्रिणीतिवि-हितप्रत्ययान्तरत्वं लादेशत्वं वेतिविचारेऽलादेशत्वं व्यवस्थाप्य सोमम्पवमा-नः। नटन्निघ्नान इत्यादौ कर्तृकर्मणोर्विहितषष्ठ्या लादेशयोगे निषेधः सोऽ-त्र न प्राप्नोतीत्याशङ्क्य लटः शतृशानचावितिॠत्शब्दमारभ्य तृनो नकारात्तृ-निति प्रत्याहार इत्याश्रयणेन तृन् ग्रहणेनैतेषामपि ग्रहणे न न लोके-तिनिषेध उक्तः तेनैतः प्रत्यया न्तरमेवेति सिद्धम् ॥ ताच्छील्यवयोवचन ॥ अयम्परस्मैपदिभ्योपि ॥ लादेशस्यैवात्मनेपदसंज्ञाविधानात् ॥ अत एव अत्र निघ्नान इत्यस्य सिद्धिः । ताच्छील्यन्तत्स्वभावता । यथावत्त्वोऽत्र मण्डप-मानाः । अनेकेऽत्र पठमाना इत्यादौ । वयोवचन इत्यस्य वयोविशेषस्य प्रति-पादन इत्यर्थः । यथा कवचम्बिभ्राणा इत्यादौ यौवनादिरूपा शरीरावस्था प्र-तीयते । शक्तिः सामर्थ्यम् । सा यत्र गम्यते तत्र चानश् । यथा शत्रुन्निघ्नान इ-त्यादौ । सुञो यज्ञसंयोगे । सुञः शतृप्रत्ययः स्यात् । यज्ञेन संयुक्ते कर्तरि शक्र-न्त ॰ वृत्तिस्येत् । संयोगइत्यत्रकर्मणि घञ् अत्र सुञो यज्ञे इत्येव यज्ञविषय-त्वेसुनोत्यर्थ इति व्याख्यया सिद्धे संयोगग्रहणाद्यत्र प्रधानकर्त्तारोऽभिधीय-न्ते तत्रैवानेन योगेन प्रत्ययः तादृशमत्र याग इत्याशयेनाह । मूले सर्वे सुन्व-न्तः । सर्वेयजमानाः । यज्ञयोग इति किम् । आक्तेस्ताच्छी । अत्र आङ भिव्य-प्तौ तच्छब्दो धात्वर्थस्य परामर्शकः । भाष्येस्पष्टमिति ।तत्र ह्यचावित्यस्य कर्त-रि भुव इतिसूत्रेऽनुवर्त्तमानस्याच्चीभविर्तत्यत्र भूधातोः खिष्णुजनुत्पत्तिरूपमप्र-योजनमुक्त्वा अथेदानीमनेन उक्ते ताच्छीलिक इष्णुज्विधीयते सोऽत्र कस्मान्न-भवतीति प्रश्ने रूढ़िशब्दप्रकारास्ताच्छीलिका न च रूढ़िशब्दा गतिभिर्विशेष्य-न्ते न हि भवति देवदत्तः प्रदेवदत्त इत्युक्तम् ॥ ताच्छीलिक इष्णुज्भुवश्चेतिसू-त्रविहितः रूढिशब्दप्रकारो रूढिशब्दसदृशः ॥ यथा रूढ़िशब्दानां गतिभिः सम्बधो न भवति तथा ताच्छीलिकेष्वपि अयमत्र विशेषः ॥ ये अत्यन्तं श-ब्दा एवं ते अवताप्यवयवार्थेन व्युत्पाद्यन्ते ॥ क्वचित्तु अवयवार्थसद्भावेऽपि ॥ यथा गायक इति ताच्छीलिका अपि क्रियाविषयन्ताच्छील्यमुपादाय प्रव-र्त्तन्ते क्रियाविशेषाभावेपि । कामुक इति । अत्र गतिसम्बन्धो न भवति । न हि भवति प्रकामुक इति । क्वचित्तु गतिभिः सम्बधो भवति । आगामुकः

SGDF
Sri Gargeshwari Digital Foundation

प्रवर्षुक इति यथा । अत एवोक्तम्प्रायेणेति । यत्र तु सोपसर्गा एव रूढिशब्दास्तत्रापि वाह्येन गतिना न भवति सम्बन्धः । यथा व्याघ्र इति । अत्र प्रव्याघ्र इति न भवति । शीलं स्वभावः । फलांशविषयकाकाङ्क्षाराहित्यम् । सा शीलं यस्येति बहुव्रीहिः । तद्धर्मा । तत्क्रियाचारकर्ता । अत्रैतत्क्रियाचरणम्मम धर्म इति ज्ञानम्प्रयोजकम् । साधु कारी तु तौ विनापि यो धात्वर्थं साधु करोति सः । कर्ता कटानिति । ताच्छीलिऽत्र कृधातोस्तृन्प्रत्ययः । अलंकृञ्निराकृञ् । अत्र कृञ्ग्रहणेन प्रसिद्धत्वात्करोतेरेव ग्रहणम् । उत्पचादिषु प्रत्येकमुदः पाठो नियमार्थः । तेनेोदः प्रयोग एवेष्णुच् । उत्तरार्थ इति । भुव इत्यस्यैव ग्लाजिस्थेतिसूत्रे चकारेण संग्रहार्थः । भाष्य स्वरस इति । प्रतिपादितमेतत्प्राक् । स्पष्टप्रतिपत्तये इह तमेवाह । तत्र हीति । इतिभाष्यमिति ॥ द्विगुणकर्मकानामित्येवन्तत्रोक्तम् ॥ विनाशेत्यत्र ण्यन्तविनाशेः कृतणिलोपेन निर्देशः । अकारउच्चारणार्थः । मूले ण्वुलासिद्ध इति । असूयतिभिन्नेभ्य इत्यादिः । अन्यथाऽत्र स्वरे विशेषसत्त्वेन ण्वुला सिद्ध इत्युक्तिर्विहता स्यात् ॥ अनभिधानमिति । अत्र प्रमाणम्प्रकृतसूत्रस्थभाष्यमेव ॥ तत्र हि पदिग्रहणमनर्थकमनुदात्तेतश्च हलादेरितिसिद्धत्वादित्यभिधाय अयम्पदेरुकञ्विधीयते लषपतेति स विशेषविहितस्सामान्यविहितं युचम्बाधेतेति प्रतिपाद्य एतज्ज्ञापयत्याचार्यस्ताच्छीलिकेषु ताच्छीलिका वासरूपेण नभवन्तीति प्रदर्शितम् । यदि सकारादपि पदेः स्यात्तदा ज्ञापकत्ववर्णनमसंगतं स्यात् । ज्ञाप्यते इति । निन्दहिंसेतिसूत्रे वासरूपविधिना वुञादयो नेत्युक्तमिह तु परस्परं स नेत्यभ्यवधायीति विशेषः । शीङो वाच्य इतीति नेदम्वार्त्तिकम् । किन्त्वर्थसिद्धमित्येतत्प्रतिपादयति । लुग्प्रत्यय इत्यादिना । प्रयोजनाभावादिति । न च स्वरे विशेषः । यदिलस्येत्संज्ञा स्यात्तर्हि अपि सत्येकादेशे च कृते एकादेश उदात्तेनेतिसूत्रेणोदात्तत्वे विशेषाभावस्य स्पष्टत्वात् । लुशो यादित्वेनापीत्संज्ञा व्यावर्त्तयितुं शक्या । इदं सिद्धमितीति । इदमुपलक्षणम् । कृपालुस्पृहयालुशब्दयोरप्येवं सिद्धिः । द्राधिट्सिशद् । दा इतिप्रयोगस्यदारूपाणामनुकरणम् ॥ कर्मकर्त्तर्येवेति ॥ स्वभावादितिशेषः । तेन । आदित्यत्र दकारस्य सत्त्वेन ॥ तपरत्वे ऋकारस्य तात्परत्वादक्षस-

SGDF
Sri Gargeshwari Digital Foundation

स्यैव ग्रहणं स्यात् ॥ जागरूकः ॥ अधुनेतिवत्समुदायस्य निपातनेन सिद्धे स्वातन्त्र्येण ऊकस्य विधानमुत्तरार्थम् ॥ मूले भाविनेति ।। यङि कृतेजायमानस्येत्यर्थः ।। वावदूकशब्दस्तूणादिप्रत्ययान्तः । स्वरूपावाधेन । प्रत्ययस्वरूपाबाधेन । न चैवञ्चि प्रत्यत्यत्घटककारस्येत्वमपि न स्यादिति वाच्यम् ।। तत्तु रिर्जगुरिरितिभाष्योदाहरणादित्वस्य प्रवृत्तेः ॥ अत एव स्वरूपाबाधेनेत्यपि लब्धम् ॥ अस्मिन्सूत्रे भाष्ये उत्सर्गशृच्छदसि सदादिभ्यो दर्शनादिति ॥ तेन सेदिः नेमिरित्यादि सिध्यतीत्युक्तम् ॥ यद्यप्यादितिसूत्रच्छान्दसकार्यप्रदर्शकप्रकरण एवोपन्यसमीयन्तथापि भाषायामिति वार्त्तिकं लौकिकप्रयोगाणां साधुत्वान्वाख्यापकमिति तन्न्खनाय प्रकृतेऽस्य लेखः ॥ स्पष्टभाष्य ; इति ॥ एवमेव स्पष्टमित्यर्थः ।। मूलरीत्यान्वाख्याय सिद्धान्ताभिप्रायेणाह ॥ वस्तुतस्त्विति । ननु भाष्ये दृणातेर्क्स्वश्चेत्युक्तमिति दीर्यतेरित्यनुपपन्नमत आह ॥ दीर्यतेर्वेति। तत्र हि ददत् दृणातेर्दीर्यतेर्वेति पठितम् ॥ विपरीतनियम इति ॥ संज्ञान्तरयोरेव क्विविति नियम इत्यर्थः ।। विधेयसंकोचापत्तेरिति ॥ यत्रैवकारस्ततोऽन्यत्र नियम इत्यस्य सिद्धत्वेन विधेयस्य क्विपः संकोचापत्तेरित्यर्थः ॥ अत्र संज्ञात्वन्न यावद्द्रव्यभाविसंज्ञा तुल्यञ्चिन्तु व्यक्तिविशेषसम्बन्धित्वमेव ॥ व्याख्यानादिति ।। कर्मण्यणितिसूत्रानन्तरमेव धः ष्ट्रन्नितिवक्तव्येऽत्र प्रकरणे पृथगीतादृशसूत्रकरणमूलकव्याख्यानादित्यर्थः । तादृशपाठे यद्यपि दाम्नीतिसूत्रे पुनः ष्ट्रन्ग्रहणमावश्यकन्तथापि लाघवमस्त्येवेति भावः । दाम्नीशस् । अत्र दशेति कृतनलोपस्य दंशधातोर्निर्देशेनाक्त्यपि क्व चिदस्य नकारो लुप्यते तेन दन्तेषु दशना इति प्रयोगः सिध्यति । न च निपातनस्य बाधकत्वमेवेति सर्वत्रैवास्य नलोप इति दंष्ट्रेत्यनुपपन्नमिति शङ्क्यम् । शुनो दन्तदंष्ट्रेतिसूत्रनिर्देशेन काचित्कत्वस्यैव कल्पनात्।दंष्ट्राशब्देऽजादित्वाट्टाविति प्रागुक्तम्। व्याख्यानादिति । व्याख्यानादिति । दाघनेत्रादीनामकरणोपपादानामपि प्रयोगदर्शनमूलकव्याख्यानादित्यर्थः । यदुक्तं इत्येति तदभिप्रायमाह । एवमन्वय इति भाष्यस्वरस इति । तत्र हि कर्त्तरिक्षदितिसूत्रस्य तत्र भव्याद्यर्थमित्यनेन भव्यगेयेतिसूत्रेण विधीयमानस्य प्रत्ययस्य कर्तर्यपि कर्त्तरिक्षदिति सूत्रस्य हायिन प्रवृत्त्यात्मकप्रयोजनमभिधाय ऋषिदेवतयोस्तु स्त्रिः समावेशवचनं

SGDF
Sri Gangeshwari Digital Foundation

ज्ञापकमसमावेशस्य यदयं कर्त्तरि चर्षिदेवतयोरितिसिद्धे समावेशे समावेशार्थं चकारङ्करोति तज्ज्ञापयत्याचार्यो न समावेशः ॥ अत्र समावेशः करणरूपेणार्थेन बोध्यः ॥ एवमुपपाद्य भाष्यकारेण वार्त्तिककारोक्तिर्यत्तावदुच्यते ऋषिदेवतयोः कृद्भिः समावेशवचनं ज्ञापकमसमावेशस्येति नैतज्ज्ञापकसाध्यमपवादरुत्सर्गा बाध्यन्त इति ॥ एष एव हि न्यायः । यदुतापवादैरुत्सर्गा बाध्येरन्नित्युक्तम् ॥ यदि तत्र यथासंख्यमभिप्रेतं स्यात्तदा चकारसद्भावे सति तस्य सम्भवादेवमुक्तिरसंगता स्यात ॥

॥ इति पूर्वकृदन्ताः ॥

अथावसरसङ्गत्योणादिप्रत्ययविषये विशेषमाह ॥ अथोणादय इत्यादिना ॥ निरूप्यन्त इति शेषः ॥ तत्रापि ॥ कल्पितावयवार्थकल्पनायामपि ॥ अन्यत्रेति ॥ वर्त्तमानकालातिरिक्तकालेनेत्यर्थः ॥ इदम्भाष्यम् ॥ अन्यकाले आहन्तेति कृजन्तधातुव्याख्यानपरम् । व्याकरणान्तरादिति ॥ व्याकरणान्तरोक्तानामप्येषां साधुत्वे चानुमानमेव प्रमाणम् ॥ उणादिप्रत्ययाः साधवः पाणिनिकर्त्तृकानुवादविषयत्वादिति ॥ अत एव ॥ व्याकरणान्तरीयऽत्वेपि साधुत्वस्याभिप्रेतत्वादेव ॥ प्रयोजनमिति । भाष्यकृतेति शेषः ॥ अत्रप्रकृतेस्तनुदृष्टेरितिप्रयोगाद्विभाषा गुणेऽस्त्रियामित्यस्य क्वचित्स्त्रियामपि प्रवृत्तिः । एतदेव वचनम् व्याचष्टे । शास्त्रान्तर इति ॥ नैरुक्तादयः ॥ एतच्छास्त्रम् ॥ एतच्छासितव्यम् । पाणिनीयसूत्रार्थमाह । उणाद्यन्ता इति । एतावतैव कृतमिति । पाणिनिनेति शेषः ॥ नन्वव्युत्पन्नत्वे सर्पिरागच्छेत्यत्र रेफः सर्पिषेत्यत्र षकारश्च दृश्यते सोऽनुपपन्नः प्रत्ययावयवत्वाभावादत आह । सर्पिषेति । अत एव । एतेषामव्युत्पन्नत्वादेव । नद्रीत्यैवेति । व्याकरणान्तररीत्यैव । अत एव । अव्युत्पन्नत्वादेव । तेषामिति । क्विब्वचीत्यादिसूत्राणामित्यर्थः । अत एव । तेषां पाणिनीयत्वाभावादेव । ननु यौ परत इत्यनुपपन्नम् । युप्रत्ययस्य पाणिनिमतेऽभावादत आह । युश्चेति । उणादिप्रत्ययान्तानामव्युत्पन्नत्वस्वीकारे भाष्यविरोधशङ्कां वारयति । यस्त्विति । तस्य भाष्यस्य व्याकरणान्तरानुसारित्वे दृष्टान्तमाह । यथेति ॥

SGDF Sri Gargeshwari Digital Foundation

अन्तरङ्गपरिभाषाया इति । अस्य दोषः शङ्कित इत्यत्रान्वयः । भाष्यकृतेति शेषः । एवं हि तत्रोक्तम् । यणादेशादियुवौ । यणादेशादियुत्रावन्तरङ्गतोऽभिनिवृत्तान प्राप्नुतः वैयाकरणः । सौवश्व इति । लक्षणा हि भवति टवोरचि वृद्धिप्रसङ्गे इयुवौ भवत इति । नैषदोषः । अनवकाशावियुवौ । अचीति चावश्यकम् । प्रैयमधःप्रैयङ्गव इत्येवमर्थमिति ।प्रसङ्गाद्व्याकरणान्तरे लक्षणं विचारयितुमाह। यणादेशा दिति ।नकपीतिसाहचर्येणेति । कपिपरेऽणतद्धितपरकएवेत्यर्थाधिकारात्केणइतिसूत्रेऽप्यणतद्धितककारपरक एव गृह्यत इति भावः । लोष्टपलितौ । लुशेर्लोष्टमिति भाष्यमिति । स्थानेन्तरतम इतिसूत्रे भाष्ये लोष्टः चिप्तो वायुवेगं गत्वे तिभाष्यप्रयोगाल्लोष्टशब्दोऽर्द्धचौदिः । पलितं शैलजे तापे केशपाके चकर्दमे । दर्भांकुर इत्युपलक्षणम् । पुल्लिङ्गस्य रोमाञ्चेपि दर्शनात् । सूची तु सीवनद्रव्ये आङ्क्किोऽभिनयान्तर इति । आङ्क्को रोमाञ्चः ॥ प्रागुक्त इति । एवञ्चतन्मते प्रकृत सूत्रे ठेत्येव पाठः । षन्ढस्तु वाहुलकात् । लोत्रं चौरचिन्हं । भाष्ये उक्तमिति । एवञ्च बाहुलकत्वेन तथाप्यस्य साधनं वोध्यम् । अगस्तिरित्यत्रागशब्दे उपपदेऽसधातोस्तिप्रत्ययो बाहुलकादित्यादिशयेन मूलेऽसावुक्तः प्रकारान्तरेणापि तस्य सिद्धिमाह । अत्रेति । द्वयोः । अगस्तिशब्दागस्त्यशब्दयोः । आद्यस्येति । रूपमिति शेषः । अगस्त्यशब्दस्य प्रकारान्तरेणापि तस्य सिद्धिमाह । अगस्तिशब्द इति । अयतेः स्वाङ्गे शिरः किञ्च । शिरः शिरसी । शृणातेर्घञर्थे के इकारादेशेऽदन्तोऽप्ययम् । अत एव पिण्डं दद्याद्गयाशिर इत्यपि साधु । वृङशीभ्यां रूपस्वाङ्गयोः पुट्च । शपो गुह्यमिति । बाहुलकात्प्रत्यये शेपशब्दोऽदन्तोऽपि ॥ यस्यामुशन्तः प्राहराम शेपम् । नहेर्दिवि भश्च।नहधातोरसुन् भश्चादेशः ।। नभो व्योम्नि नभो मेघे श्रावणे च पतद्गृहे । घ्राणे मृड़ालसूत्रे च वर्षासु च नभः स्मृतः । पतद्गृह इत्यस्य पततः कफादेर्गृह इत्यर्थः । पीकदानीतिलोके । मिथुनेऽसिः । धातूपसर्गयोर्योगे सतीण्धातोरसिप्रत्ययः स्यात् । पुरूरवाः पुरूरवस्शब्दो निपात्यते इत्यर्थः । अप्सराः ॥ प्रायेणायं भूम्नि: । स्त्रियां बहुष्वप्सरसः स्वर्वेश्या उर्वशीमुखाः । ध्वनितमिति । एकवचनान्तप्रयोगेण ध्वनितमित्यर्थः । विदिभुजिभ्याम् । आभ्यामसिः स्यात् । विश्ववेदाः । विश्वं वेत्तीति विग्रहः ।विश्ववेदास्तनूनपात् ।विश्वभोजाः। विश्व-

SGDF
Sri Gargeshwari Digital Foundation

भोजाः शत क्रतुः। वृञ्लुटितनिताड़िभ्य उलच्। तच्च। अयमन्तोदात्तः। पूर्वस्तु मध्योदात्त इति पुनर्व्युत्पादितः। शीङो ह्रस्वश्च। शिखा शाखा वह्नि-चूड़ाचूड़ामात्रेऽपि। चूड़ामात्रे शिखायाश्च ज्वालायां प्रपदेऽपि चेतिदर्शनात्। अनिष्टन्लोपश्च। जटा। जटालग्नकचे मूले मांस्यां प्रचे पुनर्जटी। उणादयो बहुलम्। अत्रोणादिशब्देनाष्टाध्याय्यामितत्सूत्रोत्तरसूत्रैर्विहितानाम्प्रत्ययानाङ्ग्रहणमिति-शङ्कावारणायाह। अत्रोणादीति। मूले केचिदविहिता अप्यूह्या इत्यादिना यथा ऋलृकसूत्रभाष्ये लृकारोपदेशस्य प्रयोजनकथनावसरे चतुष्टयीशब्दाना म्प्रवृत्तिरित्येतत्पक्षोपष्टम्भेन लृफिड़लृफिड्डशब्दयोः परतो लृकारोपदेशे सति यदृच्छाशक्तिजानुकरणप्लुत्याद्यर्थमित्यनेन यदृच्छाशब्दे प्रयोजनमभिधाय त्रयी शब्दानाम्प्रवृत्तिर्न सन्ति यदृच्छाशब्दा इतिकथनोत्तरमर्त्तिं प्रवृत्तिश्चैव हि लोके दृश्यते तस्मात्फिड़फिड्डावौणादिकौ प्रत्ययावित्युक्तम्॥ संज्ञासु धनादिभूतासु कोशादिप्रसिद्धासु॥ कार्यात्॥ गुणनिषेधादिकार्यात्॥ एतदुणादिषु शास्त्रं शासितव्यमित्यर्थः॥ न चवर्तमान इतिसूत्राद्वर्तमान इति नानुवर्त्तनीयमेवञ्च भूतादौ सिद्धिर्भविष्यत्येवेति भूतेऽपीत्यादि न कार्यमिति वाच्यम्। प्रायेण वर्त्तमान एव क्वचिदेव तु भूते भविष्यतिवेति व्युत्पादनाय पुनः सूत्रारम्भात्॥ तुमुन्ण्वुलौ क्रियायाम्॥ अत्र क्रियार्थायामित्येव क्रियाया लाभे पुनः क्रियायामित्युपादानात्साध्यमात्रस्वभावायेतराविशेषणतया भासमाना क्रिया तद्वाचकस्य ग्रहणम्॥ तेन भोक्तुं पाकः॥ भोक्तुम्पाचक इति च न। न-चैवभोक्तुम्पचति पश्येत्यत्राव्याप्तिरिति वाच्यम्॥ क्रियायामित्यनेन क्रियाया एवोपस्थितौ तस्या उपपदत्वासम्भवेन तद्वाचकप्रकृतिके लक्षणावश्यं कार्या ए-वञ्च तद्वाचकप्रकृतिमात्रजन्यो यः पदार्थोपस्थित्यात्मको बोधस्तत्कालिकस्यैवे-तराविशेषणत्वस्य ग्रहणात्। तदेतदाह। क्रिया चात्रेत्यादिना। पुनर्खुलौक्ते-रिति मूले उक्तन्तदसङ्गतम्। यद्यत्र तेन शास्त्रेण ण्वुल् स्यात्तदा भविष्यत्व-स्याप्रतीतेरकेनोर्भविष्यदाधमर्ण्ययोरित्यत्राकप्रत्ययान्तस्य योगेषष्ठीनिषेधः स्या-दित्यत्र ण्वुल्ग्रहणमावश्यकमेवञ्च भविष्यदधिकारविहितस्येति लभ्यत इति केचित्तन्मतन्दूषयति। अकेनोरित्यत्रेति। न फलमिति। इन्साहचर्येण भविष्यत्व-वाचकस्याकस्तत्रग्रहणादिति शेषः। पुनर्खुलुक्तेरित्यस्य तु प्रकृतसूत्रे ण्वुल्ग्रह-

SGDF
Sri Gargeshwari Digital Foundation

णभावेप्यकान्तमाचन्तेन खुला सिद्धमित्यत्र तात्पर्यम्। न चेह खुलग्रहणेऽपि क्रियावाचकप्रकृतिके तेन ण्वुल्स्यादिति वाच्यम्। वाक्यसंस्कारे तादृशस्थलेऽनेनैव ण्वुलः स्वीकारात्। यत्र स्वातन्त्र्येणाकप्रत्ययान्तस्यसाधनोत्तरं वाक्यस्य प्रयोगस्तस्याकस्य सम्भवेऽपि न तत्र षष्ठीव्यावृत्त्यर्थन्तथा व्याख्यानमित्याशयेनाह। न चेत्यादि। ननु यथा वुञ् न तथा लृङ्पि न स्यादत आह। लृट् विति। अत्रेदम्बोध्यम्। यद्यप्यनेन सूत्रेण ण्वुल्वत्तुमुनोऽपि विधानन्तथाप्ययम्भावे अव्ययकृतो भाव इतिवाचनात्। अत एव तुमर्थाच्च भाववचनादित्यत्र तुमर्थादित्यनेन भाववचनत्वे लब्ध इति व्याख्यातम्। प्रकृते च भावोऽसत्वभूत एव। अव्ययार्थे लिङ्गसंख्यादीनामनन्वयात्। तुमनन्तार्थस्य चोपपदार्थक्रियायां स्वोद्देश्यकत्वस्वसमानकर्तृकत्वोभयसम्बन्धेनान्वयः। एवञ्च कृष्णन्द्रष्टुं यातीत्यस्मात्कृष्णकर्मकभविष्यद्दर्शनविशिष्टं यानङ् कृष्णन्दर्शको यातीत्यस्मात्तु कृष्णकभविष्यद्दर्शनकर्तृकर्तृकन्तादृशदर्शनविशिष्टं यान मिति च शाब्दबोधः॥ कर्त्तरि कृदितिशास्त्रेण ण्वुलः कर्त्र्यर्थकत्वप्रतिपादनेन कर्त्तुः प्रकृत्यर्थम्प्रति प्राधान्यात्॥ ननु यावत्पुरा निपातयोरितिसूत्रे यावत्पुरादिषु लट्विधिर्लुटः पूर्वविप्रतिषेधेनेति वार्त्तिकमुक्तोक्तम्॥ यावद्भुङ्क्ते पुराभुङ्क्ते इत्यत्र लटोऽवकाशः श्वः कर्त्तेत्यादौ लुटोऽवकाशः॥ यावच्छ्वो भुङ्क्ते इत्यत्र तु लुड़ेव। इदं च वार्त्तिकं यावत्पुरेतिसूत्रस्यानद्यतने लुडित्यत्रानुवर्त्य वाक्यभेदेन च सम्बन्धेन च यावत्पुरायोगे लटो विधानेन सिद्धत्वात् प्रत्याख्यातमेवञ्च तुमुन्ण्वुलाविति सूत्रस्यापि मध्यपतितत्वादत्रापि वाक्यभेदेन तत्सम्बन्धः स्यात्तथा च यावत्पुरायोगे भविष्यति क्रियार्थायां क्रियायां लड़ेव स्यादिति चेन्न। विभाषा कदाकर्ह्योरित्यत्रेवात्रापि तदसम्बन्धात्। मण्डूकप्लुत्या च तत्र तस्य सम्बन्धः। अत एव यावत्पुरेतिसूत्रेऽनद्यतनेलुड़ित्यत्रेति विशेष्योक्तम्। तुमुनः प्रसङ्गात्तुमुन्विधायकसूत्रान्तरमुपन्यस्तम्मूले॥ समानकर्तृकेषु तुमुन्॥ इच्छार्थेषु लिङ्लोटावित्यत इच्छार्थेष्वित्यनुवर्तते इच्छति भोक्तुम्। अत्र तुमुनन्तार्थस्य विषयतासम्बन्धेनेष्धात्वर्थम्प्रति विशेषणताऽस्ति तथैव भोजनविषयिणी इच्छेत्याकारकस्य शाब्दबोधस्यानुभवात्॥ न तु भोजनार्थत्वस्य प्रतीतिरिति पूर्वसूत्रेणाप्राप्तस्तुमुन्विधीयते। चिकीर्षति पिपठिषतीत्यादौ सर्वत्र

SGDF
Sri Gargeshwari Digital Foundation

कर्तुमिच्छतीतिरीत्या यत्र विग्रहः क्रियते तत्र सर्वत्रायमेव तुमुन् ॥ वृत्तिविग्रहवाक्ययोः समानार्थकत्वस्य न्याय्यत्वेन सन्नन्तजन्यशाब्दबोधे सनर्थेच्छायाः प्रकृत्यर्थनिष्ठविषयतासम्बन्धावच्छिन्नविशेषणतानिरूपितविशेष्यतया प्रकृत्यर्थसमानकर्तृकत्वेन च यथा भानन्तथैव तुमुनन्तादपीति ॥ शकधृष ॥ अयमप्यक्रियार्थोपपदार्थ एवारब्धो योगः ॥ शक्नोति भोक्तुम् । धृष्णोति भोक्तुम् ॥ जानाति भोक्तुमिति ॥ शकधात्वर्थोऽनुकूलसामर्थ्यविषयकनिश्चयस्तद्घटकानुकूलत्वे निरूपितत्वसम्बन्धेन भुजधात्वर्थस्यान्वयेन भोजनविषयकस्य शकधात्वर्थस्यानुभवात् ॥ मुख्यविशेष्यतया भासमानो यस्तादृशो निश्चयस्तस्मिन् भोजनार्थत्वन्तु न शाब्दबोधविषय इति तुमुन्ण्वुलावित्यस्याप्राप्तिः ॥ धृष्धात्वर्थोऽपि तादृशो निश्चय एव ॥ ज्ञाधात्वर्थे विषयतयाऽन्वयस्तु प्रसिद्ध एव ॥ तदुद्देशेनानुष्ठीयमानत्वं च तादर्थ्यन्तस्याप्रतीतिरस्त्येव । भोक्तुं ग्लायति । ग्लानिः सामर्थ्याभावनिश्चयस्तस्मिन्नपि भोजनस्य विषयतयाऽन्वयः । भोक्तुं घटते अत्र घट्धात्वर्थो योग्यता सामर्थ्यनिश्चयवत्त्वरूपैव । भोक्तुमारभते । आरम्भस्याद्या तद्विषयिणी कृतिरस्याभोजनविषयकत्वमप्रसिद्धमेव । भोक्तुं लभते ॥ लभधात्वर्थः प्राप्तिस्तस्या भोजनसम्बन्धित्वन्न तु भोजनोद्देशेनानुष्ठीयमानत्वम् । भोक्तुमुपक्रमते ॥ भोक्तुमुत्सहते ॥ उभयत्रापि भोजनविषयकाद्यकृतेरेव प्रतीतिः । भोक्तुमर्हतीत्यत्रापि योग्यताया एव प्रतीतिः । भोक्तुमस्ति भवति विद्यते वा । सर्वत्रास्त्यर्थे सम्बन्धित्वमात्रप्रतीतिः व्याख्यानमेवेति । शकधृष्धात्वोः पृथगुपादानमूलकव्याख्यानमेवेत्यर्थः ॥ एवमस्तीत्यस्य घिसंज्ञकत्वेनैतस्य पूर्वनिपाते कर्त्तव्ये तदकरणमपि मूलम् ॥ कालसमयवेलासु ॥ भोक्तुं कालोऽयमित्यादौ भुजधात्वर्थस्य कालिकसम्बन्धावच्छिन्नकार्यतानिरूपितकारणत्वात्मकयोग्यत्वस्यानुकूलप्रवर्तनाप्रयोजकनिश्चयविषयत्वोभयसम्बन्धेन काले विशेषणता ॥ ननु भूतानि पचन्तीतिप्रत्युदाहरणाद्वर्तमानत्वस्य धात्वर्थविशेषणतया प्रतीतिर्भोक्तुङ्काल इत्यस्मात्तु न तथेति कथमेतदित्यत आह ॥ अत्र धात्वर्थमात्रेति ॥ भाववचनाश्च ॥ भविष्यतीति क्रियार्थायाङ्क्रियायामिति चानुवर्तते । वक्ष्यमाणानां प्रत्ययानां घञादीनां विशेषविहितेन तुमुनाबाधाभावायेदंसूत्रम् ॥ न च वासरूपविधिनातिपिभविष्यन्तीति वाच्यम् । पूर्वसूत्रघटकण्वुल्ग्रह-

SGDF
Sri Gargeshwari Digital Foundation

णेन क्रियार्थायां क्रियायामुपपदे वासरूपन्यायेन तृजादयो नेत्युक्तत्वेन घञ-
पि न स्यादित्याशयात् ॥ न चायं तुमुन् यद्यपि भावे विधीयते तथापि घञ्-
वाच्यो भावः सत्वभूतोऽयं त्वसत्वभूत इति कथमनेन घञो बाधस्य प्रसक्तिरि-
ति वाच्यम् ॥ तादृशविशेषस्य स्फुटप्रतिपत्त्यर्थमेवास्य सूत्रस्य करणात् ॥ भाव-
वचनशब्देन घञादीनामुपस्थित्यर्थमाह ॥ बाहुलकादिति ॥ प्रकृतसूत्रे वचन-
ग्रहणादधिकार्थलाभ इत्याह ॥ न चेत्यादिना ॥ यागाय याति ॥ घञन्ताद्धा-
त्वर्थमात्रस्य प्रतीतिस्तस्य धात्वर्थक्रियायामनुकूलत्वसमानकर्तृकत्वोभयसम्ब-
न्धेन प्रकारतया शाब्दबोधे भानम् ॥ अण् कर्मणि च ॥ अनेन सूत्रेण विहि-
तोऽण् कर्तरि भवति कर्तरि कृदितिसूत्रादेवञ्च क्रियार्थायां क्रियायां विशेष-
विहितो ण्वुल्प्रत्ययोऽणो बाधकः स्यादित्यस्यारम्भः ॥ चस्य प्रयोजनमाह ॥
उपपदेति । सन्नियोगः । समुच्चयः । अत एव । अत्रवासरूपन्यायाप्रवृत्तेरेव । एवञ्च ॥
अस्याणः स्वविषये बाधकस्यापि ण्वुलो बाधकत्वे च ॥ तत्र विशेषमाह ॥ पुनर-
नुवादेनेति ॥ निषेधाप्रवृत्तिमात्रमिति ॥ अत एवोक्तं प्राङ् ण्वुलपीति ॥ एवम् ।
अस्य प्रतिप्रसवविधित्वे ॥ परत्वादित्यस्योत्कृष्टत्वादित्यर्थस्तदाह ॥ आवृत्त्येति ।
भाष्ये स्पष्टमिति ॥ तत्र हि यः कर्मण्यणितिसूत्रेणाण् विहितः स क्रियार्थायां
क्रियायामुपपदे भविष्यतीत्तत्र च भविष्यतीत्याशङ्क्यापवादविषयेऽनिवृत्त्य-
र्थमितिसमाधानोत्तरङ्किमुच्यते ऽपवादविषयेऽनिवृत्त्यर्थमिति । न पुनरुत्सर्गवि-
षये प्रतिपदविध्यर्थं स्यात् इदानीमिव ह्युक्तं क्रियायामुपपदे क्रियार्थायां वा-
सरूपेण तृजादयो नेति अण् चापि तृजादिरिति पुनराशङ्कायामिवन्तर्ह्युभय-
मनेन क्रियतेऽपवादविषयेऽनिवृत्तिरुत्सर्गविषये च प्रतिपदविधानमित्युक्तम् । त-
तोऽपूर्वविधानापेक्षया प्रतिप्रसवे लाघवादुत्सर्गविषय एव काण्डलावो व्रजती-
त्यत्र ण्वुलबाधित्वाऽण् स्यादपवादविषये कम्बलदायो व्रजतीत्यादौ न स्या-
दित्यभिप्रायेण कथं पुनरेकेन यत्नेनोभयं लभ्यमित्याशङ्कायां कर्मग्रहणसाम-
र्थ्यादित्यभिधाने कथं पुनरन्तरेण कर्मग्रहणे कर्मण्यञ् लभ्य इतिपरेणाशङ्किते
वचनग्रहणमपि प्रकृतमनुवर्तत इत्युक्तम् ॥ तेनावृत्तिर्ध्वन्यतेति भावः । मूले
स्पृशतीति स्पर्श इति ॥ रोगविशेषस्य संज्ञेयम् ॥ सृ स्थिरे ॥ सरति कालान्त-
रमिति सारः । सारांशस्य दृढत्वाच्चिरकालं स्थितिर्भवति । सरतेरित्यनेन भ्वा-

SGDF
Sri Gargeshwari Digital Foundation

दिजुहोत्यादिपठितयोर्ग्रहणम् ।स्थिर इति कर्त्तरि कृदितिसूत्रोपस्थितस्य कर्तु-र्विशेषणमित्युक्तत्वेन स्थिरशब्दे उपपदे इति शङ्का निरस्ता ॥ सारो बलमि-तिमूलेभिहितमेतच्चवृत्त्यनुसारेणास्मिन्नर्थे सृधातुर्विलक्षणचेष्टानुकूलव्यापारा-र्थकः ॥ बलं हि विलक्षणचेष्टां कारयति ॥ वस्तुतस्तु नैतद्युक्तमित्याह । भाष्यं त्विति । तत्र हि बले शान्तसारः खदिरसार इत्यभिहितम् । यद्यपि घञजपाः पुंसीत्यनेन पुंस्त्वमस्य प्राप्तन्तथाप्यर्द्धर्चादिगणे पाठादुभयलिङ्गोऽयम् ॥ अत एव ॥ सिद्धावस्थापन्न इतिविशेषणादेव ॥ स्त्रियामिति विशेषणमिति ॥ कर्म-व्यतिहारे णच् स्त्रियामितिसूत्रघटकं यत्स्त्रियामिति तद्विशेषणमित्यर्थः । अत एव प्रकृतसूत्रभाष्ये पुल्लिङ्गेनैकवचनान्तेन निर्द्देशात्पुल्लिङ्ग एव भावे एकव-चने चैते प्रत्ययाः स्युः ॥ स्त्रीनपुंसकयोर्द्विवचनबहुवचनयोर्नस्युरिति शङ्काया-मात्र निर्द्देशस्तन्त्रमित्युक्तम् ॥ सिद्धावस्थापन्न इत्यभिधानेन घञादिवाच्यस्य भावस्य धात्वर्थभावस्य वैलक्षण्यमभिहितम् ॥ अत्र मानन्तु क्रियान्तराका-ङ्क्षायानियमेवदर्शनमेव॥प्रत्ययेन सिद्धावस्थस्य भावस्याभिधानेपि प्रकृत्या साध्य-वस्थस्य तस्याभिधानं कारकान्वयानुरोधात्स्वीक्रियत एव ॥ अत्रेदम्बोध्यम् ॥ साध्यसिद्धत्वाभ्यां धर्माभ्याम्भावस्य भेदाद्द्वयोर्भावयोर्भेदेन विशेषणविशेष्यभावेन शाब्दबोधेमानमिति न किन्तु सिद्धत्वसाध्यत्वाभ्यामेकस्यैव भावस्य भानम् ॥ यथा सम्बन्धिभेदेनैकस्मिन्नेवपिता पुत्र इति च व्यवहारस्तथाऽत्राप्युभयोरेक-स्मिन्सत्वन्न तु तयोर्विरोधः ॥ एतयोरेकनिष्ठत्वान्न शाब्दबोधे स्फुटतया भा-नम् ॥ एकत्रैव साध्यत्वेन प्रकारता सिद्धत्वेन विशेष्यतेत्यपि केचित् ॥ युक्त-तरमत्रैकक्रियाया अन्वये पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशेनेति व्यु-त्पत्तिविरोधः स्यादेव । इकः काश इतिसूत्रस्य व्याख्यानावसरे इगन्तस्यैवेति यदुक्तन्तस्योपपत्तिमाह । अत्र घञीत्यनुवृत्त्येति । अवोदैधौद्म । अवपूर्वादु-न्देर्घञ् नलोपश्च निपात्यते । राध इत्यत्रेन्धेर्घञि नलोपगुणौ निपात्येते । पु-गन्तेत्यनेन तु गुणस्य प्राप्तावपि न धातुलोप इतिनिषेधोऽन्यथा स्यात् ॥ ओद-म इत्यत्रौणादिके उन्देर्मनिन् लोपगुणौद्द्यभावश्चेतिमूले प्रश्रिमान्यतरपूर्वस्य अश्ये रित्यादिः ॥ अकर्तरि च कारके संज्ञायाम् । अत्राकर्त्तरि चेतिचकारस्य संज्ञायामित्युत्तरयोजना बोध्येत्याशयेनाह ॥ प्रायिकमितीति । स्पष्टञ्चेति तत्र

SGDF
Sri Gargeshwari Digital Foundation

हि संज्ञाग्रहणमनर्थकमसंज्ञायामपि घञ् दृश्यते । को भवता लाभो लब्धः ॥ कोभवतादायो दत्त इति ॥ यदि संज्ञाग्रहणं न क्रियतेऽतिप्रसङ्गो भवति कृतः कटइत्यत्र कारः कट इति प्राप्नोति । अतिप्रसङ्ग इति चेन्न । किङ्कारणम् । अभिधानलक्षणत्वात्प्रत्ययस्य सिद्धम् । अभिधानलक्षणाः कृत्तद्धितसमासाः अनभिधानान्न भविष्यतीत्युक्तम् ॥ परिमाणाख्यायाम् । परिमाणं परिच्छित्तिः ॥ इयत्ता ॥ आख्या उक्तिः ॥ एकस्तण्डुलनिचाय इत्यत्र ग्रहवृदृनिश्चीतिसूत्रस्यापरिमाणाख्यायामप्प्रत्ययविधायकस्य प्राप्तावप्यनेन बाधः ॥ कर्मण्यत्र घञ् ॥ निः शेषतो राशीक्रियमाणस्तण्डुलसमुदायः ॥ निचाय इतिपाठे त्वेरजित्यस्य प्राप्तिर्बोध्या ॥ द्वौशूर्पनिष्पावौ । निष्पूयतेतुषाद्यपनयनेनयः शोध्यतेतण्डुलादिः सनिष्पावः । ततः शूर्पशब्देन तृतीयान्तेन समासः ॥ अत्र शूर्पनिष्ठद्वित्वसंख्यया परिच्छित्तिर्गम्यते । द्वौ कारौ ॥ कॄ विक्षेपे इतिधातोः कर्मणि घञ् । विक्षिप्तो धान्यराशिः कारः ॥ अचम्बाधित्वा घञ् ॥ अत्र सर्वेभ्य इत्युक्तेः प्रकृत्याश्रयो यः प्रत्ययः प्राप्तः सोऽनेन बाध्यते । तेनार्थविशेषाश्रयो यः प्रत्ययस्स भवत्येव । एका तिलस्यउच्छित्तिरिति यथा ॥ अत्र भावे क्तिन्प्रत्ययः । दारजारौ णिलुक्च ॥ अत्र यद्यपि दार इत्येतद्रूपन्दारयतेः पचाद्यचा सिद्धम् । कर्षात्वत इति घञन्तस्यान्तोदात्तत्वात् । तथाप्यच्कावशक्ताविव्यस्य बाधनार्थमिदम् ॥ णिलुग्विधानमत्र वृद्धेः श्रवणायान्यथा णौ वृद्धावपि मितां ह्रस्व इति ह्रस्वापत्तिः ॥ णेरनिटीतिणिलोपे तु तस्य स्थानिवद्भावेन घञाश्रया वृद्धिर्न स्यात् ॥ लुकि तु न लुकः स्थानिवत्त्वमपरनिमित्तकत्वाल्लुका लुप्तत्वाच्च । क्त्रादेर्ण्यन्ताद्घञस्त्वनभिधानम् ॥ णिलुग्विधानपरभाष्यप्रामाण्यात् । अत्र भाष्ये करणे वा दारजारौ वक्तव्यावित्यनेनाण्यन्ताद्दृणातेर्जरयतेर्वा पुंसि संज्ञायामिति घप्रत्यये प्राप्ते तदपवादो घञ् स्वीकृतस्तदात्विदं वचनमनावश्यकम् ॥ परन्तु घञ् वचनेन साध्यो न तु सामान्यसूत्रेण ॥ अन्यथा घञ्ल्युटौ पर्यायेण स्याताम् । इङश्च । अकर्त्तरि कारके इङो घञ् ॥ प्रकृत्याश्रयस्य । एरजित्यचः । व्याख्यानादिति । पूर्वसूत्रे सर्वेभ्य इत्युपादानेन तस्य प्रकृत्याश्रयप्रत्ययबाधकता निर्णीता स एव घञस्मिन् सूत्रेऽनुवर्तते इति प्रकृत्याश्रयप्रत्ययबाधकत्वमित्येतन्मूलकव्याख्यानादित्यर्थः ॥ व्याख्यानादिति ॥ शब्दसंज्ञायामित्युक्तिमूलकव्याख्यानादित्यर्थः ।

SGDF
Sri Gargeshwari Digital Foundation

समुदायघटितैव हि संज्ञास्तीति भावः। मूले उन्नय उन्नेचेत्युक्तम्। तत्रोन्नय इत्यत्र यथाऽवोदोन्निय इति घञः शङ्का तथोन्नेचेत्यत्रापीति भ्रमवारणायाह ॥ उन्नय इत्यस्येति। निरभ्योः पूल्वोः ॥ अप्प्रत्ययस्यापवादोयं घञ् कर्मणि विधीयते॥ कॄ धान्ये। धान्यशब्दे उपपदे इत्येतद्भ्रमं वारयति॥ धान्यविषयकेति। धान्यकर्मकेत्यर्थः॥ यज्ञे समि स्तुवः॥ अधिकरणे ल्युडपवादोऽयं घञ्॥ यज्ञविषयकेऽर्थे॥ शब्दप्रयोगात्मके। तस्ययज्ञविषयकत्वं यज्ञक्रियानिष्पादकत्वेन॥ प्रे स्त्रोऽयज्ञे॥ प्रपूर्वस्तृञ्धातुरपि शब्दप्रयोगरूपार्थे वर्त्तते। प्रस्तार इति। शङ्खमस्त्वादेरिति शेषः॥ प्रथने वावशब्दे॥ प्रथने गम्यमाने विशब्दे उपपदे स्तृणातेर्घञ्॥ प्रथनमिह विस्तीर्णता। सा चेह तिर्यगायतिरूपा। तृणविस्तर इति। आच्छादनमात्रमिह धात्वर्थः॥ ग्रन्थविस्तर इति। अत्र स्तृञ्धातुर्विस्तीर्णताया एव बोधकः। छन्दोनाम्नि च। समुदायेनछन्दोनाम्नि विवक्षिते स्तृणातेर्घञ्। वृत्तमिह छन्दः शब्दार्थः। शब्दविषयत्वात्पूर्वसूत्रस्येहाप्राप्तिः। उदि ग्रहः। उत्पूर्वाद्ग्रहेर्घञ्। ग्रहवृदृनिश्चीति विहितस्यापोऽपवादः। समि मुष्टौ। ग्रह इत्यनुवर्तते। अत्र ग्रहधात्वर्थोऽङ्गुलिसन्निवेशोऽत एव न परिमाणाख्यायामित्यनेन गतार्थता। मल्लस्य सङ्ग्राह इति। मल्लस्येति कर्तरि षष्ठी। परिन्योर्नीणोर्द्यूताभ्रेषयोः॥ द्यूते विषये परिपूर्वको नीधातुः समन्ततो नयने वर्त्तते॥ अभ्रेषपदार्थं व्याचष्टे। पदार्थानामिति। अनपचारोऽनतिक्रमः॥ करणौचित्यम्। द्वितीयार्थोदाहरणं राजोपशाप इति। हस्तादाने चेरस्तेये। हस्तादाने गम्यमाने चिनोतेर्घञ् स्तेयश्चौर्यञ्चेन्न विवक्षितं भवेत्॥ इति भाष्य इति। ग्रहवृदृनिश्चीतिसूत्रभाष्य इत्यर्थः॥ निवासचिति॥ चेरिति वर्तते। काशीनिकाय इति॥ अत्राधिकरणे घञ्। चितौ यदुदाहरणन्तत्र चितिर्धात्वर्थ एव। भावे घञ्। शरीरे यत्र प्रत्ययस्तत्राप्यधिकरणे। संघे चा। चेरिति वर्त्तते। अनौत्तराधर्य इत्यत्रोत्तर चाधरं चेति द्वन्द्वं कृत्वा ततो भावे ष्यञि नञ्समासः। औत्तराधर्यभिन्ने संघे चिर्घञ्। भिक्षुनिकायः भिक्षवो हि क्व चित्तीर्थादौ ब्रह्मचिर्घन्तनार्थं यदापृथगवतिष्ठन्ते तदा प्रत्ययः। सूकरनिचय इति प्रत्युदाहरणन्तु स्तन्यपानार्थं शिशव उत्तराधरभावेन शेरते तदा न भवति प्रत्ययः। भिक्षुवत्पृथगेव सूकरा यदावतिष्ठन्ते तदा भवत्येव सूकरनिकाय इति। कर्मव्यति-

SGDF
Sri Gargeshwari Digital Foundation

हारे णच स्त्रियाम् ॥ कर्मव्यतिहारे वर्त्तमानाद्धातोरित्यर्थः । कर्मशब्दोऽत्र क्रियापरः ॥ क्रियाव्यतिहारश्च परस्परकरणम् । कर्मकारके चायम् । कर्त्तरि कृदितिसूत्रात् । विशेषणार्थं इति । तेन ज्वलितिकसन्तेभ्य इतिसूत्रविहितणस्य न ग्रहणम् । व्यावक्रोशीत्यादौ कृद्ग्रहणपरिभाषया विशिष्टादञ् प्रत्ययः ॥ अञस्तद्धितत्वादादिवृद्धिः ॥ न च स्त्रियामित्यधिकारे कर्मव्यतिहारे णजित्येव वाच्यम् ॥ स्त्रियामिति त्वधिकारादेव लभ्येत तेन व्यतिपाक इत्यत्र न णच् ॥ एवञ्चात्र स्त्रियामिति न कार्यमिति वाच्यम् । व्यावचारीत्यादौ क्तिन् बाधकस्य ण्यासश्रन्थे ति युचोऽपि बाधनार्थन्तदधिकाराद्बहिर्भावस्यावश्यकत्वात् व्यतीचादिषु गुरोश्च हल इत्यस्यापि बाधप्रसङ्ग इति तु न वाच्यम् ॥ ततो बहिर्भावे सति वासरूपविधिना तस्य सम्भवात् । अत एव व्यवक्रुष्टिरित्यत्र क्तिन् प्रत्ययः सिध्यति । प्रकृतसूत्रे भाष्ये तु यदुक्तम्प्रकृते स्त्रीग्रहणेऽणजप्रवणं कार्यम् ॥ ततो णिजिति वा च्यन्तेन व्यावचोरी व्यावचर्चीत्यादौ णच् सिध्यतीति तद्वार्त्तिकाशयमात्रन्न तु तत्र लाघवम् । णिंच इत्यस्यावश्यकत्वात् ॥ व्यवक्रुष्टिरित्यादेः कृत्यल्युटो बहुलमितिसूत्रस्थबहुलग्रहणेन क्वचिदन्यदेवेत्यर्थकेन साध्यतापत्तेश्च ॥ न च स्त्रियामितिसूत्रे स्त्रियामिति तु क्वचित्स्वार्थिकाः प्रकृतितो लिङ्गवचनान्यतिवर्त्तन्त इत्यस्य ज्ञापनायेत्यन्यत्रोक्तम् ॥ अभिविधौ भावे इनुण् । अभिविधिरभिव्याप्तिः ॥ अभिविधौ गम्यमाने भावे इनुण् स्यात् । नपुंसके भावे क्त इतिसूत्रान्तरमस्य पाठेन भावे प्रत्यये सिद्धे पुनर्भावे इति क्तस्य बाधको यो भावे खल् तस्य षत्वाराविणमित्यत्र प्राप्तस्य बाधनार्थमिति भाष्ये स्पष्टम् ॥ सांराविणमित्यत्र संशब्दोऽभिविधेर्द्योतकः ॥ शब्दशक्तिस्वभावादेतदसान्तन्नपुंसकमेव भवति । आक्रोशेऽवन्योर्ग्रहः । अस्वरितत्वादिति । किन्तु घञेव दृष्टानुवृत्तिकत्वादिति शेषः । अवग्रहः पदस्य । ग्रहवृदृनिश्चीत्यप् । अत्रावग्रहो विलम्बेनोच्चारणम् । स्वभाविकार्द्धमात्राधिककालेनोच्चारणात्मकम् ॥ निग्रहश्चोरस्य । अत्र निग्रहो निरोधः । देशान्तरसंचारविरोधिव्यापारानुकूलव्यापारः । प्रे लिप्सायाम् । लिप्सायां गम्यमानायाम्प्रशब्द उपपदे ग्रहेर्घञ् स्यात् । पात्रप्राहेणेत्यत्र भावे घञप्रत्ययः ॥ कर्मषष्ठ्यासमासः । भिक्षापात्रं गृहीत्वेति फलितार्थः । लिप्सायां किम् ॥ प्रग्रहो देवदत्तस्य । प्रकृष्टोऽभिनि-

SGDF
Sri Gangeshwari Digital Foundation

देशः । परौ यज्ञे । परावुपपदे यज्ञेर्घञ् । यज्ञे इति वैषयिकाधारे सप्तमी । प्रत्ययान्तार्थो यज्ञविषयश्चेत् । ग्रहवृदृइत्यनेन बाध्यते । नौ वृ धान्ये ॥ वृ इति वृङ्वृञोः सामान्यग्रहणम् । लुप्तविभक्तिकम् । धान्यविषये निशब्दे उपपदे वृ इत्यस्माद्घञ् निवारा इति । एतत्संज्ञका व्रीहिविशेषाः निवरा कन्येति । कर्मण्यि ग्रहवृदृ इत्यप् । अजवृभ्यां स्त्रीखलना इत्युक्तेः स्त्रीत्वविवक्षायाङ्क्तिन्प्रत्ययेन भवितव्यमित्याशंका निरासायाह मूले क्तिन्विषयेऽपीत्यादि। अवे ग्रहो वर्षप्रतिबन्धे ॥ वर्षप्रतिबन्धेऽभिधेयेऽवशब्दे ग्रहधातोर्वा घञ् ॥ प्रे वणिजाम् । अत्र वणिजामिति षष्ठीप्रधानप्रत्ययानुरोधात् ॥ प्रत्ययस्तु भावे । रश्मौ च । रथशकटादिसम्बद्धा रज्जू रश्मिः । या रथादियुक्ताश्वादेः संयमनार्थाः कर्मण्यत्र घञ् । वृणोतेराच्छादने।अत्राच्छादन इति प्रत्ययान्तसमुदायार्थनिर्देशः परौ भुवोऽवज्ञाने । विभाषेति वर्त्तते । अवज्ञानमसत्कारस्तस्मिन् गम्यमाने परिशब्दे उपपदे भुवो वा घञ् स्यात् । एरच् । भावे इति । अकर्त्तरि च कारके इति चानुवर्त्तते । यथा प्रयोगं व्यवस्था । प्रत्ययस्वरेणैवैतदन्तस्यान्तोदात्तत्वे सिद्धेऽस्य चकारस्याथघञ्क्ताजवित्रकाणमित्यत्रास्य ग्रहणाय तेन प्रचयः प्रचय इत्यत्राव्ययपूर्वपदप्रकृतिस्वरम्बाधित्वाऽन्तोदात्तत्वम्भवति । प्रकृतसूत्रे भाष्ये कल्प्यादिभ्यः प्रतिषेध इति वार्त्तिकमर्थतोऽनुवदति । कल्प्यादिभ्य इति। अनार्षमिति । भाष्येऽदर्शनात् । अप्विधानसामर्थ्येनेति । निश्चिग्रहणसामर्थ्येनेत्यर्थः ॥ मध्योदात्तमिति । चिधातोर्धातुस्वरेणान्तोदात्तत्वेऽपः पित्वादनुदात्तत्वे आद्युदात्तो हि चयशब्दः । एतेन । पूर्वोक्तव्याख्यानेन । अत्रैव सिद्धम् । अन्तोदात्तत्वं सिद्धम् । अवन्तस्यापि तेनान्तोदात्तत्वसम्भवात् । घञो बाधनार्थमिति । चेत्रादूर्वाङ्कुरादेर्निश्चयं करोतीत्यत्र घञबाधनार्थमित्यर्थः । अस्मादपोऽनिष्टेरिति । अब्विधौ निश्चिग्रहणमनर्थकं स्तेयस्य घञ्विधौ प्रतिषेधात् । निस्पूर्वश्चिनोतिः स्तेये वर्त्तते । अस्तेयार्थं तर्हीदं वक्तव्यम् । निस्पूर्वाच्चिनोतेरस्तेये अप् यथा स्यात् । अस्तेयार्थमिति चेन्नानिष्टत्वात् । न हि निस्पूर्वाच्चिनोतेरस्तेये अबिष्यते। किन्तर्हि घञेवेष्यते।एवन्तर्हि सिद्धे सति यन्निस्पूर्वाच्चिनोतेरयं शास्ति तज्ज्ञापयत्याचार्यो यत्तदन्तस्याथघञ्क्तेति तन्निस्पूर्वाच्चिनोतेर्न भवति । किमितस्य ज्ञापने प्रयोजनम् ।निश्चयः एषः स्वरः सिद्धो।भवतीति भाष्यमत्र

SGDF Sri Gargeshwari Digital Foundation

मानम् । मध्योदात्तत्वञ्चान्तस्वरेण भवतीति कैयटः । वशिरण्योरुपसंख्यानम् । वश इत्यत्र भावे घञ् प्राप्तः रण इत्यत्रापि रणन्त्यस्मिन् पुरुषाः सरणः सङ्ग्रामः इत्यर्थेनाकर्तरि चकारके इत्यनेन प्राप्तस्य घञो बाधकोऽण् विधीयते । घञर्थो भावः कर्तृभिन्नकारकं च । अत्र भाष्ये स्थास्नापाव्यधिहनियुध्यर्थमिति पठितन्तस्य परिगणनत्वभ्रमवारणायाह । स्थास्नेत्यादि । प्रस्थः ॥ अत्राधिकरणे कः । परिमाणविशेषस्य शानोश्च सञ्ज्ञेयम् । प्रतिष्ठन्त्यस्मिन् धान्यानि प्रतिष्ठन्ते जनाऽस्मिन्निति व्युत्पत्तेः । प्रस्थे हिमवतः शृंगे हिमवत इति क्वाचित्कः प्रयोगो न तु तस्यैव संज्ञा । स्नु प्रस्थः सानुरस्त्रियामिति कोशात् । प्रस्नान्त्यस्मिन्निति प्रस्नो ह्रदः ॥ प्रपिबन्त्यस्यामिति प्रपा पानीयशालिका । आविध्यन्ति येन तदाविधमायुधम् । विघ्नन्त्यस्मिन्मनांसि असौ विघ्नः । अधिकरणे क इति । एतेन वृत्तिकारोक्ता करणव्युत्पत्तिर्नोचिता भाष्यविरोधादित्युक्तम्भवति । भाष्योक्तस्यास्य वाक्यस्योदाहरणमाऽऽखादुचला भूमिरित्यादि सिध्यति । न चलन्त्यस्याम्पर्वतवृक्षादयसेत्यर्थात् ॥ अस्योदाहरणमाचष्टे प्रमाणन्तु द्वित्वप्रकरणे के स्नादीनामिति वार्त्तिकमेव । अनुपसर्ग इत्यस्योपसर्गभिन्ने उपपदे इति भ्रमवारणायाह । अनुपेति । यमः समुपनिविषु च । अत्र चकारादनुपसर्ग इति सम्बध्यते तस्याप्युक्त एवार्थः । अत एव यमया इत्यस्य सिद्धिः ॥ क्वणो वीणायांच । अत्र वीणाग्रहणस्यानुपसर्ग इत्येतद्बाधरूपप्रयोजनमाह मूले वीणाग्रहणमित्विति । वीणाग्रहणं सोपसर्गार्थमिति वार्त्तिककारोक्तेः । मदोऽनुपसर्गे । अस्यानुपसर्ग इत्यस्य पूर्ववन्नार्थ इत्याशयेनाह ॥ उपसर्गभिन्न इति ॥ समुदो रजः पशुषु । पशुष्वित्यस्य पशुषु कारकेषु विवक्षितेष्वित्यर्थः । प्रत्ययस्तु भावे । अक्षेषु ग्लहः । ग्लह इति रूपन्निपात्यते । अक्षेषु धात्वर्थसम्बन्धित्वेन विवक्षितेषु यदत्र निपात्यते तदाह । ग्लह इत्यत्रेति । आङि युद्धे । ह्व इति सम्प्रसारणञ्चेत्यनुवर्तते । युद्ध इति प्रत्ययार्थस्य विशेषणम् । तेनाधिकरणे प्रत्यय इति बोध्यम् । निपानमाहावः । आहाव इति निपात्यते । निपानं वाच्यञ्चेत् । भावेऽनुपसर्गस्य ॥ अत्रानुपसर्गस्येति सम्प्रसारणापेक्षया षष्ठी । ह्व इत्यनुवर्त्तते । हनश्च वधः अत्र चकारो भिन्नक्रमः ॥ वध इत्यनन्तरन्द्रष्टव्यः । हन इत्यादेशापेक्षया षष्ठी । आदेशस्यादन्तोऽन्तोदात्तो निपात्यते ॥ धातोरित्यस्यापि इत्यस्य

SGDF
Sri Gangeshwari Digital Foundation

च सम्बन्धः ॥ हनो वधादेशः स्याद्धातोरप्रत्ययः स्यादित्यर्थः ॥ एवञ्चातो लोपे उदात्तनिवृत्तिस्वरेणान्तोदात्तोऽयम्भवति । उदात्तत्वे प्रमाणन्तु वधेन दस्युमित्यत्रान्तोदात्तदर्शनम् । घञा सिद्ध इति ॥ जनिवध्योश्चेति वृद्धेः प्रतिषेधात्सिद्ध इत्यर्थः । यदुक्तं स्वतन्त्रो बधिर्नास्ति किन्त्वादेश एव एतदुत्तराणामुपक्रमाद्विज्ञायते तदेवदाविष्कर्तुं स्तम्बे कचेति सूत्रभाष्यसम्मतिमाह ।घनान्तर्घतेत्यादि भाष्ये स्पष्टमिति । तत्र हि कस्मादयं को विधीयते । हन्तेरित्याह । तद्धन्तिग्रहणङ्कर्त्तव्यन्न कर्त्तव्यम्प्रकृतमनुवर्त्तते क्व प्रकृतम् । हनस्च बध इति । तद्वै अनेकेन निपातनेन व्यवच्छिन्नन्न शक्यमनुवर्त्तयितुम् । नैतानि निपातनानि ॥ हन्तेरेते आदेशाः । अप्प्रत्ययः हलन्ताद्ध्येते आदेशा इत्यभिप्रायेण यदि हन्तेरेते आदेशाद्यनस्वरो न सिध्यतीति परेणोक्ते ततो घनादीनां निपातनं स्वीकृतम् । स्तम्बे क चेति सूत्रे तु हनस्च बध इत्यस्य सम्बन्धानुवृत्त्या समाहितम् । ततोऽथ वा पुनः सन्त्वादेशाः । ननु चोक्तं स्वरोऽन सिध्यतीति । नैष दोषः ॥ अकारान्तादेशा इति । अतो लोपे कृते उदात्तनिवृत्तिस्वरेणापि । उदात्तत्वम्भविष्यतीत्याह । अन्य इत्यादिना । निघो निमित्तम् । अत्र गत्यर्थकाद्धन्तेः कर्मण्यप् । उपसर्गे घोः किः यद्यपि भावेऽकर्त्तरिकारके इति प्रकृतन्तथाप्ययम्बाहुलकात्कर्तर्यपि ॥ अत एवोपसमीपे स्वधर्ममादधातीति व्युत्पत्तिरपि क्व चिद्दर्शिता । परन्तु सा करण एवोचितेत्याशयेन मूले उपाधीयतेऽनेनेत्युक्तम् । ल्युट् तु बहुलग्रहणान्न । कर्मण्यधिकरणे च घोरित्यनुवर्त्तते ॥ अत्र कर्मण्यधिकरण इति च द्वयमप्युपपदन्न ॥ पृथक् सप्तमीनिर्देशात् ॥ नाप्यधिकरणे उपपदे कर्मणि प्रत्यय इत्यर्थः ॥ प्रकृतसूत्रेऽकर्त्तरि च कारके इत्येतत्सम्बन्धेन कर्मणी प्रत्ययस्य सिद्धत्त्वादत्त एव देवं वंदे जलधिशरधिमिति प्रामाणिकप्रयोगस्योपपत्तिस्तदाह । व्याख्यानादिति । ननु तथैवाधिकरणे प्रत्ययेसिद्धेऽत्राधिकरण इति व्यर्थमत आह॥अधिकरणग्रहणमिति।स्त्रियांक्तिन्॥भावादावितीति ।आदिना कारकपरिग्रहः॥कैयटस्वरस इति॥तच्चाद्यन्तवद्भावस्य प्रयोजननिरूपणावसरे भाष्ये आद्यन्तवद्भावे ञ्नित्यादिर्नित्यमिति स्वरो हि चुत्रकायनिः । आग्निवेश्य इत्यत्र स्यान्नाग्र्यः कृतिरित्यत्र न स्यादित्युक्तम् एतच्चोपपादनं सौवर्यः सप्तम्यस्तदन्तसप्तम्य इत्यस्या-

SGDF
Sri Gargeshwari Digital Foundation

नाश्रयणेन। तत्र क्तिन्प्रत्ययस्य नित्वं व्यर्थं स्यादिति परिचिन्त्य क्तिनो नित्वान्तादौ च नितिकृत्यताविव्यें तदर्थं स्यादिति कैयटोक्तम्। यद्येकाज् भ्य एव धातुभ्योऽयन्तदैवमभिधानं युज्यत इति। अनेकाज् भ्योऽप्ययम्बे स्यात्तदा न्नित्यादिरिति सूत्र एव प्रयोजनसम्भवात्तावत्पर्यन्तानुधावनेनानेकाज् भ्योऽनभिधानमिति तदाशयः। अत्र कैयट इत्यस्वरससूचनाय। गार्ग्यः क्तिरित्यत्र न स्यादिति भाष्ये स्पष्टः स्वरो न स्यादिति रीत्यापि व्याख्यानसम्भवादनेकाज् भ्योऽनभिधाने न मानमिति। मूले घञोऽपवाद इति। घञो बाधक इत्यर्थः। औत्सर्गिकस्य घञः पुंस्त्वविष्टे भावे प्रवृत्तेः स्त्रीत्वविशिष्टे तस्मिन्नयमित्येतावता तस्य बाधः। पुंस्त्वविशिष्टे भावे तस्य प्रवृत्तौ मानन्त्वधिकः कारोधिकार इति स्वरितेनाधिकार इतिसूत्रस्य व्याख्यानमेव। भावादाविति व्याख्यानादेव श्रूयते इत्यर्थकस्य श्रुतिशब्दस्योपपत्तिः। करणार्थकक्तिन्नन्तः श्रुतिशब्दः श्रोत्रवाची। एवं यज्धातोरपि देवपूजनार्थकात्करणे ल्युटो बाधनार्थमिषेरपि तद्बाधनार्थं वचनम्। अयन्त्वत्र विशेषः। यज धातुप्रकृतिकः क्रिया विशेषे इषधातुप्रकृतिकस्तु ऋष्युक्तौरूढः। स्तुतिशब्दविशेषे तथा। भाष्ये नैतदिति। योगविभागेन साधनम्। तस्मात्सुखे रूढोऽयं शब्दो यदीष्यते तदा बहुलग्रहणेन साधनीयः। स्थागापापचां भावे। क्तिनो बाधकस्य बाधनार्थमिदं सूत्रम्। न च विभाषाख्याने सूत्रविहितयोर्ल्युङ्‌डिञोरपि क्तिनाबाधे का त्वं स्थापिकां स्थायि वेत्यत्र ल्युङ्‌डिञोरश्रवणापत्तिरिति वाच्यम्। पुरस्तादपवादन्यायेनास्य क्तिनोऽपवादस्यातश्चोपसर्गे इत्यङो बाधनार्थमेवैतत्सूत्रमिति स्वीकारात्। पचधातोः षित्वात्प्राप्तस्याङोऽप्ययम्बाधकः पचग्रहणात्। षित्वाच्चास्मादङपि। ग्लाम्लाज्याहाभ्यो धातुभ्यः क्तिनबाधकस्याङो बाधनायाच भाष्ये ग्लाम्लाज्याहाभ्यो निर्वक्तव्य इति वचनमारब्धम्। ग्लानिम्लानिर्ज्यानिर्हानिरिति। तेन बहुलग्रहणेन। एतेन व्यवस्थेति निपातनेनाङः स्वीकारे निपातनस्य बाधकत्वसिद्धान्ताद्व्यवस्थितिरिति न स्यादित्यपास्तम्॥ ऊतीयूतीजूती॥ अवादिभ्यः सामान्यवचनेन क्तिनः सिद्धौ स्वरार्थं कार्यविशेषविधानार्थं च वचनम्॥ अत्र भाव इति न सम्बध्यते॥ तेनान्यत्राप्ययम्। अत एवोत्तरसूत्रे भाव इति चरितार्थम्॥ उदात्त इति तूत्तरत्रापि सम्बध्यत

SGDF
Sri Gargeshwari Digital Foundation

एव । व्रजयजो र्भावे क्यप् ॥ क्तिनो बाधकोऽयम् ॥ उदात्त इत्यनुवर्त्तते ॥ पित्वन्तु तत्र तुक् सम्पादनेन चरितार्थम् ॥ ननु संज्ञायामिति सूत्रे भाव इत्यस्य सम्बन्धाद्भावादावित्यनुपपन्नमत आह । क्यच्विधाविति । नन्वेवमयं क्यप् भृञ्धातोरपि भावादौ स्यादत आह । भृञोऽयमिति । भाष्यस्वरस इति । तच हि भृञः संज्ञाप्रतिषेधे स्त्रियामप्रतिषेधोऽन्येन विहितत्वादिति वार्त्तिकस्य संज्ञायां समजेत्यनेन प्राप्तिमाशङ्क्य स्त्रिप्रत्ययप्रकरणे भावग्रहणानुवृत्त्याऽन्यथा सिद्धिरुद्भाविता ॥ भृत्याशब्दोऽयम्भरणार्थकः ॥ अत्र संज्ञाग्रहणाद्बुद्धिवाचकस्य मतिशब्दस्योपपत्तिः । नैषा संज्ञा किन्तर्हि क्रियाशब्दोऽयम् ॥ सिद्ध एव ॥ सार्वधातुके यगिति सूत्रेण सिद्ध एव ॥ अकर्तरिकारके ऽकरणे ॥ गुरोश्च हलः । हलइति धातोर्विशेषणन्ततस्तदन्तविधिस्तस्यैव गुरोरित्यपि विशेषणम् ॥ एवञ्च तस्य गुरुत्वासम्भवाद्गुरुशब्दान्मतुप् तस्य निपातनादेव लुक् ॥ न च गुर्वन्ताध्दल इत्येव किन्न स्यादिति वाच्यम् ॥ आशंसायामित्यादिप्रयोगासङ्गत्यापत्तेः ॥ न च तथापि शंसेरकारो न प्राप्नोति । अस्य निष्ठायामनिट्त्वादिति वाच्यम् ॥ आशंसायामिति निर्द्देशेन तत्र शेट्त्वाभावेऽप्यकारप्रत्ययस्य स्वीकारात् । अङ्विधावेवेति।प्राज्ञाश्रद्धार्चाभ्य इति निर्द्देशात् अन्त शब्दस्य तु अन्तः स्याङ्विधिणत्वेषूपसर्गत्वं वक्तव्यमिति वचनात्तथेति बोध्यम् ॥ प्रत्ययसामान्याभावः । विभक्तिभिन्नसामान्याभावः । संज्ञायाम् । अधिकरणकारकेऽयम्प्रत्ययः ॥ उद्दालकपुष्पभञ्जिका । उद्दालकः श्लेष्मान्तकस्तस्य पुष्पाणि यस्यां क्रीडायां भज्यन्ते सा । नित्यं क्रीडाजीवकयोरिति समासः । विभाषाख्यानपरिप्रश्नयोरितिसूत्रे आख्यानशब्दस्याल्पाचत्वे न पूर्वनिपातेऽपि लोके आख्यानस्य परिप्रश्नपूर्वकत्वे नार्थक्रमानुरोधेन व्याख्यानवाक्ये परिप्रश्न एवादौ मूलेलिखितः परिप्रश्न इति । आक्रोशे । अत्राक्रोशशब्दः शापवाची । कर्मणि च येन संस्पर्शात् । अत्र संपूर्वकात्स्पृशधातोर्भावे घञ् कर्तुरिति तदर्थकर्मणि षष्ठी येनेत्युभयप्राप्ताविति नियमात्कर्तरि तृतीया । एवञ्च परिशेषात्कर्मणीत्यत्र कर्मत्वं विधेयप्रकृत्यर्थक्रियानिरूपितमेव ॥ शरीरसुखमित्यत्र शरीरमस्यास्त्याकर्तृ सम्बन्ध्येव । एवञ्च यत्फलितन्तदाह । अर्थादिति । एतत्सूत्रविहितो ल्युडपि नपुंसकत्वविशिष्टे भावे । अत एवैतस्यसूत्रस्य नित्यसमासार्थत्वन्तेनसङ्गतिः । उप-

SGDF
Sri Gargeshwari Digital Foundation

पदसमासो हि नित्यसमासः ॥ सम्पूर्वकः स्पृशधातुः सम्बन्धमात्रपरः । सुखमिति किम् । कण्टकानाम्मर्द्दनं दुःखम् । वा यौ । अत्र याविति युप्रत्ययपरम् । न तु यकारादिप्रत्ययपरमिति सूचयितुमाह । इदं सूत्रमिति । करणाधिकरणयोश्च । घञोऽपवादः । अत्र करणाधिकरणयोरिति नोपपदबोधकमुत्तरसूत्रेष्वस्यार्थबोधकत्वस्य दृष्टत्वेन तस्यैवौचित्यात् । अजभ्यां स्त्रीखलना इतिवार्त्तिकव्याख्यानावसरेऽनस्यावकाशः इध्मव्रश्च इति भाष्याच्च अयम्परत्वादजपोः स्त्रीप्रत्ययस्य च बाधकः अजभ्यां स्त्रीखलनाः स्त्रियाः खलनौ विप्रतिषेधेनेति वार्त्तिकात् । छादेर्घे । उदुपधाया इत्यत उपधापदन्दोषो णावित्यतो णाविति चात्रानुवर्त्तते तदाह । अत्रोपधेति । एतेन । उक्तार्थस्वीकारेण । न तु घपरं यदङ्गं णिपरकन्तदुपधाया इत्यर्थः । असंभवापत्तेरिति भावः । आकुर्वन्त्यस्मिन्निति । व्यवहारमिति शेषः । खनेः संज्ञेयम् । गोचरसंचर । देशवाची गोचरशब्दोऽधिकरणल्युडन्तः । विषयवाच्यप्ययम् । उपादानगोचरापरोक्षज्ञानमित्यत्र यथा तत्राप्यप्यधिकरणे घः । गाव इन्द्रियाणि सञ्चरन्त्यस्मिन्निति व्युत्पत्तेः । संचरन्तेऽनेनेति । समस्तृतीयायुक्तादित्यात्मनेपदम् । संज्ञायामित्यस्यात्र सूत्रे सम्बन्धाद्गोचरादिशब्दाः संज्ञाविशेषस्यैव बोधकाः । अवेतॄस्त्रोर्घञ् । ल्युटोऽपवादः । प्रायेणेति वर्त्तते इति । तदुक्तङ्गोचरेति सूत्र भाष्ये । गोचरादीनाङ्ग्रहणं शक्यमकर्तुम् । घञ्कस्मान्न भवति । प्रायवचनात् ॥ यथा कषो निकष इति । प्रयवचनादित्यस्य हलश्चेति सूत्रे प्रायेणेत्यस्य सम्बन्धादित्यर्थः कषो निकष इत्यत्र प्रायिग्रहणानुवृत्त्या घञ्न भवति तथा गोचरादिष्वपि न भविष्यतीति भावः । अवहारादिषु प्रकृतेर्हलन्तत्वाभावाद्घञोऽप्राप्तेरुपसंख्यानम् । उदङ्कोऽनुदके । अधिकरणे घञन्तोऽयन्निपातितो ल्युटम्बाधितुमनुदके इति च बोधयितुम् । यदि तु हलश्चेति सूत्रे प्रायेणेत्यस्य सम्बन्धादेवेष्टसिद्धिरित्युच्यते तदेदन्नारम्भणीयम् । तदुक्तम्भाष्ये । उदङ्कोऽनुदकग्रहणमनर्थकम् । घञ् कस्मान्न भवति । प्रायवचनात् । गोदोहनः प्रसादन इति । बाहुलकादिति । ननु भाष्ये प्रायवचनादित्युक्तमत्र बाहुलकादित्युच्यते इति तद्विरुद्धमिति चेन्न । पुंसीति सूत्रे बहुलमित्यस्य सम्बन्धेन तस्य क्वाचित्कत्वस्य सिद्धौ प्रायग्रहणस्याप्यनावश्यकत्वमित्याशयात् । जालमानायः । आ-

SGDF
Sri Gargeshwari Digital Foundation

नाय इत्यत्राङ्पूर्वान्नीधातोः करणे घञ्। जालशब्दस्तु ज्वलितिकसन्तेभ्य इति सूत्रविहितणान्तः एतस्यापि घातकत्वाज्जघातन इति धात्वर्थानुगमनमपि संभवति। खनो घ च। खनधातो करणे घः। नन्वस्य घित्वं व्यर्थम्। न हि खनधातो चजोरित्येतत्सूत्रप्रवृत्तियोग्यः कश्च न वर्णोऽस्तीत्यत आह। मूले घितकरणमिति ननु तथापि पदमित्यत्र न फलमत आह। भगः फलमितीति। ईषद्दुस्सुषु। नन्वीषदादीनामव्ययत्वात् खलः खित्वस्य न फलमत आह। खित्वमुत्तरार्थमिति। कर्तृकर्मणोरिति सूत्रविषये सुमर्थमित्यर्थः। यद्यप्यत्र सूत्रे कृच्छ्राकृच्छ्रार्थेष्विति सामान्यत एवोक्तस्तथापि योग्यतावशात्सम्बन्धो बोध्यः।कृच्छ्राकृच्छ्रार्थेष्विति किम्। यत्राल्पत्वमात्रतात्पर्येणेषच्छब्द इत्युच्यते तत्र मा भूत्। तृतीया पंचमी वेति। तृतीया पक्षे योग इत्यस्याध्याहारः इतरः। कर्मप्रवचनीयादितरः। मूले यदास्वतीकर्मप्रवचनीयाविति। अतः कर्मप्रवचनीयत्वे नुपसर्गान्तरराहित्यमस्त्येवं कर्मप्रवचनीयसंज्ञाया उपसर्गसंज्ञा बाधकत्वात्। सोः कर्मप्रवचनीयत्वे तु उपसर्गात्परत्वमेवनास्तीत्यभिप्रायेणोभयोरुपादानम्। उपसर्गत्वप्रतिषेधस्त्विति। वार्त्तिकमुक्तम् इति शेषः। कर्तृकर्मणोश्च। भूकृञोः चकार ईषदादिसमुच्चायकः एवञ्चेषदादीनामुपपदत्वात्तत्साहचर्येण कर्तृकर्मणोरित्यप्युपपदबोधकम त्वर्थपरमत एव खलः खित्वञ्चरितार्थम्। किञ्चेषदादीनामनुवृत्त्यैव सिद्धे चकारः सन्नियोगार्थोऽपि तेन यत्रानयोरीषदादीनाञ्च युगपत्प्रयोगस्तत्रैव प्रत्ययः। खलः खित्वादेवानुवृत्तेः सिद्धत्वात्॥ यथा संख्याभावश्च यथासंख्यसूत्रे भाष्य एव स्पष्टः। न च यथासंख्याभावफलम्भूधातोः कर्मण्युपपदे खल्सिद्धिरिति तच्च न संभवति भवतेरकर्मकत्वात्॥ यदानुभवरूपेप्राप्तिरूपेऽर्थेऽस्य प्रवृत्तिस्तदा सकर्मकत्वेऽपि च्व्यर्थवृत्तित्वस्यकथंसंभवद्दतिवाच्यम्। अन्तर्भावितण्यर्थस्य भवतेः सकर्मकतया आत्मधारणानुकूलव्यापाररूपफलाश्रयत्वविवक्षयाऽऽढ्यस्य तदाकर्मत्वसंभवेन तस्य कर्मणश्च्व्यर्थवृत्तितायाङ्खल्प्रत्ययसिद्धेः प्रयोजनत्वात्। ननु दुस्सादीनामुपसर्गत्वात्तेषान्धातोरव्यवधानेनैव प्रयोगः संभवति। ते प्रागितिसूत्रे तस्मादिति परिभाषाया उत्तराङ्गविकलाया उपस्थितेः। खलः खित्वन्त्वीषदाढ्यंभवमित्यत्र चरितार्थमिति चेन्न। अनाढ्येन भवता दुराढ्येन स्वाढ्येन न शक्यं

SGDF Sri Gargeshwari Digital Foundation

भवितुमित्यर्थे दुराढ्यंभवं स्वाढ्यंभवमितिभाष्यप्रयोगेणाव्यवधानांशबाधस्य प्रकृते स्वीकारात्। अत एव संज्ञानियमप्रयोगनियमपक्षयोः प्रकृते न फलभेदः। कर्मण्युपपदे भवतेः खलोदाहरणन्तु आनढ्य आढ्यः अत एव सुभूयते इत्यर्थे स्वाढ्यं भवमिति अनाढ्य आढ्यः स्वयमेव क्रियते। आनाढ्य आढ्यः क्रियते इति। एवमन्यत्राप्यूह्यम्। आतो युच्। अस्यापि खलर्थत्वात्तयोरेवेति सूत्रस्य प्रवृत्त्या भावकर्मणोरेव युच्प्रत्ययविधायकता॥ अत एवाभिहितङ्कर्मेति ईषत्पानः सोमो भवतीत्यत्र सोमपदाप्रथमा सिद्धिः षात्पदान्तात्। निष्पानम्। सर्पिष्पानमित्यत्र कृत्यच इत्यनेन वा भावकरणयोरित्यनेन वा प्राप्तस्य णत्वस्यानेन प्रतिषेधः। प्रकृतेऽस्य सूत्रस्योपयोगस्तु दुष्पाने णत्वस्य व्यावृत्तिरिति। सप्तमीसमासे मानमाह। अत्र चेति॥ अन्यथा। षात्पदादित्युच्यमानेऽपि षादित्यस्य पदविशेषणत्वेन तदन्तविधिना षान्तात्पदादित्यनेनापि सिद्धेः फलांशे विशेषाभावः। क्तिच्क्तौ च॥ प्रत्ययस्वरेणास्यान्तोदात्तत्वे सिद्धे न क्तिचीतिसूत्रे झटित्यस्यैव प्रतिपत्तिर्यथा स्यादित्येवमर्थम्॥ न क्तौ दीर्घस्येत्युच्यमानेऽप्येकानुबन्धकपरिभाषया क्तिनो व्यावर्त्तने प्रयासगौरवम्। एवं सनः क्तिचीत्यत्रापिबोध्यम्। अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वा। छन्दसीति। छन्दसि लुङ्लङ्लिटित्यतोऽनुवर्त्तमानं छन्दसीति भावलक्षण इति च निवृत्तमित्यर्थः॥ इह प्राचाङ्ग्रहणन्न ल्युटः समावेशार्थम्। वासरूपविधिनैवालं रुदित्वा रोदनेन वेत्यस्य सिद्धेः।यद्यपि स्त्र्यधिकारादूर्ध्वं वासरूपविधिः क्वचिन्नेत्युक्तन्तथापीह तदभावकल्पने मानाभाव इत्याशयेन मूले प्राचाङ्ग्रहणमिति। न च क्त्वाप्रत्ययेनासत्वभूतो भावोऽभिधीयते ल्युटा तु सत्वभूत इति वाच्यम्। अव्ययकृतो सिद्धान्ताच्छब्दशक्त्या तथा स्वीकारात्। यदा दानाद्धेमुद्यत पुरुषः सम्प्रदानत्वेनाभिप्रेतस्यापात्रत्वनिश्चयेनाप्तेन निवार्यते तदाऽलंशब्दः प्रतिषेधवाचकस्तेन प्रयुज्यते। अलन्दत्वेति। अस्त्वित्यस्याध्याहारः क्वांतार्थस्य दानस्य अलंशब्दार्थेऽभावे प्रतियोगितासम्बन्धेनान्वयः। दानाभावकर्तृका सत्तेति बोधः। यदादुग्धजलादिपानार्थं प्रवृत्त एव पुरुषोऽधिकपरिमाणकदुग्धादिदर्शनेन पीत्वा खल्विति बोध्यते तदा खलुशब्दोऽपि प्रतिषेधार्थः। एवं भर्तृगृहम्प्रतिनीयमाना न वोढा यदा रोदिति तदाऽलं बाले रुदित्वा

SGDF
Sri Gargeshwari Digital Foundation

इति प्रयोगेऽपि प्रतिषेधवाची अलंशब्दः। अलङ्कार इत्यत्र भूषणधारणेऽलंशब्दो वर्तते तदर्थस्य जनकतासम्बन्धेन कृधात्वर्थेऽन्वयः। उदीचां माङो व्यतीहारे। इत्युक्तेति। एतेन मेङो व्यतिहारे नित्यं वृत्तिरित्युक्तम्। माङस्तु न तथा। अत एवोदीचाम्माङ इति निर्द्देशस्य नानुबन्धकृतमनेजन्तत्वमिति परिभाषायां ज्ञापकत्वपरं भाष्यं सङ्गच्छते। अपमित्य याचत इत्यत्र मेङ्धातोर्यथा याच्धात्वर्थपूर्वकालिकत्वाभावस्तथोपपादयति। पूर्वत्वमसाविति। याचनोत्तरकालिकं वस्त्रादिकर्मकम्परिवर्त्य दानमिति बोधः। न चानेन सूत्रेणापूर्वकालार्थकाद्धातोः क्त्वाप्रत्यये कृतेऽपि याच्धातोः पूर्वकालिकक्रियावाचकात्समानकर्तृकयोरित्यनेन क्त्वास्त्विति वाच्यम् धातुसम्बन्धे प्रत्यया इत्युक्त्याऽस्य विधानेन यत्र क्त्वाप्रकृत्यर्थक्रियायाः क्रियान्तरविशेषणत्वविवक्षा तदैव क्त्वाप्रत्ययस्योत्पत्त्याऽयमेङ्धात्वर्थस्य स्वसमानकर्तृकत्वस्वपूर्वकालिकत्वोभयसम्बन्धेन याच्धात्वर्थम्प्रतिविशेषणत्वात्। तदा याच्धात्वर्थे पूर्वकालत्वस्य मानसबोधस्य सत्वेनैतस्य विशेषणत्वतात्पर्यकः क्त्वाप्रत्ययो न भवति। परावरयोगे च। सूत्रार्थं वक्तुमवरशब्दं व्याचष्टे। अवरशब्द इति। एवञ्च परशब्दस्य पूर्वसाकाङ्क्षतयाऽवरशब्दस्य परसाकाङ्क्षतया च तयोर्द्वयोर्निमित्तत्वमिह लभ्यते। अप्राप्य नदीम्पर्वतः। दाक्षिणात्यानाङ्काश्युद्देश्यकागमनसमये यथा व्यवस्था भवति तादृश्याः कथनमिदम्। नद्यत्र गङ्गा। पर्वतो विन्ध्यः। दक्षिणादिगवच्छिन्नदेशादागमनकर्तृभिर्दाक्षिणात्यैर्गङ्गामप्राप्य विन्ध्याख्यपर्वतः प्राप्यत इत्यर्थः। अत्र नञः प्रागभावोऽर्थः। प्राप्येत्यस्य प्राप्तिक्रियार्थः। तस्यान्द्वितीयायान्तार्थस्य गङ्गाकर्मकस्याभेदेनान्वयेन गङ्गाकर्मकाभिन्नप्राप्तिक्रियाप्रागभावलाभः। पर्वतपदस्य च वाक्यैकदेशन्यायेन पर्वतकर्मकप्राप्तिक्रियाऽर्थः। अस्यां सामानाधिकरण्यसम्बन्धेन कालिकप्रत्यासत्तिघटितेन गङ्गाकर्मकप्राप्तिक्रिया प्रागभावस्यान्वये सति दक्षिणदेशस्थपुरुषकर्तृका गङ्गाकर्मकप्रागभावसमानकालिकी पर्वतकर्मकप्राप्तिक्रियेति शाब्दबोधे जातेऽर्थाद्गङ्गायाः परत्वम्पर्वतस्य ततः पूर्वत्वङ्गम्यते। परेण पूर्वस्य योगश्च कालिकसामानाधिकरण्यसम्बन्धेन स्वकर्मकप्राप्तिक्रियाप्रागभावविशिष्टक्रियाकर्मत्वरूप एव। अतिक्रम्य पर्वतन्नदी। प्राप्यत इत्यस्याध्याहारः। अवरेण परस्य योगे

SGDF
Sri Gargeshwari Digital Foundation

इदमुदाहरणम् ॥ पूर्ववृत्तिस्थाच विन्ध्याख्यपर्वत एव । तस्य योगः परगङ्गायाम् । अतिक्रम्येत्यत्रातिशब्दसमभिव्याहृतस्य क्रमधातोः प्राप्तिक्रियाध्वंसोऽर्थः । तदेकदेशप्राप्तौ पर्वतकर्मकस्यादेनान्वये नपर्वतकर्मकप्राप्तिक्रियाध्वंसस्य लाभे तस्य ध्वंसस्य स्वसमानकालिकत्वसम्बन्धेन नदीपदार्थनदीप्राप्तावन्वयाद्दक्षिणदेशस्थपुरुषकर्तृकपर्वतकर्मकप्राप्तिक्रियाध्वंससमानकालिकनदीकर्मकप्राप्तिप्राप्तिक्रियाविषयकशाब्दबोधे वृत्तेऽवरेण पर्वतेन परनद्यांसकर्मकतादृशपुरुषकर्तृकप्राप्तिक्रियाध्वंसमानकालिकप्राप्तिकर्मत्वरूपो योगो गम्यत इति बोध्यम् । योगपदार्थश्च सम्बन्धः सचात्र क्रियाद्वारकः । क्वचित्तु साक्षात्क्रिययोरिव परावरयोर्योगो यत्र तत्राप्यस्य प्रवृत्तिः । यथाऽव्यविकन्यायव्युत्पादनावसरे कथितवाक्यस्थले । अवेर्मांसमिति विग्रहाद्विकशब्दात्प्रत्ययस्योत्पत्तिरित्यादौ । विग्रहपदार्थश्च विभिन्नत्वेन ज्ञानरूपः एवञ्चावेर्मांसमित्याकारकवाक्यज्ञानस्य स्वोत्तरकालिकत्वसम्बन्धेनाविकशब्दावधिकप्रत्ययोत्पत्तावन्वयः । एवञ्चेदं सूत्रमसमानकर्तृकार्थमपूर्वकालार्थमिति च द्रष्टव्यम् । अलंखल्वोरिति तु क्रियान्तराभावेऽपि क्त्वार्थम् । धातुसम्बन्ध इत्यस्य च तत्र सामर्थ्याद्बाधः ॥ परत्वादिकम्परावरयोग इत्यत्र लोकव्यवहारेण पुरुषभेदेन भिन्न वैवक्षिकमेव । तेनोत्तराद्दपुरुषकर्तृकदक्षिणदिगवच्छिन्नदेशकर्मकगमनस्थलेऽप्राप्यपर्वतन्नदी अतिक्रम्य पर्वत इति प्रयोगस्याप्युपपत्तिरिति । समानकर्तृकयोः पूर्वकाले । पूर्वकाल इति शब्दो बहुव्रीहिर्न तु तत्पुरुषः । समानकर्तृकयोरर्थयोः पूर्वस्मिन्नित्यनेनैव पूर्वकालावच्छिन्नबोधकपूर्वशब्दोपादानेन पूर्वकाललाभसम्भवेन कालपदोपादानस्य व्यर्थत्वापत्तेः । बहुव्रीहौ तु पूर्वकालविशिष्टार्थस्य लाभ इत्येतदर्थलाभार्थं कालपदम् । समानशब्दास्तुल्यपर्यायः ॥ तच्च तुल्यत्वन्न वास्तवभेदघटितम् । वयसा सामर्थ्येन च यत्र सदृशौ चैत्रमैत्रौ तयोर्मध्ये चैत्रेण प्रथमम्भुक्तान्तदनन्तरञ्च मैत्रेण तत्र चैत्रेण भुक्त्वा मैत्रो व्रजतीत्यापत्तेः । किन्तु यत्र क्रियाभेदेन तत्तन्निरूपितशक्तिभेदकृतभेदेन । कल्पितः कर्त्रो भेदस्तत्रैव इष्यत इत्यारोपितभेदघटितं सादृश्यन्तथा चैकत्वे पर्यवसानं बोध्यम् । नचैवमेककर्तृकयोरित्येवास्तु समानेति व्यर्थमिति वाच्यम् । सादृश्यमारोपितभेदघटितमपीह शास्त्रे शब्दसाधुतानियामकमिति

SGDF
Sri Gangeshwari Digital Foundation

बोधयितुमेवमभिधानात् । समानकर्तृकयोरिति, निर्धारणे षष्ठी । धातोरिति त्वधिकारलभ्यम् । तस्य च पूर्वकाल इति विशेषणम् । वाचकत्वं सप्तम्यर्थः । एवञ्च यत्फलितन्तदाह । तद्विशिष्टेऽर्थ इति ॥ अत एव । बहुव्रीहिसमासेनैतादृशार्थस्याभिप्रेतत्वादेव । अयं क्त्वाप्रत्ययोऽनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवन्तीति न्यायेन प्रकृत्यर्थ एव । स च भाव एव । एवञ्चाव्ययकृतो भाव इति सिद्धान्तस्याप्युपपत्तिः । कालस्य क्त्वान्तघटितवाक्यजन्यशाब्दबोधे क्त्वाप्रकृत्यर्थक्रियायाम्प्रकारीभूय भासते । अत एव पूर्वं भुङ्क्ते पश्चाद्व्रजतीत्यत्र क्त्वाप्रत्ययमाशङ्क्य स्वशब्देनोक्तत्वान्नेति समाहितमलङ्कृतसूत्रे भाष्ये । पूर्वशब्देन पूर्वकालरूपोऽर्थः प्रकृतेऽभिधीयते न तु धातुनेति तदर्थः । न च पूर्वम्भुक्त्वा पश्चाद्व्रजतीत्यत्रापि क्त्वा न स्यादिति वाच्यम् । नैतत्क्रियापौर्वकाल्यङ्किन्तर्हि कर्तृपौर्वकाल्यमेतत् । पूर्वं ह्यसौ भुक्त्वाऽन्येभ्यो भोक्तृभ्यस्ततः पश्चाद्व्रजतीत्यर्थस्य भाष्यकृतैवाभिधानात् । साधनान्तरक्रियापेक्षपौर्वकाल्यमिति नानेन सूत्रेणोक्ता किन्तु विभाषाग्रे प्रथमपूर्वेष्वित्यनेन । अत्र पूर्वकालक्रियाया वस्तुतोऽतीतत्वेऽपि बलेनावोधाद्भूत इति नाऽभिहितम् । सूत्रे समानकर्तृकयोरिति द्विवचननिर्देशाद्द्वित्वं विवक्षितमिति भ्रमनिवारणायाह । सूत्रे द्वित्वमतन्त्रमिति एवञ्चान्यलब्धस्याप्यर्थस्य स्पष्टप्रतिपत्त्यर्थन्द्विवचननिर्देशो न तु विवक्षितत्वादेव पूर्वकालविशिष्टा क्रिया च समानकर्तृकत्वसम्बन्धेन प्रधानक्रियायां विशेषणम् । स्वरत्यादिधातुभ्यः परस्य क्त्वः स्वरतीत्सिूत्रेण प्राप्तोऽपीट् श्र्युक इतिसूत्रेण बाध्यत इत्याह । पुरस्तादिति । अत्र क्त्वान्तार्थक्रियाकर्तुरनभिधानेऽपि प्रधानक्रियाकर्तुरभिधानेनाप्रधान क्रियानिरूपितशक्तेस्तदभिधानमिति न चैत्रो भुक्त्वा व्रजतीत्यत्र चैत्रपदादप्रधानक्रियामादाय तृतीया । नापि पक्त्वौदनो भुज्यत इत्यत्र द्वितीया । यत्र तु शक्त्योरेकनिष्ठत्वन्तत्रैवेयं व्यवस्था । यत्र तु तयोर्भिन्नाधिकरणकत्वन्तत्र त्वप्रधानक्रियाकर्मवाचका द्वितीया भवत्येव । ओदनम्पक्त्वा ग्रामो गम्यते चैत्रेणेति यथा । न च प्रातः काले शिवं दृष्ट्वा निशि पापं व्यपोहतीत्यादौ क्रिययोरेककर्तृकत्वाभावात्कथं क्त्वाप्रत्यय इति वाच्यम् । एतादृशे विषये स्थितस्सेत्यादेरध्याहारेण समानकर्तृकत्वस्योपपादनात् । न च दुर्गामावाह्य षोडशोपचैस्तामपूजयेदित्यत्रावाहनस्य षोडशोपचा-

SGDF
Sri Gargeshwari Digital Foundation

रान्तर्गतत्वादावाहनक्रियायास्ततो भेदाभावात्कथङ्क्त्वाप्रत्यय इति वाच्यम्। आवाहनात्मक विशेषधर्मावच्छिन्नस्य पूजने समानकर्तृत्वात्मकसम्बन्धेन विशेषणत्वन्तद्विशेष्यपूजने च षोडशोपचारैरित्यस्य सामान्यधर्मावच्छिन्नस्य विशेषणत्वमिति स्वीकारात्। यत्र त्वनेकक्रियाप्रयोगस्तत्र स्नात्वा भुक्त्वा पीत्वा व्रजतीत्यादौ सर्वक्रियावैशिष्ट्यम्प्रधाना क्रियायाम्भासते न तु तासाम्परस्परं विशेष्यविशेषणभावः गुणानां च परार्थत्त्वदिति न्यायात्। यत्र त्वयञ्चैत्रो भोजनेन तृप्तो न तु पानेनेत्यर्थविवक्षया भुक्त्वा तृप्तो न पीत्वेति प्रयोगस्तत्र जन्यत्वमपि भोजनस्य संसर्गविधया भासते पानस्य चैतादृशसम्बन्धावच्छिन्नाभावस्तर्पणक्रियायां विशेषणम्। अधीत्यतिशिवम्प्रपूज्य तदालये तिष्ठतीत्यादौ व्याप्यत्वं समानकर्तृकत्वञ्च सम्बन्धः तत्र व्याप्यत्वं क्त्वा चित्कालिकसम्बन्धावच्छिन्नञ्ज्ञानान्तेषूपसंख्यानमित्यनेन प्रशमय्य गतः प्रतमय्य गत इत्यत्राव्याप्तिसुक्त्वाव्याल्लोपि च गुरुपूर्वात् प्रतिषेध इत्यनेन प्रतिचिकीर्ष्य गत इत्यत्रातिव्याप्तिरुद्भाविता। अल्लोपि कृते यो गुरुपूर्वस्तस्मात्परस्य णेर्भूतपूर्वां लघुपूर्वतामाश्रित्यायादेशः प्राप्नोतीत्यर्थः। ततो लघुपूर्वादिति वचनात्सिद्धमित्युक्तम्भाष्ये। षष्ठ्यन्तपाठे यातिव्याप्तिः सा पञ्चम्यन्ततः प्रतमय्य गत इत्यादौ णिचश्च उपधाया इति वृद्धौ मितां ह्रस्व इति ह्रस्वत्वे कृतेऽप्यसिद्धवदत्रेति तस्यासिद्धत्वात्कथं लघुपूर्वात्परत्वमिति वाच्यम्। समानाश्रये हि आभीयासिद्धत्वम्भवति प्रकृते च णौ ह्रस्वत्वं ल्यपि णेरयादेश इति व्याश्रयत्वं स्पष्टमेव। विभाषापः। यद्यप्याप इतीडोऽप्यध्याप्य गत इत्यत्र सम्भाव्यते तथाप्यत्र लाक्षणिकत्वेन प्रतिपदोक्तस्यैवाप इत्यस्य ग्रहणमिति बोध्यम्। मूले कथम्मुखं व्यादायेति। सुखव्यादानस्य नेत्रनिमीलनस्य च स्वापहासोत्तरकालिकत्वेन पूर्वकालविशिष्टार्थवृत्तित्वाभावात्प्रश्नः। तदंशविवक्षयेति। एतेन विवक्षयैव वक्तुः शब्दानां साधुत्वनियामिका। यथा आदिकर्मणि निष्ठास्थले धात्वर्थैकदेशस्य स्थितावपि नुत्पत्तिकालावच्छिन्नस्य कस्य चिदवयवस्यातीतत्वविवक्षया निष्ठा भवति तथा प्रकृतेऽपि स्वापहासयोर्यत्किंचिदवयवस्य सुखव्यादाने नेत्रनिमीलनोत्तरकालिकत्वेन तदंशापेक्षया पूर्वकालसम्बन्धिक्रियावचनत्वमादायायम्प्रयोग इत्युक्तम्। न च यत्रादौ स्वापस्ततो सुखव्यादानन्तदधिकरणकालोत्तर-

SGDF
Sri Gargeshwari Digital Foundation

मपि स्वापानुवृत्तिस्तत्र मुखं व्यादाय स्वपितीति। नेत्रे निमील्य हसतीत्यत्राग्रविवक्षयोत्तरकालिकहासांशमादाय यथा प्रयोगस्तथा यत्र मुखव्यादाननेत्रनिमीलनयोरुत्तरकालिकस्वापहासाधिकरणकाले निवृत्तिस्तत्रापि मुखं व्यादाय स्वपिति नेत्रे निमील्य हसतीति प्रयोगः स्यादिति वाच्यम्। समानकर्तृकत्वस्यैव कालिकसम्बन्धावच्छिन्नस्वनिष्ठव्यापकतानिरूपितव्याप्यत्वस्यापि संसर्गत्वात्। न चैवं पूर्वकालिकस्वापहासांशयोरधिकरणे क्षणे कालिकसम्बन्धे। व्यादाननिमीलनयोरसत्वात्कथमेतादृशव्याप्यव्यापकभावस्योपपत्तिरिति वाच्यम्। शब्दप्रयोगाधिकरणकालाव्यवहितोत्तरकालाधेयत्वविशिष्टतत्तत्क्रियात्वावच्छिन्नव्याप्यतानिरूपितव्यापकताया एव संसर्गत्वाभ्युपगमात्। एवमेव विष्णुर्विश्वं व्याप्यास्तीति यत्र प्रयोगस्तत्राप्युपपत्तिः। आभीक्ष्ण्ये णमुल च। चकारोऽत्र स्वविषये क्त्वाप्रत्ययस्यापि प्रयोगार्थस्तत्राशंकते यद्यपीत्यादिना। तत्र सूत्र इति। विभाषाग्र इति सूत्र इत्यर्थः। तेन न्यायेन। उत्तरकालिकक्रियायां स्वसमानकर्तृकत्वसम्बन्धेन पूर्वकालिकक्रियायाः सत्वमिति न्यायेन। पूर्वविप्रतिषेधेनेति। अत्र प्रमाणन्तु तत्रैव सूत्रे भाष्यकृता तस्य सूत्रस्याप्राप्तविभाषात्वमुपपादितन्तदेव। यीतित मिति। एवञ्च कथं द्विर्वचनमिति शेषः णमुलादिनेति। अत्रादिना क्त्वः संग्रहः। अथान्तरेऽपि। आभीक्ष्ण्यातिरिक्तेऽपि। तद्विधानादिति। णमुलो विधानादित्यर्थः। न चार्थान्तरेऽप्येतद्विधानादिति कथम्। अस्याप्यव्ययकृतो भाव इति सिद्धान्ताज्ञात्र एतत्पत्तिस्वीकारादिति वाच्यम्। आभीक्ष्ण्याभावे दर्शनादित्यर्थस्य विवक्षितत्वात्। विभाषाग्रह इत्यादिसूत्रविषये यथा। मूले वा दीर्घ इति। गम ग्रातोर्णिचि मित्वाद् ह्रस्वत्वे णमुलि परे चिण्णमुलोर्दीर्घोऽन्यतरस्यामिति वा दीर्घ इत्यर्थः। न यद्यनाकांक्षे। सूत्रोदाहरणासम्भवमाशंक्य निराचष्टे। यद्यपीत्यादिना। अनाकाङ्क्ष इति पचाद्यजन्ताकाङ्क्षशब्दस्य नञ्समासः। अनाकाङ्क्षो धात्वर्थश्चेदित्यर्थः फलितः। अत्राकाङ्क्षा तद्विशेषणीभूतार्थप्रतिपादकत्वरूपा। एवञ्चोभयोः। क्रिययोस्तथात्वाभावस्तत्रैव निषेधोऽयन्तदाह। यत्रेत्यादिना मूले। अनेनानन्तरस्येति न्यायेन णमुल एव निषेध इति नाशंकनीयम्। यत्रात्तमिति व्याख्यानेनोभयोर्निषेधात्। ननुपच्चे लडादय इत्यनुपपन्नमयं भि-

SGDF
Sri Gargeshwari Digital Foundation

दादत आह । कर्त्रादिविवक्षापक्ष इति । मानाभावादिति । प्रकृतसूत्रविषये क्व चित्तु संयोगविशेषावच्छिन्नव्यापारनिष्ठव्यापकतानिरूपितम् । प्रपदं वासः परिधाय बहिर्गच्छतीयमित्यादौ यथा । गङ्गाम्प्राप्य सेना तिष्ठतीत्यादौ च सति तात्पर्येऽव्यवधानमपि सम्बन्धो भासते । एवमन्यत्र यथा यथम्बोध्यम् । न क्त्वा सेट् । कित्पदस्येत्संज्ञकककारबोधकतया सविशेषणे विधिनिषेध इत्ति न्यायेन विशेषणीभूतेत्संज्ञाया निषेधेऽस्य सूत्रस्य तात्पर्यमिति भ्रमवारणायाह । अनेनेति । न मृडमृदेति सूत्रं स्थाघ्वोरिच्चेतिसूत्रानन्तरम्पठनीयम् । सङ्ग्रहणञ्च कर्त्तव्यमेवञ्च मृडादिभ्य एव सेट् । क्त्वा किद्भवति नान्येभ्य इति नियमो भविष्यति तावतैव शयित्वेत्यादौ सिद्धौ न क्त्वेति व्यर्थमिति वाच्यम् मृडादिभ्य क्त्वैवदिति नियमस्याप्यपत्तेः । मृडमृद । यद्यपीह सेडिति न प्रकृतम् । तथाप्यस्य सूत्रस्य न क्त्वासेडितिसूत्रप्राप्तकित्कार्यप्रतिषेधबाधकत्वसेड्विषयकमेवेदं सूत्रमित्याशयेन सेट्क्त्वेति मूलेऽभिहितम् । नोपधात्थफान्ताद्वा । न क्त्वासेडिति वर्त्तते इह धातोरिति यद्यपि न प्रकृतन्तथापि क्त्वाप्रत्ययस्य धातोरेव सम्भव इति धातोरित्यस्याक्षेपस्तस्यनोपधादिति थफान्तादिति । च विशेषणम् । एवञ्च थफान्तादित्येवतदन्तविधिनाथफान्तस्यलाभेसिद्धेऽन्तग्रहणं स्पष्टार्थम् । कोथित्वा । रेफित्वेति । न चेहनोपधग्रहणाभावे कित्वविकल्पः स्यादिति वाच्यन्तन्न सम्भवति । रलोव्युपधादित्यनेन कित्वविकल्पस्य प्राप्तेरिति वाच्यम् । प्रकृतसूत्रे नोपध ग्रहणसामर्थ्येन तस्यापि विकल्पस्याप्रवृत्तेः । न च ऋफधातोः क्त्वा प्रत्यये विकल्पवारणाय नोपधग्रहणमस्त्विति वाच्यम् । द्वाविमौ धातू ऋफ ऋम्फेति । तत्राद्यस्य ऋफधातोः क्त्वाप्रत्ययेऽस्मिन्सूत्रे नोपधग्रहणे विकल्पस्य वारणेऽपि न क्त्वा सेडिति कित्वनिषेधेऽर्फित्वेति रूपम् । द्वितीयस्य नोपधादिति विकल्पेन कित्वपक्षे ऋफित्वेति रूपमिति फलतो विशेषाभावेन नोपधग्रहणस्य तद्व्यावर्त्तकत्वाभावात् । वञ्चिलुञ्चृतश्च वञ्चधातो रुदित्वादुदितो वेतीट् पक्षेऽनेन कित्वविकल्पः । ऋतीति सौत्रो धातुर्घृणार्थकस्तस्मात्क्त्वाप्रत्यये चिकीर्षिते आपादय इत्यनेन ऋतेरीयङिति विहितस्य ईयङ्प्रत्ययस्याभावेऽनेन कित्वविकल्पः । तृषिमृषिकृषेः । नोपधादित्यतो वाग्रहणानुवृत्त्यैव सिद्धे काश्यपग्रहणं पूजार्थम् । अञ्चुधातोरुदि-

SGDF

त्वादुदितो वेति विकल्पे प्राप्ते आह। अञ्चेः पूजायामिति नित्यमिडिति। श्री-मश्च क्लि। झलीति वर्त्तत इति। एकदेशे स्वरितत्वसामर्थ्यादिति शेषः। अ-स्योदित्त्वादिडभावेऽनुनासिकस्येति नित्यन्दीर्घे प्राप्ते इदम्। जातमशां वि-भाषा। क्लिस्कन्देत्यतः क्लीत्यनुवर्त्तते। अत्र यथा झलीत्यादावित्यस्य ला-भस्तम्प्रकारमाह। अनिदितामित्यत इति। तेन। क्तान्तोत्तरपदक इति व्या-ख्यानेन। स्नात्वा कालक इति। मयूरव्यंसकादिसमासः। स्पष्टार्थमिति। अव्य-यपूर्वपदकसमास एवास्य सूत्रस्य प्रवृत्तिर्नत्वव्ययात्परत्वं यत्र क्तान्तघटितस-मासस्य तत्र प्रवृत्तिरित्यर्थस्य स्पष्टप्रतिपत्त्यर्थमित्यर्थः। अनञः परस्य क्तान्तो-त्तरपदकस्य समासस्यावयवो यः कस्येत्यर्थे तु तत्र परमकृत्वाशब्देऽतिव्याप्तिः स्यात्। प्रकृत्येति। अत्र प्रशब्दस्य धात्वर्थगतप्रकर्षद्योतकतया गतित्वात्कुगती-ति समाससंज्ञा॥ ष्टत्वतुकोरसिद्धः॥ कोऽसिचदिति। इह पूर्वरूपस्य परादि-वद्भावेन ओऽसिचदित्यस्य पदत्वात्सकारस्य पदादित्वाभावादिणः परत्वात्षत्वे प्राप्तेऽसिद्धत्वम्। भाष्योक्तसिद्धान्ताभिप्रायेणाशंकते। यद्यपीति। पदान्तपदा-द्योरिति। अन्यथा वृक्षेच्छत्रमित्यत्र दीर्घात्पदान्ताद्वेति विकल्पो न स्यात्। सम्प्रदायमतानुसारेणाह। गतिकारकेत्यस्येति। ननु व्यवस्थितविभाषाणां भा-ष्यसम्मतानामेव प्रामाणिकत्वमत आह। वा ल्यपीत्यस्येति। न ल्यपिनपीयय-स्यास्सादौ तु पीङ्धातुर्दैवादिको बोध्यः। ल्यपि लघुपूर्वात्। लघुः पूर्वो यस्मा-दिति बहुव्रीहिः। न च प्रणमय्येत्यत्र सूत्रचारितार्थ्येऽपि विकल्पेत्यत्रायादेशो न स्यात्पञ्चमीसमासेनाल्लोपस्य स्थानिवद्भावादिति वाच्यम्। अस्माद्भाष्योदाहरणा-न्निष्ठायां सेटीतिसूत्रे सेट्ग्रहणाच्च पञ्चमीसमासस्यानित्यत्वात्। ननु लघुपूर्वा-दित्यत्रान्यपदार्थो वर्ण एव। वध्यवधिमतोः साजात्यादेवञ्च प्रचिकीर्षत इत्य-त्रापि वर्णग्रहणे जातिग्रहणादयादेशः प्राप्नोतीति चेन्न। प्रवेभिदय्यप्रस्तनय्ये-त्यादिभाष्योयोदाहरणबलेन पञ्चमीसमासानित्यत्वे नैकवर्णात्परत्वं यत्र त-त्रैवास्य प्रवृत्तेः स्वीकारात्। वर्णग्रहणे जातिग्रहणमिति तु ज्ञापकसिद्धन्न सर्वत्रेति परिभाषा नेहाश्रीयते। अत एव ल्यपि लघुपूर्वस्येति न्यासे व्य-कर्तृविवक्षापक्षे मानस्तु साधनपौर्वकाल्यविषयाणामग्रोदीनां ग्रहणमेव। अत एव समानकर्तृकयोः पूर्वकाल इतिसूत्रभाष्ये इह कस्मान्न भवति। पू-

SGDF
Sri Gargeshwari Digital Foundation

र्भुङ्क्ते पश्चाद्व्रजतीति स्वशब्देनोक्तत्वान्न भवति। न तर्हीदानीमिदं भवति। पूर्वं भुक्त्वा तदा व्रजतीति। नैतत्क्रियापौर्वकाल्यं किन्तर्हि कर्तृपौर्वकाल्यमेतत्। पूर्वं ह्यसौ भुक्त्वाऽन्येभ्यो भोक्तृभ्यस्ततो व्रजतीत्युक्तम्। अत्र कैयटः। स्वशब्देनेति। पौर्वकाल्ये द्योत्ये क्त्वादिर्विधीयते न तु विषयभावे। पूर्वशब्दस्यात्र क्रियापौर्वकाल्यवाचित्वादग्रादिसूत्रेणापि न भवति। अग्रादीनां साधनपौर्वकाल्यविषयाणामत्र ग्रहणात्। नैतदिति। द्विविधात्र भुजेः पूर्वकालता व्रजिक्रियापेक्षा तस्याम्प्रत्ययः। भोक्त्रन्तरसाध्यभुजिक्रियापेक्षा च तां पूर्वशब्द उपादत्ते ततस्त्वाग्रादिसूत्रेणात्र क्त्वाणमुलौ भवत इति भावः। कर्तृपौर्वकाल्यस्य क्रियाद्वारकमेवेति। कर्तृपौर्वकाल्यमित्यस्य कर्त्रन्तरसाध्यस्वसजातीयक्रियापेक्षपौर्वकाल्यमित्यर्थः। एवञ्च साधनपौर्वकाल्यविषयाणामग्रादीनां यत्रोपादानम्भावस्य च प्राधान्यविवक्षा तदा क्त्वाणमुलौ यदा कर्तुर्विवक्षा तदा लडादय इति बोध्यम्। अग्रभोजमिति प्रकृतसूत्रोदाहरणेऽमैवाव्ययेनेति नियमात्समासाभावः। कर्मण्याक्रोशे कृञः खमुञ्। कृञत्राभिमतफलानुकूल व्यापारवाची। चोरं कारमित्यत्र चोरशब्दः स्वरूपपरः। तस्य कर्मत्वञ्चोच्चारणापेक्षयेत्युच्चारणमभिमतफलमत्राव्ययकृत इति सिद्धान्तात्खमुञ्प्रत्ययोऽपि भावे। एतदन्तार्थस्यापि पूर्ववत्समानकर्तृकत्वसम्बन्धेन क्रियान्तरम्प्रतिविशेषणता॥ तत्सिद्धेः। चोरशब्दस्य सुम् सिद्धेः। यत्र चोरोऽसीत्युच्चारणमेव क्रोधेन तत्रायम्प्रयोगः। यत्र तु मार्हं चोर इति वदन् पुरुषश्चोरत्वेन सम्बध्यते तत्र नायम्प्रत्ययः आक्रोशपदस्वारस्यात्। आक्रोशोऽपि विलक्षणशब्दोच्चारणानुकूलव्यापार एव। विशेष्यस्य चोरशब्दोच्चारणानुकूलव्यापारस्य समानकर्तृकत्वसम्बन्धेन सामान्यधर्मावच्छिन्ने आक्रोशे विशेषणत्वम्॥ एवं सति कृञः प्रयोगस्तत्प्रकृतिकखमुञन्तशब्दघटितवाक्यस्य साधुत्वार्थमेव न तु खमुञन्तार्थस्यापि शाब्दबोधे भानमित्येव कल्पना लाघवादुचितेत्याशयेनाह। यद्वेति। आक्रोशपदार्थस्यात्रोच्चारणानुकूलव्यापार एव। चोरशब्दः पूर्ववच्छब्दपर एव। तस्योच्चारणरूपफलाश्रयत्वात्कर्मता। स्वादुमि णमुलकृञ इत्यनुवर्त्तते। स्वादुमित्यर्थपरम्। वृत्तिकारादिसम्मतव्याख्यानात् स्वाद्वर्थे उपपदे कृञो णमुल् स्यात् स्वादुशब्दस्य विजातीयप्रीतिरूपा या रुचिस्तद्विषयपरः। कृञधात्वर्थस्य

SGDF
Sri Gargeshwari Digital Foundation

सम्पत्त्यनुकूलव्यापारपरः। तस्य भुजधात्वर्थे विशेषणता पूर्ववत्। मान्तत्वन्निपात्यत इति॥ निपातस्य फलमाह स्वाद्वीमित्यादिना॥ अयम्भावः। स्वादुमीत्येव सूत्रं कार्यम्। खमुञ्ग्रहणमनुवर्तनीयम्। स्वादुमादीनाम्मुमागमेन सिद्धौ प्रकृतसूत्रेण णमुलो विधानं यत्र खमुञा सिद्धिर्न भवति तदर्थन्ताद्दृशः शब्दस्याव्ययसंज्ञक इति। अत एव च्व्यन्तमुदाहरति॥ स्वाद्वीमित्यादिना। यद्यस्मिन्नुपपदे खमुञ् स्यात्तदाऽनव्ययस्येति प्रतिषेधान्मुम् न स्यात्। च्व्यौ चेति स्वादुशब्दस्य दीर्घः स्यात्। सम्पन्नलवणयोरस्य धावितीत्वं स्यात्। स्त्रियामस्य स्वादुशब्दस्य यवागूपरत्वे वोतो गुणेति सूत्रेण ङीषि सति खित्यनव्ययस्येति मुमि स्वाद्विङ्कारमिति स्यात्। यत्तु णमुल्यपि मुमेव विधेयो न तु मान्तत्वनिपातनमिति। तन्न। च्व्यन्तत्वे स्त्रियाञ्च पूर्ववद्दोषापत्तेः। न च प्रत्ययसन्नियोगेन मुमो विधानादन्तरङ्गत्वात्पूर्वम्मुमिनैते दोषा इति वाच्यम्। उपपदमिति महासंज्ञा हि महासंज्ञाकरणात्सुबन्तस्य सुबुत्पत्तिश्च संख्यामपेक्षते। ततश्च स्वार्थद्रव्यलिङ्गसंख्याकारकाणाङ्क्रमिकत्वे प्रातिपदिकस्य स्त्र्यर्थाभिधायकत्वे स्त्रीप्रत्ययानन्तरं सुबुत्पत्तौ पूर्ववद्यवाग्वर्थाभिधायत्वेऽनिष्टरूपापत्तिः। स्वादुशब्दस्यैव प्रत्ययसन्नियोगमान्तत्वनिपातने तु न कश्चिद्दोषः। न च मान्तत्वनिपातनमस्तु खमुञ्प्रत्यय एवास्त्विति वाच्यम्। अव्ययार्थणमुल्विधानमित्यस्य प्रागविधानात्। न च मांतत्वनिपातनं णमुल्सन्नियोगि न स्यादेवञ्च स्वादुङ्कत्वेति रूपासिद्धिरिति वाच्यम्। एतत्प्रकरणस्थभावप्रत्ययसन्नियोगि न मान्तत्वनिपातनमित्याश्रयात्। यदि तु निपातनं नामापूर्वः शब्दोपजन इति-स्वादुशब्दस्य स्वादमित्यादेश इतिकल्पना तदा यश्च णमुल् लिङ्गविशिष्टपरिभाषया यवाग्वर्थाभिधायके स्वाद्वीशब्दे उपपदेऽपि स्यात्तस्य स्थाने मान्तादेशे स्वादुङ्कारम्भुङ्क्त इत्यस्य सिद्धावपि स्वाद्वींकृत्वा यवागूं भुङ्क्त इतिभाष्यप्रयोगस्य क्त्वाप्रत्ययपक्षेऽनुपपत्तिरित्युच्यते तदा णमुलसन्नियोगि मान्तत्वनिपातनमित्येवास्तु॥ स्वादुङ्कृत्वा भुङ्क्त इत्यत्र स्वादुशब्दो द्वितीयान्तस्तत्र स्वादुशब्दस्योपपदत्वाभावेन नित्यसमासस्याप्राप्तेः॥ अन्यथैवं कथमित्थंसु सिद्धाप्रयोगश्चेत्। कृञ् इत्यनुवर्त्तते॥ तच्च सुसिद्धाप्रयोग इत्यनेन सामानाधिकरण्यात्प्रथमया विपरिणम्यते। व्यर्थत्वादित्यस्यातिप्रयोजनाभावादित्यर्थः॥ शब्दप्र-

SGDF
Sri Gargeshwari Digital Foundation

योगो हि प्रयोजनाय भवति निष्प्रयोजनः स शब्दः प्रयोगानर्हः। अन्यथा भुङ्क्ते इतिशब्देन यावानर्थोऽभिधीयते तावानेवान्यथा कृत्वा भुङ्क्ते इत्यस्मादपि प्रतीयते। न च शाब्दबोधे वैलक्षण्यमस्त्येव। अन्यथाशब्दानाम्प्रकारविशेषाभिधायकतया कृञश्च क्रियासामान्यवाचकतयोभाभ्याम्प्रकारविशेषविशिष्टव्यापारोपस्थितौ भुङ्क्ते इत्येतच्छब्दादगलाधः संयोगानुकूलव्यापारे उपस्थिते सति तयोरर्थयोरभेदान्वयसत्वादिति वाच्यम्। एवं रीत्या वैलक्षण्यस्य शाब्दबोधे सत्यपि प्रवृत्तिनिवृत्त्यादिलक्षणकार्यवैचित्र्याभावेन कृञो नातिप्रयोजनत्वात्। इयोः क्रिययोः सामान्यविशेषभावेन भेदादेव पौर्वकाल्यनिबन्धनः क्त्वाप्रत्ययोऽप्यस्मिन् विषये वासरूपविधिना भवति प्रत्युदाहरणे वाक्ये कृत्वा प्रयोगे शिरोऽन्यथा भुङ्क्ते इत्युक्ते वक्तुस्य कर्तृत्वे शत्रुव्याघ्रादिशंकयाऽन्यप्रकारेण शिरो भुङ्क्ते इत्यपि प्रतीयेत यथा यशोरङ्गान्तरं विलम्बेन भुङ्क्ते न तथा शिरो भुङ्क्ते किन्तु झटिति भुङ्क्ते इत्यर्थः। यथातथयोरसूयाप्रतिवचने।कृञः सिद्धाप्रयोगे इति चानुवर्त्तते। यथातथाशब्दयोरुपपदयोः करोतेर्णमुल् स्यादसूयाप्रतिवचने गम्यमाने। असूया। अक्षमा। यदा प्रष्टुमयोग्यः पुरुषो भोजनकर्त्तारं महान्तं क्रोधाद्याविष्टम्पृच्छति सति तदीयवचनश्रवणोत्तरमयमयोग्यो माम्पृच्छति इदमयोग्यमिति ज्ञानजन्यमन्पुना प्रतिवक्ति यथाकारमित्यादि तदेदमुदाहरणम्। असूयाप्रतिवचन इत्यत्र षष्ठीतत्पुरुषभ्रमवारणायाह॥ असूययेति॥ असूयेत्यादि किम्। यथाकृत्वाऽहं भोक्ष्ये तथा द्रक्ष्यसि॥ सिद्धाप्रयोग इति किम्। यथा कृत्वाऽहं शिरो भोक्ष्ये तथा कृत्वाऽहं शिरो भोक्ष्ये किन्तवानेनेत्यत्र णमुल् मा भूत्। कर्मणि दृशि। अत्र कर्मोपपदञ्च त्वर्थनिर्देशः। अव्ययकृत्वात्। विद्ग्रहणेन सर्वस्य विदोग्रहणञ्च। सत्तार्थकस्याकर्मकत्वात्किन्तु चयाणामित्याशयेन मूले जानातीत्याद्यर्थमिर्देशः अव्ययकृत्वात्। साकल्यमत्र वक्तृबुद्धिस्थयावत्कर्मकत्वन्तच्च धातुविशेषणमर्थद्वारकम्। एवञ्च कर्मण्युपपदे दृशिविदो णमुल स्यात्। तयोः साकल्ये गम्यमाने॥ कन्यादर्शं वरयतीत्यत्र णमुलन्तोत्तरपदकस्य समासस्य सकलकन्याकर्मकदर्शने शक्तिः तस्य दर्शनस्य स्वसमानकर्तृकत्वस्वोत्तरकालिकत्वोभयसम्बन्धेन वरणे स्वीकारेऽन्वयः। एवञ्च यत्फलितन्तदाह। सर्वाः कन्या इति। ए-

SGDF
Sri Gangeshwari Digital Foundation

णमेव ब्राह्मणवेदं भोजयतीत्यत्रापि बोध्यम् प्रधानीभूतधात्वर्थस्य कारकविशि-
ष्टार्थविशिष्टस्यातिशयप्रतिपादनपरमेतद्वाक्यम् । यावति विन्दजीवोः । अत्र
लाभार्थकस्यैवविन्देर्ग्रहणम् । नुमा विशिष्टस्य निर्देशात् । असाकल्यार्थमि-
दं सूत्रम् । चर्मोदरयोः । अत्र पूरेरिति ण्यन्तस्य निर्देशः । अत एव चर्मोद-
रयोः कर्मत्वसम्भवः । कर्मणीत्येवेति । कर्मवाचकयोश्चर्मोदरयोरुपपदयो पूरे-
र्णमुल् ॥ अत्र पूर्वकाल इति न सम्बध्यते किन्तु समानकर्तृकयोरित्येव । ए-
वञ्च समानकर्तृकत्वमात्रं णमुलर्थस्य प्रधानधात्वर्थे सम्बन्धः । वर्षप्रमाणे ऊ-
लोपश्च कर्मणि पूरेरिति चानुवर्त्तते । वर्षशब्दस्यान्यार्थकत्वभ्रमवारणायाह । व-
र्षो वृष्टिरिति । वर्षस्य प्रमाणमियत्ता परिच्छित्तिः । सा गम्यते चेत्प्रत्ययः ।
अत्र भाष्ये ऊलोपश्चान्यतरस्याङ्ग्रहणं शक्यमकर्त्तुम् । कथङ्गोष्पदप्रवृष्टो देव
इति । प्राप्तिः पूरणकर्मा तस्मादेव कः ॥ आतोऽउपसर्गे क इति कः । गो-
ष्पदप्रमिति च क्रियाविशेषणमतो नपुंसकत्वमेकत्वञ्च । पदिकः विभक्तीनां
श्रवणं प्राप्नोति । अ्रूयन्त एवात्र विभक्तयः । तद्यथा । एकेन गो-
ष्पदमाप्रणीतिअनेन भाष्येणोलोपश्चेत्यादि प्रत्याख्यातन्तत्रोलोपग्रहणसत्त्वे गो-
ष्पदप्रन्तरामितीति । अनभिधानादिति । अत्र मानन्तु प्रत्याख्यानपरभा-
ष्यमेव । गोष्पदप्रतरामित्यस्येष्टावपि तदेवमानम् । न च पूरेर्वंजिगो-
ष्पदपूरमित्यस्यापिक्रियाविशेषणत्वात्सिद्धौ सूत्रस्याप्यकर्त्तव्यतापत्तिरिति ।
वाच्यम् । गोष्पदपूरेणेति विभक्तिश्रवणापत्तेः । गोष्पदपूरतरामित्यस्यानापत्ते-
श्च । ऊलोपश्चास्येत्यस्य सूत्रस्य सत्त्वे तु णमुलन्तस्याव्ययत्वे नोभयं सिध्यति ।
चेले क्नोपेः । वर्षप्रमाण इत्यनुवर्त्तते । क्नूयीधातुः शब्दे उन्दने च वर्त्तते ।
अनेन सूत्रेण णमुलि कृते तदन्तस्य प्रयोगे सति तावद्वर्षे जातः येन चेला-
नि शब्दायन्ते आर्द्राणि वाजातानीति गम्यते चेलशब्दोऽत्रार्थपरो वृत्तिकारा-
दिव्याख्यानात् । निमूलसमूलयोः कषः । कर्मणीति वर्त्तते । निगतं च त-
न्मूलं च निमूलम् । मूलेन सहितं समूलं । मूले भेद इति । विशिष्यतया
प्रतियमानसामान्यधर्मावच्छिन्नाश्रयत्वेन भानम् ।कषादिष यथाविधीत्यारंभा-
देवमेव प्रयोगः । समूलाकृतजीवेषु । धातूपपदयोरत्र यथासंख्यं करो हनः ।
अस्य सूत्रस्य सार्थक्यमाह । हिंसार्थानामिति । अहिंसार्थमिति । हनधातोर्गम-

SGDF
Sri Gargeshwari Digital Foundation

नार्थकत्वात्तस्मिन्नर्थे यदा पादघाते हंतीति प्रयोगस्तस्य सिद्ध्यर्थमित्यर्थः दर्शितवांस्मिन्नर्थे हन्धातुरन्यच। किञ्च हिंसाप्राणवियोगानुकूलव्यापारो न त्वभिघाताख्यसंयोगानुकूलव्यापारः धातूनामनेकार्थत्वात्तस्मिन्नर्थे यदा प्रयोगस्तदाऽप्यनेन सूत्रेण प्रत्यय इष्यते पाण्युपघातं हंतीति भाष्यप्रयोगात् । फलान्तरमाह हिंसायामित्यादिना। हस्ते पिषः। हस्ते हने इत्यत्र करणे ल्युट्। हस्ते वर्त्तिग्रहोः । करण इति वर्त्तते । तेन शुष्कचूर्णेति सूत्रे एव हस्ते हनग्रहणं कृत्वेदं सूत्रञ्च कार्यमिति शङ्का निरस्ता । तच्च कर्मणीत्यस्य सम्बन्धात्। हस्ते वर्त्तिग्रहोः । करण इति वर्त्तते । व्याख्यानात्प्राचीनसम्मतादर्थग्रहणमत्र वर्त्तिर्ण्यन्तो निर्दिष्टः। स्वे पुषः। अत्रापि स्व इत्यर्थग्रहणम्। स्ववाचिनि करणे उपपदे पुषधातो र्णमुल्स्यात् । स्वशब्दस्यात्मादयश्चत्वारोऽर्था अन्यत्र प्रसिद्धास्त एवात्रापि । अधिकरणे बन्धः अधिकरणवाचिन्युपपदे बध्नातेर्णमुल्। आक्रष्यत इति तदुक्तभाष्ये । इह कस्मान्न भवति। ग्रामे बन्धइति। एवं वक्ष्यामि । अधिकरणे बन्धः । संज्ञायामिति । अत्रसंज्ञायामिति कथनेनाकर्षः सूचितः । संज्ञायाम्। अनधिकरणार्थोऽयमारम्भः । कर्त्रोर्जीवपुरुषयोः। कर्तृवाचकयोर्जीवपुरुषयोरुपपदयो र्नशिवहोर्णमुल्स्यात् । यथासंख्यमत्रेष्यते। जीवनाशन्नश्यति। कर्तृषष्ठ्यन्तस्य जीवनशब्दस्योपपदसमासः । जीवकर्तृनाशाभिन्ननाशकर्त्तेति शाब्दबोधे वृत्ते जीवो नश्यतीति फलितम्। ऊर्ध्वे शुषिपूरे। उर्द्धशब्दे कर्तृवाचित्युपपदे शुषिपूरेर्णमुल्। ऊर्ध्वशोषं शुष्यति। अचाप्यार्थं पूर्ववत्। उपमाने कर्मणि च । चात्कर्त्तृरि। उपमानभूते कर्मणि कर्त्तरि चोपपदे धातोर्णमुल। अत्र धातोरित्यधिकाराल्लब्धम्।। उपमानशब्दः करणल्युडन्तः ।। कषादिषु यथाविध्यनुप्रयोगः । अत्र कषादिशब्देन निमूलसमूलयोरितिसूत्रनिर्द्दिष्टः । कषधातुरूपस्याप्यसे कषादिषु णमुल्प्रत्ययप्रकृतिषु सत्सु यथाविध्यनुप्रयोगो भवति यथाविधीत्यस्य विधानमनतिक्रम्येत्यर्थः।विधानस्य यत्सम्बन्धित्वन्तस्यैवानुप्रयोगे तदनतिक्रमो भवति ॥ कषादिप्रकृतिकणमुल्प्रत्ययस्य धातुसम्बन्धाधिकारे विधानादनुप्रयोगे सिद्धे यथाविध्येवानुप्रयोग इति नियमार्थमिदं सूत्रम्। धातुमात्रस्यानुप्रयोगासम्भवात्तत्प्रकृतिकप्रत्ययेऽपि प्रयोक्तव्ये तिङ एवेति नियमे मानाभावादाह । स-

SGDF
Sri Gargeshwari Digital Foundation

चाविशेषादिति । उपदंशस्तृतीयायाम् । उपपूर्वाद्दंशधातोस्तृतीयान्ते उपपदे णमुल्प्रत्ययः स्यात् ॥ न च मूलोक्तं वचनसामर्थ्यादित्यनुपपन्नन्दशनैरुपदंश्य भुङ्क्ते इत्यत्र प्रत्ययस्य सम्भवादिति वाच्यम् । करण इत्येव वक्तव्ये तृतीयायामित्युपादानात्तृतीयान्तोपपदस्य शब्दतोऽन्वयी दंशधात्वर्थे नचार्थस्तदन्वयस्तत्रैव प्रत्ययस्य स्वीकारात् । न च वचनसामर्थ्याण्णमुल्प्रत्ययस्य समासस्य च स्वीकारेऽपि कृत्प्रकृत्यर्थनिरूपितकारकत्वाभावेन कृद्ग्रहणपरिभाषया समासाभावपक्षे प्रातिपदिकसंज्ञापादनपरग्रन्थासङ्गतिरिति वाच्यम् । दंशधात्वर्थनिरूपितकर्मत्वसत्वेन तत्रार्थान्वयसम्भवेन कारकत्वसम्भवात् । हिंसार्थानाञ्च समानकर्मकाणाम् । पञ्चम्यर्थे षष्ठी । हिंसा च प्राणिन उपघातः केन समानकर्तृकत्वमित्याकाङ्क्षायामनुप्रयुज्यमानेनेति प्रत्यासत्त्या लभ्यते ॥ कालयतीत्यत्र कलधातुः कलविक्षेप इति चुरादिः । एवन्तड आघात इत्यपि चुरादिः । सप्तम्याञ्चोपपीड । चात्तृतीयायाम् । कर्ष इति । कृतगुणकस्य कृषधातोः शपा निर्देशस्तुदादिव्यावृत्त्यर्थस्तेन तुदादेः क्त्वाप्रत्यय एव । चेले उपकृष्य यवान् वपतीत्यत्र यथा । समासत्तौ । समासत्तिः सन्निकर्षः । यत्र योद्धारः केशेषु गृहीत्वा युध्यन्ते तत्र तेषां समासत्तिरस्त्येव । युद्धविषयकसंरम्भादत्यन्तं सन्निकर्षम्प्राप्य युध्यन्त इत्यर्थः । प्रमाणे च । प्रमाणमायामस्तु प्रमाणं स्यादिति पारिभाषिकम् । प्रकृतिविशेषानुपादानाद्धातुसामान्यात्प्रत्ययः । द्व्यङ्गुलोत्कर्षं खण्डिकां छिनत्ति । द्वयोरङ्गुल्योः समाहारो द्व्यङ्गुलम् । तत्पुरुषस्याङ्गुलेरित्यच् समासान्तः । अङ्गुलीद्वयसमाहारेण परिच्छिद्यत्कृत्स्नः खण्ड एव खण्डिका । अपादाने परीप्सायाम् । परीप्सा त्वरा । अपादाने उपपदे धातोर्णमुल् स्यात् । परीप्सायाङ्गम्यमानायाम् । परीप्सामुपपादयति । एवं हीति । अनुदात्तम्पदमेकवर्जमित्यप्यपादाने परीप्सायामित्यनेनाव्रजधातोर्णमुल । यस्मिन् काले उदात्तः स्वरितो वा विधीयते तत्समकालं तस्परित्यागेनान्यदनुदात्तं कर्त्तव्यमित्यर्थात् । यदि तत्र नापादानत्वन्तदा सौत्रत्वात्तत्र णमुल स्वांगेऽध्रुवे । अध्रुवे इति छेदः । अभावज्ञाने प्रतियोगिज्ञानस्य कारणाद् ध्रुवपदार्थं तावदाह । येन विनेति विशिपतिपदिस्कन्दाम् ॥ नन्वाभीक्ष्ण्ये उक्तस्यैव णमुल् ॥ पुनर्विधानन्तत्र क्त्वानिवृत्त्यर्थमेवास्त्वित्यत आह ॥ क्त्वानिवृ-

SGDF
Sri Gargeshwari Digital Foundation

तिस्विति ॥ वासरूपविधिना तस्यापीष्टत्वादिति शेषः ॥ पाक्षिकोपपदसमासिद्धिरिति तृतीयाप्रभृतीनीत्यनेन विहितेत्यादिः ॥ अस्यतितृषोः क्रियाः ॥ अस्यतेरतिक्रमणमर्थः ॥ योजनमस्यति ॥ अध्वकर्मकमत्यसनमत्र व्यवधायकञ्च कालकर्मकम् ॥ नाम्न्यादिशिग्रहोः ॥ अत्र नाम्नीति न सुबन्तपरङ्किन्तु स्वरूपपरत्वं सुपीत्येव वदेदत आह ॥ नामशब्द इति ॥ अव्यये ऽयथाभिप्रेताख्याने ॥ अव्यये उपपदे कृञः । ब्राह्मणपुत्त्र उच्चैः कृत्वा ... अयथाभिप्रेताख्याने गम्ये । अत्रायभिथा प्रे तशब्द आख्यानक्रियाया विशेषणम् । अभिप्रेतमभिमतम् । अभिमतश्चातुर्यथा न भवति तथा कथनमित्यर्थः । न च नीचैः कृत्य प्रियं कृते इत्यत्र कथमयथाभिप्रेताख्यानम् । प्रियकथनं यथाभिप्रेताख्यानमेवेति वाच्यम् । अस्याभिमतत्वेऽप्येतत्प्रकारस्य नीचैस्त्वस्यानभिमतत्वात् । तिर्य्यच्यपवर्गे । अत्र तिरश्चीति पठितव्ये तिर्यचीत्यस्योपपत्तिमाह । सौत्र इति । अयं तिर्यक्शब्दोऽन्तृजुवाची समाप्तिवाची च । तत्र द्वितीयामादायोदाहरणम् । तिर्यक्कृत्वा ...काष्ठं गत इत्यस्यप्रत्युदाहरणवाक्यस्य काष्ठमनृजुकृत्वा गत इत्यर्थोऽभिप्रेत इति । न च तिर्य्यच्यपवर्गे इत्यत्र तिर्यच् इत्यनुकरणशब्दविशेषस्य तत्रानु कार्यस्वरूपभङ्गभिया एतदोश्चित्यत्र त्यदाद्यत्वमिवाल्लोपो न कृत इत्येव कुतो नोक्तमिति वाच्यम् । न हि प्रयोजनानुवर्त्ति प्रमाणमितिन्यायविरुद्धत्वात् । सौत्रत्वस्वीकारे बाधकानि निपातनानीत्यनेन शास्त्राप्रवृत्तिरुचितैवेति भावः । स्वाङ्गे तस्प्रत्यये । प्रत्ययग्रहणपरिभाषालब्धमर्थमाह । तस् प्रत्ययान्त इति । मुखतःकारमिति आद्यादित्वात्तसिः । न च स्वांगे तसीत्येव वक्तव्ये प्रत्ययग्रहणं व्यर्थमिति वाच्यम् । मुखे तस्य तीतिमुखतसित्यस्यापिग्रहणापत्तेः । अत्वसन्तेति सूत्रेऽधातोरित्युक्तेर्नदीर्घः । मुखतः कृत्वेति । तृतीयाप्रभृतीन्यतरस्यामिति पक्षे समासाभावः । नाधार्थप्रत्यये च्व्यर्थे । अत्र ना च धाचेति द्वन्द्वस्य नाधार्थे शक्तिः । तस्य च द्वन्द्वस्यार्थशब्देन कर्मधारयः । नार्थौ । नानाञौ । धार्थाः । धमुञादयः । धमुञन्तात् स्वार्थे डदर्शनमिति डप्रत्ययस्यापि धाऽर्थत्वेन तदन्तस्याप्यत्र ग्रहणमिति । अन्वच्यानुलोम्ये । अन्वचीत्यस्यापि तिर्यचीति वत्साधुत्वम् । आनुलोम्यशब्दार्थं व्याचष्टे । आनुलोम्येति । भुव इत्येतदनुवर्त्तते । प्रत्युदाहरणे त्वन्वक्शब्दोविशेषवाची । तत्र स्थितः । पुरुषोऽनुकूलोऽ-

SGDF
Sri Gurgeshwari Digital Foundation

मनुकूलो वेति न प्रतीयते तेन शब्देन। प्रमाणान्तरेण तथा निर्णय इति त्व-न्यत्। अत्र ल्यप् न। समानकर्तृकयोरिति क्त्वाप्रत्ययस्तु भवत्येव। सर्वेष्टस्य कृदन्तस्य प्रयोगस्य सिद्धिः सिद्धिशब्दो मङ्गलार्थः॥

॥ इति कृदन्तविवरणम्॥

इति श्रीमदनन्तकल्याणसद्गुणनिधानाखिलपण्डितसार्वभौमभूमण्डलप्रसारिविमलतरानवद्यसद्यशः पार्वणपीयूषभान्वगस्त्यकुलवंशावतंसश्रीभवदेवमिश्रात्मजभैरवमिश्रकल्पितायां शब्देन्दुशेखरव्याख्यायाङ्कृदन्ताख्यम्प्रकरणं सम्पूर्णम्॥ + ॥

सम्वत् १९ ४४ मिति कार्तिक वदि १३

शुभंभूयात्

SGDF
Sri Gargeshwari Digital Foundation

॥ अथ वैदिकी प्रकरणम् ॥

॥ श्रीगणेशाय नमः ॥

प्रणम्य परमात्मानं वैदेहीपतिमव्ययम् ॥
वैदिकस्वरयोर्व्याख्याङ्कुर्वेऽथ क्रमशोऽधुना ॥ १ ॥

वेदलोकसाधारणशब्दसंस्कारन्निरूप्यावसरसङ्गत्या वेदमात्रसम्बन्धिसंस्कारन्निरूपयति । अथेत्यादिना । छन्दसि पुनर्वस्वोरेकवचनम् । द्विवचनस्यैव प्राप्तौ निमित्तमाह । द्वे तारे इति । एकवचनस्य विशिष्यविधानाभावे द्विवचनमेव स्यादिति भावः । उत्तरत्रेति । विशाखयोश्चेति सूत्रादुत्तरत्र तिष्यपुनर्वस्वोर्नक्षत्र द्वन्द्व इतिसूत्र इत्यर्थः । वृषन्वस्वश्वयोः । वस्वश्वशब्दयोरप्रत्ययत्वाद्भत्वे यचिभमितिसूत्रस्याप्राप्तौ उपसङ्ख्यायते । वृषन्शब्दे वृष्धातोः कनिन्युवृषीति विहितकनिनन्तः । नन्वल्लोपाभावे कारणस्य भत्वस्याभावः प्रदर्शयितुमुचितो न त्वङ्गत्वाभाव इत्यत आह । अङ्गस्य भस्येतीति । एकत्वाश्रयणेनेति । एतेनाङ्गसंज्ञाया अप्यल्लोपनिमित्तत्वमुक्तम्भवति । नभ इत्यादिवार्त्तिकयोश्छन्दसीत्युपादानाभावादत्रैवानयोर्लेखने कारणमत आह । एतद्वार्त्तिकद्वयमिति । अयस्मयादीति छन्दसि । अयस्मयादीनि शब्दरूपाणि छन्दसि निपात्यन्त इत्यर्थः । अत्र किन्निपात्यत इत्याकाङ्क्षायामाह । मूले संज्ञाद्वयमिति । कल्पनालाघवादाह । संज्ञाद्वयप्रयुक्तं कार्यमिति । एतेन प्रयोजनानुरोधेन भपदसंज्ञे बोद्धव्ये । तेनायस्मयशब्देऽयस्शब्दस्य भसंज्ञामात्रस्यानेन विधानेऽपि नोभयसंज्ञान्यपीति वार्त्तिकविरोधः । अयस्मशब्देऽयसोविकार इत्यर्थे द्व्यचश्छन्दसीति मयट् । वाचाभिनाः वाजिनाः । अयस्मयादिसमुदायस्य पाठः । तस्य समुदायस्य यथोपपत्तिस्तथा भपदसंज्ञयोः कल्पना कार्या ते प्रागिति सूत्रस्य

SGDF
Sri Gargeshwari Digital Foundation

पूर्वं व्याख्यातत्वात्पुनर्लेखनस्य वीजमाह। ते प्रागित्यनुवृत्त्येति। छन्दसि परेऽपीत्यपिना पूर्वंप्रयोगेऽपि साधुत्वमेव। अत एवानुव्यचलदित्यस्य सिद्धिः। व्यवहितप्रयोगादेव गतिरनन्तर इतिसूत्रेऽनन्तरग्रहणञ्चरितार्थम्। न च ते प्रागितिसूत्रङ्गत्युपसर्गसंज्ञा धातोः प्रागेव प्रयोक्तव्या इतिनियमार्थम्। एवञ्च तत्सूत्रानन्तरञ्छन्दसि नेति सूत्रङ्कर्त्तव्यन्तेन पूर्वोक्तनियमस्य निषेधे सिद्धे प्रकृतसूत्रद्वयन्न कार्यमिति वाच्यम्। तन्त्रेण क्वचिल्लोकेऽपि व्यवहितप्रयोग इत्येवमर्थं व्यवहिताश्चेत्यस्यावश्यकत्वात्। तेन सुकटङ्कराणि वीराणीति भाष्यप्रयोगस्योपपत्तिः। भाष्ये तु धातोः प्राक् प्रयुज्यमाना एव ते गत्युपसर्गसंज्ञा भवन्तीति संज्ञानियमपक्षमाश्रित्यैतत्सूत्रद्वयम्प्रत्याख्यातम्। न च छन्दसि परत्र व्यवधानेन यत्र प्रयोगस्तत्र गत्युपसर्गसंज्ञाया असत्त्वेऽपि यथा साधुत्वन्तथा लोकेऽपि परप्रयोगे व्यवहितप्रयोगे वा साधुत्वापत्तिरिति वाच्यम्। क्व चित्तथा प्रयोगे इष्टत्वात्। वारुणीमदविशदमथा विश्वचक्षुषोऽभवदसाविवराग इत्यत्र यथा। तेन स्वाध्येभ भूयत इत्यस्योपपत्तिः। पचति प्रेतिप्रौदनम्पचतीत्यपि च तर्हि साधुस्यादिति तु नापादनीयम्। अनभिधानात्। तदुक्तम्भाष्ये। अनिष्टादर्शनात्। न हि कश्चित्प्रपचतीति प्रयोक्तव्ये पचति प्रेति प्रयुङ्क्ते। यदि चानिष्टन्दृश्येत ततो यत्नार्हं स्यादिति। धातुपाठे भूधातोरादौ पाठाद्भवतेः प्रागुपन्यासे कर्तुमुचिते इन्धिभवतिभ्यामित्युपन्यासे किम्बीजमत आह। इन्धिभवतिभ्यामिति ॥

इति प्रथमोऽध्यायः।

हूयत इति। हुधातोः कर्मणि क्तन्। अग्निशब्दाच्छेषे षष्ठी तदन्तेन समासः। विधायकाभावेन न चतुर्थीसमास इति भावः। न च यवाग्वाऽग्निहोत्रञ्जुहोतीत्यत्र विशेष्यविशेषणवाचकपदयोरसमानविभक्तिकत्वात्कथमभेदान्वय इति वाच्यम्। विरुद्धार्थकविभक्त्यनवरुद्धत्वात्। नचैवं लोकेऽपि सुरूपेश्वानां स्वामीति शब्दात्सुरूपशब्दार्थाभेदान्वयवोधापत्तिरिति वाच्यम्। एकस्या आकृतेश्चरित इतिन्यायेन तादृशप्रयोगस्याभावात्। वेदे तु न तथा निय-

SGDF
Sri Gargeshwari Digital Foundation

मः। इधातोस्त्यागपूर्वकप्रक्षेपे वर्त्तनादेव यवाग्वाः कर्मत्वम्। अयमारम्भ इति। दिवस्तदर्थस्येति षष्ठी बाधनार्थः । ननु पुरुषमृग इतिवाक्ये चन्द्रमस्शब्दादपि षष्ठी स्यादत आह। बहुलग्रहणादिति। वार्त्तिके बहुलग्रहणादित्यर्थः। प्रथम्। वार्त्तिकद्वयरूपः। परवल्लिङ्गमित्यस्य बाधनाय हेमन्तशिशिराविति-सूत्रमारब्धम् । शिशिरशब्दस्य नपुंसकत्वे प्रमाणन्तु वस्त्राम्बकारेति लिङ्गानुशासनसूत्रे शिशिराणि नपुंसक इत्युक्तिरेव। ननु शिशिरोऽस्त्रियामिति कोशवशाच्छिशिरशब्दस्य पुंस्त्वमप्यस्तीत्यत आह। शिशिरशब्दस्येति । इत्येतन्निवृत्तय इति नपुंसकत्वपक्षे प्राप्तस्येत्यादिः । मतान्तरमाह । अमरस्येति। लिङ्गानुशासनविरोधात्प्रमाद इत्यर्थः। हनति। हन्तीत्यर्थः । शयने। शेते। त्राध्वम्। त्रायध्वम्। दाति। ददातीत्यर्थः। विवष्टीति । अत्र श्लौ द्वित्वे बहुलञ्छन्दसीतिसूत्रेण वक्ष्यमाणेनाभ्यासस्येत्वम्। मन्त्रे घसह्वरणश। अक्षन्निति। अदेर्लुङ् तस्य झिः। च्लेः। लुङ्सनोरिति घस्लादेशः। ह्वरेति ह्वृ कौठिल्य इत्यस्य कृतगुणकस्यानुकरणमकार उच्चारणार्थः। णशेतिकृतणत्वानुकरणम्। कुत्वमिति। एतदभावे व्रश्चेति षत्वे प्रणट् इति रूपम्। अक्रन्निति कृञ इति। झेरादेशे ङित्वाद्गुणाभावे यण्। अज्ञतेति । जनेर्लुङि तस्य झादेशे लेर्लुकि कृते अजनिषतेति प्राप्ते ॥

इति द्वितीयोऽध्यायः।

अनुप्रयुज्यमानमकशब्दं साधयति। कृञो लुङीति। अत्राप्यनुप्रयुज्यमानः कृञ् क्रिया सामान्यवाची। तदर्थे आमन्तार्थस्याभेदेनान्वयः। पावयां क्रियात्। लिङन्तस्येदं रूपम्। लोक इति । वेदेऽपि लोकवद्दृश्यमानमप्रकृतसूत्रे विदाङ्कुर्वन्त्वित्यतोऽन्यतरस्याङ्ग्रहणानुवृत्त्या साधनीयम् । पावयां क्रियादित्यत्र सवतेः पुनातेर्वा प्रयोगः णिजन्तस्येदं रूपम् । विदामक्रन्। विदेर्लुङ्याम्। लुङन्तकरोतेरनुप्रयोगः। मन्त्रे घसेति लेर्लुक्। गुपेश्छन्दसि। चङ्ङिति णिश्रीत्यतश्चङिति चानुवर्त्तते। अजूगुपतम्। गुपेर्लुङ्। थसस्तयादेशः। तुजादीनान्दीर्घोऽभ्यासस्येति दीर्घः। अगोप्तमिति । ऊदित्वादिडभावे वदव्रजेति वृद्धिः

SGDF
Sri Gargeshwari Digital Foundation

सिचस्तु झलो झलीति लोपः । नो नयति । गुपेरित्यतश्छन्दसीति वर्त्तते । मात्वायत इति । त्वायतः त्वामिच्छतः जरितुः स्तोतुर्ममकारमभिलाषम्माऽऊनयीः ऊनम्माकार्षीरित्यर्थः । माऽउनन्निति लोके । ऊनधातोश्चुरादेरदन्तात्सिचि चङि णौ कृतस्याल्लोपस्य स्थानिवद्भावेन न शब्दस्य द्वित्वम् । ध्वनयीदिति चौरादिकस्यादन्तस्य ध्वनशब्द इत्यस्य घटादिपठितनान्तस्य वा रूपम् । भाषायान्तु अदध्वनत् । अदिध्वनदिति वा । ऐलयीत् । इल प्रेरणे चुरादिः । भाषायान्तु ऐलिलदिति । आर्द्दयीत् । अर्द्द गतौ याचने हिंसायाञ्च । भाषायामार्द्दिदत् । येतुमस्याग्रन्तस्य तद्रूपम् । अमरदित्यत्र व्यत्ययो बहुलमिति परस्मैपदम् । छन्दसि निष्टर्क्यं । यदुक्तम्मूले कृन्ततेरित्यादिना तत्र प्रमाणमाह । निष्टर्क्ये व्यत्ययमित्यादिता । अत एव । दीर्घस्य निपातनादेव । देवयज्येति स्त्रियामेव । यजेर्यः प्रत्ययोऽधिकरणे । देवशब्देन कर्मषष्ठ्यन्तेन समासः । ब्रह्मवाद्यमित्यत्र वदेर्ण्यत् । न च यप्रत्यय एव दीर्घनिपातनमस्त्विति वाच्यम् । यतो नाव इत्यादुदात्तापत्तेः । ब्रह्मोद्यं वदन्तीत्यत्र तु व्यत्ययो बहुलमिति क्यप् तदेवाह । लोके त्विती॑ति । ब्रह्मोद्यमित्यत्र व्यत्यया स्वीकारे ण्यता क्यपो बाधः स्यात् । छन्दसि वनसन । वनसनौ वनषणसम्भक्ताविति भ्वादिपठितौ गृह्येते । न तु तानादिकौ । सानुबन्धकत्वात् । ब्रह्मवतिमित्यत्र ब्रह्मवनतीति विग्रहः । अत एव । वैदिकानान्तादृशसम्प्रदायादेव । डक्तसूत्रे । सनोतेरन इति सूत्र इत्यर्थः । छन्दसि सहः । भजो ण्विरित्यतो ण्विरित्यनुवर्त्तते । पृतना षाडिति । षह मर्षण इतिधातोर्ण्विन् प्रत्यये उपधा वृद्धौ सहेः साडः ष इति षत्वम् । हरदत्त इति । अत्राहुचिस्तु णिन्प्रत्ययस्य छन्दसि विधानेऽपि न्विवृत्तप्रेषणकात्सहधातोर्हेतुमण्णौ ततः क्विपि तुरासाहमित्यस्य लोकेऽपि साधनं सम्भवत्येवेति । अत एवाह बहवश्चेति । छान्दसा अपि क्व चिद्भाषायांभवन्तीत्याश्रित्य तेषां साधनमित्यपि वदन्ति किञ्च । केवलात्सहधातोर्ण्विन्प्रत्यये सति यः प्रयोगस्तस्य छान्दसत्वेऽपि णिजन्तात्क्विचि प्रयोगस्य लौकिकत्वमपि केचिदिच्छन्ति । अतएवाभ्रं मेघो वारिवाह इति प्रयोगः।वस्तुतस्तु वाह ऊडितिसूत्रस्यासिद्धंबहिरङ्गमिति परिभाषा ज्ञापकता परभाष्यप्रामाण्ये न वहेर्वोदेर्वा ण्विविचावनभिधानान्न भवतइत्यन्यत्रोक्तम् । तत्राप्यनकारान्तेऽकारान्तोपसर्गे चोपपदे इति

Sri Gargeshwari Digital Foundation

विशेषोपादानाज्ञारवाह इत्यादि भवत्येवेति। कव्यपुरीष। वह इत्यनुवर्त्तते। एतत्साध्यानाञ्छान्दसत्वमेव। हव्येऽनन्तः पादम्। पादस्य मध्ये इत्यन्तःपादम् नान्तःपादमनन्तःपादमिति समासः। एतदुपादानात्पादान्ते वर्तमानस्यास्यसाधुत्वमिति। मूले हव्यवालग्निरिति। द्वयोश्चास्य स्वरयोर्मध्यमेत्यसम्पद्यते स डकारो लकार इति प्रातिशाख्याल्लकारः। जनसनखन। अब्जा इत्यादीनामर्थमाह। अप्सु त्पद्यत इत्यादिना। सप्तम्या अलुगिति। हलदन्तादित्यनेनेत्यादिः। अवे यजः। अवशब्दे उपपदे यज्धातोर्ण्विन् स्यात्। मन्त्रे श्वेतवहोक्थशसित्यत्रावयजेति पाठे कर्त्तव्ये पृथक्सूत्रकरणस्य प्रयोजनमाह। योगविभागेति। विजुपे छन्दसि। यज इति वर्त्तते। अत्र मन्त्र इत्यनुवर्त्तमाने छन्दो ग्रहणं ब्राह्मणसङ्ग्रहार्थम्। मन्त्रव्यतिरिक्तो वेदभागो ब्राह्मणम्। एवञ्च मन्त्रब्राह्मणान्यतरत्वं छन्दस्त्वमिति केचित्तन्न युक्तमित्याशयेनाह। छन्दो ब्राह्मणेति। मुख्यछन्दस्त्वस्येति। एव प्रकृतसूत्रे छन्दसीत्युपादानं यदि यस्य मुख्यछन्दस्त्वम्मन्त्रस्य तस्यैव बोधनायेति चेन्मन्त्रस्य इत्यनुवृत्त्यैव सिद्धिरिति भावः। आतो मनिन्क्वनिबिति सूत्रोदाहरणमाह। सुधीवेत्यादाविति। वनिपि भूरिदाविति। बहुलञ्छन्दसि। ब्रह्मभ्रूणवृत्रेष्विति नियमव्यावर्त्तितः क्विवन्यस्मिन्नपि यथा स्यादित्येवमर्थमिदं सूत्रमित्याह। उपपदान्तरेऽपीति। धातुसम्बन्धाधिकारस्थमिति। तथा च तेन न सर्वत्र सिद्धिरिति शेषः। उत्तरार्थः। भाषायामिति सूत्रार्थः। अभावायेति। एवञ्च छन्दसीति पृथक्सूत्रेण लिड्विधानसामर्थ्यात्कानचो विकल्पे सिद्धे वा ग्रहणमुत्तरार्थम्। लिटः कित्वादेव। न चैवमिति। एवम्। कित्त्वस्य प्रतिषेधविषये आरभ्यमाणस्यापि गुणस्य प्रतिषेधार्थत्वे। समाधत्ते। ऋकारान्तेरेति। अररिवानित्यत्र रा दान इति राधातोर्लिटः क्वसोर्वस्वेकाजितीट्। ततो नञ्समासे पूर्वपदप्रकृतिस्वरः। अथायुशब्दे च दीर्घादटीति रुत्वमातोटिनित्यमिति नित्यमनुनासिकः। क्याच्छन्दसि। क्यादित्यनेन क्यच् क्यङोरेव ग्रहणमिति भ्रमवारणायाह। कियी य इतीति। क्यादित्यस्य क्सहिताद्यशब्दादित्यर्थात्। अनुसूयुव इति। असूयतेः कण्ड्वादियगताप्राप्तस्याप्यु प्रत्ययस्याप्रत्ययादित्यनेन बाधादस्यासाधुत्वम्। लोहितादिसूत्रभाष्यरीत्येति। तत्र हि क्यषः ककारस्य क्याच्छन्दसीत्यत्रास्य

SGDF
Sri Gangeshwar Digital Foundation

ग्रहणप्रयोजनन्तो न तुरण्यु र्भुरण्युरित्ये तत्सिद्धिरूपप्रयोजनमभिधाय याच्छन्दसीत्ये वास्तु तावतापि सिद्धिर्भविष्यतीत्युक्त्वा इदन्तर्हि प्रयोजनम् यत्तदक्त्वकार इतिदीर्घत्वन्तत्र किद्ग्रहणमनुवर्त्तते तदिहापि यथा स्यात् । लोहितायतीति । किम्पुनः कारणन्तत्र क्ङिद्ग्रहणमनुवर्त्तते । इह मा भूत् । उरुयाधृष्णुयेति । अत्र तृतीयैकवचनस्य स्थाने सुपां सुलुगिति यादेशः । यदि तत्र क्ङिद्ग्रहणमनुवर्त्तते पित्र्यमिति रीङ्भावो न प्राप्नोति । रीङ्भावे क्ङिद्ग्रहणन्निवर्त्तिष्यते । पित्र्यमित्यत्र पितुरागतमित्यर्थेपितुर्यच्चेति यत्प्रत्ययः । यदि निवर्त्तते कथमसूयावसूयाच यजामह इति । असूयनेरसूया । वसूयनेर्वसूया । एवमुक्तम् । अत्र यदीति प्रतीकमुपादाय कैयट आह । यदि रीङ्भाव एव निवर्त्तते न तु दीर्घविधावपि तदा असुवसुशब्दाभ्यां पूर्ववद्यादेशे कृते दीर्घाभावादसूयावसूयेति न सिद्ध्यति असूयनेः कण्ड्वादियगन्तस्यासूया ।वसूयतेरिच्छाक्यजन्तस्य वसूयेत्युत्तरमिति । मन्त्वे वृषेष । स्त्रियां क्तिन्नित्यतः क्तिन्नित्यनुवर्त्तते । ननु लाघवाय प्रकृतसूत्रे क्तिरिति पाठ्यमुदात्तवचनञ्च न कार्यमत आह । क्तौ विधातव्य इति । उत्तरार्थत्वमुपपादयति । व्रजयजोरिति । प्रमताविति । प्रमतिरित्यर्थे त्यर्थः । अत्र क्तिनो नित्वाभावे गतिकारकोपपदादिति कृदुत्तरं पदप्रकृतिस्वरः स्यात् । स्त्रियां क्तिन्नित्येव क्तिन्प्रत्यये सिद्धे प्रत्ययस्योदात्तत्वार्थं वचनम् । छन्दसि लुङ् । लोडर्थ इति । आगमत् । अत्र लृदित्वादङ् । अकरमिति । कृमृदृरुहिभ्य इत्यनेन च्लेरङ् भवति न तु मन्त्रे घसेति लुक् । सूत्रयोः कृद्ग्रहणेन पाक्षिकप्रवृत्तेरिष्टत्वात् । मृग्य इति । क्रियान्यतरस्योच्चारितशब्दादप्रतीतेरिति भावः । अयम् । सिप्प्रत्ययः । यासिसीष्ठा इत्यत्र याधातोर्लिङ् तस्य स्थाने व्यत्ययेन थास् । आशिषि चायम् । बहुलग्रहणात्सिप् । इण्निषेधः । एकाच उपदेशइतिविहितः । तत एव । छान्दसत्वादेव । इतश्च लोपः । अस्य यथा वैकल्पिकत्वन्तथाह । वैत इति । पतातीत्यत्र प्रक्रियामाह । पत्लृ गतावित्यादिना । करवावः । कृञो लटोवस् । उविकरणः । आट् । आडुत्तमस्य पिच्चेत्यतः पिद्ग्रहणानुवृत्त्याऽडाटोः पित्वाद्विकरणस्य गुणः । करोतेरुत्वाभावश्च । अत्र वस्मसोरित्येव सूत्रयितुमुचितम् । मादयैत इति । मदी हर्षे । णिजन्ताल्लेट् । प्रथमस्याकारस्य ऐकारः । परिशेषात् । अन्त्यस्य हि नि-

SGDF
Sri Gargeshwari Digital Foundation

त्वात् टेरेत्वेन निवृत्तिरएटस्तु विधानसामर्थ्यान्न भवति। न च टेरेत्वस्य शब्दा-
न्तरप्राप्त्याऽनित्यत्वं शङ्क्यम्। वैतोऽन्यत्रेति सूत्रेऽन्यत्रग्रहणात्। यदि आत ऐ
इत्यनेनान्यस्यापि स्थानेऽनेन ऐकारः स्यात्तदा वैत इतिसूत्रोद्देश्यस्यान्यत्रैव
लाभेन तद्वैयर्थ्यं स्पष्टमेव। वैतोऽन्यत्र। वा एत इति छेदः। भेदज्ञाने प्रतियो-
गिज्ञानस्य कारणत्वात्प्रतियोगिजिज्ञासायाम्पूर्वस्य पुरस्फूर्त्तिकत्वात्तद्विषय ए-
व प्रतियोगी बोध्यः। अहमेव पशूनामीशै। ईश ऐश्वर्ये। उत्तम इट् लेट् स्था-
निकः। तस्य टित इत्येत्वे ऐकारः। ग्रहा गृह्यान्तै। ग्रहेः कर्मणि लेट् तस्य
झः। आट्। यकि सम्प्रसारणम्। उपसंवादाशङ्कयोश्च। उपसंवादः पणबन्धः
समयकरणमित्यनर्थान्तरम्। सचान्यप्रति यदीदम्भवान्मे कार्यङ्कुर्यात्तदा तुभ्य-
महमेतावद्दास्यामीति कथनरूपः। आशङ्कासम्भावना। अहमेवेति। त्रिपुरवि-
जये देवैः प्रार्थितस्य रुद्रस्येदं वचः। पशवः लौकिकाः। नेज्जिह्मायन्त इति।
इच्छब्द आशङ्काद्योतकः। जिह्मम्पापम्। जिह्माचरणेन नरकपातः सम्भाव्यते
स मा भूदित्यर्थः। तच्च पापन्न सर्वङ्किन्तु कुटिलन्तच्च कौटिल्यङ्किमित्याकाङ्क्षा-
शान्तये आह। जिह्मायन्त इतीति। अत्र जिह्मशब्दात्परेच्छायाङ्क्यच्। अत्र
नेच्छायाङ्क्यच्। किन्तु आचार एवेति वादिमतमाह। अन्ये त्विति। छन्दसि
शायजपि। अस्कभायेति। स्कन्भधातोर्लङ्। तस्य तिप्। अपिशब्दाद्धावपि
शायच्। गृभायेति। ग्रह उपादाने। लोट् सेर्हिः। क्र्यादित्वादस्माच्छ्नातस्य
शायच्। ग्रहेः सम्प्रसारणम्। शानच उदाहरणं बधानेति। हृग्रहोर्भ इत्यस्यो-
दाहरणमाह। गृभ्णामीति। व्यत्ययो बहुलम्। व्यत्ययपदं व्याचष्टे। व्यति-
क्रम्येति। णजिति। कर्मव्यतिहारे णजिति णच्। तस्येति। लिङ इत्यर्थः।
धातोः। वृधातोः। ननु व्यत्यय इत्येवसूत्रं पाठ्यम्। छन्दसि शायजपीत्यन्त-
स्य विकरणप्रकरणान्ते पाठेनप्रत्यासत्त्याविकरणानां लाभे सिद्धे बहुलग्रह-
णं सर्वोपाधीनामपि व्यत्ययो यथा स्यादित्याह। विकरणेति। ननु दक्षिणा
या इत्यत्र सुपः षष्ठ्याव्यत्ययेऽपिस्याडागमो दुर्वार आगमस्यैतेष्वपरिगणना-
दत आह। छान्दसत्वादिति। दक्षिणाया इतिप्रयोगस्य छान्दसत्त्वादित्यर्थः।
उपग्रहपदं सुप्तिङित्यत्रोपात्तं लाक्षणिकमित्याशयेन व्याचष्टे। उपग्रहपदे-
नेति। यद्यपि मकरन्दादिवाचको मधुशब्दोऽर्द्धर्चादिस्तथापि तत्र पठितात्-

SGDF
Sri Gargishwari Digital Foundation

न्योनित्यन्नपुंसक इत्याशयेनाह। अस्मेतेति। कारकवाचकस्य कृत्प्रत्ययस्य व्यत्ययः सम्बोनप्रतीयत इत्याशयेनावग्रहेण पठति। अन्नअदायेति। कर्तर्यच्। तदन्तेन षष्ठ्यन्तान्न शब्दस्यसमासे सुपो लुकि समासे संहितायानित्यत्वादन्नैवमव ग्रहेणप्रयोगोऽनुचित इत्याशयेनाह। लक्षणेनेति। कृत्तद्धितानामित्यत्र तद्धितपदन्दीव्यत्याद्यर्थे विधीयमानठगादीनाङ्कर्तृ वाचकत्ववादिनो मतेन। वस्तुतो नैष तद्धितः कारकपरः। तद्धितार्थघटकदेवनादेरक्रियात्वात्। एवञ्चेदन्तद्धितप्रत्ययव्यत्ययमात्रतात्पर्यकं बोध्यम्। अत एव त्वं वत्ययति ते जातवेदः विश्वे देवा सोमयुतोयतिष्ठनेत्यत्र क्रिमी विहितो डतिर्यच्छब्दादपि दृश्यते। मन्त्वं वोचेमाग्नये ॥ वच धातोराशीर्लिङोमसादेशः। अङ्। उम्। छन्दस्युभयथेतिलिङः सार्वधातुकत्वाद्यासुट् इयावेशे यलोपः। छन्दस्युभयथा। यद्यपि संज्ञयोःसमनियतत्वन्तथापि कार्यस्य तत्तसंज्ञानिबन्धनस्य छन्दसि दृष्टानुविधानेननियम एव। तेनातिप्रसङ्गो न शङ्कः। आदृगमहन। अत्र आदितिदान्तं थान्तं वा। तेन तपरपदे पञ्चमीसमासेऽपि ऋकारपदेनदीर्घस्यापिग्रहणः सिद्धिः। असंयोगाल्लिट्किदित्येव सिद्धेकिकिनोः कित्वं कार्यविशेषार्थमित्याह मूले लिड्वद्भावादेवेति। विना पि वतिं वत्यर्थो गम्यते तेन लिड्वदित्यस्य लाभः। अनेन लिटि यत्कार्यन्तदतिदिश्यते एवं हि किकिनोः स्वरूपाबाधो भवति। तेन लस्य स्थाने विधीयमानादेशो न। तुमर्थे सेसेनसे। तुमशब्दोऽत्र तु सुन्परः। प्रयैरोहिष्यै। प्रपूर्वकाद्याधातोः कैप्रत्ययः। रुहेरिष्यै नजि व्यथेस्यायम्। दृशे विख्ये च। केप्रत्ययस्तुमर्थे निपात्यते। पूर्वसूत्र एवैतावपि पठितुं योग्यौ। कृत्यार्थे तवैकेन्केन्यत्वनः। अत्र कृत्यार्थशब्देन भावकर्मणोर्ग्रहणन्तयोरेवेतिसूत्रे विशिष्यतयोरुपादानात्। करणादौ स्नानीयमित्यादौ यद्यपि कृत्यो भवति तथापि बाहुलकादिनेति न स प्रतिपदोक्तः। नम्लेच्छितवै इत्यत्र तवैप्रत्ययः कृत्यार्थे भावे नम्लेच्छितव्यमित्यर्थः दिदृक्षेण्य इति। दृशधातोः सनिकेन्यः। अतो लोपः। कर्त्वमित्यत्र कृञस्त्वन्। गुणः। कृत्यमित्यर्थः। अवचक्षे च। चक्षिङ् एश्प्रत्ययः। प्रत्ययस्य शित्वात्सार्वधातुकत्वमिति ख्याञादेशाभावः। भावलक्षणेस्थेण्। लक्ष्यतेऽनेनेत्यर्थे लाक्षणमिति। भावोऽत्र धात्वर्थः। आसंस्थाधातोः सीदन्ति। अत्र सम्पूर्वकः स्थाधातुः समासौ

SGDF
Sri Gargeshwari Digital Foundation

वर्त्तते। संतिष्ठते पित्र्ययज्ञ इत्यत्र यथा। संस्थादीनामवधित्वेन सदृधात्वर्थ-लक्षणत्वम्। अस्मिन् सूत्रे तुमर्थे इत्यस्य सम्बन्धादजन्तो सुन्प्रत्ययो भावे। उदेतोः अपकर्तोरित्यादौ इणादिधात्वर्थौ यस्य लक्षणं सा क्रिया यथा यथ-मूहनीया। सपित्वदोः कसुन्। विसृप इसि। सृप्लृ गताविति गत्यर्थकात् सृप्-धातोर्भावस्य लक्षणत्वे गम्ये भावे कसुन्। कित्वाद् गुणाभावः। एवमादिद इत्यत्रोद दिरधातोर्हिंसानादरार्थकात्कसुन्॥

॥ इति तृतीयोऽध्यायः ॥

रात्रेश्चाजसौ। राशदिभ्यां त्रिपितित्रिप्प्रत्ययान्तो रात्रिशब्द आद्युदात्तः। अस्मादजस्विषये ङीपि यस्येति लोपेऽप्यनुदात्तस्यैव लोप इत्युदात्तनिवृत्ति-स्वरो न। अत्र नित्यं संज्ञाछन्दसोरिति सूत्रात्संज्ञाछन्दसोरित्यनुवर्त्तते। एव-ञ्च संज्ञायां लोकेऽपि। सोऽप्याद्युदात्त एव। एवञ्च यत्फलितन्तदाह। असंज्ञा-विषय इति। नित्यञ्छन्दसि। आरम्भसामर्थ्यादिति। विकल्पस्य पूर्वेण सिद्धेः। एवञ्च भुव इतिसूत्रविहितो ङीङ् नित्यएव। भुवश्च। भूधातोर्डुप्रत्ययेन क्रस्वा-न्तोयम्। क्विवन्तस्य तु स्वयम्भूः। मुद्गलाच्छ। इन्द्रवरुणेतिसूत्रे वार्त्तिकमिद-म्। ङीषो लित्वेनानुगाकारस्योदात्तत्वम्। दीर्घजिह्वी चच्छन्दसि। नखमुखा-दित्यतः संज्ञायामित्यनुवर्त्तते। कद्रुकमण्डल्वोः। ऊङुत इत्यत ऊङितिव-र्त्तते। गुग्गुल्वादीनांलोकेस्त्रीदाह। गुग्गुल्वादीनामिति। पतयालुः स्पृहिगृहीत्यालुजन्तः। अव्ययात्यप्। प्राग्व्याख्यातमपि आविष्यस्ये-त्यत्रानुवृत्त्यर्थम्पुनरुपात्तम्। आविष्ट्यस्योपसंख्यानम्। आविष्ट्यशब्द आ-विर्भूत इत्यर्थे वर्त्तते। ह्रस्वात्तादाविति षत्वम्। त्यपस्तकारस्य ष्टु-त्वम्। द्वयचश्छन्दसि। मयड्वैतयोर्भाषायामित्युक्तेरप्राप्तो मयड् विधी-यते। द्व्यच इतिप्रातिपदिकस्य विशेषणम्। ढश्छन्दसि। सप्तम्यन्तात्सभाशब्दा-त्साध्वित्यर्थे ढः स्यात्। पठ्यत इति। एवञ्च छन्दसि सर्वविधीनां वैकल्पिकत्वा-द्यतो नाव इत्यस्याप्रवृत्तौ तित्स्वरितमित्यस्य प्रवृत्तौ तदन्तस्य स्वरितत्वमुपप-द्यत इति भावः। पाथोनदीभ्यां ड्यण्। भवार्थे पाथोनदीभ्यांड्यण् स्यात्। अत्र

SCDF
Sri Gargeshwari Digital Foundation

पाथस् शब्दोऽन्तरिक्षवाची पातिलोकानवकाशदानेनेति वृत्तिः। यद्यपि जलेऽन्ने चायमुणादिषु व्युत्पादितः। अमरसिंहोऽपि कबन्धमुदकम्पाथ इत्याह। तथाप्युणादयो बहुलमिति बहुलग्रहणादन्तरिक्षेऽपि भवतीति तद्भावः। वशन्तहिमवद्भ्याम्। विशिर्भ्रश्चेति व्युत्पादितोऽयम्पल्वलवाची। पल्वले विद्यमाना इत्यर्थः। स्रोतसो विभाषा डाड्ड्यौ। जलप्रवाह इति। नद्यादिप्रप्रवाहे चाऽयम् न तु जलसामान्यस्य। सगर्भसयूथ। प्रत्ययोऽयं नित्। तेनैतदन्तस्याद्युदात्तत्वम्। पूर्वेण अग्राद्यदितिसूत्रेण। समुद्राभ्राद्घः। अभ्रशब्दस्य पूर्वनिपाते कर्त्तव्ये परनिपातकरणम्पूर्वनिपातस्यानित्यत्वबोधनाय। बर्हिषि दत्तम्। अव इति दत्तमित्यस्यादिः अर्थविशेषनिर्देशादित्यस्याग्रे बोध्यम् अणृक्षयोरिति। ऋक्षस्शब्दात्प्राप्तस्याणः यातुशब्दाच्छस्येत्यर्थः। प्रशस्यस्य श्र इतिनिर्देशात्कर्मणि प्राप्तिवारणायाह। बाहुलकादिति। सम्प्रसारणमिति। ततो गुण इति शेषः। हविष्या। हविषे हिता। गवादिभ्यो यत्। असुरस्य स्वम्। शैषिकाणोऽपवादः। मायायामण् पूर्वसूत्र विहितस्य यतोऽपवादोऽयम्। असुरपदघटको नञ् विरोध्यर्थक इत्याशयेनाह। असुरेति। तद्वा नासामुपधानो। अत्रोपजानशब्दः करण ल्युडन्तः। उपधीयत अनेन इतिव्युत्पत्तेः। चयनस्य करणमित्यर्थः। वर्चस्वानिति। वर्चशब्दोऽस्त्यस्मिन्मन्त्रे समन्त्रो वर्चस्वान्देवस्य त्वा सवितुरित्यादिको मन्त्रः। यद्यपि तस्मिन्मन्त्रे पदान्तराण्यपि सन्ति तथापि छन्दसि दृष्टस्यैवानुविधानान्मत्वन्तादेवायं यत्प्रत्ययः। यत्तु स्तुतीरुपदधाति। प्राणभृत उपदधातीत्यादिः प्रयोगस्तत्र स्तुत्यादिशब्दानान्तद्वन्मन्त्रकरणकोपधानकर्मीभूतास्विष्टकासु लक्षणया प्रयोगः। अश्विमानण्। अश्विमच्छब्दादुक्तेऽर्थेऽण् स्यात् मतुपश्च लुक्। आश्विनीरुपदधाति। अश्विन्शब्दवान्मन्त्र उपधानोयासान्ता इत्यर्थः। मतुपो लुक् इनण्यनपत्यइति प्रकृतिभावः। अश्विमानित्येकवचनमश्विमत्वसामान्यविवक्षया। तेन बहूनाम्मन्त्राणामश्वितमत्वेऽपि नक्षतिः। वयस्यासुमूर्। अत्र मूर्द्धन्शब्दस्तत्प्रकृतिके लाक्षणिकः। मतुब्शब्दः प्रत्ययग्रहणपरिभाषया तदन्तपरस्तथा च मूर्द्धन्शब्दप्रकृतिकं यन्मतुवन्तन्तस्मान्मतुप् स्यादित्यर्थः। वयस्यास्वित्यत्र तु वयस्वच्छब्दात्पूर्वसूत्रेण यत्। तेनोभयवत्वमर्थसिद्धम्। तदाह मूले यस्मिन्मन्त्र इति। मूर्द्धन्वतीरित्यत्रातो नुडिति नुट्। न च

SGDF
Sri Gargeshwari Digital Foundation

वयस्याशब्दस्य छन्दस्येव साधुत्वान्व्याख्यानात्सूत्रे प्रयोगोऽनुपपन्न इति वाच्यम्। छान्दसा अपि क्वचिद्भाषायाम्भवन्तीत्यस्य ज्ञापनार्थत्वात्। छन्दोवत्सूत्राणीति-भाष्यकारेष्ट्या सिद्धत्वात्। यस्मिन्मन्त्रे मूर्द्धन्शब्द एवास्ति वयस्शब्दस्तु नास्ति तन्मन्त्रोपधेयासु मूर्द्धन्वतीरिति प्रयोगः क्वचिद्दृष्टस्तु लक्षणया साधुः। मत्वर्थे मासतन्वोः। अत्र तनूशब्दो दीर्घान्तस्तेन घित्वाभावान्नास्य पूर्वनिपातः तदाह। सूत्र इति मासतन्वोरिति समुदायोपाधिरित्याशयेनाह। मत्वर्थ इत्यादिना। मधुमन्त इति। अक्षयन्न भवतीति शेषः। अनन्तरार्थेवेतीति। अत्र वाशब्दश्चार्थे। तेन मत्वर्थे मासतन्वोः समुदायवाच्यत्वे प्रत्ययो यथा भवति तथा मासतन्वोरेव वाच्ययोरनन्तरार्थेऽपि प्रत्यय इत्यस्य लाभः। लुगिति। प्रत्ययस्य लुगित्यर्थः। मधु अस्त्यस्मिन्नाभांसि सन्त्यस्मिंस्तयोस्त्यस्मिन्नित्यर्थे मासे एव वाच्ये प्रत्ययस्य लुगित्यर्थः। ननु मासस्यावशिष्ठसमुदायवाच्यत्वे न भस्शब्दस्य पुंस्त्वापत्तिरत आह। अन्त्ययोरिति। इष इति। एषणमिट्। अन्यत्राव्ययं शब्द इत्याह। इडिति। इकारोदाहरणमाह। शुचिरिति। रेफेत्यस्य प्रत्ययत्वभ्रमनिवृत्तये आह। रेफो रशब्द इति। वेशोपश आदेः। वेशोपश इति द्वन्द्वस्यादिशब्देन बहुव्रीहिरित्याह। एतदादिकादिति। भगशब्दार्थमाह। भग इति। पूर्वैः कृतमिनयौ च। पूर्वशब्दात् तृतीया बहुवचनान्तादयम्प्रत्ययः। एतदन्तस्य त्वेकवचनान्तत्वमपि भवति। अद्भिः संस्कृतम्। यदित्येवात्र सम्बध्यते। सहस्रेण सम्मितौ घः। सम्मितिः सादृश्यम्। क्वचित्तु समिताविति पाठः। अर्थस्तु स एव। मतौ च। अत्र मतुशब्दो मत्वर्थे। एवञ्चेह सहस्रेणेतिपदम्पञ्चम्या विपणतव्बोध्यम्। मधोः। मये चेति सम्बध्यते। स्वार्थे इत्यपीति। वसोरिति योगविभागेन स्वार्थे प्रत्ययः प्रथमसूत्रेणेति भावः। अक्षर समूहे। अक्षरं व्यञ्जनसहितोऽच्। अत्रार्थानिर्देशादयम्प्रत्ययः स्वार्थे। सर्वदेवात्तातिल्। सर्वदेवादिति समाहारद्वन्द्वात्पञ्चमी। भावे च। अत्र भावः प्रकृतिजन्यबोधप्रकारः॥

इति चतुर्थोऽध्यायः।

SGDF
Sri Gargeshwari Digital Foundation

विंशिन इत्यत्र विंशतिशब्दात्परिमाणोपाधिकात्षष्ठ्यर्थे डिनि प्रत्यये ति-विंशतेरिति तिशब्दस्य निवृत्तिः । तत्र विंशतिशब्दवाच्यान्याह । आङ्गिरस इ-त्यादि । वत्सरान्ताच्छश्छन्दसीति सूत्रोदाहरणमाह । इद्वत्सर इत्यादि । छन्द-सिघस् । समयस्तदस्य प्राप्तमित्यतस्तदस्य प्राप्तमिति ऋतोरणित्यत ऋतोरणि-त्यत ऋतोरिति वर्त्तते । उपसर्गाच्छन्दसि धात्वर्थे । अत्र धातुशब्दो धात्वर्थ-लाक्षणिको न तु धातुसंज्ञकशब्दपरः । तस्योपसर्गार्थत्वासम्भवात् । अर्थशब्दश्च प्रयोजनवाची । एवञ्च धात्वर्थोऽर्थः प्रयोजनं यस्येत्यर्थः इत्याशयेनाह । धात्व-र्थविशिष्टसाधन इति । उपसर्गाणामयं स्वभावो यत्र समभिव्याहृतधातुप्रतिपा-द्या क्रियास्ति तत्र तद्गतं विशेषन्द्योतयन्ति यत्र तु तथा नास्ति तत्र क्रियावि-शिष्टे साधने वर्त्तनमिति । यथा निष्कौशाम्बिरित्यादौ । एवञ्च यदुद्वत इत्य-त्रोद्गमनविशिष्टकर्त्रभिधायकत्वमव्याहतमेव तदाह मूले उद्गतानिति । थट् च छन्दसि । तस्य पूरण इत्यतो डडिति नान्तादसंख्यादेरित्यतो नान्तादिति चा-नुवर्त्तते । पञ्चथमित्यस्य पञ्चानाम्पूरणमित्यर्थः । अत्र न क्त इति । अत्रैव न क्त इत्यर्थः । छन्दसि परिपन्थि । पर्यवस्थातृशब्दात्स्वार्थे इनिः प्रत्ययः स्यात् अवस्थातृशब्दस्य पन्थिपरि इत्यादेशौ निपात्येते । छन्दो विन् प्रकरणे । छन्द-सि विधीयमानविन्प्रकरण इत्यर्थः । समान्यत उक्तमपि दीर्घत्वं विशेषविषय-कमित्याशयेनाह । इयोभयेत्यादि । अन्यत्र दीर्घत्वस्य स्वतः सिद्धत्वादिति शेषः वार्त्तिकेतूपादानम्प्रत्ययविध्यर्थमिति बोध्यम् । छन्दसीवनिपौ चेति चकारेण प्रत्ययान्तरसङ्ग्रहेऽपि पूर्वसूत्रपठितसङ्ग्रह इत्याह । चाद इति । ईकारस्यो-दाहरणद्वयमाह । रथ इत्यादि । वनिपस्तदाह । मघमिति । वमतुपोरुदाहर-णमाह । उक्तसम्बन्धिनीत्यादिना । प्रत्ययविधौ पञ्चम्या न्याय्यत्वादाह । आ-नन्तर्य्ययोग इति । था हेतौ च छन्दसि । प्रकारवचने थालित्यतः प्रकारवचन इ-ति किमश्चेति च वर्त्तते । केन प्रकारेण वेति । न पृच्छसीत्यत्रास्यान्वयः । पश्च पश्चा च । अत्रावरशब्दस्य स्थाने पश्चादेशो अकार आकारो वा प्रत्ययो बोध्यः । तुश्छन्दसि । सूत्रारम्भप्रयोजनमाह । अजादी इत्यादिना । सङ्करो नेति । कि-न्तु यस्मिन्नुपाधावजादी विहितौ तस्मिन्नेव भवत इति शेषः । तृन्नन्तादिति । यद्ययन्तृजन्तात्स्यात्तदाऽऽसुति शब्दात्षष्ठी कर्तृयोगसत्त्वात्स्यादिति तृन्नन्तादे-

SGDF Sri Gangeshwari Digital Foundation

वयमितिस्त्रीकार्यन्तथा च न लोकेति निषेधान्न षष्ठीति भावः। अत्राह हरदत्तः त्वजन्तादेवायम्प्रत्ययः। कृतपूर्वीकटमित्यत्र कटशब्दाद्यथा द्वितीया तथाऽत्राप्यास्तुतिशब्दाद्द्वितीयेति तद्दूषयति अतिशयरूप इत्यादिना। त्वन्नन्तस्य शत्रश्चेति। व्यधिकरणे षष्ठी। चो हेतौ अयम्भावः। कृतपूर्वीकटमित्यत्र यथा भावक्तान्तकृतशब्दपूर्वशब्दयोः समासे विशिष्टादिनौ तदन्तार्थे कटस्य कर्मत्वविवक्षया। कृदन्तशक्तिग्रहमात्रप्रयोज्योपस्थितिविषयक्रियानिरूपितकर्मत्वस्य कटेऽभावान्न कटशब्दात्षष्ठी तथा न प्रकृतेऽतिशयरूपेष्ठनर्थस्य करणशीलतारूपत्वन्नन्तार्थकर्तृ विशेषणभूतार्थविशेषणत्वात्कृदन्तशक्तिग्रहमात्रप्रयोज्योपस्थितिविषयक्रियानिरूपितकर्मत्वेऽपि न लोकेति निषेधान्न षष्ठी यदि तु त्वन्नन्तादयमिष्ठन्स्यात्तदा नलोकेति निषेधाविषयतया षष्ठी स्यादेवेष्ठनर्थस्य तदा त्वजन्तार्थतावच्छेदककरणकर्तृत्वविशेषणत्वात् त्वजन्तशक्तिग्रहप्रयोज्योपस्थितिविषयक्रियाकर्मत्वस्यास्तुतिशब्दार्थे सत्त्वादिति। दोहीयसीत्येतस्य साधनं यथा भवति तथाह। दोग्ध्रीशब्द इति। ततः प्रागिति। प्रत्ययोत्पत्तेः प्रागित्यर्थः। असिद्धत्वादिति। सपादसप्ताध्यायीस्थकार्यप्रवृत्तियोग्ये विषये त्रिपादीस्थशास्त्रस्यासिद्धत्वादप्रवृत्तेरित्यर्थः। प्रत्नपूर्वविश्वेमात्थाल् छन्दसि। प्रत्नादिभ्य इवार्थेऽयं थाल्। तत्र पूर्वशब्दोऽपि द्वन्द्वघटको न तु प्रत्नशब्दः पूर्वो यस्येति बहुव्रीहिः। इवशब्दार्थमाह। इदमशब्द इति। प्रकर्षप्रकर्ष इति। प्रकर्षे विद्यमानात्प्रशब्दात्प्रकर्षे तरबित्यर्थः। अनसन्तान्नपुंसकात्। अत्र नपुंसकादिति तत्पुरुषविशेषणम्। परवल्लिङ्गमिति तत्पुरुषस्य नपुंसकत्वम्। छन्दसि च। अवयोऽर्थमिदम्। उभयतो दत इति। उभयतो दन्ता इत्यर्थः। ऋतश्छन्दसि। नद्दृतश्चेति कपोऽयन्निषेधः॥

॥ इति पञ्चमोऽध्यायः ॥

यो जागारेत्यत्र जागृधातोर्लिटीति विहितस्य द्वित्वस्याभावः। तुजादीनान्दीर्घोऽभ्यासस्य। अस्य सूत्रस्य छान्दसत्त्वे प्रमाणन्तु तुजादिषु छन्दः प्रत्ययग्रहणमिति वार्त्तिकमेव। तुजादीनाञ्छन्दसि दीर्घो भवति। स च यस्मिन्प्रत्यये

SGDF
Sri Gargeshwari Digital Foundation

परत इष्टस्तस्य प्रत्ययस्य ग्रहणञ्च कर्त्तव्यमित्यस्यार्थः। अत्र यः प्रत्ययग्रहणमित्यंशः सोऽनारम्भो वा छन्दसि दीर्घत्वस्यापरिगणितत्वादित्यनेन प्रत्याख्यातः। न हि दीर्घत्वस्य परिगणनङ्कर्तुं शक्यम्। अन्येषामपि छन्दसि दीर्घत्वन्दृश्यते। पूरुषो तारक इति। येषाञ्चारभ्यते तेषामपि तस्मिन्प्रत्यये क्वचिन्न दृश्यते। मामहान उक्थपात्रम्। ममहान इति चेति। तत्रत्यप्रत्ययग्रहणस्य प्रत्याख्याने यथोक्तन्तथाह। जन्दसि सर्वविधीनामिति। तूतुजान इत्यत्र तुज्धातोर्लिट् तस्य कानच्। एवमेव महधातोर्लिटि मामहानमित्यपि। तूतावेत्यत्र तु सौत्रात्तु धातोर्लिट्। बहुलञ्जन्दसि। ह्वः सम्प्रसारणमिति वर्त्तते। बहुलग्रहणस्य फलमाह। न च भवतीति। ननु छन्दसीर इतिवत्त्वमिवर्णान्तात्परस्य विधीयतेरेवानित्यत्र तु न तथेति कथं वत्वमत आह। तत्र विहितेति। चायः की। चायतेः क्यादेशस्य बहुलग्रहणाद्वैकल्पिकत्वमाह। चायतेरित्यादिना। अयस्पृधेयाम्। एतेषु यथायथन्निपातनमित्याह। अयपूर्वस्येत्यादिना। अत्र तिङ्ङतिङ इति निघातस्य यद्वृत्तान्नित्यमिति निषेधः। प्रकारान्तरमिति। नात्रापशब्दः पूर्वपदङ्किन्तु स्पृध्धातोर्लङि द्विर्वचनं रेफस्य सम्प्रसारणमकारस्य लोपश्च निपात्यते। एवञ्चेदमेकमेव पदमिति। आनृचुरित्यस्य सिद्धये आह। सम्प्रसारणेत्यादि। क्रादिनियमादिट् प्राप्तावाह। अनिट्त्वञ्चेति। तित्याकेत्यत्राभ्यासे इकारस्य सिद्धये आह। अभ्यासस्येति। श्रीञ्धातोराशीत्तं इति रूपं यथा सिध्यति तथाह। शिरादेश इति। अनुदात्तेत्त्वलक्षणात्मनेपदनिवृत्तये आह। व्यत्ययेनेति। अजन्तादिति। प्राणिरजतादिभ्य इति सूत्रविहिताञन्तादित्यर्थः। मानुषीरिति प्रथमा बहुवचनमत्र मनुशब्दात्मनोर्जाताविव्यञ् मनुशब्दस्य षुगागमः। बाधकस्यामि पूर्वत्वस्याभावे बाध्यस्य प्रथमयोरित्यस्याप्रवृत्तये आह। पूर्वत्वाभाव इति। प्रत्ययलक्षणेनेति। अस्य त्यदादीनाम इत्यत्व इति शेषः। यद्यप्यत्त्वं शिल्लोपात्परन्तथाप्यपरमिमित्तकत्वेनान्तरङ्गत्वाच्छिलोप एवादौ भवति। यदि तु सुपः सुलुगितिसूत्रेण लुक् तातापिण्डान्नामित्यादावाकारादेशस्तीत इत्यादौ च पूर्वसवर्णादेशश्छान्दसत्वान्नुमभावस्तातेत्यत्र त्यदाद्यत्वञ्च ततः सवर्णदीर्घ इति स्वीक्रियते तदेदं सूत्रन्न कार्यमिति बोध्यम्। एमन्नादिषु। एमन्नादिषु शब्देषु परेषु। त्वेमन्निति। त्वाएमन्निति।

SGDF
Sri Gangeshwari Digital Foundation

एवञ्चाश्रोऽग्निरितिपरत्र बोध्यम्। भय्यप्रवय्ये च छन्दसि। भय्ये त्यत्रापादानेऽचो यदितिभीधातोर्यति गुणे यान्तादेशो निपात्यते। एवम्प्रपूर्वकादीधातोर्यत् प्रवय्येत्यत्र बोध्यः। अपादाने प्रत्ययस्तु कृत्यलुटो बहुलमिति बहुलग्रहणाद्भवति। अकारस्येति। ऋदशब्दाद्भवार्थे यति सुपो लुकि च कृते ऋदशब्दावयवाकारस्येत्यर्थः। प्रकृत्यान्तः। इकोऽसवर्ण इति सूत्रे चेन प्रकृत्येत्यनुकृष्यत इति भाष्यकारोक्त्याऽयम्पाठोऽस्तीति निश्चीयते। नान्तः पादमित्यपि पाठः क्व चित्। अस्मिन् पाठे पादमध्यस्थस्य एङो यत्राप्तन्तत्रेति व्याख्यानेन पूर्वरूपे निषिद्धेऽयादेशोऽपि न भवति। वाच्छन्दसीति सूत्राच्छन्दसीत्यस्य मण्डूकप्लुत्याऽनुवर्त्तनादस्य छन्दस्येव प्रवृत्तिः मौलस्त्रक्पादेत्यत्र ऋक्पदं वेदपरम्। प्रकृत्येति पाठे एङः पदादित्यतोऽनुवर्त्तमानमेङ इतिप्रथमया विपरिणमयितव्यम्। प्रकृत्येति तृतीयान्तम्। प्रकृतिशब्दः स्वभाववाची। दुस्त्यजा प्रकृतिर्नॄणामित्यत्र तथा दर्शनात्। तिष्ठेदिति क्रियापदञ्चाध्याहर्त्तव्यम्। तदाह। प्रकृत्येति। अन्तः शब्दस्याधिकरणशक्तिप्रधानस्य मध्ये इत्यर्थकस्य षष्ठ्यन्तपादशब्देनाव्ययीभावः। स्वभावेनावस्थितिश्चादेशेनानिवर्त्यत्वरूपा। तेन विकारसामान्याभावलाभः। व्यपर इत्यत्र बहुव्रीहिरन्यपदार्थश्चात्र बौद्धस्तत्प्रतियोगिको भेदोऽतील्ये तदर्थातो विशेषणम्। मूले एतेऽ[illegible]सीति। अत्र एङ्पूर्वपादान्तेः। अकारः परपादादौ। अव्यादवद्याद। अत्राव्यादित्याद्यनुकरणम्। तेषाञ्च सुबन्तत्वात्समासः। अव्यादित्येतदवेराशीर्लिङिरूपम्। अवद्यात्। अवद्यपण्येत्यत्र निपातितो योऽवद्यशब्दस्तस्य पञ्चम्यन्तस्य। अवक्रमुरिति क्रम्धातोरवपूर्वाल्लिटि तस्योसादेशे छान्दसत्वादिट्त्वाभावे रूपम्। अव्रतेति ह्वङो लुङि तस्याङ्भावे मन्त्रे घसेति च्लेर्लुकि यणादेशे। यजुषुरः। एङिति वर्त्तते। उरोऽन्तरिक्षमिति। सस्य रुत्वे उत्वे गुणः। ननु प्रकृत्यान्तः पादमित्येव सिद्धे प्रकृतसूत्रं व्यर्थमत आह। मूले यजुषि पादाभावादिति। आपो जुषाणो। यजुषीति अतीति च वर्त्तते। प्रकृतसूत्रार्थमाह। आप इत्यादिना। योगविभागस्य भाष्येऽदर्शनादाह। अस्मादेवेति। जसन्तमिति। जसन्तानुकरणम्। एवमेव परत्रापि। अम्बे इत्येतदिति। अम्बेऽम्बिके इत्यनयोस्तु न कृतस्य प्राप्तिरम्बार्थं ह्रस्वं यदीत्युक्तत्वादिति भावः।

SGDF
Sri Gargeshwari Digital Foundation

अङ्ग इत्यादौ च। अत्राङ्ग इतिसप्तम्यन्तानुकरणम्। तेनोपस्थितस्य सप्तम्यन्ताङ्गे शब्दस्य स्वान्वययोग्यक्रियाक्षेपकत्वमित्याशयेनाह। विद्यमान इति शेष इति। षष्ठी तत्पुरुष इति। तस्य आदिरित्यर्थे। ननु सूत्रे तच्छब्दाभावात्तदादावित्यनुपपन्नमत आह। सूत्र इति। अनुदात्ते चकुधपरे। बहुव्रीहिरिति। द्वन्द्वघटितो बहुव्रीहिरित्यर्थः। स चानुदात्ते शब्दसमानाधिकरणः। अकार उच्चारणार्थं इति। अत एवाध्वरशब्देऽपि प्रवृत्तिसम्भवः। अयं सोऽग्निरिति। अत्राग्निशब्दोऽङ्गेर्नलोपश्चेति सूत्रेण निप्रत्ययविधानेन साधितोऽन्तोदात्तः। अध्वरशब्दः फिषोऽन्तोदात्त इत्यन्तोदात्त इत्युभयत्र शेषनिघातेनाकारस्यानुदात्तत्वम्। अग्रे शब्दस्याद्युदात्तत्वमाह। ऋच्छ इति। रन्नन्तत्वादाद्युदात्त इति। अवयथासि च। अवयथासीति तथा सन्तानुकरणात्सप्तमी। मूले थासि लङीति। अत्र पाठक्रमादर्थक्रमो बलीयानिति लङि थासीति विवक्षितम्। आङोऽनुनासिकः। अत्राङ इति ङिन्निर्देशाङ्ङित एव ग्रहणम्। स च वाक्यस्मरणयोरङिदिति लक्षणलक्षितो ङिद्भिन्नः। एवञ्चाभ्रश्रां अप इत्यत्रे षदर्थाद्यभावात्सप्तम्यर्थद्योतक उदाहरणमित्याशयेनाह। विभक्त्यर्थेति। स्यश्छन्दसि। एतत्तदोरिति सूत्राद्धलीति सुलोप इति चानुवर्तते। स्य इत्यत्र त्यदाद्यत्वेन त्यदोदकारस्याकारे पररूपे तदोः सः साविति सत्वेन निर्देशः। त्यद्शब्दस्य तच्छब्दसमानार्थं इत्याशयेनाह। एष सभातुरित्यर्थ इति। ह्रस्वाच्चन्द्रोत्तरपदे। अत्र चन्द्रशब्दस्येत्यर्थस्य लाभायाह। उभयनिर्देश इति। पितरामातरा च। पूर्वपदेऽराङादेशस्य निपातनमत्र उत्तरपदे तु विभक्तेः स्थाने आकारादेशे ऋतो ङीति गुणः। समासस्य। सहस्य स इत्यतः स इति वर्तते। सगर्भ्य इति। समानो गर्भः सगर्भस्तत्र भव इत्यर्थः। छन्दसि स्त्रियाम्बहुलम्। नन्वत्र विष्वग्देवयोरित्युक्त्वा विश्वाचीत्युपात्तन्तच्चानुपपन्नमत आह। इदमिति। तथा च विष्वग्देवयोश्चेति सूत्रस्थश्चकारोऽप्यनुवर्तत इति भावः। बहुलग्रहणफलमाह। बहुलग्रहणादिति। सधमादस्थयोः। अत्र सधेति लुप्तविभक्तिको निर्देशः। सधमाद इत्यस्य सहमाद्यन्ति हृष्टा भवन्ति देवा अस्मिन्नित्यर्थः। मदी धातोरधिकरणे हलश्चेति घञ्। यज्ञवाचीचायं शब्दः। मादित्यकार उच्चारणार्थः। तेन मादयतेः क्विबन्ते सधमादो वहन्त्वित्यत्रापि सधादेशः। सह तिष्ठतीति।

SGDF
Sri Gargeshwari Digital Foundation

साधातोः कर्त्तरि क्तः। साढ्यै साढ्वा साढा। एते त्रयः शब्दा निपात्यन्ते। तत्राद्यायां क्त्वाप्रत्ययस्य ध्यै इत्यादेशो निपात्यते। सहिवहोरोदित्यात्वाभावश्च सर्वत्र ढत्वष्टुत्वढलोपदीर्घाः तृतीयस्याद्युदात्तस्य श्रवणेन क्त्वान्तत्वम्। अत एव भूरिचक्रेति मन्त्रे साढेत्यर्थकं साह्वेत्याद्युदात्तम्पठ्यते। शत्रूणामभिभवितेति तद्भाष्ये व्याख्यातम्। अत्रेति शब्दः प्रकारे। तेन निष्ठायामपि निपातनमिदम्। असाढमुग्रं सहमानमित्यादि। ढकारस्य स्थाने ह्लकारादेशविधायकवचनस्याष्टाध्यायामभावेऽपि प्रातिशाख्यीयवचनेनास्य सिद्धिरित्याह। द्वयोश्चेतीति। छन्दसि च। अष्टन इतीति। अष्टनः संज्ञायामित्यतोऽष्टन इति ढ्रलोपे इत्यतो दीर्घ इति चानुवर्त्तते। न चाष्टनो नलोपस्यासिद्धत्वं शङ्क्यम्। सुप्तिङन्ताप्यधर्मावच्छिन्ननिमित्तकादिविधिभिन्नत्वादस्य दीर्घत्वस्येति नलोपः सुपिति सूत्राविषयत्वात्। अष्टापदीत्यत्राष्टौ पादा अस्या इति बहुव्रीहौ संख्यासु पूर्वस्येति पादशब्दान्त्यस्य लोपे पादोऽन्यतरस्यामिति ङीप्। ओषधेश्च। न च कृदिकारादिति ङीषि गतार्थता। अन्तोदात्तत्वापत्तेः। प्रकृतप्रयोगे ङीषोऽभावे तु लघावन्त इत्याद्युदात्तता सिध्यति। ऋचि तु नुघ। घशब्दोऽत्र न क्रचिमार्थग्राहकः घशब्दस्यैव ऋग्वेदे दीर्घदर्शनात्। स्यालादिति भार्या भ्रातृवाचकात्पञ्चमी। थादेशस्य ङित्वपक्षे इति मूले। भरतेत्यत्र लोण्मध्यमपुरुषबहुवचनस्य थस्य तस्थस्थमिपामिति तादेशो लोटो लङ्वदिति लङ्वद्भावात्। ङित्वमस्य सार्वधातुकमपिदित्यनेन। सार्वधातुकत्वञ्च छन्दस्युभयथेति वैकल्पिकम्। एवञ्चातिदिष्टङित्वादयं तङिति न तु तङ्प्रत्याहारघटकः। एवन्निर्देशस्य फलमाह। तेनेति। तङितिनिर्देशेनेत्यर्थः। शृणोतेति। अत्र तप्तनप्तनथनाश्चेति तबादेशः। पित्वान्न ङित्वम्। उरुष्यशब्दः कण्ड्वादियगन्तो रक्षणार्थः। ततो लोट्। तस्य हिः। तस्यातो हेरिति लुक्। न इत्यस्य नश्च धातुस्थ इति णः। इकः सुञि। मन्त्र इत्यनुवर्त्तते। तेन ऋचि मन्त्रेऽस्य प्रवृत्तिः। सुञ् चात्र निपातः। अत्रैव सुञोग्रहणार्थस्तत्र ञकारः। वाषपूर्वस्य निगमे। अत्र प्रपूर्वस्येति पुंल्लिङ्गस्योपपत्तिमाह। दीर्घस्येत्यादिना। शमिता यज्ञे। अत्र यन्निपात्यते तदाह। यज्ञविषय इति। युप्लुवोः। ल्यपि लघ्वित्यतो ल्यपीति वर्त्तते। नशेरेतद्रूपमिति। लुङन्तस्येति शेषः। अत्र हि नश्धातोर्लुङि तस्य

SGDF
Sri Gargeshwari Digital Foundation

तिङ इकारलोपे चूर्मन्त्रे घसेति लुकि हलङ्यादिलोपे नशेर्वेति कुत्वाभावपक्षे षत्वजश्त्वयोश्चर्त्वेन टः । अमाङ्योगेऽपीत्यपि शब्दसङ्ग्राह्यमाह । अपिशब्दादिति । जनिष्ठा इत्यत्र जनेर्लुङ् स्यात् । आवाप्सुरित्यत्र वप्धातोः कर्मणि लुङ् तस्य व्यत्ययेन परस्मैपदम्माङ्योगेऽप्यटो निषेधाभावः । युष्माकं क्षेत्रे भार्यायां परेषां वीजानि रेतांसि उप्तानि मा भूवन्नित्यर्थः । इरयोरे । इरे इत्यस्य भादेशस्यानुकरणम् तस्य रेचेरेचेति एकबुद्धिविषयत्वेन सहविवक्षायामेकशेषः। तनिपत्योः । वितन्निरे इति । तनु विस्तारे । लिटः प्रथमपुरुषवहुवचनम् । शृणु । एभ्यो हेर्धिः स्यात् । शुधीहवमित्यत्र वहुलञ्छन्दसीति शपो लुक् । शृणुधीत्यत्र श्रुवः शृचेति श्नुप्रत्ययः शृभावश्च । उतश्च प्रत्ययादिति हेर्लुक् तु न । विधानसामर्थ्यात् । वृणुहि । पूधातोर्लोट् हेर्धिः । शपो लुक् । उदोष्ठ्येत्युत्वम् । ननु सेर्ह्यपिच्चेति ह्यादेशस्यापित्वविधानात्कथमङित्वमत आह । छन्दसि पच्च इति । मन्त्रेष्वाङ्यादेरात्मनः । आङोऽन्यत्र॥सप्तम्येकवचने । त्यवास्त्वत्र । अत्र निपातनं येषां कार्याणान्तानि यथायथन्द्रष्टव्यानि । मयटो मकारस्य लोपे यस्येति लोपस्तु न । मलोपस्यासिद्धत्वात् । त्यज्जनस्य लोपे यस्येति लोपेऽपि रूपस्य सिद्धिर्वा ॥

॥ इति षष्ठोऽध्यायः ॥

पच्चे इति यन्मूलेऽभिहितन्तदुपपत्तिमाह । सर्वेति । दुह्र इत्यत्र दुहेर्लट् । तस्य झः । टेरेत्वम् । अदृश्रमित्यत्र रिलादङि ऋदृशोङि गुण इति गुणस्तु न । बाहुलकात् । यद्वा बाहुलकत्वाद्दृशेरक् । व्यत्ययेन वहुवचनस्यैकवचनम् । क्त्वापीत्यपिशब्दसङ्ग्राह्यमाह । अपिनेति । अत्र छन्दसि सर्वविधीनां वैकल्पिकत्वेन ल्यवादेशेऽकृते रूपस्य सिद्धौ क्त्वाग्रहणञ्छान्दसत्वलभ्यस्याभावस्यानुवादः । अस्य फलन्तु यथा क्वचिन्नञभावेऽपि साधुत्वन्तथा छान्दसत्वादेवासमासेऽपि ल्यपः साधुत्वबोधनम् । तेनाज्येनाक्षीणि अज्येति शब्दः साधुर्भवति । तथा विनायकम्पूज्येति च भवति । अपि शब्दः सर्वत्राभावस्यैव साधुत्वम्मा भूदिति क्रियते । सुपामिति षष्ठीनिर्देशादलोन्त्यपरिभाषावाधाभावायाह । छान्दस-

SGDF
Sri Gargeshwari Digital Foundation

त्वात्सर्वादेश इति । प्रकारान्तरमप्याह । उकारेति । अयमिति । प्रकृतो योग इत्यर्थः । न केवलम्प्रकृतसूत्रस्यैव तत्प्रपञ्चत्वङ्किन्तु भाष्योक्तवार्त्तिकस्यापीत्याह । सुपां सुपेति । इदमुपलक्षणम् । तिङान्तिङो भवन्तीत्यपि तस्य प्रपञ्चः । आन्तर्यादिति । तृतीयैकवचनस्य स्थाने प्रमाणत आन्तर्यादीकार इत्यर्थः । पूर्वसवर्णो दकार इति । प्रकृतसूत्रस्थभाष्ये इकारस्यान्तर्यतो दकार इत्युक्तन्तेनाचामपि घोषसम्वारनादाल्पप्राणत्वम् । घोषत्वाद्यभावे निरनुनासिकाल्पप्राणसकारोऽपि स्यात् । अल्पप्राणत्वास्वीकारे दधौ पर्यायेण स्याताम् । अचाङ्घोषत्वे परः सन्निकर्ष इति सूत्रस्थं भाष्यमपि प्रमाणम् । तत्र हि ह्रादाविराम इतिन्यासपक्षे पचतीत्यत्र द्वयोर्घोषयोर्मध्ये ऽघोषस्य चकारस्य सत्त्वात्संहिता संज्ञा न प्राप्नोतीत्युक्तम् । तत्रैव कैयटः । प्रयत्नविशेषजनितो वर्णाविरमेविरप्यनुरणरूपो वर्णान्तरोच्चारणेऽप्यनुवर्त्तमानो घोषो ह्राद इत्युच्यते । संहिता संज्ञाभावे तु तदधिकारीयस्य स्वरितत्वस्याप्राप्तिः स्यादिति भावः । नन्वेवम्पूर्वसवर्णेन परमेव्योमन्नित्यस्यापि सिद्धौ लुक्प्रवृत्तिवैयर्थ्यमत आह । परमेव्योमन्नित्यत्रेति । संयोगान्तलोपस्यासिद्धत्वादिति । प्रकृतसूत्रदृष्ट्या तस्यासिद्धत्वात्प्रकृते लुगेवेत्यर्थः । ननु पूर्वोक्तरीत्या परमेव्योमन्नित्यादेः सिद्धौ लुग्ग्रहणमेव न कार्यमत आह । यत्सुन्वन्तीत्यादाविति । स्निन्नापत्तिरिति । संयोगान्तलोपस्याऽसिद्धत्वात्स्यदाद्यत्वेऽस्निन्नापत्तिरित्यर्थः । अमार्थञ्चेति । अत्र पूर्वसवर्ण एव चेद्विधीयते तदालोन्त्यपरिभाषयाऽन्त्यादेशत्वापत्तिरिति । इत्वनिषेध इति । स्थानिवद्भावेन विभक्तित्वादित्यत्र तस्येत्त्वनिषेधः । मूले न युष्मे वाजबन्धवः । अस्मे इन्द्राबृहस्पती इति । न युष्मे वाजबन्धवोऽनिनित्सुश्चनमर्त्यः अवद्यमधिदीधरदिति मन्त्रस्यैकदेशोऽयम् । वाजमित्यदन्तन्नाम । वाजेनान्नदानेन बन्धवः वाजबन्धवः । सम्बोधनान्तञ्चेदम् । हे वाजबन्धवो युष्मे युष्मासु निनित्सुश्च नधि इति सम्बन्धः । विभक्त्यर्थेऽधिशब्देन युष्मे इत्यनेनाव्ययीभावो नित्यः प्राप्तोऽपि बाहुलकान्न । निनित्सुश्च न । निन्दनेच्छाशीलोऽपि न । निन्दतेर्नलोपो बाहुलकात् । एवमिवेडभावश्च । मर्त्यः अवद्यन्त अदीधरत् । नधारयदित्यर्थे दीधरदिति धारयतीत्यर्थः । भवदनुसन्धानेन निष्पाद्यत्वात् । द्वितीयमन्त्रेऽपि देवता प्रार्थ्यते । हे इन्द्राबृहस्पती अस्मभ्यम् रयिन्धत्तम् दधातिरिह

SGDF
Sri Gangeshwari Digital Foundation

दानार्थः । ता अनुष्ठ्योच्चावयतात् । व्यवस्थावदङ् इति । यद्यपि [स्थागापापच] इति विहितः क्लिन्नातश्चोपसर्गे इतिसूत्रविहितस्याङो बाधकस्तथापि व्यवस्थायामितिनिर्देशात्क्वचिन्न बाधक इतिकल्प्यत इति भावः । आङिति तृतीयैकवचनबोधक आङ्शब्द इत्याशयेनाह । आङ इति । भाष्यस्वरस इति[।] प्रकृतसूत्रभाष्ये ईकारः इतिन शुष्कं सरसीशयानमितीकारादेशोदाहरणमुपन्यस्तन्तस्यायमाशयः । शाखान्तरे आद्युदात्तोऽप्ययम्पठ्यतेऽत इदमप्युदाहरणमिति । अत्र कैयटः सरस्शब्दात्परस्य ङिशब्दस्येकारादेश इति । अत्रेदमवधेयम् । ईदूतौ च सप्तम्यर्थे इति सूत्रभाष्ये ईकाररूपा सप्तमी अस्तीति प्रदर्शनाय तत्रापि सरसी यदीत्यस्य व्याख्यानावसरे दक्षिणापथे महान्ति सरांसि सरस्य इत्युच्यन्त इति भाष्यकृतोक्तन्तत्तु यच्छाख्यायामयमन्तोदात्तः पठ्यते तच्छाखास्थमिति । अमो मश् । मशादेशस्याकार उच्चारणार्थश्चेच्छकाराभावे मकारो व्यञ्जनमात्रमादेशोऽयञ्चालोन्त्यपरिभाषयाऽमोमकारस्यैव स्यात्तथा चादेशविधानवैयर्थ्यमत आह । मस्यापीति । अस्यादेशस्य[ ]शित्वम्भाष्ये[ ]प्रत्याख्यातम् । तथाहि । द्विमकारकोऽयन्निर्देशः[ ]इति । न च द्विमकारकनिर्देशपक्षेऽपि सशकारकनिर्देशपक्षवदकारस्योच्चारणार्थतयाऽऽदेशस्य व्यञ्जनद्वयात्मकस्यैव विधेयवाचकपदादुपस्थितेर्न तस्माद्द्विमकारात्मकादेशोच्चारणे लाघवमिति वाच्यम् । भिन्नजातीयवर्णोच्चारणे प्रयत्नगौरवम्भवति समानजातीयवर्णद्वयोच्चारणे तु न तथेत्याशयात् । एकस्यान्त्यमकारस्य च संयोगान्त्यलोपो भविष्यति । एतद्भाष्यप्रामाण्यात्क्वचिद्झलोऽपि संयोगान्त्यलोप इति।यदि द्विमकारकोऽयन्निर्देशस्तदावधीं वृत्रमित्यत्राऽस्तिसिचोऽपृक्त इत्यनेनेटि कर्त्तव्ये संयोगान्त्यलोपस्यासिद्धत्वादपृक्तत्वाभावादीण्न प्राप्नोतीत्याशङ्क्य यकारादौ न दुष्यति ।किं यकारो न श्रूयते । लुप्तनिर्दिष्टो यकार इति तत्रोक्तम् । यकारनिर्देशेनादेशस्यानेकाल्त्वात्सर्वादेशत्वम्भविष्यति यकारस्य लुप्तत्वादपृक्तत्वाश्रयस्येडागमस्य च सिद्धिर्भविष्यतीति भावः । अत्र कश्चित् । संयोगान्त्यलोपस्यासिद्धत्वादपृक्तत्वाश्रयस्येडागमस्यानापत्तिरित्येकदेश्युक्तिरियमिति । तन्न । तस्य दोषस्य भाष्यकृतैवोद्भावनङ्कृत्वा मद्वयात्मकादेशपक्षः परित्यक्त इति तस्यैकदेश्युक्तित्वकथनस्य सम्प्रदायविरुद्धत्वात् । वधीमित्यस्य सिद्धिप्रकारमाह । हन्ते-

SGDF
Sri Gangeshwari Digital Foundation

लुङीति । बधादेशः । लुङि चेति बधादेशः । बहुलञ्छन्दसीत्यड-भाव इत्यपि बोध्यम् । लोपस्त आत्मनेपदेषु । अत्र सप्तम्युपपत्तये विद्यति-क्रियावाचकशब्दमध्याहृत्य व्याचष्टे । आत्मनेपदेष्विति । क चिन्नेति । तकार लोपः क चिन्नेत्यर्थः । सूले वृत्तिकारोक्तिः प्रामादिकीति । लक्ष्ये वकारस्यैव श्रवणेन तथोक्तिः प्रामादिकीत्यर्थः । तस्य तात् । मध्यमपुरुषेत्यस्य विशिष्यला-भायाह । छन्दसीति । अत एव । तनबादेशस्य पित्वादेव । उभयशब्दस्य सर्व-नामत्वाज्जसः शीभावशङ्कावारणायाह । उभयास इत्यादाविति । विकल्पवार-णायाह । छन्दस्यापाद्येति । एकशेष इति । एवञ्च समाहारद्वन्द्वस्य नपुंसक-त्वाद् ह्रस्वो नपुंसक इति ह्रस्वत्वात्सिद्धमिति भावः । अस्थभिरिति । अनजा-दित्वादनङोऽप्राप्ताविदम् । क्वचिदविभक्तावपि दृशिग्रहणादयम् । अक्षण्वन्तः अक्षन्वेतेत्यादौ । मूले कीदृङ्ङिन्द्र इति । त्यदादिषु दृश इति क्विन् । नुमि सति क्विन्प्रत्ययस्येति न खङः । स्ववानित्यस्य सुष्ठु अवो यस्येत्यर्थः । तुधा-तोर्व्ध्यर्थकादसुनिस्वं तवोवृद्धिर्यस्येति विग्रहः । ततुरिति । तृधातोः क्विन्प्र-त्यये द्विर्वचनेऽचीति निषेधात्तृशब्दस्यादौ द्वित्वम्तदनन्तरमुत्वम् । ह्रु ह्वरेश्छ-न्दसि । ह्वरेरित्यागन्तुनेकारेण निर्देशः ह्रु इति लुप्तविभक्तिकः । सोमि ह्वरितः । इद्गुणाविति । इदमुपलक्षणम् । आदेशाभावोऽपि बोध्यः । बभूथाततन्थ । ऊजः क्रा-दिनियमादिडभावे सिद्धे नियमार्थमिदम् । सनिंससनि । अस्य सूत्रस्य छान्द-सत्वे प्रमाणमाह । ससनिमित्यस्येति । सर्वमा इति । अस्तेर्लङ् । तिप्ईड-भावेऽपृक्तत्वाद्धल्ङ्या दिलोपः शपो लुक् । जसादिषु छन्दसि । जसादिनिमित्तके कार्ये छन्दसि वेति वक्तव्यम् । अत्रादिशब्दः प्रकारे । तेन पूर्वयोगनिर्दिष्टविष-येऽपि विकल्पः । दर्वेदर्वि । अम्बेऽव इत्यादौ यथा । देवसुम्नयोः इह यजुःश-ब्दस्य वेदोपलक्षणत्वे सति यादृशो वाक्यार्थस्तमाह । यजुर्वेदीयेति । कव्यध्व-र । कविअध्वरपृतना एषामन्त्यस्य लोपः स्यात्क्यचि । ऋग्वेदे । सुधितवसुधि-त । त्रिषु घुमास्थेतीत्वे प्राप्तेऽनेनेत्त्वन्निपात्यते । धिष्वेत्यत्राभ्यासलोप उत्तर-खण्डे इत्वञ्च । लौकिके तूत्तरखण्डे श्नाभ्यस्तयोरित्यालोपः दधस्तथोरिति भष्भावः । दाधर्त्ति । श्लुङो यदा त्रयशब्दास्तदाह । श्लुङ इति । अन्त्ययोः । द्वितीयतृतीययोः । तत्रापि श्लुङो निपातनपक्षे आह । श्लुङस्त्विति । आद्यस्य

SGDF
Sri Gargeshwari Digital Foundation

शेषनिघातेनान्त्याकारस्यानुदात्तस्योदात्तादनुदात्तस्य स्वरित इत्यनेन स्वरितत्वे कृतेऽनेनोदात्तत्वङ्क्रियते। ये यज्ञकर्मणि। उच्चारित इति शेषः। यज्ञक्रियायामुच्चारितो ये शब्दः प्लुतः स्यात्। इत्यत्रैवायमिति। किमत्र प्रमाणमिति चेद्भाष्यसम्मतं व्याख्यानमेवेति गृहाण। तत्र हि ये यज्ञकर्मणीत्यतिप्रसङ्गो भवति इहापि प्राप्नोति। ये देवासो दिव्येकादशस्थ इति। सिद्धन्तु ये यजामह इति ब्रूह्यादिषूपसंख्यानात्। सिद्धमेतत्कथम्। ये यजामहशब्दो ब्रूह्यादिषूपसंख्येय इत्युक्तम्। एतेन यत्र यत्रानेन प्लुत इष्यते ते ब्रूह्यादिषु द्रष्टव्याः प्रकृतसूत्रस्य न कार्यमित्यभिहितम्। एतेन ये देवास इत्यत्र न भवतीति स्पष्टमेव लभ्यते। प्रणवष्टेः। यज्ञकर्मणीति वर्त्तते। प्रणवशब्दस्य लोके ओंकारमात्रे प्रसिद्धिसत्वादाह। टिस्थानिक इति। भाष्यादाविति। तत्र हि प्रणव इत्युच्यते कः प्रणवो नाम। पादस्य वा अर्द्धर्चस्य वा अन्त्यमक्षरमुपसंहृत्य तदाद्यक्षरशेषस्य स्थाने त्रिमात्र ओकारं ओंकारं वा विदधति तम्प्रणवमित्याचक्षते इत्युक्तम्। अत्र पादस्य वेत्यनेन शास्त्रान्तरे यः प्रणवशब्दार्थः प्रसिद्धः स एवात्राश्रीयत इत्युक्तम्। देवतेत्यादिशब्दस्य यथा शास्त्रान्तरप्रसिद्ध एवार्थोऽस्मिन्नप्याश्रीयते तथा। अन्त्यमक्षरमुपसंहृत्येति। अक्षरमच्। अन्त्यमचङ्गृहीत्वा इत्यर्थः। तदाद्यक्षरशेषस्येति। अत्र तच्छब्दोऽक्षरवाची। अक्षरञ्च शेषश्चाक्षरशेषम्। शेषशब्दो हल् बोधकः। स आदिर्यस्य तत्तदादि। तदादि च तदक्षरशेषञ्च तदाद्यक्षरशेषन्तस्य टिसंज्ञकस्येत्यर्थः। न च टिस्थानिकादेशस्यैव चेत्प्रणवसंज्ञा तदा प्रकृतसूत्रे टिग्रहणं व्यर्थमिति वाच्यम्। वाक्यस्य टेरित्यधिकारादलोन्त्यपरिभाषाया उपस्थानाट्टेरन्त्यस्यौकारः स्यात् कृते तु टिग्रहणे ओकार ओंकारश्च टेरेव भवति टिरेव यष्टिरित्यर्थस्य सम्भवेनालोन्त्यपरिभाषाया अनुपस्थानादेवञ्च टिग्रहणमेवोक्तयोर्द्वयोः प्रणवसंज्ञायामुभयोर्विधेयत्वे च मानम्। अच्परिभाषयोपस्थितमजिति टेर्विशेषणमच्सम्बन्धी यष्टिस्तस्येत्यर्थः। वस्तुतस्तु प्रातिशाख्योक्तरीत्या टिस्थानिकस्यैव प्रणवग्रहणेन ग्रहणमिति प्रकृतसूत्रस्थटिग्रहणमुक्तानुवाद एवेत्याशयेनाह। टेरितित्विति। मूलोक्तणिटग्रहणप्रयोजनमुपपादयति हलन्त इतीत्यादिना। तदभावे। प्रकृतसूत्रे टिग्रहणाभावे। टेरित्यननुवृत्त्या। टिपदार्थेऽभेदसम्बन्धेन विशेषणतापन्नो योऽर्थस्तत्ता-

SGDF
Sri Gargeshwari Digital Foundation

त्रियंकस्यानुवृत्त्या । तदानीमनुवर्त्तमानटिग्रहणमन्त्यपरिभाषयोपस्था-
पितो योऽन्त्यपदार्थस्तस्य विशेषणभूतो योऽर्थस्तत्तात्पर्यको भविष्यतीति भा-
वः। तदन्त्यस्य। अनुवर्त्तमानटिशब्दार्थान्त्यस्य। ननु प्लुतश्रुत्याऽच्परिभाषोप-
स्थित्यान्त्यस्याच एवौकारः स्यान्न तु हलोऽत आह । व्यभिचाराभावादिति।
ओंकारस्य त्रिमात्रस्यैव प्रणवपदार्थत्वात्। न चोङ्कारस्य प्लुतोकारघटितस्य न
त्रिमात्रत्वमिति वाच्यम्। प्लुताभिन्नः प्रणव इत्यर्थे तस्येहानुपस्थिति स्यादिति
भावः। यदीत्वयमपीष्यत इत्युच्यते तदाऽस्यार्द्धचतुर्मात्रिकस्येष्टत्वेन तस्य प्लु-
तत्वाभावात्प्लुत इत्यस्यात्रानुपस्थितिकल्पनमेवेति तात्पर्यम्। यदा तु प्लुत इ-
त्यस्याऽननुवृत्तिस्तदा प्लुत इत्यनेन शब्देन विधानाभावादच्परिभाषाया अनुप-
स्थितिरेव। इदं सर्वं सौत्रटिग्रहणस्य प्रयोजनवर्णनम्प्रातिशाख्योक्तमतभिन्नम-
ताभिप्रायेणेति बोध्यम्। याज्यान्तः। याज्यापदार्थं व्याचष्टे। याज्याऽनुवाक्ये-
ति। अन्त इति किमिति प्रश्नाभिप्रायमाह। यद्यन्तग्रहणमिति। अयम्भावः।
सौत्रमन्त इतिप्लुतश्रुत्योपस्थितस्याच इत्यस्य विशेष्यं विशेषणं वा। नाद्यः।
हलन्तेऽस्य सूत्रस्य प्रवृत्त्यभावापत्तेः। न द्वितीयः । अन्ताभिन्नोऽच् तस्येत्यर्थे
प्रकरणप्राप्ते न टिनाऽच्पदार्थे विशेषितेऽप्यन्तस्य लाभो भविष्यतीति । उक्त-
ताभिप्रायस्त्वन्तपदसामर्थ्यादत्र सर्वान्त्यस्यैव ग्रहणमिति। तदुक्तम्भाष्ये। अन्त-
ग्रहणं किमर्थम्। याज्यानामऋचो वाक्यसमुदायस्तत्र यावन्ति वाक्यानि स-
र्वेषां टेः प्लुतः प्राप्नोति। इष्यते चान्त्यस्य स्यादिति तच्चान्तरेण यत्नं न सिध्य-
तीत्येवमर्थमन्तग्रहणमिति । अन्तग्रहणसामर्थ्याद्याज्यानामन्तो यष्टिस्तस्य
योऽच् तस्य प्लुत इत्यभिप्रायः। ब्रूहिप्रेष्यश्रौषट्। हरदत्त इति । तादृशा-
नामुच्चारणस्य याज्ञिकसम्प्रदायसिद्धत्वमत्र मानमिति तद्भावः। भाष्यन्त्वत्रोदा-
सीनम्। अतिप्रसङ्गमाशङ्क्य निराचष्टे। आवहेति। अग्नीत्प्रेषणे। आदेरित्य-
नुवर्त्तते। अग्नीत्प्रेषण इति वाक्यस्येत्यस्यानुवर्त्तमानस्य विशेषणम्। एवञ्चा-
ग्नीधः प्रेषणे यद्वाक्यन्तस्यादेरिति लब्धम् । परशब्दोपादानेनावध्याकाङ्क्षया
तस्मादित्यस्याध्याहारे सति तत्पदार्थजिज्ञासायामाह। आदिभूतादिति । इ-
त्यनयोरेवायमिति। ओ३श्रा३वया३श्रा३वयवोरिति वक्तव्यमिति भाष्योक्तिरत्र
बीजम्। पित्र्यायामन्यत्राप्यादेस्तस्मात्परस्य च दर्शनादाह। प्लुतमात्रस्येति।

SGDF
Sri Gargeshwari Digital Foundation

भवत्येवेति । एवञ्च न भाष्ये परिगणनङ्किन्तु प्लुतस्य वैकल्पिकत्वेनाप्रवृत्त्यन्वाख्यानमेवेति तात्पर्यम् । अत एव भाष्ये बहुलमन्यत्रापीति वक्तव्यम् । उद्धरा३ उद्धयभिहरा३ अभिहर । आहरा३ आहर । तर्हि वक्तव्यन्न वक्तव्यम् । योगविभागः करिष्यते । अग्नीत्प्रेषणेपरस्य च विभाषा । ततः पृष्टप्रतिवचने हेः । विभाषेति । अपर आह । सर्व एव प्लुतः साहसमनिच्छता विभाषा कर्त्तव्यः इत्युक्तम् । विभाषा पृष्टप्रतिवचनेति सूत्रघटकपृष्टप्रतिवचनशब्दं व्याचष्टे । पृष्टप्रतिवचनमिति।निगृह्य।एतद्व्याचष्टे।निगृह्येति ल्यबन्तमित्यादिना।आम्रेडितम्भर्त्सने।नन्वाम्रेडितसंज्ञापरभागस्यैवेति तस्यैव प्लुतः स्यान्न तु पूर्वभागस्य इष्यते तु पूर्वभागस्यापीत्यत आह । उपलक्षणमितीति । अत्र मानन्तु भर्त्सने पर्यायेणेति वक्तव्यमिति वार्त्तिकम् । चौरा३ चौर । चौरचौरा३ इति भाष्यञ्चेति । यथोभयोः सिद्धिस्तत्प्रकारमाह । तत्रैकैकेति । मण्डूकप्लुत्या गुरोरन्यत इति सूत्रादेकैकग्रहणस्यानुवृत्तिः । अमर्षे इति । अमर्षे सूचयितव्ये सम्बोधनद्योतकस्याङ्गशब्दस्य प्रयोग इत्यर्थः । अनुनये । सान्त्वने । अनाकाङ्क्षोदाहरणम्मूले अङ्ग पचेति । अत्रामर्षसूचनायाङ्गेत्येवोच्चार्य पचेत्येवं यत्रोच्चारितन्तत्रोभयोरेव प्रयोगेण शाब्दबोधपर्यवसानन्न त्वन्याकाङ्क्षेति भावः । कोटिद्वयस्पृगिति । कोटिद्वयविषयकमित्यर्थः । नन्वर्थस्य विचार्यमाणत्वन्न तु वाक्यस्येति विचार्यमाणानामिति कथं वाक्यानामिति पदेन समानाधिकरणमत आह । इह त्विति । प्लुतविकारः । एचो प्रगृह्यस्यादूराद्धूत इतिसूत्रेण पूर्वार्द्धस्य प्लुतरूपो विकारः । पूर्वन्तु । अत्र तु शब्दोऽवधारणे । विचार्यमाणार्थप्रतिपादकवाक्ये यत्पूर्वम्प्रयुक्तन्तस्येत्यर्थः । अत्र पूर्वसूत्रेण सिद्धे इदं सूत्रन्नियमार्थम्पूर्वमेवेति तु शब्दस्त्विष्टतोऽवधारणसूचनाय । प्रतिश्रवणे च । अत्र प्रतिपूर्वकः श्रुधातुर्येष्वर्थेषु वर्त्तते तानर्थानाह । प्रतिश्रवणमित्यादिना । अभ्युपगमः । अङ्गीकारः । प्रतिज्ञानम् । आवश्यकत्वस्य क्रियायाम्बोधनम् । एतयोरर्थयोर्यदा प्रतिश्रवणशब्दस्य प्रयोगस्तदा प्रतिश्रवणे गतिसमास इति कथनेनैतेऽर्थाः शक्या एवेति दर्शितम् । तृतीये दत्तकिमात्था३ इत्यनेन स्वस्य श्रवणाभिमुख्यं स्पष्टतया प्रतीयते । अनुदात्तम्प्रश्नान्ता । अत्रानुवर्त्तमानस्य प्लुत इति पदस्योद्देश्यसमर्पकत्वकल्पनेन दूराद्धूतादिषु सिद्धस्य तस्य उदात्तपदेनोदात्तत्वे प्राप्तेऽनु

SGDF Sri Gargeshwari Digital Foundation

दात्तत्वमात्रमनेन क्रियते इति फलति । प्रश्नान्ते यत्रानेनानुदात्तत्वविधानन्त-त्रानन्त्यस्यापि प्रश्नाख्यानयोरिति प्लुतस्य किम्पृच्छसि त्वमित्यादिर्बोध्यस्तथा सत्यग्निभूते शब्दस्य प्रश्नान्तत्वं सम्यगायाति प्रश्नान्तरेणापि प्रश्नान्तत्वमाह । आद्योदाहरण इत्यादिना । चिदिति चोपमार्थे । चिदिति निपातः । उपमार्थे यत्रास्य प्रयोगस्तत्र वाक्यस्य टेरनुदात्तः प्लुतो भवति । अनेन शास्त्रेणाप्राप्त एव प्लुतोऽनुदात्तत्वगुणविशिष्टो विधीयते । अत्र सूत्रे इतिशब्दश्चिदित्यस्योप-मार्थकस्य प्रयोगे सति वाक्यस्यटेः प्लुतार्थः । तदभावे तु उपमानेयत्किञ्चिच्छब्दे प्रयुज्यमाने सति चिच्छब्दस्य प्लुन इत्यर्थो गम्येत । इति शब्दोपादानेन तु वाक्यस्य टेरित्यस्य प्रकरणप्राप्तस्याबाधो बोधितो भवति। प्रयुज्यमान इति पदस्य प्रत्युदाहरणेऽग्निर्माणवकोभायादित्यत्रोपमार्थस्य शब्दान्तरस्य गम्यमानत्वेऽपि चिच्छब्दोऽपि गम्यत इति भवति प्रत्युदाहरणम् । उपरिस्विदासीत् । अयं शब्दः स्वरूपपरः । इति चेत्यस्यास्य शब्दस्येत्यर्थः । अनेनापि शास्त्रेणानुदात्तत्वगुण-मात्रं विधीयते । प्लुतस्तु विचार्यमाणानामिति सिद्ध एव । स्वरितमाम्रेडिते । स्वरितमिति सामान्ये नपुंसकम् । पूर्वन्तिङन्तमिति । यदा पूर्वतिङन्तघटित-वाक्यप्रयोगेण तादृशतिङन्तार्थघटकक्रियाकर्तुः क्षिया विवक्षिता तदोत्तरति-ङन्तस्य प्रयोग आवश्यक एव । न हि पूर्ववाक्यमात्रप्रयोगेण क्षिया गम्यते । एवञ्चै तादृशस्यपूर्ववाक्यजन्यशाब्दबोधविषयक्रियायाः स्वसमानकर्तृकत्वस्वस-मानकालिकत्वोभयसम्बन्धे नोत्तरवाक्या र्थक्रियाम्प्रतिविशेषणत्वम् । तत्साका-ङ्क्षत्वञ्च तन्निष्ठविषयतानिरूपितायां विषयतातन्निरूपकविषयताविशिष्टबोध-जनकत्वे नाभिमतत्वम् । क्षियाया यत्र विवक्षा तत्र द्वयोः क्रियानिष्ठविषय-तयोः साक्षान्निरूप्यनिरूपकभावः । इतरयोः परम्परया सः । द्विविधोऽपि नि-रूप्यनिरूपकभावः प्रकृते विवक्षितः । अनन्त्यस्यापि । अपिनान्त्यस्य सङ्ग्रहः। प्रमाणेन स्नानगमनकम्प्रतिकार्यान्तरसूचनाय नेदं वाक्यङ्किन्तु प्रश्नवाक्यघटक-मितिध्वननायाह । आद्योदाहरण इति । तत्रानन्त्यापेक्षया विशेषमाह । तत्रा-न्त्यस्य त्विति । नन्वनेन विधीयमानस्य स्वरितप्लुतस्य नित्यत्वात्पक्षे इत्यनुपप-न्नमित्याशङ्क्य तस्य वैकल्पिकत्वं साधयति । यद्यपीत्यादिना । प्रश्नान्त्यस्य तेना-नुदात्तः प्लुतो विधीयतेऽनेन तु स्वरितः उभयमपीदम्परस्परविरुद्धमिति स्वरित-

SGDF
Sri Gargeshwari Digital Foundation

स्य पाक्षिकप्रहृस्तिकत्वमिति भावः । वचनसामर्थ्यादिति । ऐच इत्यस्येदुतावि-
त्येतद्विशेषणेन वर्णैकदेशयोर्ग्रहणमिति भावः । ऐचोर्मात्राश्चवर्णस्येति । न च
ऐचोश्चोत्तरभूयस्त्वादित्यनेनात्र विषमविभागः प्रदर्शित इति तेनेदं विरुद्धमिति
चेन्न । तस्य पक्षान्तराभिप्रायकत्वात् । स्पष्टञ्चेदमिति । तत्र हि इष्यत एव च-
तुर्मात्रः प्लुत इत्युक्तम् । ऊकाल एवाजितिनियमो नाश्रीयते तेन चतुर्मात्र-
स्याप्यच्कार्यम्भवति । प्रत्यङ्ङैःतिकायनः । अत्र ङमुट् । ग्लौ४चातीत्यत्रानचि
चेति द्विर्वचनम्भवतीति कैयटः । ननूकालोऽजिति योगेन त्रिमात्रस्य प्लुतसंज्ञा
विधीयतेऽयन्तु न तथेति कथमस्य प्लुतत्वन्तदभावेऽच्त्वमपि कथं ग्रहणकशा-
स्त्रप्रवृत्त्यभावादिति चेन्न । प्रकृतभाष्यप्रामाण्येन तत्र तृतीयवाक्ये ऊ३काल
इति पदमेकद्विमात्रभिन्नलाक्षणिकमित्यत्र तात्पर्यात् । तदेवाह । अत्रेति ।
एचोऽप्रगृह्यस्या । अनेन । याज्यान्तेष्वेवेत्येवकारेणानुदात्तः स्वरितो वेति ।
अनुदात्तम्प्रश्नान्तेति सूत्रेण यत्र प्लुतस्तत्राऽनुदात्तः स्वरितमाम्रेडितेत्यस्य वि-
षये तु स्वरितः । ननु वाक्यस्य टेरिति सूत्रस्थस्योदात्तपदस्य प्लुतेन सम्बन्धस्य
क्लृप्तत्वात्कथमिदुद्भ्यान्तस्य सम्बन्धोऽत आह । व्याख्यानादिति । इदुतोरुदा-
त्तयोः श्रवणमूलकव्याख्यानादित्यर्थः । तत एव । व्याख्यानादेव । भाष्ये तादृ-
शाकारप्रदर्शनमूलकव्याख्यानात् । इदम् । परिगणनेति कथनोत्तरमदूराद्धूत
इति न वक्तव्यमिति कथनम् । वृत्त्यनुरोधेनेत्यभिधानमूलन्दर्शयति । केचित्त्वि-
ति । आगच्छ भो माणवकाग्निभूते इत्यादौ प्लुतस्तु दूराद्धूत इत्यनेनैव तस्यानु-
दात्तत्वमभिपूजितविषयत्वात्प्राप्तमनेनादूराद्धूत इत्यनेन क्रियते इति निषेध-
स्यावश्यकत्वमेव । तत्र प्रमाणमाह । भाष्यादिति । तत्र हि एचः प्लुतविकारे
पदान्तग्रहणङ्कर्त्तव्यम् । इह मा भूत् । भद्रङ्करोषि गौ३रिति । विषयपरिगण-
नञ्च कर्त्तव्यम् । प्रश्नान्ताभिपूजितविचार्यमाणप्रत्यभिवादयाज्यान्तेष्विति व-
क्तव्यमित्युक्त्वा प्रश्नात इत्यादिना तेषामुदाहरणानि मूलोक्तानि प्रतिपादिता-
नि तेन विषयपरिगणनेऽपि प्रतिषेधस्यावश्यकर्त्तव्यता सूचितैव । सावपिपद-
मिति । स्वादिष्वित्यस्य पदसंज्ञाविधायकसूत्रे पृथक्करणेनोत्तरपदत्वे चापदा-
दिविधावित्यस्याकर्त्तव्यतां प्रदर्शनकाले स्वीकृतेऽस्मिन्पक्ष इत्यर्थः । वाक्यान्त-
त्वाभावादिति । वाक्यस्य टेरित्यतो वाक्यग्रहणमप्यनुवर्त्तते तेन वाक्यान्तः स

SGDF Sri Gangeshwari Digital Foundation

न्यः पदान्तस्तस्यानेन प्लुतप्रसङ्गे विशेषो बोध्यत इत्यतो भद्रङ्करीषीत्यत्र पदान्तत्वेऽपि वाक्यान्तत्वाभावान्न तस्य प्लुतप्रसङ्गे विशेषः। ननु भाष्ये पदान्तग्रहणङ्कर्त्तव्यमित्येवोक्तन्न तु वाक्यशब्दस्यापि तच्चोच्चारणमतो न्यूनतापत्तिरत आह। पदशब्देनेति। वाक्यमपीत्यपि शब्देन पदसंज्ञकस्य संग्रहः। पदान्तग्रहणमित्यत्र पदशब्देन पद्यते बोध्यतेऽर्थो येनेति व्युत्पत्त्योभयोरपि सङ्ग्रहान्न न्यूनतेति भावः। अप्राप्त इति। दूरादाह्वानसत्त्वात् प्लुतविकारस्याप्राप्तिः। प्लुतस्तु गुरोरनृत इत्यनेन प्राप्नोत्येव। न च गुरोरनृत इति सूत्रे वाक्यस्य यदनन्त्यम्पदन्तस्य टेः प्लुतविधायकमिति पत्नी वा इत्यन्त्यस्य कथम्प्राप्तिरिति वाच्यम्। अनन्त्यस्यानन्त्यस्य पदस्येति नार्थः। किन्तु दूराद्धूते यद्वाक्यन्तदवयवानन्त्यस्यापीत्येवार्थः। एवञ्चास्यैव प्राप्तिरित्याशयात्। अथ वा दूराद्धूते चेति सूत्रेण वाक्यान्तस्यैवं प्लुते प्राप्ते तस्य प्लुतस्यान्त्यानन्त्याचस्थानिकत्वमात्रङ्गुरोरनृत इत्यनेन क्रियते न त्वनन्त्यपदस्यापीत्यनेनानन्त्यस्यैव पदस्य योऽनन्त्योऽपि शब्दादन्तरस्तस्यापूर्वप्लुतविधायकमेतदिति प्लुतस्य सिद्धस्य स्थानिप्रदर्शनमात्रङ्क्रियते। तथा च दूराद्धूते चेत्यनेनात्र प्लुतस्य प्राप्तिरस्त्येवेत्याशयात्। तयोर्य्वावचिसंहितायाम्। अत्र तयोरिति पूर्वसूत्रनिर्दिष्टयोः परामर्शकमित्याशयेनाह। पूर्वसूत्राभ्यामिति। अत्र द्विवचनोपादानेन प्लुतावैच इदुतावित्यनेन स्थितयोरिदुतोः प्लुतमात्रविधानमैचो प्रगृह्यस्येत्यनेन तु प्लुतयोरवयवकारयोर्मात्रिकयोरेवेदुतोर्विधानमिति सूचितम्। अत्र पूर्वसूत्रादिदुतोरनुवृत्त्या सिद्धे तयोरिति पूर्वसूत्राभ्यां विहितयोरेव बोधकस्तच्छब्द इत्यस्य स्पष्टप्रतिपत्त्यर्थमिति बोध्यम्। इदम्। प्रकृतसूत्रम्। अग्ना३ इइन्द्रमिति। स्थितिप्रदर्शनमेतत्। प्लुतप्रकरणं व्याख्याय तस्मिन् विशेषं वक्तुमुपक्रमते। यद्यपीत्यादिना। तस्य। प्लुतस्य। दाश्वान्। अस्य सूत्रस्य वैदिक्यामेव लेखनस्य निमित्तमाह। प्रसङ्गादित्यादिना। छान्दसानाम्प्रयोगाणां साधकसूत्रव्याख्यानात्साहचर्य्यात्स्मृतस्यास्य सूत्रस्यापि व्याख्यानमुचितमतोऽत्रैवोक्तमिति भावः। तदनुबन्धकपरिभाषायाः प्रवृत्तिशङ्कायामाह। मूले अनुबन्धपरिभाषेति तदनुबन्धकपरिभाषेत्यर्थः। अत एव। अनुबन्धोच्चारण एव तस्याः परिभाषायाः प्रवृत्तिस्वीकारादेव। प्रकृतत्वादिति।

SGDF Sri Gangeshwari Digital Foundation

ऋच्छित्यनुवर्त्तत इति भावः। एवञ्च । उभयथेत्यस्योपादानेन कार्यस्य वैकल्पिकत्वबोधने च। सूत्ररीत्या। उभयथर्क्ष्विति सूत्ररीत्या। आतोटीति सूत्रस्य त्यागे लाघवमप्याह। सर्वविकल्पानामित्यादिना । व्यवस्थितविकल्पं नेति। विकल्पस्य व्यवस्थितत्वञ्च छान्दसत्वाद्भविष्यति। सूत्राण्यपीति। स्पष्टार्थानीति शेषः। कः करत्। अदितिभिन्नात्परस्य विसर्गस्य सः स्यात्। उदाहरणे करित्यादीनाङ्कृधातुप्रकृतिकत्वम्बोध्यम्। पञ्चम्याः परावध्यर्थे। अत्र परावध्यर्थ इति समानाधिकरणे सप्तम्यौ। अध्यर्थ उपरिभावः। लट्प्रथमैकवचनान्तत्वभ्रमनिवृत्तये आह। यानावितीति। मनुः पुत्रेभ्य इति। अत्र मनुरिति प्रथमान्तत्वं तु षष्ठ्यर्थास्ति। निसस्तपता। आसेवनम्पौनः पुन्यन्ततोऽन्यत्रे त्यर्थः । उदाहरणे निष्टप्तमित्यस्य सकृत्तप्तमित्यर्थः। लोकवेदसाधारणत्वादिति।छन्दसीत्यस्याप्रकृतत्वादन्यस्य छान्दसत्वप्रयोजकस्याभावादिति भावः।निष्टप्तंरक्ष इत्यस्य छन्दस्त्वादेतस्यानेन शास्त्रेण साधनमित्यभिप्रायेणास्य सूत्रस्य वैदिक्यां लेखनमिति केचित्। युष्मत्ततक्षुः। छान्दसानामुदाहरणानान्दर्शनादस्य छान्दसत्वमित्यस्यात्र लेखः। विशेषणमिति। व्यावर्त्तकं विशेषणमित्यर्थः । इतरयोस्तु परत्वकन्तत्। न त्वेकदेशस्य युष्मच्छब्दस्य। समासघटकत्वात् । यजुष्येकेषाम्। यजुःशब्दे पर इति भ्रमवारणायाह। यजुर्विषय इति। न तु स एवार्थः। युष्मत्ततक्षुष्वित्यस्यानुवृत्तेः। स्तुत्स्तोमयोः । ननु गोस्तोममित्यस्य वाक्यत्वात्कथम्पूर्वपदादित्यनेन सिद्धिरत आह। पूर्वम्पदमिति। तदुक्तम्भाष्ये। स्तुत्स्तोमयोश्छन्दसि वचनमनर्थकम्। किङ्कारणम्। पूर्वपदादिति सिद्धत्वादिति। पूर्वपदमात्रस्येति। पूर्वोक्तभाष्यादत्र पूर्वभूतपदमात्रस्य ग्रहणमिति भावः। सुञः। उक्तार्थकम्पूर्वपदादित्यनुवर्त्तते। निपातग्रहणमिति। न तु धातोरिति शेषः। सनोतेरनः। छन्दसीति वर्त्तते। सनोतेरन इति समानाधिकरणे षष्ठौ नत्वन इति पूर्वपदस्य विशेषणमिण्कोरित्यधिकारात्। नियमार्थमिति। अनकारान्तस्यैवेति नियमार्थमित्यर्थः। इणः परस्य सनोतेः सकारस्य षत्वमनकारान्तस्यैवेति नियमः । अत एव भाष्ये सनोतेरन इति वचनमनर्थकम्। पूर्वपदादित्येव सिद्धत्वादित्याशङ्क्य नियमार्थमिदं वक्तव्यमिति सूत्रफलप्रदर्श्य गोसनिमितिनियमस्यावश्यमुक्ता सवनादिषु कृतत्वात्सिद्धमिति कथनेन

SGDF
Sri Gargeshwari Digital Foundation

गोसनिमित्यस्य सिद्धिरुक्ता। केचित् भाष्यानुसारिणः। अण्यन्त इति। प्रकृतिग्रहणे ण्यधिकस्य ग्रहणमिति नास्तीति भावः। तदा ग्रयः। ण्यन्तस्य व्यावर्त्यस्य यत्प्रदर्शनन्तदाशयः। अन्य इति। एतदप्युक्तम्भाष्ये। अथ वा अयमस्त्याण्यन्तः। सिसनिषतेरप्रत्ययः सिसनीरिति। नियमप्रवृत्तिरिति। सामान्यतः प्रवृत्तिर्नियमस्य दर्शिता। सहेः पृत। छन्दसीति वर्त्तत इति। स्तुतस्तोमयोरित्यत इत्यादिः। उभयत्र संहिताधिकारस्य फलमाह। अवग्रह इति। मनोरमेति। न हि वृत्तीत्यनेन प्रतिपदोक्तत्वाद्दीर्घे सिद्धेऽन्येषामपीत्यस्य प्रवृत्तिस्वीकारो निष्फल इत्यनेन ध्वनितम्। निव्यभिव्यः। सुनोत्यादिग्रहणाननुवृत्त्याह। एभ्य इति। सुनोत्यादेरिति। एतस्य लाभप्रकारमाह। प्रकरणप्राप्तस्येति। छन्दस्यदवग्रहात्। नोण इत्यनुवर्त्तते। अवग्रहादित्यत्रार्श आद्यच्। नन्वेवमवग्रहेऽपि णत्वं स्यादत आह। अवग्रहविषयत्वञ्चेति। चस्त्वर्थे। तेन संहिताधिकारस्याबाधः सिद्धः। अवग्रहविषयत्वमुपपादयति। यदकाले चेति। अत एव। अवग्रहविषय एव णत्वप्रवृत्तिस्वीकारादेव। नश्च धातुस्थो। निमित्तात्। रेफषकाररूपात्। तेन। सुणोऽनुकरणस्वीकारेण। नस्शब्दे विशेषमाह। नसितीति। उभयोः। नासिकाशब्दादेशास्मच्छब्दादेशयोः। हरदत्त इत्यनेन सूचितामरुचिम्प्रकाशयति। उत्तरसूत्र इति। धातुस्थात्परस्योदाहरणमाह। रक्षाण इति। इति शिवमित्यत्र शिवशब्दो मङ्गलार्थः॥

इति श्रीवैदिकप्रकरणेऽष्टमोऽध्यायः।

SGDF
Sri Gargeshwari Digital Foundation

॥ श्रीगणेशाय नमः ॥

॥ अथ स्वर प्रकरणम् ॥

सर्वप्रकरणोपकारकतया साधारणस्वरानाह । मूले अथेत्यादिना । अनुदात्तं पदमेकवर्जम् । अत्रानुदात्तशब्दोऽर्श आद्यजन्तः । अत एव पदपदसामानाधिकरण्यस्योपपत्तिरिति वक्ष्यते । कर्त्तव्यमित्यस्याध्याहारः । अच्प्रकृतिभूतोऽच्छब्दार्थस्य बोधकोऽनुदात्तशब्दः । पदमित्युद्देश्यम् । एवञ्च एकवर्जम्पदमनुदात्ताच्काभिन्नङ्कर्त्तव्यमित्यर्थः । एकवर्जमित्यस्योपपत्तिमाह । द्वितीयायाञ्चेतीति । यत्र त्वरा प्रतीयते तत्रैव द्वितीयायाञ्चेति सूत्रेण णमुल् भवति साऽत्र न प्रतीयत इति कथन्तेन णमुलित्याशङ्कते । नन्वित्यादिना । सभाधत्ते इहेति । अत एव यावत्समुदायस्य पदत्वभावितावत्समुदायस्य क्रमेणान्वाख्याने तन्मध्यघटकस्य यस्य यस्योदात्तादिर्विधीयते शास्त्रेण तत्तच्छास्त्रैकवाक्यतयाऽस्य पुनः पुनः प्रवृत्तिर्भवति । पक्षान्तरमाह । यद्वेति । अस्य सूत्रस्य विधिसूत्रत्वमेकपदार्थानिश्चयान्न सम्भवति नाप्येतत्संज्ञासूत्रम् । पदस्य समुदायात्मकस्यानुदात्तसंज्ञायामपि तस्याः संज्ञाया विध्यन्तरोपकारकत्वाभावादत आह । परिभाषेयमितीति । यद्यदुदात्तस्वरितविधायकं शास्त्रन्तत्तत्सूत्रैकवाक्यतयाऽस्य प्रवृत्तौ तत्तत्सूत्रविधेयस्यावस्थानम्भवतीत्यस्य नियामकत्वमुपपादनीयम् । अस्वरितत्वादिति । उत्तरत्र सम्बन्धप्रयोजकस्य स्वरितस्याभावादित्यर्थः । दोषविशेषरूपं यत्स्वरितत्वन्तदभावस्यास्फुटत्वादाह । एकवर्जमितीति ।वैयर्थ्यापत्तिमुपपादयति । तत्तदिति । अधिकारत्वे सर्वैकवाक्यताया असम्भवोऽपि भवतीत्याह । किञ्चेति । एवञ्च विधिपक्षे एकपदार्थानिश्चये च । विधित्वपक्षे शास्त्रसामान्यस्य ग्रहणं स्यादित्याशयेनाह । शास्त्रविहित इति । उदात्तचतुष्टस्य अवणापत्तिमुपपादयति । तत्रेत्यादिना । ङीष् । जातिलक्षणे ङीष् । कृत्स्वरः । ग्रामसक्याञ्जात इति विग्रहे सप्तम्याञ्जनेर्ड इति सूत्रविधीयमानडप्रत्ययस्य

SGDF
Sri Gargeshwari Digital Foundation

स्वरः। मकारोकार इति। तस्य शास्त्रविशेषेण विशेषस्य विधानाभावात्। प-रिभाषाया लिङ्गम्। परिभाषाया उपस्थितिप्रयोजकं लिङ्गम्। स्वरविधौतीति। स्वरविधित्वमेवास्य लिङ्गमिति भावः। अत्र को वर्जनीय इत्याकाङ्क्षायामाह। अनुदात्तस्येति। स्वराणाम्प्रवृत्तिव्यवस्थामाह। अत्रेति। परिमाणार्थमिति। या-वतः पदत्वम्भावि तावत्समुदायपरम्। अत एव। पदशब्दस्य तादृशसमुदाय-लाक्षणिकत्वादेव। न दोष इति। पदशब्दस्य तादृशसमुदायलाक्षणिकत्वाभावे धातोरिति सूत्रस्य प्रवृत्तिकाले पदसंज्ञकसमुदायाभावेनास्याः परिभाषाया अप्रवृत्तिः स्यात्। नन्वेवम्पदशब्दोपादानवैयर्थ्यमत आह। तद्ग्रावत्यैमिति। भाष्यकैयटयोरिति। तत्र हि अनुदात्तादेरञो विधाने आद्युदात्तान्ङीष उप-संख्यानमिति वार्त्तिकम्। कुवलीवदरी। कुवलीवदरीशब्दौ गौरादित्वादाद्यु-दात्तौ ताभ्यां गौरादित्वान्ङीष् प्रत्यये कृते प्रकृतेराद्युदात्तत्वात्प्रत्ययस्योपसं-ख्यानं कर्त्तव्यमिति पूर्वपक्षे ङीष्प्रत्ययस्य प्रत्ययसंज्ञासन्नियोगशिष्टत्वादाद्युदा-त्तत्वे तदेकवाक्यतापन्नशेषनिघातेनानुदात्तादिरेवायमित्यभिप्रायेण समाधा-ने सिद्धान्तिना कृते पदस्यानुदात्तादित्वम्। पदस्य निघातः सुप्तिङन्तञ्च पद-म् ङ्याप्प्रातिपदिकाच्च प्रत्ययो विधीयते इति पूर्वपक्षिणोक्तम्। ततः सि-द्धान्त्येकदेशी आह। न वा समर्थस्यानुदात्तादित्वात्। समर्थमनुदा-त्तादित्वेन विशेषयिष्याम इति। ततः पुनः पूर्वपक्षी आह नैवं श-क्यम्। इह प्रसज्येत वाचो विकारस्त्वचो विकारः। सावेकाचस्तृतीयादिर्वि-भक्तिरिति विभक्त्युदात्तत्वे कृते शेष निघातेन समर्थस्य विभक्त्यन्तस्यानुदात्ता-दित्वात्प्राप्नोतीति भावः। इह च न स्यात्सर्वेषां विकारः सार्व इति। सर्वस्य सुपी-ति विभक्त्यन्तस्याद्युदात्तत्वात्। तस्मान्नैवं शक्यम्। न चेदेवमुपसङ्ख्यानङ्कर्त्त-व्यम्। न कर्त्तव्यम्। आचार्यप्रवृत्तिर्ज्ञापयति यावत्येव द्वितीयस्य स्वरस्य प्रादु-र्भावस्तावत्येव पूर्वस्य निघात इति। यदयम्भिक्षादिषु गर्भिणीशब्दस्य पाठङ्क-रोति। कथङ्कृत्वा ज्ञापकम्। भिक्षादिषु गर्भिणीशब्दस्य पाठ एतत्प्रयोजनमनु-दात्तादिलक्षणोऽञ्मभूदिति यदि च पदस्य निघातः गर्भशब्दोऽयमाद्युदात्तस्त-स्मादितिरिन्नन्ताद्यः प्रत्ययः प्राप्नोति सतावत्याप्तस्मिन्नवस्थिते निघातः तत्र कोऽनुदात्तादिलक्षणस्याञः प्रसङ्गः पश्यति त्वाचार्यः यावत्येव द्वितीयस्य स्वर-

SGDF
Sri Gargeshwari Digital Foundation

स्य प्रादुर्भावस्तावत्येव पूर्वस्य निघात इत्यतो भिच्चादिषु गर्भिणीशब्दम्पठति। पदग्रहणङ्किमर्थम्पदग्रहणम्परिमाणार्थम्। पदग्रहणङ्क्रियते परिमाणार्थम्। पदावधेर्यथास्यात् वाक्यस्य मा भूदनुदात्तम्पदमेकवर्जमिति भाष्ये उक्तम्। पूर्वस्य निघात इति। प्राग्वस्थितस्य निघात इत्यर्थः। गर्भशब्दोऽयमिति। अर्त्तिगृभ्यामन्निति प्रत्ययस्य नित्वात्। पदग्रहणमिति। यस्य पदत्वम्भविष्यति तस्यैवैकवर्ज्जमनुदात्तं यथा स्यात्पदसमूहस्य मा भूदित्येवमर्थम्पदग्रहणमित्यर्थ इति कैयटे। एवञ्चेति। एकग्रहणस्य विधीयमानोपलक्षणत्वे चेत्यर्थः। तवैचान्तेति। तवैचान्तश्च युगपदिति सूत्रेण तवैप्रत्ययान्तस्यान्त उदात्तोऽनन्तरोगतिश्च प्रकृत्या भवतीति युगपदुभयविधानेन द्वयोर्वर्जनम्। एतत्सूत्रोपादानम्पदद्वयात्मकपदे द्वयोर्वर्जनप्रदर्शनाभिप्रायेण। इदमुपलक्षणमसमासात्मकैकपदेऽपि अन्तश्च तवैयुगपदित्यनेनाद्यन्तयोर्युगपतुदात्तत्वविधानेनोभयोर्वर्जनात् द्व्यादीनामित्यत्रादिपदोपादानेन क्वचित्त्रयाणां वर्जनमित्युक्तम् तस्योदाहरणमाह। इन्द्राबृहस्पती इति। द्युदात्त इति। बृहच्छब्दोऽतिप्रत्ययान्तत्वादन्तोदात्तो वर्त्तमाने पृषन्महद्बृहदिति व्युत्पादितः। पतिशब्दश्च पातेर्डतिरिति डतिप्रत्ययस्याद्युदात्तत्वादाद्युदात्तः। इन्द्रशब्दश्च रन्नन्तत्वादाद्युदात्तः। न चैवमिति। एकग्रहणस्य विधीयमानोपलक्षणत्वे दोषः स्यादित्याशयः। एकेनैवेति। तेन समानशब्दे उपपदे ख्याधातोरिण्प्रत्यय आद्युदात्तश्चेति सूत्र क्त्र. क्यतयोदात्तः सकारस्य समानशब्दस्थानिक एकस्मिन्नेव काले विधीयते। तस्य च प्रत्ययस्य ङित्वमप्यतिदिश्यते वातेर्डित्यतो डिद्ग्रहणानुवृत्त्या। यद्यपि विधेयभेदाद्वाक्यभेदो भवति। तथापि विधेयत्रयविषयको महावाक्यार्थबोधः समूहालम्बनात्मक एक एवेत्याशयः यत्र भिन्नेन सूत्रेण विधानन्तत्र पौर्वापर्यभावेन प्रवृत्त्या व्यवस्था कर्तुं शक्येति तद्भावः। यत्नं विनेति। विशेषोपादानं विनेत्यर्थः। एवञ्च समाने ख्यः स चोदात्त इत्यत्र सस्य विशिष्योदात्तत्वविधानेन तस्यैव शेषो भवति। धिन्विकृण्व्योरचेत्यत्र यथाऽकारादेशस्य पृथग्विधेयत्वकल्पना तद्वदिति तात्पर्यम् एवं सति यथा वर्जनस्य क्रम इष्टस्तथाह।अत्र यस्मिन् पद इति। एवम्। तस्यामवस्थायां सन्निहितमनन्तरमिति स्वीकारे। उदात्तत्वप्रवृत्तिकाल इति तस उदात्तत्वप्रवृत्तिकाल इ-

SGDF
Sri Gargeshwari Digital Foundation

त्यर्थः। युगपद्ग्रहणेनेति। तवैचान्तश्च युगपदित्यनेन तवैप्रत्ययान्तस्यान्त उ-
दात्तोऽगतिश्चानन्तरः प्रकृत्येत्यनेन कृत्स्वरापवादभूतेनान्वेन वाड इत्यादावुभ-
योरुदात्तयोः श्रवणार्थं युगपदग्रहणङ्क्रियते यदि यत्नं विनापि समावेशस्तदा
तवैप्रत्ययान्तस्यान्तोदात्तत्वे कृते तस्य गतेश्चानेन प्रकृतिस्वरे बोधिते तस्य नि-
पाता आद्युदात्ता इत्यनेनाद्युदात्ततयोभयोः समावेशे सिद्धे किं युगपद्ग्रहणे-
न। कृतञ्च तद्यत्नाभावे समावेशाभावं ज्ञापयतीति भावः। एवञ्च चिनुत इ-
त्यत्रान्यत्र विकरणेभ्य इति वक्ष्यमाणत्वात्तस उदात्तत्वेन वर्ज्यमानत्वसिद्धिः।
ज्ञापकं विनापि चिनुत इत्यादौ न दोष इत्याह। वस्तुत इति। आद्युदात्तश्चे-
त्यादि। आद्येऽपित्स्वरात्तित्स्वरष्टापीत्यनेन पित्स्वरतित्स्वरयोर्विप्रतिषेधविचारे
कार्या हार्या इत्यत्र ण्यदन्तात्टापि कृते तत एकादेशे तस्य पूर्वान्तवद्भावेन ति-
त्स्वरस्य परादिवद्भावेन पित्स्वरस्य च प्राप्तौ विप्रतिषेधेन तित्स्वरो भवतीत्युक्ते-
स्ततो विप्रतिषेधाभावेऽपि प्रथं मतित्स्वरितमिति स्वरितत्वे कृते तत एकादेश
आन्तर्यतः स्वरितानुदात्तयोः स्थाने जायमानः स्वरितो भविष्यतीत्यभिहितम्।
तत्रादौ स्वरितत्वमेव कथन्नित्यत्वादेकादेशेन भाव्यमिति परेण शङ्किते स्वरभि-
न्नस्य प्राप्नुवन्विधिरनित्य इति परिभाषयैकादेशस्य शब्दान्तरप्राप्त्या स्वरितत्व-
मप्यनित्यमुभयोरनित्ययो परत्वात्स्वरितत्वमित्यभिहितेऽन्तरङ्गस्त्वह्येकादेशोव-
र्णावाश्रित्यैकादेशः पदस्य स्वरितत्वमिति पूर्वपक्षिणा कथिते स्वरितत्वमप्यन्त-
रङ्गम्पदग्रहणम्परिमाणार्थमित्युक्तम्। एतेन पदस्य न कार्यिता। किन्तु कार्यि-
त्वं वर्णस्यैव स्वरितत्वे। पदस्य तु तदेकवाक्यतापन्नशेषनिघातयोग्योपलक्षक-
तेति सूचितम्। द्वितीये द्वित्रिभ्यां पाद्दन्मूर्द्धस्वित्यत्र द्वित्रिभ्यां षमूर्द्ध्न इति कृत-
समासान्तस्य निर्द्देशो युक्तोऽथ वाऽकृतसमासान्तस्य युक्त इति विचारे यदा स-
मासस्यान्तोदात्तत्वन्नित्यश्च समासान्तस्तदाऽकारान्तग्रहणं यदा तूत्तरपदस्याने-
नोदात्तत्वविधानमिति पक्षस्तदा कृतेऽपि समासान्ते तस्योत्तरपदे अनन्तर्भा-
वान्नकारान्तस्य स्वरविधिरित्यभिप्रायके कृतसमासान्तनिर्द्देशे समासान्तविधे-
रनित्यत्वात्तस्मिन्नकृते द्विमूर्द्धा त्रिमूर्द्धेत्यत्र स्वरो न प्राप्नोतीत्यभिधायास्तु तर्हि
नकारान्तस्य ग्रहणमिति कथिते द्विमूर्द्धस्त्रिमूर्द्ध इत्यत्र कृते समासान्ते उत्तर-
पदस्य विधीयमानमन्तोदात्तत्वं प्रत्ययस्य न प्राप्नोतीति शङ्कायामुदात्तनिवृ-

SGDF
Sri Gargeshwari Digital Foundation

त्तिस्वरेणान्तोदात्तत्वम्प्रत्ययस्य भविष्यतीत्युक्तम् । एतेन समासोत्तरपदस्यान्तोदात्तत्वे तदेकवाक्यतापन्नशेषनिघातेन प्रत्ययस्यानुदात्तत्वमिति ध्वनितमन्यथाऽनुदात्ते परे टिलोपाभावेनोदात्तनिवृत्तिस्वरस्य प्राप्तिर्न स्यात् तच्चानुदात्तत्वम्पदग्रहणस्य परिमाणार्थत्वे सत्युपपद्यत इति । तृतीये पुमानित्यस्याद्युदात्तस्य परमपुमानित्यस्यान्तोदात्तस्य सिध्यर्थमसुङ्घुपदेशिवद्वचनं स्वरसिध्यर्थम्बहिरङ्गलक्षणत्वादिति वार्त्तिककृतोक्तम् । एवञ्च विभक्त्युत्पत्तेः प्रागुपदेशावस्थायामेवासुङ् भवति अन्यथा पूञो डुम्सुन्निति डुम्सुन्नन्तः पुम्स्शब्दो नित्स्वरेणाद्युदात्तस्तदवयवसकारस्य स्थाने जायमानोऽसुङादेशो यथा पुमानित्यत्र सन्नधर्मणो हलः स्थाने जायमानत्वादनुदात्तो भवति तथा परमपुमानित्यत्रापि स्यादिष्यते त्वन्तोदात्तत्वेन मकाराकारस्योदात्तत्वमत उपदेशिवद्वचनेन समासान्तोदात्तत्वात्पश्चात्प्रवर्त्तमानात्पूर्वमेवासुङादेशः स्वीक्रियतेऽन्यथाऽपरनिमित्तकत्वेन समासान्तोदात्तत्वस्यान्तरङ्गत्वात्सर्वनामस्थाननिमित्तकस्यासुङादेशस्य बहिरङ्गत्वात्पूर्वं समामान्तोदात्तत्वेन परमपुमानित्यत्र पुंशब्दोकारस्योदात्तत्वे कृते तदनन्तरमसुङादेशेऽपि सोऽनुदात्त एव प्रसज्येतेति मध्योदात्तम्पदम्प्रसज्येत । ततः परेणाद्युदात्तोऽसुङादेश उच्चारणीय इत्यभिप्रायेणाद्युदात्तनिपातनङ्करिष्यते सनिपातनस्वरः समासस्वरस्य बाधको भविष्यतीत्यभिहिते सिद्धान्तिना निपातनस्वरस्य प्रकृतिस्वरबाधकत्वापत्त्या पुमानित्यत्राप्यन्तोदात्तत्वापत्तिः स्यादत उपदेशिवद्भावारम्भ एव युक्त इत्यभिहितम् । यदि पश्चात्प्रवर्त्तमानस्वरविधायकवाक्यैकवाक्यतापन्नशेषनिघातेन पूर्वं प्रवर्त्तमानस्योदात्तत्वस्य बाधो नं स्यात्तदाऽऽद्युदात्तत्वनिपातनैकवाक्यतापन्ननिघातेन बाधनम् भविष्यतीति निपातनस्वरस्य प्रकृतिस्वरबाधकत्वापत्तिरभिहिता सा विरुध्येतेति पदग्रहणस्य परिमाणार्थत्वं युक्तमेव । यावत्पदत्वं भावीति । अत्र यावदिति कालस्य परामर्षकम् । यावत्कालपर्यन्तम्पदत्वम्भावीत्यर्थः । नन्वेवञ्चिन्वित्यत्र सेर्ह्यपिच्चेति ह्यादेशस्यापित्करणेन प्रत्ययाद्युदात्तत्वं ह्यादेशस्य भवतीति तदेकवाक्यतापन्नशेषनिघातेनोभयोरनुदात्तयोः श्रवणं स्यादिष्यते त्वाद्युदात्ततेत्यत आह । चिनु इति त्विति । इति न्यायेन । अन्तरङ्गानपि विधीन्बहिरङ्गो लुग्बाधत इति न्यायेन । एवञ्च लुक्प्रयोजकस्य बलवत्त्वात्प्रत्ययादु-

SGDF
Sri Gargeshwari Digital Foundation

दात्तत्वमादौ न प्रवर्त्तते। विकरणस्वरस्य त्वबाधकत्वादाद्युदात्तम्पदम्भवति।
एवञ्च यावत्पदत्वभावीति व्याख्याने च अस्या यथोद्देशत्ववादिमतन्दूषयति य-
त्त्वित्यादिना। अत एव। यथोद्देशत्वाङ्गीकारादेव अन्त इति वर्त्तत इति।
कर्षात्वत इत्यत इत्यादिः।इत्यपि ज्ञापकमिति। यदन्तस्याद्युदात्तस्य श्रवणार्थ-
कृतन्तत्तस्मिन्नर्थे ज्ञापकमित्यर्थः। अन्यथा। अस्याः कार्यकालत्वे। तयोश्चा-
रितार्थ्येनेति। तव्यतस्तित्स्वरस्य यतो नाव इति सूत्रस्य च चारितार्थ्येनेत्यर्थः।
ननु सन्निपातपरिभाषायाः स्वरविधावप्रवृत्तेर्वक्ष्यमाणत्वान्नेदं युक्तमत आह।
किञ्चेति। कर्त्तव्यङ् क्ना। कण्ठ्यः क्वेत्यत्र क्वशब्दस्य तित्स्वरितमिति किमोऽ-
दिति विधीयमानस्य यतः स्वरितत्वात्तत् परत्वेन कण्ठ्यस्तत्रेत्यत्र त्रलो लि-
त्स्वेन तत्र शब्द आद्युदात्त इति उदात्तपरत्वेन नोदात्तेत्यस्य प्रवृत्तिरिति भा-
वः। एवं रीत्या परोक्तस्य यथोद्देशत्वस्वीकारे ज्ञापकस्य खण्डनेऽस्याः कार्य-
कालतैव। त्रिपाद्यामप्रवृत्तौ तूपायान्तरमाह। तस्मादिति। अधिककार्यार्था-
दिति। एतेनास्वरितत्वादित्यनेन न विरोधः। उत्तरसूत्रेषु सम्बन्धप्रयोजकस्य
स्वरितत्वस्यास्वीकारात् अत्रैव सूत्र इति। तत्र हि परिभाषेयम्। किन्तुतम्भ-
वति। कार्यकालं संज्ञापरिभाषं यत्र कार्यन्तत्रोपस्थितमिदन्द्रष्टव्यमित्युक्तम्।
अत एव। अस्याः कार्यकालत्वादेव। अन्यथा। यथोद्देशत्वे। उभयोः सम्भवे-
न। दीर्घकाशेत्यनेनादेराकारस्योदात्तत्वमन्तश्चास्पूर्वमित्यनेन लकारोत्तराका-
रस्योदात्तत्वमित्येवं सम्भवेन। विप्रतिषेधेति। अस्य भाष्योक्तेत्यादिः। अत
एव। कार्यकालत्वेऽपि स्वरितत्वप्रतिज्ञयाऽप्रवृत्तिस्वीकारादेव। अन्यत्वे प्रति-
योगित्वेनाष्टमिकस्यापि ग्रहणशङ्कां वारयति। अन्यत्व इति। एवञ्च सप्ताध्या-
यीतिपदमष्टमाध्यायातिरिक्तस्यैव बोधकमिति भावः। उक्तरीत्या। स्वरितत्वेन।
अत एव। उक्तरीत्याऽष्टमेऽप्रवृत्तेरेव। षाष्ठाद्युदात्तत्वे आमन्त्रितस्य चेत्याद्यु-
दात्तत्वे। अनेन। प्लुतोदात्तत्वेन। कथन्निवृत्तिरिति। यदि प्लुतोदात्तत्वे ना-
प्यनुदात्तम्पदमित्यस्यैकवाक्यता स्यात्तदा जातस्यामन्त्रिताद्युदात्तस्य श्रवणन्न
स्यादिति हि तवाभिमतन्तच्च न सम्भवति। प्लुतोदात्तत्वस्यासिद्धत्वादिति तद्भा-
वः। बाधकाभावादिति। पूर्वञ्च परमसिद्धन्न तु परस्मिन्पूर्वस्यासिद्धत्वमिति प-
रदृष्ट्या पूर्वस्याद्युदात्तत्वस्य सिद्धत्वान्निवृत्तिः स्यादेवेति भावः। ध्वनितमिति।

SGDF
Sri Gargeshwari Digital Foundation

तत्र हि प्राचामिति वचनद्विमर्थमिति विचारे एकैकग्रहणेन पर्यायार्थेन वि कल्पस्य सिद्धिमुक्त्वा एकैकग्रहणं यौगपद्येन प्लुतौ मा भूदित्येतदर्थमित्यभिधायानुदात्तम्पदमेकवर्जमिति वचनान्नास्ति यौगपद्येन सम्भवः। असिद्धः प्लुतस्तस्यासिद्धत्वान्नियमो न प्राप्नोति । नैष दोषः । यद्यपीदन्तत्रासिद्धं तत्त्विह सिद्धम्। कथम्। कार्यकालं संज्ञापरिभाषम् यत्र कार्यन्तत्रोपस्थितन्द्रष्टव्यम्। गुरोरनृतोऽनन्त्यस्याप्येकैकस्य प्राचामुपस्थितमिदम्भवति अनुदात्तम्पदमेकवर्जमिति। इहापि तर्हि न प्राप्नोति। देवदत्ता३ । सिद्धाऽसिद्धावेतौ। यौ हि सिद्धाविवासिद्धाविव वा तयोर्नियम इत्युक्तम्। इहानुदात्तम्पदमेकवर्जमिति वचनान्नास्ति यौगपद्येन सम्भव इत्यभिधामेकमिव गुरोरिति सूत्रं सन्नदेव सर्वेषां ग्रुतविधायकमित्येवं वक्तुमशक्यमितदेकवाक्यतापन्नेऽनुदात्तमिति वचने एकशब्दोपादानेनैकस्य वर्ज्यमानताऽन्येषान्तु तस्मिन्नेव समयेऽनुदात्तत्वं विधीयत इति निष्कर्षोऽस्ति तथा च कस्यैकस्य वर्ज्यमानतेति निश्चयाभावेन यौगपद्येन वक्तुमशक्यमित्यभिप्रायेण। ततस्तेनैकवाक्यतैव न सम्भवतीत्याशयेनाह। सिद्धः प्लुत इति। अत्रासिद्धत्वाभिधानङ्कार्यकालपक्षेऽपि स्वरितत्वप्रतिज्ञया त्रिपाद्यान्तस्याः परिभाषाया अप्रवृत्त्यभिप्रायेण तेन स्वरितत्वेनाप्रवृत्तिर्ध्वनितेति। ततः परेण यथोद्देशपक्षाभिप्रायेणानेनासिद्धत्वाभिधानङ्कृतन्तत्रे ह न सम्भवति कार्यकालपक्षाभ्युपगमादित्याशयेन नैष दोष इत्यादिना कार्यकालपक्षे प्रदर्शिते ततः समाधाताऽऽह इहापि तर्हीति। देवदत्ता३ इत्यत्रामन्त्रितादुदात्तत्वेन प्लुतोदात्तत्वसमावेशो न स्यादिति भावः। सिद्धासिद्धाविति। आमन्त्रितादुदात्तत्वं सिद्धं तस्मिंस्त्वपेक्षिते प्लुतोदात्तोऽसिद्ध इति निघातो न भविष्यतीत्यर्थः। प्लुतोदात्तत्वस्यासिद्धत्वात्तदेकवाक्यतापन्नस्यानुदात्तम्पदमित्यस्याप्यसिद्धत्वान्न निघात इति भावः । अत एव । कार्यकालपक्षेऽप्यसिद्धत्वो अयशास्त्रैकवाक्यतायाः स्वरितत्त्वेनास्वीकारादेव । शेषनिघाताभावमुपपादयति । कन्याशब्दो हीत्यादिना । अन्तोदात्त इति । अस्य तदेकवाक्यतापन्नशेषनिघातेनानूपशब्दादिरकारोऽनुदात्त इति शेषः । अनुदात्तत्वं स्यादिति। मम तु । असिद्धत्वात्त्रयशास्त्रैकवाक्यतायाः स्वरितत्वेनास्वीकर्तुं मम तु। वहिरङ्गतया पूर्वपरोभयसापेक्षत्वेन वहिरङ्गतया। अपरनि-

SGDF
Sri Gargeshwari Digital Foundation

मित्तकतया परिभाषात्वन्तरङ्गे ति भावः। तत्स्वरस्यापि। एकादेशस्वरस्यापि। तत्त्वेन। वहिरङ्गत्वेन नानेन। आन्तर्यतो जायमानैकादेशस्वरेण। स्वरितत्वेनासिद्धेऽप्रवृत्तिरित्यत्रासिद्धत्वस्य द्विविधस्यापि ग्रहणमिति भावः। स्पष्टञ्चेदमिति। तत्र हि गाङ्गेऽनूप इत्यत्रास्मन्तगाङ्गशब्दस्य सप्तम्येकवचनेनैकादेशे एकादेश उदात्तेनेत्यनेनोदात्तत्वे कृते ततो अनूपशब्दावयवाकारेण सहैङः पदान्तादतीत्येकादेशस्य पक्षे स्वरितत्वम्भवतीत्येवमर्थं स्वरितग्रहणं सूत्रकृता कृतन्तच्च न कार्यमित्यभिप्रायेण स्वरितग्रहणं शक्यमकर्तुं कथमनुदात्ते परत उदात्ता भवतीत्येव सिद्धम्। केनेदानीं स्वरितो भविष्यति गाङ्गेऽनूपे इति। आन्तर्यत उदात्तानुदात्तयोरेकादेशः स्वरितो भविष्यति। इदन्तर्हि प्रयोजनन्तेन वर्ज्यमानता मा भूदिति प्रतिपादितम्। अस्यायं भावः। प्रकृतसूत्रे स्वरितग्रहणाभावेऽनुदात्ते पदादौ य एकादेशस्तस्याऽनेन सूत्रेण वोदात्तता विधेया यदा नोदात्तता तदोदात्तानुदात्तयोरेकादेशस्यान्तरम्यादुभयधर्मवान् स्वरितो भविष्यतीति सिद्धान्तिनोक्ते पूर्वपक्षिणोक्तमिदन्तर्हीति। य आन्तर्यात् स्वरितस्तस्य सिद्धत्वात्तदेकवाक्यतापन्नशेषनिघातेन पेशब्दोऽनुदात्तः स्यात् उदात्तस्वेष्यते यदा तु प्रकृतसूत्रे स्वरितग्रहणङ्क्रियते तदाऽस्य स्वरितस्यासिद्धत्वाद्वर्ज्यमानता न भवतीति। पुनः सिद्धान्ती आह। वहिरङ्गलक्षणत्वात्। असिद्धम्बहिरङ्गमन्तरङ्ग इत्येवन्न भविष्यति। यथैव कन्यानूप इत्यत्र कन्याराजन्यमनुष्याणामन्त इति अन्तस्य स्वरितत्वे तत एकादेशस्य स्वरितानुदात्तयोः स्थाने जायमानस्य स्वरितत्वमान्तरतम्यात्तस्य सिद्धत्वाद्वर्ज्यमानस्वरे सत्युदात्तस्वरितयोर्यौगपद्यन्न प्राप्नोत्यतोऽत्र यः परिहारोऽसिद्धम्बहिरङ्गमन्तरङ्गलक्षण इति स एव गाङ्गेऽनूप इत्यत्रापि भविष्यतीत्यभिप्रायेण यथैव तर्हि क्रियमाणे यः स्वरितः सिद्धस्तेन वर्ज्यमानता न भवति एवमक्रियमाणेऽपि न भविष्यति तस्मान्नार्थः स्वरितग्रहणेन। असिद्धम्बहिरङ्गलक्षणमन्तरङ्गलक्षण इत्येव सिद्धम् इति। स्वरित इति। अन्त्योयस्तकाराकारः सस्वरित इत्यर्थः। न चेति। वाच्यमिति परेणान्वयः। उदात्तस्वरितयोः। उदात्तो यकाराकारः स्वरितस्तकाराकारः एतयोः। तटस्थः शङ्कते। न चेति। उदात्तमुपजीव्यस्वरितत्वे कृते उपजीव्यविरोधस्यान्याय्यत्वात्स्वरितैकवाक्यतापन्नशेषनिघातो न भविष्यतीति

SGDF
Sri Gargeshwari Digital Foundation

भावः । पूर्वपक्षी समाधत्ते । तस्या इति । शेषनिघातो न स्यादिति । परमवाचा । अग्निमानित्यत्र शेषनिघातो न स्यादित्यर्थः । तस्मात्सन्निपातपरिभाषाया अनित्यत्वादप्रवृत्तिर्वाच्यैवेति भावः । यथा गोपायतमित्यत्रापान्तस्योदात्तत्वे गोकारोऽनुदात्तो भवति तथाऽन्यत्रापि प्राप्नोतीत्यभिमानेन शङ्कते । किञ्चेति । भद्रं करिष्यसीति । अत्र कृधातुरनुदात्तस्तस्योदात्तादनुदात्तस्येति स्वरितत्वम् । नचात्रतिङ्ङतिङ इति सूत्रेण समुदायस्य निघातेन भाव्यमित्यस्य शब्दस्यानुदात्तत्वमस्त्येवेति कथमियमाशङ्केति वाच्यम् । अग्ने भद्रं करिष्यसीति वाक्यस्य यदा यद्वृत्तसमभिव्याहृतत्वन्तदा यद्वृत्तान्नित्यमिति निघातस्य प्रतिषेधात् । अस्य स्वरितस्य । ककारस्य जायमानो य उदात्तादनुदात्तस्येति स्वरितस्तस्य । तस्मिन् सतीति । अत्र यस्तच्छब्दस्तेन यः पूर्वं ज्ञातः स परामृश्यते । एतत् । सति शिष्टस्वरवलीयस्त्वमित्याकारकं वाक्यम् । अनया । अनुदात्तमिति परिभाषया । अत एव । उत्तरकालप्रवृत्तिकस्य बलवत्त्वादेव । नन्वेकमेवाद्युदात्तश्चेति सूत्रं कथं स्वस्यैव बाधकमत आह । आद्युदात्तश्चेति । अत्र चेति । अन्यत्र विकरणेभ्य इत्यंशे । अन्यथा । तदंशाभावे । क्रियमाणस्य तासि स्वरस्येति । प्रत्ययाद्युदात्तत्वेन जायमानस्य तासेरुदात्तत्वस्य । इत्यनुवर्त्येति । आयादय आर्द्धधातुकेवेत्यत आर्द्धधातुक इति पदमनुवर्त्येत्यर्थः । तदेदमिति । आर्द्धधातुकलकारावस्थायामेव तासेरुदात्तत्वञ्जातन्ततस्तसःस्वरस्स एवाधुना सति शिष्टो जात इति तस्यानुदात्तत्वसिद्धये तास्यनुदात्तेदित्यावश्यकमित्यस्य ज्ञापकत्वन्न सम्भवतीति भावः । अस्य च । अन्यत्र विकरणेभ्य इत्यंशस्य च । अत एव । धातुस्वरापेक्षया प्राबल्यादेव । इदमपि । विकरणस्वरस्य दुर्बलत्वमिति । न दोष इति । अत्र चिन्विति नुशब्दस्योदात्तस्य श्रवणाभावावति रूपो दोषो नेत्यर्थः । अन्तोदात्तम्पदमिति । श्रूयत इति शेषः । तस्य । यद्वृत्तादित्यस्य । व्यवहितेऽपीति । पूजनात्पूजितमितिसूत्रे पूजनशब्दस्य सम्बन्धिशब्दत्वात्पूजितग्रहणे सिद्धे पुनः पूजितग्रहणमनन्तरपूजितलाभार्थम् । तेनात्र प्रकरणे निर्दिष्टपरिभाषाऽव्यवधानांशरहिता पञ्चमी निर्देशेऽपि प्रवर्त्तत इति ज्ञायते । अतो व्यवहितेऽपि प्रवृत्तिः। एतच्च तत्रैव सूत्रे मूले स्पष्टम्। तेन दारुणाध्यापक इत्यत्र समासान्तोदात्तत्वं बाध्यते । न तु दारुणशब्दा-

SGDF Sri Gargeshwari Digital Foundation

ध्यापक इत्यादाविति बोध्यम् अनुदात्तस्य च । कर्षात्वत इति सूत्रेऽन्तोदा-
त्त इति यद्यपि समस्तन्तथाप्येकदेशे स्वरितत्वप्रतिज्ञाबलादिहान्तपदरहितं
सम्बध्यत इत्याह । अत्रेति । अनुवृत्तौ वेति । अत्र वाकारोऽनास्थायाम् । युष्म-
भ्यमित्यादाविति । भ्यसोऽभ्यमि कृते टिलोपेऽभ्यमोऽकारस्यादिभूतस्यानेनोदा-
त्तत्वकरणात् । युष्मच्छब्दो मदिक्प्रत्ययान्तत्वेनान्तोदात्तः । सुप इति । विभ-
क्तिपदस्य तत्रैव वृत्तेरिति भावः । तत्त्वम् । उदात्तलोपनिमित्तत्वम् । एकत्र प-
देऽभावेनेति । अव्यवहितयोरित्यादिः । तेन तवैचान्तस्येत्येतदुदाहरणे तथा-
त्वेऽपि न क्षतिः । अनुदात्तमात्रेति । अत्र मात्रपदङ्कात्स्न्यें । तेन स्वतन्त्रास्वत-
न्त्रसामान्यस्येत्यर्थः । तदेवाह । अत इति । एतत्प्रवृत्तिरिति । अनुदात्तस्य चेति
सूत्रप्रवृत्तिरित्यर्थः । माहिधुक्षातामिति । अत्र मा शब्दो न माङ्योग इत्यटो
हि शब्दस्य निघातस्य प्रतिषेधार्थः । अन्तरङ्गत्वादिति । लुङीत्यस्य विषयत्वञ्-
चित्लुङीत्यत्राश्रीयत इति भावः । यदुक्तम्पूर्वम्पवत्वादिति तदत्र न नियामक-
मित्याह । अन्तरङ्गत्वादिति । अकारादुपदिश्यमानात्परत्वस्य लसार्वधातुकानु-
दात्तत्वस्य प्रवृत्तावाश्रयणङ्क्स्याचीत्यस्य प्रवृत्तौ तु क्सेति समुदायस्याश्रयणन्तथा
अजादित्वविशेषणस्य निमित्ततावच्छेदकस्याचाश्रयणमतः।पक्षान्तरेऽपीति ।लु-
ङीत्यस्य परसप्तमीत्वपक्षे । तदालस्य स्थानेऽपरनिमित्तकत्वेनान्तरङ्गत्वा-
त्पूर्वमादेशस्य प्रवृतिरिति भावः । अदोषादिति । प्रत्ययस्वरेण क्सस्योदात्त-
स्य लोपप्रवृत्त्या दोषाभावादित्यर्थः । इत्यत्र भाष्य इति । तत्र हि श्वः कर्त्ता
इत्यादौ तस्यानिकडादेशविषये प्रकल्प्यापवादविषयमिति न्यायेन लसार्वधा-
तुकानुदात्तत्वविषये प्रत्ययस्वराप्रवृत्तावनुदात्तत्वम्प्राप्नोति । तम्परत्वाट्टिलोपो
बाधते । तस्मिन्कृते सोऽसाववियमानोदात्तत्वेऽनुदात्ते उदात्तो लुप्यत इत्युक्तम्।
तत्र कैयटः । शास्त्रीयस्तत्राऽनुदात्तो न गृह्यते । किन्तर्ह्युदात्तत्वाभाववद्रूप इ-
ति । उदात्तनिवृत्तिस्वरस्यावश्यकप्राप्तिमुपपादयति । देवद्रीचीमित्यादिना ।
चावित्यनेन पूर्वपदान्तोदात्तत्वे उदात्तादनुदात्तस्येत्यन्त्यस्वरितत्वम् । अतद्धि-
त इतिचावित्यस्य विशेषणं । तद्धितभिन्ने परे यो लुप्ताकारोऽञ्चतिस्तस्मि-
न्नित्यर्थः । मूलं व्याख्याय भाष्यानुसारेणाह । वस्तुत इति । अत्र सूत्रे । चावि-
ति सूत्रे । तत्र हि चोरतद्धित इति वक्तव्यमिह मा भूत् । दाधीचो माधूच इ-

SGDF
Sri Gargeshwari Digital Foundation

ति। तर्त्तार्हि वक्तव्यन्न वक्तव्यम्। प्रत्ययस्वरोऽत्र बाधको भविष्यति इत्यभिधाय चुस्वरस्य स्थानान्तरप्राप्त्या प्रत्ययस्वरबाधकत्वम्भविष्यतीत्यादावुक्तम्। दधीचो मधूच इत्यत्रानुदात्तौ सुप्पितावीति प्रत्ययस्यानुदात्तत्वात्तत्र चुस्वरस्वरितार्थो दाधीच इत्यादावण उदात्तत्वेन वाध्येतेति प्रत्ययस्वरस्य बाधकत्ववादिनो भाव। तत अपवादस्थानप्राप्तो वलवानित्यभिप्रायेण स्थानान्तरप्राप्तस्य चुस्वर इत्यभिहितम्। प्रत्ययस्वरस्य बाधकोऽनुदात्तौ सुप्पितावीति तद्बाधक उदात्तनिवृत्तिस्वरः उदात्तनिवृत्तिस्वरस्य चुस्वरः स यथैवोदात्तनिवृत्तिस्वरम्बाधते एवम्प्रत्ययस्वरमपि वाधेत। अत्र प्रत्ययस्वरस्येत्यादिनाऽपवादत्वं दर्शयति।प्रत्ययस्वरस्यैवोदात्तनिवृत्तिस्वरेण प्रत्यापत्तिः क्रियत इति प्रत्ययस्वरापवादस्य चुस्वर इति भावः। नात्र उदात्तनिवृत्तिस्वरः प्राप्नोति किङ्कारणम्। नगोश्वन्सावववर्णेति प्रतिषेधात्। नैष उदात्तनिवृत्तिस्वरस्य प्रतिषेधः कस्य तर्हि तृतीयादिस्वरस्य। यत्र तर्हि तृतीयादिस्वरो नास्ति दधीचः पश्येति। एवन्तर्हि न तृतीयादिस्वरस्य प्रतिषेधं शिष्मः किन्तर्हि येन केन चिल्लक्षणेन प्राप्तस्य विभक्तिस्वरस्य प्रतिषेधम्। एवमभिहितेस्थानान्तरप्राप्तत्वमस्त्येव चुस्वरस्येत्यभिप्रायेण यत्र तर्हि विभक्तिर्नास्ति दधीची इति। प्रथममुक्तस्य यत्र तर्हीत्यस्येदन्तात्पर्यम्। यथा परत्वाच्चुस्वरः उदात्तनिवृत्तिस्वरं बाधते तथा प्रत्ययस्वरमपि बाधेतेति वचनमावश्यकमिति। प्रत्याख्यानपाद्याह। एवन्तर्हीति। नगोश्वन्निति सूत्रे विभक्तिग्रहणमेवानुवर्त्तते न तृतीयादिग्रहणमिति भावः। यत्र तर्हीति। क्व चित्प्रत्ययस्वरप्रतिप्रसवरूपोदात्तनिवृत्तिस्वरप्राप्तेरस्यपरत्वात्तद्बाधकत्वात्त नैव न्यायेन प्रत्ययस्वरस्यापि बाधापत्त्या दाधीच इत्यादौ प्रतिषेधो वक्तव्य इत्यर्थः। प्रकारान्तरेणापि चौरतद्धित इति वार्त्तिकस्यावश्यकत्वम्भाष्य उक्तम्। सति शिष्टः खल्वपि चुस्वरः। कथम्। चावित्युच्यते यत्रास्यैतद्रूपमिति। तस्मात्सुष्ठूच्यते चौरतद्धित इति। दधिअच् अस् इति स्थितेऽन्तरङ्गानपीतिन्यायेन लुको लुङ्निमित्तस्य च वलवत्त्वबोधनात्पूर्वन्तद्धितः पश्चादच इत्यल्लोपस्य स्थानिवत्वस्य प्राप्तिरिति भावः। आमन्त्रितस्य। सामन्त्रितमिति सूत्रेण विभक्त्यन्तस्यैवामन्त्रितसंज्ञाविधानादामन्त्रितविभक्त्यन्तस्येति पुनरुक्तिग्रस्तमित्याशयेनाह। आमन्त्रितवीति। आमन्त्रितस्वरप्रसङ्गादपरमप्यामन्त्रितस्वरमा-

SGDF

ह। आमन्त्रितस्य च। पदादित्यपोदात्ताविति चानुवर्त्तते। इमम्मे इत्यत्र स्व-रप्रवृत्तिप्रक्रियामाह। अत्र गङ्गे इति। नामन्त्रिते समानाधिकरणे। सामान्य-वचनं विशेष्यम्। नन्वेवमग्ने भ्रातरित्यत्राप्यविद्यमानवद्भावनिषेधान्निघातः स्यादत आह। अग्ने भ्रातरिति। षष्ठीशब्दस्य षष्ठीविभक्तिमात्रपरत्वे गोषु स्वामिन्नित्यत्र पराङ्गवद्भावासिद्धिः स्यादत आह। अत्रेति। आमन्त्रितनिरूपि-तकारकाप्रसिद्धेराह। आमन्त्रितार्थैकदेश इति। इष्यते इति। एतच्च समर्थानु-वृत्त्या वेति द्वितीयपक्षैकवाक्यतया कल्प्यत इति बोध्यम्। ननु समर्थः पदवि-धिरिति सूत्रस्थः समर्थशब्द एकार्थीभावलक्षणसामर्थ्यविशिष्टपर इत्यत आह। सामर्थ्यञ्चेति। तन्निमित्तमित्यत्र तच्छब्दो बुद्धिस्थस्य परामर्शकस्स च क इत्याका-ङ्क्षायामाह। आमन्त्रितार्थप्रतीति। तन्निमित्तमित्यत्र निमित्तत्वञ्च कारणत्व-म्। आमन्त्रितशब्दजन्यप्रतीति विशेष्यनिरूपितकारकत्वस्य मद्राणां राजन्नि-त्यत्र मद्रपदार्थे विरहात्। किन्त्वामन्त्रितार्थघटकार्थनिरूपितनिरूपकत्वजन-कत्वान्यतररूपम्। अत एव। तन्निमित्तग्रहणादेव। षष्ठ्यामन्त्रितकारकवचने हि गोष्वित्यस्य द्वैविध्याभावेन पराङ्गवद्भावो न स्यात्। न च षष्ठीशब्दस्य तद-र्थकविभक्तिपरत्वम्प्रागभिहितन्तत एवेष्टसिद्धिरिति वाच्यम्। तस्य मतान्तरा-भिप्रायकत्वात्। अत एवाहुरित्युक्तम्प्राक् प्रकृतसूत्रभाष्ये समर्थपदानुवृत्तिर्य-द्यपि न प्रदर्शिता तथापि सुबिति किम्। करोष्यटन्। नैतदस्ति। असामर्थ्या-दत्र न भविष्यति। कथमसामर्थ्यम्। समानाधिकरणमसमर्थवद्भवति। इदन्त-र्हि। पीड्ये पीड्यमानेति। इदञ्चाप्युदाहरणम्। करोष्यटन्। ननु चोक्तं समा-नाधिकरणमसमर्थवद्भवतीति। नैष दोषः। अधात्वभिहितमित्येवन्तदिति वा-चनिकमप्यसामर्थ्यम्प्रकृते नास्तीति उपक्रमे प्रतिपादितन्तेन प्रकृतसूत्रे सम-र्थपदानुवृत्तिः प्रदर्शितेति भ्रमेण केश्चित्समर्थपदानुवृत्त्या अयमग्ने जरिता। एतेनाग्ने ब्रह्मणेत्यत्रातिप्रसङ्गो नेत्युक्तन्तदेवात्र मूलकारेणापि प्रदर्शितम्। परन्तु समर्थपदानुवृत्तिर्न भाष्यसम्मता। समर्थपदस्यैकार्थीभावात्मकसामर्थ्य-विशिष्टार्थकत्वस्य व्यवस्थापनात्। परशुनावृश्चन्नित्यत्र पराङ्गवद्भावस्य प्रवृत्तेः प्रदर्शनाच्च। न च समर्थपदाननुवृत्तौ ऋतेन मित्रावरुणावृतावृधावृतस्पृशेत्या-दौ पराङ्गवद्भावापत्तिः। अत्र हि मित्रावरुणावित्यामन्त्रितम्। ऋतेनेत्येतच्च

SGDF
Sri Gargeshwari Digital Foundation

यदि पराङ्गवत् स्यात्तदा ऋतेनेत्यस्याद्युदात्तत्वापत्तिः स्यात् । समर्थपदानुवृत्तौ तु ऋतेनेत्येतन्न मित्रावरुणावित्यनेन समर्थम् [ऋतेनेत्यस्य] मित्रावरुणावित्यस्य च तस्यामृचि यदा न शाधि इत्यर्थकमाशाधि इति पदन्तदर्थेनान्वयेन परस्परमनन्वयात् । समर्थपदश्चेह शब्दाधिकारेण व्यपेक्षाविशिष्टार्थकम्भविष्यतीति वाच्यम् । षष्ठ्यामन्त्रितकारकवचनमिति परिगणनम्प्रदर्श्य तन्निमित्तग्रहणं वेत्युक्तन्तेनैव ऋतेनेत्यत्र पराङ्गवद्भावस्य वारणसम्भवात् । अत एव भाष्ये सुवन्तमात्रस्य पराङ्गवद्भावे चत्त्रे णाग्ने स्वायुः संरभस्व। स्वामित्रे णाग्ने सिन्नधेये यतस्वेत्यत्रपराङ्गवद्भावापत्तिरित्येतदर्थम्परिगणनन्तन्निमित्तग्रहणं वा कर्त्तव्यमित्यभिधाय किम्पुनरत्र ज्यायः तन्निमित्तग्रहणमेव ज्यायः इदमपि सिद्धम्भवति गोषुस्वामिन् प्रशुषुस्वामिन्।एतद्धि नैव षष्ठ्यन्तन्नाप्यामन्त्रितकारकमित्येवोक्तन्न तु समर्थपदानुवृत्तिर्दर्शिता यदि समर्थपदानुवृत्तिरभिप्रेता स्यात्तदा भाष्यासङ्गतिः स्पष्टैव चत्त्रेणाग्न इत्यादौ परस्परव्यपेक्षाया विरहात् । यत्तु कैयटेन परस्परसामर्थ्याभावेऽपि क्रियाद्वारकं सामर्थ्यमस्तीत्युक्तन्तत्तु न युक्तम् । स्वार्थपर्यवसायिनामाकाङ्क्षावशात्परस्परमसम्बन्धस्यैव व्यपेक्षापदार्थत्वात् । निरूपितमिति । एवमेव तत्र निरूपितमित्यर्थः । प्रकृतसूत्रस्य स्वरग्रहणस्य प्रयोजनमाह । स्वर इत्युक्तेरिति । कूप इत्यस्य पराङ्गवद्भावे तु सिद्धन्नित्येतदवयवसकारस्य पदादित्वाभावापत्तौ सात्पदाद्योरिति षत्वस्य प्रतिषेधो न स्यात् । आदिपदेन चर्मनमन्नित्यस्य परिग्रहः । अत्र पराङ्गवद्भावे चर्मनमन्नित्यखण्डपदत्वात्तमितिनमन्निति नकारस्य णत्वप्रसङ्गः । पूर्वस्य पराङ्गवद्भावविधानेन पूर्वस्यैव परसम्बन्धिकार्यप्रवृत्तिफलकोऽयमतिदेश इत्यभिप्रायेणाशङ्कते न चेति । परप्रयुक्तेति । परसत्ता प्रयोज्येत्यर्थः । तच्च परनिष्ठमाद्युदात्तत्वम् । अयम्भावः। पूर्वस्य पराङ्गवद्भावात्पूर्वसंहितस्य तत्कार्यम्भवतु पराद्यावयवनिष्ठं यत्पदादित्वन्तत्तु न निवार्यतेति । पूर्वनिष्ठकार्यप्रवृत्ताविति । अखण्डपदावयवत्वप्रयुक्तणत्वस्य प्रवृत्तावित्यर्थः । तन्निष्ठेति । परनिष्ठेत्यर्थः । अस्य निवृत्तावन्वयः । स्वाश्रयो यस्य पदत्वस्य तस्य निवृत्ताविति यावत् । अखण्डपदत्वाभावेनेति । परावयवे निमित्तानधिकरणनिमित्तिमत्पदावयवत्वबुद्धिस्तु नकारस्यादेवेति भावः । प्रत्याख्यातत्वं नेति । तत्र हि स्वरेऽवधारणं सुबलोपार्थम्परश्चना वृश्चन्।

SGDF Sri Gargeshwari Digital Foundation

अत्र सुपो लोपो मा भूदित्यादौ प्रयोजनमभिहितम् । ततः सुबन्तकार्य एव पराङ्गवद्भावो विधीयते न तु प्रातिपदिककार्य इत्यभिप्रायेण न वा सुबन्तैकान्तत्वात् । न वा कर्त्तव्यम् । किङ्कारणम् । सुबन्तैकान्तः परादिवद्भावो भवतीत्यनेन पूर्वोक्तप्रयोजनान्यथासिद्धिरुद्भाविता । उक्तञ्च कैयटेन । सुबन्तैकान्तः सुबन्तावयवः पराङ्गवद्भावविषयत्वात्पराङ्गवद्भाव उच्यते । पराङ्गवदित्यामन्त्रितसन्निधानात्परशब्देन गृह्यते तच्च सुबन्तमेवेति सुबन्तकार्य एव पराङ्गवद्भावो ऽन्तरङ्गत्वान्न तु प्रातिपदिककार्य इत्यर्थः । अङ्गग्रहणमिति । परवदित्युक्तौ पूर्वस्य यत्कार्यम्परस्य भवति तस्यातिदेशः स्यात्तदोभयोरादुदात्तत्वमामन्त्रितस्येत्यनेन स्यात् । अङ्गशब्दोपादाने तु पूर्वस्मिन् परामन्त्रितावयवत्वातिदेशे पूर्वपरघटितसमुदायस्यैकपरिमाणकत्वबुद्धौ तादृशसमुदायाद्यावयवस्योदात्तत्वे तदेकवाक्यतापन्नशेषनिघातेनान्यस्य सर्वस्य तदवयवस्यानुदात्तत्वम्भवतीति भावः । पूर्वाङ्गवदित्यस्यामन्त्रिते परे सुबन्तं यस्य कस्य चिदङ्गवदिति भ्रमवारणायाह । सुबन्तमिति । पूर्वाङ्गवदित्यत्र पूर्वशब्दोपादानेन प्रत्यासत्त्याऽऽमन्त्रिते इत्यध्याहृतस्य पूर्वस्मिन्नित्यस्य समानाधिकरणमिति भावः । अनुवादेऽपि षष्ठीस्थान इति परिभाषा प्रवृत्तिः सम्प्रदायसिद्धेत्याह । इदमत्रैवेति । परः । द्वितीयोऽभिशब्दः । निघातो नेति । तथा चाशाशब्दे द्वयोः स्वरितोदात्तयोः श्रवणम्भवति । स्थानिन्येव । अनुदात्त एव । पदसंस्कारपक्षमादायशङ्कते । न च प्रगृह्यसंज्ञासूत्र इति । भाष्यकैयटरीत्येति अग्नी इत्यत्र यथा पूर्वं प्लुतेऽपि प्रगृह्यसंज्ञाया यथोद्देशत्वेन त्रिमात्रे द्विमात्रोऽयमिति बुध्या प्रगृह्यसंज्ञा प्रवर्त्तते तद्वत् । अन्तरङ्गत्वात् । स्वनिमित्तसद्भावेन योग्यप्रवृत्तिकत्वात् । तथा वक्ष्यमशक्यत्वादिति । यणादेशात्पूर्वं स्वरितप्रवृत्तेर्वक्तुमशक्यत्वात् । आश्रयात्सिद्धत्वमिति । यणादेशे कर्त्तव्ये स्वरितः सिद्धो भवतीति वचनकल्पनेनेति शेषः । अतिप्रसङ्गमेवोपपादयति । उदात्तादिति । प्रत्यग्निरिति । अत्र हि प्रतिशब्दस्य निपातत्वादादुदात्तत्वे शेषनिघातेनानुदात्तस्येकारस्य यणादेशात्पूर्वमुदात्तादनुदात्तस्येति स्वरितत्वापत्तौ तस्य यो यण् तमादायाग्निशब्दावयवाकारस्य स्वरितत्वापत्तिरित्यर्थः । इति निषेध इति । उदात्तो य इकारस्तस्मिन्स्वरितस्य निषेध इत्यर्थः । अन्यथा । अनन्तरस्येति न्यायानङ्गीकारे ।

SGDF
Sri Gargeshwari Digital Foundation

अत एव। अनन्तरस्येति न्यायाङ्गीकारादेव । पूर्वसूत्रम्। विभक्तमुदात्तयण इति सूत्रम्। एतदनुवर्त्तमानम्प्रकृतिभूतन्तादृशानुपूर्वीकशब्दपरम्। स्वरितशब्दस्यार्थे तद्विशेषणम् स्वघटितसूत्रनिष्पाद्यत्वं षष्ठ्यर्थः। लाघवेनाह। यद्वेति। स्वरविधाविति। स्वरोद्देश्यके विधावित्यर्थः। एवम्। स्वरितग्रहणाभावे। त्यशब्दाकारस्य स्वरितत्वमुपपादयति। तत्र हीत्यादिना । स्थानिवद्भावादिति। पञ्चमीसमासेनेत्यादिः । तन्निषेधात्। स्थानिवद्भावनिषेधात्। एतेन। उक्तरीत्या स्थानिवद्भावनिषेधेन। प्रतिपदोक्तस्यैवेति। भाष्ये सौत्रपदानामेव लोपेऽपि प्रकृत इति रीत्या तेषामेव योजनया तादृशवचनस्य व्युत्पादनेन सूत्रपठिततादृशशब्देन यो निषेधस्तस्यैवेत्यर्थः। अनुदात्तमिति । अनुदात्तं सर्वमपादादावित्यधिकारादनुदात्तमित्यर्थः। अनुदात्तः। आन्तरतम्यादिति शेषः। वृत्ताविति। वृत्तिग्रन्थ इत्यर्थः। असिद्धापत्तेरिति। अत्र हि स्वरितोदात्तस्थानिकस्यैवादेशस्योदात्तस्य श्रुतिः प्रामाणिकीति भावः। आहुरित्यस्वरसवीजम्प्रकटयन् सिद्धान्तमाह। वस्तुत इत्यादिना । भाष्यादितोऽपीत्यपिना वृत्तेः परिग्रहः। स्वरितान्तेन। यत्प्रत्ययान्तत्वेन स्वरितत्वस्य तत्र सत्त्वात्। उदात्तस्य। निपातत्वादुदात्तस्य। इत्युक्तमिति। यदि प्रकृतसूत्रेऽनुदात्तस्येत्यस्यानुवृत्तिर्नाभिप्रेता स्यात्तदाऽनेनैव प्रथममुदात्तो भविष्यतीति स्वरिताभावेन तत्सूत्रस्य प्राप्तिरव नस्यात्तदनुवृत्तौ तु स्वरितोदात्तयोरेकादेशस्य नानेनोदात्तत्वमिति आन्तरतम्यात्स्वरितत्वम्। एवमेव क्वाचरमित्यत्रापि स्वरितोदात्तयोरेकादेश आन्तरतम्यात्स्वरितो भविष्यतीति भावः । स्वोक्तार्थे प्रातिशाख्यसम्मतिमाह। तथा चेति। अत्र उदात्तवत्येकी भावे उदात्तं सन्ध्यमक्षरमित्येकं वाक्यम्। अनुदात्तोदये पुनः स्वरितं स्वरितोपध इति द्वितीयम्। प्रातिशाख्यस्थप्रथमवाक्यं व्याचष्टे। यस्मिन्नित्यादिना ज्ञातव्यमित्यन्तेन। प्रातिशाख्ये सन्ध्यमक्षरमित्युक्तमतः सन्धीयमानमक्षरमित्यर्थोऽभिप्रेतो न तु शास्त्रान्तरे एचां सन्ध्यक्षरेति संज्ञा क्रियते तेषामेवेह ग्रहणमिति । द्वितीयं व्याचष्टे स्वरितोपध इति। उपधाशब्दः पूर्ववाची। उदयशब्दश्च परस्य वाचकः। एवञ्च यत्र स्वरिते पूर्वस्मिन् अनुदात्ते परस्मिन् स्थिते एकादेशो भवति तत्र सन्धीयमानमक्षरं स्वरितत्वं प्राप्नोतीत्यर्थः फलितः। मित्युदाहरणमिति । अस्मिन्वाक्ये

SGDF
Sri Gurgeshwari Digital Foundation

मधूदकमित्युदाहरणमित्यर्थः । मधुमिश्रमुदकमित्यर्थे मधुशब्दोदकशब्दयोः समासे उदकेऽकेवले इति सूत्रेणाकेवलं मिश्रन्तद्वाचिनि समासे उदकशब्दे परे पूर्वमन्तोदात्तमित्यर्थकेन पूर्वपदान्तोदात्ते कृते तत एकादेश सन्ध्यक्षरस्य ऊकारस्योदात्तत्वम्भवतीति प्रथमवाक्यस्यैतदुदाहरणमुक्तम् । द्वितीयवाक्यस्य तु न प्राप्तिः पूर्वस्य स्वरितत्वाभावात् । क्वावरमित्यत्रापि प्रथमवाक्ये नोदात्तत्वम् । न तु प्रकृतसूत्रेणेति छान्दसत्वादिति यदुक्तन्तदेतत्प्रातिशाख्यैकवाक्यतया प्रामाणिकमेव । शौनकीयप्रातिशाख्येऽपीति । उक्तमिति शेषः । प्रातिशाख्यद्वयरीत्या क्वावरमित्यत्र क्वाशब्दाकारस्योदात्तत्वम् प्राप्नोतीत्यतश्छान्दसत्वमेव कल्पनीयम् । लोके तु स्वरितोदात्तयोरादेश आन्तरतम्यात्स्वरित एव । तदाह लोके त्विति । युक्तमाभातीति । उक्तप्रातिशाख्यसम्वादादुग्रहत्वम् । किञ्च उदात्तस्वरितयोरिति सूत्रानन्तरं सूत्रकृता एकादेश उदात्ते नेति सूत्रम्पठितत्वेनात्रानुदात्तपदानुवृत्तिरभिप्रेता । भाष्येऽपि स्वरितो वेति सूत्रे उदात्तानुदात्तयोरेकादेशस्तस्यैकादेश उदात्ते नोदात्त इत्येतद्भवतीत्युक्तन्तेनानुदात्तपदानुवृत्तिः सूचितैव । अयमिति । एकादेश उदात्ते नेति विधीयमान इत्यर्थः । भाष्ये स्पष्टमिति । तत्र हि वृचे इदम् । वृचे इदमित्यादौ वाक्यसंस्कारपक्षेऽपि पूर्वोपस्थितनिमित्तके एकादेशे कृत एव । यादेशः प्राप्नोति सोऽसिद्धत्वे उदात्तानुदात्तस्थानिकत्वे नोभयान्तरतमः स्वरितः प्राप्तस्स मा भूदित्येवमर्थमेकादेशस्वरोऽन्तरङ्गः सिद्धो वक्तव्यः । आन्तर्यत उदात्तस्योदात्तोऽयादेशो यथा स्यादित्युक्तम् । प्रपचतीतीत्यादाविति । अत्र पचतीत्यस्य तिङ्ङतिङ इति निघाते निपातत्वादाद्युदात्ते इति शब्दे परे य एकादेशस्तत्स्थानिकोदात्तत्वस्यासिद्धत्वम्भवत्येव पदद्वयसम्बन्धिवर्णावाश्रित्य जायमानो य एकादेशस्तस्य वहिरङ्गतया तत् स्थानिकैकादेशस्यापि वहिरङ्गत्वादिति भावः । इति न प्रवर्त्तते । अनेन गतेर्निघातो न भवतीत्यर्थः । निघातो नेति । यदि पूर्वमेकादेशस्वरः स्यात्तदा तीत्यस्योदात्तत्वे कृते पश्चात्पूर्वान्तवद्भावेन तिङ्ङतिङ इति निघातः स्यात् । प्रयोजनान्तराणीति । यथा गाङ्गेऽनूप इत्यत्रैकारस्योदात्तस्यैकादेश उदात्तेनेत्यनेन कृतस्यानूपशब्दे न य एकादेशस्तस्य स्वरितो वेत्यनेन स्वरितत्वम्भवति विकल्पेन पक्षे तूदात्तः । असिद्धत्वे आन्तरतम्यात्स्वरित

SGDF
Sri Gargeshwari Digital Foundation

एव स्यात्। तथा तुदतीइत्यत्र तास्यनुदात्तेदिति शतुरनुदात्तत्वे कृते उदात्ते नश्प्रत्ययाकारेण य एकादेशस्तस्यैकादेश उदात्तेनेत्यनेन जातस्य सिद्धत्वाच्छतुरनुमो नद्यजादी इत्यन्तोदात्तादित्यं षस्वरो भवति। तथा तुदन्ति लिखन्तीत्यत्रैकादेशस्योदात्तस्य सिद्धत्वे सति तेन वर्ज्यमानता भवतीति। वीदमित्यत्रानुदात्तादिपरत्वमुपपादयति। इदम्शब्द इति। उदात्तेति। दिव्शब्दात्परत्वात्। व्यवस्थितविभाषात्वादिति यदुक्तन्तदुपपादयति मूले इकारेत्यादिना। तदर्थमाह। कृस्व इति। अत एव। वेद एवेति नियमस्वीकारादेव। उक्तञ्चेत्यनेन यदुक्तन्तच्छाकल्यस्य मतेनेत्याह। अविशेषेणेत्यादिना। स्रुचीवघृतमिति। अत्र स्रुचि शब्दोऽन्तोदात्तस्तदवयवेकारेण सहैकादेशे स्वरितः। योजान्विन्द्रते हरी। अत्र हरीत्यत्र प्रथमयोरिति पूर्वसवर्णस्य स्वरितत्वम्। ते वर्धन्तस्वनवस इति। तिङ्ङतिङ इति निघाते ते शब्देन सहैकादेशस्य स्वरितत्वम्। अनुदात्तो य उकारोऽकारस्तस्य रूपम् पूर्वरूपमित्यर्थः। अत्र स्वरितत्वम्पाणिनीयेन स्वरितो वेति सूत्रेणापि सिद्ध्यति। पूर्वोदाहरणयोस्तु एकादेश उदात्तेनेत्युदात्ते प्राप्ते स्वरितत्वं विशिष्य शाकल्यस्य मतेन विधीयत इत्यविशेषेणेत्युक्तम्। यदुक्तम्पूर्वत्रैकारयोरित्यादिना तद्घटकसंज्ञानां संज्ञी क इत्याकाङ्क्षानुत्थानायाह। कृस्वदयेत्यादिना। व्यवस्थितविभाषास्वस्याः परिगणनाभावात्तथा त्वकथनञ्च युक्तमित्यभिप्रायेणाह। वस्तुतस्त्विति। स्वरितप्रसङ्गेनाह। उदात्तादनुदात्तस्य स्वरितः। संहितायामिति वर्त्तत इति। अत्र संहिताशब्दो न वेदपरः। किन्तु परः सन्निकर्ष इति सूत्रबोध्या या तत्परः। अग्निमील इत्यस्याव्यवधानेनोच्चारणेऽग्निमितीकारादुदात्तात्परस्य ईल इतीकारस्य स्वरितत्वम्। ईड्धातोर्लटि उत्तमपुरुषैकवचने तिङ्ङतिङ इति निघातः। ढयोश्चास्येति वक्ष्यमाणेन डकारस्य लकारः। स्वरोदेश्यकविधित्वेन मकारस्याविद्यवद्भावेनोदात्तात्परत्वम्। तमीशानास इत्यत्र शधातोः शानचि सत्यन्तोदात्त ईशानशब्दस्तस्माज्जसः सुप्त्वातनुदात्तत्वेऽनेन स्वरितत्वम्। आज्जसेरसुगित्यसुगागमः। नोदात्तस्वरितोदय। उदात्तादिपरमेवेति। स्वरितमिति शेषः। अन्तोदात्तमिति। ये इत्येकारादुदात्तात्परस्याकारस्याऽनुदात्तस्य स्वरितत्वे प्राप्तेऽनेन निषेधः। आद्युदात्त इति। कत्रन्तत्वादित्यादिः। तस्मादादेरकारा-

SGDF
Sri Gargeshwari Digital Foundation

तस्यानुदात्तस्य स्वरितत्वे प्राप्ते निषेधः । विरोधसङ्गत्याह । एकश्रुतिदूरात् । एकवचनं सम्बुद्धावित्येकवचनान्तस्यैव सम्बुद्धिसंज्ञाविधानादाह । सम्बुद्धिग्रहणमिति । एकश्रुतिशब्दस्य वाच्यार्थमाह । स्वराणामिति । भेदेन । पृथक्त्वेन । स्वरिताद्भेद इति । स्वरिते हि तस्मादित इत्यादेरुदात्तत्वसिद्ध तु नेति विवेकः । तयोः । उच्चनीचयोः । वचनसामर्थ्यादिति । गुरोरनृत इति प्लुतोदात्तत्वविधानबलादित्यर्थः । तदा चोभयोरिति । यदा प्लुतोदात्तत्वन्तदोदात्तैकश्रुत्योरित्यर्थः । यज्ञकर्मण्यजप । यज्ञकर्मेत्यत्र कर्मशब्दः क्रियापर इत्याशयेनाह । यज्ञक्रमे चेति । यजति नोदनेति । यज्धातुघटिता या नोदना विधिवाक्यन्तद्बोधितकर्मेत्यर्थः । अतस्त्वम् । अमन्त्रत्वम् । ननु समाग्न इति मन्त्रस्यैकश्रुत्या कर्मविशेषे हविरभिमर्शने पठनस्य सम्प्रदायसिद्धत्वात्करणत्वेन कथमेतत्प्रत्युदाहरणमत आह । यद्यपीति । एष्विति । समाग्न इति मन्त्रघटकपदेष्वित्यर्थः । वैयर्थ्यापत्तेरिति । एवञ्च नञुच्चारणसामर्थ्याद्विकल्पस्याप्यप्रवृत्तिरिति भावः । पर्युदासे जपपर्युदासान्मन्त्रेष्वेवैषा एकश्रुतिः । प्रसज्यप्रतिषेधे तु तादृशनियमालाभ इति विचिन्त्य शङ्कते । न चेति । पूर्वसूत्रस्य । यज्ञकर्मणीत्यस्य । प्रसज्यप्रतिषेधे तस्य यज्ञक्रियापठितवाक्यसामान्यविषयकत्वादिति भावः । छन्दस्त्वस्य मन्त्रब्राह्मणान्यतरत्वरूपतया विकल्पस्य ब्राह्मणे चारितार्थ्यन्द्रष्टव्यम् । सामर्थ्यादिति । यज्ञे इत्येव पठनीयम् । एकश्रुतेः शब्दधर्मत्वाद्वाक्यत्वसामानाधिकरण्येन प्रवृत्तिसिद्धौ कर्मग्रहणमतिरिच्यमानमुद्देश्यतावच्छेदकव्यापकप्रवृत्तिकत्वलाभार्थमिति भावः । अत एव । पर्युदासबलेन मन्त्रेष्वेव यज्ञकर्मणीत्यस्य प्रवृत्तिस्वीकारादेव । अब्रवीदिति । एतेनोहितत्वमस्तीति ध्वनितम् । तद्भाष्यम् । शतपथब्राह्मणभाष्यम् । अत एव । ऊहितस्यामन्त्रतया तत्रैकश्रुत्यभावादेव । एतेन उक्तभाष्यविरोधेन । अस्य । यज्ञकर्मणीत्यस्य । अत एव । व्यवस्थितविभाषात्वस्वीकारादेव । अत एव । उक्तार्थसत्त्वादेव । अच्छन्दसि । अमन्त्रे ब्राह्मण इति यावत् । चरितार्थेनेति शेषः । ऊहेषु । यत्किञ्चिदूहितेषु । अस्य मन्त्रावयवत्वमुपपादितम् । पूर्वसूत्रस्य चारितार्थ्यन्तु यत्र न किञ्चिदप्यूहस्तस्मिन्मन्त्रे । केचित्तु विभाषा छन्दसीत्यस्मिन् सूत्रे विभाषापदानन्तरमकारस्य प्रश्लेषेणायं ग्रन्थो योजनीयः । प्रश्लेषसूचनाय वैपरीत्येन लेख इति

SGDF
Sri Gargeshwari Digital Foundation

योजयन्ति अत्र विभाषा छन्दसीत्यत्र तन्त्रस्वीकारेणाच्छन्दसीत्यपि विवक्षितमत एवैतस्य पूर्वत्र सत्त्वेऽपि विभाषापदोपादानम् । इदमेवमतं युक्तमित्युत्तरत्र व्यक्तो भविष्यति । अत एव । अस्य विभाषाच्छन्दसीत्वे तदपवादत्वादेव। यथा स्नातम् । यथा शास्त्रम् । सूत्रस्थमिति । कात्यायनसूत्रस्थमित्यर्थः । याजमानमन्त्राणाम् । यजमानपठ्यमानमन्त्राणाम् । कल्पसूत्रेति । कात्यायनसूत्रमित्यर्थः । धर्माधिक्यमिति । एतेन दूषणन्त्वैस्वर्येणोच्चारणे नास्ति तथापि धर्माधिक्यकामनया एकश्रुत्योच्चारणेऽपि नच्चार्तिरिति सूचितम् । धर्माधिक्यभावानुष्ठानेन प्रसङ्गाद्वैकल्पिकत्वेऽव्यवस्थां वारयति । वैकल्पिकेष्वादित इति । आदित इत्यत्रादिशब्दात्सप्तम्यन्तात्तसिः । अन्यतरोक्तेस्व इति । त्रैस्वर्येण मन्त्रानुच्चार्येति वा एकश्रुत्या मन्त्रानुच्चार्येति वा उक्तेस्वः कार्यः । तद्विशिष्टेति । आधेयतासम्बन्धेनोर्ध्वदेशविशिष्टेत्यर्थः । अस्य भवनक्रियायामन्वयः । व्याख्यानादिति । तुल्यार्थत्वमूलकव्याख्यानादित्यर्थः । द्वावपि हि देवतासम्प्रदानस्य द्योतकौ । नचैवम्प्रतिपत्तिलाघवाय वौषडित्येव कुतो नोक्तमिति वाच्यम् । मात्रागौरवप्रसङ्गात् । ननु वौषट्शब्दादेर्ब्रूहिप्रेष्येत्यनेन प्लुतोदात्तत्वं विधीयत इति कथमनेन तस्योदात्ततरत्वविधानमत आह । तत्रौकारस्येति । तदपेक्षया । पूर्वोदात्तापेक्षया । सजातीयापेक्षया प्रकर्ष इति तद्भावः । न व्यदतमाह । अन्ये त्विति । याज्यावाक्ये याज्यान्त इत्यनेनान्त्यस्य प्लुतविधानादादेस्त्वैकश्रुतिर्भवति तदपेक्षयायम्प्रकर्षः । वौषट्शब्दे तु याज्यावाक्ये ब्रूहिप्रेष्येत्यनेनादेः प्लुतो भवति । एकश्रुतिश्च यज्ञकर्मणीत्यनेन तस्य वाक्यस्य भवति तद्वद्वौषट्शब्दे उच्चैस्तरामित्यनेन पक्षे उदात्ततरत्वम्पक्षे एकश्रुतिश्च भवति । तदेकश्रुत्यपेक्षया प्रकर्षः । भाष्यस्वरस इति । इकश्रुतिदूरादिति सूत्रभाष्यस्वरस्य इत्यर्थः । तत्र हि किमियमेकश्रुतिरुदात्ता आहोस्विदनुदात्तेति विचार्य उदात्ता । कथं ज्ञायते यदयमुच्चैस्तरां वा वषट्कार इत्याह। कथं ज्ञापकम्। तन्त्रान्तरनिर्देशः। उच्चैर्दृष्ट्वा उच्चैस्तरामित्येतद्भवतीत्युक्तम्। उत्तरश्च वौयटेन । सोमस्याग्ने वीहीवौषडित्यत्र मन्त्रे यज्ञकर्मणीत्यनेनैकश्रुतिर्विहिता तदपेक्षया वौषट्शब्दस्योदात्ततरत्वं विधीयते, सति चैकश्रुतेरुदात्तानुरागे तदपेक्षः प्रकर्षो युज्यत इति । अस्योदात्तस्य इति । तस्यादित उदात्तमर्द्धह्रस्वमि-

SGDF
Sri Gurgeshwari Digital Foundation

त्यारभ्योदात्तस्वरितपरस्य सन्नतर इत्यस्या या नञसूची सोदात्तादनुदात्तस्य स्वरित इत्यस्मात्परा कर्त्तव्या इत्युक्तमस्य तद्घटकतयाऽसिद्धत्वभवत्वे वेति भावः। तत्फलन्तु इमम्मे गङ्गे यमुन इतिमन्त्रे उदात्तादिममित्यकारात्परस्य मे इत्यनुदात्तस्योदात्तादनुदात्तस्येति स्वरितत्वे सति ततः परासामनुदात्तानामनेनैकश्रुतिसिद्धिः। अन्यथा यः सिद्धः स्वरितस्ततः परासाङ्कार्यन्देवदत्त यज्ञदत्त इत्यादौ तिस्वरितमिति विषय एव स्यात्। एवञ्च सुब्रह्मण्यायामिति सुब्रह्मण्योमिन्द्रागच्छेत्यादावेव स्यात्। अत्र ज्ञापकस्तु देवब्रह्मणोरनुदात्त इत्यनेन स्वरितस्यानुदात्तविधानमिति भाष्ये उक्तम्। पक्षे। उच्चैस्तरामिति सूत्रप्रवृत्त्यभावपक्षे। अत एव। आवृत्त्या अर्थद्वयस्याभिप्रेतत्वादेव। वेति इत्यस्यार्थद्वयपरत्वं यथा सूत्रभेदस्तथोपपादयति। तत्र वेतीति। इत्यनेनेति। अन्तोदात्तमिति शेषः। कुसशब्दोऽन्तोदात्तः फिट्सूत्रेण। शब्दोऽपीति। अन्तोदात्त इति शेषः। अत एव। उक्तोऽर्थः। सूत्रसर्वनामेति। अत्र सर्वनामशब्दस्तत्सदृशे वर्त्तते। सूत्रेषु सर्वनामेत्यर्थः। यथा सर्वनाम्नः सर्वपदार्थपरामर्शार्थम्प्रयोगस्तथा ...था एकश्रुतेरपि सर्वत्र प्रयोगः। अत एव। भाषायामप्येकश्रुतिसत्त्वादेव। अत एव। उक्तोऽर्थः। भाषायामेकश्रुतिस्वीकारे शङ्कते। किमर्थमिति। एतेन। उक्तप्रकारेण। सूत्रोक्तं व्यवस्थितविभाषात्वं खण्डयति। परे त्विति। स्वोक्तार्थे भाष्यान्तरसम्मतिमप्याह। एकश्रुतिरिति। ते तेऽन्यथेति। के चन...चे सूत्रेण के चनैकश्रुत्या। अदोषादिति। स्वरदोषेण इन्द्र एव शातायितसम्पन्न इति यज्ञादावभिहितस्तदसङ्गतिरूपो दोषो नेत्यर्थः। यज्ञकर्मणीत्यस्यापीति। अनेनापि विना व्यवस्थितविभाषाया अप्रामाणिकत्व सूचनं चैव निवेदितं स्वरितस्य तूदात्त इति ज्ञापकेन चैकश्रुत्यभावकल्पनापेक्षया नेत्युपादानेन साक्षान्निषेधस्वीकार एव योग्य इति सूचितम्। प्रकृतसूत्रे यज्ञकर्मणीत्यनुवर्त्तत इति वादिनो मतमाह। के चित्तु यज्ञेति। स्वरितस्य तूदात्त इति ज्ञापकादेव तदभावे सिद्धे नेति व्यर्थमत आह। नेति त्विति। इति वदन्तीति। प्राचीनानुसारिण इति शेषः। अत एव। विपाशामस्य काण्डस्योत्कर्षादेव। तयोरपि। उदात्तयोरपि। के चित्तु न सुनेत्यत्र नेति योगविभागेन स चिदन्यापाप्यसिद्धत्वस्य स्वार्थकेन वार्त्तिकाद्यामसिद्धत्वाभावः कस्मात् इत्याहुः। तन्न। योगविभागस्य भाष्यानारूढ-

SGDF
Sri Gangeshwari Digital Foundation

ढत्वात्। देवब्रह्मणोः। इदम्पूर्वसूत्रैकदेशस्य स्वरितस्य तूदात्त इत्यस्यापवादः। अत एवाह। सुब्रह्मण्येति। अत एव। अस्य वैकल्पिकत्वादेव। उभयत्रामन्त्रितात् द्युदात्तत्वे शेषनिघाते चोदात्तादनुदात्तस्य स्वरितः तस्यानेनानुदात्तः। ब्रह्माण इत्यस्याष्टमिकोनिघातस्तु न। आमन्त्रितम्पूर्वमविद्यमानवदिति देवा इत्यस्या- विद्यमानवद्भावे सति पदात्परत्वाभावात्। एषा च कल्पना देवा ब्रह्माण इ- त्यनयोर्वैयधिकरण्यवादिमतेन। अन्ये तु द्वावपि समानाधिकरणावेव। तन्म- ते विभाषितं विशेषवचने बहुवचनमिति देवा इत्यस्य विकल्पे नाविद्यमानव- त्त्वात्पक्षे आष्टमिको निघातो भवत्येव। प्रकृतसूत्रेण स्वरितस्य निघातस्तु देवा। इत्यत्र वकारस्य नित्यः। एतदेवाभिप्रेत्य भाष्ये देवब्रह्मणोरनुदात्तत्वमिक इत्युक्तम्। स्वरितात्संहितायामनुदात्तानाम्। नाग्निमीळे इत्यादीति। अत्र ईळे इत्यस्य तिङ्ङतिङ इतिनिघातेऽग्निमित्युदात्तात्परस्यैकारस्यानुदात्तस्य स्वरितत्वे ततः परस्यैकस्य ळे इत्यस्याप्यनेनैकश्रुतिसिद्धिः। नन्वेवमेकवचनेन निर्देशे कर्त्तव्ये बहुवचनोपादानमनर्थकमत आह। बहुवचन इति। अनेक- त्व इति। इमं मे गङ्गे यमुने सरस्वति शुतुद्रीत्यत्र यथा। सङ्घातः कार्यीति समुदायः कार्यीत्यर्थः। अस्मिन्नर्थे ज्ञापकञ्चौ क्रौ भृङ्ग्वुमदेति सूत्रे व्यक्ती भविष्य- ति। अन्यत्रेति। फलमन्यत्र संहिताविषयविहितकार्यातिरिक्त इत्यतोऽन्यत्रे- त्युक्तम्। ज्ञाप्यन्तु पञ्चमीनिर्देश इत्याद्येव। मे शब्दोऽनुदात्तः। अनुदात्तं स- र्वमपादादावित्यधिकारात्। क्व वः सुम्न इति। क्वशब्दस्याप्रत्ययान्तत्वे न तित् स्वरितमिति स्वरितत्वम्। निर्देशिनत्वादिति। अत्र ज्ञापकम्प्राग्वर्णितम्। अत ए- व। नत्र सूत्रा उक्तत्वादेव। उदात्तस्वरित। प्रकृतसूत्रे सन्नतरेत्युपादानात्स- न्निहितानुदात्तापेक्षयाऽस्यैकश्रुतौ वैलक्षण्यं स्यादिति शङ्कावारणायाह। एकश्रु- तीत्यादि। न कश्चिदिति। पक्षद्वयैकरूप्यायैवमेव कल्प्यत इति भावः। सप्त- स्वरगणनेति। एकश्रुतिदूरादिति सूत्रभाष्ये कृता या सप्तस्वरगणना तस्यामि- त्यर्थः। उदात्तः। उदात्ततरः। अनुदात्तः। अनुदात्ततरः। स्वरितः। स्वरिते य उदात्तः सोऽन्येन विशिष्टः। एकश्रुतिः सप्तम इति हि तत्रोक्तम्। अनुदात्तस्य तद्विधानमिति। अनुदात्ततरविधानमित्यर्थः। एकश्रुतीति पूर्वसूत्रादेकश्रुतिप- दमप्रकृतसूत्रेऽनुवर्त्य तस्य षष्ठ्यन्तत्वकल्पनयाऽनेन तस्याः स्थानेऽनुदात्ततरवि-

धातोर्मिति वादिमतं निरस्यति । यत्त्विति । मानाभावादिति । भाष्यानुक्तत्वे न तादृशकल्पनायां प्रमाणाभावादित्यर्थः । प्रत्युत तादृशी कल्पना सूत्रविरुद्धापीत्याह । अपि चैकेति । एवञ्चेति । अस्या एकश्रुत्यपवादत्वे च । अग्निङ्कन्येति । कन्याराजन्यमनुष्याणामन्त इत्यनेनान्त्यस्य स्वरितत्वेऽनुदात्तस्य ककाराकारस्यानेन सन्नतरापत्तिरित्यर्थः । परास्तमिति । एकश्रुतिविषयता च सम्बोधने यद्वाक्यन्तत्राग्निङ्कन्येत्यत्र तु न तथात्वमिति तदुक्तम्परास्तमित्यर्थः ननूदात्तस्वरितयोरित्येव सिद्धे परग्रहणवैयर्थ्यमत आह । अनुदात्तानामिति । नन्वेवम् । ष्वस्य सन्नतरस्यैकश्रुतिबाधकत्वस्वीकारे । अत्र पाठेनेति । शास्त्रान्ते उत्कर्षो ज्ञापकात्कल्प्यते परन्तु तस्यास्तत्रैव पाठे कर्त्तव्येऽत्र पाठो ज्ञापकः परस्परमसिद्धत्वाभावस्येति भावः । एतेन । अन्यस्यासिद्धत्वस्य निश्चयेन । न निहतमिति । किन्त्वामन्त्रितत्वादाद्युदात्तमेव । इयञ्चैकश्रुतिराप्लुतात्सम्बोधनवाक्यस्य भवति प्लुतस्तूदात्त एव विधानसामर्थ्यात् ।

॥ इति साधारणस्वराः ॥

धात्वादिसाधारण्येन जायमानाः स्वरा इत्यर्थः। धातुस्वरस्य प्रथमतो निरूपणे सङ्गतिमाह। प्रकृतिरिति। येऽनुदात्ता एव धातवः पाणिनिना पठितास्तेष्वपि धातोरित्यन्तोदात्तत्वम्भवतीत्याह। येऽप्युपदेश इति। स्वपादिर्हिंसामच्यनिटि तास्यनुदात्तेदित्यतो लसार्वधातुकमिति आदिः सिच इत्यत आदिरिति चानुवर्त्तते। अन्यतरस्यामिति च। स्वपान इति। चानशप्रत्ययोऽत्र। यत्तु, ङित्येतेष्यत इति मूलेऽभिहितन्तद्वृत्त्यनुरोधेन। तेषाञ्चायमाशयः। अस्य वैकल्पिकत्वेनैतदभावे स्वपानीत्यत्र धातुस्वरेणाद्युदात्तत्वमेव भवतीति विशेषाभावादयं विधिर्नेति स्वपसाहचर्येण हि-नसानीत्यत्राप्ययं विधिर्नेति असस्तन्मध्यपतितन्यायेन धात्ववयवत्वाद्धातुस्वरेणाद्युदात्तत्वे कृते मध्योदात्तम्पदम्भवति। ततः परस्य स्वरितत्वमिति। परन्त्विष्येत इत्यभिधानन्न युक्तम्भाष्यानुक्तत्वादित्याह। नैतद्भाष्य इति। अभ्यस्तानामादिः। आदिः सिच इत्यत आदिरित्यस्यानुवृत्त्यैव सिद्धे प्रकृतसूत्रे आदिग्रहणङ्किमर्थमत आह। आदिरिति। नित्यार्थमि-

SGDF
Sri Gurgeshwari Digital Foundation

ति । पूर्वस्मिन्सूपादीति सूत्रेऽन्यतरस्यामित्येतदस्मदस्यादिति्त्यस्यानुवृत्तिर्दर्शनादिति भावः । प्रत्ययस्वरस्य सति शिष्टत्वाद्ददतीत्यत्राभ्यस्तस्यानुदात्तत्वे प्राप्ते आदुदात्तता सिद्धये आह । इदं सूत्रमिति । शृङ्गग्राहिकान्यायेनाह । जक्षतीत्यत्रेति । अनुदात्ते च । दधासीत्यत्र लसार्वधातुकस्याजादित्वविरहादादुदात्तत्वाप्राप्ते रिदमारब्धम् । बहुव्रीहिरिति । न विद्यते उदात्तो यस्मिन्नसावनुदात्त इत्यर्थः । अत एव । बहुव्रीहिसमासाश्रयणादेव । इकारलोपे । इत्यत्रेत्यनेनेकारलोपे माङ उच्चारणमस्प्रतिषेधाय । ऊर्णौतीति । धातुसूत्रेण मध्योदात्तमिदम् । सूत्रस्य प्रयोजनमाह । चकेति । अन्तरङ्गत्वादिति । अपरनिमित्तकत्वे नान्तरङ्गत्वादित्यर्थः । न च धातोरिति । धातोरितिसूत्रे कर्षात्वत इत्यतोऽन्तोदात्त इत्यनुवृत्त्याऽन्तोदात्तत्वविधायकत्वमुचितमुतादुदात्तप्रकरणे पाठबलाऽऽदुदात्तत्वविधायकत्वमुचितमित्येतत्तात्पर्यके किम्धातोरन्त उदात्तो भवति आहोस्विदादिरिति विचारे आद्युदात्तत्वविधायकत्वेऽनुदात्ते चेति न वाच्यमिति लाघवमुक्तमत्र सङ्गच्छतेत्यर्थः । खट्वीत्या । ददातीत्यत्रोक्तरीत्या । कैयटस्तु चिन्त्य इति । एवं हि कैयटग्रन्थः अनुदात्ते चेत्येतदेवज्ञापकमिहान्तग्रहणाधिकारस्येति । स तु चिन्त्यः । ददातीत्यत्र पर्यायेणोभयोरुदात्तत्ववारणायानुदात्ते चेत्यस्यावश्यकत्वात् । न च स्थाने द्विर्वचनेन सिद्धिः । द्विः प्रयोगो द्विर्वचनमिति पक्षस्यैव सिद्धान्तितत्वात् । न च धातोरित्यस्यान्तोदात्तत्वविधायकत्वे पिबतीत्यत्र पिबादेशस्यादन्तस्यान्तोदात्तत्वापत्तिरिति वाच्यम् । पिबादेशे आदुदात्तनिपातनङ्क्रियत इति भाष्येण समाधानात् । भीह्रीभृहुमद । ननु भ्यादिग्रहणभावेऽपि तिप्रत्यये परतः पूर्वस्यादुदात्तविधायकत्वेन ददातीत्यत्रापि चेदनुदात्ते चेति सूत्रमचरितार्थमत आह । अनुदात्ते चेतीति । स्पष्टार्थमिति । अत्र हि मण्डूकप्लुत्या लसार्वधातुकग्रहणानुवृत्त्या बेभीयाञ्जेह्रीयादित्यादौ यङ्लुगन्तादाशीर्लिङि प्रत्ययात्पूर्वस्योदात्तत्ववारणाय व्याख्यानङ्कृतम् । एवं हि व्याख्यानं यङ्लुको भाषाविषयत्वे युज्यते वस्तुतस्तस्य छान्दसत्वमेवान्यत्र प्रपञ्चितमिति छन्दसि दृष्टानुविधानादेव सिद्धमिति भावः । प्रत्ययादिति किमर्थमिति । पूर्वमित्येतस्यैव वाच्यम् भीप्रभृतीनां यत्पदपेक्षया पूर्वत्वं तत्पित्प्रत्यय एव । न च विभयानीत्यत्र लोड्उत्तमस्य य

SGDF

आडागमस्तस्य पिच्चे त्यनेन पित्वातिदेशादप्रत्ययस्यापि पितः सम्भवोऽस्तीति वाच्यम् । आडुत्तमस्य पिच्चे त्यनेन यस्योत्तमस्याड्विधीयते तस्यैव पित्वातिदेशः क्रियते नत्वाट एवागमिनः पित्वमतिदिश्यते तस्याडागमे विशिष्टस्यापि पिद्ग्रहणेन ग्रहणम्भवत्येवेति प्रत्ययग्रहणे विशेषाभाव इति प्रश्नः । समाधत्ते । प्रत्ययात्पूर्वेति । प्रत्ययात्पूर्वोऽजित्यर्थः । सङ्घातः । अभ्यस्तसंज्ञकः समुदायः स उदात्तो मा भूत् । प्रकृतसूत्रे पूर्वग्रहणमपि न कार्यं पितीति सप्तमीनिर्देशात्तस्मिन्नितीति परिभाषायाः प्रवृत्त्या पिति परेऽव्यवहितपूर्वेषां भीप्रभृतीनामन्त्यस्याच इति कल्पनया सङ्घातस्य न भविष्यतीत्यभिप्रायेणाशङ्कते । न चेति । सङ्घातः कार्यीति । यत्र सङ्घातस्य कार्यप्रवृत्तियोग्यता तत्र सङ्घात एव कार्यी नावयव इत्यर्थः एवञ्च तत्रावयवस्य कार्यनिष्पादकानामलोन्त्यस्येत्यादीनामनुपस्थितिरिति भावः । अत एव । सङ्घातस्य कार्यित्वादेव । चरितार्थमिति । सङ्घातस्य कार्यित्वे हि घञ उदात्त इत्युक्तौ समुदायस्योदात्तत्वशरणायान्त इति चरितार्थमित्यर्थः । सङ्घातः कार्यीति स्वीकारे सति यथा प्रकृतसूत्रे प्रत्ययात्पूर्वमिति चरितार्थन्तथाह । यद्यप्यनेक इत्यादिना । चरितार्थमिति । विभेतीत्यादौ प्रत्यये पिति परे यः सङ्घातस्तदवयवस्य पर्यायेणोदात्तत्वम्मा भूदन्त्यस्यैव यथा स्यादित्येवमर्थम्प्रत्ययात्पूर्वमित्यावश्यकमिति भावः । तेन । सङ्घातः कार्यीति स्वीकारेण । अन्यथा । सङ्घातस्य कार्यित्वाभावे चादेरित्यसम्भवाभावादिति । आदेः परस्येत्यस्य प्रवृत्त्याऽसम्भवाभावादित्यर्थः । नन्वेवम् पूर्वोपपादितरीत्या प्रत्ययग्रहणस्यावश्यकत्वे । सौवर्य इति । स्वरेः भवाः सौवर्यस्तत्र भव इत्यर्थेऽणिद्वारादीनाञ्चेत्यैजागमः । ज्ञापनार्थत्वादिति । एवञ्च प्रत्ययात्पूर्वमित्यस्याभावे पित्प्रत्ययान्तस्येत्यर्थापत्तौ विभेति जिह्रेतीत्यादौ प्रत्ययलक्षणेन सङ्घातस्य पित्प्रत्ययान्ततया पुनः पूर्वोपपादितरीत्या पर्यायः स्यादिति भावः । स्वविषये पञ्चम्यन्तोपादानस्य चारितार्थ्यमाह । प्रत्ययादितीति । इदञ्च । सौवर्यः सप्तम्यस्तदन्तसप्तम्य इत्येतच्च । अत एव । निर्दिष्टपरिभाषाविषय एवेति स्वीकारादेव । पूर्वोत्तरसाहचर्यात् । पूर्वसूत्रमाश्रितः कर्त्तेत्युत्तरसूत्रञ्जुष्टार्पिते चेति तयोः सूत्रयोर्ये घटकास्तेषाम्प्रथमान्ततया न निर्दिष्टपरिभाषाविषयत्वन्तथा ताभ्यां साहचर्यादिना इति सप्तम्याः प्रथमार्थ-

SGDF
Sri Gargeshwari Digital Foundation

त्वकल्पनेन न निर्दिष्टपरिभाषाविषयत्वमिति भावः । लाघवादाह । वस्तुत इति । चतुरः शसीति सप्तम्याः सौवरीत्वेऽपि न परिभाषाविषयत्वमित्याह । चतुर इति । अत्र । सौवर्यः सप्तम्यस्तदन्तसप्तम्य इति परिभाषाविषये । सामान्यापेक्षमिति । तदन्तविधिसत्त्वासत्त्वाभ्यां स्वराश्रयकार्यिभेदो यत्र त्वेवं विवक्ष्यमाणविशेषानपेक्षमित्यर्थः । तेन । सामान्यापेक्षत्वं न । ञ्नित्यनेनाद्युदात्तत्वविधानेन तदन्तविधिसत्त्वेऽसत्त्वे वा कार्यित्वमादेरक्षतमेव यद्यपि तथापि तदन्तविधिर्भवतीति । न चैवमिति । ञ्नितीत्यत्र तदन्तविधिस्वीकारे । यद्यत्र तदन्तविधिर्न स्यात्तर्हि प्रत्ययलक्षणस्य न लुमताङ्गस्येति प्रतिषेधः सम्प्रति तु नेति भावः । समाधत्ते । इत्यदेति । इत्यदाविषयकप्रतीत्यविषय इत्यर्थः । एतदभेदः शब्द एवेति वक्ष्यमाणानुबन्धनिमित्तशब्दार्थैकदेशस्य शब्दस्य विशेष्यत्वसिद्धिः । अथाङ्गत्वाभावेपीति कथनन्न लुमताङ्गस्येति सूत्रेऽङ्गस्येत्यनेनाङ्गाधिकारः प्रतिनिर्दिश्यत इतिवादिनः सन्तोषाय वस्तुतस्तथा नेत्याशयेनाह । प्रत्यये परतः पूर्वकार्यिति । अत एव । पूर्वोक्तस्य ज्ञापकसिद्धवचनस्य सत्त्वादेव । अन्वय इति । अत्रिशब्दादितश्चानञ इति ढकि अत्यत्रिभृग्विति लुक् । क्रियस्तदन्तस्यान्तोदात्तत्वविधायकमेतदित्याशयेनेह दोषसद्भावशङ्का क्रियस्तद्धितस्तस्यैवान्तोदात्तत्वविधायकमेतदित्याशयेनाह । वस्तुत इति । अन्यस्य । तदव्यवहितपूर्ववर्त्तिनः शब्दस्य । अत एव । अमृतः स्थानित्वबाधादेव । अनुबन्धनिमित्त इत्यस्यानुबन्धबोधकशब्दनिमित्त इत्यर्थः । एवञ्च सिच् छन्दस्यापि चकारानुबन्धबोधकत्वेन तथात्वमस्तीत्याशयेनाह । माहिदानामित्यादाविति । अत्र माशब्दोऽसौ हि शब्दश्च निपातस्य प्रतिषेधाय । पथिप्रियो मथिप्रिय इति । बहुव्रीहिसमासे बहुव्रीहौ प्रकृत्येति पूर्वपदप्रकृतिस्वरे पथिमथोः सर्वनामस्थाने इत्यनेन सर्वनामस्थानान्तपथिमथिशब्दयोरादिरुदात्त इत्यर्थकेनाद्युदात्तत्वापत्तिः सा वचनेन वार्यत इति भावः । ज्ञाप्यं वचनमत्र लघु कल्पत इत्याशयेनाह । यदि प्रागुक्तमिति । संज्ञायामुपमानमिति ज्ञापकमित्यर्थः । नन्वसम्मतं विशेषमाह । केचित्त्विति । तत्प्रवृत्तिरिति । सोऽपि सप्तम्यस्तदन्तसप्तम्य इत्यस्य प्रवृत्तिरित्यर्थः । ज्ञापकविषये कार्यभेदमाह । भीह्रीत्यत्रेति । दरिद्राधातुविषय इति । अस्य नाप्त्कत्वेनाऽऽदनीयर् प्रत्यये ण्यन्ताच्चडि वा

SGDF
Sri Gargeshwari Digital Foundation

विशेषः स्पष्ट एव। सूत्रद्वये। उपोत्तमं इति। चङ्यन्यतरस्यामिति सूत्रद्वये। पक्षद्वयेऽपीति। सामान्यापेक्षज्ञापकं विशेषापेक्षं वेति पक्षद्वयेऽपीत्यर्थः। मध्य इति। तिसृभ्यो जसः। सा वेंकाचस्तृतीयादिर्विभक्तिरित्येतयोर्मध्य इत्यर्थः। एतयोः सूत्रयोः विभक्तिस्वरविधायकतया चतुर इत्यस्यापि तथात्वे चतुरः शस इत्येव पूर्वसूत्रवद्वदेत्। उपमानं संज्ञायामिति सूत्रस्येति। उपमानशब्दः संज्ञायामाद्युदात्त इत्यर्थकं यत्संज्ञायामुपमानमिति सूत्रन्तद्व्याख्यानभाष्येत्यर्थः। तत्र हि चञ्चेव चञ्चेत्यादौ ञ्नितीत्येव सिद्धे संज्ञायामुपमानमित्यस्य वैयर्थ्यमाशङ्क्यानुबन्धलक्षणे स्वरे प्रत्ययलक्षणन्न भवतीत्यर्थे संज्ञायामित्यस्य ज्ञापकतोक्ता साञ्नितीत्यस्य तदन्तसप्तमीत्वे न लुमता तस्मिन्निति न्यासेन निषेधाप्राप्त्याप्रत्ययलक्षणप्रवृत्त्योपपादयितुं शक्यते नान्यथेति तद्भाष्यविरोधादित्यर्थः। एवं सतीति। तेन सर्वस्याद्युदात्तत्वमेव विधीयते तत्र तदन्तविधिस्त्वासत्त्वाभ्याङ्कार्यभेदाभावेन तदन्तविधिर्न स्यादिति भावः। इष्टापत्त्यावाह। तथा चेति। सर्वस्तोमासिद्धिरिति। सर्वस्तोमेत्यस्याद्युदात्तस्यासिद्धिरित्यर्थः। वक्तुं शक्यत्वाच्चेति। एवञ्च सौवरीणामित्यस्य सामान्यापेक्षतैव युक्तेति शेषः। गर्गावत्सा विदा इत्यादौ दोषवारणपरभाष्यविरोधम्परिहरति। न लुमतेतीति। वार्त्तिकानि। लुमतिप्रतिषेध इत्यादिवार्त्तिकानि। इतिवदिति। तस्य यथा प्रयत्नेनान्यथासिद्धिप्रदर्शनेन प्रत्याख्यानेऽपि पुनस्तथा पाठेनावश्यकता सूचिता तद्वत्। कैयटाविरोधमप्युपपादयति ञ्नितीति। उपलक्षणमिति। अनाद्युदात्त्वादित्येतत्सौवरीणां सप्तमीनाम्नस्तदन्तबोधकत्वादित्यस्यापि बोधकमित्यर्थः। किञ्चिचान्यत्रेति। ञ्निनिकित्स्वराः। प्रतिषेधो ग्राह्य इति। तच्च भाष्ये हि अङ्गेरविधाने लुमता लुप्ते प्रत्ययलक्षणन्न भवतीति वक्तव्यम्। अहन्ददातीत्यत्र रोऽसुपीति प्रत्ययलक्षणेन प्रतिषेधो मा भूदित्युक्तम्। लितीति। प्रकृतसूत्रे भीह्रीति सूत्र इवाभ्यस्तानामित्यतोऽभ्यस्तानामिति सम्बध्येत अनन्तरमस्य पाठादत आह। अत्रेति। परत्वात्। लितीति सूत्रात्परत्वात्। अचः परस्मिन्निति स्थानिवद्भावस्य प्राप्तिमाशङ्क्याह। स्वरदीर्घेति। आदिर्णमुल्यन्यतरस्याम्। अभ्यस्तानामिति मण्डूकगत्यात्र सम्बध्यते। तस्य णमुलन्तत्वासम्भवादाह। णमुलीत्यस्येति। नातिप्रसङ्ग इति। सना व्यवधानेन णमुलोऽभ्यस्तात्परत्वा-

SGDF
Sri Gargeshwari Digital Foundation

भावात्। विशेषाभावमिति । अस्य सूत्रस्याद्युदात्तविधायकतया तदन्तसप्तमीत्वे परसप्तमीत्वे वा फलतो न कश्चिद्विशेषः। एतेन। अभ्यस्तात्पर इतिव्याख्यानेन। अनुदात्त इति । तस्य परमाम्रेडितमनुदात्तञ्चेति सर्वानुदात्तः। उभयमप्युदात्तमिति। आदिर्णमुल्यन्यतरस्यामिति वैकल्पिकतया यदाऽनेनाद्युदात्तता तदा लोशब्द उदात्तः। एतदभावे तु लितीत्यनेन लूशब्द उदात्त इत्यर्थः। चः कर्तृयकि। इत्यर्थादिति। अतो मूलकृता कर्तृयकि पर इत्येव व्याख्यातमिति शेषः। पक्षे। अचः कर्तृयकीत्येतत्सूत्रप्रवृत्त्यभावपक्षे। इदञ्च। उपदेशेऽजन्तानामिति व्याख्यानञ्च । एवं उपदेशेऽजन्तानामिति व्याख्याने। ये इति । ये विभाषेति सूत्रे ये इति । पर्यायेणेति । अस्य वैकल्पिकत्वादित्यादिः । चड्यन्यतरस्याम् । एतद्व्याख्यानभूते चङन्ते धाताविति वाक्ये धाताविव्यपाठः । चङन्तस्याधातुत्वात् । अन्तशब्दस्य परसमीपपरत्वेन चङ्परे धातावित्यर्थ इति तु न धातावित्यस्याप्रकृतत्वात्। आक्षेपेण लाभस्तु न। आक्षेपे अनुपपत्तेः सह कारितया तदभावात् । फलाभावाच्च। सौत्र्यः सप्तम्यस्तदन्तसप्तम्य इत्येतद्विरोधाच्च । अनुदात्त इति। एवञ्च मा हि चीकरतामित्यत्र चङ एवोत्तत्वे प्राप्ते धात्वकारस्योदात्तत्वार्थमिदं सूत्रमिति शेषः । मा ह्वि दधदिति। विभाषा धेट्श्व्योरिति चङ्। अत्र चिप्रभृतीनामभावादुपोत्तमत्वङन्तस्य नास्तीति चङ एवोदात्तत्वम्भवति। परसप्तम्यान्तु धातोः स्यात्॥

॥ इति धातुस्वराः ॥

अथ प्रातिपदिकस्वरा इति । निरूप्यन्त इति शेषः। तेषु विशेषमाह। ते चेति। अत एव। प्रातिपदिकादिसंज्ञाप्रयोजकप्रत्ययबलेन स्वरप्रवृत्तिकल्पनादेव। सर्वानुदात्तत्वमेव क्यजन्ते चित इत्यनेन क्यजकारस्योदात्तत्वे तदेकवाक्यतापन्नशेषनिघातेन पुत्रीत्यनयोरनुदात्तत्वे सत्यवशिष्टोऽकार एवोदात्तः स तु लुप्त इति सर्वानुदात्तत्वमेव। अत एव। उणादिषूणादिप्रत्ययैः स्वरकल्पनादेव। तथैव अन्तोदात्तमेव। आद्युदात्तत्वम् । अञ्जेरकारस्योदात्तत्वात्तेन सहाकोदात्तेन सहैकादेशस्यान्यतरतस्यादुदात्तत्वादाद्युदात्तत्वम्। कर्णत्वतः।

SGDF
Sri Gargeshwari Digital Foundation

ननु पदप्रत्ययाभावे तदन्तविधिः कथं विशेष्याभावादत आह । पञ्चाश्चिते ति । ननु पाक इत्यत्र ककारस्याऽविद्यमानवत्त्वेनादन्तात्परत्वमस्त्येवेत्यत आह । स्वरविधाविति । निर्दिश्यमानपरिभाषयेति । इदमनागमकानां सागमका आदेशा इति पक्षाभिप्रायेण । अन्यथा तु यदागमा इति परिभाषयेति बोध्यम् । इत्यर्थः स्यादिति । सामर्थ्यादिति शेषः । प्रकृतसूत्रस्थान्तशब्दस्य सार्थक्यमाह । यद्यपीत्यादिना । एवञ्च । उक्तरीत्यान्तपदसार्थक्यं च । सिद्धेरिति । अत्र हि हनश्च वध इतिसूत्रेणादन्तवधादेशोऽप्प्रत्ययस्य च विधानेनानुदात्तस्य च यथोदात्तलोप इत्यनेन सिद्धेरित्यर्थः । गरो विष इति । गरो व्याधावुपविषे विशेषे करणे गरम् । अजन्तोऽन्तोदात्त इति । गरवाचकस्योञ्छादिगणे पाठादिति शेषः । अन्यत्र । उपविषातिरिक्ते । आद्युदात्त इति । नप्विषयस्येत्यनेनाद्युदात्त इत्यर्थः । करणे घञन्ता इति उञ्छादिगणे पठ्यन्त इति शेषः । आद्युदात्ता एवेति । तेषामपाठादिति शेषः । स्तोत्र इत्यस्य व्याख्यासामनीति । अन्यथेति । वर्त्तनी तर्क्कुपिण्डे स्याद्वर्त्तनी मलिने पथि इति कोशात् । अन्तोदात्त इति । अनिप्रत्ययान्ततयान्तोदात्त इत्यर्थः । अन्यत्र । अभ्रातिरिक्ते । दरस्त्रीरे दरो भये दरः साहसगर्तयोः । कन्दरे तु दरीमाहुरीषदर्थे दरोऽव्ययम् । चतुरः शसि । शस इत्यस्यैवेति । तिसृभ्यो जस इत्यस्य षष्ठ्यन्तस्योपक्रमादिहापि षष्ठ्यैव निर्देश उचित इति भावः । तकाराकारस्येति । स्वरविधौ व्यञ्जनमविद्यमानवदिति सकाररेफयोरविद्यमानवद्भावात्तकाराकारस्य प्राप्तिः । आद्युदात्तनिपातनसामर्थ्यादिति । एकश्रुत्या तिसृचतस्रेति द्वन्द्वसमासत्त्वेनान्तोदात्ते वा उच्चारयितव्ये आद्युदात्तस्य चतसृशब्दस्योच्चारणप्रयोगे तादृशस्य श्रवणार्थमिति तत्सामर्थ्यादित्यर्थः । तत्र । षडादिषु । वार्त्तिकप्रामाण्येनेति । प्रकृतसूत्रभाष्ये शसि स्त्रियाम्प्रतिषेधः । शसि स्त्रियाम्प्रतिषेधो वक्तव्य इत्युपक्रमे चतसः पश्य त्वत्र प्रतिषेधस्य प्रयोजनमुक्त्वा आद्युदात्तनिपातनं करिष्यते स निपातनस्वरश्चतुरः शसीत्यस्य बाधको भविष्यतीत्यनेन पूर्ववार्त्तिकं खण्डितं ततो निपातनस्वरस्य सतिशिष्टत्वाच्चतसृणामित्यत्र यो विभक्तिस्वरः षट्त्रिचतुर्भ्यो हलादिरिति तस्यापि बाधः स्यादत उपदेशिवद्भावो वक्तव्य इति परेण पठिते षट्चेति सूत्रे हलादिग्रहणस्य चतसृशब्दादन्यत्प्रयोजनं नास्तीत्यतो

SGDF
Sri Gargeshwari Digital Foundation

विभक्तिस्वरस्याबाधस्य सिद्धिरित्युक्तम् । षट्संज्ञकानां बहुवचनान्तया जश्श-सोरस्मात्परयोर्लुग्विधानेन च षट्संज्ञकविषये न प्रयोजनम् तिसृशब्दोऽपि न प्रयोजयति । द्विवचनैकवचने न स्तः । जस्य सर्वनामस्थानमिति प्रतिषेधात् । शसि तूदात्तयणो हल्पूर्वादित्यनेन सिद्धम् । अन्याः सर्वा हलादिविभक्तयः । चतुःशब्दस्यापि न प्रयोजयति । असर्वनामस्थानमिति वचनाज्जसि न भवित-व्यम् शसि तु चतुरः शसीत्यनेन भवितव्यमिति चतसृशब्दादेकस्माज्जसि परे विभक्तिस्वरस्याप्रवृत्तये हलादिग्रहणमित्यभिहितम् । यदि गौणि हलादिग्रहण-स्य चारितार्थ्यं स्यात्तदा विभक्तिस्वरभावस्य हलादिग्रहणादिति वार्त्तिकविरो-धः स्पष्ट एवेति । अत्राहुरित्यनेन सूचितामरुचिं स्वयमेवाह । तच्चिन्त्यमिति । तिसृ-भ्यो जस इति सूत्रे भाष्ये जस इत्यस्य तिसृका इति प्रयोजनमादावभिहित-न्ततो नित्स्वरेणात्र बाधो भविष्यतीत्याशयेन जस्ग्रहणमनर्थकमन्यत्राभावा-दिति वार्त्तिककृतोक्तम् । शसि उदात्तयणो हल्पूर्वादित्यनेन सिद्धमन्याविभ-क्तयो हलादयस्तासु षट्त्रिचतुर्भ्यो हलादिर्झल्युपोत्तममित्याभ्यां भवितव्यमिति तदाशयः। अनेन प्रकारेण जस्ग्रहणाभावे वार्त्तिककृता प्रतिपादिते उपसमस्ता-र्थमेके जसो ग्रहणमिच्छन्ति । अतितिसृौ । अतितिसृ इति भाष्यकारेणोक्तम् । अत्र द्विवचने एव जस्ग्रहणाभावेऽतिप्रसङ्गापादने तात्पर्यम् । जसि त्विष्यत एव तिसृभ्यो जस इति प्रसङ्गोच्चारितमेतत् । एवम्प्रकारेण वार्त्तिकं यथा ख-ण्डितन्तथा चतुरः शसीतिसूत्रेऽपि षट्त्रीति सूत्रस्थहलादिग्रहणस्योक्तरीत्या विभक्तिस्वराबाधकत्वे ज्ञापकता वार्त्तिककृताऽभिहिता ततोऽग्रे भाष्यकृता चतसृः पश्येत्यत्र नैव वा पुनः शसि स्वरः प्राप्नोति । यणादेशे शसः पूर्व उदा-त्तभावी नास्तीति कृत्वेत्यनेन वार्त्तिककारमतङ्खण्डितम् । ऋकारस्य यणा-देशे तस्य स्थानिवद्भावेन व्यवधानान्न तकाराकारस्य प्राप्तिः स्वविधौ स्थानि-वत्त्वाभावेन न ऋकारस्यैव प्राप्तिरित्याशयः । स्वरविधिम्प्रतीति स्थानिवत्त्व-निषेधस्तु नास्ति । स्वरदीर्घयलोपेषु लोपाजादेशस्यैव स्थानिवत्त्वनिषेध इति नियमात् । वार्त्तिकदूषणपरभाष्याभिप्रायमाह । तस्मादितीति । उक्तभाष्यप्र-घट्टकरीत्योपसंहरति तस्माद्गौण इति । झल्युपोत्तमम् । अपवाद इति । येन नाप्राप्तन्यायेनेत्यादिः । अषडिगिरिति समुदायेऽप्युपोत्तमसम्भवोऽस्त्येवेति क-

SGDF
Sri Gargeshwari Digital Foundation

यसुपोत्तमग्रहणस्य प्रत्युदाहरणमिति शङ्कावारणायाह । आ इति भिन्नम्पद-मिति । सर्वस्य सुपि । सर्वशब्दस्य स्वाङ्गशिटामदन्तानामित्याद्युदात्तत्वं सिद्ध-मेवेत्याशङ्कायामाह । सर्वशब्दश्चेति । एवञ्च सुपीत्यस्य तदन्तसप्तमीत्वेन प्र-त्ययलक्षणेन।द्युदात्तस्य श्रवणमस्त्येव । ननु ह्यत्युक्तप्रयोगेऽत्यन्तस्वार्थिकस्य प्र-योगस्तस्य तु सुबुत्पत्तेः प्रागेवोत्पत्तिरत आह । अत्यन्त इत्यादि सुपीत्युक्तेः फलमिति । यदि सुपीत्युच्यते तदा सुबन्तस्याद्युदात्तत्वम्प्रकृतेस्त्वनुदात्तादि-त्वमिति व्यवस्था सिध्यतीति भावः । अन्तोदात्त एवेति । चितः सप्रकृतेर्वह्वक-जर्थमिति वचनात् । ञ्नित्यादिर्नित्यम् । अत्रादिपदमन्तपदासम्बन्धबोधनाय । तद्धि यति च सेटीतिपूर्वसूत्रे स्वान्वय्यन्वय्यन्तपदार्थकमभूत् । नन्वेवं सति तत्सम्बद्धान्यतरस्यामित्यस्य निवृत्तिः सिद्धैवेति नित्यमिति व्यर्थमिति चेन्न । स्पष्टार्थत्वात् । सन्नन्तस्य विधीयमाना धातुसंज्ञा सनोमित्वञ्चेत्युभयमपि पर-स्वरपरिहारेणाचरितार्थमित्याशयेनाशङ्कते । जुगुप्सेत्यादावित्यना । नित्स्वरस्य चारितार्थ्यन्तु द्वितीयस्तृतीयोभाग इत्यादौ । सति शिष्टस्यापीति । धातुस्व-रस्येति शेषः।पथिमथोः।अन्तोदात्ताविति।फिट्स्वरेणैतावन्तोदात्तावित्यर्थः । अत एवाह । अत्रेति । अस्य । पथिमथोः सर्वनामस्थान इति सूत्रस्य । प्रकृतसूत्रा-त्तत्पुरुषे तुल्यार्थेत्यस्य परत्वात्तेन बाधाश्चेत्यपि बोध्यम् । क्षयो निवासे । नि-वासे वाच्ये सति क्षयशब्द आद्युदात्तः स्यात् । इति घ इति । निवास इत्यत्रा-प्येवम् । तेनैव । पुंसि संज्ञायामित्यनेनैव । अन्यत्र । जयातिरिक्ते । वृषादी-नाञ्च । ञ्नित्यादिरित्यत आदिरित्यनुवर्त्तते । अविहितादुयदात्तस्येति । अवि-हित आद्युदात्तो यस्य तस्येत्यर्थः । षष्ठ्यर्थ इति । आदिपदार्थापेक्षया या ष-ष्ठी तदर्थ इत्यर्थः । आशितः कर्त्ता । आशितशब्दस्य कर्तृवाचकत्वमुपपादयति। सकर्मकेति । भाष्यानुसारिमतान्तरमाह । आङ्पूर्वत्व इति । इत्यस्याप्ययेति । अपिना प्रत्ययस्वरपरिग्रहः । भाष्यासम्मतमिति । तत्र हि किन्निपात्यते । आ-शिते कर्त्तरि निपातनमुपधादीर्घत्वमाद्युदात्तत्वञ्च । आशित इति क्तः कर्त्तरि निपात्यते । अशितवान् आशितः । आद्युदात्तत्वमनिपात्यमधिकारात्सिद्धम् । उपधादीर्घत्वमनिपात्यम् । आङ्पूर्वस्य प्रयोग इति प्रातिपादितम् । रिक्ते ऽवि-भाषा । रिक्तशब्दावयवस्यैवायं स्वरो विहितो न तु तस्मिन् परेऽन्यस्येत्याशये-

SGDF Sri Gargeshwari Digital Foundation

नाह। पूर्वोत्तरेति। आश्रितः कर्त्ता जुष्टार्पिते इत्युभयत्रोपात्तशब्दावयवस्यैव कार्यित्वेनाश्रयणादित्यर्थः। सप्तम्युपपत्तये आह। त्रियमाण इति। षष्ठ्यर्थे सप्तमीत्यपि वक्तुं शक्यम्। पद्य इति। छन्दसीति शेषः। नित्यम्मन्त्रे। पूर्वसूत्रस्य ब्राह्मणे विकल्पविधायकता द्रष्टव्या। सूत्रविरोधात्। नित्यम्मन्त्र इति सूत्रविरोधात्। यथा सङ्ख्यम्प्रकृतिप्रत्यययोः प्राप्तं वारयति। योगविभाग इति। विभक्तेरुदात्ते प्राप्ते इति। युष्मच्छब्दस्य मदिक्प्रत्ययान्ततया तदादेशस्यान्तरतम्यादन्तोदात्तस्य तव शब्दस्यैकादेश उदात्तेनेत्यनेनोदात्ते प्राप्त इत्यर्थः। पर्युदासैकवाक्यतयाऽर्थमाह। नोभिन्नाद्विहित इति। हल्स्वरप्राप्ताविति। हलः स्वरप्राप्तावित्यर्थः। हलः स्वरप्राप्तिमुपपादयति। हलादावचादेरिति। तद्विषयकेति। हलादिविषयकेत्यर्थः। प्रतिलक्ष्यं लक्षणभेदस्य सम्प्रदायसिद्धत्वात्। स्पष्टञ्चेदम्भाष्ये इति। समासस्येतिसूत्रभाष्ये इदं स्पष्टमित्यर्थः। तत्र हि आचार्यप्रवृत्तिर्ज्ञापयति भवत्येषा परिभाषेति यदयं यतोऽनाव इति प्रतिषेधं शास्तीत्युक्तम्। नचैवं नाव्यमित्यत्रापि यादेर्नकारस्योदात्तगुणकः स्थानकृतान्तरतम्यवान् लृकारः स्यात्तद्व्यावर्त्तकतयाऽनाव इतिप्रतिषेधस्य चारितार्थ्येन कथमस्य ज्ञापकत्वमिति वाच्यम्। द्व्यच्कत्वमस्य सूत्रस्य प्रवृत्तौ लिङ्गम्। यदि नकारस्य स्थानेऽच् स्यात्तदा निमित्तस्य द्व्यच्कत्वस्य विनाशः स्यादित्युपजीव्यविरोधात्तादृशोऽत्र भविष्यतीति नौप्रतिषेधो व्यर्थ इत्याशयात्। अत्र केचित्। नौप्रतिषेधो हल्स्वरप्राप्तौ व्यञ्जनमविद्यमानवदित्यर्थ एव ज्ञापक इति न। किन्तु स्वरविधौ व्यञ्जनमविद्यमानवदित्यर्थ एव। स्वरविधिशब्दे च तन्त्रन्यायेन स्वरस्य विधिः स्वरविधिः स्वरेण विधिः स्वरविधिरित्यर्थद्वयसम्बन्धो विवक्षितः। अथ वा सम्बन्धसामान्यार्थकषष्ठ्या समास एवास्तु। तत्र षष्ठ्यर्थः सम्बन्धश्च क्रियाकर्मभावो निमित्तनिमित्तिभावश्चाभिमत इति हल्स्वरप्राप्तावित्यस्य स्वरोद्देश्यके विधावित्यस्य च लाभः। नोत्तरपदेऽनुदात्तादावपृथिवीरुद्रेत्यादिप्रतिषेधैकवाक्यतया चायमर्थः कल्प्यते स्वरे विधातव्ये व्यञ्जनमविद्यमानवदित्यत्र व्यञ्जनं स्वरस्थानित्वेन प्रसक्तं विवक्षितं ज्ञापकसाजात्यात्। एवञ्च नौप्रतिषेधस्य पृथिव्यादिपर्युदासस्य च या ज्ञापकताऽन्यत्राभिहिता सोऽर्थद्वयस्य विवक्षायामित्याहुः। ईडवन्दवृशंसदुहाम्। व्यनुबन्धत्वादिति।

SGDF
Sri Gargeshwari Digital Foundation

तकारस्यानुबन्धस्येत्त्वोपादानादस्ति तदनुबन्धकपरिभाषाप्राप्तिः । वेणुशब्दस्याद्युदात्तत्वमुपपादयति । स्थोणुरित्येवेति । स्वरभेदप्रतिपादनमन्यकर्तृकं कश्चिन्निरसितुमाह । यत्त्विति । प्रतिषेधादिति । तथा च नोदात्तनिवृत्तिस्वरप्राप्तिरिति भावः । इष्यते इति । अत्र प्रमाणन्तु प्रकृतसूत्रभाष्ये किमियम्प्राप्ते विभाषा आहोस्विदप्राप्ते । कथञ्च प्राप्ते कथञ्चाप्राप्ते । यदि संज्ञायामुपमानमिति नित्ये प्राप्ते आरम्भस्ततः प्राप्तेऽन्यथा त्वप्राप्ते । अप्राप्ते विभाषा । प्राप्ते नित्यो विधिः । वेणुरिव वेणुरिति प्रतिपादनमेवेति । त्यागराग । विभाषावेणिवत्यतो विभाषाग्रहणमनुवर्त्तते । एतदभावे स्वरमाह । मूले आद्या इति । तत्र । आद्येषु । तत्र । अन्त्येषु त्रिषु । प्रत्ययस्वरेण । प्रत्ययस्य यः स्वरः प्राप्तस्तेन । चित्वं हि प्रत्ययस्येति तेनान्तोदात्तत्वम्प्राप्तमिति फलितम् । मतोः पूर्वं । पूर्वशब्दार्थस्यादित्येतद्विशेषणत्वात्पुंल्लिङ्गेन निर्देशे कर्त्तव्ये नपुंसकनिर्देशोऽनुपपन्नोऽत आह । पूर्वमितीति । स्त्रियां संज्ञायामिति व्यधिकरणे सप्तम्यावित्याशयेन व्याचष्टे । स्त्रियामित्यादि । खट्वावतीति । यौगिकोऽयन्न तु संज्ञा । उदुम्बरावतीति । देशस्य संज्ञेयम् । उदाहरणे । उदुम्बरावती इत्यत्र । नगर्याः संज्ञेयम् । शवादनी इति । अत्ति यस्यां सा अदनी । अधिकरणे ल्युट् । टित्वान्ङीप् । गौरदनीति विग्रहः । नाद इति लोके । इत्यर्थः स्यादिति । तथा च पूर्वग्रहणमव्यवहितपूर्वपरमिति बोध्यम् । अन्तोऽवत्याः । अवत्या इत्यत्राकारोच्चारणस्य प्रयोजनमाह । वत्या अन्त इति त्विति । ननु वेत्रवतीत्यादावचतीशब्दो मादुपधाया इत्यस्याऽसिद्धत्वान्नास्तीति कथमुदाहरणमत आह । वत्वन्त्वाश्रयेति । अथ फिट्सूत्राणीति । फिषां सूत्राणि व्याख्यायन्ते इति शेषः । एतेषां साधुत्वव्यवस्थापकत्वे प्रमाणमाह । अपाणिनीयेति । आवश्यकत्वादिति । अयञ्च पक्षः पाणिनीयानामपि सम्मत एव । पाटला । लघावन्त इति प्राप्त इति कथनमेकादेशष्टापा सह यावन्न जातस्तावत्प्राप्त्यभिप्रायेण । तस्यैवौषधिविशेषे रूढतया ततः स्त्रियाष्टाप उत्पत्तेः । बाधकबाधनार्थत्वादिति । आद्यसूत्रबाधकस्यान्यस्याभावादिहैव निपातनमाश्रीयत इति भावः । अन्तरङ्गमिति । स्वाङ्गवाचकत्वस्य टाबुत्पत्तेः प्रागपि सत्त्वात्तस्यान्तरङ्गत्वमिति भावः । ध्यपूर्वस्य स्त्रीविषयस्य । ध्यपूर्वस्येत्यन्तपदार्थे विशेषणमभेदेन सा च स्थानषष्ठी ।

SGDF
Sri Gargeshwari Digital Foundation

स्त्रीविषयस्येत्यवयवषष्ठी। लघावन्त इति। एकादेशात्प्रागस्य प्राप्तिः। ध्वनितञ्चेदमिति। तत्सूत्रभाष्ये क्यन्विधौ हलग्रहणम्। क्यन्विधौ हलग्रहणङ्कर्त्तव्यमिह मा भूत्। वार्या ऋत्विज इत्यभिहितम्। तत्र कैयटः। क्यन्विधाविति। ईडवन्दवृशंसदुहां ण्यत इति वार्यशब्दस्याद्युदात्तविधानादेतज्ज्ञायते। तत्र ह्रीङिवन्दिभ्यामात्मनेपदिभ्यां साहचर्याद्वृशब्देन वृणातिर्गृह्यते। ततो भाष्येऽप्यस्योपसंख्यानं कर्त्तव्यम्। आज्यम्। यदि क्यप्वृद्धिर्न प्राप्नोति। तस्मात्स्वरदेशः। यदि ण्यत्। उपधालोपो न प्राप्नोति तस्मात्स्वरदोषः। ननु चोक्तं वृद्धिर्न प्राप्नोति। आङ्पूर्वस्य प्रयोगो भविष्यतीति। अत्र तस्मात्स्वरदोष इति प्रतीकमुपादाय ननु स्वरे भेदो भवति। क्यपि सत्याद्युदात्तम्पदम्। ण्यति सत्यन्तस्वरितम्। नैष दोषः। नञ्विषयस्यानिसन्तस्येत्याद्युदात्तविधानादिति कैयटेनोक्तम्। एवं व्युत्पत्तिमार्गप्राप्ते ण्यदन्ते नञ्विषयस्येत्यस्योपन्यासेन लक्ष्यानुसारेण फिट्स्वरस्य बाधकताऽन्यत्राप्यूहनीयेति ध्वनितमिति। स्वान्तस्याश्मादेरिति सूत्रम्फिष इत्यस्य यद्बाधकन्तद्बाधनार्थन्तद्बाधकप्रदर्शनस्य मूल एव कृतमश्मादेरिति पर्युदासस्योपपादनावसरे उक्तसूत्रेऽप्रसिद्धत्वशङ्कावारणायाह। इदमिति। स्वाङ्गत्वापेक्षत्वादिति। न च टाप उत्पत्तौ स्त्रीत्वापेक्षास्तीति साम्यमिति वाच्यम्। प्रातिपदिकसंज्ञाप्रवृत्तिकाले लिङ्गस्याप्युपस्थितिसत्त्वेन लिङ्गाधिक्ये तस्मिन् द्योतनीये टाबादेरुत्पत्त्या लिङ्गोपस्थितेरुभयोत्पत्तिप्राक्कालिकत्वेन नलिङ्गोपस्थितिकृतं टापो बहिरङ्गत्वमित्याशयात्। एतेन स्वरस्य बहिरङ्गत्वन्ध्वनितम्। इदमल्पापेक्षमन्तरङ्गं बह्वपेक्षं बहिरङ्गमिति वादिमतेन। चिन्त्यमिति। अत्रेत्थञ्चिन्तयन्ति। स्वाङ्गशिटामिति सूत्रेऽत इत्येवं तदन्तविधिनान्तपदार्थलाभेऽन्तवचनमुद्देश्यतावच्छेदकसंज्ञाप्रवृत्तिकालिकमदन्तत्वं सूत्रप्रवृत्तौ नियामकमिति शिखशब्दस्य यदा प्रातिपदिकसंज्ञा तदैव स्वाङ्गेत्यस्य प्राप्तिरेकादेशस्य तु टाबुत्पत्त्युत्तरम्प्राप्तिरेतावतैव स्वरस्यैकादेशापेक्षयाऽन्तरङ्गत्वमिह विवक्षितमिति तन्मतमेवाह। तस्मादिति। स्वयम्प्रत्युदाहरणमाह। अस्थ्यादीति। नन्वन्तशब्दोपादानसामर्थ्यात्पूर्वोक्ता कल्पना चेत्तदा ग्रीवाशब्दे वाशब्दस्योदात्तस्य श्रवणङ्ग्रीवायामित्यत्र यत्तद्विरोध इत्यत आह। ग्रीवायामिति। सिद्धमिति। तथा च सम्वत्सरशब्द एव चेद्वत्सरशब्दोपा-

SGDF
Sri Gargeshwari Digital Foundation

दानेनान्तोदात्तत्वसिद्धिः प्रयोजनन्तदा चित्वादेव सिद्धमतोऽन्यत्रास्य सूत्रस्य प्रवृत्तिर्वक्तव्येति भावः। उदाहरणान्तरमेवाह। परिवत्सरेति। अनेन। प्रकृतसूत्रेण। तद्व्यर्थमिति। सम्पूर्वाच्चिदित्यत्र चिदित्यस्योपादानं व्यर्थमित्यर्थः। पङ्क्त्यादिसूत्रेति। तेन पातेर्डतिरित्यस्य व्यावृत्तिः। साधावित्यस्यार्थमाह। प्रवीण इति। वाच्य इति शेषः। स्वाङ्गाख्यायाम्। दक्षिणस्येत्यनुवर्त्तते। बाधकबाधनार्थत्वादिति। तथा च परस्याप्यनेन बाधः स्यादिति भावः। अन्तोदात्त इत्येवेति। मण्डूकप्लुत्याऽनुवर्त्तत इति शेषः। कृष्णो मृग इति। गुणोपसर्जनद्रव्यवाच्ययम्। अत्र वर्णानान्तणेत्येव प्रवर्त्तते। पक्षे। वा नामधेयस्येत्यस्याप्रवृत्तौ। आद्युदात्तत्वमिति। वाग्रहणसामर्थ्यादिति शेषः। अन्तोदात्तत्वमेवेति। फिट्स्वरेणेति शेषः। शुक्लशब्दे प्रकारान्तरमप्याह। ऋज्रेन्द्रेतीत्यादि। शङ्केति। वस्तुतोऽस्वरितत्वादेव तत्सम्बन्धाभावे सिद्धे स्पष्टार्थमेवान्तशब्दोपादानमिति भावः। अङ्गुष्ठोदकेतिसूत्रस्याङ्गुष्ठशब्दस्य प्रयोजनम्मूलेऽभिहितमिति तत्परित्यज्योदकशब्दोपादानस्य प्रयोजनमाह। उदकस्येत्यादिना। वशाशब्दस्य चित इत्यन्तोदात्तत्वे सिद्धे नियमार्थमुपादानमित्याह। मूले वशाग्रहणमिति। तत्। आद्युदात्तत्वम्। आद्युदात्त एवेति। यतोऽनाव इत्यनेनेत्यादिः। ज्ञापकादित्येतत्पर्यन्तानुसरणमनुचितमित्याशयेनाह। स्त्रीविषयेति। आब्विषयाणामित्येतद्वाक्ष्टे। नित्येत्यादिना। अवतीति। अत्र अशब्दः अवशब्दपरस्तस्मान्मतुप्। बहुलेति। आर्या बहुलेति कृत्तिकापर्यायौ। ताभ्यां स्वार्थिके के इत्वमित्याशयेनाह। आर्यिकेत्यादि। अत्र। घृतादिगणे। ज्येष्ठकनिष्ठयोः। वयसीत्यस्य प्रयोजनमाह। वृद्धयुवेति। उदात्तग्रहणानुवृत्तेरिति। एवञ्च विल्वतिष्ययोरन्तः स्वरित उदात्तो वेति सूत्रार्थ इति भावः।

॥ इति प्रथमः पादः ॥

वलिशब्दस्य स्वभावात् स्त्रीलिङ्गता। तस्य वाच्यार्थमाह। वलिशब्द इति। मरुद्वृधेत्यत्र मरुशब्दो देशविशेषवाची। लघुर्बहुरिति। नैतौ नित्यस्त्रीलिङ्गौ। न च वल्यादिशब्दस्यापि वलिरिवेत्यर्थे लिङ्गान्तराभिधायकत्वसम्भव इति वाच्यम्। प्रवृत्तिनिमित्तैक्ये सतीत्यस्यापि विवक्षितत्वा-

SGDF
Sri Gargeshwari Digital Foundation

त् । विषयपदोपादानसामर्थ्यमत्र वीजम् । नब्विषय । अत्र पूर्वसूत्राद्विषयपदानुवृत्त्यैव सिद्धे विषयेति व्यर्थमित्यत आह । क्रस्वेत्यादि । यथाश्रुते वैलक्षण्यमलभ्यमित्याह । क्रस्वान्तस्येति । नपोऽनिसन्तस्येत्यत्र पूर्वसूत्राद्विषयपदानुवृत्तिः प्रदर्शनीया सा स्त्रीविषयस्येति पाठे विषयपदस्य समासघटकतया क्लिष्टेति पूर्वसूत्रस्य पाठप्रदर्शनमेतत् । पुनर्विषयपदमिति । अयम्भावः । नेह विषयपदन्नित्यनपुंसकलाभाय । तस्य पूर्वसूत्रस्थविषयपदानुवृत्त्यैव लाभात् । किन्तु नपुंसकविषयतासम्बन्धि यत्तस्य लाभाय । एवञ्चोपलक्षणीभूतो नपुंसकविषयतासम्बन्ध इहाश्रीयते । लिङ्गव्यत्ययेन प्रत्ययलोपेन वा यत्प्रातिपदिकं लिङ्गान्तरसम्बद्धन्तदपि नपुंसकविषयतासम्बन्धोपलक्षितं भवत्येवेति । ध्वनितञ्चेदमिति । तत्र ह्री च द्विवचन इति सूत्रस्य किमुदाहरणमिति प्रश्ने आदौ अक्षी ते इन्द्र पिङ्गले इत्यभिहितम् । ततश्छान्दसत्वात्पुंवद्भावेन ; श्यादेशनुमागमयोरप्राप्तौ प्रथमयोः पूर्वसवर्ण इत्यनेनाक्षि औ इति स्थिते एकादेश इत्याशयेन नैतदस्ति पूर्वसवर्णेनाप्येतत्सिद्धमित्युक्त्वा अक्षीभ्यान्ते नासिकाभ्यामिदमुदाहरणमित्युक्तम् । इदञ्चाप्युदाहरणमक्षी ते इन्द्र पिङ्गले । ननु चोक्तम्पूर्वसवर्णेनाप्येतत्सिद्धमिति । नुमा व्यवहितत्वात्पूर्वसवर्णो न प्राप्नोति । छन्दसि नपुंसकस्य पुंवद्भावो वक्तव्यः । मधोस्तृप्ता इवासते इत्येवमर्थम्पुंवद्भावेन नुमो निवृत्तिर्नुमि निवृत्ते पूर्वसवर्णेनैव सिद्धम् । स्वरार्थस्तर्हीकारो वक्तव्यः । उदात्तस्तर्हीकारो वक्तव्यः उदात्त ईकारो यथा स्यान्नपुंसकस्वरो मा भूत् । नब्विषयस्यानिसन्तस्येत्यनेनाद्युदात्तत्वम्मा भूदित्यर्थः । मधोस्तृप्ता इत्येतदर्थम्पुंवद्भाव आवश्यक इत्याशयेनाह । ननु च पुंवद्भावातिदेशादेव स्वरो भविष्यति । अशक्यः पुंवद्भावातिदेशस्तत्राश्रयितुमिह हि दोषः स्यात् । मध्वस्मिन्नस्ति मधुर्मास इति । सामान्ये नपुंसकमात्रस्य पुंवद्भावो न किन्तु क्व चिदेवेत्याशयेनाह । स तर्हि पुंवद्भावो वक्तव्यो न वक्तव्यः । प्रकृतम्पुंवदिति वर्त्तते इति भाष्ये उक्तम् । ननु च पुंवद्भावेत्युक्तिरव्युत्पत्तिपक्षाभिप्रायेण व्युत्पत्तिपक्षे तु अग्नेर्निदिति निक्त्वादाद्युदात्तत्वेन भाव्यम् । अत्र मधुर्मास इति प्रतीकमुपादाय कैयटेन प्रतिपादितम् । मत्वर्थे मासतन्वोः मधोर्ञ चेति यत उत्पन्नस्य लुकि मासि पुंसि मधुशब्दो वर्त्तत इत्याद्युदात्तत्वन्न स्यात् । इत्यन्तेन ग्रन्थेन भाष्य-

SGDF
Sri Gargeshwari Digital Foundation

कृता पुंवद्भावातिदेशस्याशक्यत्वमिति प्रतिपाद्य ई च द्विवचन इतीकारादेशस्यावश्यकत्वं सूत्रारम्भवादिरीत्याभिहितम्। ततः स तर्हि पुंवद्भावो वक्तव्यो न वक्तव्यः प्रकृतम्पुंवदिति वर्त्तत इत्यनेन पुंवद्भावस्यावश्यकत्वप्रदर्शनेनेच द्विवचने इत्यनेनेकारादेशविधानन्न कार्यम्। स्वरस्य सिद्धिस्तु यस्यान्यत्र नपुंसकत्वन्दृष्टन्तस्यास्त्वत्यपि नपुंसकत्वे आद्युदात्तत्वम्भवति नपुंसकविषयतासम्बन्धस्योपलक्षणभावेनाश्रयणादिति ध्वनितम्। लुगत्र मधुशब्दादुत्पन्नस्य लुगकारेकाररेफाश्च वक्तव्या इत्यनेन कार्यः। यत्त्वत्र कैयटेन पुंवद्भावस्य मधोर्ग्रभ्णातीत्यर्थमावश्यकत्वेऽपि वाक्यभेदेन सम्बन्धः क्रियते छन्दसि नपुंसकम्पुंवदित्येकं वाक्यम्। अस्थ्यादीनाञ्छन्दसीकारादेशो वक्तव्य इति द्वितीयं वाक्यमित्युक्तन्तत्तु सूत्राभिप्रायवर्णनमिति न तद्विरोधः। तृणधान्यानाञ्च द्व्यषाम्। धान्यवाचकस्य तिला इत्युदाहरणम्मूले। न चास्य धान्यवाचकत्वे माघे मासि तिलभक्षणमेकादश्यां विरुध्येतेति वाच्यम्। तन्माससम्बन्ध्येकादश्यामेव वचनबलात्प्रवृत्तेः। तिला इत्यस्याद्युदात्तत्वङ्कैयटासम्मतमिति शङ्कते। यत्त्विति। इदञ्चिन्त्यमिति। तिलशब्दस्य वृतादौ पाठकल्पनञ्चिन्त्यमित्यर्थः। इदञ्चिन्त्यमिति। द्व्यषामित्यस्य गोधूमा इत्यत्राद्युदात्तत्वाप्रवृत्त्यभिधानन्त्व्योक्तञ्चिन्त्यमित्यर्थः। त्रः सङ्ख्यायाः। नान्तरेफान्तसङ्ख्यावाचकस्यादिरुदात्तः स्यात्। सङ्ख्याया इति स्त्रीलिङ्गनिर्द्देशस्सङ्ख्याशब्दार्थगतस्य स्त्रीत्वस्य नान्तरेफान्तशब्दे आरोपेण। ननु पञ्चेत्यत्र नलोपे कृते न नान्तत्वन्नलोपासिद्धत्वेन तथात्वन्तु वक्तुमशक्यम्भिन्नकालिकत्वादित्यत आह। पञ्चेत्यादाविति। पाणिनीये इति। शास्त्रे कर्त्तव्य इति शेषः। एतदेवाह। अनुदात्तेत्यादिना। सप्ताष्टशब्दयोरस्यातिव्याप्तिं वारयति। सप्ताष्टशब्दाविति। मूलानुक्तं रेफोदाहरणं स्वयमाह। रत्योदाहरणमित्यादिना। समास उदाहृत इति। अस्य अस्माभिरित्यादिर्बोध्यः। चतुष्कपाल इति समास उदाहृत इत्यर्थः। स्वाङ्गशिटाम्। स्वाङ्गवाचिनामदन्तानां शिटाञ्चादिरुदात्तः स्यात्। इदम्। स्वाङ्गेति सूत्रम्। तेन। तादृशव्याख्यानेन। सर्वादिशब्देऽतिप्रसङ्गं वारयति। सर्वोभेति। तथा दर्शनात्। अन्तोदात्तस्य दर्शनादित्यर्थः। परो मात्रयेति। परशब्दस्य सर्वनामत्वेन लोके त्वाद्युदात्तत्वमेव भवति। ननु सर्वादिशब्दवत्परशब्दोऽपि गणेऽ-

न्तोदात्तः पठनीयस्तावतैव सिद्धौ व्यत्ययकथनमसङ्गतमत आह । परमिति ।
कुपूर्वमिति पाठे पूर्वशब्दस्य प्रथमान्तत्वादादिरित्यनेन सामानाधिकरण्यस-
म्भवोऽस्ति । कुपूर्वाणामिति पाठे तु कथमस्य सम्बन्ध इत्याशङ्कायामाह । तस्य
समूह इति । ननु पूर्वशब्दस्य सर्वनामत्वादामः सुट् स्यादत आह । सर्वनाम-
कार्यन्त्विति । कई मादिरयमिति । तेनादिर्द्वितीयो वा पर्यायेणोदात्तौ । क्री-
त्यादीति । कुपूर्वमिति कथमित्यर्थः । हरदत्तोक्तपाठः । कुपूर्व इति पाठः ।
आहुरित्यस्वरसवीजन्तु काविर्त्येव सिद्धे पूर्वशब्दोपादानमेवं सत्यनर्थकमाप-
द्येतेति । खय्युवर्णम् । कृत्रिमाख्येत्यस्य कृत्रिमस्याख्या पुरुषप्रयत्नसाध्यस्या-
ख्येत्यर्थः । वन्धुकः । पुष्पविशेषस्याख्येत्यर्थः । ऋवर्णान्तत्वात्प्राप्तमतिप्रसङ्गं
वारयति । पितेत्यादि । व्यर्थ इति । सस्वरस्य तकारस्य प्रथमोपादानेन ग्रहण-
सम्भवादिति भावः । बोध्य इति । तेन श्वेतो वाजीत्यत्रान्तोदात्तपाठस्योपप-
त्तिः । क्रस्वान्तस्य । अत्रादिरिति सम्बध्यते । प्राज्ञमिति । कप्रत्ययान्तत्वादन्तो-
दात्तोऽयम् । ताच्छील्ये किमिति । ताच्छील्ये गम्ये इत्यर्थकन्ताच्छील्य इति
पदङ्किमर्थमित्यर्थः । इत्येके इति । लोके प्रवीणे कुशलशब्दप्रयोगेऽपि ताच्छी-
ल्यन्न प्रतीयत इत्यस्वरसवीजम् । अत एवाह । अन्तोदात्त इति । मूले अच्च-
स्यादेवनस्य । देवनशब्दः करणल्युडन्तः । अर्द्धस्यासमद्योतने । असमद्योतने
योऽर्द्धशब्दस्तस्यादिरुदात्तः । समस्य समांशकस्य द्योतने प्रतिपादने फिट्स्वरे-
णान्तोदात्तत्वम् । पीतद्रर्थानाम् । आदिरिति सम्बध्यते । ताच्छील्यानवगमा-
त् । समुदायेन संज्ञानवगमात् । लुबन्तस्योपमेयनामधेयस्य । उपमेयनामधेय-
स्येत्यस्योपमेयवाचकस्येत्यर्थः । चञ्चेव चञ्चेति । इवे प्रतिकृताविति कनो लु-
मनुष्य इति लुप् । न च लुप्संज्ञाऽभावस्य तस्य च नावयवत्वमिति चरमावय-
ववाचकान्तशब्दार्थाप्रसिद्धिरिति वाच्यम् । लुबन्तस्येत्यस्य लुब्विशिष्टस्येत्यर्था-
त् । वैशिष्ट्यञ्च स्वविषयकज्ञानाधिकरणक्षणोत्पन्नध्वंसप्रतियोगिसमयवृत्तित्व-
सम्बन्धेन । अग्निर्माणवक इति । अत्राग्निशब्द उपमानवाची । माणवकशब्द
उपमेयवाचकस्स च न लुबन्त इति । यद्यप्यपत्ये कुत्सिते मूढे मनोरौत्सर्गिकः
स्मृतः । नकारस्य च मूर्द्धन्यस्तेन सिध्यति माणव इत्युक्तेर्माणवशब्दोऽजन्त-
त्वादाद्युदात्त एव । तथापि ततः स्वार्थिके के प्रत्ययस्वरेणान्तोदात्तोयमिति

SGDF
Sri Gargeshwari Digital Foundation

भवति प्रत्युदाहरणमिति बोध्यम् । वरणा इति । अन्तोदात्तोऽयम् । नामेत्यादि किमिति । उपमेयस्येत्येवास्तु । उपमेयत्वञ्चार्थस्य न च तस्य लुबन्तत्वमिति उपमेयशब्दस्य तद्वाचके वृत्त्येष्टसिद्धिर्भविष्यतीति प्रश्नः । न तु तस्य संज्ञेति । नामधेयशब्दः संज्ञापर इति भावः । न वृक्षपर्वत । उपमेयनामधेयस्येत्यनुवर्त्तते । विशेषपदोपादानाद्विशेषवाचकस्यैवोद्देश्यत्वं निषिधे । तेन स्वरूपस्य व्यावृत्तिः । एवञ्च वृक्ष इव वृक्षः पर्वत इव पर्वत इत्यत्र पूर्वेणाद्युदात्तत्वम्भवत्येव । राजविशेष । आङ्गेत्यत्राङ्गशब्दः क्षत्रियसमानशब्दाज्जनपदात्तस्य राजन्यपत्यवदित्यञन्तात्कनि तस्य लुपि तदन्त उदाहरणम् । अङ्गाः प्रत्युदाहरणमिति । बहुत्वे लुप् । तदन्तात्कनो लुप् । एवञ्च । पूर्वसूत्रानुवृत्तौ च । राजविशेषवाचकस्य लुबन्तस्योपमेयनामधेयस्य चेद्भवस्यैवेति नियमोऽत्राभिप्रेतः । वृत्त्युपपत्तये मतविशेषमाह । यमन्वाशब्द इति । कालिङ्ग इत्युदाहरणमिति । अत्र कालिङ्ग इव कालिङ्ग इत्युदाहरणे बोध्यम् । इच्छन्तीति । एतन्मतेऽक्तकन्कमेवोदाहरणम्बोध्यम् । लघावन्ते । अस्यादिरित्यधिकारे पाठेऽयसम्बन्धे प्रमाणमाह । अत एवेति । आदिरित्यस्यासम्बन्धादेव । नन्वेवं वराहशब्दोऽपि मध्योदात्तः स्यादत आह । वराहशब्दस्त्विति । अनेनैवाद्युदात्तत्वसिद्धये शङ्कते । न चेति । लघावन्त इत्यादि किमिति । बह्वषो गुरुरित्येवास्त्विति प्रश्नः । वातप्रमीरिति । अत्र संयोगे गुर्वित्यनेन तकाराकारस्यापि गुरुत्वादस्याप्युदात्तत्वापत्तिरिति भावः । सिद्धान्ते त्वत्रान्त्यस्य लघोर्द्वयोर्वा लघ्वोरभावादेतत्सूत्राप्रवृत्तौ कृदुत्तरपदप्रकृतिस्वरेणान्तोदात्तत्वम्भवति । वातप्रमीरित्यत्रान्त्यस्यालघुत्वं सञ्जननशब्देन्त्यस्य द्वयोर्वा लघुत्वेऽपि गुरोर्न तत्परत्वमिति प्रदर्शयितुमनयोरुपादानम् । कपालीशब्दस्य निप्रत्ययान्ततयाऽन्त्यस्य लघुत्वसम्भावनयाऽस्य सूत्रस्य प्रवृत्तिशङ्कां वारयति । नान्तत्वादिति । नान्तत्वेन सर्वनामस्थाने परतो दीर्घे कृते नात्रान्त्यलघुपरत्वमिति भावः । किसलयमिति । गुरुपदाभावेऽन्त्यलघुपरकस्य लकाराकारस्य गुरुद्वयपरकस्य सकाराकारस्य वा उदात्तत्वापत्तिरिति भावः । न च किसलयशब्दे प्राप्तमप्येतत्सूत्रं यान्तस्याऽन्त्यात्पूर्वमित्यनेन परत्वाद्बाध्येतेति वाच्यम् । किसलयकमित्यस्योपलक्ष्यत्वात् । अस्य प्राप्तिमात्रेण । स्त्रीविषयेत्यस्य प्राप्तिमात्रेण । बाधादिति । तथा च द्वितीय-

SGDF Sri Gargeshwari Digital Foundation

स्योदात्तत्वमिह भवति। उदाहरणन्दत्तमिति । मूले इति शेषः । अन्तुपूर्वाणाभिस्य । व्यधिकरणो बहुव्रीहिर्मूले दर्शितस्तद्बीजमाह । अन्त्वादेरितीति। अन्वयानापत्तेरिति । सामानाधिकरण्ये नान्वयानापत्तेरित्यर्थः। यदि त्वचोः पूर्वः फिषोऽवयव इत्युच्यते तदा व्यर्थत्वं क्लिष्टत्वञ्चेति भावः। शकुनीनाम्। पक्षिविशेषवाचकानामित्यर्थः। बहुवचनस्वारस्यात्। न तु शकुनिशब्दस्येत्यर्थः कार्यः। अन्त्यात्पूर्वमिति। पूर्वशब्दस्यावधिसाकाङ्क्षार्थप्रतिपादकतयाऽन्त्यस्य लवावन्त इत्यत्रान्तस्य निमित्तत्वेन श्रवणादिह तदर्थस्यावधित्वमिति भावः। एतेन। मध्योदात्तदर्शनेन। बह्वीहिस्त्विति। लघुः पूर्वो यस्य तस्य समुदायस्यादिरित्यर्थकल्पनया तित्तिरित्यादाविष्टसिद्धेः सम्भवादित्यभिप्रायः। अनयोः। ऋतुप्राणिवाचकयोः। मूले यथालक्षणमप्राप्तमिति। उत्सर्गबाधकसूत्रेण प्राप्तमित्यर्थः। अन्तोदात्तत्वमिति। उक्त्वा।तः प्राप्तसूत्रेणान्तोदात्तत्वमित्यर्थः। कैयटश्चेति। चिन्त्य इति शेषः। धान्यानाम्। ह्रस्वान्तानामित्यत्र कर्मधारयः। चान्तानामित्यत्र ककारषकारौ पृथङ्निमित्ते चन्तानामिति वक्तव्ये चान्तानामिति कथनेन षकाराकारौ विवक्षितः। एवञ्चकाराकारौऽपि चान्तानामिति तु सौत्रः प्रयोगः। लक्ष्यानुसारिव्याख्यानादित्याशयेनाह । ह्रस्वसंज्ञकेत्यादि। त्वधान्येति। तृणविशेषवाचकस्य ग्रहणार्थमित्यर्थः। केचित्तु तत्र सूत्रे ईषान्तस्येतिसूत्रादादिर्वेत्यस्यानुवर्त्तनात्तस्य वैकल्पिकत्वेन मध्योदात्तोऽप्ययन्तृणविशेषवाची भवतीत्याशयेन तत्र पाठ इत्याहुः। ननु चान्तानामिति सूत्रे उक्तमिह त्वकारान्तमुदाह्रियत इति तद्विरोध इत्यत आह। हलन्तानामिति। जनपदशब्दानाम्। जनपदवाचिनामजन्तानामादिरुदात्तः। तस्याप्यनेनेति। अपिना फिष् इत्यस्य सङ्ग्रहः। अङ्गो राजेति। ततः क्षत्रियसमानशब्दादितिविहितप्रत्ययस्य जनपदे लुबिति लुप्। एवन्दरच्छब्देऽपि। ह्यादीनाम्। लान्तानामित्यत्र लेति समुदायो विवक्षितः। न चैवमसंयुक्तेति व्यर्थम्। हलोऽनन्तरा इति व्यञ्जनसमुदायस्यैव संयोगसंज्ञा विधीयते न त्वज्घटितस्येति वाच्यम्। असंयुक्तेत्यस्य व्यञ्जनान्तरासंश्लिष्टो यो लस्तदन्तानामित्यर्थात्। पूर्वमित्यस्यान्त्यात्पूर्वमित्यर्थः। अन्ये तु द्वयोरुदात्तयोरसति प्रयत्ने समावेशादर्शनादन्तः पूर्वमित्यनेनैव पर्याये लब्धे वाशब्दोऽत्र चार्थे। तेन प्रकरणप्राप्तस्यादि-

SGDF
Sri Gargeshwari Digital Foundation

रित्यस्यापि प्रकृते सम्बन्धस्तेनादेरपि पक्षे उदात्तत्वम्भवतीत्याहुः । इगन्तानाञ्च द्व्यषाम् । इगन्तानाञ्चेत्यत्र चशब्दो वाक्यालङ्कारे । वेत्यनुवर्त्तते इति । विकल्पार्थकः प्रकृते वाशब्दोऽनुवर्त्तते शब्दाधिकारात् । वाशब्दाननुवृत्तिमभिप्रेत्याह । छान्दसत्वादिति । केषाञ्चिन्मतमाह । ये त्विति । एतन्मते कृषिशब्दः प्रत्युदाहरणम् ॥

॥ इति द्वितीयः पादः ॥

अभिमान इति । एकस्यैवोभाभ्यामुदात्तत्वस्यैव प्राप्त्या विरोधाभावेन परत्वादित्यसङ्गतमित्येवमुक्तिः । अस्योदाहरणन्तु जघनमिति बोध्यम् । उदाहरणदिगिति । तेनात्र कूर्पर इत्युदाहरणमिति ध्वनितम् । रसना । वदनमित्यत्र तु स्वाङ्गशिटामित्याद्युदात्तत्वम् । मादीनाञ्च । मादीनां त्र्यषान्द्वितीयमुदात्तम् । अस्योदाहरणं यन्मूले मलय इत्युदाहृतन्तदन्यथा सिद्धमित्याह । मलय इत्यादिना । संज्ञाभूतः शब्दप्रवृत्तिनिमित्तकः । मकरवरूढेत्यत्र तु जातिप्रवृत्तिनिमित्तको गृह्यते । इति न्यायेनेति । एवमुक्तिः प्रातिपदिकस्य कार्येऽपि प्राचाम्मते त्वस्य प्रवृत्तिमभ्युपेत्य । वस्तुतस्तु जातिविशिष्टस्य शीघ्रोपस्थितत्वाद्वाचकतासम्बन्धेन तद्विशिष्टग्रहणम् । जलजन्तुविशेषे प्रसिद्धोऽयम् । शादीनां शाकानाम् । शकारादीनां शाकवाचिनान्त्र्यषान्द्वितीयमुदात्तम् । मूले शीतन्याशतपुष्पा इत्युक्तम् । तत्र शीतन्येत्युदाहरणम् । तेन । आद्युदात्तत्वविधायकमिति कथनेन । कैयटमतं वृत्तिविरुद्धमित्याह । फिडिति । त्र्यच्त्वाभावादिति । उभयोरप्युदाहरणत्वेनोपन्यास इति वादिमतमसङ्गतमित्यनेन कथितम् । कैयटादिरीत्येति । तन्मते त्र्यषामित्यस्यात्रासम्बन्धादिति भावः । केचित्त्विति । त्र्यच्पदस्य त्रित्वसंख्याविशिष्टाच्परतया शते पञ्चाशदिति रीत्या चतुरच्कादिष्वपि त्र्यषः सद्भाव इति भावः । वदन्तीति । अनेनास्वरसः सूचितः । स चोत्तरसङ्ख्यायाः पूर्वसंख्याबाधकत्वस्य न हि त्रिपुत्रो द्विपुत्रव्यपदेशं लभते इत्यादौ सुप्रसिद्धतया एकाच्कद्व्यच्कमेव प्रत्युदाहरणमित्यसङ्गतमिति । पान्तानाङ्गुर्वादीनाम् । स्वरविधौ व्यञ्जनमविद्यमानवदित्यस्य सामान्यतः प्रवृ-

SGDF
Sri Gargeshwari Digital Foundation

त्तिमभ्युपेत्य पादप इत्युदाहरणम्मूलेऽभिहितम् । हल्स्वरप्राप्तौ स्वरोद्देश्यके विधौ वा तत्प्रवृत्तिरिति सिद्धान्ते त्वस्यातप इत्येवोदाहरणम्पादप इत्यादौ तु स्वरान्यत्वयो बोध्यः । लौकिके त्वाद्युदात्तत्वमेव लघावन्त इत्यनेनेति बोध्यम् । पान्तानाङ्किङ्गर्दभ इत्यादिग्रन्थस्तु तस्याः परिभाषायाः सामान्यतः स्वरविधौ प्रवृत्तिमभिप्रेत्य । युतान्य । अव्ययपूर्वपदप्रकृतिस्वरे प्राप्ते इति । अयुतशब्दस्य सङ्ख्याविशेषे रूढत्वेऽपि संज्ञाशब्दानां व्युत्पादनमवयवार्थारोपेणेति प्रकृतेऽव्ययपूर्वपदप्रकृतिस्वरप्रवृत्तिः । मकरवरूढ । अत्रादिरित्यस्योपादानाद्द्वितीयाधिकारबाधो मा भूदित्याशयेन वाशब्दोपादानम् । एवञ्च मकरादौ पर्यायेणाद्देर्द्वितीयस्य वोदात्तस्य श्रवणम् । वरूढ इतीति । अस्यादिरिति शेषः । आदिशब्देन सङ्ख्याह्वान्दर्शयति । पारेवत इत्यादिना । मकरः । मकरो यादसि ज्ञेयो निधिराशिप्रभेदयोः । वरूढः । अयं सबलवाची । वरूढः सबलेऽपि स्यादिति । पारावतः । पारावतः कलरवे शैले मर्कटतिन्दुके । वितस्ता । नदीविशेषे प्रसिद्धोऽयम् । इक्षुः । अस्याभिधेयं व्यक्तम् । आर्जिः । अर्जनेऽव्युत्पन्नोऽयम् । द्राक्षाकलाः । द्राक्षायाः कला इत्यर्थः । उमाः । उमोऽतसीहैमवतीहरिद्राकीर्त्तिकान्तिषु । काशः । दिशः । काशीनम् । काशीनः । काश्या इन इत्यर्थः । अयमिति । सुगन्धिते जनशब्द इत्यर्थः । नपः फलान्ता । सूत्रे लिङ्गवचनस्याविवक्षितत्वान्नप इत्येकवचनान्तस्य फलान्तानामिति बहुवचनान्तेन सामानाधिकरण्यमविरुद्धम् । केचिन्मते फ इति षष्ठ्यर्थे प्रथमा । अन्ये त्विति मते फाशब्दाकारस्य षष्ठ्येकवचने आत इति योगविभागाल्लोपः । यान्त्यस्यान्त्यात्पूर्वम् । अत्रादिर्द्वितीयोवेत्यस्यासम्बन्धार्थमन्त्यात्पूर्वमित्युपात्तम् । न कश्चिद् विशेष इति । एतेनैतस्य सूत्रस्य कुलाय इति नासाधारणप्रयोजनमित्यभिहितम् । यान्तस्य ना । षष्ठ्यर्थे प्रथमा । अत्र लघुपदस्यासत्त्वमभ्युपेत्योदाहरणान्याह । नानेत्यादि । इति पाठ इति । थान्तस्य नालघुनी इति पाठ इत्यर्थः । केचित्त्विति । एतन्मते थान्तस्येत्यत्र थश्च आश्चेति द्वन्द्वगर्भो बहुव्रीहिः । तत्र आकारघटितं वाक्यं लघुशब्दरहितम् । तेन पूर्वोक्तोदाहरणानामपि सङ्ग्रहः । सम्बधात इति । मण्डूकप्लुत्येत्यादिः । सांकाश्यकाम्पिल्य । आदिर्वेतिवर्त्तत इति । मकरवरूढेतिसूत्रादादिर्वेतिमण्डूकप्लुत्या सम्बध्यत इत्य-

SGDF
Sri Gargeshwari Digital Foundation

र्थः। अत एव। आदिपदसम्बन्धादेव। ननु कैयटोक्तावन्त इत्यप्रकृतस्याभिधानम्। किञ्च द्वितीयमित्यस्यानभिधानेन न्यूनता चेति दोषद्वयमत आह। अत्रान्तशब्दे नेति। काशिकायां विरोधोऽप्येवमेव परिहर्त्तव्य इत्याह। एवमिति। इत्येव सिद्धे रिति। न चाधुनापि द्वितीयोऽन्त्यात्पूर्व एवेति त्रयाणां ग्रहणं व्यर्थमिति वाच्यम्। आदेरप्युदात्तत्वसम्पादकत्वेन चारितार्थ्यात्। ईषान्तस्य ह्रयादेरादिर्वा। अत्रादेरुदात्ताभावेऽन्तोदात्तत्वम् फिष इत्यनेन प्राप्तमपि न किन्तु द्वितीयस्य एतत्सूत्राव्यवहितप्राक्सूत्रे द्वितीयमित्यस्य सम्बन्धात्। न च प्रागीषादिति प्रागभिहितमिति कथमत्र द्वितीयमित्यस्य सम्बन्ध इति वाच्यम्। तत्र प्रागीषादिति नापूर्वङ्किन्तु प्रकृतसूत्रे विभिन्नार्थकादिपदोपादानेन च तद्घटितवाक्ये द्वितीयमिति न सम्बध्यते इत्याशयकमेव वा ग्रहणेनादेरुदात्ताभावे तु विरोधाभावेन द्वितीयमित्यस्य सम्बन्धः स्यादेवेत्याशयात्। अत एवाह। पक्षेऽधिकारादिति। मञ्जूषेति। अत्र ईषान्तेत्यनेन प्राप्ताद्युदात्ताभावे भादीनाञ्चेति द्वितीय उदात्तः। अम्बरीषमिति। अत्राद्युदात्ताभावे लघावन्त इति सूत्रेण तृतीयस्योदात्तत्वम्। उशीरदाशेर। अत्रादिरित्यनुवर्त्तते। वेति तु निवृत्तम्। हृदयशब्दोपादानस्य प्रयोजनमाह। अत्र हृदयेति। देवरग्रहणमिति। प्रकृतसूत्रे देवरपदोपादानाभावेऽप्यादेरुदात्तत्वन्द्वयोर्लघ्वोः परतः उस्थितस्य गुरोरिकारस्य तेनैव सिद्धमिति भावः। अनित्वग्राणनार्थमिति। तत्फलन्तु कृपालुशब्दे गुरोर्द्वितीयस्योदात्ताभावेऽन्तोदात्तत्वम्फिट्सूत्रेण भवति। केचित्त्विति। एतन्मते प्रकृतसूत्रे यदि देवरशब्दो न स्यात्तदा त्वन्तोदात्तत्वमेव घृतादीनाञ्चेत्यनेन स्यात्। देवरशब्दोपादानसत्त्वे तु घृतादिपाठसामर्थ्यात्पक्षे प्रकृतमाद्युदात्तत्वम्भवति अथ वा वेत्यनुवर्त्तते। एतदभावे तत्र पाठादन्तोदात्तत्वमिति भावः। केचिदिति। मुख्या इत्यर्थः। महिष्याषाढयोः। जायाचेष्टका च जायेष्टके जायेष्टकयोराख्येति समासः। द्वन्द्वान्ते श्रूयमाणस्याख्याशब्दस्य प्रत्येकं सम्बन्धः। मेत्यादि किमिति। महिष्यषाढयोरिति किमर्थमित्यर्थः। सिंहीति। इयमपि सिंहस्य या जाया तदाख्येति भावः। जायाशब्दस्यात्र भार्यापरत्वात्। जेत्यादिकिमित्ति। महिषीति राजपत्न्यां रूढोयन्न तु भार्यासामान्यवाची योजायाशब्दस्तद्बोध्यबोधक इति भावः।

SGDF
Sri Gargeshwari Digital Foundation

महिषीजायेति मूले महिषीशब्दस्तु जायापर्यायवाची । अषाढा उपदधातीत्य-षाषाढाशब्द इष्टकावाचकः । प्रत्युदाहरणे तु नचत्रवाचकस्तदाह । अषाढेति॥

इति तृतीयः पादः ।

शकटि शकव्योरत्तरम् । पर्यायेणेत्यस्य प्रयोजनमाह । अत्रोभ इति । युगपद्ग्रहणबोधितेत्यस्य इत्यर्थे स्यत्रार्थेऽन्वयः । इति पदेन अनुकरणभूतसमुदायस्य परामर्शः । अस्य वार्मा यमितिवद्विभक्तेरलुक् तत्फलम् । पर्यायेणेत्ये तत्फलम् । अनुवादकमिति । वस्तुतस्तस्या परिभाषाया अनित्यत्वज्ञापनार्थमिति मत्त्वम् । मूलेऽन्यथेति । ब्राह्मणनामधेयातिरिक्त इत्यर्थः । तेन यौगिकस्य लाभः । पारावत । ब्राह्मणनामधेयस्येत्यत्र न सम्बध्यते । उपोत्तमवर्जमिति यदुक्तस्तत्फलमाह । अत्र वशब्द इति । कपिकेश । एतयोश्छन्दसि अत्तरमत्तरम्पर्यायेणोदात्तम् । अच्छन्दसि स्वरप्रवृत्तिमाह। भाषायामिति । कपिरन्तोदात्त इति । इगन्तानाञ्च द्व्यषामित्याद्युदात्तत्वम्प्राप्तमपि न भवति घृतादित्वात् । न्यङ्स्वरौ । तदनुवादकम् । उक्तरीत्यादि इत्य स्वरितस्याऽनुवादकम् । तिल्पशिक्य । स्वरिताविति वचनविपरिणामेन सम्बध्यते । सूत्रस्यवार्त्तिकेनेति । नवसूरमर्त्तयविष्ठेभ्यो यदिति वार्त्तिकेन यत् स च स्वार्थे । प्रयुज्यते चेति । अस्त स्वरितो धान्यशब्दः प्रयुज्यते इत्यर्थः । स्वरितान्तोऽन्तोदात्तो वेति । कर्दमादीनाञ्चेत्यनेनाद्युदात्ते तदेकवाक्यतापन्नशेषनिघातेनान्त्यस्यानुदात्तत्वे उदात्तादनुदात्तस्येति स्वरितः । आद्युदात्ताभावे त्वन्तोदात्तः फिट्स्वरेण । त्वत्त्वसमसिमेतिसूत्रे विशेषानुपादानादाह । सर्वानुदात्तानीत्यर्थः । भाष्यप्रामाण्यादिति । तत्र हि प्रत्ययाद्युदात्तत्वधातोरन्तः । प्रत्ययाद्युदात्ताद्धातोरन्त इत्येतद्भवति विप्रतिषेधेन । प्रत्यय द्युदात्तत्वस्यावकाशः । यत्राऽनुदात्ताप्रकृतिः । समत्वं सिमत्वम् । धातोरन्तइत्यस्यावकाशः । यत्राऽनुदात्तः प्रत्ययः । पचति पठतीति । इहोभयम्प्राप्नोति । गोपायति । धूपायति । धातोरन्त इत्येतद्भवति विप्रतिषेधेनेत्युक्तम् । अत्र प्रत्ययाद्युदात्तत्वस्यावकाशप्रदर्शनावसरे लौकिके समत्वम् सिमत्वमिति प्रयो ऽदात्तत्वप्रदर्शनेन प्रकृते छन्दसीति न सम्बध्यत इति लभ्यते । निपाता आद्युदात्ताःच्यन्तेति प्रसङ्गं वारयति । अग्रुक्लीत्यादिना ।

SGDF Sri Gargeshwari Digital Foundation

मभ्यभिहीति । अत्राभिशब्दस्याद्युदात्तत्वाभावेऽन्तोदात्तत्वे सति यथादेशे उदात्तस्थानेऽयं यणिति द्वितीयाभिशब्दाद्याकारस्य स्वरितत्वम्भवति । इदं सूत्र-मिति । उपसर्गाश्चाभिवर्जमित्येतत्सूत्रघटकमुपसर्गाश्चेति पदमित्यर्थः । तद-भावज्ञापनाय । आद्युदात्तत्वाभावज्ञापनाय । एवमभिवर्जमित्यपि न वाच्य-मित्याह । अभिश्चैवमादिषु पाठ्य इति । एतच्च निपातत्वात्प्राप्तमप्याद्युदात्त-त्वमेवादीनामन्त इत्यनेन बाधिष्यत इति भावः । केचित्त्विति मते त्वभेरेव मादिषु न पाठ इति बोध्यम् । एवादीनामिति पाठं व्याचष्टे । एवादीति । गणे । चादिगणे । मूले तच्चिन्त्यमिति । सहशब्दस्य एवादिषु पाठादन्तोदात्त-त्वस्य न्यायसिद्धत्वात् । ते पुत्रसूरिभिरित्यत्रान्तोदात्तदर्शनाच्च । चिन्ताबीजञ्चि-न्त्यमिति यदुक्तन्तत्र साधकमाह । सहशब्दस्यापीति । ननु सहशब्दस्य निपा-तत्वेऽपि परत्वाद्विशेषविहितत्वाच्चान्तोदात्तो भविष्यतीत्यत आह । प्रयुज्यते चेति । आद्युदात्तः प्रयुज्यत इत्यर्थः । क्वचिदस्यान्तोदात्तत्वन्दृश्यमानन्तु छा-न्दसमित्याह । ते पुत्रेत्यादिना । वावादीनामुभौ । अत्र सूत्रे उदात्तावित्यस्य पाठदर्शनेन तस्य सूत्रघटकत्वमिति भ्रमनिवृत्तये आह । अनुवृत्तिप्रदर्शनमिति। प्रकरणादेवोदात्तावित्यस्य लाभात् । वावादीनामित्यत्र द्विरुक्तानां वावादीना-न्निर्देशः । त्रिसूत्रयाम् । वावादीनामुभौ । चादयोऽनुदात्ताः । एवम्पूर्वपठितं एवादीनामन्त इति इतित्रिसूत्र्याम् । यदि पूर्वसूत्रेऽप्यादिशब्दः प्रकारे तर्हि तत्सूत्रव्याख्यानावसर एव कुतो नेत्थं व्याख्यातमिति चेत् । शृङ्गग्राहिकान्या-येनेति गृहाण । प्रकारे । सादृश्ये । न तु गणनिर्देश इत्यर्थः । सादृश्यञ्च नि-पातत्वेन । चादयोनु । यदत्र निपातपदानुवृत्तिरुक्तातत्फलमाह । पशुनेती-ति । अत्र पशुशब्दो न निपात इति नानेनानुदात्तत्वम् । यथेतिपा । आद्युदा-त्ता इत्यस्य चादयोऽनुदात्ता इत्यत्र बाधदर्शनात्प्रकृतेऽनुदात्तपदस्यैवानुवृत्ति-रित्याह । अनुदात्त इतीति । अनुवादकमिति । कर्मधारयवद्भावे सति समास-स्येति सूत्रेणान्तोदात्तस्य सिद्धत्वादनुवादकमित्यर्थः । शेषमिति व्याचष्टे । प्र-कारादीति । अनुवादकमिति । तस्य परमाम्रेडितमनुदात्तञ्चेत्यनेनानुदात्त-त्वस्यसिद्धत्वादनुवादकमित्यर्थः । अनुदात्तम्पदमित्यस्येति । नेदं वचनम्प्रका-रादिद्विरुक्तावित्यस्य शेषभूतङ्किन्तु सर्वविशेषविधायकवचनशेषभूता या परि-

SGDF
Sri Gargeshwari Digital Foundation

भाषा तत्सिद्धानुदात्तत्वानुवादकमित्यर्थः । शान्तनवाचार्यप्रणीतेषु सूत्रेष्विति दर्शनेन शन्तनोरचार्यस्य यदपत्यन्तस्य प्रणेतृत्वमिति भ्रमनिवारणायाह । इदम्मात्र इति । तथा च शन्तनुशब्दात्तेन प्रोक्तमित्यण् । तदन्तस्याचार्यप्रणीत शब्देन कर्मधारयः । आचार्यश्च शन्तनुरेवेत्यर्थाल्लभ्यते । नन्वेवं शन्तनुशब्दस्याचार्यशब्देन कर्मधारयङ्कृत्वा तदन्तस्य तृतीयान्तस्य प्रणीतशब्देन समासे विवक्षितस्यार्थस्य लाभसम्भवे किमर्थम्प्रोक्तार्थाणन्तस्याचार्यप्रणीतशब्देन समासनिर्देश इति चेत् । प्रियतद्धिता दाक्षिणात्या इति लौकिकवैदिकेषु कृतान्तेष्वित्यत्र भाष्यकृतोक्तेर्दर्शनेन स्वस्यापि दाक्षिणात्यत्वसूचनायेति गृहाण । फिट्सूत्राणि समाप्तानीति । फिषां संस्कारोपयुक्तानि सूत्राणि सम्यगाप्तानि व्याख्यानेन व्याप्तानीत्यर्थः ॥

इति फिट्सूत्रवृत्तिविवरणम् ।

अथ प्रत्ययस्वराः । व्याख्यायन्त इति शेषः । मूलेऽग्निरिति । अङ्गेर्निः स चाद्युदात्तः । उणादिप्रत्ययेष्वपोदम्प्रवर्त्तत इत्याशयेनास्योपादानम् । वस्तुतस्तु फिट्सूत्रेणान्तोदात्तत्वे नास्यसिद्धिरत आदौ कर्त्तव्यमित्यस्यैवविवरणम् । तव्योऽयमिति । तव्यत्तव्यानीयर इति सूत्रनिर्दिष्टो द्वितीयः प्रत्ययः । प्रथमस्य त्वागस्तु तस्य सूत्रान्तरेण संस्कारात्तदाह । तव्यत्स्विति । स्वरितो भवतीति । एवञ्च तित्त्वप्रयुक्तो न विशेष इति शङ्का । विशेषमाह । तथापीति । अत्रार्थे । स प्रकृतेरित्यर्थे । अन्यथा स प्रकृतेरित्यर्थाभावे । तस्य । अकचः । ककारादकार उच्चारणार्थोऽत एव पचतकीत्यस्य सिद्धिः । इति न्यायादिति । एवञ्चाकृते एव स्वरे लुक् । पुनस्तु न स्वरप्रवृत्तिः प्रत्ययलक्षणेनेत्याह । प्रत्ययलक्षणन्त्विति । नन्वेवञ्चतुः करोतीत्यत्र द्विचिचतुर्भ्य इति विहितसुचो लोपाच्चित इत्यस्य प्रवृत्तिने स्यादित्यत आह । चतुरिति । ततः परः । अकचः परोऽकारः । तदनुसारेण व्याचष्टे । योगं विभज्य व्याचष्ट इत्यर्थः । ननु योगविभागाभावेऽपि च्फञश्चित्त्वसामर्थ्यान्न ञित्स्वरो बाधको भविष्यतीत्यत आह । च्फञश्चित्त्वमिति । आश्वायनादपीति । अत्र ह्यश्वादिभ्यः फञिति फञ् । मा भूदिति । किन्तर्हि प्रत्ययाद्युदात्तत्वमेव भवति । क्वचिदिति । एतिस्तुशास्वृदृजुष इति क्य-

SGDF
Sri Gargeshwari Digital Foundation

प्। इति नियमेनेति। यदि क्यपोऽनेन सूत्रेणोदात्तत्वस्य प्राप्तिवारणाय तद्धितस्येति ब्रूषे तदा मन्त्रे वृषेष्य चेति सूत्रादुदात्त इत्यस्य व्रजयजोरिति सूत्रेऽनुवृत्त्या व्रजयजोर्भावे यः क्यप्स एवोदात्त इति नियमः स्वीकार्योऽन्यथा इत्य इत्यत्रेव तस्याप्युदात्तत्वसिद्ध्योदात्तग्रहणानुवृत्तिर्व्यर्था स्यात्। एवञ्च तेनैव नियमेनैतीत्यादि विहितस्य क्यप उदात्तत्ववारणे सिद्धे तद्धितस्येत्यस्य नेदम्प्रत्युदाहरणमिति भावः। अविदूसमिति। अवेर्दुग्धे दूसप्रत्ययः। तिसृभ्य इति सूत्रे तिसृशब्दस्य शब्दस्वरूपपरतया बहुवचनासङ्गतिरत आह। बहुवचनमिति। वार्त्तिककृदुक्तं जस्ग्रहणानर्थक्यं दूषयन्तस्य सार्थक्यमाह। यस्त्वित्यादिना। अनेन। उपसमस्तार्थमेक इति कथनेन। इति सूचितमिति। यत्र यत्र पञ्चमीनिर्देशस्तत्र तत्र तस्मादिति परिभाषा प्रवर्त्तते विहितविशेषणतया व्याख्यानञ्च भाष्यकारादिव्याख्यानं यत्र साधकन्तत्रैवेत्यप्यस्मादेव भाष्याल्लभ्यते। प्रकृतसूत्रे जस्ग्रहणे कृते सत्येतत्सूत्राप्रवृत्तावति तिस्रावित्यादौ स्वरप्रवृत्तिमाह। अतितिसृशब्द इति। इत्युक्तेरिति। यद्यपि यथा श्रुतसूत्रसत्त्वेऽप्यतितिसृशब्दावयवस्य तिसृशब्दस्याकृदन्ततयाऽतिशब्दात्परस्य तिसृशब्दस्य स्वरः सिद्धस्तथापि वक्ष्यमाणरीत्याऽनेर्द्धातुलोप इत्यस्यावश्यकतया तादृशन्यासेऽप्यत्र स्वरः प्राप्नोतीत्याशयेनेत्यसुक्तिः। तथा। अन्तोदात्तः। सावेकाचस्तृतीयादिर्विभक्तिरितिसूत्रस्य सुपरकं यदेकाज्रूपन्न हि ततः परा तृतीयादिर्विभक्तिः सम्भवतीति यथा श्रुतार्थो न घटतेऽतो नैतत्सावेकाजिति विशेषणङ्किन्तूपलक्षणतया तद्विवक्षितमित्याशयेनाह। सौ यदेकाज्रूपमिति। दृष्टमित्यस्याध्याहारः। यदिति शब्दस्वरूपापेक्षया नपुंसकनिर्देशः। उपलक्षणीभूतधर्माश्रयणफलन्तु राज्ञेत्यत्र विभक्त्युदात्तत्वव्यावृत्तिरिति स्फुटम्मूले तच्चानुपपन्नम्। राजस्वित्यत्र जेत्यस्मादेकाचः सौदर्शनेन ततः परत्वं राजभ्यामित्यादौ सम्भवत्येवेत्यत आह। अर्थवत्परिभाषयेति। एवञ्चार्थवत्परिभाषैकवाक्यतया यादृशो वाक्यार्थो भवति तमाह। सौ यदर्थविशिष्टमिति। राज्ञेत्यत्र स्वरप्रवृत्तिमाह। राजन्शब्द इति। ननु एकाज्ग्रहणाभावे सावित्यव्यावर्त्तकमत आह। सावित्यस्येति। साविति प्रथमैकवचनबोधकमेवास्त्वित्याशयेन शङ्कते सप्तमीत्यादीति। प्रथमैकवचनस्य सुपदेन ग्रहणे सावित्यस्य व्यावर्त्त्यं मन्त्रिरि-

SGDF
Sri Gargeshwari Digital Foundation

ति भविष्यति। विकृतिग्रहण इति। प्रथमैकवचनपरकं यानिति यान्त इति वा तद्विकृतिरूपमेवेति भावः। आगमसहितेति। यानित्यस्यनुमागमविशिष्टत्वात्। लौकिकेन तन्मध्यपतितन्यायेनासिद्धिमाह। तन्मध्ये ति। य एकाच्। यः शब्द एकाजित्यर्थोऽस्त्विति भावः। ततः परेति। दोष्णा दोषभ्यामित्यत्र प्रथमैकवचने यः शब्द एकाच् दोःशब्दस्तस्मात्पराऽस्तीति भावः। नन्वेवमपीति। सौ सप्तमीबहुवचने यदेकाज्रूपन्ततः परा विभक्तिः स्थानिवद्भावेनास्ति। स्थानिवद्भावेन तत्त्वबुद्धिजननादिति भावः। अत एव। स्थानिवद्भावस्वीकारादेव। मम तु। स्थानिवद्भावेन तत्त्वबुद्धिस्वीकर्तुर्मम तु। न दोष इति। शुनः शुनेत्यत्र श्वस्वित्यत्र य एकाच् तस्यैव सर्वे सर्वपदादेशा इति न्यायेन तत्त्वबुद्ध्या तस्मात्पराया विभक्तिस्तस्या उदात्तत्वे प्राप्ते न गोश्वन्निति निषेधस्य प्रवृत्त्या निषेधोदाहरणासङ्गतिरूपः दोषो नास्तीति भावः। वारणादिति। दोषभ्यामित्यत्र स्थानिवद्भावेन प्रसक्तस्य दोषस्य वारणात्। दोष्ण इत्यत्र तु न दोषः। सप्तमीबहुवचने य एकाच्दोःशब्दस्ततः परा न विभक्तिः किन्तु दोषन्नादेशस्य य षादेशस्ततः परा। परम्परया स्थानिवद्भावप्रवृत्तौ मानाभावादिति भावः। एवमेव त्वयेत्यत्र दोषं वारयति। त्वयेत्यादाविति। प्रथमैकवचनप्रकृतेः। युष्मच्छब्दस्य। सन्निधानादिति। युष्मच्छब्दस्य त्व अदित्यादेशस्तस्य स्थाने त्वय् इत्यादेशेऽपि यः प्रथमैकवचने एकाच् ततो न विभक्तिरिति भावः। रूपविवक्षायाः फलान्तरमप्याह। किञ्चेति। न गोश्वन्निति निषेध इति। अत्र गोश्वनोः प्रतिषेधो ज्ञापक इत्यर्थः। इति भाष्यमेवेति। तत्र हि सप्तमीबहुवचनस्य ग्रहणम्। कथं ज्ञायते। यदयन्न गोश्वन्सावकर्णेति गोश्वनोः प्रतिषेधं शास्ति। कथङ्कृत्वा ज्ञापकम्। यदि प्रथमैकवचनस्य ग्रहणं स्याद्गोश्वनोः प्रतिषेधवचनमनर्थकं स्यादित्युक्तम्। अत्र कैयटः। गोषु श्वस्विति सप्तमीबहुवचने एकाच्त्वाद्गोभ्यां श्वभ्यामित्यादौ विभक्तेः प्राप्तमुदात्तत्वम्प्रतिषिध्यते प्रथमैकवचनग्रहणे तु प्राप्त्यभावात्प्रतिषेधोऽनर्थकः। प्रथमैकवचने हि यदेकाच्छब्दरूपङ्गौरित्यौकारान्तन्न च तस्मात्तृतीयादिर्विभक्तिः परासम्भवतीति प्राप्त्यभावात्किम्प्रतिषेधेनेति भाव इति। रूपविवक्षायामप्यतिप्रसङ्गमाह। स्यादेतदिति। कैयटरीत्येति। तेन श्वादेशेऽप्यमुदाहरन्ति। एभ्य एभिरिति सप्तमीबहुवचने

SGDF
Sri Gargeshwari Digital Foundation

एष्वित्यशादेशे कृते भवत्येकाच् । प्रथमैकवचने त्वयमित्येकाच् न भवतीति स्वराप्रसङ्ग इत्युक्तम् । तेनापि । कैयटेनापि । अर्थभेदात् । स्त्रीत्वविशिष्टार्थवाचकत्वसत्त्वेनार्थभेदादित्यर्थः । इति निषेधादिति । तस्मिन्नपि सूत्रे सप्तमीबहुवचनग्रहणेन तत्र एत्वप्रवृत्तिप्राक्कालेऽवर्णान्तत्वमस्तीत्याशयेन शङ्क्येयम् । प्रथमैकवचनेति । तस्मिन् सूत्रे तथैव सिद्धान्तात् । इष्टापत्तेरिति । इष्टस्यैव भवता साधनात् । ननु प्रागुक्तं सर्वानुदात्तत्वङ्कथमत आह । एभिरग्न इत्यादि । अन्तोदात्तादुत्तरपदात् । अनित्यसमास इत्यस्यार्थे प्रतियोगितया विशेषणीभूतनित्यसमासपदं व्याचष्टे । नित्यशब्दस्येति । वाशब्द उदात्तः । समासस्वरेण वाशब्द उदात्तः अग्निचितेति । अग्नौ चेरिति क्विप् । यदुक्तन्नित्याधिकारविहितेत्यादि तस्य फलमाह । यस्त्विति । पदमात्रेत्यत्र मात्रपदमवधारणे । इति विग्रह इति । अत्र विद्यमानेत्यस्याधिक्यात्र समस्यमानपदमात्रघटितत्वं विग्रहस्येति निरुक्तन्नित्यसमासत्वमत्र कृतबहुव्रीहेः । इदश्चेति । नित्याधिकारविहितसमासादन्यत्रेति यत्तदित्यर्थः । वृत्त्याद्यनुरोधेनेत्यनेन भाष्यानुरोधाभावे उक्तः । भाष्यान्तरविरोधोऽप्यस्तीत्याह । उपपदमपीति । अन्यथा । एतादृशनित्यसमासभेदस्यापि प्रयोजकत्वाविवक्षायाम् । उपस्थेन । स्वस्य समीपमुपस्थन्तेन । अञ्चेश्छन्दस्यसर्वनाम । षष्ठ्यसर्वनामस्थानमित्युक्तेः फलमाह । शसादिरित्यादिना । अस्य लाघवायेत्यादिः । इकः । इक्श्तिपाविति विहितस्येकः । विवक्षित इति । एतन्मते प्राञ्चेत्याद्युदाहरणम् । नन्वत्र न गोश्वन्नितिसूत्रेण निषेधो भविष्यतीति कथमेतदुदाहरणमत आह । छन्दसीत्यादि । निषेधः । सावेकाच इति प्राप्तस्य निषेधः । तस्यापि । न गोश्वन्निति निषेधस्यापि । लक्ष्यविरोधादिति । अत्र विभक्तेरुदात्ताया दर्शनं नकाराविवक्षायामुपपद्यते । यदि तु नकारस्य विवक्षा तदैतन्न लक्ष्यङ्किन्तु प्राञ्चेत्याद्येव तदा सामान्यतस्तस्य निषेधस्य प्रवृत्तौ तदेवोदाहरणमस्यापि सूत्रस्येति प्रतीचरत्यन्तोदात्तत्वमेतत्सूत्राप्रवृत्तौ नोपपद्यते नकारस्य विवक्षितत्वे । तु एवञ्च स्यादिति लक्ष्यविरोधः स्पष्टः । आकरेति । पदमञ्जर्यादीत्यर्थः । तत्र द्युश्चेरितिसूत्रस्य चाविति सूत्रबाधकतोक्ता । सा यद्यत्र नकारस्य विवक्षा स्यात्तदा चावित्यस्य लुप्ताकारनका[illegible]ऽताविव प्रवृत्त्याऽस्य सूत्रस्य तु तथाप्रवृत्त्या न सङ्गच्छतेति

SGDF
Sri Gargeshwari Digital Foundation

भावः। इहापि मूलेऽस्य चुस्वरबाधकतोक्ता । नन्वस्य सूत्रस्यासमासे चारितार्थ्यात्कथञ्चुस्वरबाधकत्वमत आह । अत्रोत्तरपदादितीति। उत्तरपदेन समासाक्षेपे सति तस्य विशेष्यत्वमुत्तरपदभूताञ्चतेस्तद्विशेषणत्वन्तथा च यादृशो वाक्यार्थस्तमाह । तेनोत्तरेत्यादिना। तदपवाद इति। चावित्यस्यापवाद इत्यर्थः । अस्य तदपवादत्वमुपपादयति। लुप्ताकारेति। सावकाशमिति। एवञ्चापवादत्वोक्तिविरुद्धा। समाधत्ते ।तत्रेत्यादिना दध्यञ्चेत्यत्र पूजायान्नकारलोपाभावेन चावित्यस्याप्राप्त्याऽस्य सूत्रस्य तत्र प्राप्त्या तदप्राप्तियोग्येऽपि विषये प्राप्तिरेतावताऽपवादत्वाभावशङ्का न युक्ता तत्र न गोश्वन्निति निषेधेन चारितार्थ्यस्य विरहादिति भावः। दध्यग्भ्यामिति। अत्रालोपाभावेन चावित्यस्य नकारलोपस्य सत्त्वेन न गोश्वन्निति निषेधस्य चाप्राप्तिरिति भावः। तत्रापि। दधीच इत्यत्रापि। पराच इत्यादावस्य चारितार्थ्यमाशङ्क्य निराचष्टे । नचेत्यादिना। इष्टत्वादिति। अत एव भाष्ये चोरनिगन्तोऽञ्चतावप्रत्यये। चुस्वरादनिगन्तोऽञ्चतावप्रत्यय इत्येतद्भवति विप्रतिषेधेन।चुस्वरस्यावकाशः।दधीचः पश्य। अनिगन्त इत्यस्यावकाशः। पराङ् पराञ्चौ पराञ्चः। इहोभयम्प्राप्नोति। अवाचा। अवाचे । अनिगन्त इत्येतद्भवति विप्रतिषेधेनेत्युक्तम्। न च चुस्वरस्य दधीच इत्यत्र चारितार्थ्यमदर्शितमिह तु भवता चुस्वरम्बाधित्वाञ्चेश्छन्दसीत्यस्य प्रवृत्तिरुच्यत इति विरोध इति वाच्यम्। अवकाशप्रदर्शनपरभाष्यस्य लौकिकोदाहरणविषयत्वात् । सति शिष्टेति । भाष्ये विप्रतिषेधन्दूषयित्वा सति शिष्टत्वेनैवानिगन्त इत्यस्य चुस्वरबाधकतोक्ता। एतस्यापि। अञ्चेश्छन्दसीत्यस्यापि। पराञ्च इत्यादौ प्रकारान्तरेणास्याप्रवृत्तिमुपपादयताम्मतमाह। केचित्त्वत्रेति। अत एव। अन्तोदात्तादित्यस्य सम्बन्धादेव। ननु धातुस्वरेणाञ्चतिरन्तोदात्त एवेत्यत आह। सामर्थ्यादिति। अन्तोदात्तादित्येतद्विशेषणसामर्थ्यादित्यर्थः। विभक्त्युत्पत्तिकालावच्छिन्नमिति । यस्या विभक्तेरयं स्वरो विधीयते तदुत्पत्तिकालावच्छिन्नमित्यर्थः। उड़िदम्। इति च वर्त्तत इति। एकाज्भ्योऽन्तोदात्तेभ्य एभ्यः पराऽसर्वनामस्थानविभक्तिरुदात्ता। अत्रानुवर्त्तमानमेकाजग्रहणं यत्र सफलं तदाह। तत्रैकाजिति। अव्यभिचारादिति। जशब्दस्यठ् सूत्रप्रवृत्तियोग्यबोधकतया तस्यैकाच्त्वाव्यभिचारादित्य-

SGDF
Sri Gargeshwari Digital Foundation

र्थः। असर्वनामस्थानविभक्त्याक्षिप्तस्यार्थवत इत्यस्य विशेषणतायामूढ इत्यस्य विशेष्यत्वे एकाजभिन्नादूठोऽर्थवतः परादित्यर्थो वाच्यः स चासम्भवग्रस्तः। ऊठोऽर्थवत्त्वासम्भवादित्यपि बोध्यम्। ननु आक्षिप्तं विशेष्यमर्थवत्पदार्थस्तत्र ऊडभेदो बाधित इत्यूडित्यस्य ऊड्घटिते लक्षणा भविष्यति तदभेदश्च न विशेष्येऽर्थवति बाधित इत्यत आह। तद्घटितेति। ऊड्घटितेत्यर्थः। अस्तिहीति। तथा चैकाज्ग्रहणन्नोडित्यस्य विशेषणमिति भावः। इदं ग्रन्थस्य चैकाज्ग्रहणं विशेषणम्भवत्येव। आभ्यामित्यत्र सम्भवस्येमकाभ्यामित्यत्र व्यभिचारस्य च सम्भवात्। एवञ्चोपात्तस्येदमित्यस्य तद्विशेषणम्। पदादयश्च पद्दन इति सूत्रनिर्दिष्टा बोध्यास्तेषु निशूपर्यन्तानामेवैकाच्त्वस्य सम्भव इति तद्विषये आह। एवम्पदाद्यंशेऽपीति। प्रकृतेरिति। अग्रेतन इत्यर्थः। अत एव। उपात्तविशेषणत्वादेव। इदमेव ध्वनयितुम्। उपात्तविशेषणत्वमेव ध्वनयितुम्। जूरित्येति। ज्वरधातोः क्विपि ज्वरत्वरिति सूत्रेण वस्योपधायाश्च स्थाने ऊडादेशः। तन्नोदात्तमिति। जूरेति नोदात्तमित्यर्थः। जूरेत्यस्य तदुदात्तत्वे एकाज्ग्रहणस्य प्रकृतिविशेषणत्वेऽपि क्षत्यभावशङ्का स्यादिति भावः। तदप्राप्तेरिति। तृतीयादिर्विभक्तिरित्यस्य तस्मिन् सूत्रे उपादानादिति भावः। एनानिति। द्वितीयाटौस्स्वेन इत्येनादेशः। सर्वानुदात्तत्वमिति। एनादेशोऽनुदात्तः। विभक्तिश्चानुदात्तेति भावः। यत्त्वत्र मूलेऽसर्वनामस्थानविभक्तिरुदात्तेति व्याख्यातन्तन्न युक्तम्प्राग्दिशो विभक्तिरिति सूत्रभाष्यात्तृतीयादिर्विभक्तिरित्यस्य सावेकाच इति सूत्रादनुवृत्तेर्लाभादिति केचित्तन्न युक्तमित्याशयेनाह यद्यपीत्यादि। भाष्यादिति। एवं हि तत्रोक्तम्। विभक्तित्वे किम्प्रयोजनम्। विभक्तित्वे प्रयोजनमिमप्रतिषेधः। इदानीम्। न विभक्तौ तुस्मा इति प्रतिषेधः सिद्धो भवति। यद्येवङ्किमोत्। क्व प्रेप्सन्दीव्यसि। कार्इमासा इत्यत्रापि प्राप्नोति। तौ चोक्तम्। किमुक्तम्। विभक्तौ तवर्गप्रतिषेधोऽतद्धित इति। इदमो विभक्तिस्वरश्च प्रयोजनम्। २। इतः। इह। इदमस्तृतीयादिर्विभक्तिरुदात्ता भवतीत्येषः स्वरः सिद्धो भवतीति भाष्ये। अत्र कैयटः। इत इति सुब्व्यमुदाहरणमत्र लित्स्वरे प्राप्ते रूडिदमित्युदात्तत्वम्भवति। इहेत्यत्र तु प्रत्ययस्वरेणान्तोदात्तत्वं सिध्यति। ननु मध्येऽपवादन्यायेनानुदात्तौ सुप्पिता-

SGDF
Sri Gargeshwari Digital Foundation

वित्येतं स्वरं विभक्तिस्वरो बाधते न लित्स्वरम्। नैष दोषः। ऊडिदमित्येत-त्सूत्रं लितीत्यत्रानुवर्त्तते तेन लित्स्वरम्बाधित्वा विभक्तिस्वरो भवतीति। लितीत्यत्र ऊडिदमित्यस्यानुवृत्तौ न कैयटोक्तिरेव प्रमाणङ्किन्त्विह इत्यत्र विभक्तिसंज्ञाप्रयोजनप्रदर्शनपरम्भाष्यमेव। अस्य भाष्यस्यैकदेशस्तु क्तित्वमुपपादय-ति। तत्रैवेति। एतत्प्रवृत्युक्तेः। ऊडिदमिति सूत्रस्य प्रवृत्तेरुक्तेः। अत्र पञ्च-म्यास्तसिल्लिति विहितस्य विभक्तिसंज्ञा सत्त्वेऽपि तृतीयादित्वन्नास्तीत्यस्य स्पष्टम्प्रतीतेः। यत्त्वेतद्भाष्यग्रन्थयोजनार्थङ्कैयटेन तृतीयादिग्रहणेन च तृती-यामारभ्य प्राग्दिशः प्रत्यया विभक्तिसंज्ञा गृह्यन्त इत्युक्तम्। तन्न युक्तम्। अन्यत्र तृतीयादिरित्यनेन तृतीयादि सुपामेव प्रतीतेर्दृष्टत्वादिहार्थान्तर-कल्पनायाम्भाष्यान्तरादर्शनादिति। लक्ष्यविसम्वादाच्चेति। अत्रेत इत्यस्याद्यु-दात्तस्यैव। दर्शनेनेत इत्यस्यान्तोदात्तत्वकल्पनमन्याय्यमिति भावः। ये त्व-स्मिन् सूत्रे सावेकाच इत्यस्याप्यनुवृत्तिन्दर्शयन्ति तन्न युक्तमित्याह। सावेका-च् इति विति। एष्विति रूपादिति। सौ यदेकाच्रूपन्दृष्टन्ततः परेत्यर्थस्य प्रा-क् प्रदर्शनादित्यर्थः। प्रष्ठवाडिति। वहश्चेति ण्विप्रत्ययान्तोऽत्र वाट्शब्दः। वचनम्। ऊठुपधेति वचनम्। व्यवहार एवेति। स्वरानुवादस्य सत्त्वे न स्वरो-द्देश्यकविधित्वादिति भावः। अत एव। स्वरोद्देश्यकविधावेव स्वरविधावित्य-स्य प्रवृत्तेरेव। अत्र। अक्षद्युवेति प्रयोगे। ऊठ्छ्वोः शूडित्यूठ्। अन्तोदात्तो-ऽयमिति। अयमक्षद्यूशब्दोऽन्तोदात्तो भवतीत्यर्थः। ततो विभक्तावुवङादेश उदात्तस्थानिकत्वेनोदात्त इति मध्योदात्तोऽयम्। तत्रानुनासिकस्य क्विझ-लोरित्यतः क्विझलोरित्यनुवर्त्तते। तत्र क्विझलोरिति विषयसप्तमीत्वाश्रयेणा-त्र क्विपि विवक्षित इति प्रतिपादितम्। यदि त्वियम्परसप्तम्येव तदा तुल्य-त्वादनुनासिके चेत्यपि तथा स्यादिति प्रतिसन्धायाह। क्विपि परत इति। सतिशिष्टः स्यादिति। अनुनासिकादिप्रत्ययोत्पत्त्युत्तरकालिकोत्पत्तिकतया स-तिशिष्टः स्यादित्यर्थः। न स्यादिति। तथा चेष्टस्य स्योन इत्यस्यान्तोदात्तस्य प्रयोगस्य सिद्ध्यर्थमनुनासिक इति सप्तम्या विषयसप्तमीत्वमावश्यकमित्ये-कवाक्यघटकयोर्निमित्तत्वेनोपात्तयोः क्विझलोरित्यत्रापि विषयसप्तम्येवेति भावः। इदमेव भाष्यमिति। ऊठ्युपधाग्रहणङ्कर्त्तव्यमन्त्यस्य मा भूदिति। अ-

SGDF
Sri Gurgeshwari Digital Foundation

मद्युत्रा। अत्रद्युवे इति भाष्यमेव मानमित्यर्थः। यद्यूठ उदात्तत्वन्न निपाति-तं स्यात्तदा विभक्तेरन्तोदात्तात्परत्वाभावेनोदात्तत्वाप्राप्त्योद्युपधाग्रहणं कर्त्त-व्यमित्यस्याचद्युवेत्यत्र प्रयोजनकथनमसंबद्धं स्यादिति भावः। उपधाग्रहण-कर्त्तव्यमित्यस्योपधाभूतऊठ् ग्राह्य इत्यर्थः। अन्यथा पञ्चमीनिर्देशादन्त्य एव ग्रह्येतेति बोध्यम्। ततः परत्वन्तु येन नाव्यवधानन्यायेन अत एव। ऊठ उदात्तस्य निपातनादेव। तत्त्वात्। अन्वादेशत्वात्। तेन। सूत्रोपात्ता इति कथनेन। तेन। ए-काच इत्यस्य सम्बन्धेन। ग्रहणेऽपि। पदादिशब्देनोपस्थितावपि न दोषः। नोक्तषट्त्वसङ्ख्याहानिः। मध्योदात्तमेवेति। अस्याप्राप्तेरिति शेषः। भाष्यकै-यटयोरिति। एतच्च प्रागुपपादितम्। भाष्ये ध्वनितमिति। अष्टनो दीर्घादि-ति सूत्रस्थदीर्घग्रहणस्यात्वं वैकल्पिकमित्यर्थे ज्ञापकत्वोपपादनेनेति शेषः। अत एव। अन्तोदात्तत्वादेव। भाष्यकैयटयोः स्पष्टमिति। प्रकृतसूत्रस्थदीर्घग्र-हणस्य कृतात्वस्य षट्संज्ञा भवतीत्यत्र ज्ञापकतोक्त्या स्पष्टमित्यर्थः। शतुरनु-मो नद्यजादी। बहुव्रीहिरिति। स च शतुर्विशेषणमिति शेषः। अत्यपवर्ग-इति। लसार्वधातुकस्यादुपदेशात्परत्वाभाव इत्यर्थः। तुदन्तीत्यादावेकादेश-स्य प्रत्ययद्वयसम्बन्धिवर्णद्वयापेक्षत्वं शतुरित्यस्य तु न पूर्वप्रत्ययसम्बन्धिवर्णा-पेक्षत्वमिति शतुरित्यस्यान्तरङ्गत्वमित्याशयेन शङ्कामभ्युपेत्य निराचष्टे। न चेत्यादिना। तेन। श्रूयमाणशब्दविशेषणत्वेन। मुञ्चतेत्यादाविति। शे मुचा-दीनामित्यनेन मुच्धातोरेव नुमागमसत्त्वेन शतुरनुम्कत्वमेव। कस्य चि-त्मतमाह। अन्तोदात्तादितीति। न स्यादिति। यदि तदन्तस्यान्तोदात्तादिविशे-षणत्वं स्यात्किन्तु शतुः स्यात्तदाऽदुपदेशात्परत्वेन शतुर्निघातात्तुदतीत्यत्र नः स्यादिति तद्भावः। अत एव। शतुर्विशेषणत्वादेव। अनुम इत्यस्य पञ्चम्यन्तस-याऽन्तोदात्तादित्येतत्पञ्चम्यन्तं यद्विशेषणन्तस्यैवेदमपि विशेषणमतस्तत्सा-र्थक्यमिति भावः। अयुक्तत्वन्तस्योपपादयति। तुदतीत्यत्रेत्यादिना। तत्त्वेनेति। उदात्तत्वेनेत्यर्थः। अन्तोदात्तत्वन्त्वस्य व्यपदेशिवद्भावेन। तस्मात्। असम्भवो हि नात्र शब्दविशेषत्वे यतो हेतुस्तत इत्यर्थः। तस्य। पञ्चमीसमासेन स्थानि-वद्भावस्य। वार्त्तिकवैयर्थ्यमाशङ्का निराचष्टे। यद्यपीत्यादिना। इत्यादीनाम्नेति। किन्त्वत्र विभक्तेरनुदात्तत्वादतः प्रत्ययस्वरेणाद्युदा-

SGDF
Sri Gargeshwari Digital Foundation

न्तत्वात्मध्योदात्तत्वमिव । सूत्रेणासिद्धेरिति । बहुव्रीहौ पूर्वपदप्रकृतिस्वरविधा-
नेनानुदात्तत्वादिति भावः । तस्याप्यप्रवृत्तेरिति । वार्त्तिकस्याप्यप्रवृत्तेरित्य-
र्थः । इत्यन्तोदात्तत्वादिति । उणादीनामव्युत्पन्नत्वादिति शेषः । विदुषीति ।
विदेः शतुर्वसुरिति वस्वादेशः । बहुतितवा इति । ईषदपरिसमाप्तस्तितउर्ब-
हुतितऊरित्यर्थोऽत्र न ब्राह्मणीपदसामानाधिकरण्यानुपपत्तेः । किन्तु बहव-
स्तितवो यस्या इति बहुव्रीहिः । बहूनि तितऊनीति वा । तित उपरिपवनमि-
ति भाष्यात् अन्तोदात्तत्वमस्याह । बह्वोरिति अत्र । उदात्तयण इति सूत्रे ।
ननु शसादय इत्यनुपपन्नं अप्रकृतत्वादत आह । असर्वेति । सुभूरिति । ऊङः
प्रत्ययस्वरेणोदात्ततया ब्रह्मबन्ध्वेत्यप्यन्तोदात्तमिति बोध्यम् । एतेनान्तोदा-
त्तादित्यस्यानुवर्त्तमानस्याबाधोध्वनितः । ह्रस्वनुड्भ्याम् । अत्रान्तोदात्तादि-
त्यनुवर्त्तमानमेकदेशस्य ह्रस्वेत्यस्य विशेषणम् । ह्रस्वेत्यत्र वर्णग्रहणे तदन्त-
ग्रहणम् । ग्रहणवन्तेति । तदनुबन्धकपरिभाषयेति शेषः । अधिकरणे किरिति ।
उपपदसमासे; कृदुत्तरपदप्रकृतिस्वरेणान्तोदात्तत्वम् । उदात्त इति । अस्थिद-
धीति सूत्रादुदात्तग्रहणानुवृत्तेरित्यादिः । इषुराद्युदात्त इति । उब्देरिच्चादे-
रित्यत इदित्यनुवर्त्य ईषेः किच्चेत्यनेन निदित्यधिकारीयस्योप्रत्ययस्य विधा-
नात् । मरुत्वानितीति । तसौ मत्वर्थं इति भसंज्ञया पदत्वस्य बाधाज्जश्त्व-
म्न । व्यञ्जनस्याविद्यमानवद्भावः प्रकृतेऽन्तोदात्तत्वव्यवहारायावश्यक इत्यभिप्रा-
यिकामाशङ्कान्निराचष्टे । न चेति । यद्युप्ययमपि विधिः स्वरोद्देश्यकस्तथापि
निमित्तत्वावच्छेदकतयोपात्तस्वरव्यवहारस्य व्यञ्जनेन प्रतिबन्धो नेत्येवक-
ल्पते एवञ्च स्वरमात्रनिष्ठावच्छेदकताकव्यवहारो भवति । इह तु ह्रस्वस्या-
पि निमित्ततावच्छेदकतयोपादानात्तन्निष्ठावच्छेदकत्वव्यवहारप्रतिबन्धो भव-
त्येवेति भावः । अत एव । स्वरोद्देश्यकविधौ तत्प्रवृत्तेरेव । अत एव । उक्तवि-
षये प्रवृत्तेरेव । अत एव हलिति । उक्तरीत्या स्वरत्रिधाविति परिभाषयाऽ-
सङ्ग्रहादेव । विषय एव नास्तीति । मरुत्वानित्यत्र ह्रस्वान्तात्परो मतुबि-
ति व्यवहारे कर्त्तव्ये विषयो नास्तीत्यर्थः । पर एव । अन्तोदात्तादित्यनुवृ-
त्तं वाक्यभेदेन नुड्विशेषणमपीति भावः । ननु श्रयतेः स्वाङ्गे शिरः किदे-
त्वसुन्नन्तः शिरस् इति तस्य स्थाने यः शीर्षन्नादेशः सोऽपि निदन्तत्वादा-

SGDF Sri Gargeshwari Digital Foundation

युदात्त एवेति नुटः शीर्षंश्चानित्यत्वान्तोदात्तात्परत्वाभावेन मतुप उदात्त त्वन्न स्यादत श्राह। शिरस इति । छन्दस्यु दात्तस्य शीर्षंश्चानितिप्रतोगस्य दर्शनमत्रमानम्। वार्त्तिकमेतदिति । वार्त्तिकैकदेशस्य निबन्धनमेतत्। वा- र्त्तिकस्वरूपन्तु मतुवुदात्तत्वे रेग्रहणमित्याकारकमेव। अत एव । मतुपि यो ह्रस्व इति व्याख्यानादेव। अत्र ह्रस्व इत्यस्य दृष्ट इति शेषो बोद्धव्यः। अ- न्यथा। नामन्यतरस्यामित्यत्र मतुप्पदानुवृत्त्यभावेन ह्रस्वान्तादन्तोदात्ता- त्परो नाम्शब्द इति व्याख्याने। दीर्घनामीति दीर्घे । चरितार्थमिति । तत्र न तिसृचतस्त्रिति दीर्घस्य निषेधात्। अन्योक्तमवकाशप्रदर्शनन्दूषयति। चतसृणामितीति। आद्यु दात्तत्वादिति। आद्यु दात्त निपातनमादेशस्य त्वाद्यु- दात्तत्वादित्यर्थः। पक्षे। नामन्यतरस्यामित्यस्यवैकल्पिकत्वात्तदभावपक्षे। व्या- ख्यानदिति। जयन्तीनामित्यादिलक्ष्ये विभक्तेरन्तोदात्तत्वादिदर्शनमूलकव्या- ख्यानादित्यर्थः। वेत्यनुवृत्तेर्नेहेति। वेत्येतत्समानार्थकान्यतरस्यामित्यस्यानुवृ- त्तेरित्यर्थः। आद्यु दात्तमेतदिति। शतुरदुपदेशात्परत्वेन निघाते कृतेऽनुदात्त- योः शवकारशत्रकारयोरेकादेशः सोऽप्यनुदात्त एव। ङीप् चानुदात्त इति धा- तुस्वरेणाद्यु दात्तः। षट्त्रिचतुर्भ्यो। एभ्यः परा हलादिर्विभक्तिरुदात्ता। प्रिय- श्रीन् पश्येत्यादीति। एतेन गौणेऽप्यस्य प्रवृत्तिरिति प्रागुक्तं स्मारितम्। अत्र यद्वक्तव्यमिति। गौणेऽपि प्रवर्त्तत इत्यादि तत्रोक्तमित्यर्थः। न गोश्वन्सा। सौत्रत्वादिति। अवर्णपदस्य वर्णग्रहणपरिभाषया तदन्तपरत्वेऽपि तस्य सा- वित्येतद्विशेषणसापेक्षत्वे नासामर्थ्यादप्राप्तौ द्वन्द्वः सौत्रत्वाद्भवतीत्यर्थः। सप्त- म्यलुक् चेति। सौत्रत्वादिति शेषः। षाष्ठिकस्वर इत्यर्थ इति। एवं व्याख्या- नेन विभक्तिस्वरस्य मतुप्स्वरस्य च सङ्ग्रहो ध्वनितः। तन्न्यायानुसरणे। अ- नन्तरस्येति न्यायानुसरणे। असम्भवादिति। अभावस्य भावप्राप्तिपूर्वकत्वस्य न्याय्यत्वादनन्तरस्येत्यनेन नैकस्यैव ग्रहणमिति भावः। एवञ्च। षाष्ठिकस्व- र इत्यर्थस्वीकारे च। न भवतीति। सावर्णान्तत्वान्न भवतीत्यर्थः। देवी इ- ति। पचादिगणे देवडिति पाठात्। टित्वान्ङीप् । तस्मिन्यस्येति चेत्यकार- लोपः। अनन्तरस्येति न्यायाननुसरणेऽनुदात्तस्य च यत्रेत्यस्यापि बाधः स्या- दिति भावः। प्राचीनोक्तमक्रमसूत्रव्याख्यानमयुक्तमित्याशयेनाह । यस्ये-

SGDF
Sri Gargeshwari Digital Foundation

ति। लक्ष्यविरोधात्। वीरवत्तममित्ये तल्लक्ष्यविरोधादित्यर्थः। एतेन। अनन्त-
रस्येति न्यायेनोक्तयोरेव बाधकथनेन। आच्छिक इति। अक्षैर्दीव्यतीति ठ-
क्। पूर्वोक्तन्यायेनानुदात्तम्पदमित्यस्य बाधाभावस्य सिद्धावपि तत्र प्रकारान्त-
रमप्यस्तीति सूचयन्नाह। अनुदात्तम्पदमित्यादि। स्व. वर्णान्तत्वात्प्राप्तमतिप्र-
सङ्गं वारयति। ऊडिदमित्यस्येति। सावित्यस्य तत्र सप्तमीबहुवचनबाधक-
त्वं रूपस्य च विवक्षेति प्राग्व्यवस्थापितमिति गवां शतेत्यत्र न प्राप्तिरित्या-
शयेनाह। नन्वत्रेति। ननु स्वरे कर्त्तव्ये स निषेधो भवति वार्त्तिके स्वरे इ-
त्युक्तत्वादिति कथन्निषेधे कर्त्तव्ये स्थानिवत्त्वनिषेधोऽत आह। अत एवे-
ति। स्वरे निषेद्धव्येऽपि तस्य निषेधस्येष्टत्वादेव। सुगुपाल इति। शोभना
गावो यस्य स सुगुस्तस्य पाल इत्यर्थः। स्वरो न। पूर्वपदाद्युदात्तत्वन्न। किन्तु
पूर्वपदस्यानुदात्तत्वमेव भवति समासस्येत्येतदेकयतापन्नशेषनिघातात्। वृत्ति
कारोक्तमिति। निषेधोदाहरणमिति शेषः। परास्तम्। गोग्रहणे न गुशब्दस्या
ग्रहणात्परास्तम् प्राप्तिरेव निषेध विधेर्नास्तीति भावः। तथा चात्र यः स्वरो
भवति तमाह। एवञ्चेति। भवत्येवेति। नञ्सुभ्यामित्यनेन सुगुशब्दस्यान्तोदा-
त्तत्वात्। ननु शुनश्चिच्छेपमित्यपि कथमुदाहरणम्। सप्तमीबहुवचने श्वस्विति-
दर्शनादत अत्र आह। अत्रेति। बाहुलकात्। व्यत्ययो बहुलमिति बहुलग्रह-
णात्। ततः परेति। श्वन्निति रूपात्परेत्यर्थः। अर्द्धन्यूनविकारस्य सत्त्वादेकदे-
शविकृतन्यायस्य प्रवृत्तिः। एवञ्च पदपाठकाले पठ्यमाने शुनः शेपमित्यत्र सं-
हितायाञ्च शुन इत्युदाहरणमिति बोध्यम्। सावेकाच इतिवत्सप्तमीबहुवच
नशङ्कां वारयति। नन्विति। व्याख्यानादिति। प्रकृतसूत्रस्थभाष्यदर्शनमूलक-
व्याख्यानादित्यर्थः। तत्र हि साविति किमिदम्प्रथमैकवचनस्य ग्रहणमाहोस्वि-
त्सप्तमीबहुवचनस्य। कुतः सन्देहः। समानो निर्द्देशः। पुरस्तादेष निर्णयः स-
प्तमीबहुवचनग्रहणमिति। इहापि तदेव भवितुमर्हति। यदि सप्तमी बहुवच-
नस्य ग्रहणन्ताभ्यां ब्राह्मणाभ्याम्। याभ्याम् ब्राह्मणाभ्यामत्र न प्राप्नोति। वि-
धिरप्यत्र न सिध्यति। किङ्कारणम्। न ह्येतद्भवति यत्सौरूपम्। इदन्तर्हि तेभ्यो
ब्राह्मणेभ्यो येभ्यो ब्राह्मणेभ्यः। विधिश्च सिद्धो भवति। निषेधस्तु न प्राप्नोति।
अस्ति सप्तमीबहुवचनस्य ग्रहणे किञ्चिदिष्टं सङ्गृहीतम्भवति आहोस्विद्दोषा-

SGDF
Sri Gargeshwari Digital Foundation

न्तमेव । अस्तीत्याह । इह याभ्यो ब्राह्मणीभ्यस्ताभ्यो ब्राह्मणीभ्य इति विधिश्च सिद्धो भवति प्रतिषेधश्च । अस्तु तर्हि प्रथमैकवचनस्य ग्रहणम् । तेनेति स्वरः पुंसि न सिध्यति। न चावश्यं पुंस्येव स्त्रियां पुंसि नपुंसके च । तेन ब्राह्मणेन। तया ब्राह्मण्या । तेन कुण्डेनेति । सप्तमीबहुवचनस्यापि ग्रहणे एष दोषो भवति । तस्मादुभाभ्यामपि प्रतिषेधे यत्तदोश्च ग्रहणङ्कर्त्तव्यम् । न गोश्वन्साववर्णराडङ्क्रुङ्कृद्भ्यो यत्तदोश्चेति भाष्ये उक्तम्। एतेन भाष्यप्रघट्टकेन सावेकाच इति सूत्रे सावित्यनेन सप्तमीबहुवचनस्य ग्रहणं रूपविवक्षा च न गोश्वन्निति सूत्रे तु प्रथमैकवचनस्य ग्रहणं रूपा विवक्षा चेति निर्णय इति प्रतीयते । एतेन । उपलक्षणविधया सुपरकत्वविशिष्टावर्णान्तत्वस्याश्रयणेन । अदोषादिति । स्वन्यग्रहणवैयर्थ्यं रूपदोषाभावादित्यर्थः । अत एव । अस्मादेव । अत एव । स्वरनिषेधेऽपि कर्त्तव्ये नलोपासिद्धत्वस्य प्रवृत्तेरेव । यदि निषेधे कर्त्तव्ये नलोपासिद्धत्वन्न स्यात्तदाऽनङादेशस्य यो नकारस्तस्य लोपे कृते प्रत्ययलक्षणेनावर्णान्तस्य सुपरत्वाद्ध्रस्वनुड्भ्यामित्यस्य प्रतिषेधः स्यात् । सावेकाच इति सूत्रे यथा रूपविवक्षा तथा प्रकृतसूत्रेऽपि रूपविवक्षा तदेकवाक्यत्वादित्याशयेनाह । वस्तुतस्त्विति । उत्पत्तिकालावच्छिन्नमिति । प्रथमैकवचनोत्पत्तिकालावच्छिन्नमित्यर्थः । अत एव । अत्रापि रूपविवक्षासत्त्वादेव । वेतस्वानित्यत्रेति । सौ यदवर्णान्तं रूपन्ततः परत्वाभावेऽपि वेतसशब्दस्य प्रथमैकवचनोत्पत्तिकालेऽवर्णान्ततया ततः परत्वान्निषेधशङ्का या कृता सा सुयोजा। ड्मतुपो मतुब्ग्रहणेन न ग्रहणमिति त्वन्यत् । अत एव । पूर्वोक्तार्थस्य विवक्षा सत्त्वादेव । नन्वेवं यत्तच्छब्दात्परविभक्तेः प्रतिषेधो न प्राप्नोतीत्यत आह । यत्तदर्थमिति । अत एव । तादृशार्थविवक्षा सत्त्वादेव । न निषेध इति । विभक्त्युत्पत्तिकालेऽवर्णान्तत्वाभावादिति शेषः । राडिति राजृ दीप्ताविति धातोः क्विबन्तस्य रूपम् । आद्ये । प्राञ्चेत्यत्र । ननु प्राञ्चेत्यत्र न सावेकाच इत्यस्य प्राप्तिस्तत्र यादृशमर्थंवद्रूपन्तादृशरूपकात्परत्वाभावादत आह । अञ्चेश्छन्दसीतीति । अन्त्यमेव । प्रत्यञ्चेत्येतत् । स्यादेवेति । सावेकाच इत्यनेनाञ्चेश्छन्दसीत्यनेन वा स्यादेव । लुप्तनकारस्याचीति । तत्र हि दधीचः पश्येत्युदाहरणमुक्तम् । नन्वेवमृतीचो वाङ्गनित्यत्राञ्चेश्छन्दसीति प्राप्तस्य स्वरस्य प्रतिषेधः स्यात्तथा चोदात्तविभ-

त्यन्तप्रयोगविरोध इत्यत आह । प्रतीचो वाह्ननित्यादीति । कृन्ततिर्वेति । उभयोरपि कृदिति रूपस्य सम्भवेन विनिगमनाविरहादिति शेषः । दिवो झ-ल । दृग्भिरित्यत्रोऽडिदमित्यस्य तत्रान्तोदात्तग्रहणानुवृत्तेरप्राप्तिमाशङ्कते न-न्विति । निपात्यत इति । अत्र च दिवो झलिति निषेधशास्त्रारम्भ एव मान-म् । सामर्थ्यादिति । यदि विभक्तिस्वरं स्यात्तदा तदेकवाक्यतापन्नशेषनिघाते-न प्रकृतेरनुदात्तत्वं स्यादिति निपातनस्य वैयर्थ्यापत्तिरिति भावः । अन्तरङ्गे-ति । प्रथमप्रवृत्तिकेत्यर्थः । प्रकृतिस्वरस्य । फिट्स्वरस्य । बाधेन । उत्तरकालप्र-वृत्तिकत्वे नेत्यादिः।न्ट चान्यतरस्याम्।निषेधविकल्पे विधिविकल्पपर्यवसानादा-ह मूले वोदात्तेति । स्थानिवद्भावेनेति । न च स्थानिवद्भावदस्य गोः पूर्वत्वणित्वा-त्वस्वरेष्वित्यनेन निषेधात्कथमिह प्राप्तिरिति वाच्यम् । पूर्वत्वादिसाहचर्येण गोशब्दसम्बन्धेन विहितस्य प्रतिषेधात् । इदम् । प्रकृतसूत्रे झलीत्यनुवर्त्तत इत्येतत् । न च सावेंकाच इत्यनेन न्ट चेत्यनेन वा विभक्तेरुदात्तत्वविधाना-त्फलतो न विशेष इति वाच्यम् । सावेकाच इत्यस्य नित्यत्वमस्य तु वैकल्पिक-त्वमिति विशेषात् । ननु क्व चिन्नरीति रूपमाद्युदात्तम्पठ्यते तस्य कथमुपप-त्तिर्यतो झलादित्वविरहेण न्ट चेत्यस्याभावेऽपि पूर्वोक्तरीत्या स्थानिवत्त्वेन सा-वेकाच इत्यस्य प्राप्तेरित्यत आह । वेदे क्व चिदिति । एतेन । छान्दसत्वकल्प-नया व्यत्ययो बहुलमिति स्वरव्यत्ययकल्पनेन । इष्टसिद्धिरिति । न्ट चेति सूत्र-बोधिताभावांशस्यैव प्रवृत्तिरिति नरीति प्रयोगे सावेंकाच इत्यपि न प्रवर्त्तते तेनैवाद्युदात्तत्वसिद्धौ छान्दसव्यत्ययकल्पनमन्याय्यमिति भावः । विधायकत्व-शङ्केति । नेत्यस्यासम्बन्धेन विधायकत्वशङ्केत्यर्थः । तित्स्वरितम् । तितिप्रत्यय-ग्रहणङ्कर्त्तव्यमिति वार्त्तिकमूलकव्याख्यानादाह । तित्प्रत्ययस्येति । क्व नून-मित्यपाठः मूलेऽपि दर्शनात् । क्वावरमित्यस्योपलक्षणं वा । कर्त्तव्यमिति । अत्र तव्यस्याद्युदात्तत्वम् । पर्यायेणेति । शेषनिघातप्रयोजकस्य स्वरितत्वस्य पर्यायेण प्रवृत्तिः स्यान्न तु युगपदेवाद्यन्तयोः । तवैचान्तस्य युगपदित्यनेन स-मावेशाभावबोधनात् । तास्यनुदात्तेत् । न तु तास्यनुदात्तेन्ङ्रामिति । व्यभि-चाराभावादिति शेषः । कर्मधारय इति । एतत्फलमुत्तरत्र व्यक्ती भविष्यति । इत्यत्रापि स्यादिति । समुदायोपदेश एवावयवोपदेश इति हल्न्युपदेश एव

SGDF
Sri Gangeshwari Digital Foundation

इत्यस्याप्युपदेश इत्युपदिश्यमानाकारात्परत्वात्क्तेऽनुनासिकलोपे हतो हथ इत्यत्र प्राप्नोति। यदि त्वकारेणोपदिश्यमानं विशेष्यते तदोपदिश्यमानं यदकारान्तमित्यर्थो भवति तदात्र न भवति। यस्याकारान्तस्य स्वरूपबोधनतात्पर्येणाद्योच्चारणमृषिकृतं कन्तदेव तथा भवति। प्रकृते तु नकारान्तस्य यत्स्वरूपन्तद्बोधतात्पर्यकमाद्योच्चारणमिति भावः। तदुक्तमप्रकृतसूत्रभाष्ये कथमिदं विज्ञायते अकारो य उपदेश इति आहोस्विदकारान्तं यदुपदेश इति। किञ्चातः। यदि विज्ञायते अकारो य उपदेश इति हतो हथ इत्यत्रापि प्राप्नोति। अथ विज्ञायते अकारान्तं यदुपदेश इति न दोषो भवतीति। न च समुदायबोधनतात्पर्येणावयवस्याप्युच्चारणात्कथमेतदिति वाच्यम्। समुदायोच्चारणस्य कार्यार्थत्वात्समुदायोपदेशे तात्पर्यन्तन्निष्पादकतया त्ववयवानामप्येकमुपदिश्यमानत्वन्न तु हैति समुदायस्य तत्त्वमित्याशयात्। आत्मनेपदेति। परस्मैपदस्य तिपस्थे दयमादेशस्तदास्थाँनिवद्भावेन पित्त्वादेवानुदात्तत्वं सिद्धमिति भावः। आत्मनेपदैकवचनेकृतेऽयनेन निघाते तस्योच्चारणासिद्धिमुपपादयति। एकवचन इति। स्वरेपीति। तथा च नानुदात्तस्य श्रवणमिति भावः। फले विशेषः। अनुदात्तस्य श्रवणे न विशेषः। उपदेशविशेषणत्वादिति। उपदेशशब्दार्थो यउपदिश्यमानस्तद्विशेषणत्वादित्यर्थः। सामर्थ्यादिति। येन विधिरितिसूत्रबोधिततदन्तविधिस्थलेऽन्तशब्दस्य चरमावयववाचकतयाऽनुबन्धानामनेकान्तत्वपक्षे ङित्पदार्थस्यैव शकङकारस्यानवयवस्य चरमावयवत्वाभावेन विशेषणसामर्थ्यादवयवत्वमेव भविष्यति। ननु शप उपदेशे पान्तत्वेन कथमुपदेशेऽदन्तत्वमत आह। स चेति। शप् चेत्यर्थः। अकारभक्तत्वादिति। अङ्गस्यातो मुगित्यर्थेनायमकारस्यावयवस्तस्मादित्यर्थः। मुग्विधानसामर्थ्याद्वर्णग्रहणे यदागमा इति परिभाषा न प्रवर्त्तत इति वादिमताभिप्रायेणाशङ्का तन्मतमभ्युपेत्यैव समाधत्ते। न चेत्यादिना। भावादित्यन्तेन। ननु स्यप्रत्ययावयवाकारस्यैवाङ्गो मुक् न तु स्यैति समुदायस्येति कथमुपदिश्यमानं यदन्तन्तद्ग्रहणेन ग्रहणमत आह। वक्ष्यमाण इत्यादि। पचन्तीत्यत्रास्य सूत्रस्याप्रवृत्तिमाशंकते। नन्वित्यादिना। नित्यत्वात्। कृताकृतप्रसङ्गित्वेन नित्यत्वात्। अन्तरङ्गत्वात्। एकादेशस्य वर्णमात्रापेक्षत्वेनान्तरङ्ग-

SGDF Sri Gargeshwari Digital Foundation

त्वं स्वरस्य सार्वधातुकसंज्ञकसमुदायापेक्षत्वेन बहिरङ्गत्वमिति भावः। तत्प्रवृत्तावपीति। उभयत आश्रयण इत्यस्यानङ्गीकारेणेत्यादिः। व्यपवर्गस्य। भेदस्य। परत्वव्यवहारस्य पूर्वपरयोर्यत्र भेदस्तत्रैव प्रवृत्तिरिति भावः। इष्टापत्तेरिति। एकादेशस्थले स्वराप्रवृत्तावपीष्टापत्तेरित्यर्थः। ननु पचन्तीत्यादावेतत्सूत्रेणान्त्यस्यानुदात्तत्वाभावे सति शिष्टेन प्रत्ययस्वरेणान्तोदात्तत्वापत्तिरतआह। पचन्तीति। मतान्तरमाह। स्वरभिन्नस्येति। एकादेशात्पूर्वमेतत्सूत्रप्रवृत्तावनुदात्तस्यैकादेश एतदप्रवृत्तौ तूदात्तस्येति स्वरभिन्नस्येत्यर्थः। एवमेकादेशो न नित्यउत्तरीत्यास्वरोऽप्यनित्य इति भावः। अन्तरङ्गत्वमपि खण्डयति। पूर्वपर इति। दीर्घे। अतो दीर्घो यञीति दीर्घे। स्वरात्पूर्वमस्य प्रवृत्तिः परत्वाद्बोध्या। पचेदित्यत्र तु परत्वादियादेशेऽपि स्वरस्य गुणात्पूर्वम्प्रवृत्तिः। इति परिभाषया। इति परिभाषयाऽदन्तमुदिश्यमानम्प्रत्ययसंज्ञकमेव गृह्यते। तेनेति शेषः। जहि शत्रुमन्तिक इति। अत्र जादेशात्परस्य निघातो न। सा। प्रत्यायाप्रत्यययोरिति परिभाषा। एवञ्चाकारान्तोपदिश्यमानेति व्याख्यानम्परिभाषाप्रवृत्तितात्पर्यकमेवेति बोध्यम्। परिभाषाभावे त्वाह। छान्दस इति। तत्र। जहीत्यत्र। अनुदात्ते प्रयोक्तव्ये उदात्तस्य प्रयोगश्छान्दसत्वात्। अत्त इति। अदिप्रभृतिभ्य इति लुकि बलवत्तरे कृते प्रत्ययलक्षणसूत्रस्य विधायकत्वपक्षे ज्ञापकोपन्यासः। तस्य सूत्रस्य नियमार्थत्वमिति पक्षे प्राप्तिरेव नास्तीत्याह। प्रत्ययलक्षणस्येति। प्रसङ्गादिति। स्वरस्य निरूपणप्रसङ्गादित्यर्थः। तस्यानुदात्तत्वे प्राप्ते। धातोः शेषनिघाते प्राप्ते सेर्ह्यपिच्चेत्यपित्वे सप्रत्ययाद्युदात्तत्वेन हेरुदात्तत्वाच्छेषनिघातस्य प्राप्तिः। यत्र परस्येत्यस्य प्रवृत्तिस्तत्रैवाद्युदात्तस्येत्यस्य प्रवृत्तिरिति तदाशयः। वस्तुतो नायन्नियम इत्याशयेनाह। यदि त्विति। प्रत्ययत्वाद्युदात्तत्वयोः सन्नियोगेनाद्युदात्तत्वस्याप्रवृत्तौ प्रत्ययसंज्ञापि न स्यादिति शस्येत्वाभावापत्तौ लुणह इति निर्देशानुपपत्तिरिति भावः। परत्वे त्वन्वाचय इति। यत्र परत्वस्य बाधकानवतारस्तत्रतत्प्रवर्त्तते आद्युदात्तत्वन्तुतदभावेऽपीत्याकारकइत्यर्थः। अत एव। परत्वाभावेऽपि प्रत्ययसंज्ञास्वीकारादेव। दत्वार्थमिति। धातोरीस्य दस्येत्यनेन दत्वविधानात्। तदस्तु। मध्योदात्तत्वमस्तु। वर्ज्यमानस्वरेणेति। सार्वधातुके

SGDF Sri Gargeshwari Digital Foundation

परतो लोपः श्नमोऽवयवस्य भवति सार्वधातुकञ्चाज्भस् समुदायरूपमित्यच-श्चाद्दशसमुदायसम्पादकस्यापि लोपप्रतिनिमित्तत्वमित्याशयेन शङ्केयम्। परोक्तमभ्युपेत्यैव समाधानमाह। सति शिष्टोऽपीति। वस्तुतस्तस्याचः समुदायघटकत्वं न निमित्ततावच्छेदकत्वमिव न तु निमित्तत्वमनुदात्तस्य च यश्चेत्यनेन यदनुदात्तस्योदात्तलोपप्रतिनिमित्तता तस्यैवानुदात्तस्योदात्तविधानमिति स्वीक्रियते तदात्र न तस्य सूत्रस्य प्राप्तिरिति बोध्यम्। न तूपदेश इति। प्रागेतदुपपादितम्। निघ्नशब्दादिति। मूलविभुजादित्वेन विधीयमानकप्रत्ययान्तनिघ्नशब्दप्रकृतिकाचारक्विबन्तादित्यर्थः। एतेन। उक्तार्थकनिघ्नशब्दादिति कथनेन। दीव्यमान इत्यपीति। अत्र हि श्यन उपदिश्यमानाकारान्तात्परत्वं स्पष्टमेव। दीव्यमान इत्यपि प्रत्युदाहरणमयुक्तम्। श्यनो नित्येन तदन्तस्याद्युदात्तत्वेन तदेकवाक्यतापन्ननिघातेन प्राप्तस्यापि तास्यनुदात्तेदित्यनुदात्तस्येवेहानुदात्तस्यैव श्रवणादित्याशयेनाशङ्का निराचष्टे। न चेति। लसार्वधातुकस्वरम्। लस्य स्थाने जायमानसार्वधातुकस्य यत्प्रत्ययस्वादाद्युदात्तत्वन्तत्। सार्वधातुकस्वरमात्रेति। अत्र मात्रपदं कार्त्स्न्ये। तथा च चानशस्त्वप्रयुक्तमन्तोदात्तत्वमत्रत्येवेति भावः। भाष्ये व्यवस्थापितत्वादिति। तत्र हि सार्वधातुके यगिति कर्मवाचिनि सार्वधातुके विधीयमानो यक् यथा स्यादित्येवमर्थङ्कर्मकर्तृग्रहणङ्कर्त्तव्यमिति वार्त्तिककृतोक्तम्। ततः कश्चात्र विशेषः यको वा श्यनो वा। यकि सत्यन्तोदात्तत्वेन भवितव्यम्। श्यनि सत्याद्युदात्तत्वेन। श्यन्यपि सत्यन्तोदात्तत्वेनैव भवितव्यम्। कथम्। लश्स्वरः श्यन्स्वरं बाधिष्यते सति शिष्टत्वात् श्यन्स्वरः प्राप्नोति। आचार्यप्रवृत्तिर्ज्ञापयति सति शिष्टोऽपि विकरणस्वरः सार्वधातुकस्वरं न बाधते इति। यदयं तासेः परस्य लसार्वधातुकस्यानुदात्तत्वं शास्ति। लसार्वधातुक एवैतज्ज्ञापकं स्यात्। नेत्याह। अविशेषेण ज्ञापकमिति प्रतिपादितम्। विन्दीन्धिखिदिभ्यो न। तास्यनुदात्तेदिति सूत्रभाष्येऽस्य वचनस्यानुपलम्भादाह मूले एतस्यानुदात्तस्य चेति। तत्र हि। अनुदात्तस्येत्यनेन यस्मिन्ननुदात्ते उदात्तो लुप्यते तस्यानुदात्तस्योदात्तत्वं विधीयते तत्र यादृशस्थले समुदायरूपेऽनुदात्ते उदात्तलोपस्तत्र समुदायावयवस्यान्त्यस्यादेर्वाऽनेनोदात्तत्वं विधीयते इति विचा-

SGDF
Sri Gargeshwari Digital Foundation

रः। यद्यनुदात्तस्येति सूत्रे कर्षात्वत इति सूत्रादन्त इत्यनुवर्त्तते तदान्तस्येति पक्षस्य यदि नानुवर्त्तते तदा आदेरिति पक्षस्य सम्भवः। अनयोः पक्षयोः प्रकृतसूत्रेऽन्त इति नानुवर्त्तते इति युक्तमित्याभाति। अयचश्चित्करणसामर्थ्यात्। तद्धि इयन्नियमित्यत्र द्वित्रिशब्दावयवेकारस्यायच्प्रत्ययावयवाकारे लोपेऽयचश्चित्वेऽसति तस्यान्तरतम्यादनुदात्ततया तदादेरनुदात्तत्वेन तस्मिन्नादिभूते उदात्तलोपादुदात्तनिवृत्तिस्वरेणाद्युदात्तत्वे प्राप्ते अन्तोदात्तत्वं यथा स्यादित्येवमर्थम्। यदि त्वस्मिन् सूत्रेऽन्तपदानुवृत्तिस्तदा चित्वाभावेऽपि तयपोऽनुदात्तस्यायजादेशोऽन्तरतमोऽनुदात्तस्तस्मिन्नुदात्तलोपे सति तस्यायचोऽन्तस्योदात्तत्वमनुदात्तस्य च यत्रेत्यनेनैव सिद्धमित्ययजादेशस्य चित्वं व्यर्थं स्यात्। इत्थमन्तपदाननुवृत्तिस्तदाऽयचश्चित्वसामर्थ्यादेवानुदात्तस्य चेत्यनेनादेरुदात्तत्वं विधीयत इति पक्षस्य लाभः। तत्रान्तग्रहणाननुवृत्तिपक्षे विद विचारणे खिद दैन्य इति धातुभ्याम्परस्य लस्य स्थाने आतामित्यादेशे तस्य लसार्वधातुकानुदात्तत्वे कृते श्नमोऽवयवस्य श्नसोरल्लोप इत्यनेन लोपे विन्दाते खिन्दाते इत्यत्राकारेऽनुदात्ते प्रत्ययत्वादुदात्तस्य श्नमोऽवयवस्य लोप इति तस्यातामोऽवयवस्याकारस्योदात्तनिवृत्तिस्वरेणोदात्तत्वं सिद्ध्यति यद्यन्तपदानुवृत्तिस्तदैकारस्य प्राप्नोतीति दूषणमादौ भाष्येऽभिहितम्। ततोऽन्तग्रहणन्नानुवर्त्तत इत्यभिप्रायेणास्तु तर्ह्यादिः। आदिरिति चेदिन्धीतद्वयमित्यन्तोदात्तत्वं विधेयम्। इन्धीतेत्यत्रेन्धेर्लिङ्। तङ्। तस्यानुदात्तेदित्यनुदात्तत्वम्। सीयुट् स चागमानुदात्तत्वेनानुदात्तः। श्नम्। श्नसोरल्लोप इत्यल्लोपः। श्नान्नलोप इति नलोपः। अत्रेकारेऽनुदात्ते श्नमोऽवयवस्याकारस्योदात्तस्य लोप इत्युदात्तत्वप्रसङ्गः। द्वयसित्यत्र यस्येति चेत्यल्लोपस्य जातत्वेनायच आदावनुदात्ते उदात्तस्य लोप इत्याद्युदात्तम्प्राप्नोतीति भावः। एवम्प्रतिपाद्य अस्तु तर्ह्यादिरुदात्तो भवतीति। ननु चोक्तमादिरिति चेदिन्धीतद्वयमित्यन्त इत्यन्तोदात्तत्वं विधेयमिति। विदीन्धिखिदिभ्यश्च लसार्वधातुकानुदात्तत्वं लिङि नेति वक्तव्यमित्युक्तं वार्त्तिककृता। ततो भाष्यकृतोक्तम्। लिङ्ग्रहणेन नार्थः। विन्दीन्धिखिदिभ्यश्च लसार्वधातुकानुदात्तत्वन्नेत्येव। इदमपि सिद्धम्भवति विन्दाते खिन्दाते। अयचि चित्करणसामर्थ्यादन्तोदात्तत्वम्भविष्यतीति। एतेनाथ

SGDF
Sri Gangeshwari Digital Foundation

मूले विन्दीन्धिखिदिभ्यो नेति वक्तव्यमित्येवाभिहितमत्र त्वेभ्यो लिङस्तङोऽनुदात्तत्वं प्रतिषिद्ध इत्यभिहितमित्यत्र लिङ इत्यप्रकृताभिधानमिति दूषणम्परिहृतम् । अत्र लिङ्ग्रहणस्योक्तवार्त्तिके स्थितत्वात् । ता नुदात्तेदिति सूत्रभाष्य इति । अत्र भाष्य इति कथनेन न तादृशं वचनं । किन्तु तत्रत्यप्रघट्टकाल्लभ्यते इति सूचितम् । तथा हि । तत्र हि तुदत इत्यत्रादुपदेशात्परत्वात्सावकाशं वचनम्पचत इत्यत्र शप उपदेशे पकारान्तत्वान्न प्राप्नोतीत्याशयेनैतस्योपसङ्ख्यानङ्कर्त्तव्यमिति वार्त्तिककृतोक्तम् । ततोऽनेकान्ता अनुबन्धा इत्यस्थितपक्षेण समाधाने कृते यद्यनेकान्ता अनुबन्धाः । अदिप्रभृतिजुहोत्यादिभ्यः प्रतिषेधो वक्तव्यः । अत्तः । जुहुत इति अदुपदेशादित्यनुदात्तत्वम्प्राप्नोति एवम्पूर्वपक्षे वार्त्तिकानुसारिणा कृते स्थान्यादेशाभावात् । नैवात्र स्थानिनन्नैवादेशम्पश्याम इति प्रत्याख्यानवादिनोक्तम् । आदेशोऽभावरूप इत्यदुपदेशात्परत्वन्नास्ति स्थानिवद्भावेऽस्याल्विधित्वात्प्रतिषिध्यत इति भावः । ततः समाधानान्तरमभिहितमनुदात्तङिद्ग्रहणाद्वा । अथ वा यदयमनुदात्तङिद्ग्रहणङ्करोति तज्ज्ञापयत्यागयचौ न लुक् श्नु विकरणेभ्योऽनुदात्तत्वम्भवतीति । नैतदस्ति ज्ञापकम् । अमर्थमेतत्स्यात् । विन्दाते । खिन्दाते इति । एतेनाभिधानेन विन्दाते खिन्दात इत्यत्र लसार्वधातुकानुदात्तत्वम्भवतीति लभ्यत इति । प्रौढिवाद इति । अनुदात्तस्य च यत्रेति सूत्रभाष्यपठितवचने लसार्वधातुकानुदात्तत्वन्नेति नकारस्य साक्षादभिधानादस्य भाष्यस्य प्रौढिवादत्वमित्यर्थः । किञ्चाकारान्तादुपदिश्यमानादित्यर्थेन पचत इत्यादिसिद्धावितस्योपसङ्ख्यानमित्यस्यानुपयोग एव । किञ्चानेकान्तपक्षेण समाधानमपि क्लिष्टम् । तस्याःस्थिरत्वात् । एकान्तपक्षेऽप्युदीचाम्माङो व्यतीहार इति । निर्देशेनावयवविप्रयुक्तकार्येष्वनुबन्धा न प्रतिबन्धका इति कल्पनया पचत इत्यादौ दोषाभावश्चेति । आदिः सिचो । प्रत्ययग्रहणपरिभाषया सिच इत्येतत्तदन्तपरम् । याशिष्टमितीति । बहुलञ्छन्दस्यमाङ्यित्यट् प्रतिषेधः । मध्योदात्तमिति । यमरमनमातामिति जातस्येटः सिजन्तावयवतया उदात्तत्वे न मध्योदात्तम् । मा हि कार्ष्टाम् । अत्र त्वट्प्रतिषेधो माङः प्रयोगादेव । हि चेति निघातस्य प्रतिषेधः । कृषातोः सिचि वृद्धिरिति वृद्धि । प्रत्ययस्वरेण । अत्र सिचोऽनच्कत्वेन स्वरायोग्यतय

SGDF
Sri Gargeshwari Digital Foundation

प्रत्ययस्वरेण तामादेशस्योदात्तत्वे नान्तोदात्तत्वम्। नन्वत्र सिचश्चित्त्वेन तद्विषये स प्रकृतेरित्यस्योपस्थित्या काशब्दावयवाकारस्योदात्तत्वेन भाव्यमित्यन्तोदात्तत्वमित्यनुपपन्नमत आह। सिचश्चित्त्वेनेति। एतद्धि सिच उदात्तत्वार्थम्। सिच स्वतोऽनच् आदौ भवति इटि कृते तु साच्कस्तत्राप्यागमानुदात्तत्वस्य प्रवृत्तौ सिचश्चित्वं व्यर्थमिति भावः। मानाभावादिति। मा हि कार्ष्टामित्यत्र सिचः स्वरायोग्यतया सति शिष्टत्वेन सार्वधातुकप्रत्ययस्य प्रत्ययाद्युदात्तत्वम्भवत्येव। एतस्य प्रत्ययस्य चित्प्रत्ययप्रकृतिघटितसमुदायाघटकतया तत्र प्रत्ययाद्युदात्तत्वमभवत्येवेति भावः। ननु चित इत्यनेन सति शिष्टत्वेन प्रकृतेर्धातोरुदात्तत्वं स्यादत आह। विकरणस्वरस्येति। एतच्च प्राग्व्यवस्थापितमेवस्वधातुस्वराप्रत्ययस्वरस्य सति शिष्टतया समुदायस्यान्तोदात्तत्वं स्यादेवेति भावः। आदिः सिच इत्यस्य वैकल्पिकत्वे नैतदभावे पित्प्रत्ययस्यानुदात्तस्य श्रवणापत्तिरत आह। अनिट इति। अत्र वार्त्तिकेऽप्यन्यतरस्यामिति सम्बध्यते। अत एवाह। पक्षे आद्युदात्तमिति। वार्त्तिकप्रवृत्त्यभावपक्षे आद्युदात्तमिति। आदिः सिच इत्यनेनेति शेषः। पक्षे। वार्त्तिकप्रवृत्तिपक्षे। ईटः। अस्तिसिच इति विहितस्य ईटः। अयं स्वरः। अनिटः पित इति स्वरः। एतस्य प्रवृत्तावन्तोदात्तम्पदं स्यात्। समाधत्ते इटः पूर्वमिति। ईडागमप्रवृत्तेः पूर्वमित्यर्थः। इतश्चेति लोपात्प्रागिति शेषः। ईटस्तदा न प्राप्तिरवृत्तत्वाभावात्। एवञ्चेटो बहिरङ्गत्वन्तत्कालाप्राप्तिकत्वरूपमनिटः पित इत्यस्यान्तरङ्गत्वन्तु तत्कालप्राप्तिकत्वरूपम्। स्वरे कृते। तिप उदात्तत्वे कृते। ततो लोपे कृते इति शेषः। लक्ष्य इति। पित्त्वावच्छिन्नोद्देश्यकत्वेन लक्ष्ये लक्षणस्येति न्यायस्यात्र प्रवृत्तिर्बोध्या। न च स्वरात्प्रागितश्चेत्यस्य प्राप्तिः। स्वरस्य ततः परत्वेनादौ प्रवृत्तेः। न च लोपो नित्यः। स्वरभिन्नस्य प्राप्त्या तस्याप्यनित्यत्वादिति भावः। अत एव। ईटः स्वरस्यानिष्टत्वादेव। यत्रानिट इत्यस्य प्रवृत्त्योदात्तश्रवणम्भवति तदुदाहरणम्प्रदर्शयितुमुचितमिति भावः। मतान्तरमाह। भाष्योदाहरणेति। उपलक्षणत्वादिति। तथा च मा हि कार्षीदित्यप्युदाहरणमित्यर्थोपलक्षणत्वादित्यर्थः। लक्ष्यभेदेनेति। लक्ष्यव्यक्तिभेदेनेत्यर्थः। अकृते ईटि तिबवयवेकारस्य तात्पर्यस्योदात्तत्वङ्कृते तु तस्मिन्स्तात्पूर्वस्येति भेदः। यलि च सेटीडन्तो वा।

SGDF
Sri Gargeshwari Digital Foundation

-भाष्ये स्पष्टमिति। तत्र हि प्रकृतसूत्रे पेिट उदात्तविधानादस्य सूत्रस्य सेट्ये-व प्रवृत्तिर्भविष्यतीत्यभिप्रायेण सेड्ग्रहणङ्क्किमर्थन्न थलोऽन्तोवेत्येवोच्येत। इडन्तोवेत्युच्यमाने इहापि प्रसज्येत पपक्थ। नैतदस्ति प्रयोजनम्। अच इति वर्त्तते। इदन्तर्हि प्रयोजनम्पपाथेत्युक्तम्। आदिर्णमुलीत्यत आदिग्रह-णमत्रानुवर्त्तते। न च सौत्रान्तपदार्थेन सहादिपार्थस्य विरोधः। पर्यायेण प्रवृ-त्तिसम्भवादत एव वक्ष्यति। कार्यिविकल्पार्थमिति। पचे। प्रकृतसूत्रप्रवृत्त्यभा-वपक्षे। लित्स्वरइति। एवञ्च थलो लितः पूर्वस्यादेरुदात्तत्वविधानेन लुलवि-थेत्यत्र लकाराकारस्य त्रयाणां स्वराभावे उदात्तत्वम्। कार्यिविकल्पार्थमि-ति। कार्यिणः स्थानिनो विकल्पार्थमित्यर्थः। आदिर्णमुलीति सूत्रस्यान्यतर-स्यामित्यस्य तत्र कार्यविकल्पसम्पादकत्वस्य सम्प्रतिपन्नतया तस्येहापि का-र्यस्योदात्तस्य विकल्पबोधकता स्यादिति भावः। ननु यदि प्रकृतसूत्रस्थवा-ग्रहणेन कार्यिविकल्प एव क्रियते तदा कार्यस्य कथं विकल्प इत्यत आह। अन्यतरस्यामिति। एतेन तदप्यनुवर्त्तत इति बोधितम्। इत्यादाविति। आ-दिना तवैचान्तश्च युगपदित्यस्य परिग्रहः। पपिथेत्यादाविति। भारद्वा नियमाद्यदेडागमस्तदेत्यादिः। न चोक्तरीत्या सिद्धाविह सेड्ग्रहणवैयर्थ्यमिति वाच्यम्। पपक्थेत्यत्र दोषोपपादनपरभाष्यबलेन थलीत्यनेन थलो निमित्त-स्य सद्भावो यत्र तस्य सर्वस्य कार्यं स्यात्। इड्ग्रहणन्तु यत्रेट् तत्र तस्यापि कार्यमित्यस्य कल्पनसम्भवात्। उपोत्तमं रिति। अत्र सौवर्यः समस्यस्तदन्तस्य-स्य इत्यनेन तदन्तस्योपोत्तमङ्ग्राह्यमन्तेन प्रत्ययावधवस्यापि कार्यमित्याश-येन मूलेरित्प्रत्ययान्तस्य इति व्याख्यातम्। नन्वाहवनीयेति समुदायस्य रि-त्प्रत्ययान्तत्वाभावात्कथमेतदुदाहरणमतोऽत्रोपोत्तममिति सूत्रप्रवृत्तेः फलमा-ह। ततो गतिसमास इति। ततः। उपोत्तममिति सूत्रप्रवृत्त्यनन्तरम्। प्रत्यय-स्वरा इति। प्रत्ययसम्बन्धिनः स्वरा इत्यर्थः। एवञ्च प्रत्ययनिमित्तकः प्रत्यय-स्यैव वा यः स्वरः स सर्वोऽपि सङ्ग्रहीतः॥

॥ इति प्रत्ययस्वरविवरणम् ॥

SGDF
Sri Gargeshwari Digital Foundation

समासस्य। अन्तोऽवत्या इति सूत्रादन्त इत्यनुवर्त्तते। हल्स्वरप्राप्ताविति। अन्तशब्दस्य चरमावयववाचकतया क्वचित्समासस्य चरमावयवो हलपि सम्भवतीति तस्य स्थाने स्वरस्य प्राप्तिर्बोध्या। बहुव्रीहौ प्रकृत्या। अनुवर्त्तमानमिति। मण्डूकप्लुत्याऽनुवर्त्तमानमित्यर्थः। कर्षात्वत इत्यत उदात्त इति तित्स्वरितमित्यतः स्वरितपदमनुवर्त्तते अर्थाधिकारश्चेहाश्रीयते तद्वति वर्त्तत इति। लक्षणयेति शेषः। लाघवादाह। यद्वेति। अस्मिन्पक्षे न शब्दद्वयस्य लक्षणा इति भावः। पूर्वपदस्येऽपीति। तात्स्थ्यात्ताच्छब्द्यमिति न्यायेनेति शेष। समासस्ये त्यस्यापवादोऽयम्। श्रूयत इत्यादि। असुनकर्मणीति बोध्यम्। चित्रश्रवा इति। अत्र पूर्वपदस्य चित्रशब्दस्यामिचिमिदिशसिभ्यः क्त इति क्तप्रत्ययान्ततयान्तोदात्तत्वेन तस्यैव स्वरस्यावस्थानान्मध्योदात्तत्वम्। समपाद इति। समः पादो यस्येत्यर्थः। सुञो डमविति। डित्त्वाट्टिलोपे पित्त्वादनुदात्तत्वे तस्मिन्धातुस्वरेणोदात्तस्य टेर्लोपे उदात्तनिवृत्तिस्वरेणान्तोदात्तत्वे प्राप्ते त्वत्त्वसमसिमेत्यनुदात्तत्वम्। बहुव्रीहावित्यस्य समासस्येति सूत्रापवादत्वान्नानेन शङ्कते। नन्विति। अत्र। समपाद इत्यादौ। अस्मिन्स्वरे। पूर्वपदप्रकृतिस्वरे। अस्य सूत्रस्यापूर्वस्वरविधायकत्वाभावादिति शेषः। प्रियविश्व इत्यादाविति। प्रियशब्दोयान्त्यस्यान्त्यात्पूर्वमित्याद्युदात्तः। यद्यत्र समासान्तोदात्तत्वं स्यात्तर्हि दोत्तद्वयसमावेशः स्यादिति भावः। एवञ्च पूर्वोक्तदोषपरिहारस्यावश्यकत्वे च। तदप्रवृत्तौ। समासान्तोदात्तत्वाप्रवृत्तौ। पाशब्दस्येति। स्वाङ्गशिटामिति पादशब्दस्याद्युदात्तत्वात्। स्त्रीकपादवाचकस्य तुह्वर्षादित्वादाद्युदात्तत्वम्। आवश्यकं वेति। तथा सति प्रकृतसूत्राप्रवृत्तौ समासान्तोदात्तत्वं भवत्येवेति भावः। तत्पुरुषे तुल्यार्थ। यदन्तः। नौवयोधर्मेतियदन्तः। टच्यपि। राजाहः सखिभ्य इति टच्यपि। परिनिष्ठितविभक्त्या समासपक्षाभिप्रायेण शङ्कते। नन्विति। ग्रहणादिति। अस्ति चात्र लक्षणप्रतिपदोक्तपरिभाषाप्राप्तिस्तत्तच्छब्दानुवादेन विधानात्। बाधनार्थमिति। पुनरुपादानेन परस्यापि बाधसिद्धिर्वाक्यान्तरकल्पनया भवतीति भावः। मतान्तरमाह। अव्यथीत्यत्रेत्यादिना। अव्यथीत्यत्र नञ्युपपदे व्यथधातोर्जिहक्षीतीनि कृते व्यथीशब्दस्योपपदसमासः। विभक्तिस्वरस्य। तिसृभ्यो जस इति विभक्तिस्वरस्य। वचनान्वेवेति। तत्र हि य-

SGDF
Sri Gangeshwari Digital Foundation

दुपपदङ्कृतिं नञ्तस्य स्वरो बलीयानिति वक्तव्यम्। अकरणिः। अवाक्रोशे-नञ्यनिः। सहनञ्निर्द्दिष्टस्य च नञ्स्वरो बलीयानिति वक्तव्यम्। अव्यथी। अत्र जिदृचीति सूत्रेऽव्यथेति निपातनाद्धातुना सह नञ्समासे नलोपे प्र-त्यय इति प्रत्ययस्वरस्य सतिशिष्टत्वेऽपि वचनान्नञ्स्वरस्तत्पुरुषे तुल्यार्थेति विहितो बलीयानित्यर्थः। अतिस्रः। विभक्तिस्वरान्नञ्स्वरो बलीयानिति वक्त-व्यम्। अचत्वारः। अनड्वाहः। विभक्तिनिमित्तस्वराच्च नञ्स्वरो बलीयानिति वक्तव्यम्। एवं बचनारम्भेण नञ्स्वरः साधितः। भाष्ये त्वित्यनेन भाष्यकृ-तास्पष्टप्रतिपत्त्यर्थमनेकवचनानि यद्यप्यारब्धानि तथापि वचनेन पूर्वोक्ताना-म्फलानां साधनापेक्षया परिगणनमध्ये नञः पृथक् पाठकरणेन भाष्यकृ-तैवोक्तानाम्प्रयोजनानामन्यथा सिद्धिः सूचितेति स एव प्रकारो लाघवायु-क्तोऽत एव मुख्यार्थकैकशब्दोपादानङ्कृतमिति बोध्यम्। एवञ्च। चादिषु कु-शब्दपाठे च। स्नात्वा कालकः। अत्र स्नात्वेत्यस्य कालकपदस्य च मयूरव्यं-सकादित्वात्तत्पुरुषः॥ किमनेन। किम्परिगणनेन। अन्तोदात्तनिपातनमि-ति। स्नात्वा कालकशब्दोऽन्तोदात्तो मयूरव्यंसकादिषु पठनीय इत्याशि-त्येत्यर्थः। इष्यत एवेतीति। एवञ्च स्नात्वा कालकः पीत्वा स्थिरक इत्यत्र स-मासार्थन्निपातनस्यावश्यकत्वेन तेनैव स्वरे सिद्धे परिगणनन्न कार्यम् सामि-कृतमित्यादि सिद्धिश्चानायासेन भविष्यति। एवञ्चापरिगणने। दव्ययपूर्वपदप्रकृति-स्वर एवास्तु। इति द्वितीयेति। अत्यन्तसंयोगे चेति समासः। मुहूर्तशब्दो लघावन्त इति मध्योदात्तस्तस्य द्वितीयान्तस्य प्रकृतिस्वरः। अन्योक्तमुदाह-रणन्त्वन्यथा सिद्धमित्याह। काष्ठाश्रितादाविति। न प्रवर्त्तत इति। स्वरविधा-यकसूत्रे कृत्यतुल्याख्या इत्येव सिद्धे कृत्यतुल्यार्थयोर्वियोगेन पाठादर्थपदोपा-दानाच्च तदंशे लक्षणप्रतिपदोक्तपरिभाषा न प्रवर्त्तत इति तेषाम्भावः। अत एव कुरुगार्हपतेति सूत्रे पण्यकम्बलः संज्ञायामित्युपादाय कृत्यप्रत्ययान्त-त्वात्पूर्वपदप्रकृतिस्वरे सिद्धे पण्यकम्बलः संज्ञायामेवेति नियमार्थमिदमिति भाष्यकैयटयोरुक्तम्। विशेषणसमास इति च व्याख्यातम्। कृत्यतुल्याख्येति प्र-तिपदोक्तः समासस्तु दुर्लभः। कम्बलपदस्य जातिवाचकत्वात्। कश्चिदिति। अत्रारुचिबीजन्तु परिनिष्ठितविभक्त्या समासम्प्रदर्श्य परमकारकमित्यादौ

SGDF

स्वरप्राप्तिमाशङ्क्य लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेति प्रतिपदं यो द्विती-या तृतीया सप्तमी समासस्तस्य ग्रहणमिति भाष्ये उक्तान्न तु कृत्याशेऽप्युक्ता-परिभाषाप्रवृत्तिरुक्ता प्रकृत सूत्रभाष्ये । तेन तदंशे भाष्यप्रामाण्यादेव परि-भाषाप्रवृत्त्यभावे सिद्धे ज्ञापकानुपयोग इति । कुरुगार्हपतेति सूत्रभाष्याच्च । वर्णो वर्णेष्वनेते । अत्रानेते इत्येतत्समानाधिकरणं वर्णेष्वित्यस्य विशेषणम् । न च विशेष्य वाचकम्पदम्बहुवचनान्तन्तस्यैकवचनान्तमनेत इत्येतत्कथं वि-शेषणमिति वाच्यम् । नञ्समासस्योत्तरपदार्थप्रधानतयोत्तरपदार्थस्यैकत्वेन समुदायस्यैकवचनान्तस्य तद्विशेषणत्वसम्भवात् । कृष्णसारङ्ग इति । अत्र व-र्णो वर्णेनेति समासः । वर्णवाचकयोः समासे वर्णवाचकस्य कृष्णशब्दस्याद्यु-दात्तत्वेन समुदायस्याद्युदात्तत्वम् । मौलमाद्युदात्तोदाहरणं लौकिकमि-ति सूचयितुमाह । वेदेत्विति । एकमिति । विशेष्यविशेषणान्यतरमित्यर्थः । प्र-त्युदाहरणेषु प्रतिपदोक्तसमासाभावादेव दोषाभावादिति भावः । गाधलवण-योः । अरित्रगाधमित्यत्र षष्ठीतत्पुरुषः । अरित्रशब्द इत्रान्तत्वेन मध्योदात्त-स्तस्य प्रकृतिभावे सतीकारस्यैवास्मिन् प्रयोगे उदात्तस्य श्रवणम् । दायाद्य-म् । अस्य सूत्रस्य धनदायाद इत्याद्युदाहरणन्तदा भवेद्यदि दायाद्यशब्दः स्वत्ववत्परः स्यात्तथा तु न सम्भवति कृत्तद्धितसमासेभ्यः सम्बन्धाभिधानम्भाव-प्रत्ययेनेति सिद्धान्तादत एतस्य तत्परत्वमुपपादयति । दीयत इत्यादिना । दाधातोः कर्मणि घञ् । तदन्तप्रकृतिकषष्ठ्यन्तस्य आङ्पूर्वाद्दाधातोः कर्त्तरि के निष्पन्ने नादशब्देन समासः । ततो भावे ष्यञ् । प्रकृतिजन्यबोधे कर्त्तृत्वां-शे क्रियायाः प्रकारतया भानाभिप्रायेणदायाद्यशब्दस्य दयादानपरत्वमुक्तम् । साक्षात्क्रियायाः कर्त्तृत्वसम्बन्ध एव प्रकार इत्याशयेनाह । तत्सम्बन्धो वेति । लक्षणया दायाद्यशब्दस्य दीयमानपरत्वकल्पने क्लेश इत्यतः प्रकारान्तरमाह । यद्वेति । आङ्पूर्वकाद्दाधातोर्मूलविभुजादित्वात्कप्रत्ययः आदत्त इत्यर्थे बो-ध्यः । प्रतिबन्धि । ननु गमनचिरमित्यनयोः सामानाधिकरण्यमनुपपन्नङ्गमन-शब्दस्य क्रियाकरणवाचित्वादत आह । भाववाचित्वादिति । तथा च गम्धातो-र्भावे ल्युडिह बोध्यः । ननु तथापि कथं सामानाधिकरण्यञ्चिरशब्दस्य काल-वाचकत्वादत आह । चिरकृच्छ्रयोरिति । वर्त्तमानात् । लक्षणयेत्यादिः । एव-

र्व। उक्तरीत्या सामानाधिकरण्योपपादने च। सूत्रे प्रतिबन्धिशब्दो न स्वरूपपरः किन्त्वर्थपरो वृत्त्यादिसम्मतव्याख्यानात्। पदेपदेश इति। अत्रापदेश शब्दो व्याजोदेशोलक्ष्यञ्चेति कोशात् व्याजपर इत्याशयेनोक्तम्मूले व्याजवाचिनि पदशब्द इति। निवाते वातत्राणे। अत्र निवातशब्देऽर्थाभावेऽव्ययीभावः। वातस्य बहिर्विद्यमानार्थत्वात्। बहुव्रीहिसमासमाह। निरुद्ध इति। आद्ये अव्ययीभावसमासस्वीकारपक्षे। कुड्यादिशब्दोऽत्र पक्षे स्वार्थहेतुकार्थे लाक्षणिकः। अन्त्ये। बहुव्रीहिपक्षे। तत्। सामाधिकरण्यम्। उभयत्रोत्तरपदस्य साहित्येनसमुदायस्यैतद्वाचकता बोध्या। शारदे। कर्मधारये पूर्वोत्तरपदार्थयोः सामानाधिकरण्यप्रयोजकमित्याशयेनाह। रज्जुशब्द इति। नचात्र षष्ठीसमास एवास्त्विति वाच्यम्। अत्रापि पक्षे रज्जोः साक्षादुद्धारसाधनत्वानुपपत्त्या लक्षणाया आवश्यकत्वमित्याशयात्। किञ्च करणस्य शेषत्वविवक्षास्वीकार्या तदपेक्षयोक्तरीत्या कर्मधारय उचित इति भावः।शरदि भवमिति। अस्वच्छजलमित्यर्थः। उदाहरणे तु शारदः पीतमुक्ते स्याच्छालीनेऽप्रतिमे नवे। शारदो विषभेदे स्याद्विल्ले पारदेऽपि चेति कोशात्पीतमुक्तादौ शारदशब्दो रूढः। तेनास्वपदविग्रहः। अयम्। समुदायः। दौवारिककषायशब्दे षष्ठी तत्पुरुषः। अस्य समुदायस्य जातिवाचकत्वमित्याशयेनाह। रूढिशब्दोऽयमिति। सदृशप्रतिरूपयोः। अत्र सूत्रे यत्सदृशग्रहणन्तत्तत्पुरुषविशेषणमित्याह। सादृश्यवाचिनीति। पित्रा सदृश इत्यर्थे प्रयुज्यमानः पितृसदृश इति शब्दः पूर्वोत्तरपदार्थयोः सादृश्यङ्गमयति। तृतीयासमासे। पूर्वसदृशेति सूत्रविहिततृतीयासमासे। अलुक्समासार्थम्। षष्ठ्या आक्रोश इत्यलुक्समासार्थम्। ननु यत्र षष्ठीसमासस्तत्र तेन सूत्रेणाप्राप्त एव पूर्वपदप्रकृतिस्वरोऽनेन विधीयत इत्यस्त्वित्यत आह। षष्ठीसमासस्त्विति। तदुक्तम्प्रकृतसूत्रभाष्ये। तत्र प्रकृतसूत्रस्थसदृशग्रहणस्य प्रयोजनं वक्ष्यमाणौ शङ्कासदृशग्रहणमनर्थकन्तृतीयासमासवचनात्। पूर्वसदृशेति तृतीयासमासेन सिद्धम् षष्ठ्यर्थन्तर्हीदं वक्तव्यम्। पितुः सदृशः पितृसदृश इति। षष्ठ्यर्थमिति चेत्तृतीयासमासवचनानर्थक्यम्। इहास्माभिस्त्रैशब्द्यं साध्यम् पित्रा सदृशः पितुः सदृशः पितृसदृश इति तत्र द्वयोः समानार्थयोरेकेन विग्रहः। अपरेण वृत्तिर्भविष्यति। अविरविकन्यायेन। अवि-

SGDF
Sri Gargeshwari Digital Foundation

रविक इति समुदायोऽनुकरणशब्द इति न्यायशब्देन समासेऽपि लुगभावः तद्यथा अवेर्मांसमिति विगृह्य अविकशब्दादुत्पत्तिर्भवति आविकमिति। एवं पितुः सदृश इति विगृह्य पितृसदृश इति भविष्यति। पित्रा सदृश इति विगृह्य वाक्यमेव भविष्यति। अवश्यन्तृतीयासमासो वक्तव्यः। यत्र षष्ठ्यर्थो नास्ति तदर्थम्। भोजनसदृशः। अध्ययनसदृश इति। अत्र हेतौ तृतीया। भोजनहेतुकसादृश्यवानित्यर्थः। षष्ठ्यर्थो नास्तीत्यस्य तृतीयासमानार्थकषष्ठ्यर्थो नास्तीत्यर्थः।एवञ्च समासविधौ समाससिध्यर्थं सदृशग्रहणमावश्यकन्नैव सदृशशब्दस्य तृतीयासमासे तत्पुरुषेत्यनेन पूर्वपदप्रकृतिस्वरे सिद्धे प्रकृतसूत्रे सदृशग्रहणन्न कार्यमित्याशङ्क्य इदमप्यवश्यं वक्तव्यम्। यत्र षष्ठी श्रूयते तदर्थम्। दास्याः सदृशो वृषल्याः सदृश इति। अनेन प्रकृतसूत्रस्थसदृशग्रहणस्य सार्थक्यम्प्रदर्शितमलुक्समास एव न तु पितृसदृश इति समासो दर्शितस्तेनानभिधानमित्याशयः। अलुक्समासस्य सादृश्यवाचकत्वात्तत्रानेन पूर्वपदप्रकृतिस्वरे विहिते सति यस्य स्वरस्यावस्थानन्तमाह। एवञ्चेति। अन्तोदात्तत्वेति। दंसेः टो न आ चेति दंस्धातोष्टप्रत्ययो नकारस्याकारः। प्रत्ययस्वरेणान्तोदासशब्दस्ततष्टित्वान्ङीपि उदात्तनिवृत्तिस्वरेणान्तोदात्त इत्यर्थः। वृषलीशब्दस्तु जातिलक्षणङीषन्तत्वादन्तोदात्तः। इत्यादीति। अनेनादिना पूर्वसदृशेति सूत्रोक्तस्तत्सूत्रावयवसदृशशब्दाकरणप्रकारः सूचितः। तत्र हि भोजनसदृशः अध्ययनसदृश इत्यस्य भोजनेन कृतः सदृशः अध्ययनेन कृतः सदृश इत्यर्थ आश्रीयते तदा प्रतिपदोक्तस्य तृतीयातत्कृतार्थेनेति विहितसमासस्य सत्त्व.त्तत्पुरुषे तुल्यार्थेति सूत्रेण पूर्वपदप्रकृतिस्वरस्य सिद्धौ पूर्वसदृशेति सूत्रे सदृशग्रहणन्न कार्यमिति सदृशग्रहणप्रत्याख्यानप्रकारो बाधितः। सदृशप्रतिरूपयोरिति सूत्रस्थभाष्यन्त्वेकदेश्युक्तिरिति च तस्मिन् सूत्रेऽभिहितन्तस्य च सङ्ग्रहः। प्रतियोगिविशेषसमर्पणार्थम्। सादृश्यप्रतियोग्युपमानविशेषसमर्पणार्थम्। द्विगौ प्रमाणे। समानाधिकरणे सप्तम्यौ। बहुव्रीहौ प्रकृत्येत्यतः पूर्वपदमित्यस्य सम्बन्धेन तेनोत्तरपदस्याक्षेपेण प्रमाणवाचिनि द्विगावुत्तरपदे तत्पुरुषसमासे पूर्वपदमित्यर्थः। समाहारे द्विगुरिति। सप्तानां समानां समाहारः सप्तसमम्। सनपुंसकमिति नपुंसकत्वम्। अपपाठ इति। न-

SGDF
Sri Gangeshwari Digital Foundation

ंसकत्वस्य न्याय्यत्वात्। उपसर्जनत्वादित्यादि नपुंसकत्वस्योपलक्षणम्। उदाहरणे प्राच्यशब्दो द्युप्रागपागिति यदन्तत्वादाद्युदात्तः। गन्तव्यं पण्यं वाणिजे। वाणिजो व्यवहर्त्ता। मद्रेषु वाणिज इत्युक्ते सप्तम्यन्तपदसन्निधानवशात्तद्देशीयवणिक्त्वप्रतीतौ तत्र गत्वा व्यवहरतीत्यर्थसिद्धम्। गन्तव्यङ्गमनकर्म। पण्यम्पणितव्यम्। गाशब्दो ङीप्रत्ययान्तः। लब्धस्येति। शौण्डादिगणेऽस्य पाठाभावेन सप्तम्यन्तपूर्वपदकोऽत्र समासः सुप्सुपेति वाक्यनिष्पन्न एवेति योगविभागस्तु भाष्यानारूढ इति भावः। न च षष्ठीसमासे सूत्रस्य चरितार्थत्वात्कथं सुप्सुपेति समासङ्कल्पयित्वा चारितार्थ्यप्रदर्शनमिति वाच्यम्। न ह्येतत् सूत्रारम्भसामर्थ्यादेवङ्कल्पनं किन्तु तादृशकल्पनया सप्तम्यन्तपदघटितेऽप्यस्य प्रवृत्तिर्न्याय्येत्याशयात्तदाह। षष्ठीसमासार्थमिति। मात्रो यज्ञो। नपुंसकवाचिनीति। लिङ्गस्यार्थनिष्ठत्वादेवमुक्तिः। पाणिन्युपज्ञमित्यत्रातश्चोपसर्ग इत्यङन्तेनज्ञाशब्देन षष्ठीतत्पुरुषः। इञन्तः पाणिनिशब्द आद्युदात्तः। उपज्ञोपक्रममिति नपुंसकत्वम्। इक्षुच्छायमित्यस्येक्षूणाञ्छायेत्यर्थः। छायाबाहुल्य इति नपुंसकत्वम्। अस्त्रपदेति। भिक्षायास्तुल्यप्रमाणमिति कथनेन लौकिको विग्रहस्तुल्यप्रमाणशब्देन कार्य इति दर्शितम्। सुखप्रिययोर्हिते। यदेति। गमनप्रियमित्यादिकर्मधारयो यदायत्याम्प्रीतिकरत्वद्धितमित्यन्वयः। प्रियशब्दः प्रीतिकरे सुखशब्दः सुखजनके वर्त्तते। तस्य नाना विधस्य सम्भवाद्गमनस्येतरव्यावर्त्तनाय विशेषणत्वविवक्षेति भावः। गमनमेव विशेष्यमित्यभिप्रायेणाह। मयूरेति। प्रीतौ च। सुखप्रिययोरित्यनुवर्त्तते। प्रीतिरिच्छा। एवञ्च यद्ब्राह्मणस्य सुखजनकम्प्रीतिभरं वा भवति तद्वाचकशब्दघटित समासाज्जायमानशाब्दबोधोत्तरम्पूर्वपदार्थस्य प्रीतिर्गम्यत एवेति प्रीतावित्यव्यावर्त्तकमत आह। सुखप्रिययोरिति। प्रीत्यतिशयस्य प्रीतिनिष्ठोत्कटत्वाख्यविषयतानिरूपकत्वम्। ब्राह्मणच्छात्रयोः पायसाऽनध्याय विषयकप्रीत्यतिशय एतयोः सुखजनकत्वादस्त्येव। ब्राह्मणशब्दोऽसाऽन्तत्वादन्तोदात्तः। छात्रशब्दस्तु छत्रादिभ्यो ण इति णान्तत्वात्तथा। उदाहरणवाक्यप्रयोगे कृते तद्घटकोत्तरपदस्य प्रियशब्दस्य नित्यसाकाङ्क्षत्वात्पायसादिप्रयोगोऽध्याहारो वा आवश्यक इति भवति पूर्वपदार्थतग-

SGDF
Sri Gargeshwari Digital Foundation

प्रीत्यतिशयप्रतीतिः। राजसुखमिति प्रत्युदाहरणे यदुत्तरपदन्तदर्थविषयकेच्छा राजनि यद्यप्यस्ति तथापि न तत्र प्रीत्यतिशयप्रतीतिः। ब्राह्मणसुखम्पायसमित्यत्र लौकिकव्यवहारात्तथास्तीति बोध्यम्। पत्यावैश्वर्ये। तथा। प्रकृत्या। गृहपतिरित्यत्र यदुत्तरपदन्तस्य ईश्वरवाचकतया विशेषणतया ऐश्वर्यङ्गम्यते पूर्वोत्तरपदार्थयोः स्वस्वामिभावसम्बन्धात्। प्रत्युदाहरणवाक्यस्योत्तरपदार्थेन न ससम्बन्धो विवक्षितः। अन्यदीया वृषल्यपि कामुकस्य विप्रस्य नायिका सौन्दर्यात्सम्भवतीति विशेषः। समाहारद्वन्द्व इति। अत एव नपुंसकत्वेनेह दिधिषूशब्दस्य ह्रस्वत्वम्। क्तिवन्ता इति। एवञ्च धातुस्वरेणान्तोदात्ता इत्यर्थः। ऊप्रत्ययान्तः। अन्दूदृम्भू रित्यनेन व्युत्पादित ऊप्रत्ययान्तः। वा भुवनम्। ऐश्वर्यवाचिन्युत्तरपदे भुवनमित्येतत्पूर्वपदं वा प्रकृत्या। भुवनपतिर्विष्णुरित्यत्र विष्णावैश्वर्यस्य प्रतीतिः प्रसिद्धैव। ऐश्वर्ये किम्। भुवने पतिश्चौरस्य शूद्रोऽस्तीत्यर्थे भुवनपतिरित्यत्र सुप्सुपेति समासे मा भूदिति। आशङ्काबाधनेदीयस्सु। अत्राशङ्कशब्दो गुरोश्चेत्यकारप्रत्ययान्तः। गमनाशङ्कमित्यत्रोभयोः क्रियाशब्दत्वाद्भवति गमनशब्दस्य विशेषणवाचकत्वम्। तद्विषयकेति। गमनविषयकेत्यर्थः। अत्रापि कोटावुत्कटत्वं विषयताविशेषः। यस्यां शङ्कायां भासमानयोर्भावाभावयोरेकस्मिन् भावेऽभावे वोत्कटत्वाख्यविषयताविशेषोऽस्ति तादृशं ज्ञानमेवाशङ्कशब्दार्थः। लित्स्वर इति। गमनशब्दस्य भावल्युडन्ततया गमनशब्दो लितीत्यनेनाद्युदात्तः। गमनाबाधम्। अत्राङ्पूर्वाद्बाधधातोः कर्मणि पूर्ववदकार एव। गमननेदीयोनिकटतरमित्यर्थेऽन्तिकशब्दादीयसुन्प्रत्ययेऽन्तिकशब्दस्यान्तिकबाढयोर्नेदसाधावित्यनेन नेदादेशः। पूर्वे भूतपूर्वे। अयम्भूतपूर्वार्थे पूर्वशब्दो वृत्तिविषय एवेत्यस्वपदविग्रह एव। सविधसनीड। सविधेत्यत्र विधधातोर्घञर्थे कविधानमिति कः। विपूर्वकाद्धाञ आतश्चोपसर्ग इति के आतो लोपो वा समानशब्दस्य सादेशः। सनीडेत्यत्र समानपूर्वकान्निहधातोर्घञर्थ इति के पृषोदरादित्वाद्दीर्घडकारौ। अथ वा निपूर्वाद्व्राजः के आकारलोपे दीर्घडकारौ पूर्ववत्। उदाहरणे सर्वत्र षष्ठी समासः। मद्रसमर्यादमिति। मर्यादया सहितम्। वोपसर्जनस्येति सहस्य सः। मद्रस्य समर्यादमित्यर्थः। सवेशसदेशयोः समानवेशदेशौ वाच्यौ। एवं

SGDF
Sri Gargeshwari Digital Foundation

व्युत्पत्तिमात्रम्। प्रकृते तु समीपे रूढिरेषाम् सामीप्यस्य रूढ्यर्थतावच्छेदकतया तत्र वृत्तिरेषाम्बोध्या। सामीप्ये किम्। विधानं विधारचना। समाना रचना यस्य चैत्रस्य तत्सविधम्। मद्रस्य सविधमित्यर्थः। अत्र समाना उच्चनीचरहितेति विवक्षितन्न तु तुल्यत्वस्य विवक्षा। विस्पष्टादीति। कर्मधारयाभावेऽपीति। सुबन्तार्थविशेष्यान्वयित्वे एव सामानाधिकरण्यस्य सम्भवात्। मयूरव्यंसकादिषु तत्समुदायस्य पाठेन यथा कथञ्चिदन्वयेन सामर्थ्येऽपि समाससंज्ञा भवति। विस्पष्टे वा दाम्नीत्यनेन निपातितस्पष्टशब्दस्य विशब्देन समासः। विचित्रे विपूर्वकाच्चित्रधातोर्घ्युरादिण्यन्तात्प्रकृतेरेरच् प्रादिसमासः। विचित्ते चिती संज्ञान इतिधातोर्निष्ठाविगतश्चितमस्येत्यर्थः। व्यक्तशब्दे तु अञ्जूधातोर्निष्ठा तदन्तस्य निष्ठा चेति आद्युदात्तत्वे गतिकारकोपपदादिति कृदुत्तरपदप्रकृतिस्वरः। सम्पन्ने सम्पूर्वकात्पदेः कर्त्तरि क्ते गतिसमासे थाथादिस्वरः। नित्वादिति। फलिपाटीत्यादिना व्युत्पादितो य डप्रत्ययः स धान्ये नित्यधिकारान्निदिति भावः। पण्डितेत्यत्र पण्डाशब्दादितच्प्रत्ययश्चित्वादन्तोदात्तत्वन्निष्ठान्तो वायम्। कुशले तु कुशान् लातीति विग्रहे लाधातोरातोऽनुपसर्गे क इति के कृदुत्तरपदप्रकृतिस्वरेणान्तोदात्तत्वम्। अज्यावमकन्। तद्वत इति। आद्यादेशवत इत्यर्थः। एते चादेशा इष्ठन्नादिषु भवन्तीति तद्वन्त इष्ठन्नाद्यन्तसमुदायस्तोऽत्र विनाऽपिवच्छब्दसम्बन्धं लभ्यते एवञ्च पापवच्छब्दे न द्वन्द्वः। अत एवाह। वदिति त्विति। पाठान्तरन्त्विति। मूले पापवाचिनि चेति पाठान्तरमित्यर्थः। प्रामादिकमिति। पापपर्यायेष्वति प्रसङ्गात्। न च प्रादिसाहचर्यात्पापवाचक इष्ठन्नाद्यन्त एव ग्रहीष्यत इति वाच्यम्। पर्यायप्रकृतिकेष्ठन्नाद्यन्तस्यापि ग्रहणापत्तेरिति भावः। गमनश्रेष्ठमित्यादौ गमनशब्दो भावल्युडन्तः। सः। इष्ठन्। अजादीगुणवचनादेवेत्युक्तेः। गुणोपसर्जनद्रव्यवचनानामेव गुणवचनसंज्ञासत्त्वात्। कुमारश्च। तथा। प्रकृत्या। तत्त्वमिति। उक्तयोः पक्षयोर्मध्ये कः पक्षो युक्तियुक्त इत्येतत्। अपरे तु पूर्वोत्तरसूत्रसाहचर्यादुत्तरसूत्रविषये प्रतिपदोक्तकर्मधारयस्यासम्भवादर्थाधिकारानुरोधादप्रतिपदोक्तस्य ग्रहणमित्याहुः। कुमारशब्दः पचाद्यजन्तः। आदिः प्रत्येनसि। एतेन षष्ठ्यर्थे प्रथमेति कल्पनेन। पूगेष्वन्यतरस्याम्। अत्र पूगेष्विति बहुवचन-

निर्देशादर्थग्रहणन्तस्य चोत्तरपदत्वासम्भवात्तद्वाचिनो लाभस्तत आह । तद्वाचिन्युत्तरपद इति । आदिरित्यनुवर्त्तते । इगन्तकालकपाल । पञ्चारत्निरित्यत्र पूर्वपदप्रकृतिस्वरे सति न्नः संख्याया इति पञ्चन्शब्दस्याद्युदात्तत्वात्समुदाय आद्युदात्तः । ननु पञ्चारत्नय इत्यत्र जसि चेति गुणे सत्युत्तरपदस्येगन्तत्वाभावात् स्वरो न स्यादत आह । पञ्चारत्नय इत्यादाविति । अन्तरङ्गत्वात् । विभक्त्यनपेक्षत्वेनान्तरङ्गत्वात् । स्थानिवत्त्वेन । अचः परस्मिन्निति स्थानिवत्त्वेन । सर्वे सर्वपदादेशा इति न्यायेनेगन्तत्वबुद्धिः सुलभेति भावः । तत्सत्त्वेऽपि । अकृतव्यूहपरिभाषासत्त्वेऽपि । भगालशब्दः कपालपर्यायः । बह्वन्यतरस्याम् । इगन्तादिषूत्तरपदेषु द्विगुसमासे बहुशब्दः पूर्वपदभूतो वा प्रकृत्या । मूले बहुशब्दोऽन्तोदात्त इति । बहि वृद्धाविति धातोर्लङ्घिबंह्योर्नलोपश्चेति कुप्रत्ययस्तेनान्तोदात्त इत्यर्थः । पक्षे । पूर्वपदप्रकृतिस्वराभावपक्षे । इयसचो वेति । प्रथमस्य द्वितीयस्य ऊर्द्ध्वमाने मतौ ममेति भाष्यीयसिद्धान्तादरे तु मात्रच्तिर्यङ्मानत्वे द्रष्टव्यः । अन्यथा तु इयसच् । सिद्धशुष्क । ण्यान्त इतीति । वुञ्छणिति सूत्रेणेत्यादिः । आतपशुष्कः । अव्ययपूर्वपदप्रकृतिस्वरेणाद्युदात्त आतपशब्दः । चक्रशब्दोऽन्तोदात्तः । कृञः को द्वे चेति कप्रत्ययान्तत्वेन प्रत्ययस्वरेणान्तोदात्तः । अकालादित्यस्य प्रत्युदाहरणे पूर्वाह्णसिद्ध इत्यत्र कृदुत्तरपदप्रकृतिस्वर एव । तथा च समुदायस्यान्तोदात्तत्वम् । सूत्रस्य प्रयोजनमाह । मूलकारः कृत्स्वरेणेति । परिप्रत्युपायाः । द्वन्द्वाव्ययीभावविषयाणीति । पारिशेष्यादिति शेषः । एतच्चाग्रे स्फुटम् । अनेन पूर्वपदप्रकृतिस्वरे सत्युपसर्गा आद्युदात्ता इत्याद्युदात्तत्वम् । मा भूत् । पूर्वपदप्रकृतिस्वरो मा भूत् । किन्तु समासान्तोदात्तत्वमेव । राजन्यबहुवचन । अत्र राजन्यबहुवचनशब्दयोः कर्मधारये तस्य द्वन्द्वशब्देन षष्ठीतत्पुरुषः । बहुवचनशब्दस्य विशेषणवाचित्वेऽपि राजन्यशब्दस्य सौत्रः पूर्वनिपातः । द्वन्द्वे इत्यस्य सप्तम्यन्तस्य वर्त्तमान इति शेषः । शिनिवासुदेवा इत्यत्र शिनिशब्दो बाहुलकाच्छीङो निप्रत्ययो ह्रस्वश्चेति निप्रत्ययान्तत्वादन्तोदात्तः । शिनेश्चैकव्यक्तित्वाद्बहुवचनान्तत्वस्योपपत्तये मूले शिनिशब्दस्य लक्षणोक्ता सा च शक्यतावच्छेदकारोपरूपेत्याशयेनाह । शिनित्वारोपेणेति ॥ राजन्यानामन्धकवृष्णिग्रहणेनैव सङ्ग्रहे सिद्धे राजन्यग्रहणं

SGDF

र्थमतो मूले राजन्येति । अभिषिक्तवंश्यानामित्यत्र कर्मधारयः । तथा च ब्राह्मणवशिष्ठन्यायेन पृथगुक्तिरिति भावः । राजन्यशब्दस्य विशेषपरत्वमन्धकवृष्णिपदसन्निधाने भवति तदभावे तु क्षत्रियसामान्यपरत्वं स्यादित्याशयेनाह । कुरुपञ्चाला इति । सङ्ख्या । द्वन्द्व इत्यनुवर्त्तते । त्रयोदशेत्यत्र त्रयश्च दश चेति द्वन्द्वः । त्रिशब्दस्य त्रयसादेशस्तस्याद्युदात्तत्वमुपपादयति । त्रयोदश चम इति । आचार्योपसर्जन । षष्ठी बहुवचनेति । द्वन्द्व इत्येतद्विशेषणत्वादपेक्षिते ये बहुवचने तयोः स्थान इत्यर्थः । आचार्य उपसर्जनं विशेषणं यस्य सः आचार्योपसर्जनः । अन्ते वसतीत्यन्तेवासी शिष्यः । समानाधिकरणपदाभ्यामाचार्यप्रकारकशिष्यविशेष्यकोपस्थितिजनकानामिति फलितम् । छात्रा इति । एवञ्च शैषिको वृद्धाच्छ इति छः । गोत्रे अन्तत्वाभावादिति । तथा च युवप्रत्ययान्तत्वे नेञश्चेत्यस्य न प्राप्तिरिति भावः । व्याख्यानादिति । एतादृशानामेव द्वन्द्वस्य भाष्ये उदाहरणत्वं न प्रदर्शनमूलकाहृत्त्यादिसम्मत व्याख्यानादित्यर्थः । तदुक्तभाष्ये । अचार्योपसर्जनेऽनेकस्यापि पूर्वपदत्वात्सन्देहः । आपिशलपाणिनीयव्याडीयगौतमीयाः । एकम्पदं वर्जयित्वा सर्वाणि पूर्वपदानि तत्र न ज्ञायते कस्य पूर्वपदस्य स्वरेण भवितव्यमिति । लोकविज्ञानात्सिद्धम् । तद्यथा अमीषाम्ब्राह्मणानाम्पूर्वमानयेति यः सर्वपूर्वः स आनीयते एवमिहापि यत्सर्वपूर्वपदन्तस्य प्रकृतिस्वरत्वम्भविष्यतीति । पूर्वपदशब्दस्य यौगिकत्वाभिप्रायेण पूर्वः पक्षः । लोकविज्ञानादित्यादिना न्यायेन व्युत्पादनेन समाधानन्तु पूर्वपदशब्दः समासस्य प्रथमावयवे रूढ इत्यभिप्रायेण । सर्वपूर्वपदमित्यस्य सर्वेषां समुदायभावमापन्नानां यः पूर्वोवयव इत्यर्थस्तेन चात्र न निर्धारण इति निषेधस्य विषयता नेति बोध्यम् । मूले आचेति किमिति । आचार्योपसर्जनेति पदङ्किमर्थमित्यर्थः । छान्दसवैयाकरणा इति । अत्रोभयोरपि पदयोरध्ययनकर्मविशेषणकाध्ययनकर्तृविशेष्यकबोधजनकतयाचार्यस्य न भानमतो न तत्त्वम् । विभक्त्यन्तपाठ इति । प्रायेण गणेषु प्रातिपदिकमात्रस्य पाठदर्शनादत्र विभक्त्यन्तस्य पाठो वैलक्षण्यसम्पादको बोध्यः । तत्रापि यादृशो विभक्त्यन्तो द्वन्द्वघटितः समुदायः पठितस्तत्रैव पूर्वपदप्रकृतिस्वरो न तु कार्त्तमाण्डूकेयावित्यत्र । प्रातिपदिकमात्रस्य यस्मिन् गणे पाठस्तत्र न पठितसमुदायविवक्षेति

SGDF
Sri Gargeshwari Digital Foundation

भावः । महान्व्रीह्य । अत्रापि द्वन्द्व इत्यस्य सम्बन्धान्महाव्रीहिरित्यादिर्द्वन्द्व एवेति केचित् । तन्न । प्रकृतसूत्रस्थभाष्यविरोधात् । तथा हि । तत्र हि किमर्थम्महतः प्रवृद्धशब्दे उत्तरपदे पूर्वपदप्रकृतिस्वरत्वमुच्यते न कर्मधारये निष्ठेत्येव सिद्धम् । न सिध्यति । किङ्कारणम् । अख्यादिसमास इत्येवन्तादित्युक्तम् । यदि द्वन्द्व इत्यस्य प्रकृतसूत्रे सम्बन्धः स्यात्तदा कर्मधारये निष्ठेत्येवेति भाष्यविरोधः स्पष्ट एव । अत एव सन्महदिति प्रतिपदोक्त एवेति मूलमपि सङ्गच्छते । चुल्लकश्च वैश्वदेवे । चशब्दान्महानित्यस्य सम्बन्धः । एषु । महानित्यादिसूत्रेषु । नानुवर्त्तिर्तमिति । न तु तदग्रन्यदर्शनेन तत्पुरुषाधिकारस्य राजन्यबहुवचनेति सूत्रे द्वन्द्व इत्यस्य दर्शनेनैव निवृत्तिसम्भावना कार्या तथा च क्वचिच्छिष्टसम्मतव्याख्यानेन तत्पुरुषपदासम्बन्धेऽपि ततोऽग्रे सम्बन्धोऽस्त्येव । तत्पुरुष इत्यस्यासम्बन्धेऽपि समासस्येति सम्बध्यत एव ततश्चैषां सूत्राणान्तत्पुरुषेऽपि प्रवृत्तिः । युक्तञ्चैतदिति । तत्पुरुषेऽपि प्रवृत्तिरित्येतद्युक्तमित्यर्थः । अन्यथा । तत्पुरुषेऽपि प्रवृत्तिरित्यस्यास्वीकारे । तस्मादेव । सदेरेव । कुरुगार्हपत । सूत्रोपात्तेषु पण्यकम्बलान्ताः समुदाया पृथग्भूता यथा पठितास्तथैव स्वरोद्देश्याः । दासीभाराणामित्यत्र तु बहुवचननिर्देशाद्गण निर्देशः । उप्रत्ययान्त इतीति । कृञ उच्चेति विहितो य उप्रत्ययस्तदन्तोऽयम् । तत्र । उप्रत्ययविधायके । एवञ्चाद्युदात्तः । पर्यायेणेति । इगन्तानामित्यत्र ह्रयादीनामित्यतो वेत्यस्यानुवर्त्तनेन निदित्यस्यानुवृत्तौ फलाभावः । आद्युदात्तत्वस्येगन्तानामित्येव सिद्धेः । निदित्यस्यानुवृत्तिवादिमतेऽपीगन्तानामित्यस्य प्रवृत्त्या पाक्षिकाद्युदात्तत्वसम्भवादिति भावः । मूले त्विति । अत्र तुना अरुचिः सूचिता । अन्तोदात्तत्वमात्रकथनस्यानुचितत्वादिति । वृजेरिति वक्तव्यमिति । गार्हपते पर इति शेषः । कुरुवृज्योर्गार्हपत इति हि प्रकृतसूत्रभाष्ये पाठात् । वृजिशब्दस्य गुप्रधात्किदितीन्नन्तत्वादाद्युदात्तस्तस्यापि पूर्ववदिगन्तानामिति सूत्रस्य प्रवृत्तौ तु पर्यायेणाभाववप्युदात्तौ । आद्युदात्त इति । न सूतो असूत इति समासेऽव्ययपूर्वपदप्रकृतिस्वरेणाद्युदात्तः । अश्लीलदृढरूपा । अश्लीलशब्दो नञ्समासत्वादाद्युदात्तः । अस्यादृढरूपत्वमुपपादयति । लावण्यादीत्यादिना । तथा च लावण्यरहितत्वादश्लीलाकुब्जत्वादिदोषरहितत्वादृढरूपा । अत्र

SGDF
Sri Gargeshwari Digital Foundation

प्रगल्भः स्वरूपपरस्तस्य दृढत्वं दोषराहित्येन । अश्लीलेत्यस्य श्रीर्यस्यास्ति सा श्लीला सिध्मादित्वान्मत्वर्थीयो लः । कपिलकादीनामिति वक्तव्यमिति श्रीशब्दावयवरेफस्य लत्वम् । शोभनवर्णैराहितत्वादश्लीला । पारे वडवेवेति । वडवा सादृश्यं जवदार्ढ्यादिमत्त्वेन । छात्त्रार्थेऽण इनण्यनपत्य इति प्रकृतिभावकारणायाह । छात्त्रार्थ इति । तैतिलकद्रूरित्यत्र षष्ठीसमासः । पण्यकम्बलइत्यत्र पण्यशब्दोऽवद्यपण्येति यदन्तत्वाद्यतोऽनाव इत्याद्युदात्तः । इत्येव सिद्धमिति । पूर्वपदप्रकृतिस्वरत्वमिति शेषः । प्रतिपदोक्तत्वमिह कृत्यशब्दोच्चारणेन विहितत्वमेव । ननु यस्य कृत्यप्रत्ययान्तस्य समासस्तच्छब्दानुवादेन विहितत्वरूपम् । विशेषणसमास इति । कृत्यतुल्याख्येति सूत्रेऽजात्येत्युपादानाज्जातिवाचकभिन्नस्यैव कृत्यप्रत्ययान्तस्य समासो न तु जातिवाचकेनेति यद्यप्यस्ति तथापीह बहुलग्रहणाद्विशेषणसमास इत्यर्थः । न्यायसिद्धेति । कृत्येतिसूत्रन्नियमार्थमिति हि प्रसिद्धन्तच्च तदोपपद्यते यद्ययं योगो जातिवाचकभिन्नेन सह समाससंज्ञाविधायकः स्यात् तदा ह्यनियमस्य प्राप्तिर्यदि जातिवाचकेन समाससंज्ञाविधायकमेतद्भवेत्तदा कृत्यतुल्याख्यानामेव पूर्वनिपातनियमार्थमेतत्सूत्रमिति वक्तव्यन्तादृशनियमस्तत्र विशेषणमिति सूत्रेण समाससंज्ञायामपि सिद्ध इत्यजात्येति न्यायसिद्धानुवादमित्यर्थः । तत्फलम् । अनुवादफलम् । इत्याहुरिति । वृत्त्यनुसारिण इति शेषः । स्वरविधायके । तत्पुरुषे तुल्यार्थेति सूत्रे । परिभाषायाः । प्रतिपदोक्तपरिभाषायाः । नियमार्थमिदमिति । एवं विधिनियमार्थमिदमित्यर्थः अत एव गुरुगार्हपतेति सूत्रभाष्ये पण्यकम्बलः संज्ञायामिति वक्तव्यम् । यो हि पणितव्यः कम्बलः पण्यकम्बल एवासौ स्यात् । अपर आह । पण्यकम्बल एव यथा स्यात् क्व मा भूत् । पण्यगवः । पण्यहस्ती इत्युक्तम् । तत्र कैयटेनापि संज्ञायामिति प्रतीकमुपादाय संज्ञायामेव पण्यकम्बलः प्रकृतिस्वरपूर्वपदो भवतीत्युक्तम् । यदि क्वचिज्जातिवाचकस्य समास इष्टस्तदा स बहुलग्रहणेनैव साधनीयः । अन्यत्रेति मूलस्यासंज्ञायामित्यर्थः । पणितव्येति योगार्थप्रदर्शनेनासंज्ञात्वन्ध्वनितम् । तेन । तादृशनियमेन । सोऽपि । कृत्या इति स्वरोऽपि । चतुर्थी तदर्थे । अत्र चतुर्थीति प्रथमान्तम् । कार्ये । तदर्थ इति सप्तम्यन्तमुत्तरपदस्य विशेषणम् । प्रकृतिवि-

SGDF Sri Gargeshwari Digital Foundation

क्तितभाव एवेति। समाससंज्ञायास्तत्रैव प्रवृत्तेः। स्वरस्य तत्रैव प्रवृत्तौ मानमाह। अर्थ इत्यादिना। देवार्थमित्यादावनेनैव स्वरस्य सिद्धत्वात्। न च गोहितमित्यत्र स्वरसिद्ध्यर्थं क्तो चेति सूत्रमावश्यकमिति वाच्यम्। वक्ष्यमाणरीत्या तत्र क्तो चेत्येतत्प्रवृत्तेरनिष्टत्वात्। कुवेरबलिरित्यत्रेति। अत्र बलिशब्दो दीयमानद्रव्यपरः। तस्य द्रव्यस्य तदुपकारकत्वरूपन्तदर्थत्वमस्त्येव। गोसुखमिति। सुखपदार्थस्य न तदुपकारकत्वम्। सुखस्यैव मुख्यफलतया तस्य पूर्वपदार्थाभिप्रेतफलान्तरजनकत्वाभावादिति भावः। इति विग्रह इति। इदञ्च सुमादिकमिति विशेष्यमत्र बोद्धव्यम्। प्रतिपदोक्तत्वात्। क्तान्तेन प्रतिपदोक्तस्य चतुर्थी समासस्य ग्रहणात्। प्रतिपदोक्तश्चतुर्थीसमासो गोहितमित्यत्राप्यस्तीत्यभिप्रायेण गोहितमित्युदाहरणम्मूलेऽभिहितम्। भाष्यानुसारिमतमाह। अन्ये त्विति। अत्रापि। क्तो चेति सूत्रेऽपि। हितशब्दस्य सुखार्थकतया तस्य पूर्वपदार्थोपकारकत्वरूपतादर्थ्याभावात्। अत एव। तदर्थ इति पदस्यानुवृत्तेरेव। गुरुत्वादिति। न्यासान्तरकल्पनेन ज्ञापकत्वोपन्यासस्य युक्तत्वकल्पनायाङ्गुरुत्वात्। तस्य क्तग्रहणस्य। कर्मधारये निष्ठा। क्तो चेत्यतः क्त इत्यनुवर्त्तते। अनिष्ठेति छेदः निष्ठेत्यस्य प्रत्ययग्रहणपरिभाषया निष्ठान्तपरतया नञा समासान्निष्ठान्तभिन्नम्पूर्वपदन्क्तान्तोत्तरपदपरकङ्कर्मधारयसमासघटकम्प्रकृत्या इत्यर्थः। घटकत्वं सप्तम्यर्थः। प्रतिपदोक्तेति। अनिष्ठान्तस्य क्तान्तेन प्रतिपदोक्तः। यद्यप्यनिष्ठान्तमिति समासविधौ नोपात्तन्तथापि क्तान्तस्य साक्षादुपादानादस्ति प्रतिपदोक्तपरिभाषाप्रवृत्तिः। तेन। प्रतिपदोक्तसमासस्यैव ग्रहणेन। इदम्। प्रतिपदोक्ततत्सूत्रविहितस्यैव ग्रहणमित्येतत्। भाष्ये स्पष्टमिति। तत्र हि किमर्थम्महतः प्रवृद्धशब्दे उत्तरपदे प्रकृतिस्वरत्वमुच्यते न कर्मधारये निष्ठेत्येव सिद्धम्। न सिध्यति। किङ्कारणम्। श्रेण्यादिसमास इत्येवन्तत्। किम्पुनः कारणं श्रेण्यादिसमास इत्येवन्तदिति मा भूत्। महानि इष्टौ दक्षिणा दीयत इत्युक्तम्। तत्र कैयटः। श्रेण्यादिसमास इति। लक्षणप्रतिपदोक्तपरिभाषया क्तान्तेन प्रतिपदोक्तो यः कर्मधारयस्तस्य ग्रहणमित्यर्थ इति। कृताकृतमित्यत्राङ्प्रश्लेषे सति कृद्ग्रहणपरिभाषया आकृतशब्दस्य क्तान्तत्वमित्याशयेनाह। कृतमिति छेद इति। इदमुपलक्षणम्। श्रेण्यादिषु पण्डित-

SGDF
Sri Gargeshwari Digital Foundation

शब्दः पठ्यते क्तादिषु च समाख्यातशब्द एतयोः प्रतिपदोक्तः श्रेण्यादयः क्तादिभिरिति समासोऽस्ति तत्रापि प्रकृतसूत्रेऽनिष्ठेतिपदानुपादाने पूर्वपदप्रकृतिस्वरापत्तिः । पण्डितशब्दो हि लघावन्त इत्याद्युदात्तः । अहीनशब्दं व्याचष्टे अविभागीति । अविभागवाचीत्यत्र नञो विभागवाचिशब्दप्रकृतिसुबन्तेन समासः । विभागवाचकत्वञ्च यथा कथञ्चित् । कष्टश्रित इति समासघटकश्रितशब्दार्थे कथमपि विभागस्य न घटकता कान्तारातीत इत्यत्र त्वतीत शब्दस्य विभागानुकूलव्यापाराश्रयवाचकतया विशेषणता विभागस्यास्त्येवेति भावः । इत्याहुरिति । भाष्यानुसारिणः । तदुक्तम्भाष्ये । अहीने द्वितीयानुपसर्गे । इह मा भूत् । सुखप्राप्तो दुःखप्राप्त इति । यद्यप्येतदुच्यते अथ वैतर्ह्यहीनग्रहणन्न करिष्यते इहापि कान्तारातीतो यो जनातीत इति । अनुपसर्ग इत्येव सिद्धमिति । नचानुपसर्ग इत्युक्तावप्यहीन इति वाच्यमन्यथा भूमिपतित इत्यत्रापि स्यात् । तदुक्तौ तु नायन्दोषः । पतधातोर्विभागजन्याधः संयोगानुकूलव्यापारवाचकतया । हीनवाचित्वाभावादिति वाच्यम् । पतधातोरधोदेशसंयोगानुकूलव्यापारवाचकतैव न तु विभागजन्यत्वस्य तत्र प्रवेशः । यदा शाखाया वृक्षत्यागो नास्ति तदापि कुत्रचिद्दीर्घा शाखा यदा भूमिसम्बद्धा तदा भूमिम्पतति शाखेति प्रयोगस्य दर्शनात् । कुड्यात्पतितोऽश्वात्पतित इत्यादौ तु पञ्चम्युपपत्तये पत्धातोर्विभागविशिष्टव्यापारे लक्षणा स्वीक्रियते । एवमन्यत्रापि तादृशशब्दयोगे यदि पञ्चम्युपादाने दृश्यते तदा तत्रापि विभागविशिष्टोत्तरदेशसंयोगानुकूलव्यापारे लक्षणा । शक्तिस्तु स्वोत्तरदेशसंयोगानुकूलव्यापार एव । अहीनग्रहणप्रत्याख्यानपरभाष्यप्रामाण्यादिति बोध्यम् । अत एव मूलोक्तमहीनवाचिनीति साधु सङ्गच्छते । तृतीया कर्मणि । क्ते चेति वर्त्तते । अत्रतेः क्त इति । कर्मणीति शेषः । तदन्तस्य निष्ठा च द्व्यजनादित्याद्युदात्तत्वे प्राप्ते घृतादीनाञ्चेत्यन्तोदात्तत्वं बोध्यम् । मूले रथयात इति । या धातोर्गत्यर्थकत्वात् कर्त्तरि क्तः । यद्यपि प्रापणं याधातुवाच्यन्तथापि तद्घटकप्राप्तिर्गतिं विना न भवतीत्याशयः । रथगत इत्यपि प्रत्युदाहरणम्बोध्यम् । गतिरनन्तरः । गतिशब्दस्य स्त्रियाङ्क्तिन्निति क्तिन्नन्तत्वे पुल्लिङ्गेनानन्तरपदेन सामानाधिकरण्यमनुपपन्नमत आह । गतिः क्तिजन्त इति । विहायसा गतिः पक्षिणामित्यादौ ग-

SGDF
Sri Gargeshwari Digital Foundation

तिर्यद्यपि क्तिन्नन्तः स्त्रीलिङ्ग एव तथापि गतिश्चेति सूत्रघटको गतिशब्दः
क्तिच्क्तौ च संज्ञायामिति क्तिजन्त एवेति भावः। हरदत्त इति। वसेस्तिरिति
सूत्रविहित उणादिघटको यस्तिप्रत्ययः सोऽत्र बाहुलकान्नमेरपि तदन्तस्य पुंस्त्व-
न्तु अगस्तिरित्यत्रेव भविष्यति न त्विह क्तिच्।क्तिच्क्तौचेति सूत्रे संज्ञापदेनैकव्य-
क्त्युपनिवेशिनीया संज्ञा सा गृह्यत इति तद्भावः। गतिशब्दस्येति। अस्य क्ति-
न्नन्तत्वेऽपीत्यादिः। तस्य। उद्धृतशब्दस्य। दर्शनादिति। तत्तुल्यन्यायेनाभ्यु-
द्धृतशब्देऽपि उद्धृतशब्दादेरुकारस्यैवेष्ट इति भावः। पूर्वपदत्वाभावादिति।
इदम्पूर्वपदशब्दः समासप्रथमावयवेरूढ इति मतेन। तन्मतरीत्यैवाह।धातोरि-
त्यादि। अन्यथा। अनन्तर इति व्याख्यानाभावे। इदमेव। अनन्तर इत्यानुपू-
र्व्यापुरस्कारेणोपात्तमेव। इति सूत्रादनुपसर्गग्रहणमिति। तस्मिन्सूत्रे वार्त्ति
ककारोक्तमनुपसर्गग्रहणमित्यर्थः। न्यायप्राप्तेति। तत्रोक्तरीत्या। एतेन। योगं
विभज्य व्याख्यानेन तादौ च निति कृत्यतौ। अयम्। कृतीत्युपादानेन कृत्स्व-
रस्यावश्यम्प्राप्तेरयं योगोऽपवाद इत्यर्थः। इत्यादि सिध्यतीति। कृत्स्वरबा-
धित्वा गतेः प्रकृतिस्वरेणाद्युदात्तस्य प्रलपितशब्दस्य सिद्धिरित्यर्थः। व्यवस्था।
शास्त्राणाम्प्रवृत्तिक्रमः। मूले प्रजल्पाक इति। अत्र जल्पधातोर्जल्पभिक्षेति
षाकन्प्रत्ययस्य सत्त्वात्कृदुत्तरपदप्रकृतिस्वरेण जकाराकार उदात्तः। आग-
न्तुरित्यत्र सितनिगमिमसिसच्यविधाञ्क्रुशिभ्य इति तुन्नन्ते। उपायान्तर-
स्यानुसर्त्तव्यत्वात्। व्यत्ययो बहुलमिति सूत्रेण स्वरव्यत्ययेनान्तोदात्तत्वस्य त-
त्रानुसर्त्तव्यत्वात्। न दोष इति। नान्तोदात्तत्वाऽसिद्धिरूपो दोष इत्यर्थः।
तवैचान्तश्च युगपत्। चेन गतिरित्येतदिह सम्बध्यते अन्त उदात्त इति यन्मू-
लकृताऽभिहितन्तल्लाभोपायमाह। यद्यप्युदात्त इति। दुर्लभमिति। तदनधि-
कारादिति भावः। बुद्धिमारोहतीति। गतेरुदात्ततया प्रकृतिभावेन तस्यैवाव-
स्थानबोधनेनेहान्तस्य तादृशो भवतीत्युक्तं उदात्तलाभ इति भावः अन्वेत-
वाऽइत्यत्रानुपूर्वकादिण्धातोः कृत्यार्थे तवैकेनिति तवैप्रत्ययः। एतत्प्रवृत्तिरि-
ति। अनिगन्त इति सूत्रस्य प्रवृत्तिरित्यर्थः। अपूर्वविधित्वादिति। स्थानिभूता-
दचः पूर्वत्वं न दृष्टस्य विध्यभावादित्यर्थः। प्रतीच इति। इदमुपलक्षणम्। इ-
कोऽसवर्णे इति शाकलपक्षेऽनिगन्त इत्यस्य चारितार्थ्यन्द्रष्टव्यम्। यदि तु

SGDF
Sri Gargeshwari Digital Foundation

सिन्नित्यसमासयोः शाकलप्रतिषेध इत्याश्रीयते तदाऽच इत्यल्लोपविषय एव चारितार्थ्यम्। इति वचनेनैवेति। एतच्च नेन्द्रस्येति ज्ञापनादरेणेति बोध्यम्। यदि तु तस्य सूत्रस्य पूर्वोत्तरपदनिमित्तकार्यात्पूर्वमन्तरङ्गमपि सन्धिकार्यन्ने-त्येतस्मिन्नर्थे ज्ञापकत्वं स्वीक्रियते तदा वचनं विनापि प्रकृतसूत्रस्थमनिगन्त इति चरितार्थमिति द्रष्टव्यम्। साकद्रीचीति। किमशब्दपूर्वपदकः कद्रीची-शब्दः। विष्वग्देवयोरित्यद्र्यादेशः। ननु वक्ष्यमाणरीत्या परत्वादित्यसङ्गतमत आह। वस्तुतस्त्विति। भाष्यकारेष्ट्येवेति। चुस्वरादनिगन्तोऽच्चतावप्रत्यय इ-त्येतद्भवति विप्रतिषेधेनेति भाष्यकारेष्ट्येत्यर्थः। एतस्मिन्स्वरे। न्यधीचेति स्व-रे। स्वरितस्थानिकयणादेशोदाहरणमाह। अध्यङीति। पूजायामिदमुदाहरणं चुस्वरादिति। विप्रतिषेधेनेति शेषः। ईषदन्यतरस्याम्। अत्रे षदिति स्वरूप-परम्। अत एव। प्रतिपदोक्तसमासस्यैव ग्रहणादेव। केचित्त्विति। भाष्या-नुसारिण इत्यर्थः। एवञ्चेषद्भेद इत्यत्रेषदन्यतरस्यामित्यस्य प्रवृत्तिवारणाय प्रतिपदोक्तस्येति न वाच्यमिति भावः। एवं हि भाष्ये उक्तम्। ईषत्स्वरा-त्कृत्स्वरो भवति विप्रतिषेधेन। ईषत्स्वरस्यावकाशः। ईषत्कडारः। ईषत्पि-ङ्गलः। कृत्स्वरस्यावकाशः। इध्मप्रव्रश्चनः। इहोभयम्प्राप्नोति। ईषद्भेदः। कृत्-स्वरो भवति विप्रतिषेधेनेति। अत्र भाष्ये ईषद्भेद इत्यत्रोभयम्प्राप्नोतीत्युक्त्या प्रतिपदोक्तपरिभाषाप्रवृत्त्यभावः स्फुट एव। प्रथमोऽचिरोप। समुदायेन।चिरो-पसम्पत्तौ गम्यमानायामित्यर्थः। न दोषः। आर्यब्राह्मण इति समुदायावय-वार्यशब्दस्य विकल्पेन प्रकृतिस्वरो न। किन्तु समासान्तोदात्तत्वमेव। राजा च। राजत्वस्य क्षत्रियधर्मत्वाद्ब्राह्मणशब्देन सामानाधिकरण्यमनुपपन्नमत आह। राजशब्द इति। अत्र। राजा चेति सूत्रे। तेन राजब्राह्मणीत्यत्र न दोषः। षष्ठी प्रत्येनसि। प्रतिगतमेनः पापं यस्य सप्रत्येनाः। राज्ञः प्रत्येना इति षष्ठीसमासः। क्ते नित्यार्थे। अत्र क्तेति तदन्तपरमुत्तरपद इत्यस्य वि-शेषणम्। ग्रामः शिल्पिनि। अत्र ग्रामेति स्वरूपग्रहणम्। शिल्पिनीत्यत्र त्व-र्थग्रहणम्। लक्ष्यानुसारिव्याख्यानात्। ग्रामशब्दोग्रसेराचेति मन्प्रत्ययान्तत्वा-दाद्युदात्तः। राजा च प्रशंसायाम्। प्रशंसायाङ्गम्यमानायाम्। षष्ठीसमास इ-ति। कर्मधारय इत्यस्यासम्बन्धेन समासद्वयेऽप्यस्य सूत्रस्य प्रवृत्तिः। राजयो-

SGDF
Sri Gargeshwari Digital Foundation

ग्यतयेति । राजपरिचर्यायोग्यतयेत्यर्थः । अधिकारोऽयमित्यस्यायं योग इत्य-
र्थेऽन्त इति सूत्रेऽन्तशब्दस्य विरुद्धार्थकपरत्वात्समुदायस्य ततः प्राङ्निवृत्तिः
स्य तथा चोदात्त इत्यस्यापि सम्बन्धो न स्यादत आह । अन्त इत्यत इति । अ-
यमित्यस्य सौत्रः प्रथमान्तः शब्दो बोध्यः । उद्देश्यतावच्छेदकावच्छेदेन वि-
धेयान्वयः । सप्तमीहारिणौ । धर्मशब्दोऽत्र लाक्षणिक इत्याशयेनाह । धर्मो
नामेति । ननु देयमित्यधिकमत आह । प्रकृत इति । एवञ्च स्वीकारस्य यत्कि-
ञ्चित्कर्माकाङ्क्षत्वादप्रकृतकल्पनायामिदं व्याख्यानलभ्यमित्यर्थः । अहरणइत्येत-
द्धर्म्य इत्यस्यविशेषणमित्याशयेन वाडवहरणमितिप्रत्युदाहरणम् । अहरणमि-
ति स्वरूपपरम् । कर्मसाधन इति । कर्मणोत्र कृल्ल्युडन्तोऽत्र हरणशब्दः । युक्ते
चाऽत्र युक्त इत्यस्य युक्तशब्दपरतया युक्तशब्दे परे इति नार्थः।युक्तस्वरश्च कृत्स्वरा-
द्भवति विप्रतिषेधेन।युक्तस्वरस्यावकाशः।गोवल्लवः।अश्वबल्लवः। कृत्स्वरस्येध्मप्रव्र-
श्चनः।इहोभयम्प्राप्नोति।गोसङ्ख्यः।पशुसङ्ख्यः।युक्तस्वरो भवति विप्रतिषेधेनेति भा-
ष्यानुसारिव्याख्यानात् । किन्तु युक्त इति समासस्य विशेषणम् । वाचकत्व-
मिहविशेषणताप्रयोजकसम्बन्ध इत्याशयेनाह मूले युक्तवाचिनीत्यादि । इ-
ष्यत इति ।अनुपदम्प्रदर्शितभाष्यमिह मानम् । गोसङ्ख्य इति । गोषु सम्यक्
ख्यात इत्यर्थः । न च सङ्ख्याशब्दस्य कप्रत्ययान्ततया थाथेति सूत्रविषयत्वेन
कथमिह कृत्स्वरात्पूर्वविप्रतिषेधप्रदर्शनमिति वाच्यम् । प्राथमिकप्राप्त्यभिप्राये-
णैवमभिधानात् । इति क इति । कर्मणीतिशेषः। अध्यक्षशब्द इति । अध्यक्षश-
ब्दोत्तरपदकः समास इत्यर्थः।पापञ्च शिल्पिनि । पापमिति स्वरूपपरम्।शिल्पि-
नीति त्वर्थपरम् । लक्ष्यानुसारिवृत्त्यादिसम्मतव्याख्यानात्। उदाहरणे पापशब्द
अर्श आद्यजन्तः।गोत्रान्ते वासि।आद्ययोः। गोत्रान्ते वासिशब्दयोः । अन्त्ययोः ।
परशब्दयोः । समास इति पूर्वपदमिति चाधिकारलब्धम् । गोत्रवाचिनि अन्ते
वासिनि चोत्तरपदे माणवब्राह्मणशब्दयोश्च परयोः पूर्वपदमाद्युदात्तं स्यात् ।
यद्यपि माणवब्राह्मणशब्दयोरपत्यार्थकत्वसम्भवस्तथापि विशेषरूपेणोभयोरुपा-
दानसामर्थ्यादिह गोत्रशब्दस्तद्वाचकत्वेन प्रसिद्धपर इत्याशयेनाह।माणवेति।सुश्रु-
च्छब्दः सुशब्दस्य श्रुच्छब्दयोस्समासेन सम्यक्श्रवणकर्तृपरस्ततोऽपत्ये प्रत्ययः । अ-
स्य भार्याधीनत्वेन निन्दा । अङ्गानि । अत्राङ्गशब्दो येन मैरेयं सम्पद्यते तत्प-

SGDF
Sri Gargeshwari Digital Foundation

र्थः। न मद्यमिति। किन्तु रसविशेषविशिष्टन्द्रव्यम्। अदनीयेति। अर्हे कृत्यः।
भिक्षाशब्दोऽत्राकारप्रत्ययान्तः। कर्मणि चात्र प्रत्ययः। षष्ठीसमासा इति।
चतुर्थी यदि तादर्थ्ये कल्प्यते तदा तदन्तस्य प्रकृतिविकृतिभावाभावेन समा-
सो न स्यात्। आद्यविशेषस्य। अदनीयविशेषस्य। न द्रव्यमिति। तथा च भा-
वे घञ् प्रकृते द्रष्टव्यः। षष्ठीसमास इति। तदा प्रियोऽन्यपुरुषस्य स च भिक्षा
ग्राहक इति सामर्थ्यन्द्रष्टव्यम्। अत्रान्तोदात्तत्वं समुदायस्य बोध्यम्। गो-
विडालसिंह। उपमानशब्दः करणसाधनः। वर्त्तनक्रियापेक्षयोपमान इति
सप्तमीत्याश्रयेनाह। उपमानार्थ इति। धान्यगवः। धान्यं गौरिवेति लौकिक
विग्रहः। गोरतद्धितलुकीति टच्। आद्युदात्तत्वेन चित्स्वरस्य बाधः। अके
जीविकार्थे। अकप्रत्ययमात्रस्य जीविकायामसम्भवाज्जीविकार्थ इतिसमास-
स्य विशेषणमित्याश्रयेनाह। जीविकार्थसमास इति। लेखकशब्दे कर्त्त-
रि ण्वुल् तृचाविति ण्वुल। ननु यदि प्रतिपदोक्तसमास एवेदन्तर्ह्यक इति
व्यर्थमत आह। अक इतीति। प्राचां क्रीडायाम्। प्राचामिति क्रीडापदार्था-
पेक्षया षष्ठीत्याश्रयेनाह। प्राचामितीति। प्रकृतसूत्रे क्रीडायामित्यस्याकर-
णे प्राचामिति षष्ठीत्वकप्रत्ययेनाक्षिप्तक्रियापेक्षया भविष्यतीत्यभिप्रायेण तव
पुष्पप्राचायिकेति प्रत्युदाहरणम्। अणिनि। तत्परो न भवतीति। किन्तु य-
दा राज्ञो बहिर्गमनसम्भावना तदाधिकाररक्षणार्थमेव छत्रन्धरतीति शेषः।
शिल्पिनि चाकृञः। अणीति वर्त्तते। णिनि। लुप्तसप्तम्यन्तमेतत्। व्रत इति
सूत्रभाष्यादाविति। यद्यपि भाष्ये न साक्षात्कण्ठरवेणाभिहितन्तथापि ध्वनि-
तङ्क्यटेन तु साक्षादेव कथितमित्यभिप्रायेणेह भाष्यादावित्यभिहितम्। तत्र
भाष्ये किमुदाहरणम्। अश्राद्धभोजी। किं योऽश्राद्धभुङ्क्ते सोऽश्राद्धभोजी।
किञ्चातः। यदा सावश्राद्धन्न भुङ्क्ते तदास्य व्रतलोपः स्यात्। अश्राद्धम्मया
भोक्तव्यमिति सङ्कल्पानन्तरं यदोपवासादियोग्ये दिवसेऽश्राद्धन्न भुङ्क्ते त-
दास्य व्रतलोपः स्यादित्यर्थः। एवमाशङ्क्य एवन्तर्हि णिन्यन्तेन समासो भ-
विष्यति। न श्राद्धभोजी अश्राद्धभोजीति। नैवं शक्यम्। स्वरे हि दोषः स्यात्।
अश्राद्धभोजीत्येवं स्वरः प्रसज्येत। अश्राद्धभोजीति चेष्यते। एवन्तर्हि नञ प-
वायम्भुजिप्रतिषेधवाचिनः श्राद्धशब्देनासमर्थसमास इति। एवं स्वर इति प्र-

SGDF
Sri Gargeshwari Digital Foundation

तोकमुपादाय नञा श्राद्धभोजिशब्दस्य समासेऽव्ययपूर्वपदप्रकृतिस्वरः स्यात्
तदुत्तरपदप्रकृतिस्वरत्वेनान्तोदात्तत्वमिष्यत इत्यर्थः। ननु च णिनीत्यनेन पू-
र्वपदाद्युदात्तत्वेन भाव्यमिति नास्ति स्वरभेदः। अत्राहुः। णिनीति सूत्रे
संज्ञायामित्यनुवर्त्तते। इयञ्च न संज्ञेति स्वरभेदोऽस्त्येवेति कैयटेनोक्तम्।
तेन। संज्ञाग्रहणानुवर्त्तनेन। अत्रेति। नञः क्रियायां सम्बन्धात्कृदन्तस्य का-
रकात्परत्वमिह बोध्यम्। संज्ञापदेन संज्ञात्वेन प्रसिद्धा एव गृह्यन्त इत्याश-
यः। उत्तरसूत्रेति। उपमानं शब्दार्थेतिसूत्रस्थभाष्यादित्यर्थः। तत्र हि उपमा-
नमिति किमर्थम् शब्दार्थप्रकृतावेवेतीयत्युच्यमाने पूर्वेणातिप्रसक्तमिति कृत्वा
नियमोऽयं विज्ञायेत। तत्र को दोषः इह न स्यात्। पुष्पहारी। फलहारी।
उपमानग्रहणे पुनः क्रियमाणेन दोषो भवतीत्युक्तम्। यदि णिनीति सूत्रे सं-
ज्ञायामित्यस्य संबन्धः स्यात्तदा पूर्वेणातिप्रसक्तमित्यभिधानस्य इह न स्यात्पु-
ष्पहारी फलहारीत्यभिधानस्य चासङ्गतिः स्यादिति स्पष्टमेव। संज्ञात्वेन
प्रसिद्धा एव संज्ञापदेन गृह्यन्त इति भावः। तत्त्वमिति। संज्ञायामित्यस्य त-
त्र सूत्रे संबन्धासम्बन्धयोस्तत्त्वमित्यर्थः। वस्तुतस्तु व्रत इति सूत्रस्थभाष्यप्रामा-
ण्येन संज्ञायामित्यस्य णिनीत्यत्र सम्बन्धोऽस्त्येव। उपमानमिति सूत्रेऽ-
पि यथा। किन्तु भाष्यद्वयप्रामाण्यादाधुनिकसंज्ञापि संज्ञापदेन गृह्यते। व्र-
त इति सूत्रभाष्यीयाश्राद्धभोजीत्यं वं स्वरः प्रसज्येतेत्यत्राश्राद्धभोजीशब्दो द्वि-
विधसंज्ञाभिन्न इति कल्पनया भाष्ययोरविरोध इत्याशयेनाह। वस्तुत इति।
उत्तरसूत्रेऽपीति। अपिर्णिनीति सूत्रस्य सङ्ग्राहकः। उपमानं शब्दार्थप्रकृ-
तावेव। अत्रानुवर्त्तमानं यस्मिन्नीति तदर्थणिन्यन्तस्य शब्दार्थप्रकृताविति
विशेषणम्। मा भूदिति। तथा चेष्टतेऽवधारणार्थ एवकारः। न स्यादिति।
पूर्वेणेति शेषः। युक्तारोह्या। पूर्वपदोत्तरपदेति। विनिगमनाविरहादित्यादिः।
अन्य इति। णिनीति सूत्रे संज्ञायामित्यस्य सम्बन्धवादिन इत्यर्थः। तदप-
वादोऽयमिति। क्षीरहोतृशब्दस्य युक्तारोह्यादिषु पाठः। एकः शितिः पादो-
ऽस्येतीति। शितिः कृष्णः। तत्पुरुषः। द्विगुसमासः। तिशब्द एवेति। समास-
स्वरेण सन्निशिष्टेन तिशब्द एवोदात्त इत्यर्थः। निमित्तिस्वरबलीयस्त्वेति। नि
मित्ती यः समासो द्विगुस्तत्प्रयुक्तस्वरस्य बलीयस्त्वस्येत्यर्थः। समर्थसूत्र इति।

SGDF
Sri Gangeshwari Digital Foundation

श्चयेत्युक्तमित्यत्रान्वयः । एतच्छब्दपाठेन । एकश्रितिपाच्छब्दपाठेन । तेन। पूर्वोक्तार्थज्ञापकस्यैकश्रितिपाच्छब्दस्य पाठाभावेन । अत एव । उक्तार्थे ज्ञापकस्याभावादेव । दीर्घशब्दस्य संज्ञात्वान्न स्वरूपग्रहणञ्चिन्त्वर्थग्रहणमित्याशयेनाह । दीर्घान्तमिति । अन्त्यात्पूर्वम् । जे इतिपदमनुवर्त्तते । उदाहरणे जशब्दस्य सप्तम्यां जनेर्डे इति जन्धातुप्रकृतिकडान्तः । ग्रामेऽनिवसन्तः । निपूर्वकाद्वस्धातोर्लटः शत्रादेशेन निवसच्छब्दस्य निवासकर्तृबोधकतया एकवचनेन निर्देश उचित इति कथमेतदित्यत आह । सूत्र इति । के चिच्चिति । व्यत्ययास्वीकर्त्तार इत्यर्थः । ऋजन्तम् । तॄभूवहिवसिभासिसाधिगण्डिमण्डिजिनन्दिभ्यश्चेति विहितो यो ऋच्प्रत्ययोऽधिकरणे तदन्तम् । समासविशेषणमिति । नञा बहुव्रीहिसमासेनानिवसन्तशब्दः समासस्य विशेषणमित्यर्थः । अस्मिन् पक्षे व्यत्ययेन प्रथमा तु स्वीकार्यैव । न निवसन्तो निवासाधिकरणं यस्मिन् समासे तत्रेति ऋजन्तस्वीकारपक्षे बोध्यम् । समासनिष्ठो निवासाधिकरणाभावस्य वाचकतासम्बन्धावच्छिन्नप्रतियोगिताको ग्राह्यः । षष्ठीसमासः । उदाहरणभूतो मल्लग्रामादिशब्दः षष्ठ्यन्तपदघटितः षष्ठ्यर्थश्च स्वस्वामिभावः । प्रत्युदाहरणमाह । दाक्षिग्राम इति । एवमुच्यते इति । द्वितीयमतेनेदम् । प्रथममते तु दाक्षीणान्निवासकर्तृत्वमात्रेण पूर्वपदस्य निवासकर्त्रभिधायकत्वम् । प्रत्युदाहरणभूतेऽपि षष्ठीसमास एव परन्तु षष्ठ्यर्थ आधाराधेयभाव इति बोध्यम् । घोषादिषु च । एषु शब्देषु परेष्वित्यर्थः । छात्र्यादयः शालायाम् । छात्र्यादयः शब्दाः पूर्वपदभूताः शालाशब्दे उत्तरपदे आद्युदात्ताः स्युरित्यर्थः । वृत्ताविति । छात्र्यादिपूर्वपदके प्रतिपदोक्तत्वेनास्य प्रवृत्तिरिति वक्तुमुचितमित्यभिप्रायः । निरवकाशत्वप्रतिपदोक्तत्वमपूर्वप्रवृत्तौ नियामकमिति सति त्वस्यानपुंसकत्वे चारितार्थ्यान्नपुंसकत्वे परत्वात्तत्पुरुषे शालायामित्यनेनोत्तरपदाद्युदात्तत्वमेव । विभाषा सेनेतिवानपुंसकत्वमत्र भवति । प्रस्थे वृद्धम् । प्रस्थः शिखरमानयोः । कर्क्यादिपर्युदासादिति । न च सूत्रेऽवृद्धमित्युपात्तमेवेति किमेतावदभिधानमिति वाच्यम् । अवृद्धमित्यस्य लिङ्गाविवक्षया समासविशेषणत्वशङ्कावारणायेत्थमभिधानात् । समासस्य वृद्धसंज्ञानामधेयत्वाद्यदा भविष्यति तदा प्रत्युदाहरणत्वस्य सम्भवात् । सि-

SGDF
Sri Gargeshwari Digital Foundation

द्वान्ताभिप्रायेणाह। प्रत्युदाहरण इति। मालादीनाञ्च। मालादिषु पाठभेदादाह। शौणेतीति। अर्मे चा। अर्मशब्दो ऋधातुप्रकृतिकमन्प्रत्ययान्तश्चक्षूरोगवाची। ननु नवशब्दस्य संख्यावाचकस्य नान्ततया स्वरविधौ नलोपस्यासिद्धत्वेनाकारान्तत्वाभावात्कथन्न वार्म्मिति प्रत्युदाहरणमत आह। नवशब्द इति। इदमिति। सङ्घातविगृहीतार्थमित्येतत्। दिवो दासादीनाम्। आद्युदात्तत्वस्येति शेषः। सर्वङ्गुण। पूर्वपदमिति प्रक्रान्तमेव। सर्वश्वेत इति कर्मधारयः। ननु सर्वमहानित्यत्र सन्महत्परमोत्तम इति समासे महच्छब्दस्य पूर्वनिपातापत्तिरत आह। सर्वमहानित्यत्रेति। विकारकात्स्न्र्यमिति। सौवर्णशब्दस्य विकारार्थकप्रत्ययान्तत्वादिति भावः। सातिशय इति। एवञ्चातिशयप्रतिपादनायायम्प्रयोगो न तु गुणकात्स्न्र्यप्रतिपादनायेति तात्पर्यम्। वयसीति। कुमारीशब्दे उत्तरपद इत्यादिः। अत एव। आरोपितकुमारत्वप्रवृत्तिनिमित्तकत्वादेव। स्वैरे कृत इति यः क्रमो मूलेऽभिहितस्तत्र बीजमाह। नेन्द्रस्येतीति। द्विगौ क्रतौ। द्विगावित्युत्तरपद इत्यस्य विशेषणम्। इत्येव पाठ इति। रात्राह्नाहा इत्यस्य संख्यापूर्वमित्यनेन बाधादिति भावः। पुरे प्राचाम्। पुरशब्दे उत्तरपदे पूर्वपदमन्तोदात्तम्। प्राचान्देशाभिधाने। ननु समासान्ताना समासार्थवाक्यावयवत्वसिद्धान्तादृक्पूरिति विहिताकारान्तस्य कथं ग्रहणमत आह। न ह्यत्रेति। अरिष्टगौडपू। पुर इत्यनुवर्त्तते। सूत्रोपात्तं सप्तम्यन्तसमासविशेषणमित्याशयेनाह। मूले पूर्वे समास इति। तदादिसमासेति। अरिष्टादिपूर्वावयवक इत्यर्थः। न हास्तिन। पुर इति वर्त्तते। हास्तिन पुरादौ पुरे प्राचामिति प्राप्तस्य प्रतिषेधः। कुसूलकूप। समाहारद्वन्द्वः। अन्यत्रार्थग्रहणमिति। इत्यादिसम्मतव्याख्यानादित्यादिः। पूर्वेषुकामशमीत्यत्र पूर्वा च सा विषु कामशमी चेति समासः। एकादेश इति। अनेन सूत्रेण पूर्वपदान्तस्यान्तोदात्तत्वे कृत इत्यादिः। सामानाधिकरण्योपपत्तये आह। पञ्चालैकदेश इति। न च पञ्चालशब्दस्य परिच्छिन्नपरिमाणदेशाभिधायकतया कथमवयवे प्रवृत्तिरिति वाच्यम्। लक्षणाया आश्रयणादिति भावः। दिक्शब्दत्वाभावादिति। अस्य कालावच्छिन्नवाचकत्वेत्यादिः। आचार्योपसर्जन। सप्तम्यर्थे प्रथमेति। बहुव्रीहिसमासादित्यादिः।

SGDF
Sri Gargeshwari Digital Foundation

एवञ्चान्ते वासिनीत्यनेन सामानाधिकरण्यम् । आचार्यप्रकारकान्ते वासि-
विशेष्यकोपस्थितिजनकशब्दे पर इत्यर्थः । मूले आ चेति किमित्यस्याचार्योप-
सर्जनग्रहणं किमर्थमित्यर्थः । तदाप्यन्ते वासीत्यस्यान्ते वासिविशेष्यकबोध-
जनकेत्यर्थः स्यादेवेति भवति पूर्वान्ते वासीत्यत्र दोषः । अन्ते वासिशब्दस्या-
न्ते वासित्वप्रकारकबोधजनकत्वात् । एवमन्ते वासिपदाभावेऽप्याचार्यप्रका-
रकबोधजनके पर इत्यर्थे पाणिनीयशब्दस्य प्रोक्तार्थकप्रत्ययान्तस्यास्ति पा-
णिनिप्रकारकबोधजनकतेति पूर्वपाणिनीयमित्यत्र दोषः । स्पष्टञ्चेदमिति ।
तत्र ह्यतद्भावितस्यापि वृद्धिसंज्ञेत्यर्थे सर्वभासः सर्वकारक इत्यत्रोत्तरपदवृ-
द्धौ सर्वञ्चेत्यस्य प्रवृत्तिमाशङ्क्यैवमुक्तम् । तादृशार्थलाभप्रकारमाह । वृद्धिमा-
त्रेति । सर्वपाञ्चालक इत्युदाहरणे सुसर्वार्द्धाज्जनपदस्येति वृद्धिस्तादृश्यस्ति ।
अस्य । सर्वभास इत्युक्तस्य । बहुव्रीहौ । संज्ञायामित्यस्य सन्निहितत्वाद्विश्वश-
ब्दविशेषणत्वभ्रमनिवृत्तये आह । संज्ञायामितीति । विश्वकर्मेत्युदाहरणे वि-
श्वशब्दे विशेः क्वनिन्प्रत्ययसत्त्वात्पूर्वपदप्रकृतिस्वरेणाद्युदात्तत्वे प्राप्ते पूर्वप-
दान्तोदात्तत्वस्य विधानम् । विश्वकर्मेत्यत्र विश्वस्मिन्कर्म यस्येत्यर्थः । कर्मश-
ब्दः क्रियापरः । उदराश्वे । बहुव्रीहाविति वर्त्तते । अनेन सूत्रेणान्तोदात्तत्व-
विधानस्य फलमाह । नेन्द्रस्येत्यादिना । यदीदन्नस्यात्तदा बहुव्रीहाविति पू-
र्वपदप्रकृतिस्वरः स्यात्तथा च हरिशब्दस्य सार्वधातुभ्य इतीनन्ततयादेरुदात्त-
त्वन्न त्विकारस्येत्युदात्तस्यानिकत्वं यणो न स्यात् । हरिरश्वोऽस्येति विग्रहः ।
इत्याहुरिति । क्षेप इत्युत्तरसूत्रस्य संज्ञायामेव प्रवृत्तेरिष्टतया तत्र संज्ञायामि
ति सम्बध्यत एवेति प्रकृते तस्यासम्बन्धे मण्डूकप्लुत्यापत्तिः । सा च सम्बन्धत-
दभावाभ्यां गुर्व्यतः । प्रकृतसूत्रेऽपि संज्ञायामित्यस्य सम्बन्ध इति वादिन इत्य-
र्थः । कन्नन्तत्वात् । स्वार्थकन्नन्तत्वात् । तथा । आद्युदात्तः । इत्यपीति । चि-
न्त्यमिति शेषः । इदम्पूर्वसूत्रविषये उपात्तम् । चिन्तावीजन्तु सूत्रद्वयस्यापि
मल्लिकेषुः केशेषुरित्यत्र प्रवृत्त्यर्थमिषुशब्दोपादानमावश्यकमित्यपि महेषुरित्यपि
बहुव्रीहावित्यं तदपवादत्वादनयोरुदाहरणन्तञ्चान्यथा सिद्धमिति । मल्लिकाश-
ब्दः स्त्रीविषयवर्णाद्यनुपूर्वाणामित्याद्युदात्तः । कुशशब्दस्तृणधान्यानामित्यनेन
तथा । तदेव । नञ्सुभ्यामित्येतदेव । ततोऽपि । नञ्सुभ्यामित्यतोऽपि । इति

SGDF
Sri Gargeshwari Digital Foundation

बोध्यम्। अनेनोत्तरपदान्तोदात्तत्वम्बोध्यम्। निष्ठोपसर्गपूर्वम्। प्रधौतपाद इत्यत्र धावुधातोः क्ते च्छ्वोरित्यूठि वृद्धिः। गतिस्वरेणाद्युदात्त इति। एवञ्च निष्ठेत्यस्याभावे समुदायस्य पूर्वपदप्रकृतिस्वरेणाद्युदात्तत्वमिति भावः। न चोपसर्गपूर्वस्य कृद्ग्रहणपरिभाषया निष्ठाग्रहणेन ग्रहणे सिद्धे उपसर्गपूर्वग्रहणं व्यर्थमिति वाच्यम्। परिभाषायाङ्गतिशब्दस्य प्रत्यासत्त्या कृदन्तार्थक्रियानिरूपितगतित्वविशिष्टबोधकत्वात्। प्रकृतसूत्रस्थमुपसर्ग इति पदञ्च क्रियान्तरम्प्रत्यपि य उपसर्गस्तस्यापि ग्रहणार्थमित्यस्य वक्तुं शक्यत्वात्। तेन प्रकृष्टशब्दधौतशब्दयोः समासे पूर्वपदान्तर्गतस्य कृष्टशब्दस्य लोपेऽपीदम्प्रवर्त्तत इति बोध्यम्। इदमेवोपसर्गपूर्वग्रहणमन्यत्र प्रत्यासत्तिगमकमिति। उत्तरपदादिः। वृथक्पदमिति। अत एवावधिभेदेन सम्बन्धेऽपि न क्षतिः। द्वयोरुत्तरत्र सर्वत्र न सम्बन्धः। प्रकृत्येत्यस्य विरोध्यर्थकस्य प्रकृत्याभगालमित्यत्र सत्त्वात्। कर्णो वर्णलक्षणात्। षष्ठ्यर्थे प्रथमेति। व्यत्ययो बहुलमिति व्यत्ययकल्पनयेति शेषः। वर्णलक्षणादिति समाहारद्वन्द्वः। वर्णस्य लक्षणत्वेऽपि पृथगुपादानमर्धविशेषपरिग्रहार्थमित्याह। अत्र लक्षणेति। शंकुकर्ण इत्यत्र शङ्कुः कर्णो यस्येति विग्रहः। गड्वादित्वात्कर्णस्य परनिपातः। स्थूलशब्द इति। फिट्स्वरेणेत्यादिः। काण्डपृष्ठ। अत्रापि षष्ठ्यर्थे प्रथमा। एवमग्रेऽपि। संज्ञौपम्ययोरितीहापि सम्बध्यते। संज्ञाभूतः औपम्यवाची वा यो बहुव्रीहिस्तस्मिन्नित्यर्थः। इत्युचितम्। आद्यासन्तोदात्तत्वमुचितम्। ननु नीलग्रीवाद्युदाहरणसत्त्वेऽपि सुग्रीवशब्दस्य मध्योदात्तस्य श्रवणं विरुध्यत इत्यत आह। चेनेति। शृङ्गमवस्थायाम्। अवस्थायाङ्गम्यमानायाम्। चासंज्ञौपम्ययोः। मृतशब्दस्य नपुंसकत्वे परवल्लिङ्गमिति जरादिद्वन्द्वस्य नपुंसकत्वे प्राप्ते आह। सूत्रे त्विति। अमेरित्र चीति। तदा नञः परत्वमेव नास्तीति भावः। तत्पुरुषे। मित्रशब्देन तत्पुरुषे। परवल्लिङ्गतापत्तिरिति। नपुंसकत्वापत्तिरित्यर्थः। अस्यापि। तत्पुरुषस्यापि। इत्याहुरिति। विशिष्यामित्रशब्दस्य लिङ्गान्तरानुक्तेस्त्रयाणामपि पुंस्त्वमेवेत्याशयवन्त आहुरित्यर्थः। हरदत्त इति। लिङ्गानुशासनसूत्रे त्वित्रजन्तस्यैव पाठ इति तद्भावः। आद्युदात्तः। अव्ययपूर्वपदप्रकृतिस्वरेणाद्युदात्तः। ईश्वरीशब्दवदिति। ईश्वरीशब्दो यथा वरट्प्रत्ययान्तो ङीबन्तो मध्योदात्तः। वनिप्प्रत्ययान्तान्ङीप्-

SGDF Sri Gurgeshwari Digital Foundation

षो: सतोराद्युदात्त: । ईश्वरशब्दाद्वरजन्तात्मुंयोगलक्षणे ङीषि कृतेऽन्तोदात्तमिति त्रिप्रकारकत्वमीश्वरीशब्दस्य यथा भवति तथाऽस्यापीति मतभेदेनामित्रशब्दोऽपि त्रिप्रकारो भवतीत्यत्रेष्टापत्तिरिति भाव: । उत्तरसूत्रयमपीति । तेष्वपि सोरित्यस्य सम्बन्धात् इत्यनेनैवेति । कर्मन्शब्दस्य कृधातुप्रकृतिकमनिन्प्रत्ययान्ततयाऽऽद्युदात्तत्वे न बहुव्रीहौ पूर्वपदप्रकृतिस्वरम्बाधित्वा तत्प्रवृत्तेर्न्याय्यत्वादिति भाव: । सुयुज इति सर्वधातुभ्योऽसित्यसिप्रत्ययान्त: । अन्यत्र सम्भावितामव्याप्तिं वारयति । सुस्रदित्यत्रेति । न च धात्ववयवासोऽप्यस्शब्देन ग्रहणेऽस्वस्य प्रत्ययाप्रत्ययसाधारणत्वेन कथम्प्रत्ययग्रहणपरिभाषाप्रवृत्त्या तदन्तलाभ इति वाच्यम् । अनिनस्मन्निति वचनेन यथाऽर्थवत्परिभाषायास्तदंशेऽप्रवृत्तिस्तथा प्रत्ययमात्रग्रहणे प्रत्ययग्रहणपरिभाषाप्रवृत्तिरिति नियमस्यापि त्यागात् । प्रत्ययभिन्नस्यैव ह्यनर्थकत्वं सम्भवतीति । सुप्रथिमेत्यत्र प्रथिमन्शब्द: पृथ्वादिभ्य इमनिज्वेतीमनिजन्त: । आद्युदात्तन्द्व्यच् । आद्युदात्तमित्यस्य विधेयसमर्पकस्य प्रकरणादेव लाभे पुन: सूत्रोपात्तमुद्देश्यबोधकन्तथा चाद्युदात्तस्याद्युदात्तविधानमनर्थकमत आह । आद्युदात्तमेवेति । अस्य इति । अत्र नञ्सुभ्यामिति प्रवर्त्तते । उद्देश्यसमर्पकाद्युदात्तपदस्य प्रयोजनमाह । कुप्रत्ययान्त इति । हिरण्यशब्दस्याद्युदात्तत्वम्बोधयति । कन्यनन्तोऽयमिति । रक्प्रत्ययान्त इति । तथा चास्यान्तोदात्ततयाऽऽद्युदात्तन्द्व्यजितस्याप्राप्तिरिति भाव: । ननु वीर्यशब्दस्याद्युदात्ततया सुवीर्येत्यत्र पूर्वेणैव सिद्धमत आह । मूले वीर्यशब्द इति । आद्युदात्तानि स्युरिति । अव्ययीभाव इति शेष: । सुषममित्यत्र सुविनिर्दुर्भ्य इति षत्वस्यासिद्धत्वात्समशब्दो द्रष्टव्य: । यद्यपि समृद्ध्यर्थेऽव्ययीभावस्य विषममित्यत्रात्वर्थाभावे तस्य सम्भवस्तथाप्यर्थान्तरेऽव्ययीभावत्वायाह । मूले तिष्ठद्गुप्रभृतीनीति । तिष्ठद्गुप्रभृतीत्यस्योपादानस्य फलान्तरमप्याह । अधिसममित्यत्रेति । विभक्त्यर्थेऽव्ययीभावोऽत्र । वंशमन्यशूर्पपाय्य । उदाहरणेषु तद्धितार्थे द्विगु: । प्रत्युदाहरणे समाहारे । तत्पुरुषे शालाब्राह्मणशालमित्यादौ नपुंसकत्वप्रयुक्तस्वरस्य चारितार्थ्येनानपुंसकत्वे चरितार्थे न छात्र्यादय इत्यनेन बाध इत्याह । छात्रिशालमित्यादाविति । विभाषासेनेति वा नपुंसकत्वम् । चेलखेट । चेलशब्दोऽल्पपरिमाणजीर्णवस्त्रपर: । पुत्रचेलमि-

SGDF
Sri Gurgeshwari Digital Foundation

त्वचोपमितं व्याघ्रादिभिरिति समासेन यस्यार्थस्य लाभस्तमाह । चेलवत्तुच्छ इति । पललसूपललादीनामुत्तरपदानामुपादानान्मिश्र इति समासविशेषणमित्याह । मिश्रे समासार्थे इति । अव्ययपूर्वपदेति । अत्र प्रमाणं भाष्यकारोक्तिरेव । चेलराज्यादिभ्योऽव्ययमिति । वर्ग्यादयश्च । वर्ग्यादय उत्तरपदानि तत्पुरुषे आद्युदात्तानि स्युः । अत्र सूत्रे वर्ग्यादीत्युपात्तम्मूले तु वर्ग्यादिरित्युक्तमित्येतद्विरुद्धमत आह । त एवेति । पुत्रः पुंभ्य इति सूत्रे पुमिति न पुम्शब्दपरङ्किन्तु पुंल्लिङ्गशब्दपरम् । बहुवचनोपादानादिति केचित्तन्न युक्तमित्याशयेनाह । निषेधकोत्तरेति । नाचार्य । ज्ञातिपदस्य सजातीयपरत्वे सम्बन्धिवाचकसंयुक्तपदोपादानमनर्थकमत आह । मूले संयुक्ता इति । स्त्रीसम्बन्धिन इति । स्त्रीद्वारकसम्बन्धवन्त इत्यर्थः । मूले ज्ञात्याख्याशब्दस्यार्थविशेषाभिधायकत्वं युक्तपदोपादानादेवेत्याशयेनाह ज्ञातय इति । होतुः पुत्रेऽपीति । अलुगिति शेषः । चूर्णादीन्यप्राणि । षष्ठीपदन्तदन्तपरन्तच्चाप्राणिवाचकशब्दस्य विशेषणम् । अप्राणिषष्ठ्या इति कर्मधारयः । विशेषणस्य परनिपातः सौत्रत्वात् । षट् च काण्डादीनि सूत्रारम्भफलमाह । काण्डस्येत्यादिना । कुण्डं वनम् । उत्तरपदभूतः कुण्डशब्द आद्युदात्तः स्यात् । वनं बोध्यञ्चेदित्यर्थः । ननु कुण्डशब्दस्य पात्रवाचकतया कथमिह वनस्य बोध्यतेत्यत आह । सादृश्येनेति । कुण्डस्य यथा बह्ववयवकजलाधारत्वं तथा वनस्य बह्ववयवकवृक्षाधारत्वमिति बह्ववयवसमवेतावयव्यधिकरणत्वेन सादृश्यमिह विवक्षितम् । अन्ये त्विति । भाष्यानुसारिण इत्यर्थः । दुरुपपादत्वादिति । प्रसिद्धधर्मप्रयोज्यसादृश्यस्य दुरुपपादत्वादित्यर्थः । यत्किञ्चिद्धर्मप्रयोज्यन्तु तदव्यावर्त्तकम् । एतन्मते वनमिति कुण्डशब्दस्य विशेषणम् । वनञ्चेत्तद्वाच्यमित्यर्थात् । अत एव भाष्ये वनवाची चेत्कुण्डशब्द इत्युक्तम् । विशिष्टाधारजलवाचिन इत्यस्य विशिष्टः परिच्छिन्न आधारो यस्य तादृशजलवाचिन इत्यर्थः । अयञ्जलविशेष एव वर्त्तते तत्सम्बन्धात्तु विशिष्टाधारेऽपि प्रयुज्यते । पात्रत्वात् । इत्याहुः कैयटादय इति शेषः । कुण्डं वनमिति सूत्रे वनशब्दस्य साक्षादुपादानेन तत्समुदायेत्यत्र तच्छब्दो वनपर एवेत्याशयेनाह । अपरे त्विति । इत्याहुः । शब्दस्वारस्यवेत्तारः । प्रत्यभगालम् । अवादिरिति निवृत्तम् । भगालमित्येकवचनस्योपादानाद्भालग-

SGDF Sri Gangeshwari Digital Foundation

वाचीत्यनुपपन्नमत आह । अत्र चेति । व्याख्यानमिति । कुम्भीनदालमित्यादौ दाशब्दाद्यवयवस्योदात्तस्य श्रवणमूलकव्याख्यानमित्यर्थः । भगालमित्यत्र सुपां सुपो भवन्तीति बहुवचनस्थाने एकवचनादेशो व्यत्ययो बहुलमिति व्यत्ययो वा द्रष्टव्य इति भावः । श्वितेर्नित्या । अत्रावह्वजित्युत्तरपदविशेषणमित्युचितम् । श्वितिशब्दपूर्वपदकबहुव्रीहेर्बह्वच्कत्वाव्यभिचारादित्याशयेन मूले श्वितेः परन्नित्याबह्वच्कमिति । श्वित्यंस इत्यत्रांसशब्दो रोगार्थकाम् धातुप्रकृतिकसन्प्रत्ययान्तत्वादाद्युदात्तः स एव श्वितिरंसो यस्येति बहुव्रीहौ प्रकृत्या । श्वितिललाट इति । अत्र बहुव्रीहौ प्रकृत्येति पूर्वपदप्रकृतिस्वरेणाद्युदात्तत्वम् । श्वितिशब्दस्य वर्णानान्तस्येत्याद्युदात्तत्वात् । श्वितिककुदिति । एतद्घटकः ककुच्छब्दः ककुदशब्द एव एकदेशविकृतस्यानन्यत्वादिति यो बह्वच् तदभिन्नत्वेन न श्विति ककुदित्यत्रोत्तरपदस्य नित्याबह्वच्त्वमिति भावः। गतिकारकोपपदात् । कुगतीति समास इतीति । गतिसमास इत्यर्थः । कारकोदाहरणमाह । न्टवाहसेति । इध्मप्रव्रश्चनशब्दे समासद्वयसत्त्वात्कृदुत्तरपदप्रकृतिस्वरे सत्यपि व्यवस्थामाह । प्रव्रश्चन इत्यादिना । स्वरे कृत इति । एवञ्च प्रव्रश्चनशब्दो मध्योदात्तः । णमुल्विधाविति । अव्यये यथाभिप्रेतेति । णमुल्विधावित्यर्थः । गत्यंश इति । तत्रोदात्तवतेति गतेस्तिङन्तेन समाससंज्ञायाः सम्भवादिति भावः । बाधकमिति । समासस्वरबाधकाव्ययपूर्वपदप्रकृतिस्वरस्यानवकाशत्त्वेन बाधकमित्यर्थः । तिङन्ते सावकाशत्वेन नानवकाशत्वमित्याशङ्कते । कृद्ग्रहणप्रत्याख्यानेति भाष्योल्लिखितवार्त्तिकेन प्रत्याख्याने । तदुक्तम् । गत्यादिभ्यः प्रकृतिस्वरत्वे कृद्ग्रहणानर्थक्यमन्यस्योत्तरपदस्याभावादिति । परत्वादिति । अव्ययपूर्वपदप्रकृतिस्वरापेक्षया परत्वादित्यर्थः । निवाते । गतेर्निघाते । इदम् । गतिकारकेति सूत्रम् । परत्वात् । अव्ययपूर्वपदप्रकृतिस्वरापेक्षया परत्वात् । बाधकमिति । प्रकारकमित्यादावित्यादिः । कारकोपपदांशे तु समासस्वरस्य बाधकमपवादत्वादेव । केचिदिति । अनवकाशत्व एवापवादत्वमिति वादिनः । बाध्यत्वेनाभिप्रेतं यच्छास्त्रन्तदप्राप्तियोग्ये विषये चारितार्थ्यं ह्यपवादत्वाभावप्रयोजकन्तच्चात्र नास्तीत्यव्ययपूर्वपदप्रकृतिस्वरस्यायमपवादो भवत्येवेत्याशयेनाह । अन्ये त्विति । उक्तमतयोर्द्वितीयमतमेव युक्तमित्याह । आया-

SGDF
Sri Gargeshwari Digital Foundation

दय इति सूत्रभाष्यादिति। तत्र यथा आयादय आर्द्धधातुके वेति सूत्रे यदार्द्धधातुक इति सप्तमी सा परसप्तमीति पक्षे आयादिप्रकृतेर्यदार्द्धधातुकन्तस्मिन्परे आयादीनामुत्पत्तिर्भवति अथ वा आयादिभ्यो यदार्द्धधातुकन्तस्मिन्नुत्पन्ने आयादीनान्निवृत्तिरिति विकल्पः प्रथमपक्षे गुपिजु गोपेतीष्टसिद्धावपि गोपायाञ्चकारेतीष्टन्न सिद्ध्यति द्वितीयपक्षे आयप्रत्ययान्तादकारप्रत्ययेन क्तिन्प्रत्ययस्य बाधनान्नुप्तिरिति न सिद्ध्यति जुगोपेति चेष्टन्न सिद्ध्यति गोपाञ्चकारेति विरुद्धञ्च प्राप्नोतीति दूषणमभिधाय सिद्धन्तु सार्वधातुके नित्यमिति सूत्रभङ्गेन समाहितम्। अस्मिन्पक्षेऽविशेषेणायादयः सार्वधातुके तु नित्यमिति वचनेन समाधाय यद्यविशेषेणायादिप्रकृतिभ्यो यः प्रत्ययस्तस्मिन्नायादीनामुत्पत्तिस्तदा स्यादिभिरायादीनाम्परत्वाद्बाधनम्प्राप्नोतीत्याशङ्कानवकाशा आयादयस्ते वचनाद्भविष्यन्तीत्युक्तन्ततो गोपायतीत्यत्रायप्रत्ययस्य चारितार्थ्यं शङ्कायामत्रापि शप्स्यादिः प्राप्नोतीति प्रतिपादितम्। ततो नास्त्यत्र विशेषः शपि सत्यसति वेति पूर्वपक्षिणाभिहिते अन्यदिदानीमुच्यते नास्ति विशेष इति यत्तु तदुक्तमायादीनां स्यादिभिरव्याप्तोऽवकाशः स नास्त्यवकाश इति सिद्धान्तिनोक्तन्तथा इहापि अव्ययपूर्वपदप्रकृतिस्वराप्राप्तियोग्ये विषयेऽचारितार्थ्यं गतिग्रहणस्येति तदपवादत्वमेव युक्तमिति। प्रकृतसूत्रे कृद्ग्रहणाभावेऽपि कृदन्तोत्तरपदस्य लाभो भविष्यतीत्ये तदुपपादयति। क्रियायोग इत्यादिना। क्रियापदाक्षेपे। क्रियावाचकधातुप्रकृतिकप्रत्ययघटितपदाक्षेपे। तस्यैव। धातोरेव। क्रियारूपमर्थम्प्रत्येव। असत्त्वभूता या क्रिया तद्रूपमर्थम्प्रत्येव। विशेष्यभूतक्रियाया इति। असत्त्वभूताया इति शेषः। अगृहीताभिप्रायः शङ्कते। न चेति। समाधत्ते। लिङ्गाद्यनन्वयीति। अत्र। उत्तरपदमित्यत्र। एवं चेति। गतीतिसूत्रविहितः स्वरः कृद्ग्रहणाभावे सति यत्र कृदन्तेन समासस्तत्रैवेति नियमाभावसिद्धौ चेत्यर्थः। आमन्तेन समासे इति। एवमत्र क्रमो द्रष्टव्यः। तरबन्तादत्यन्तस्वार्थिकत्वेनान्तरङ्गत्वादाम् न तु प्रशब्दस्य तरबन्तेन समासः। पदान्तरसापेक्षत्वेन बहिरङ्गत्वात्। किञ्च यस्य पृथगर्थबोधकत्वसम्भावना तेनैकार्थीभावस्य कल्पना भवति। धकृती त्वाम्रहिततरबन्तस्य क्वाप्यर्थबोधकत्वन्न दृष्टचरमिति तावन्मात्रेणैकार्थीभावासम्भवादाम उत्पत्तावेव प्रशब्देन

SGDF
Sri Gangeshwari Digital Foundation

समासः। अयञ्च समासः कुगतीत्यनेन तत्र सुपेत्यस्य निवृत्तेरामन्तेन न तु ततः सुबुत्पत्तेरपेक्षा। गतिकारकोपपदानाङ्कृदन्तेनैव समास इति नियमस्तु नास्ति किन्तु तेषाङ्कृदन्तेन यत्र समासः प्राप्नोति तत्र स सुबुत्पत्तेः प्राक् प्रवर्त्तते इत्येव नियमः। क्वचिदस्य त्याग इति त्वन्यत्। न च यत्क्रिया युक्ता इति वचनाद्यद्धातुवाच्यक्रिया युक्तास्तन्धातुम्प्रत्येवगतित्वमिति कथमामन्तेन गतिसमास इति वाच्यम्। यत्क्रिया युक्ता इत्यत्र याचासौ क्रिया चेति कर्मधारयाश्रयणात्। तम्प्रतीत्यस्य तद्वाचकशब्दम्प्रतीत्यर्थात् स चासत्त्वभूतक्रियामात्रवाचको नास्तीति कृत्वा धातुप्रकृतिकप्रत्ययोत्पत्तेरपेक्षास्त्येव। प्रणीरुन्नीरित्यत्रापि क्रियाविशिष्टकर्तुः प्रतीतिरिति नास्य क्रियामात्रवाचकत्वम्। न च प्रभवनस्य भावल्युडन्तस्य क्रियामात्रवाचकत्वमस्तीति वाच्यम्। अत्रापि द्रव्यधर्मविशिष्टस्यैव प्रतीतेः। कृदभिहितो द्रव्यवद्भवतीति भाष्यकारस्य सिद्धान्तात्। द्रव्यवद्दित्यत्र वतिर्निर्देशः प्रसिद्धो यो द्रव्यवाचको घटादिशब्दस्तदपेक्षः। यथा घटादिशब्दैर्लिङ्गसङ्ख्याकारकशक्तियुक्तस्य प्रतीतिस्तथा भावविहितकृदन्तेनापि लिङ्गाद्यन्वितस्यैवाभिधानम्। एवञ्च यत्क्रिया युक्तास्तदवाचकता पचतितरामित्यामन्तस्याप्यस्तीति भवति तेनैकार्थी भावः। एवमेव भोक्तुम्पाक इत्यत्र तुमुन्प्रत्ययः क्रियार्थायां क्रियायां विहितः सङ्गच्छते। न च प्रस्तुत्येत्यत्र क्त्वाप्रत्ययान्तेनासत्त्वभूतक्रियामात्रप्रतिपादनमस्त्येति वाच्यम्। अत्राप्युत्तरकालिकत्वादीनाङ्क्त्वाप्रत्ययद्योत्यानां सत्त्वान्न क्रियामात्रवाचकत्वमिति सिद्धान्तात्। अथ वोदात्तवता गतिमता च तिङा गतेः समास इतिवार्त्तिकेन समासः। तिङेत्यस्य तिङ्घटितेनेत्यर्थात्। इदञ्च वार्त्तिकं कुगतीत्यत्र सुप्सुपेत्यत्र च पठितमित्येतद्विहितस्य तत्पुरुषत्वाभावः। एतेन कुगतीत्यत्रोपपदमतिङिति सूत्रादतिङित्यस्यापकर्षात्तस्य च तिङन्ताघटित इत्यर्थात्कथम्पचतितरामित्यत्रामन्तेन प्रशब्दस्य कुगतीति सूत्रेण समास इति दूषणन्निरस्तम्। एकीयमतत्वेन यन्मूलकृता तरवन्तेनेत्याद्यभिहितन्तत्तु पूर्वोक्तरीत्या न युक्तमित्यरुचिवीजं स्फुटमेव वीजान्तरमप्याह। अत्रारुचीति। तथा सति। समासादाम उत्पत्तिस्वीकारे सति घान्तत्वाभावादिति। प्रत्ययग्रहणपरिभाषयेत्यादिः। प्रशब्दस्य पृथक्स्वरश्रवणे इष्टापत्तिरिति

SGDF
Sri Gargeshwari Digital Foundation

वैयात्याद्यदि ब्रूयात्तत्राप्याह । किञ्चेति । भाष्यप्रामाण्यादिति । प्रत्याख्यानेपरभाष्यप्रामाण्यादित्यर्थः । प्रपचति देश्यादावपीति । अयं स्वरो भवतीति शेषः । उपपदसमास इति । उपपदस्य समास उपपदसमासः । उपपदञ्च प्रादिस्तस्य समासः पृथग्भूतेन गतिग्रहणेन समासः । एतेन प्रशब्दादेरुपपदत्वासम्भवादिदमसङ्गतमित्यपास्तम् । तिङि चोदात्तवतीति सूत्रस्थेति । तत्र ह्यादौ तिङ्ग्रहणस्याभावे आमन्द्रैरिन्द्रहरिभिरित्यादौ मन्द्रशब्दे निघातः स्यादित्यनेन तिङ्ग्रहणस्य प्रयोजनमभिधाय यत्क्रिया युक्ता इतिवचनेन मन्द्रशब्दम्प्रति न गतित्वमितिरीत्या तत्र दोषाभावमुक्त्वा यद्योगाद्गतित्वमित्यस्य स्वीकारे यत्प्रकरोतीत्यत्र धातोरुदात्तवत्त्वाभावान्निघातो गतेर्न स्यादतस्तिङ्ग्रहणमिति सप्रयोजनन्तिङ्ग्रहणमित्यभिधाय यदि तिङ्ग्रहणङ्क्रियते आमन्द्रे न प्राप्नोति प्रपचतितराम् । प्रजल्पतितराम् । असति पुनस्तिङ्ग्रहणे क्रियाप्रधानमाख्यातन्तस्मादतिशये तरप् तदन्तात्स्वार्थे आम् एवं रीत्या यत्क्रिया युक्ता इतिवचनेन संघातम्प्रति क्रियायोगाद्भवति निघातस्तस्मान्नार्थस्तिङ्ग्रहणेन । आमन्द्रैरित्यत्र दोषपरिहारः पूर्ववत् । यत्प्रकरोतीत्यत्र दोषपरिहारस्तु या क्रिया यत्क्रियेति समासेनार्थम्प्रति गतित्वन्न चार्थे कार्यमिति तद्वाचकशब्दसामान्यग्रहणमिति प्रतिपादितम् । अत्र भाष्ये यदि तिङ्ग्रहणं क्रियते आमन्द्रे निघातो न प्राप्नोतीति दूषणाभिधानङ्कृतं यदि गतिकारकोपपदादित्यत्र कृद्ग्रहणम्प्रत्याख्यायते तदा गतीत्यादिसूत्रेणोत्तरपदप्रकृतिस्वरेण प्रशब्दस्य निघातः सिद्ध एवेति भाष्यविरोधः स्पष्टः । तस्य परिहारस्तु सहेति योगविभागेन चेत्समासस्तदा नात्र गतिकारकोपपदादित्यस्य प्राप्तिस्तस्य समासस्य तत्पुरुषत्वाभावात् । उदात्तवतीति वार्त्तिकस्यापि सहेति सूत्रे पाठात्तत्पुरुषत्वाभाव एव स्वीकार्यः । किञ्च सहेति सूत्रविहितसमाससंज्ञाविषये एकार्थीभावविकल्पस्वीकारात्तिङि चोदात्तवतीति सूत्रभाष्यीयप्रयोगे समासाभाव एव वास्तु । तथा च न गतीत्यस्य प्राप्तिः । ईदृशे विषये कुगतीति समासस्य तु न प्राप्तिस्तस्मिन् सूत्रेऽतिङ्ग्रहणस्य तिङन्ताघटित इत्यर्थकस्यापकर्षेण बोधनादिति भावः । प्रपचति देश्यमित्यत्र गतीत्यनेनोत्तरपदप्रकृतिस्वरो नेष्यते स च कृद्ग्रहणाभावे प्राप्नोतीति कृद्ग्रहणमावश्यकमिति वादिमतन्दूषयति । अत्रापीति ।

SGDF
Sri Gargeshwari Digital Foundation

भाष्यविरोध एवेति। कृद्ग्रहणप्रत्याख्यानपरभाष्यविरोध इत्यर्थः। कृद्ग्रहणाकरणेऽन्यदपीष्टं सिध्यतीत्याह। तिङन्तसमास इति। नन्वत्र कथन्तत्पुरुषत्वमत आह। नित्यमिति। अत एव। तिङन्तेन समासस्य तत्पुरुषत्वस्यापीष्टत्वादेव। गतीत्यस्य प्रवृत्तौ चाद्युदात्तत्वस्यैव श्रवणम्। तिङन्तनिघातस्य तु यच्छब्दयोगान्निपातैर्यद्यदीत्यनेन निषेध इत्याह। अत्रेति। नित्यङ्क्रीडेत्यत्र योगविभागाभावेऽप्याह। उदात्तवतेति। ननूक्तरीत्याट्स्वरस्य चेच्छ्रवणन्तदा क्व चिदन्तोदात्तश्रवणविरोध इत्यत आह। यत्र त्विति। तत्कल्प्यम्। अन्तोदात्तत्वङ्कल्प्यम्। गतिशून्यत्वात्। याहीत्यस्य गतिमत्त्वाभावात्। ननु सहेति योगविभागलब्धसमासस्य यथा तद्धितप्रकरणपठितशेष इति सूत्रस्य लक्षणाधिकारत्वोभयरूपत्वन्तथोभयरूपत्वम्भविष्यतीत्यत आह। उदात्तस्वरितयोगिन इति। उभयरूपत्वस्वीकारादेव तत्पुरुषत्वप्रयोज्यस्याव्ययपूर्वपदप्रकृतिस्वरस्येति वक्ष्यमाणग्रन्थस्य सङ्गतिः। भाष्यस्वरसादाह। परे त्विति। क्रियाया विशेष्यत्वादिति। गतित्वनिरूपकक्रियायाः प्रधानीभूताया ग्रहणात्। न चात्र कृदर्थभावस्य प्राधान्यन्न त्वसत्त्वावस्थापन्नक्रियाया इति कथमेतदिति। एकैव क्रियाविलक्षणधर्माभ्याम्भासत इत्यस्य स्वीकारात्। प्रणीरित्यत्र तु प्रत्ययार्थे कर्त्तरि तस्य विशेषणत्वमिति स्पष्टमेव। अत एव भाष्ये या चासौ क्रिया चेति यत्क्रिया युक्ता इत्यस्यार्थम्प्रदर्श्य गतित्वनिरूपकक्रियामात्रवाचकः कोऽपि शब्दो नास्तीति कृत्वा प्रणीरग्नीरित्यत्रैव स्यात् प्रणायक इत्यत्र न स्यादित्यनेन कृद्ग्रहणस्य प्रयोजने कथिते प्रणीरग्नीरित्यपि प्रणायकतुल्यमेव एषोऽपि हि कर्तृविशिष्टस्यैव वाचक इत्यनेन प्रत्याख्यानवादिनाऽन्यथा सिद्धौ प्रदर्शितायां सिद्धान्तिनाऽयन्तर्हि तस्यैवार्थस्य वाचकः प्रभवनमिति प्रदर्श्य तस्मात्कृद्ग्रहणङ्कर्त्तव्यमित्युक्तम्। कर्तृविशिष्टस्येत्यस्य कर्तृविशेषणक्रियावाचक इति प्रणायकशब्दादविशेष इत्यर्थः। प्रभवनमित्ययन्तु विशेष्यतया तस्यैवार्थस्य वाचक इति कृद्ग्रहणमावश्यकमित्यर्थः। तत एकदेशिना प्रकृतसूत्रे कृद्ग्रहणे कृते प्रपचतितरामित्यादौ गतिकारकोपपदादिति विहितस्वराभावे शङ्किते शङ्कान्तमेव भाष्यन्दर्शितम्। स्वयमेव समाधिङ्कल्पयिष्यतीति परबुद्धिपरीक्षणाय समाधिर्नोक्तः। तमेव समाधिमाह प्रपचतितरामित्यादिना तिङ्प-

SGDF
Sri Gargeshwari Digital Foundation

हणम्प्रत्याख्यातमित्यन्तेन । अतिप्रसङ्ग इति । यदि तिङि चोदात्तवतीति सूत्रे तिङ्ग्रहणन्न क्रियते तर्हि आमन्द्रैरिन्द्रहरिभिर्याहीत्यत्रातिं प्रसङ्ग इत्यर्थः । प्राग्वदेव । यत्क्रिया युक्ता इतिवचनाश्रयणेनैव । अत एव । अनुपदोक्तरीत्या कृद्ग्रहणस्यावश्यकत्वादेव । नोक्तमितीत्यस्योपसंहारग्रन्थे नोक्तमित्यर्थः । किञ्च क्रियाविशेषणकबोधजनकेनापि यत्र समासस्तत्र स्वरसिध्यर्थङ्कृद्ग्रहणङ्कर्त्तव्यम् । इदमेव ज्ञापकङ्क्रियावाचकग्रहणे प्रधानीभूतक्रियावाचकशब्दस्य ग्रहणमित्यर्थस्य । तेन भोक्तुङ्गतो भोक्तुम्पाक इत्यादौ तुमुन्न भवति । यत्तु कार्यङ्क्रियामात्रनिमित्तकन्तत्तु गुणभूतायाङ्क्रियायामपि भवति । कारकविभक्तयः कृत्वसुजादयः प्रत्ययाश्च यथा । यत्तु कैयटेन कृदभिहितो भावो द्रव्यवत्प्रकाशते तेन प्रभवनमित्येषोऽपि शब्दः स्वघटकधातुप्रतिपाद्यस्याशत्त्वभूतक्रियारूपार्थस्य प्रत्ययार्थद्रव्यधर्मलिङ्गसङ्ख्यायुक्तार्थस्य च वाचक इति क्रियामात्रस्यैव वाचको न कश्चिदिति यथा कथञ्चित्क्रियावाचकस्य ग्रहणम्भविष्यतीति कृद्ग्रहणम्प्रत्याख्यातमित्युपसंहृतन्तत्तु नोचितम् । एवं व्याख्यानेऽपि साध्यत्वावस्था सिद्धावस्थेत्यवस्थाद्वययुक्ता क्रियैव प्रदर्शिता न त्वन्यः कर्त्रादिरिति तत्रैवानेन स्वरः स्यात् न तु प्रणायक इत्यादाविति कृद्ग्रहणस्य सर्वत्र स्वरसिध्यर्थमावश्यकत्वात् । उभे वनस्पत्यादिषु । सूत्रारम्भस्य प्रयोजनमाह । वनशब्द इत्यादिना । तथा आद्युदात्त इत्यर्थः । अन्यथा । आद्युदात्तनिपातनाभावे । निपातनतुल्यत्वप्रदर्शनायाह । एवमिति । तथा च गणे सूत्रे वा न्यायप्राप्तस्वराद्विपरीतोच्चारणेन निपातनतुल्यत्वलाभ इति भावः । नपाच्छब्देन लोपाभावनिपातनमधिकमिति त्वन्यत् । आद्युदात्ताविति । नरशब्दे नकाराकारस्य धातुस्वरेणोदात्त ऋकारस्थानिकादेशत्वे नोदात्तत्वम् । शंसशब्दे तु ञित्स्वरेणेति बोध्यम् । शुनः शेप इतीति । शुन इव शेपो यस्येत्यर्थः । शेपपुच्छलाङ्गूलेष्वित्यलुक् । अन्यतरेति । एतदन्तेन शुन इत्यस्यान्तोदात्तस्य प्रदर्शनम् । स्वाङ्गेत्यनेन तु शेपशब्दस्याद्युदात्तस्य प्रदर्शनमिति विवेकः । शेपशब्दः पुरुषलिङ्गवाची । देवता द्वन्द्वे च । उभे इत्यनुवर्त्तते । तथैव । आद्युदात्त एव । अग्निशब्दस्यानुदात्तादित्वमुपपादयति । अग्निशब्द इति । अन्तोदात्त इति । अङ्गेर्नलोपश्चेति व्युत्पादनात् । द्यावा पृथिवी इति । द्यावाशब्द आ-

SGDF
Sri Gangeshwari Digital Foundation

द्युदात्तः । पृथिवीशब्दः षित्प्रत्ययान्तत्वे नान्तोदात्तो ङीषन्तत्वादतोऽनुदात्तादित्वमुत्तरपदस्य बोध्यम् । सोमारुद्राविति । सोमशब्दोऽत्र चन्द्रवाचकोऽतो नैकशेषः । यद्यप्यभ्यर्हितत्वात् रुद्रशब्दस्य पूर्वनिपातो न्याय्यस्तथापि पूर्वनिपातप्रकरणस्यानित्यत्वाद्रुद्रशब्दस्य परनिपातः । अपपाठ इति । सोमशब्दस्याद्युदात्ततयोत्तरपदस्यानुदात्तादित्वाभावेन पृथिव्यादिपर्युदासाविषयत्वात् । अन्तोदात्ताविति । शुक्रामन्थिनशब्दाविति शेषः । तथा सति । अनुदात्तादौ द्वन्द्व इत्यर्थे सति । मूले विषयविभागार्थमिति । अनुदात्तादावित्यस्याभावे उत्तरपद इत्यपि न वाच्यमुत्तरपदस्य द्वन्द्वे सद्भावस्यावश्यकतया तदुपादानस्य व्यर्थत्वात् । एवञ्च विधिप्रतिषेधयोर्विषयविभागो न स्यादिति भावः । तत्र शङ्कते । न चेत्यादिना । समाधत्ते । पूर्वसूत्र इति । यदि भवदुक्तो विषयविभाग एवाभिमतः स्यात्तदा देवताद्वन्द्वे पृथिवीरुद्रपूषमन्थिष्विति ब्रूयादित्यर्थः । ज्ञापयतीति । अन्यथा पृथिव्यादीनां व्यञ्जनादित्वादनुदात्तादित्वाभावात्पर्युदासस्य व्यर्थत्वापत्तिरिति भावः । स्वरोद्देश्यकत्वञ्च स्वरविशेषानुवादेन विहितत्वम् । स्वरितः सिध्यतीति । स्वरोद्देश्यकेति वचनाभावे मकारेण व्यवधानादुदात्तात्परत्वाभावेनोदात्तादनुदात्तस्येत्यस्य प्रवृत्तिर्न स्यादित्यर्थः । थाथघञ् । गतिकारकोपपदादिति मण्डूकप्लुत्याऽनुवर्त्तते । क्थनिति । हनिकुषिरमिकाशिभ्यः क्थनिति क्थन् । तृतीयातत्पुरुषे त्विति । पुरुभिः स्तुत इति विग्रहेण तृतीयातत्पुरुष इत्यर्थः ॥ चयः । प्रचय इत्यत्र चयशब्दः । अयं स्वरः । थाथेतिसूत्रविहितमन्तोदात्तत्वम् ॥ एवञ्च चयशब्दस्याबन्ततया निश्चयशब्दो मध्योदात्त एव भवति ॥ सुस्तुतमित्यत्र सुशब्दस्य सुः पूजायामिति कर्मप्रवचनीयत्वान्न गतित्वमिति थाथेति सूत्राप्रवृत्तावव्ययपूर्वपदप्रकृतिस्वरेणाद्युदात्तत्वमेव ॥ अयं स्वरः । उत्तरपदस्यान्तोदात्तत्वम् ॥ एतच्च यथा श्रुतसूत्रपाठेन सिध्यतीति कृष्टपच्यशब्दस्याथेति सूत्रे पठनीय इति तात्पर्यम् ॥ मतान्तरमाह । कृष्टपच्यस्येति ॥ समासनिर्द्देशात्कृतेति । गतिकारकोपपदात्कृदिति सूत्रे समासनिर्द्देशात्कृतेत्यर्थः ॥ सूपमानात् ॥ समाहारद्वन्द्वः ॥ कर्मप्रवचनीयात्सोः परत्वेऽयं स्वरो नित्याशयेनाह । अत्रापीति । अत्रापि समासनिर्द्देशाभिप्रायेण गतिकारकोपपदादित्युक्तम् इस्तुतौ गतिग्रहणमात्रस्यैव प्रयोजनम् । गतेः सोरित्यर्थात् ।

SGDF
Sri Gargeshwari Digital Foundation

एवं सति सूपमानादित्यत्र स्त्विति लुप्तपञ्चम्यन्तम्पृथक्पदमिति स्वीकारेऽपि न क्षतिः। संज्ञायामना। गतीत्यादिकं इति च वर्त्तते। इति प्राप्तमिति। तत्परत्वादनेन बाध्यत इति शेषः। अगवि संहितेत्येतद्व्याचष्टे। गोरन्यस्येति। कारकाद्दत्तश्रुतयोः। संज्ञायामिति वर्त्तते मण्डूकप्लुत्या। अत एवाह। संज्ञायामिति। नियमोऽयमिति। संज्ञायाङ्क्तान्तस्याशिषि चेद्दत्तश्रुतयोरेवेत्येवं विधो नियमोऽयमित्यर्थः। आशिषितान्तस्य वृत्तिं सूचयति। देवा एनमित्यादिना। कारकात्किमिति मूलोक्तस्य तात्पर्यमाह। कारकात्किमित्यादिना। सम्भूयादिति। रामायणपारायणस्य भावित्वे सत्येताद्दशव्यवहारी लोके दृश्यते। सौत्रस्यैवकारस्य विपरीतनियमशङ्कावारणार्थत्वमाह। मूले एवं किमित्यादिना। एवकाराभावे दत्तश्रुतयोश्चेत्कारकादेवेति नियमोऽपि सम्भाव्येत तथा चेष्टस्थले न स्यादन्तोदात्तत्वमित्याह। तेन संश्रुत इति। देवखातेति। संज्ञेयं खभ्रविशेषस्य। आशिष्येवेत्येवमत्रेष्टौ नियम इत्यभिधानमयुक्ताङ्कारकावधारणमित्यादिना दत्तश्रुतयोरेवेत्येव मन्वयस्योक्तत्वादत आह। इत्येवमप्यत्रेति। अत्र प्रमाणन्तु कारकाद्दत्तश्रुतयोरनाशिषि प्रतिषेधो वक्तव्यः। अनाहतो नदति देवदत्तः। सिद्धन्तूभयनियमात्। उभयतो नियमः करिष्यते इति भाष्यमेव। अनाहतो नदति देवदत्त इत्यत्र देवदत्तशब्दः शङ्खविशेषस्य धनञ्जयसम्बन्धिनः संज्ञा। वाक्यभेदेन द्विविधो नियमः कार्य इति भावः। शङ्खविशेषस्य यत्र संज्ञा तत्र देवा एनं देयासुरित्यर्थो न प्रतीयत इति तात्पर्यम्। अत्र कारकादिति योगमिति। तत्र संज्ञायामिति न सम्बध्यते। दूरादागत इत्यत्रागत इत्यस्य क्तान्तत्वङ्कृद्ग्रहणपरिभाषया बोध्यम्। इत्थम्भूतेन कृतम्। अत्र कृत मितिकर्मक्तान्तमतस्तृतीयाकर्मणीति सूत्रापवादत्वमस्य तत्फलमाह। भावे यदेति। अनो भावकर्म। कारकादित्यनुवर्त्तते। पूर्वोत्तरसाहचर्यादत्र योऽनशब्दः सोऽनप्रत्ययमात्रबोधक इति तदन्तविधिः। मन्क्तिन्। कारकादिति वर्त्तते। नन्वस्य कृत्स्वरापवादत्वाभिधानमसङ्गतङ्क्रीतशब्दे कृत्स्वरबाधकस्य तृतीयाकर्मणीत्यस्य प्राप्तेरत आह। क्रीतेत्विति। एवञ्च यद्यपि तत्र तृतीयेत्यस्य प्राप्तिस्तथापि कृत्स्वरस्य प्राथमिकप्राप्तिमात्रेण कृत्स्वरेत्युपात्तमिति भावः। रथवर्त्म पाणिनिकृतिरित्यनयोः कर्त्तृषष्ठ्यासमासः।

SGDF
Sri Gurgaon Digital Foundation

छन्दो व्याख्यानमित्यत्र कर्मषष्ठ्यन्तस्य । राजशयनादौ तु कर्तृषष्ठ्येति बोध्य-
म् । गणे पठिता इति । अत एव तत्र षष्ठीसमासः । सुप्सुपेति समास इति ।
समम्यन्तपूर्वपदक इति शेषः । मूलकारोक्तन्तत्पुरुषे तुल्येति प्राप्तमित्येतद्यो-
जयति । पुरुषशब्दस्येति । एतदपवादत्वम् । कृत्स्वरापवादत्वम् । ननु सुप्सुपे-
तिवाक्येन चेत्समासस्तदात्र न तत्पुरुष इत्यस्य प्राप्तिरत आह । तत्पुरु-
ष इति । कृत्स्वर इति । भवतीति शेषः । तदा नास्य प्राप्तिः सप्तम्यन्तत्व-
त्वाभावात् । प्रकृतिस्वर इति । तृतीयापूर्वपदप्रकृतिस्वर इत्यर्थः । तृतीयातत्-
कृतेति सूत्रेण समाससंज्ञायाः सत्त्वादिति भावः । व्याख्यानादिति । माष-
त्रिकलमित्यादिपदानामन्तोदात्तानान्दर्शनमूलकव्याख्यानादित्यर्थः । इदम् ।
ऊनार्थेति सूत्रम् । ननु समशब्दपूर्वपदको यत्र समासः समार्थ इत्यादौ तत्र
उत्तरपदान्तोदात्तत्वसिध्यर्थन्तृतीयाग्रहणमावश्यकम् । न हि तत्र पूर्वपदस्य
प्राप्तिः समशब्दस्य त्वत्त्वसमसिम इत्यनेन सर्वानुदात्तत्वविधानेनोदात्तस्वरित-
योगित्वाभावादिति शङ्कते । न चेति । समासस्तु तत्रार्थे न नित्यसमास इति
वार्त्तिकेन । प्रकृतिस्वराभावे । अर्थे इतिसूत्रविहितप्रकृतिस्वराभावे । समाध-
त्ते । तदभाव इति । पूर्वपदप्रकृतिस्वराभाव इत्यर्थः । इत्याहुः । ऊनार्थेति
सूत्रेऽर्थ इतिस्वरूपपरमिति वादिनः । आहुरित्येतस्सूचितामरुचिम्प्रकटयति ।
परे त्वित्यादिना । तृतीयाया इत्युपादानस्यापि चारितार्थ्यमाह । अत्रेति ।
प्रतिपदोक्तपरिभाषाभाव इति । साक्षादूनादिशब्दोपादानेन विहितो यः स-
मासस्तस्यैव ग्रहणमित्येतदर्थकपरिभाषाभाव इत्यर्थः । मासपूर्व इति । तृती-
यापूर्वपदप्रकृतिस्वरोऽत्र । मिश्रश्चानुप । तृतीयाया इति वर्त्तते । इत्येवं रूपेण
इति । पणबन्धशब्दस्य इष्टेऽर्थे रूढिरिति भावः । तद्वैयर्थ्यम् । अनुपसर्गग्रहण-
वैयर्थ्यम् । प्रतिपदोक्तसमासविधायकेऽनुपसर्गस्यैव पाठात् । ब्राह्मणमिश्र इति
प्रत्युदाहरणस्य यदा ब्राह्मणैराजकार्यसाधनाङ्गीकारे कृते सति राज्ञा कस्य
चिद्वैयत्वेनाङ्गीकारः क्रियते तदाप्रवृत्तिः । नञो गुणप्रतिषेधे । अत्र गुणशब्दो
जातिसंज्ञाक्रियातिरिक्तधर्मपरः । अलमित्यन्तद्वन्द्वस्यार्थशब्देन बहुव्रीहिः ।
क्रमेण । उदाहरणक्रमेण । मूले नञः किमिति । गुणप्रतिषेधे इत्येवास्तु प्रति-
प्रतिषेधे सत्तनञ एव दृश्यत इति प्रश्नः । त्रिगाद्भिरर्थक इत्यत्र गाद्भिर-

SGDF
Sri Gargeshwari Digital Foundation

थिकशब्दस्य विशब्देन निपातानामनेकार्थकतया नञ्समार्थेन मयूरव्यंसका-
दित्वात्समासेऽपि प्रसङ्गः स्यादित्युत्तरम्। गुणप्रतिषेधे किमिति। एतदभावे-
ऽपि नञा समासे गुणस्यैव प्रतिषेधो गम्येतेति प्रश्नः। अन्योन्याभावार्थकत्वं
यत्र नञस्तत्रान्तोदात्तत्वम्मा भूदित्युत्तरम्। किन्तु तत्राव्ययपूर्वपदप्रकृतिस्वर
एव। तत्र प्रतियोगितावच्छेदकात्यन्ताभावस्य स्वार्थावच्छिन्नप्रतियोगिताकभेद-
समनियतत्वाभिप्रायेण शङ्कते न चेति। वाच्यमिति परेणान्वयः। परत्वात्तद्धि-
ते। नञ्समासविधायकशास्त्रापेक्षया छेदादिभ्य इत्यस्य परत्वात्तद्धिते। एक-
देशद्वारकेति। गर्दभरथिकशब्दस्य योऽर्थो गर्दभरथकर्मकार्हणकर्त्ता तदेकदे-
शगर्दभरथस्य प्रतियोगित्वेनान्वयस्य विवक्षितत्वादस्त्येव तद्द्वारकं सामर्थ्य-
मिति भावः। एकदेशद्वारकसामर्थ्ये समासप्रवृत्तिस्तु विस्पष्टपटुरित्यत्र दृष्टैव।
आरोपितमिति। एते द्रव्यभेदप्रतीतौ विश्रान्तिः सूचिता प्रत्ययार्थोपसर्जनेति।
यद्यप्युभयोरेककाले यदा विवक्षा तदा न प्रत्ययार्थोपसर्जनत्वं सिद्धन्तथाप्यर्ह-
णांशे विशेषणताऽस्त्येवेति सापेक्षत्वशङ्का। स्पष्टञ्चेदमिति। न नञ्पूर्वादिति-
सूत्रे प्रतिषेधस्यानिर्देशेन कस्यायम्प्रतिषेध इत्याशङ्क्य त्वतलोः प्रतिषेध इति
समाधाने दृश्येते नञ्पूर्वात्तत्पुरुषात्त्वतलावब्राह्मणत्वमब्राह्मणतेति प्रतिपाद्य
न नञ्पूर्वादित्यधिकारसूत्रमित्यभिप्रायेणाचार्येणात्र उत्तरम्पठति। न नञ्पू-
र्वादित्युत्तरस्य प्रतिषेधः। न नञ्पूर्वादित्युत्तरस्य भावप्रत्ययस्य प्रतिषेधः क्रि-
यते। इत्येवमभिहिते पृथ्वादिभ्य इत्यादिना पारगणिताभ्यः प्रकृतिभ्य उत्तरो
भावप्रत्ययो विधीयते न च तत्र काचिन्नञ्पूर्वा प्रकृतिर्गृह्यते तदन्तविधिस्तु
नास्तिग्रहणवतेत्यनेन प्रतिषेधादिति पूर्वपक्षे यत्र साक्षादन्तशब्द उपात्तस्तत्र
प्रयोजनम्भविष्यति पत्यन्तपुरोहितादिभ्यो यगिति परेणाभिहिते यद्येतावत्प्र-
योजनं स्यात्तत्रैवायम् ब्रूयात्पत्यन्तात् यग् भवति पत्यन्तान्नञ् तत्पुरुषान्नेति स-
माधाय एवन्तर्हि ज्ञापयत्याचार्य उत्तरो भावप्रत्ययो नञ्पूर्वाद्बहुव्रीहेर्भवतीति
कथितम्। अविद्यमानाः पृथवो यस्येति विवक्षायां यथा। एवङ्कथिते नेष्यते
त्वतलावेवेष्येते इत्येवम्प्रतिपादने एवन्तर्हि ज्ञापयत्याचार्य उत्तरो भावप्रत्य-
यः सापेक्षादपि भवतीति किमेतस्य ज्ञापने प्रयोजनन्नञ्समासादन्यो भावव-
चनः स्वरोत्तरपदवृद्ध्यर्थमित्युक्तन्तदुपपन्नम्भवति। न पृथ्वोर्भाव इत्यर्थविवक्षाय

SGDF
Sri Gargeshwari Digital Foundation

नञर्थसापेक्षत्वे नासामर्थ्यादप्राप्त इमनिज्ज्ञापकाद्भवत्यप्रथिमेति । एवम्प्रकारेण नञ्पूर्वात्तत्पुरुषाद्युत्तरतद्धितविषये प्रत्ययोत्पत्तिरूपम्प्रयोजनमभिहितम् । अस्यायम्भावः । सापेक्षत्वे नासामर्थ्यादप्राप्तस्तद्धित इति न नञ्पूर्वादिति प्रतिषेधो न कार्यः स तु कृत इति ज्ञापयति ततश्च न नञ्पूर्वादिति प्रतिषेधस्य त्वतद्विषये चारितार्थ्यमिति । ततः सिद्धान्तिनोक्तमेतदपि नास्ति प्रयोजनमाचार्यप्रवृत्तिर्ज्ञापयति सर्वे एते तद्धिताः सापेक्षाद्भवन्ति । यदयन्नञो गुणप्रतिषेधे सम्पाद्यर्हहितालमर्थास्तद्धिता इत्याहेति । एवम्प्रकारेण न नञ्पूर्वादिति सूत्रम्प्रत्याख्यातम् । एवन्तत्सूत्रीयभाष्यप्रघट्टकेन नञर्थस्यैकदेशान्वयेन सापेक्षत्वेऽपि गुणप्रतिषेधग्रहणाज्ज्ञापकात्तद्धितोत्पत्तिर्भवतीत्यर्थः स्वीक्रियत इति बोध्यम् । न नञ्पूर्वेति सूत्रभाष्यस्य व्याख्यानावसरे कैयटेन तु यथोपपादितन्तद्दूषयति । यत्त्विति । तत्र हि यदयमिति प्रतीकमुपादाय कैयटेनाभिहितम् वत्सेभ्यो न हित इत्यादौ प्रतिषेधापेक्षणात्तद्धितानुत्पत्तौ नञः परस्य सम्पाद्याद्यर्थतद्धितान्तस्यान्तोदात्तविधानमनुपपन्नन्तत्कृतं सामान्येन सर्वस्तद्धितो नञर्थापेक्षादपि भवतीति ज्ञापयतीति । वत्सेभ्यो न हित इति एवं कथनेन प्रधानस्य सापेक्षत्वं स्पष्टमेव । कैयटोक्त्या नञो गुणप्रतीतिसूत्रस्य सम्पूर्णस्य ज्ञापकता लभ्यते सा न युक्तेत्याह सूत्रसार्थक्यादिति । पूर्वोक्तकैयटरीत्यार्थविवक्षायान्तन्मतसिद्धं सूत्रसार्थक्यन्तदा भवेद्यदा गुणप्रतिषेधो गम्येत तदेव तु नोपपद्यत इत्याह किञ्चेत्यादिना । स्वाभिमतङ्गुणप्रतिषेधग्रहणस्य ज्ञापकत्वमुपपादयति । भेदार्थकत्वे त्विति । न गर्दभरथमर्हतीत्यर्थे युगपद्गर्दभरथस्य नञर्थस्य च तद्धितार्थान्वयविवक्षायाम्भेदार्थकत्वं स्पष्टमेव । एवञ्च । सूक्ष्मेक्षिकायां सत्याञ्च । पश्चान्नञ्समासे । वत्सीयशब्दस्य नञा समासे । तदुदाहरणम् । सूत्रोदाहरणम् सुलभमिति । तथा च न भाष्योक्तज्ञापनसङ्गतिरिति भावः । भाष्यकारोच्चारित भाष्याक्षराणामप्यसङ्गतिः कैयटमत इत्याह । किञ्चेति । ननु न वत्सेभ्यो हित इत्यर्थविवक्षायाम् नञर्थस्य हितार्थेऽन्वयविवक्षाऽपि तु वत्सशब्दार्थे हितार्थे तु वत्सान्वयविवक्षेति सापेक्षत्वं वत्सस्यास्त्येवेति ज्ञाप्यसङ्गतिरत आह । वत्से युगपदिति । न च भवदुक्तरीत्या गुणप्रतिषेधपक्षमात्रस्य भाष्यकाराभिप्रेतत्वे यदयङ्गुणप्रतिषेध-

SGDF
Sri Gurgeshwari Digital Foundation

ग्रहणं करोतीत्येव वक्तव्ये सम्पूर्णसूत्रोपादानमनर्थकमिति वाच्यम् । अभावज्ञानस्य भावज्ञानसापेक्षसिद्धिकत्वेन प्रतियोगिप्रसिद्धिसौलभ्याय तयोश्चारणात् । इत्याहुः । भाष्याक्षरस्वारस्य वेत्तारः । यदेतस्य सूत्रस्योदाहरणमकार्णवेष्टकिकमित्यादि तत्र कथङ्गुणप्रतिषेधार्थकत्वमत्र इत्याकाङ्क्षानुत्थानाय गुणपदार्थनिर्वचनम्मूले गुणो हीत्यादि । प्रवृत्तिनिमित्तमिति । तत्त्वञ्च वाच्यत्वे सति वाच्यवृत्तित्वे सति स्वभिन्नवाच्यानधिकरणत्वम् । प्राथमिकं वाच्यपदमर्थधर्मिकशक्तिग्रहीयमुख्यविशेष्यताश्रयभिन्नपरम् । द्वितीयन्तु तदीयविषयतासामान्याश्रयपरमेव । येन सम्बन्धेन यस्य प्रवृत्तिनिमित्तताऽभिप्रेता तत्सम्बन्धावच्छिन्ना वृत्ति ऽत्र ग्राह्या । जात्याकृतिव्यक्तित्रितयस्य जात्याकृतिव्यक्तयः पदार्था इति गौतमसूत्राद्वाच्यत्वेऽपि घटादिशब्दानाञ्जातिरेव प्रवृत्तिनिमित्तन्त्वाकृतिस्तस्या अवयवसंयोगविशेषरूपायाः प्रवृत्तिनिमित्तत्वे साक्षात्तस्य संयोगस्याऽवयव्यवृत्तितया स्वाश्रयसमवेतत्वस्य प्रवृत्तिनिमित्ततावच्छेदकत्वं वाच्यञ्जातेः पवृत्तिनिमित्तत्वे तु समवायसम्बन्धस्तथेति लाघवमिति जातिरेव प्रवृत्तिनिमित्तम् । आकाशशब्दस्य शब्दावच्छिन्ने शक्तिरिति शब्दत्वे प्रवृत्तिनिमित्तताऽऽकाशशब्दस्य स्यादिति तद्वारणाय द्रव्यत्वे घटादिपदप्रवृत्तिनिमित्ततावारणाय वा वाच्यत्वे सतीति । मृन्मयव्यक्तिविशेषे घोटकोऽयमिति यत्र प्रयोगस्तत्राकृतिप्रकारकोपस्थितिसत्त्वेऽप्याकृतेः प्रवृत्तिनिमित्तता वारणाय वाच्यवृत्तित्वमिति । तदुपादाने चाकृतेर्न समवायेन वाच्यवृत्तित्वमिति नातिप्रसङ्गः । द्व्यादिद्व्यणुकसमवेतत्रसरेणावति व्याप्तिवारणाय स्वभिन्नवाच्यानधिकरणत्वस्य निवेशः । प्रमेयत्वे प्रमेयत्वरूपप्रमेयाधिकरणेऽव्याप्तिवारणाय स्वभिन्नेति । नचैवमपि प्रमेयत्वे स्वभिन्नवाच्यत्वाधिकरणत्वस्य सत्त्वादव्याप्तिरेवेति वाच्यम् । स्वसमनियतभिन्नं यच्छक्यं तदनधिकरणत्वस्य विवक्षितत्वात् । नञ्स्वर एवेति । अव्ययपूर्वपदप्रकृतिस्वर इत्यर्थः । ययतोश्चातदर्थे । तद्धिता इत्यनुवर्त्तते । वचनविपरिणामेन ययतोरित्यत्र तस्य सम्बन्धः । आकरे । भाष्यातिरिक्ते । भाष्यन्त्वत्रोदासीनमिति भावः । उक्तरीत्या । अवयवद्वारकसम्बन्धेऽपि तद्धितोत्पत्तिरित्युक्तप्रकारेण । अचकाव । गुणप्रतिषेधार्थेति । तथचापच इत्यस्य न पक्तुं शक्ता इत्यर्थोऽभिप्रेतो यत्र तत्रोदाहरणम् । पचादन्य

SGDF Sri Gargeshwari Digital Foundation

इत्यर्थविवक्षायान्तु प्रत्युदाहरणम्। दीक्षित इतीति। दीक्षा यज्ञदीक्षा। यज्ञारम्भ सङ्कल्पः। सा सञ्जाता यस्य तस्य पाको निषिद्ध इत्यर्थः। प्रकृतसूत्रे तर्षिता इति न सम्बध्यत इत्याशयेनाह। उत्तरेति। गतिकारकपूर्वत्वेऽपीति। प्रविलिख इति यथा। इगुपधलक्षणः कः। कृन्मात्रग्रहणसत्त्वात्कृद्ग्रहणपरिभाषाप्रवृत्तिः। स्वयं कृद्ग्रहणपरिभाषाप्रवृत्तेः स्थलान्तरमाह। अप्रपच इतीति। अत्र। आक्रोशे चेति सूत्रे। इति स्थितमिति। यदि प्रकृतसूत्रे तयोरनुवृत्तिः स्यात्तदा पूर्वविप्रतिषेधविचारासङ्गतिः स्पष्टैव। नन्वेवमत्र तयोरननुवृत्तौ संज्ञायामित्युत्तरसूत्रवैयर्थ्यन्तस्याप्याक्रोश एव प्रवृत्तेरत आह। संज्ञेति। तत्कार्यम्। देवकार्यम्। अत्र। कृत्य इतिसूत्रे। भाष्यसम्वादेन पूर्वत्र गुणप्रतिषेध इत्यस्यासम्बन्धेऽपि मण्डूकप्लुत्यात्र सम्बध्यते इकारादेरितीति। खिष्णुच्प्रत्ययस्य भूधातोर्विधानात्तस्योपदेश उदात्तत्वाद्वलादिलक्षणे नेडागमेन सिद्धे खिष्णुजित्यत्रेकारोच्चारणमिष्णुज्ग्रहणेन खिष्णुच्प्रत्ययस्यापि ग्रहणार्थमिति ह्यनुबन्धकत्वेऽपि न तदनुबन्धकपरिभाषाप्रवृत्तिरिति भावः। चार्वादीन् प्रदर्शयति। चारुसाध्वित्यादिना। विभाषात्वत्रनञ इत्यनुवर्त्तते तदाह। नञः परानीति। वेति शेषः। बहुव्रीहौ। अत्र प्रथमपूरणयोरित्यन्तपदार्थापेक्षयाऽवयवषष्ठी। तृतीयेति योगविभागादिति। हेतावत्र तृतीया। इदम्। योगविभागेन समास इत्येतत्। समासान्ता इत्यत्र समासपदं समासीयोत्तरपदपरमिति वादिमतेऽन्तोदात्तत्वङ्कप एव स्यात्परन्तु तन्मतन्निरासेन समासावयवत्वमेव व्यवस्थापितमिति यत्र कप् तत्रापि कपः पूर्वस्यैवोदात्तत्वम्भवतीत्याशयेनाह। समासान्तस्त्विति। सङ्ख्यायाः स्तनः। सङ्ख्यावाचकात्परः स्तनशब्दो बहुव्रीहावन्तोदात्तः स्यात्। द्विस्तनेति। पाषाणमयी प्रतिमाऽत्र विशेष्य।तेनास्वाङ्गत्वान् ङीष् न। ङीष् तत्र यत्र विशेषमाह। द्विस्तनीत्यादाविति। पक्षे। उत्तरपदस्य स्तनशब्दस्यान्तोदात्तत्वाभावे। अत्र बहुव्रीहाविति। विश्वो मित्रं यस्येतिविग्रह इत्यादिः। इत्येव भवतीति। पूर्वपदान्तोदात्तत्वमेव भवतीत्यर्थः। परत्वात्। बहुव्रीहौ प्रकृत्येतदपेक्षया परत्वात्। अन्तरशब्दस्य सर्वनामत्वेन पूर्वनिपाते प्राप्ते आह। उदाहरणेति। लक्षणलक्षितमिति। तेन स्वमङ्गमिति यौगिकस्य व्यावृत्तिः। नाव्ययदिक्श-

SGDF
Sri Gargeshwari Digital Foundation

ब्द । मुखंस्वाङ्गमिति सम्पूर्णसूत्रमनुवर्त्तते । अव्ययादिभ्यः परं स्वाङ्गवाचि मुखमन्तोदात्तन्न स्यात् । अनेन सूत्रेणान्तोदात्तत्वनिषेधे सति यः स्वरः प्रवर्त्तते तमाह । उच्चैरादीनीति । भाष्यस्वरस इति । तत्र लुङ्मुखस्वरोपचारा इत्यनेन मुखस्वरनिवृत्तेरव्ययीभावस्याव्ययत्वे प्रयोजनकथनात् । सिद्धमेव । समासस्येति सिद्धमेव । पुत्रशब्दोऽन्तोदात्त इति । फिट्स्वरेणेति शेषः । एवञ्च पूर्वपदप्रकृतिस्वरेण मध्योदात्तमेतत् । एवमुत्तरेषु यथा यथमूहनीयम् । वा जाते । अवयविनो जातशब्दस्यान्तपदार्थनिरूपिताधारत्वविवक्षया वृक्षे शाखेतिवत्सप्तमी । सुखादिस्वरूपं शृङ्गग्राहिकान्यायेनेह दर्शयति । सुखदुःखेत्यादिना । उदाहर्त्तुमुचितमिति । प्रकृतसूत्रविषयतासत्त्वादिति शेषः । एवञ्च मासपक्व इत्याद्युदाहरणम् । नञ् सुभ्याम् । उत्तरपदग्रहणमत्र सम्बध्यते एवञ्च तस्यैव कार्यित्वे प्राप्ते आह । समासान्तानामिति । कपि पूर्वमित्यस्माज् ज्ञापकादिति । यदि नञ्सुभ्यामिति पञ्चमीनिर्देशादुत्तरपदमेवेह कार्यि स्यात्तदा यत्र कप् तत्रापि कपः पूर्वस्योत्तरपदान्तस्य कार्यं सिद्धमेवेति तस्य सूत्रस्य वैयर्थ्यं स्पष्टमेव । एवञ्चोत्तरपदान्तस्य समासस्येत्यर्थस्तावतापि प्रकृतसूत्रेणाव्रीहिरित्यादावन्त्यस्यैकारादेरुदात्तत्वं सिद्धम् । यत्र च समासान्तो ऋक्पूरित्यनेन विहितस्तत्रानृच इत्यादावकाप्रत्ययस्योदात्तत्वमिति भावः । कपि पूर्वम् । पूर्वसूत्रेणोत्तरपदान्तस्य समासस्य कार्यविधानात्समासान्तानां समुदायावयवत्वेनोत्तरपदान्तसमासपदेन कबन्तस्य ग्रहणात्कप एवोदात्तत्वे प्राप्ते ततः पूर्वस्योदात्तत्वमिष्यत इत्यस्यारम्भः । एवञ्चाब्रह्मबन्धुक इत्यादौ कपः पूर्वस्योकारादेरुदात्तत्वम्भवतीति भावः । तदन्तस्य समासस्येति । अत्र समासस्येति षष्ठी कपि पूर्वमिति पूर्वापेक्षयाऽवयवत्वार्था तथा च पूर्वसूत्राद्विशेष इति बोध्यम् । ह्रस्वान्ते । उत्तरपदग्रहणं प्रकृतसूत्रे आवर्त्तते । तयोरेकमुत्तरपदावयवकं लाक्षणिकन्तदेकदेशस्योत्तरपदस्य ह्रस्वान्त इति विशेषणमित्याशयेनाह । ह्रस्वान्तोत्तरपदकसमास इति । उरपदस्येति षष्ठीप्रकृतसूत्रेऽन्त्यापेक्षया । एवञ्चाव्रीहीकः सुमाषक इत्यादौ व्रीहिशब्दावयवो यो रेफादुत्तर ईकारादिः स एवोदात्तो भवति । मूले प्रवृत्तिभेदेनेति । ह्रस्वान्तेऽन्त्यादित्येकं वाक्यम् पूर्वमित्यनुवर्त्तते । ह्रस्वः अन्त्यो यस्येति बहुव्रीहाव-

SGDF
Sri Gargeshwari Digital Foundation

न्यपदार्थे उत्तरपदं समासो वेत्याश्रयेण पूर्वत्र उत्तरपदे समासे वेति व्याख्यातम्। पूर्वमिति द्वितीयं वाक्यम्। तच्च नियमार्थम्। कपि परे यदुत्तरपदन्तद्घटितसमासेऽन्त्यादेव पूर्वमिति तेन यत् फलितन्तदाह न कपि पूर्वमिति। पुनस्तद् ग्रहणम्। पूर्वग्रहणम्। यदुक्तन्मूलेऽन्तकइत्यत्र कबन्तस्यैवेति तदुपपादयति। अन्त्यात्पूर्वं इति। एतदभावे। कस्वान्त इति सूत्राभावे। अनेन नियमेन। कस्वान्ते उत्तरपदे कपि पूर्वस्योदात्तत्वन्नेति नियमेन। कप एवोदात्तत्वमिति। कपि पूर्वमिति सूत्रस्य नियमेन व्यावृत्तौ प्राथमिकप्राप्तिकं यत्नञ्सुभ्यामिति तस्य प्रवृत्तौ कप एवोदात्तत्वमित्यर्थः। बहोर्नञ्वत्। बहुः सुवदिति। बहुशब्दः सुव्यपदेशं लभत इत्यर्थः। तथा च बहुशब्दस्य सुग्रहणे न ग्रहणे नञ्सुभ्यामितिसिद्धमेव पुनर्नञ्वदिति सूत्रान्तरप्रवृत्त्यर्थमित्याशयेनोदाहरणान्तरोपादानमिति भावः। बहुमित्र इत्यस्य बहूनि मित्राणि यस्येत्यर्थः। अत्रोत्तरपदस्य मित्रशब्दस्याद्युदात्तत्वम्भवति। पूर्वपदप्रकृतिस्वरः। सप्तम्यन्तस्य पूर्वपदस्य बहुशब्दस्य प्रकृतिस्वरः। न गुणादयो। बहोरिति वर्त्तते। अवयवा इतिश्रुतत्वाद्गुणादीनामिव विशेषणम्। न्यूनतामपाकर्तुमाह। नञ्सुभ्यावेति। एतत्। नान्तोदात्ता इति वाक्यम्। तेन। उपलक्षणत्वेन। इतीति। चेत्यस्यैतच्छेषत्वे नोभयोरप्यप्रवृत्तिरिति फलितमिति भावः। उपसर्गात् स्वाङ्गम्। उपसर्गग्रहणम्प्रादीनामुपलक्षणम्। नेति नानुवर्त्तते। अस्वरितत्वात्। तत्पुरुष इति। प्रपृष्ठ इत्यादौ तत्पुरुष इत्यर्थः। आयुधवाचिनः पर्शुशब्दस्य स्वाङ्गवाचकत्वाभावादाह। पर्शुः पार्श्वमिति। वनं समासे। समास इति पदं समाससामान्यग्रहणार्थम्। उक्तार्थकमुपसर्गग्रहणमनुवर्त्तते। स्वरः प्राप्त इति। स बाध्यत इति शेषः। इतिप्राप्तमिति। इतिसूत्रम्प्राप्तमित्यर्थः। तेन पर्यादीनाम्प्राप्तस्य प्रकृतिभावस्य प्रतिषेधः। अन्तः। लुप्तपञ्चम्यन्तमेतत्। अन्तश्च। उपसर्गग्रहणमण्डूकप्लुत्यानुवर्त्तते। अकारान्तान्तशब्दप्रकृतिकप्रथमान्तमेतत्। न निविभ्याम्। प्रथमान्तमन्त इत्यनुवर्त्तते। परेरभितो भावि। बहुव्रीहिरित्यादि। तेष्वयं विशेषः बहुव्रीहितत्पुरुषयोः पूर्वपदप्रकृतिस्वरयोः प्राप्तिरव्ययीभावे तु परिप्रत्युपापेति कूलतीरेत्यस्य वा प्राप्तिः। बहुव्रीहौ परितः कूलमस्येति परिगतङ्कूलादित्यर्थकाव्ययो भा

SGDF
Sri Gargeshwari Digital Foundation

नेत्यर्थः। प्रादस्वाङ्गम्। अस्वाङ्गवाचकत्वं शफादीनामपीत्याशयेनाह। प्रशफादय इति। प्रपदमिति प्रत्युदाहरणे पूर्वप्रकृतिस्वरः। प्रपदशब्दः पादाग्रवाची। निरुदकादीनि च। निर्गतमुदकं यस्मादितिबहुव्रीहिः। निर्गतञ्च तदुदकमिति तत्पुरुषो वा। अर्थाभावेऽव्ययीभावो वा यद्यप्यत्र सम्भाव्यते तथापि तत्रैतत्सूत्रप्रवृत्तिं विनापि समासान्तोदात्तत्वेनैव सिद्धम्। अभेर्मुखम्। मुखं स्वाङ्गमिति तु न भवति। नाव्ययीभावेति निषेधात्। अस्य सूत्रस्यापूर्वार्थत्वप्रदर्शनाय मूलेऽभिमुखा शालेति। अव्ययीभावेऽपीति। मुखं वर्जयित्वेत्यर्थकाव्ययीभावेऽपीत्यर्थः। स्फिगपूत। हरदत्तप्रामाण्यादिति। एतेन कोशादिसाधका भावो ध्वनितः। व्याख्यानात्। शिष्टकृतादिति शेषः। एवञ्च नात्र ज्ञापकापेक्षेति भावः। अपपाठ इति। वीणाया अस्वाङ्गत्वात्सिद्धेरिति शेषः। अनोरप्र। मूले प्रादिसमास इति कथमयुत्तरपदार्थस्याप्राधान्यसूचनाय। पुरुषश्च। अप्रधानशिष्ट इति। अप्राधान्येन कथित इत्यर्थः। यथा सभृत्यं राजानं पूजयेत्यत्र भृत्यानामन्वादिष्टत्वम्। अनुशब्दोपादानस्वारस्य सिद्धय इति पक्षे तु यदा देवदत्तानयने प्रवृत्तम्पुरुषम्प्रतिपश्चाद्यज्ञदत्तञ्चानयेति कथिते सति यज्ञदत्तस्यान्वादिष्टत्वम्। अतेर। अयञ्चार्थः। पदशब्दस्य कार्यित्वप्रापकशब्देन कथितोऽर्थः। भाष्यान्त्विति। अतेर्धातुलोप इति वक्तव्यम्। अकृत्यद इति ह्युच्यमाने इह च प्रसज्येत। शोभनो गार्ग्योऽतिगार्ग्य इति। इह च न स्यात्। अतिकारक। अतिपद। शक्करी इति भाष्यात्त्वित्यर्थः। अस्माद्भाष्याद्यथा श्रुतन्यासेऽतिपदेत्यत्राव्याप्तिः प्रतीयते सा भवदुक्तार्थे न स्यादिति पदशब्दस्य वर्ज्यमानत्वप्रापकं व्याख्यानमेव यथा श्रुतन्यासस्योचितमिति भावः। अतिकारक इत्यस्य कारकमतिक्रान्त इत्यर्थ इति धातोरप्रयोग एव धातुलोपः। वृत्तिविषयेतिशब्दः क्रान्तार्थवृत्तिरिति धातोर्लोपः स्पष्टः। नेरनिधाने। अनिधानेऽर्थे गम्ये इत्यर्थः। निर्गतम्मूलमस्येत्यर्थे मूलस्य भूतलान्निर्गतस्य प्रकाशता प्रतीयत इति भवत्युदाहरणम्। प्रत्युदाहरणात्तु दण्डो निहित इत्यर्थे प्रतीते प्रकाशताया न प्रतीतिः किन्तु स्थापनमात्रमिति नायं स्वर इत्याह। निशब्द इति। निशब्दस्य निधानार्थकत्वे साधकमाह। प्रादयो हीति। अत्र। समासान्तविधेरनित्यत्वे। उपाहाज। गौरादिभिरन्वाजिति वाक्यार्थः। उप-

SGDF Sri Gargeshwari Digital Foundation

गतो गौर उपगौर इत्यत्र योऽव्ययपूर्वपदप्रकृतिस्वरस्तं च न तत्पुरुष एव किन्तु समासान्तरेऽपीत्याह। बहुव्रीहेति। सोरवक्षेपणे। अवक्षेपणान्निन्दा। सुप्रत्यवसित इत्यत्र थाथादिस्वरेणैव सिद्धमिति शङ्कां वारयति। एवञ्चेति। ननु सुशब्दो यदि पूजायामस्ति तदा कथमत्रावक्षेपणप्रतीतिरत आह। अनर्थ-इति। ननु सोरित्यस्याभावे कुब्राह्मण इत्यत्र यदि प्रकृतसूत्रेणान्तोदात्तत्वन्त-दा तत्पुरुषे तुल्यार्थेति सूत्रघटकाव्ययपदेन नञ्कुनिपातानामेव ग्रहणार्थं यत्परिगणनन्तत्र कुग्रहणवैयर्थ्यापत्तिरत आह। नञ् कुनिपातेति। ईषदर्थ इति। ईषदर्थककुशब्देन यत्र समासस्तत्रावक्षेपणाविवक्षायामित्यर्थः। विभाषोत्पु-च्छे। सप्तमीस्वारस्यादाह। तत्पुरुषरूप इत्यादि। उत्पुच्छशब्दस्तत्पुरुषसं-ज्ञक इत्याशयेन यदात्वित्सूत्रेऽभिहितम्। तत्र उदिति पृथक्पदमित्याशये-नाह। केचित्त्विति। लाक्षणिकत्वादिति। णिङन्तप्रकृतिकाजन्तस्य विलम्बि-तप्रतीतिकत्वादित्यर्थः। न तत्पुरुष इति। पुच्छमुदस्यतीत्यर्थे पुच्छभाण्डेति णि-ङि चिकीर्षिते यद्यप्युपसर्गसमानाकारस्योच्छब्दस्य पृथक् कृतिस्तथाप्युच्छ-ब्दस्य पुच्छिशब्देन सामर्थ्यसम्बन्धेनेतिन्यायान्न तु तत्प्रकृतिकाजन्तेन तस्य स-म्बन्ध इति उदित्यस्यनाजन्तेन समासस्य प्रवृत्तिरित्याशयः। तदवयवक इति। अजन्तावयवकः तद्घटकः। अजन्तसमुदायघटकोऽकारान्तः पुच्छश-ब्द इत्यर्थः। अत एव। अकृतसमासान्तनिर्देशादेव। ददादेश इति। कृते स-तीति शेषः। प्रवृत्त्यर्थमिति। अस्य सूत्रस्येत्यादिः। अत्र। पदन्नित्यादेशे। अत एव। बहुव्रीहिग्रहणादेव। एवञ्च। उक्तरीत्या समासान्तभिन्नस्य वारणे च। व्याख्यानादिति। अकान्तादित्युपादानमूलकव्याख्यानादित्यर्थः। यदि नञि-ति सूत्रविहिताजन्तस्य ग्रहणं स्यात्तदा चक्रनकृप इत्यादौ प्राप्तिरेवास्य न स्यादित्यकान्तादिति व्यर्थं स्यादिति भावः। एतत्सूत्रप्रवृत्त्यभावपक्षे पूर्वपद प्रकृतिस्वरे सति यः स्वरो भवति तमाह। शुक्लगौरयोरिति। तत्र हि वा नाम-धेयस्येत्यतो वा ग्रहणानुवृत्त्याऽऽदेरुदात्तत्वाभावेऽन्तोदात्तत्वम्। इदम्। वैद-भाष्यीयव्याख्यानानुरोधेन मूलोक्तसमुच्चया इत्यस्योपादानम्। अस्योदाह-रणम्। परादिरित्यस्योदाहरणम्। अत्र ऋतशब्दस्यादिरुदात्तः। अत्र प्राप्त-इति। तस्मिन् सति ऋकाराकारस्योदात्तत्वं स्यात्। वा ग्रहणेऽनुवर्तमान इ-

SGDF
Sri Gargeshwari Digital Foundation

ति। वासमानार्थके विभाषाग्रहणेऽनुवर्त्तमान इत्यर्थः। बिभर्त्तीत्यत्र भीह्रीत्यस्याप्रवृत्तौ त्वभ्यस्तानामदिरिति भवतीति बोध्यम्।

इति समासस्वरविवरणम्।

तिङो गोत्रादीनि। गम्यमानयोरिति शेषः। गोत्रमित्यस्य। व्याख्यास्यकुलेति। सुखाकरोतीति। एवं हि कर्त्तुः स्तुतिर्भवति न तु कुत्सेति न कुत्सनग्रहणेनान्यथा सिद्धिरिति भावः। पाठविशेषणमिति व्याचष्टे। योगविभाग इति। गोत्रादीनि दर्शयति। गोत्रेत्यादिना। कुत्सितं गोत्रमिति। अत्र गोत्रशब्दो गुधृवीपचिवचियमिसदिक्षदिभ्यस्त्र इति त्रप्रत्ययान्तत्वादन्तोदात्तः। सर्वानुदात्तमिति। सर्वेऽनुदात्ता यस्मिन्नित्यर्थकमेतत्। नन्वतिङः परस्य सर्वस्यादेरित्यर्थ आदेः परस्येत्येकतराश्रयतया स्यादिति कथं सर्वानुदात्ततापदस्येत्याशङ्कायामाह। यथाश्रेति। निरूपितिमिति। तत्र हि विनिगमनाविरहात्सर्वानुदात्तत्वस्य लाभेऽपि सर्वग्रहणं स्पष्टार्थम्। अलोन्त्यस्यादेः परस्येत्यनयोस्त्वत्र न प्राप्तिः। अनुदात्तन्तिङिति श्रुतप्रथमान्तानुरोधेन पदस्येत्यस्य विभक्तिविपरिणामेन प्रथमान्तत्वकल्पनया स्थानषष्ठ्याभावादिति निरूपितमित्यर्थः। विशेषमाह। उदात्तस्वरितेति। भाष्यस्वरस इति। तत्रैकादेशस्वरोऽन्तरङ्गः सिद्धो वक्तव्य इति हि वार्त्तिकम्। उदात्तानुदात्तयोर्य आदेशस्स आन्तरतम्यात् स्वरितो भवति तस्य स्थाने एकादेश उदात्तेनेत्यनेनोदात्तः क्रियते इति मते यद्यपि ब्राह्मणास्तुदन्ति ब्राह्मणा लिखेतीति प्रयोगे शस्यान्तिशब्दावयवाकारस्य च य एकादेशस्तस्यान्तरतम्यात् स्वरितस्य तिङ्ङतिङ इति निघातविधानादुदात्तस्याप्रयोगः सिद्धस्तथापि स्वरितापवाद उदात्त एकादेश उदात्तेनेति सूत्रेण विधीयत इति दर्शने जातस्याप्युदात्तस्यासिद्धत्वात्तिङ्ङतिङ इति निघातो न स्यादिति प्रयोगे उदात्त एव श्रूयतेत्यभिप्रायेणोक्तवार्त्तिकस्य किम्प्रयोजनमिति प्रश्ने सर्वानुदात्तार्थमिति प्रयोजनमुक्तन्तेन भाष्यग्रन्थेनोदात्तस्वरितगुणयोगि तिङन्तन्निहन्यत इति पचो लभ्यते। पाको भवतीति। पचिक्रिया भवतीत्यर्थो भवतीति तिङन्तार्थभवनक्रियाविशेष्यको बोधः। तत्र भवनक्रियाम्प्रति पचिक्रियायाः कर्तृत्वात्कार-

SGDF
Sri Gargeshwari Digital Foundation

कान्वितक्रियाबोधकन्तिङन्तचयो वाक्यमिति लक्षणेनास्यैकवाक्यत्वान्निघातः स्यादित्यभिप्रायः। वार्त्तिकानुसारेणाह। वस्तुत इति। तदुक्तं भाष्ये। अतिङ्वचनमनर्थकम्। समानवाक्याधिकारादिति। अनन्वयापत्तेरिति। पदार्थैकदेशत्वे नानन्वयापत्तेरित्यर्थः। यदादय इति। सूत्रपठिता इति शेषः। पृथग्ग्रहणादिति। यदि सर्वनाम्नो यच्छब्दस्य ग्रहणं स्यात्तदा यत्र ग्रहणं न कार्यं तत्र यत्र प्रयोगस्तत्र यच्छब्दयोगादेव निषेधस्य सिद्धत्वादिति भावः। निपातानां यदादीनामर्थानाह। यद्यदार्थे चेति। एतेन। छान्दसत्वेन। अत्र समाधान्तरमाह। हन्तो इत्यादि। नेच्छब्दयोगे प्रतिषेधोदाहरणमाह। नेदेवमिति। नेच्चेच्छब्दयोरखण्डनिपातत्वं वारयति। अत्रेति। यत् कूजतीति। पच कूजतीति सर्वानुदात्तम्। परम्परासम्बन्धश्च स्वान्वय्यन्वयित्वरूपो बोध्यः। साक्षात्सम्बन्ध इति। तदन्वयित्वञ्च दधस इत्यस्येति पूर्वोक्तपरम्परासम्बन्ध इहास्तीति भावः। प्रतिषेधयुक्तत्वमुपपादयति। पूर्वमिति। लुप्तद्वितीयाकमिति। सूत्र इति शेषो बोध्यः। आद्युदात्तमिति। कुर्विति प्रत्ययस्वरेणान्तोदात्तमिति शेषः। अमर्षे इति। प्रत्युदाहरणेऽपि सम्बोधनविभक्त्यन्तमिवाङ्गशब्दो यद्यपि प्रयुज्यते तथाप्यमर्षे सति प्रयुज्यते एवञ्च प्रयोक्तृसमवेतक्रोधस्य व्यञ्जक इति प्रातिलोम्यमेव। आद्युदात्तमिति। धातुस्वरेणेति शेषः। छन्दस्यनेकमपि। हि चेत्यनुवर्त्तते। उदाहरणे यत इत्यस्य यद्यपि साक्षात्सम्बन्धो मत्तपदार्थे तथापि परम्परयाद्वयोरपि तिङन्तयोः साकाङ्क्षत्वमस्त्येव। अग्निर्हीति। अत्र हि शब्दसाकाङ्क्षत्वमजयदित्यनयोस्तयोरनेन निघातनिषेधः प्राप्तस्तथापि विशेष इत्याह। अन्तेकमिति। यावद्यथा। इत्युक्तमिति। निपातैर्यद्यदीति सूत्रव्याख्यानावसर इति शेषः। सौत्रयथा शब्दार्थमाह। यथेति। यावद्यथाभ्यामित्यस्य पञ्चम्यन्तत्वभ्रमवारणायाह। भ्यामितीति। तेन यस्मिन्वाक्ये यावद्यथाशब्दयोः परत्वन्तत्रापि निषेधसिद्धिः। देवदत्तः पचति यावदिति यथा। पूजायान्नानन्तरम्। अत्रानन्तरमिति तिङित्यस्य विशेषणम्। नेत्यपि प्रकरणप्राप्तमनुवर्त्तते। एवञ्चाभावाभावस्य प्रतियोगिरूपत्वात्प्रतिप्रसवोऽयमिति फलितमिति बोध्यम्। अनिघातनिषेधस्य। पूर्वसूत्रविहितनिषेधनिषेधस्य। एवञ्च नेति यत्नक्रान्तन्तदेवानुवर्त्तत इति सिद्धम्। एथ्योगक्षमणमि-

SGDF
Sri Gurgeshwari Digital Foundation

ति । तु पश्ये ति पूर्वसूत्र एवाहोशब्दपाठे कर्त्तव्ये पृथग्योगकरणमित्यर्थः । विषयद्वार्थं व्याचष्टे । पूर्वमिति । अहो इति त्वनुवर्त्तत एव । पुरा च परीप्सायाम् । पुराशब्दस्य तृतीयान्तत्वभ्रमन्निरस्यति । पुराशब्दोऽत्रे ति । यद्यपि सूत्रान्तरसाहचर्येण व्यवस्थापकमिति सिद्धान्तस्तथापि निपातप्रक्रमान्निपातस्य शीघ्रोपस्थितिकत्वादित्यर्थः । लुप्ततृतीयेति । सुपां सुलुगिति लुप्ततृतीयान्तमित्यर्थः । उभयोरपीति । संशयविषयार्थौ हि प्रश्नस्य विषयः संशयविषयता च परस्परं भिन्नयोर्विरुद्धयोर्वा भावाभावयोः । एवञ्चाथाहोस्विदित्येतदुपादानादुभयोः संशयविषयत्वेनोभयोः क्रियायुक्तत्वमिति भावः । के चिदिति । शब्दस्वारस्य वेत्तारः । आहोस्विच्छब्दः संशयविषयताद्योतकः । किं शब्दस्तयोः प्रश्ने । हरदत्तस्त्विति । यथा किंशब्दः क्रियायां संशयताप्रतिपादकस्तथा आहोस्विच्छब्दोऽपि स्वातन्त्र्येण प्रश्नविषयताद्योतक इति तस्याशयः । किंशब्दस्य प्रश्नार्थकत्वेन तल्लाभे सिद्धे प्रश्नग्रहणमनर्थकमित्याशयेनाह प्रश्ने किमिति । किम्पठतीति । अत्र किंशब्दः क्षेपे । मूलोक्तमप्रत्युदाहरणमयुक्तमित्याह । किमधीत इतीति । इदन्तु युक्तमिति । द्विजसामान्यस्यापठनन्न प्रतिषिद्धम् ब्रह्मचिन्तननिरतस्यापठनं हि युक्तमेवेति । मूलोक्तमेवेति । अत्रैव शब्दोपादानेन यत्र प्रतिषेधप्रतियोगित्वमुदाहरणत्वेनाभिप्रेतन्तद्वाक्यात्प्रतीयते तत्र प्रकृतसूत्राप्रवृत्तिबोधकमप्रतिषिद्धग्रहणमिति ध्वन्यते । लोपे विभाषा । क्रियेत्याद्यनुवर्त्तते । तच्च षष्ठ्या विपरिणंस्यते । अप्राप्तविभाषेयमिति । यत्र प्रयुज्यमानेन तादृशेन क्रियायोगस्तत्रैव पूर्वसूत्रस्य प्रवृत्तिरिति भावः । केचित्त्विति । योगः संश्लेषः स च द्रव्यस्यैव न शब्दस्य सम्भवत्यतः साक्षात्परम्परया वा तदर्थविषयतानिरूपितविषयताश्रयार्थकत्वरूप एव ग्राह्यः । स चाप्रयोगेऽपि सम्भवतीति भावः । एहि मन्ये प्रहासे । ननु सूत्रे मन्य इत्युत्तमान्तनिर्देशाद्यत्र प्रहासे च मन्योपपद इतिसूत्रेण पुरुषव्यत्ययस्तत्रैवास्य सूत्रस्य प्रवृत्तिर्न तु तदभाव इति प्रहास इत्यस्याभावे एहि मन्यसे इत्यत्र कथमापत्तिरत आह । सूत्र एहीत्यादि । इत्यर्थ इतीति । अत्र यद्यपि मन्यधातोरुत्तमोऽस्ति तथापि न प्रहासे चेति सूत्रविहितः किन्तु अस्मद्युत्तम इति सूत्रविहित एव । प्रहासे चेति सूत्रन्तु सामानाधिकरण्यं यत्र द्वयोस्तत्र प्रवृ-

SGDF Sri Gurgeshwari Digital Foundation

न इति भावः। एवं हि भाष्ये उक्तम्। किमर्थमिदमुच्यते। न गत्यर्थलोटा लृडित्येव सिद्धम्। नियमार्थोऽयमारम्भः। एहि मन्ये प्रहास एव। क्व मा भूत्। एहि मन्ये रथेन यास्यसीति। अस्मिन् भाष्योक्तवाक्ये यास्यसीत्यस्य निघातो भवत्येव। प्रत्युदाहरणे गत्यर्थलोटेत्यस्य प्राप्तिमुपपादयति। एहीत्यस्येत्यादि। आङ्पूर्वादिणो लोट्। सिप्। तस्य हिः। जात्वपूर्वम्। उभयत्र। विशेष्यविशेषणयोः। अनन्तरग्रहणादिति। तिङन्तस्यापूर्वमिति विशेषणञ्चेत्तदाऽऽहो देवदत्त पचतीत्यादौ पचतीत्यादेः सपूर्वत्वादेवानिघातो न भविष्यतीति तस्मिन् सूत्रेऽनन्तरशब्दं नोपाददीत कृतश्च तन्निमित्तविशेषणमित्यर्थं ज्ञापयति। पूर्ववत्। व्यत्ययेन। व्याख्यानमेवेति। आकरसम्मतं व्याख्यानमेव। आहो उताहो। अत्रानन्तरग्रहणं शेषे विभाषेत्युत्तरसूत्रे शेषपदार्थस्य स्पष्टप्रतिपत्त्यर्थमित्याह। सान्तरं हीत्यादिना। आहो उताहोशब्दस्य सूत्रमेतदर्थनिर्दिष्टस्य लुप्तपञ्चम्यन्ततया निर्दिष्टपरिभाषयैवानन्तर्यलाभेऽनन्तरग्रहणमेवेति भावः। युक्तमनन्तरग्रहणस्य प्रयोजनमन्यथा सिद्धमित्याह। नन्वपूर्वमिति। न तिङन्तविशेषणमिति। किन्तु निमित्तविशेषणमिति शेषः। एवञ्चाहो देवदत्तः पचतीत्यत्र निमित्तस्यापूर्वत्वान्निघातनिषेधः स्यादिति कर्त्तव्यमनन्तरग्रहणमिति भावः। निमित्तविशेषणस्य प्रयोजनन्तु मूल एव स्पष्टम्। गत्यर्थलोटा। स्पष्टञ्चेदम्भाष्ये इति। तत्र हि कर्त्रपेक्षया यदन्यत्कारकन्तस्यान्यत्वे आगच्छ देवदत्त ग्राममोदनम्भोक्ष्यसे इत्यादौ निघातनिषेधाप्राप्तिशङ्कायामेकदेशिना व्यक्तमेव पठितव्यम् चेत्कर्ता सर्वान्यो भवतीति समाधाने कृते ऊह्यत्वान्देवदत्तेन शालयः यज्ञदत्तेन भोक्ष्यन्त इत्यत्र कर्मण एकत्वेऽपि कर्तुर्भेदान्निषेधस्याप्राप्तिः स्यादिति परेण दूषणे कथिते सिद्धन्तु तिङोरेकद्रव्याभिधानात्। सिद्धमेतत्। कथम्। तिङोरेकद्रव्याभिधानात्। यत्र तिङ्भ्यामेकन्द्रव्यमभिधीयते तत्रेति वक्तव्यमिति सिद्धान्तिनाभिहितम्। लोट् च। अत्रानुवर्त्तमानं यत्र चेत्यादि तद्घटितवाक्यार्थमाह। गत्यर्थेति। विभाषितं सो। अत्रानुक्तमभिति सोपसर्गमिति च लोटो विशेषणम्। निषेधस्य विकल्पे विधिविकल्पः फलतीत्याशयेनाह मूले वानुदात्तमिति। अनेन कृतस्य विकल्पस्य फलमाह। पच इति। पचे। एतच्छास्त्रप्रवृत्तिपक्षे। पचे। एतत्पक्षस्य-

SGDF
Sri Gargeshwari Digital Foundation

भावपक्षे। अस्यापीति। अपिना पूर्वशास्त्रसङ्ग्रहः। आम एकान्तर। अत एव। अनन्तिकशब्दस्योभयार्थकत्वादेव। दूरत्वे एवोभयोर्विधानादिति भावः। उभयार्थकत्वे मानन्त्वनन्तिक इत्युपादानमेव। अन्यथा दूरग्रहणमेव कुर्यात्। सूत्रघटकसप्तम्यन्तस्य यत्प्रयुज्यते तत्रेति शेषः। पक्षान्तरमिति। तत्र ह्यनन्तिक इत्युच्यतेऽनन्तिकञ्च किम्। दूरमित्युक्तम्। तत्र तस्मिन् पक्षे। सामर्थ्यादिति। दूरात्प्रयुज्यते तत्र यत्प्राप्नोति तस्य प्रतिषेधोऽनेन क्रियते तच्च चैकश्रुत्यमेव प्राप्नोति न तु निघातः। एकश्रुतेर्निघातबाधकत्वात्। अत एव। अस्य सूत्रस्यैकश्रुतिबाधकत्वादेव। ननु कथमसिद्धत्वम्प्राप्नोति। एकश्रुतिविधायकस्य प्रथमाध्याये पाठादिति चेन्न। देवब्रह्मणोरनुदात्त इत्यनेन स्वरितस्योदात्तादनुदात्तस्येति सूत्रविहितस्य स्थानेऽनुदात्तत्वविधानेन तस्मादित उदात्तमिति सूत्रादिनवसूत्र्या उदात्तादनुदात्तस्य स्वरित इति सूत्रात्परत्र स्थितेः सत्त्वस्य ज्ञापनादेकश्रुतेरसिद्धत्वप्राप्तेः। नन्वस्य सूत्रस्य निघातबाधकत्वव्यवहारस्य कथमुपपत्तिरत आह। प्रकरणाच्चेति। ननु दूरे प्लुतोदात्तत्वस्यापि विधानेन तस्याप्ययम्प्रतिषेध इति स्यादत आह। प्लुतोदात्तत्वस्येति। इति वार्त्तिकादिति। एका श्रुतिर्यस्य तदेकश्रुति तस्य भाव ऐकश्रुत्यन्तस्येत्यर्थः। अस्यैकश्रुतिनिषेधबाधकत्वं मूलसम्मतिरपीत्याह। मूलेऽपीति। प्रत्याख्यानादिति। एवं हि भाष्यकृतोक्तम्। अनन्तिक इत्युच्यते अन्यच्च दूरमन्यदनन्तिकमिति। अयम्भावः। दूरे इत्येव वक्तव्ये ऽनन्तिकशब्दोपादानसामर्थ्याद्दूराभिन्नोऽर्थोऽनन्तिकशब्दस्याश्रीयते। अनन्तिकमन्तिकसदृशं यन्न दूरन्नचान्तिकन्तदित्यर्थः। आद्यः पक्ष इति। अनन्तिकशब्दे नासन्निहितमदूरञ्चोच्यत इति पक्ष इत्यर्थः। ज्यायानिति। लाघवाद्दूरशब्द एवोच्चारणीये तदनुच्चारणादिति शेषः। प्लुतोऽपि नेति। प्राप्तेरेवाभावादिति भावः। यदि तु परम्। यदि तु एते शब्दाः परे यस्मादिति बहुव्रीहिः। भाष्ये उक्तत्वं नेति। तत्र हि प्रकृतसूत्रस्य परग्रहणसहितस्य यदि तु परस्य छन्दस्यनिघातोऽन्यपरप्रतिषेधार्थं इति प्रतिपाद्य जाये स्वो रोहावैहीत्यत्र लोट् चेत्यनेन गत्यर्थलोटा लृण्नेहीत्यनेन युक्तस्य 'रोहा'वेत्यस्य निघातप्रतिषेधः प्राप्तः स नेति प्रयोजनमुक्ता यद्येदानीं रोहावेत्यनेन युक्तस्यैहीत्यस्य कस्मान्न भवति लोड् चेति। ग-

SGDF
Sri Gargeshwari Digital Foundation

त्यर्थलोटा युक्त इति प्राप्नोति इत्येवमाशङ्क्य गत्यर्थाकर्मकेति सूत्रे पृथग्रु-हेरुपादान्न रुहिर्गत्यर्थं इत्यादावुक्तम् । ततो यदि न रुहिर्गत्यर्थस्तर्हि आरो-हन्ति हस्तिनं हस्तिपकाः । आरोहयति हस्ती स्थलन्मनुष्यानित्यत्र गतिबु-द्धीत्यनेन कर्मसंज्ञा न प्राप्नोति गत्यर्थत्वाभावादिति रुहेर्गत्यर्थत्वमावश्यकम् । लोङ् चेत्यनेनाङ् पूर्वेणिण्धातुना निष्पन्नस्यैहीत्यस्य निघातप्रतिषेधस्तु न । छा न्दसत्वादिति प्रतिपादितम् । इत्याहुरिति । अत्रारुचिवीजन्तु यदि विभाषित-मिति सूत्रे एव तदभावस्तर्हि भाष्ये छान्दसत्वाभिधानमसङ्गतमिति विक-ल्पाभिधानमसङ्गतमिति । गत्यर्थाकर्मकेति सूत्रे रुहिग्रहणन्तु प्रपञ्चार्थमेवेति बोध्यम् । चनचिदिव । अनिहत एवेति प्रकृतसूत्रेण निषेधादिति शेषः । स्प-ष्टम्भाष्य इति । तत्र हि गतिग्रहणे उपसर्गग्रहणङ्कर्त्तव्यम् । इह मा भूत् । शुः क्लीकरोतिचनेत्युक्तम् । अत्रैवेत्यमभिधानमिति न । किन्तु सर्वत्रैवाष्टमिके । तदप्युक्तभाष्ये अपर आह सर्वत्रैवाष्टमिके गतिग्रह-णे उपसर्गग्रहणन्कर्त्तव्यम् । गतिर्गतौ । तिङि चोदात्तवति वर्जमिति । इह मा भूदित्यस्यागतेरिति प्रतिषेधो मा भूदित्यर्थः । सर्वत्रेत्यनेन चादिषु च । चवा योगे प्रथमेति सूत्रयोः सङ्ग्रहः । तयोरपि गतिग्रहणानुवर्त्तनात् । तिङो गो-त्रादीनीति सूत्रे कुत्सनाभीक्ष्ण्ययोरिति पाठविशेषणमिति यदुक्तन्तत्स्मा-रयति । कुत्सनेति । चादिषु च । अत्र चादिपदेन गणे पठितानाञ्चादीनाङ्ग्र-हणमिति शङ्कां वारयति । न च वाहेतीति । संनिकृष्टत्वात् । अनुदात्तमि-त्यधिकारमध्यपाठे न शीघ्रोपस्थिति कत्वात् । प्रकृतसूत्रेण देवः पचतीत्या-दौ प्रथमस्य पचतीत्यस्यैव तिङन्तस्य निघातप्रतिषेधो न तु द्वितीयस्य खा-दति चेत्यस्यापि । तस्य निघातप्राप्तेरेवाभावादित्याह उदाहरण इत्यादिना । तदाशयः । व्याख्याशयः । नियमोऽयमिति । प्रथमेत्यस्याभावेऽपि प्रथमस्य लाभे सिद्धे पुनरेतदुपादानन्नियमार्थमिति भावः । अस्येत्यस्योत्तरवाक्य इत्यनेनान्व-यः । एवञ्च प्रथमत्वमस्योपपन्नमिति भावः । इति चिद्यायाम् । चियापदार्थ-माह । धर्म इति । इयोगाभावादिति । प्रायस्य भावाद्वेत्यपि बोध्यम् विनि-योगपदार्थमाह । अनेकस्मिन्निति । समानकर्तृक इत्यस्य क्रियावाचकपदघटि तवाक्यद्वय इति शेषः । निघातनाभावश्चेति । चादिलोपे विभाषेत्यस्य वैकल्पि-

SGDF
Sri Gargeshwari Digital Foundation

त्वेन क्वचिन्निवातोदाहरणप्रदर्शनेऽपि न न्यूनतेत्यभिप्रायः। उदाहरणा-
न्तरम्। उत्तरवाक्ययोर्भवन्तीत्यादि। अन्यशब्दसाहचर्यादिकशब्दस्यान्यार्थकस्य
ग्रहणे सिद्धे समर्थाभ्यामिति व्यर्थमत आह। अत्र प्रकरण इति। तत्प्रयोजनं
यावद्यथाभ्यामिति सूत्रे यावदित्यनेन वक्ष्यमाणस्यापि ग्रहणमिति। न च नि-
पातैर्यद्यदीति सूत्रस्थनिपातग्रहणे नास्यार्थस्य ज्ञापितत्वादिदं व्यर्थमिति
वाच्यम्। स्पष्टार्थत्वात्। यद्वृत्त्यान्नित्यम्। यदि यदिति शब्दस्य वृत्तमुच्चारण-
मित्यर्थस्तदा यः पचति। यस्य पचतीत्यत्र न स्यात्। तत्प्रकृतिकविभक्त्यन्तादुच्चा-
रितादित्यर्थे डतरडतमान्तात्यतरः पचति। यतमः पचतीत्यस्मान्न स्याद्विभ-
क्तेरनुच्चारणादतो वृत्धातोरकर्मकत्वात्तस्मादधिकरणे क्तः तदन्तस्य षष्ठ्य-
न्तयच्छब्देन समासो यद्वृत्तमिति। अधिकरणवाचिना चेति प्रतिषेधस्य-
प्राप्निपातनात्। यच्छब्दो यस्मिन् पदे वर्त्तते तत्पदं यद्वृत्तं तस्मादित्यर्थः
स्वीकार्य इत्याशयेनाह। मूले यच्छब्द इत्यादि। यथा किं वृत्तञ्चिदुत्तर-
मिति सूत्रव्याख्यानावसरे विभक्त्यन्तं डतरडतमान्तञ्च किमो रूपमित्युक्तन्त-
थेहापि विवक्षितमिति कश्चिद् भ्राम्येदत आह न त्विति। भाष्ये ध्वनितमि-
ति। यत्र क्व वायुः पचति। यत्कामास्ते जुहुम इत्युदाहरणोपन्यासेन ध्वनित-
मित्यर्थः। स्पष्टप्रतिपत्तयेऽन्ते व्याख्यातञ्च भाष्ये यदस्मिन्वर्त्तते यद्वृत्तमिति।
ननु यद्वृत्तादिति पञ्चमीनिर्देशात्ततोऽव्यवहितपरस्यैव स्यादिति कथं यत्र क्व
वायुर्वातीत्युदाहरणमत आह। मूलेऽत्र व्यवहितेऽपि। यथेच्छप्रवृत्ताविति।
देशकालाद्यनपेक्ष्येष्टसाधनतां ज्ञानमात्रेण या प्रवृत्तिः सा यथेच्छप्रवृत्तिस्त-
स्याङ्गम्यमानायामित्यर्थः। तद्भ्रमादिति। भाष्यापर्यालोचनमूलकभ्रमात्।
भाष्ये हि पूजितस्यानुदात्तत्वे काष्ठादिग्रहणङ्कर्त्तव्यम्। काष्ठादिभ्यः पूजना-
दिति वक्तव्यमित्यभिहितम्। ज्ञापितमेतदिति। काष्ठादयः पूजनवचना ग्राह्या
इति बोधितमित्यर्थः। अनुदात्तमित्यस्य प्रक्रान्तत्वेऽपि पुनरेतस्मिन् सूत्रेऽनुदा-
त्तवचनमन्यो निवृत्त्यर्थम्। अत्र वृत्तिन्यासादय इति। अस्याहुरित्यनेनान्वयः।
अत एव। असमास एव प्रवृत्तेरिष्टत्वादेव। दारुणमित्यादय इति। दारुणम-
ध्यापक इत्यादय इत्यर्थः। भाष्यविरुद्धत्वादिति। मलोपश्च वक्तव्यः। दारुणा-
ध्यापकः। दारुणाभिरूपक इति भाष्यविरुद्धत्वादित्यर्थः। एवञ्च यन्मूले समा-

SGDF
Sri Gangeshwari Digital Foundation

सान्तोदात्तत्वापवाद एतत्समास इष्यत इति तद्वृत्त्यनुसारेणेति बोध्यम् । दारुणाध्यापक इति । प्रत्युदाहरणङ्कर्मधारयसंज्ञकन्द्रष्टव्यम् । सगतिरपि तिङ् । पूजनादित्यनुवर्त्तते । काष्ठादिभ्य इत्यस्यापि शेषः । निपातैर्यद्यदीति निषेधे प्राप्ते प्रतिप्रसवार्थमेतत्सूत्रम् । फलान्तरमप्याह । न लुडित्यादीति । इत्याहुरिति । कैयटादय इति शेषः । लाभार्थमिति । उत्तरसूत्रे तिङ्ग्रहणादित्यादिना प्रागुक्तमपि पुनर्दार्ढ्याय स्मारितमिति बोध्यम् । भाष्यमिति । निरूपितमेतत् । पदस्येत्यधिकारात्सगतेस्तिङन्तस्याप्राप्तेः सगतिग्रहणमिति गतेस्तिङन्तस्य च निघातोऽनेन विधीयते । प्रतिषेध एवेति । न च गतिग्रहणस्योपसर्गपरत्वे सगतिरपीत्यस्य सोपसर्गोऽपीत्यर्थः । अपिनाऽनुपसर्गस्यापि ग्रहणमिति शक्तीकरोतीत्यत्र सूत्रस्यास्य प्राप्तिरस्त्येवेति वाच्यम् । विप्रयोगस्य विशेषावगतिहेतुत्वे नानुपसर्गोऽपीत्यनेनोपसर्गसंज्ञकशब्दयोगयोग्यता यस्य धातोस्तत्प्रकृतिकतिङन्तङ्गृह्यते । तद्योगयोग्यस्य यत्र धात्वव्यवहितप्राग्गतेर्नोच्चारणं स एव ते प्राग्धातोरिति सूत्रस्वारस्यात्ताद्दृशस्तुनायमित्याशयात् । कुत्सने च सु । पदादिति निवृत्तमिति । अत्र प्रमाणन्तु कुत्सने क्रियायाः । क्रियायाः कुत्सनेइति वक्तव्यम् । कर्तुः कुत्सने माभूत् । पचति पूतिर्गिरति पूतिरिति भाष्यकारोक्तिरेव । क्रिया विशेषणत्वादिति । अयम्पूतिशब्दः कुत्सितवाची स चाभेदेन धात्वर्थफलविशेषणम् । बाहुलकादौणादिकेति यीति । वसेस्तिविति विहितस्तिब् बहुलग्रहणात्पूञः पूयीधातोर्वा स्वीकार्यः । तथा च धातुस्वरेणाद्युदात्तत्वस्य प्राप्तिरिति भावः । इदम् । चकारानुबन्धकत्वम् । अन्नदेति । यथा वा बह्वर्थमिति वचनेन बहुवचनान्तस्य तिङन्तस्य विकल्पेन निघाते बोधिते निघाताभावपक्षे पचन्ति पूतीत्यत्र पूतिशब्द आद्युदात्त एव । अभाविति । अभ्युद्धरतीत्यत्र । विशेषाभावेऽपीति । अभेः प्रातिपदिकस्वरेणान्तोदात्ततया तस्य यणादेशे कृते य उदात्तस्तच्छ्रवणकृतविशेषाभावेऽपीत्यर्थः । इति नियमादिति । यदा प्रकृतसूत्रे गताविति नास्ति तदाऽनेनैवोदात्तवति तिङन्तेऽनुदात्तत्वे सिद्धे तिङीतिसूत्रन्नियमार्थमिति भावः । ननु ते प्राग्धातोरित्यनेन गतेर्धातोरव्यवधानेन प्राक् प्रयोगविधानात्कथमत्राङो व्यवधानेन प्रयोग इत्यत आह । ते प्रागिति । प्रयोगनियमार्थत्वमिति । प्रागेव ह्युपसर्गा धातोः प्रयोक्तव्या इत्या-

SGDF
Sri Gargeshwari Digital Foundation

कारकनियमार्थत्वमित्यर्थः छन्दसि परेऽपि व्यवहिताश्चेत्यनेन व्यवधानेनाच प्रयोगेऽपि गतित्वमाङोऽस्त्येवेति भावः। संज्ञानियमार्थत्वमिति। धातोः प्राक् प्रयुज्यमाना एव गत्युपसर्गसंज्ञा भवन्ति न तु परे नापि व्यवहिता इति पक्ष इत्यर्थः। तत्प्रत्याख्यायत इति। प्रयोगनियमार्थञ्चेदनुकरणस्येति करणपरप्रतिषेधोऽनिष्टशब्दनिवृत्त्यर्थः छन्दसि परव्यवहितवचनञ्चेति गौरवाभिधानेन प्रत्याख्यायत इत्यर्थः। इहाप्युक्तम्भाष्ये। छन्दोऽर्थमिति चेन्नागतित्वात्। यत् क्रियायुक्तास्तम्प्रत्येव गत्युपसर्गसंज्ञे भवत इति। अयमेवार्थ इति। छन्दसि परेऽपि व्यवहिताश्चेति सूत्रद्वयप्रत्याख्यानपरक एवात्रत्यो ग्रन्थ इत्यर्थः। परनिमित्तानुपादान इति। यथोपसर्गस्य घञि उपसर्गादसमासेऽपीत्यादौ॰ तत्रैव यत्क्रियायुक्ता इति न्यायसञ्चारो न त्वत्रेति भावः। समर्थपरिभाषेति। येन गतेः सामर्थ्यन्तम्प्रतियो गतिः स तस्मिन्निहन्यत इत्यर्थ इति भावः। एकार्थीभाव एवेति। न चात्रैकार्थीभावस्य सम्भावना। साक्षाद्विध्युद्देश्ययोर्विधेयोद्देश्ययोर्वा तस्य स्वीकारात्। उक्तभाष्यन्त्वेवं व्याख्येयम्। यया क्रिययाऽव्यवहितपरशब्दबोध्यया युक्तास्तद्वाचकधातुम्प्रत्येव गत्यादिसंज्ञाः। प्रकृते तु यया क्रियया योगस्तत्र कस्य व्यवहितत्वेन संज्ञानियमपक्षे गतित्वाभावो येन चाव्यवधानन्तस्य क्रियावाचकत्वाभाव इति सर्वथा गतित्वाभाव इति। अत एव। साधनान्वयाप्रागुपसर्गद्योत्यार्थवृत्तित्वादेव। तिङि चोदात्त। अपवादोऽयमिति। येन नाप्राप्तिन्यायेनेत्यादिः। तदेवोपपादयति। अनुपसर्गेति। शुक्लीशब्दस्य निघातः। अनेन सूत्रेण भवतीति शेषः। तन्निवृत्तिरिति। मन्द्रशब्दस्य निवृत्तिरित्यर्थः। अयम्भावः। गतिसंज्ञायाः क्रियायोगे विधानात्तद्वाचकस्य यत्र परत्वन्तत्र निघातेन भाव्यम्मन्द्रशब्दस्तु न तादृशः। न च कृदन्तेऽतिप्रसङ्गः। तत्र सुबुत्पत्तेः प्राक् समासे कृत्स्वरथाथादिस्वरगतिस्वराणां यथायथम्प्रवृत्त्या शेषनिघातेनानुदात्तत्वकृतेः सिद्धमेवेति तिङ्ग्रहणं व्यर्थमिति। मूले परिमाणार्थमित्यस्य यत्ताविशेषावच्छिन्नसमुदायस्य परिग्रहार्थमित्यर्थः। तत्र। पूर्वोक्तार्थे निश्चिते। ध्वनितञ्चेदम्भाष्य इति। तत्र हि यदि तिङ्ग्रहणं क्रियते आमन्तेन प्राप्नोति प्रपचतितराम्। प्रजल्पतितरामित्यत्रामन्ते तिङ्ग्रहणेऽव्याप्तिमुक्त्वा तदकरणे आमन्त्रैरित्यत्राप्यापत्तिमुद्भाव्य यत्क्रियायुक्ता इति री-

SGDF
Sri Gargeshwari Digital Foundation

त्यात्तान्परिकृत्य यद्योगात्तिलन्तस्योदात्तस्य ग्रहणे पुनरपि प्रत्ययस्योदात्तस्य सद्भावो यत्र तत्राध्यासिस्तदवस्थैवेत्युक्ता नेष दोषः। यत्क्रियायुक्ता इति नैवं विज्ञायते यस्य क्रिया यत्क्रिया इति कथन्तर्हि या क्रिया यत्क्रिया यत्क्रिया युक्तास्तम्प्रतिगत्युपसर्गसंज्ञे भवत इति समाहितम्। एवञ्च गतित्वनिरूपकस्य क्रियारूपस्यार्थस्य ग्रहणेऽर्थे कार्यासम्भवात्तद्वाचिनि शब्दे परतः कार्यं विज्ञायमानन्तादृशक्रियाप्रधानं यद्यत्तत्र सर्वत्र भविष्यतीति प्रत्ययोदात्तत्वमपि भविष्यतीत्येतत्तात्पर्यकेण तादृशक्रियाबोधकघटिते तिङ्पदस्य लक्षणेति ध्वनितमिति। तत्र विशेषमाह। एते निघाता इति। संहिताधिकाराभावात्कालविलम्बेनोच्चारणञ्च चतिकरमिति भावः।

इति तिङन्तस्वरनिरूपणम्।

मूले तिङ्ङतिङ इति निघात इति। एवञ्च निहतस्य विच्छिद्य पाठे श्रवणमिति भावः। संहितायां विशेषमाह। संहितायामित्यादि। तदन्तर्भावादिति। संहिताधिकारान्तर्भावादित्यर्थः। कालव्यवायेऽपि प्रवृत्तिज्ञापनस्य फलमाह। तेनेत्यादिना। पूर्वोक्तसिद्धान्ते शङ्कते। नन्विति। विशिष्य विधानादिति। एवञ्च वैदिकवाक्ये तथोच्चारणन्तच्छाखीयानाञ्च चतिकरमिति भावः। नन्वेवमिति। प्रातिशाख्येन व्यवस्थास्वीकारे सतीत्यर्थः। उपगन्तवै इत्यत्रोपगन्तवैत्येवं। अन्वेतवैइत्यत्रानुएतवै इत्येवमवग्रहः। उत्तरखण्डेति। प्रथमे गकाराकारस्य द्वितीये त्वेकारस्य स्यात्। प्रथमे उपशब्दस्य तवैप्रत्ययान्तगन्तवैशब्देन कुगतीतिसमासेऽव्ययपूर्वपदप्रकृतिस्वरेणोकारस्योदात्तत्वे शेषनिघाते उदात्तादनुदात्तस्येति यकाराकारस्य स्वरितत्वे सति प्रचयस्य द्वितीयेऽप्येवमेवैकारस्य प्रचयप्राप्तिः। द्वितीये इण्धातोस्तवैप्रत्ययः। उभे वनस्पत्यादिषु युगपदित्यनेन पूर्वोत्तरपदयोः प्रकृतिस्वरविधानेन प्रातिशाख्यीयवचनान्तरेण व्यवस्था प्रकृते स्वीकार्येति समाधत्ते। पद्यादीनिति। अनेन प्रातिशाख्यीयवचनान्तरेणासंहितवद्भावे सति तस्यादित इत्यारभ्य नव सूत्र्या इह्नोत्कर्षेण प्रचयविधायकस्य प्रामाण्यमसंहितवद्भावेनाप्रवृत्तिरिति भावः। रब्धातम्। अत्र रब्धातममित्यवग्रहः। अजला भवन्तीरित्यत्रालला भवन्तीरित्यवग्रहः। न प्र-

SGDF
Sri Gargeshwari Digital Foundation

वर्त्तत इति। पूर्वोक्तरीत्याऽसंहितवद्भावादिति शेषः। परिग्रह इति। अवग्रहयोग्यपदघटितस्य संहितस्य क्रमकाले वेष्टनम्परिग्रहः। वेष्टकं हृति। क्रमकाले इति शब्दघटितशब्देनोच्चारणरूपं वेष्टनमेव वेष्टकमिति। अलला भवन्तीरित्यलला भवन्तीरिरिति यथा। सर्वेष्ट सिद्धिरिति। सर्वेषामिष्टानाम्प्रातिसाख्यीयवचनेन सिद्धिरित्यर्थः॥

इति प्रदर्शितरीत्या स्वरविधायकशास्त्र-प्रवृत्तिविवरणम्।

मूले अधिकारसूत्रे एते इति। उभयोरधिकारसूत्रत्वेऽपि लिङ्गमित्याशास्त्रसमाप्तेर्द्वितीयस्तु तारा धारेति यावदिति विवेकः। अत्रापि लिङ्गं शास्त्रीयम्प्रागुक्तमेव विवक्षितम्। तच्चार्थनिष्ठं तत्तच्छब्दप्रतिपाद्यम्। तत्रायं विशेषः। शब्दशक्तिस्वभावेन कस्य चित्सर्वलिङ्गप्रतिपादकता कस्य चिदेकलिङ्गप्रतिपादकता कस्य चिद्द्विलिङ्गयुक्तार्थप्रतिपादकता चेति। यद्यपि शब्दानामर्थानाञ्चानन्त्यात्प्रातिस्विकरूपेण तेषां ज्ञानं योगिनां युक्तयुञ्जानत्वेन व्यवहारयोग्यानामेव सम्भवति न त्वस्मदादीनामज्ञानाम्। तथाप्यस्मदादुद्देशेन शास्त्रप्रवृत्तेर्यथा लघुनोपायेनास्मदादीनां ज्ञानम्भवेत्तथाह। ऋकारान्ता इत्यादिना। स्त्रीतिपदमेषु सूत्रेषु सम्बध्यते तच्च भावप्रधाननिर्देशेन स्त्रीत्वपरम्। तस्य लिङ्गपदेन बहुव्रीहिसमासे स्त्रीलिङ्गा इति सामानाधिकरण्येन त व्यवहारः। मात्रादिशब्दानां विशेषत उपादानात्पच्चेति लब्धम्। अवधारणस्य तु यथालाभस्तम्प्रकारमाह। स्वस्रादिसप्तकस्यैवेति। ङीन्निषेधेन। न षट्स्वस्रादिभ्य इति सूत्रेण ङीपो निषेधेन। कर्त्रीत्यादेरिति। अनेन कर्तृपदेन यौगिकाः शब्दा ऋकारान्ताः परिग्राह्याः। रूढस्य क्रोष्टृप्रभृतिशब्दस्यादिना परिग्रह। न च सप्तैवेति वक्तव्ये पञ्चैवेति नियमानुपपत्तिरिति वाच्यम्। आदेशत्वानाक्रान्ताः पञ्चैवेत्यर्थात्। यद्यपि भाष्यसम्मते तृज्वत्क्रोष्टुरित्यादि त्रिसूत्र्याः प्रयोग नियमार्थत्वपक्षे स्त्रियामप्रवर्त्तमानस्य क्रोष्टृशब्दस्याप्यादेशत्वानाक्रान्तत्वम्। तथापि परिनिष्ठिते शब्देऽयमीकारान्त एव प्रयु-

SGDF Sri Gangeshwari Digital Foundation

च्यत इति भावः। उणादयो बहुलमिति सङ्गृहीतसाधुत्वकानां व्युत्पन्नत्वं ग्रास्त्रान्तरे प्रसिद्धमिति तदभिप्रायेणाह। अन्वू इत्यादि। अवनिः। अर्त्तिसृ-धृधम्यम्यस्यवितॄभ्योऽनिरित्यनिः। चमूरिति। कृषिचमितनिधनिसर्जिखर्जिभ्य ऊरित्यूः। दयूः। अत्र वकारस्य छ्वोरित्यूठ्। असनिभर। पूर्वसूत्रापवादोऽयम्। मिन्यन्तः। भूमि। नियो मिरित्यतो मिरित्यनुवर्त्य विहितो भुवः किदिति निः। ग्लानिः। वह्निश्रिश्रुयुद्रुग्लाहात्वरिभ्यो निदिति निः। वन्ह्यादिशब्दानां निप्रत्ययान्तत्वेन स्त्रीत्वे प्राप्ते आह। वह्निह। वृष्णिः। सृवृषिभ्यां किदिति निः। अग्निः। अङ्गेर्नलोपश्चेति निः। श्रोणियोन्यू। श्रोणिः योनिः। वह्नि-श्रीती निः। ऊर्मिः। अर्त्तेरूच्चेति निः। ईकारान्तश्च। अत्र ईकारः प्रत्यय एव। पूर्वोत्तरसाहचर्यात्। लक्ष्मीरिति। अत्र लक्षेर्मुट् चेति सूत्रेऽवितॄस्तृत-न्त्रिभ्य ईरित्यत ईरित्यस्यानुवृत्त्या तेनेकारः प्रत्ययः। एवमव्यादिधातुभ्य ई-कारप्रत्ययेऽपि स्त्रीत्वम्। तद्यथा। अवीर्नारी रजस्वला। तरीर्नौः। स्तरीर्धूमः। तन्त्रीर्वीणादेर्गुणः। न च यापोः किद्द्वे चेति सूत्रविहितेकारान्तस्यापि स्त्रीत्वा-पत्तिरिति वाच्यम्। पुंस्त्वाधिकारोक्तेन योपधः योपध इत्याभ्यामपरत्वाद्बाधात्। यूप इत्यादौ प्रथमस्य समय इत्यादौ द्वितीयस्य चारितार्थ्यात्। एवञ्च यथोप-योशब्दस्य पुंस्त्वेऽपि न क्षतिः। ऊङाबन्तश्च। ऊङुत इत्यूङ्। आब्ग्रहणे न टाब्डाब्चापाङ्ग्रहणम्। य्वन्तमेकाक्षरम्। ईकारोऽत्र प्रत्ययः। ऊकारसाहच-र्यात्। विंशत्यादिरानवतेः। विंशत्यादयः पङ्क्तिर्विंशतीति सूत्रनिर्दिष्टाः। दुन्दुभिरक्षेषु। अक्षेषु बोधनीयेषु यः प्रयुज्यत इत्यर्थः। नाभिरक्षत्रिये। क्षत्रि-भिन्ने योनाभिशब्दः प्रयुज्यते स स्त्रियां स्यात्। इयन्नाभिरिति। पुरुषावयवे इदम्। उभावन्यत्र पुंसि। इदं स्पष्टार्थम्। पूर्वसूत्रयोरक्षेष्वक्षत्रिय इत्यभिधा-नेन सिद्धेः। कथन्तर्हीति। अत्र यत्कोमलैरिति तदनुपपन्नम्। स्त्रीलिङ्गनाभि-शब्दार्थविशेषणत्वात्। सामान्य इति। लिङ्गविशेषाऽविवक्षया नपुंसककोमलै-रिति प्रसाध्य तस्य नाभिशब्दार्थविशेषणत्वं स्वीकार्यम्। विशेष्यप्रतिपादकस्य यथा पुंस्त्वन्तथास्यापि भविष्यतीत्याशयेन समाधानान्तरमाह। वस्तुतस्त्विति। चक्रमध्यक्षत्रिययोरित्यत्र चक्रमध्यञ्च क्षत्रियश्चेति द्वन्द्वः। अत एव प्राण्यङ्गके द्वयोरिति सङ्गच्छते। तलन्तः। तस्य भावस्त्वतलाविति सूत्रविहिततल्प्रत्यया

SGDF
Sri Gangeshwari Digital Foundation

न्तः स्त्रियां स्यात्। भूमिविद्युदिति। अत्राभिधानशब्दो भूम्यादिशब्दशक्यतावच्छेदकधर्मावच्छिन्नशक्तपरस्तेन प्रमेयशब्दव्यावृत्तिः। एवमग्रेऽपि बोध्यम्। यादौ नपुंसकम्। पूर्वस्यापवादः। स्थूणोर्णे नपुंसके च। चकारेण स्त्रियामित्यस्यानुकर्षणार्थमस्यात्र लेखः। प्रावृडिति। स्त्रीशब्दस्य पूर्वत्र चानुक्तत्वेऽपि स्वरितेनाधिकार इत्यस्याधिकः कार इतिव्याख्यानस्यापि प्रसिद्धत्वादत्र सम्बन्धः। दर्विविदि। दर्विशब्दो दृभ्यां विनितिविन्नन्तस्तस्मात्सर्वतोऽक्तिन्नर्थादित्येक इति विकल्पेन ङीष् दर्वी इति। तिथिनाडि। एते प्राग्वदिति। स्त्रियां स्युरित्यर्थः। पुंस्येवेति । देवासुरात्मेत्यनेन पुंस्त्वबोधकेन परत्वाद्बाधादिति भावः। भाष्यप्रयोगादिति । तेन भाष्ये णाविति सूत्रनिर्दिष्टानामबहुत्वं प्रायिकमिति कल्पते तेनान्यत्र बहुत्वाभावेऽपि न क्षतिः। क्वचिद्व्यभिचारमिति। तेन तिथिशब्दस्य पूर्वत्र यथा पुंस्त्वं प्रदर्शितन्तथाऽन्येषामन्यलिङ्गत्वेऽपि साधुत्वमिति सूचयति॥

इति स्त्र्यधिकारः।

भावार्थ एवेति। भावे यो घञ् तदन्तस्य पुंस्त्वमित्युक्तम्। एतल्लाभप्रकारमाह। नपुंसकेत्यादि। भयलिङ्गेत्यादि। पूर्वस्यापवादोऽयम्। क्यन्तो घुः। किप्रत्ययोऽन्तः परो यस्मात्तादृशो यो घुसंज्ञको धातुस्तद्घटितः पुमानित्यर्थः। देवासुर। अत्र पद्मशब्दान्तिद्वन्द्वङ्कृत्वा तस्य षष्ठीसमासोऽभिधानशब्देन कर्त्तव्यः। अभिधानशब्दः करणल्युडन्तो वाचकशब्दपरस्तेन देवादिशब्दवाच्यतावच्छेदकेत्यादि पूर्ववद्बोध्यम्। शब्द। स्वरूपापेक्षया च नपुंसकत्वम्। त्रिविष्टप। स्वर्गाभिधानत्वात्पुंस्त्वे प्राप्तेऽस्यारम्भ इति। अत एवाहामरसिंहः। क्लीबे त्रिविष्टपमिति। द्यौः स्त्रियाम्। अस्य स्वर्गाभिधानत्वात्पुंस्त्वस्य पूर्वेण प्राप्तेऽस्यारम्भः। इषुबाहू। भुजपर्यायवाचकोऽयम्। बाणकाण्डौ। शराभिधानोऽयम्। नान्त इति। नान्तप्रत्ययान्त इत्यर्थः। अभ्रन्नपुंसकमिति। मेघाभिधानविषये पूर्वस्यापवाद इत्यर्थः। लिङ्गशेषविधिरिति। लिङ्गस्य शेषोऽवशेषस्तस्य विधिः व्यापी। काण्डत्रयस्य व्यापको यदि विशेषशास्त्रेण बाधितो न स्यादित्यर्थः। नपुंसके चेति। चात् पुंसि। वसु चार्थवाचि। अर्थवा-

SGDF
Sri Gurgeshwari Digital Foundation

चि वसुशब्दो नपुंसके व द्रष्टव्यः। क्त्वन्तः। नुकारोमकारेत्संज्ञकः। मेरुः। सेतुरित्यत्र सितनिगमिमसिसच्यविधाञ्क्रुशिभ्यस्तुनिति तुन् सूर्यवाचकः प्रथमः। दारुकसेरु। जत्वादित्वाद्रुप्रत्ययान्ता एते। कंसं चाप्राणिनि। कंसमिति शब्दस्य निर्देशान्नपुंसके चेत्यस्य सबंधः। अप्राणिनि वाच्ये कंसशब्द इत्यर्थः। दिनानाह्नी। दिवसाभिधानाविमौ। खारीमानिके। मानाभिधानत्वात् पुंस्त्वे प्राप्तेऽस्यारम्भः। बहुत्वञ्चेति चकारः पुंस्त्वस्य समुच्चायकः। नाद्ययजनोपपदानि व्रणाङ्गपदानि। अत्रोपपदशब्दः पूर्वपदपरः। न तु तत्रोपपदमिति तत्संज्ञकपरः। तस्य प्राप्त्यभावात्। क्लीवत्वनिवृत्त्यर्थमिति। नपुंसकाधिकारे सुखनयनेत्यादिवक्ष्यमाणसूत्रेण विवराभिधानत्वेन क्लीवत्वप्राप्तन्तन्निवृत्त्यर्थमित्यर्थः। अमरस्त्विति। एवञ्च तन्मतेऽर्द्धर्चादिष्वयन्द्रष्टव्यः। भावे ल्युडन्तः। इदञ्च सूत्रं यद्यपि नपुंसके भावे क्तः ल्युटोचेनेन गतार्थन्तथापि स्पष्टार्थमुपात्तम्। एवमन्तग्रहणञ्चेति बोध्यम्। इध्मप्रव्रश्चन इति। अत्र करणे ल्युट्। निष्ठा च। अत्र निष्ठापदं क्तस्य बोधकम्। इदमपि सूत्रं नपुंसके भावे क्त इत्यनेन गतार्थम्। प्रत्ययग्रहणे तदन्तग्रहणम्। त्वष्यञौ तद्धितौ। भावे इत्यनुवर्त्तते। यद्यपि तस्य भाव इति सूत्रे भावशब्दः। प्रकृतिजन्यबोधीयप्रकारताश्रयधर्मपरः। भावे ल्युडन्त इत्यत्र तु भावशब्दो भावनाबोधक इति भेदस्तथापीह भावशब्दः शब्दाधिकारेणान्यार्थको द्रष्टव्यः। कर्मणि च। चाद्भावे। त्वष्यञावित्याद्यनुवर्त्तते। स्त्रीनीद्यन्नलोपश्चेति। यद्यपीदं सूत्रम्प्राग् व्याख्यातमेव। तथापीतः प्रभृतिकथितानान्नपुंसकत्वस्य स्पष्टप्रतिपत्त्यर्थमिहोपादानमिति बोध्यम्। द्वन्द्वैकत्वमिति। द्वन्द्वश्च प्राणितूर्येत्यादिना येषान्द्वन्द्वानामेकवद्भावो भवति ते द्वन्द्वा नपुंसकत्वाभिधायका बोध्या इत्यर्थः। अभाषायामिति। इदमपि सूत्रं हेमन्तशिशिरावहोरात्रे च छन्दसीतिसूत्रे छन्दसीत्युपादानेन गतार्थम्। हेमन्तशिशिरावित्यत्र तु निर्देशादेव पुंस्त्वप्रतिपादकता बोध्या। स्त्रियाञ्चेति। चेन नपुंसकमित्यनुकर्षः। विभाषा सेनेति विभाषापदोपादानेनेदमपि गतार्थम्। परवदिति। परवल्लिङ्गमिति सूत्रोपात्त इत्यर्थः। परवदितिसूत्रस्य स्मारकमिह परवदिति न त्विदमपूर्वम्। तत्पुरुष इति। द्वन्द्वस्याप्युपलक्षणम्। संख्यापूर्वा रात्रिः। संख्या-

SGDF
Sri Gargeshwari Digital Foundation

पूर्वं रात्रञ्क्लीबमित्यस्यानुवादः। द्विगुः स्त्रियाञ्चेति। चान्नपुंसकमिष्टं स-म्बध्यते। इदमपि अकारान्तोत्तरपदो द्विगुः स्त्रियामिष्टः। पश्चाद्यन्तस्य नेत्य-नेन गतार्थमत एवाह। व्यवस्थयेति। इसुसन्तः। अर्चिश्शुचिहुरुष्टपिच्छादिछर्दि-इभ्यसिः। जनेरुसिः। एतयोरुपात्तावेतौ। छदिः। स्त्रियामेव। यद्यपि छदि-रित्यस्येसन्तत्वेन नपुंसकत्वे प्राप्ते विशेषोपादानेन स्त्रियामित्यनेनैव नित्य स्त्रीत्वलाभे सिद्धे एवकारो व्यर्थः। तथापि पटलञ्छदित्यमरग्रन्थदर्शनेन सा-हचर्यान्नपुंसकत्वमपीति भ्रान्तिः स्यात्तन्निवारणायैवकारः। अत एव वक्ष्य-न्ति। अमरव्याख्यातार इति। अस्य। मुखनयनेति सूत्रस्य। सीरार्थौदनाः। सीरशब्दो हलाभिधानः। अर्थशब्दस्तु धनशब्दस्य पर्यायः। ओदनशब्दोऽन्न-वाची। भिस्साभिस्सटाशब्दौ तु दग्धानपराविति तयोः स्त्रीत्वेऽपि न चतिरि-ति। अटवी स्त्रियाम्। अयं वनाभिधानः। सङ्ख्येति। सङ्ख्यावाचीत्य-र्थः। शतायुत। अयं शतशब्दोऽनन्तवाची। शतादिरिति पूर्वसूत्रापवादोऽयम्। लक्षाकोटी। एतयोरपि सङ्ख्यावाचकत्वान्नपुंसकत्वे प्राप्ते इदम्। क्लीबेऽपी-ति। एवञ्चायमर्द्धर्चादिषु द्रष्टव्यः। शंकुः पुंसि। अस्य शंकुशब्दस्य सङ्ख्यावि-शेषवाचकत्वाच्छतादिः सङ्ख्येति नपुंसकत्वे प्राप्तेऽस्यारम्भः। सहस्रः क्व-चित्। क्व चिदिति। अर्थविशेष इत्यर्थः। सहस्रशीर्षा पुरुषः सहस्राक्षः सह-स्रपादित्यत्रानन्तवाची। नचात्र सहस्रशब्दस्यानन्तपरत्वे सङ्ख्यापरत्वाभावेन सहस्रपादित्यत्र सङ्ख्यासु पूर्वस्येति पादशब्दान्त्यलोपो न स्यादिति वाच्यम्। नियतविषयपरिच्छेदकत्वरूपसङ्ख्यात्वाभावेऽपि यथाकथञ्चित्सङ्ख्यायाः प्रतीति-रिति लोपः। वस्तुतश्छान्दसो लोप इति तूचितम्। मन् द्व्यच्कः। अत्र मन् प्रत्ययः श्रूयमाणनकारान्तः सर्वधातुभ्यो मनिनिति विहितः। चर्म वर्मेति। च-रादिधातोर्मनिन् प्रत्ययः। बाहुलकादिडभावः। अणिमादौ व्यभिचारः। दामेत्य-त्रापि सर्वधातुभ्यो मनिनित्यनेनैव मनिन्। परन्त्वयं विशेषः। उणादिप्रत्य-यान्तानां संज्ञाशब्दत्वेन याद्दशी व्युत्पत्तिर्यत्रोचिता सा कल्पनीयेति कर्त्त-र्यपि प्रत्ययः सम्भवतीति। ब्रह्मेति। बृंहेर्नोऽच्चेति मनिन् प्रत्ययः। असन्तो द्व्यच्कः। सर्वधातुभ्योऽसुनिति विहितोऽसुन्। तस्यासुनो येष्वनुवृत्तिस्तदन्ता अपि बोध्याः। चन्द्रे मोडिदिति विहितासुन् प्रत्ययान्तश्चन्द्रमस् शब्दोऽप्यसन्न-

SGDF
Sri Gargeshwari Digital Foundation

न्तः छद् शब्दो गतिकारकपूर्वस्यापि ग्रहणात् । एवमप्सरः शब्दोऽपि । चा-न्तः । त्रप्रत्ययान्तो नपुंसकं स्यात् । सर्वधातुभ्यष्ट्रन्निति त्रन्प्रत्ययो नकारानु-बन्धक इति । यात्रा मात्रा । हुयामेतिविहितस्त्रन्प्रत्ययोऽपि त्रग्रहणेन ग्राह्य-ति नपुंसकत्वे प्राप्तेऽस्यारम्भः । एवकारो न्यायसिद्धबाध्यबाधकभावानुवाद-कः । भृत्रामित्र । पूर्वस्यापवादः । यत्त्विति । दोषान्तरमित्यन्ता तदुक्तिः । म-ध्योदात्तः । मकारेकारस्य प्रत्ययादुदात्तत्वेन मध्योदात्त इति तद्भावः । चिन्त्य इति । चित्वस्य सत्त्वात् । नन्वमित्रशब्दो नैवन्तः किन्तु अमिचिमीति मिधा-तुविहितक्तान्तमित्रशब्देन नञः समासे सति सिद्ध इत्यत आह । नञ्समासे-ऽप्येवमिति । अन्तोदात्त इत्यर्थः । परवल्लिङ्गतेति । एवं सति नपुंसकत्वं स्या-त् । हरदत्तोक्तं दूषयति । तत्प्रकृतेत्यादिना । नञो जरमरेति । यदि तु न मि-त्रममित्र इति नञ्समासस्तदा न नञो जरमरमित्रेत्यस्य प्राप्तिस्तस्य बहुव्री-हिसमासे प्रवृत्तेरिति बोध्यम् । कुसुमाभिधायित्वेऽपीति । वस्तुतः कुसुमाभि-धायित्वेऽपीत्यर्थः । यदि तु कुसुमविशेषाभिधायिकोऽयन्न तु कुसुमशब्दशक्य-तावच्छेदकावच्छिन्नशक्त इति विभाव्यते तदा त्वपूर्वमेवोभयलिङ्गत्वाभिधान-मिति । मतान्तरेण । जलजशब्दस्य जलजातकुसुमान्तराभिधायकत्वमित्यभि-प्रापकमतान्तरेणेत्यर्थः । आहवसंग्रामौ पुंसि । एतयोर्युद्धाभिधायकत्वान्नपुं-सकत्वे प्राप्ते । एवमाजिशब्दोऽपि । फलजातिरिति । फलपदोपादानाद्वृक्षपर-स्यामलकीशब्दस्य क्लीबत्वेऽपि न क्षतिः । हरीतकीति । हरीतक्याः फलानि हरीतक्यः । हरीतक्यादिषु व्यक्तिरिति क्लीबत्वाभिधानात् । रथाङ्गादाविति । आदिना देवनाद्यपरिग्रहः ॥

इति नपुंसकाधिकारः ।

स्त्रीपुंसयोः । अधिकारोऽयम् । नपुंसकञ्चेति । चात्स्त्रीपुंसयोः । शलाका-वाचीति । सा च शलाका काष्ठादिनिर्मिता । अत्र मानमाह । तथा चेति । अविशिष्टलिङ्गम् । तत्तल्लिङ्गवाचकताप्रयुक्तकार्यविशेषशून्यम् । शिष्टा इति । पूर्वोक्तशब्दान्यतमत्वावच्छिन्नप्रतियोगिताकभेदवन्तः । परवदिति । विशेष्यव-दित्यर्थः । गुणवचनञ्च । परवदित्यनुवर्त्तते । कृत्याश्च । कृत्यप्रत्ययान्ताः परव-

बोध्याः। सर्वादीनि सर्वनामानि। सर्वनामसंज्ञकानि सर्वादीनि पदवद्बोध्यानि। स्पष्टार्थेति। लोकव्युत्पत्त्यैव तत्तल्लिङ्गाभिधानस्य सिद्धत्वात्। अत एव लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्येति भगवता भाष्यकृतोक्तम्। तेन यौगिकेषु शब्देषु लोकव्युत्पत्तिरेव लिङ्गाभिधाने प्रमाणमिति शिवम्॥

इति लिङ्गानुशासनविवरणम्।

इति श्रीमदनन्तकल्याणसद्गुणनिधानाखिलपण्डितसार्वभौमभूमण्डल
सञ्चारिविमलतरानवद्यसद्यशः पार्वणपीयूषभान्वगस्त्यकुलवं-
शावतंसश्रीमद्भवदेवमिश्रात्मजभैरवमिश्रकल्पितायां
शब्देन्दुशेखरटीकायामुत्तरार्द्धं समाप्तम्।

शशपक्षसिद्धिचन्द्राख्ये मन्मथे शुभवत्सरे॥
माघे मास्य सिते पक्षे मूले कामतिथौ शुभा॥ १॥
पूर्णाकारे दिनमणेरियञ्चन्द्रकलाभिधा॥
शब्देन्दुशेखरव्याख्या भैरवेण यथामति॥ २॥
कल्पिता रामकृपया प्रमोदं शिवयोः सदा॥
करोतु विदुषाञ्चैवमधिकं प्रीतिमङ्गलम्॥ ३॥

SGDF
Sri Gargeshwari Digital Foundation

SGDF
Sri Gargeshwari Digital Foundation

ಹೆಚ್ಚುವರಿ ಸಂಖ್ಯೆ.........F-778
SGDF
Sri Gargeshwari Digital Foundation

SGDF
Sri Gargeshwari Digital Foundation

SGDF